****
*
* e-text created by muktabodha indological research institute
*
* "saaktapramoda by devanandanasi.mha
*
* published "sriive.mka.te"svara press 1892
*
* data entered by the staff of muktabodha
* under the supervision of mark s. g. dyczkowski
*
* licenced for use under the creative commons attribution non-commercial licence
*
* revision 0 Feb 9 2009
*
****

श्रीः

शाक्तप्रमोदः

काल्यादिदशमहाविद्यातन्त्रात्मकः

कुमार्यादिपंचायतनदेवतानां तन्त्रैश्च समलंकृतः

शिवहरराजधानीराजभिः

श्रीराजदेवनन्दनसिंहबहादुरनराधिपैः

संगृह्य विरचितः

मुद्रक एवं प्रकाशकः

खेमराज श्रीकृष्णदास

अध्यक्ष श्रीवेंकटेश्वर प्रेस

खेमराज श्रीकृष्णदास मार्ग बोंब-ई ४०० ००४

संस्करण सन् १८९२, सम्वत् १९४९

श्रीगणेशाय नमः

अथ शाक्तप्रमोदः

नत्वा कालीङ्घ्रिपार्द्राङ्गलिकलुषहराङ्कोमलाङ्कान्तदेहाम्।
कुर्व्वे शाक्तप्रमोदं सुकृतसुमतिदं शोभनं सज्जनानाम्॥
शक्तीनां सत्सपर्यादिकमिह गदितं तत्समन्त्रन्दशानाम्।
पञ्चानान्देवतानामपि तदखिलकञ्चण्डनन्दुर्म्मतीनाम्॥

अथ श्रीकालीध्यानम्

शवारूढाम्महाभीमाङ्घोरदंष्ट्रां हसन्मुखीम्।

चतुर्भुजाङ्खड्गमुण्डवराभयकरां शिवाम्॥ १॥

मुण्डमालाधरान्देवीं ललज्जिह्वान्दिगम्बराम्।
एवं सञ्चिन्तयेत्कालीं श्मशानालयवासिनीम्॥ २॥

p. 4) अथ यन्त्रोद्धारः

आदौ त्रिकोणमालिख्य त्रिकोणन्तद्बहिर्लिखेत्।
ततो वै विलिखेन्मन्त्री त्रिकोणत्रयमुत्तमम्॥ १॥

ततस्त्रिवृत्तमालिख्य लिखेदष्टदलं ततः।
वृत्तं विलिख्य विधिवल्लिखेद्भूपुरमेककम्॥ २॥

अथ मन्त्रोद्धारः

कालीबीजत्रयम्प्रोक्त्वा लज्जाबीजद्वयन्ततः।
हूँआरौ द्वौ ततः पश्चाद्दक्षिणे कालिके ततः॥ १॥

कालीबीजत्रयन्तस्माल्लज्जाबीजद्वयं पठेत्।
द्वौ च स्वाहान्तहूङ्कारौ कालीमन्त्र उदाहृतः॥ २॥

अथ मन्त्रः

क्रीं क्रीं क्रीं ह्रीं ह्रीं हूं हूं दक्षिणे कालिके क्रीं ३ ह्रीं २
हूँ२ स्वाहा॥

अथ श्रीदक्षिणकालीसपर्यापद्धतिः

प्रथमम्पञ्चवर्णरजश्चित्रं शुद्धं स्थानं गत्वा पूजावेद्या
बहिः स्थित्वा गुरुम्प्रणम्य इष्टदेवताम्प्रणम्य दिक्पालांश्च
प्रणम्य आचम्य ततः कुशहस्तो मौनी पापशमनार्थं
श्लोकद्वयम्पठेत्। तद्यथा -

ओ देवि त्वत्प्रकृतञ्चित्तम्पापाक्रान्तमभून्मम।
तन्निस्सरन्तु चित्तान्मे पापं हूं फट् च ते नमः॥ १॥

सूर्यस्सोमो यमःकालो महाभूतानि पञ्च च॥

p. 5) एते शुभाशुभस्येह कर्मणो नव साक्षिणः

इति पठित्वा सम्प्रार्थ्य गृहे प्रविशेत्। मौनी मूलेनाचम्य

ओ वज्रोदके हूं फट् स्वाहा इति जलङ्गृहीत्वा हूं स्वाहा इति करे
आदाय ॐ ह्रीं विशुद्धसर्वपापानिशमयाशेषविकल्पमपनय हूँ
फट् स्वाहा इत्यनेन पादौ प्रक्षाल्य ॐ ह्रीं स्वाहा इति पुनराचम्य
ऐं कालिकायै नमः, ऐं कपालिन्यै नमः, ऐं कुल्लायै नमः इति
त्रिराचम्य ततो मूलेन हस्तौ प्रक्षाल्य ॐ कालिकायै नमः। ॐ
कपालिन्यै नमः इति दशहस्ताङ्गुलीभिरोष्ठौ द्विरुन्मृज्य ॐ कुल्लायै
नमः इति करं प्रक्षाल्य मूलेन
सङ्कुचिताङ्गुलीभिर्मुखतर्जन्यङ्गुष्ठाभ्यां नासिकां मूलेन
अनामिकाङ्गुष्ठाभ्याङ्कर्णमङ्गुष्ठकनिष्ठाभ्यान्नाभिन्तलेनह्
ऋदयं सर्वाङ्गुलीभिर्मस्तकं भुजौ च स्पृशेत्।
ततस्तिलकङ्कुलचन्दनादिना
ललाटोदरहृत्कण्ठदक्षपार्श्वांसकण्ठपृष्ठककुदि भुजद्वन्द्वे
मूर्द्धनि द्वादशस्वपि स्थानेषु कुर्यात्। ततो

देव्यस्त्रँविलिखेद्वाले कालीबीजन्ततो हृदि॥
शक्तिम्मध्यगताङ्कृत्वाकूर्चबीजन्न्यसेत्सुधीः

ततः सामान्यार्घ्यस्थापनङ्कुर्यात्॥

तद्यथा-स्ववामेत्रिकोणवृत्तभूपुरात्मकम्मण्डलँविलिख्य ततः ॐ
आधारशक्तिभ्यो नमः इति पुष्पाक्षतादिभिरभ्यर्च्य ॐ हः
द्वाराघ्र्यं साधयामि इत्युक्त्वा फट् इतिप्रक्षालितं
शङ्खादिपात्रन्त्रिपादिकोपरि निधाय नमः इति जलेनापूर्य

गङ्गे च यमुने चैव गोदावरिसरस्वति।
नर्मदे सिन्धुकावेरिजलेऽस्मिन्सन्निधिङ्कुरु

इतिमन्त्रेणाङ्कुशमुद्रयासूर्य मण्डलात्तीर्थन्तज्जले आवाह्य,
गन्धादिकम्प्रणवेननिःक्षिप्य, धेनुमत्स्यमुद्रे दर्शयित्वा,
प्रणवेनाष्टादशकृत्वोवाभिमन्त्र्यफडिति मन्त्रेणद्वारमभिषेचयेत्
ॐ मणिधरिणि वज्रिणि शिखरिणि सर्वलोकवशङ्करि हूंफट्स्वाहा इति
शिखाम्बध्नीयात्॥ ततो द्वारदेवताः पूजयेत् गंगणेशाय नमः,
बं बटुकाय नमः, क्षंक्षेत्रेशाय नमः, यं योगिनीभ्यो नमः
इति ऊर्ध्वं वामेदक्षे

p. 6) अध इति चतुर्दिक्षु पूजयेत् गंगङ्गायै नमः, यंयमुनायै
नमः इति शाखापार्श्वयोः लंलक्ष्म्यैनमः, संसरस्वत्यैनमः
॥ इति ऊर्ध्वे अधश्चपूजयेत्॥

ॐ ब्रह्माण्याद्यष्टमातृभ्योनमः इतिदेहल्याम्

गन्धपुष्पादिनाभ्यर्च्यततोदक्षिणाङ्गंसङ्कोचयन्

दक्षचरणमग्रे निधाय वामशाखामस्पृशन् मण्डलाभ्यन्तरे

गत्वा ॐ रक्षरक्षहूँहट्वाहा इति जलेनाभिषिच्य ॐ

पवित्रवज्रभूमेहूँहट्वाहा इत्यभिमन्त्र्य

हींआधारशक्तिकमलासनायनमः इत्यासनमभ्यर्च्यत्रिकोणँ

विलिख्य आसुरेखेवज्ररेखेहूँहट्वाहा इति मण्डलँविलिख्य तत्र

हसौं इतिप्रेतबीजँविलिख्य ह्रीं आधारशक्तिकमलासनायनमः

इत्यासनमभ्यर्च्य। ॐ अनन्ताय नमः, विमलासनायनमः,

पद्मासनायनमः इति कुशानास्तीर्य

व्याघ्राजिनकृष्णसारमृगाजिनङ्कम्बलासनँवा प्रकल्पयेत्।

तदभावेतुपञ्चविंशतिकुशनिर्मितविष्टरं शवरूपँवा प्रकल्पयेत्

॥ ह्सौंमहाप्रेतपद्मासनायनमः इत्यभ्यर्च्य तत्रासने

आत्ममन्त्रेण

उपविश्यवामोरूपरिदक्षिणपादङ्कृत्वाबद्धवीरासनः

वामपादोपरि दक्षिणोरुन्धृत्वाविपरीतँवा पूर्वाभिमुख

उत्तराभिमुखोवा-आसनन्धृत्वा मन्त्रम्पठेत्॥

आसनमन्त्रस्यमेरुपृष्ठऋषिः सुतलञ्छन्दः कूर्मोदेवता

आसनपरिग्रहेविनियोगः ॐ पृथ्वित्वयाधृतालोका देवित्वँविष्णुनाधृता

॥ त्वञ्चधारयमान्नित्यम्पवित्रङ्कुरुचासनम् इति ॐ

वास्तुपुरुषायनमः, ॐ ब्रह्मणेनमः इति नैर्ऋत्येसम्पूज्य ॐ
धर्मायनमः, ॐ ज्ञानायनमः, ॐ वैराग्याय नमः, ॐ
ऐश्वर्यायनमः इतिदिक्षुसम्पूज्य ॐ अधर्मायनमः, ॐ
अवैराग्यायनमः, ॐ अनैश्वर्यायनमः इति विदिक्षुसम्पूजयेत्॥ ॐ
हूँहट्वाहा इति मन्त्रेण ॐ ह्रींस्वाहा इतिमन्त्रेण वा
कायवाक्चित्तशोधनङ्कृत्वा रक्षरक्षहूँहट्वाहा
इत्यात्मानमभिरक्षयेत् ॐ शताभिषेके
शताभिषेकेपदेहूँहट्वाहा, ॐ पुष्पकेतुराजार्हत् पुष्पे पुष्पे
महापुष्पे सुपुष्पे पुष्पसम्भवे।

p. 7) पुष्पचयावकीर्णेहूँफट्वाहा इतिपुष्पमभिमन्त्रयेत्। अन्यानि
पूजावस्तूनिसर्वाणि
सामान्याघ्र्योदकेनाभिषिच्यधेनुमुद्रामत्स्यमुद्रे दर्शयित्वा
पुष्पाणि शुद्धानि विभावयेत्॥ वमितिजलधाराम्प्रक्षिप्य,
वह्निबीजेनवह्निप्राकारं विचिन्त्य हूँहट् इतिमन्त्रेण
चतुर्दिक्षुक्रोधदृष्ट्यानिरीक्ष्य सर्वान् विघ्नानुत्सारयेत्। तद्यथा -
सर्वविघ्नानुत्सारयहूँहट्वाहा इतिमन्त्रेण ऊर्ध्वमवलोक्य
दिव्याँह्चतुर्दिक्षुजलक्षेपेणान्तरिक्षगान् वामपार्ष्णिघातत्रयेण
भौमान् विघ्नानुत्सार्य
लाजचन्दनसिद्धार्थतिलदधिदूर्वाक्षतानामन्यतममादाय ॐ

अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः। ये
चात्रविघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया इतिपठँह्चतुर्द्दिक्षु क्षिपेत्।
ततो वामे ॐ गुरुभ्यो नमः, ॐ परमगुरुभ्योनमः, ॐ
परात्परगुरुभ्योनमः, ॐ परमेष्ठिगुरुभ्योनमः दक्षिणे ॐ
गणेशायनमः पुरतः ॐ दक्षिणकालिकायैनमः इतिप्रणमेत्॥ ततः
करशुद्धिङ्कुर्यात्॥ तद्यथा- हूँ इतिमन्त्रेणचन्दनाक्तानि
कुसुमान्यङ्गुल्यग्रेणादाय हौं इतिमन्त्रेण कराभ्याम्मर्द्दयित्वा
क्लीं इति बीजेन दक्षहस्तेन सम्मृज्य ॐ तत्सत्
इतिमन्त्रेणवामहस्तेनाघ्राय हौं इति मन्त्रेण
ऐशान्यान्दिशिपुष्पम्परित्यजेत् ॐ तेसर्वेविलयँयान्तु
येमांहिंसन्तिहिंसकाः॥ मृत्युरोगभयक्रोधाः पतन्तुरिपुमस्तके
इति मन्त्रेणवापरित्यजेत्। परित्यागश्चनाराचमुद्रया॥

अथ भूतशुद्धिः

शिरसि भैरवायऋषयेनमः। मुखे उष्णिक्छन्दसेनमः। हृदये
ॐ दक्षिणकालिकायैनमः। गुह्ये क्रींबीजायनमः। पादयोः हूँ
शक्तयेनमः। सर्वाङ्गे क्रींकीलकायनमः॥

p. 8) अथ षडङ्गन्यासः

क्रांहृदयायनमः अङ्गुलीभिस्तर्ज्जनीमध्यमानामभिः
प्रसारिताभिर्हृदयंस्पृशेत्॥ क्रींशिरसेस्वाहा
इतितर्ज्जनीमध्यमाभ्यां शिरसिस्पृशेत्॥ क्रूंशिखायैवषट्
इतिबद्धमुष्टिना अङ्गुष्ठेनशिखां स्पृशेत्॥ क्रैंकवचायहुम्
इतिमन्त्रेणव्यस्तहस्ताभ्यां सर्वाङ्गे॥ क्रौंनेत्रत्रयायवौषट्
इतितर्ज्जन्या-अनामया नेत्रे,
मध्यमयाभ्रूमध्यमेवन्नेत्रत्रयंस्पृशेत्॥ क्रः अस्त्रायफट् इति
छोटिकयादिग्बन्धनं कुर्यात्॥ एवङ्करन्यासः - क्रां-
अङ्गुष्ठाभ्यान्नमः, क्रींतर्ज्जनीभ्यां स्वाहा
क्रूंमध्यमाभ्यांव्वषट्, क्रैं-अनामिकाभ्यां हूम्,
क्रौंकनिष्ठाभ्यां वौषट्, क्रःकरतलकरपृष्ठाभ्यांफट्,
एवङ्करन्यासँविधाय दशधासप्तधापञ्चधा वा मूलेन
व्यापकन्यासङ्कुर्यात्। ततः
पूर्वोक्तक्रमेणप्राणायामत्रयँविदध्यात्॥ तद्यथा -
दक्षिणहस्ताङ्गुष्ठेनदक्षनासापुटन्निरुध्यवामनासापुटेन
मूलं षोडशवारञ्जपन्
शनैःशनैःप्राणाख्यवायुमाकृष्यशिरसिसहस्त्रारेधारयेदिति
पूरकः। दक्षहस्तानामिकातर्जन्यङ्गुष्ठैः नासापुटद्वयन्निरुध्य
मूलञ्चतुःषष्टिवारञ्जपन् कुम्भयेत्।

पुनर्द्दक्षनासापुटमङ्गुष्ठनिरोधनन्त्यक्त्वामूलन्द्वात्रिंशद्वा

रञ्जपञ्छनैः शनैस्तद्वायुं रेचयेत् इति प्राणायामत्रयम्॥

यदिसँइच्छोधनमिच्छेत्तदात्रैवकर्त्तव्यम्। तद्विधिस्तु ॐ

सिद्धाढ्यांशिवगेहिनीङ्करलसत्पाशाङ्कुशाम्भैरवीम्भक्ताभी।

स्टवरप्रदांसुकुशलां संसारबन्धच्छिदाम्॥

पीयूषाम्बुधिमन्थनोद्भवरसांसँविद्विलासां पराँ

व्वीराराधितपादुकां सुविजयान्ध्यायेज्जगन्मोहिनीम् इति ध्यात्वा ॐ

सँइदेब्रह्मसम्भूतेब्रह्मपुत्रिसदानघे। भरवानन्दतृप्त्यर्थं

पवित्राभवसर्वदा॥ ॐब्राह्मण्यैनमः स्वाहा ॐ सिद्धमूलक्रिये

देवि हीनबोधप्रबोधिनि॥ राजप्रजावशङ्करिशत्रुकण्ठनिषूदिनि।

p. 9) ऐंक्षत्रियायैनमः स्वाहा॥ ॐ

अज्ञानेन्धनदीप्ताग्निज्वालाग्निज्ञानरूपिणि॥ आनन्दस्यागमप्रीतिं

सम्यग्ज्ञानम्प्रयच्छमे॥ ह्रींवैश्यायैनमः स्वाहा॥ ॐ

नमस्यामिनमस्यामियोगमार्गप्रदर्शिनि। त्रैलोक्यविजये मातः

समाधिफलदाभव क्लींशूद्रायै नमः स्वाहा

इत्येतैर्मन्त्रैस्संशोध्य ततः ॐ अमृते अमृतोद्भवे अमृतवर्षिणि

अमृतमाकर्षय आकर्षय सिद्धिन्देहिसर्वम्मेवशमानयस्वाहा इति

मन्त्रेणाभिमन्त्रयेत्। ततः ॐ ह्रीं ह्रीं लूं अः अंडं

एंमहाघोरेशाय नमः इत्यघोरमन्त्रेणचाभिमन्त्र्यमूलमन्त्रं

सप्तवारञ्जप्त्वाश्रीष्टदेवीमावाह्यधेनुमुद्राँयोनिमुद्राञ्च

प्रदर्श्य छोटिकाभिर्दिग्बन्धनन्तालत्रयञ्च कृत्वा तत्र

श्रीष्टदेवीम्मानसोपचारैः सम्पूज्य ऐंगुरुपादुकाभ्यो नमः

इतिमन्त्रेणब्रह्मरन्ध्रे श्रीगुरुन्त्रिधातर्पयेत्

मूलेनहृत्कमलेश्रीष्टदेवताम्पञ्चधातर्पयेत्। ततः स्वीकारः ऐँ

आत्मतत्त्वेन आत्मतत्त्वं शोधयामिस्वाहा,

ऐंविद्यातत्त्वेनविद्यातत्त्वंशोधयामिस्वाहा,

ऐंशिवतत्त्वेनशिवतत्त्वंशोधयामिस्वाहा मूलमुच्चार्य

सर्वतत्त्वेनसर्वतत्त्वंशोधयामिस्वाहा

ऐंवदवदवाग्वादिनिममजिह्वाग्रेस्थिरा भवसर्वसत्त्ववशङ्करि

स्वाहा इतिमुखेनजाठराग्नौजुहुयात्मूलमन्त्रेण सर्वम्पिबेत्। ततः

स्तुवीत

सँविद्देविगरीयसीगुणमयीवैगुण्यविध्वंसिनीमायामोहमदान्धक्

आरशमनीतापत्रयोन्मूलिनी॥

वाग्देवीवदनाम्बुजैकरसिकासम्बोधिनीदीपिकाब्रह्मज्ञानविवेकसिद्धू

अविजयीविज्ञानमूर्त्तैर्नमः॥ १॥

सँविदासवयोर्म्मध्ये सँविदेवगरीयसी॥

भयनाशाय निर्ग्गन्धाविख्यातामोदकारिणी॥ २॥

इतिस्तुत्वाश्रीगुरुं श्रीष्टदेवताञ्चप्रणम्यऋष्यादिन्यासं,

षडङ्गन्यासं, करन्यासञ्चकुर्यात्। तद्यथा-

शिरसिभैरवायऋषयेनमः, मुखे-उष्णिक्छन्दसेनमः, हृदये ॐ
दक्षिणाकालिकायैनमः, गुह्येक्रींबीजायनमः, पादयोः हूँहक्तये
नमः, सर्वाङ्गे क्रींकीलकायनमः॥ अथ षडङ्गन्यासः॥
क्रांहृदयाय नमः,

p. 10) क्रींशिरसेस्वाहा, क्रूंशिखायैवषट्, क्रैंकवचायहुम्,
क्रौंनेत्रत्रयायवौषट्, क्रःअस्त्रायफट्॥ एवंकरन्यासः॥ क्रां-
अंगुष्ठाभ्यांनमः, क्रींतर्ज्जनीभ्यांस्वाहा,
क्रूंमध्यमाभ्यांवषट्, क्रैं-अनामिकाभ्यांहुम्,
क्रौंकनिष्ठाभ्यांवौषट्, क्रःकरतलकरपृष्ठाभ्यांफट्॥
एवं करन्यासँविधायभूतशुद्धिङ्कुर्यात्॥
अङ्गेकरावुत्तानीकृत्यनिश्चलचित्तः सोहम्
इतिमन्त्रेणप्रबोधिताङ्कुण्डलिनीम्मूलाधारात् सुषुम्नावर्त्मना
स्वाधिष्ठाने मणिपूरेऽनाहतेक्रमेणानीय तत्र
स्थितञ्जीवम्प्रदीपकलिकाकारँविचिन्त्यतन्मुखे
निक्षिप्यततोविशुद्धाख्याज्ञाचक्रे
आनीयततःशिरोऽवस्थिताधोमुखसहस्त्रारचक्रेहिमनिभसर्ववर्णविभु
उषिताकखादित्रिरेखासु-आलक्षत्रयविभूषितसहस्त्रदलयुक्तम्पद्मम्।
तत्र गुरुं तस्मिन्समानीय तत्कर्णिकास्थपरशिवे हंसः इति मन्त्रेण
सँयोजयेत्॥ अथ पादतो जानुपर्यन्तञ्चतुष्कोणं सुवर्णाभं लम् इति

बीजेन युक्तं

सवज्रकम्पृथ्वीमण्डलन्तत्रगमनसहितम्पादेन्द्रियङ्गन्धसहितङ्ग्

आणेन्द्रियन्निवृत्तिकलायुक्तम्ब्रह्माणं, समानवायुञ्च विभावयेत्।

ततो जानुतो नाभिपर्यन्तमर्द्धचन्द्राकारं श्वेताभं वम् इति बीजेन

युक्तम्पद्मद्वयलाञ्छितञ्जलमण्डलन्तत्र च

ग्रणक्रियासहितम्पाणीन्द्रियंरसेनसहजिह्वेन्द्रियम्प्रतिष्ठाकलासहित।

म् श्रीविष्णुमुदानवायुञ्चविभावयेत्॥ ततो

नाभितोहृदयपर्य्यन्तत्रिकोणं रक्तं रम् इति बीजेन

युक्तंस्वस्तिकान्वितन्तेजोमण्डलन्तत्र च

विसर्गक्रियासहितम्पाय्विन्द्रियंरूपेणचक्षुरिन्द्रियँव्विद्याकलासहितं

शिवँव्यानवायुञ्चविभावयेत्॥ ३॥

ततो हृदयाद् भ्रूमध्यपर्यन्तँव्वर्तुलं धूम्रवर्णं यम् इति

बीजेनयुक्तं

षड्बिन्दुलाञ्छितँवायुमण्डलन्तत्रानन्दक्रियासहितोपस्थेन्द्रियं

स्पर्शसहितन्त्वगिन्द्रियम्॥ शान्तिकलासहितमीशानमपानवायुञ्च

विभावयेत्॥ ततोभ्रूमध्याद्ब्रह्मरन्ध्रपर्यन्तँवर्त्तुलं स्वच्छं

हम् इति

p.11) बीजेनयुक्तन्नभोमण्डलन्तत्र

वचनक्रियासहितँवागिन्द्रियंशब्दसहितं क्षोत्रेन्द्रियं,

शान्त्यतीताख्यकलासहितं सदाशिवम्प्राणवायुञ्च ध्यायेत्॥ ततः
सहस्त्रारे शून्ये सर्वचैतन्यमये परब्रह्म ध्यायेत्॥ ततः
सपरिकरम्पृथ्वीमण्डलञ्जलमण्डले, तच्च वह्निमण्डले, तच्च
वायुमण्डले, तच्चाकाशमण्डले, तच्चाहङ्कारे, तम्महत्तत्त्वे, तच्च
प्रकृतौ, ताञ्च ब्रह्मणि लीनाँविभावयेत्॥ ततः
सर्वंशून्यँविचिन्तयेत्॥
ततोदक्षिणकुक्षौकृष्णवर्णमङ्गुष्ठप्रमाणम्ब्रह्महत्याशिरस्क।
म्स्वर्णस्तेयभुजं
सुरापानहृदयङ्गुरुतल्पकटीयुतन्तत्संसर्गपदद्वन्द्वमुपपातकरो
मकञ्चम्मधरमधोमुखम्पापपुरुषँविचिन्त्यतत्सहितं
शरीरम्पूरकविधिनादशकृत्वोजप्तेन यम् इति बीजेन
नभोध्यातेनसंशोष्यकुम्भकविधिना चतुःषष्टिकृत्वोजप्तेन रम् इति
बीजेनवह्निमण्डले मेढ्रमूलेवाध्यातेन,
रक्तवर्णाम्मायान्नाभौ
ध्यात्वातदुद्भूताग्निनासन्दह्यरेचकविधिना द्वात्रिंशत्कृत्वोजप्तेन
यम् इतिबीजेन पापपुरुषोद्भवम्भस्मकालीबीजं हृदि
पीताभन्ध्यात्वा तदुद्भूतेन वायुनाप्रोत्सारयेत्॥ ततः
पूरकविधिनाषोडशकृत्वोजप्तेन वम् इतिवरुणबीजेन
हृदिस्थेनघण्टिकायान्ध्यातेनवातद्भस्मललाटेतुषाराभङ्कूर्चबि
इजन्ध्यात्वा तदुद्भूतेनामृतेनाप्लाव्यकुम्भकविधिना

चतुःषष्टिजप्तेन लम्

इतिबीजेनपृथ्वीमण्डलेध्यातेनतद्भस्मघनीकृत्य रेचकविधिना

द्वात्रिंशत्कृत्वोजप्तेन हम् इतिबीजेन नभोमण्डले स्थितेनाङ्गानि

रेचयित्वा

पापपुण्यनिर्मुक्तंशरीरंशाम्भवन्ध्यात्वाचिन्मयाद्भूतानि

उत्पादयेत्। तद्यथा - सोहं, हंसः

इतिवामन्त्रेणप्रकृतिञ्चिन्मयादुत्पाद्य

प्रकृतेर्म्महत्तत्त्वम्महत्त्वादहङ्कारमहङ्कारान्नभो, नभसो

वायुं, वायोरग्निं, वह्नेरपस्ततः पृथ्वीमुत्पादयेत्। तेनैव मन्त्रेण

कुण्डलिनीञ्चैतन्यमयीञ्चन्द्रमण्डलान्तर्गतामृतम्पाययित्वा

षट्सु चक्रेषु क्रमशः स्वचरणयुगलान्तर्गतामृतवृष्ट्या

सिञ्चन्तीन्तेष्वानीय जीवन्तया वियोज्य हृदये संस्थाप्य

p. 12) ताम्मूलाधारे स्वयम्भू लिङ्गे स्थापयेत्

इत्यात्मानन्देवतामयन्ध्यायेत्॥ इतिभूतशुद्धिः॥ ततः

प्राणमन्त्रेणजीवस्थापनङ्कुर्यात्॥ तत्र क्रमः- ॐ

अस्यप्राणस्थापनमन्त्रस्य ब्रह्मविष्णुमहेश्वराऋषयः

ऋग्यजुस्सामानिछन्दांसि चैतन्यरूपाप्राणशक्तिर्देवता

प्राणस्थापनेविनियोगः॥ शिरसि ब्रह्मविष्णुमहेश्वरेभ्यः

ऋषिभ्योनमः, मुखे ऋग्यजुस्सामभ्यश्छन्दोभ्योनमः,

हृदयेप्राणशक्त्यैदेवतायैनमः, गुह्ये-आंबीजायनमः, पादयोः

ह्रींशक्तयेनमः, सर्वाङ्गे क्रौंकीलकायनमः, इतिविन्यस्य

षडङ्गानि विन्यसेत्। ङं कंखंगंघं-

आकाशवायुवह्निजलपृथिव्यात्मने हृदयाय नमः।

ञंचंछंजंझंशब्दस्पर्शरूपरसगन्धात्मनेशिरसेस्वाहा।

णंटंठंडंढंश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मनेशिखायैव

षट्। नंतंथंदंधंवाक्पाणिपादपायूपस्थात्मनेकवचायहुँ

॥ मंपंफंबंभंवक्तव्यादानगमनविसर्गानन्दात्मने

नेत्रत्रयायवौषट्।

शंयंरंवंलंहंषंक्षंसंलंमनोबुद्ध्यहङ्कारचित्तात्म्

अने अस्त्रायफट्। एवङ्करन्यासः सोऽपि यथा। नाभेरारभ्य पादान्तम्

आमिति न्यसेत्, ङंकंखंघंगं

आकाशवायुवह्निजलपृथिव्यात्मने अङ्गुष्ठाभ्यान्नमः,

ञंचंछंझंजंशब्दस्पर्शरूपरसगन्धात्मनेतर्ज्जनीभ्यांस्

वाहा, णंटंठंढंडंश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने

मध्यमाभ्याँवौषट्,

नंतंथंधंदंवाक्पाणिपादपायूपस्थात्मने

अनामिकाभ्यांहूम्,

मंपंफंभंबंवक्तव्यादानगमनविसर्गानन्दात्मने

कनिष्ठिकाभ्यांवौषट्,

शांयंरंवंलंहंषंक्षंसंलंमनोबुद्ध्यहङ्कारचित्तात्म्

अने करतलकरपृष्ठाभ्याम्फट्। ततो नाभितोहृदयपर्यन्तं

ह्रीमितिहृदयान्मस्तकान्तङ्कौमितिविन्यसेत्, यन्त्वगात्मनेनम इतिहृदि,

रं-असृगात्मनेनम इतिदक्षिणांसे, लंमांसात्मनेनम इतिककुदि,

वंमेद- आत्मनेनम इतिवामस्कन्धे, शं-अस्थ्यात्मनेनम

इतिहृदयाद्दक्षिणभुजाग्रान्तं, षंमज्जात्मनेनम

इतिहृदयाद्वामभुजाग्रान्तं, संशुक्रात्मने नम

इतिहृदयाद्दक्षिणपादाग्रान्तं, हौं ओज-आत्मनेनम

इतिहृदयाद्वामपादाग्रान्तं, हंघ्राणात्मनेनम

इतिहृदयान्नाभ्यन्तं, संजीवात्मने

p.13) नम इति हृदयान्मस्तकान्तं प्राणमन्त्रेण

सप्तधापञ्चधावाव्यापकन्यासङ्कुर्यात्॥ ततो ध्यायेत्॥ यथा -

रक्ताब्धिपोतारुणपद्मसंस्थांपाशाङ्कुशेष्वासशरासिबाणान्॥

शूलङ्कपालन्दधतीङ्कराब्जैरक्तान्त्रिनेत्राम्प्रणमामि देवीम्

ततोवक्ष्यमाणलेलिहानमुद्रयाहृदयं

स्पृशन्नेकादशवारंप्राणमन्त्रञ्जपेत्॥ मन्त्रश्च-

आंह्रींक्रोंयंरंलंवंशंषंसंहों-ओंक्षंसंहंसः

ह्रीं-ओंहंसः श्रीदक्षिणकालिकायाः (मम) प्राणा इहप्राणाः,

आंह्रींक्रोंयंरंलंवंशंषंसंहों-

ओंक्षंशंसंहंसः ह्रीं-ओंहंसः श्रीदक्षिणकालिकाया जीव

इह स्थितः,

आंह्रींक्रोंयंरंलंवंशंषंसंहोंओंक्षंसंहंसः

श्रीदक्षिणकालिकायाः सर्वेन्द्रियाणि इहस्थितानि,

आंह्रींक्रोंयंरंलंवंशंषंसंहों-ओंक्षंसंहंसः

ह्रीं-ओंहंसः श्रीदक्षिणकाकाया

वाङ्मनस्त्वक्क्षुःश्रोत्रघ्राणप्राणा

इहागत्यसुखञ्चिरन्तिष्ठन्तुस्वाहा, ओंक्षंसंहंसः ह्रींओं-

आंह्रींक्रोंश्रीदक्षिणकालिकायाः प्राणा इहप्राणाः,

आंह्रींक्रोंश्रीदक्षिणकालिकाया जीव इह स्थितः,

आंह्रींक्रोंश्रीदक्षिणकालिकायाः सर्वेन्द्रियाणि,

आंह्रींक्रोंश्रीदक्षिणकालिकायाः

वाङ्मनस्त्ववचक्षुःश्रोत्रघ्राणप्राणा इहागत्यसुखञ्चिरन्तिष्ठन्तु

स्वाहा॥ ततो

देवतारूपमात्मानन्ध्यात्वाप्राणायामऋष्यादिन्यासषडङ्गन्यास्

अकरन्यासान् विधाय मातृकान्यासमाचरेत्॥ तत्र ॐ अस्य

मातृकामन्त्रस्यब्रह्माऋषिर्गायत्रीछन्दो, मातृकासरस्वतीदेवता,

हलोबीजानि, स्वराः शक्तयस्तदुभयङ्कीलकम्

अभीष्टसिद्ध्यर्थेन्यासेविनियोगः। प्राणायामो यथा-

इडया अ-इ-उ-ऋ-लृ-ए-ऐ-ओ-औ-एभिःस्वरैः पूरयेत्, कुचुटुतुपु इति

वर्णपञ्चकेन कुम्भयेत्। यरलवशषसह-एभिरष्टभिर्वर्णैरेचयेत्॥

ऋष्यादिन्यासो यथा-

शिरसिब्रह्मणेऋषयेनमः, मुखेगायत्रीछन्दसे नमः,

हृदिमातृकासरस्वत्यैनमः, लिङ्गेहल्भ्यो बीजेभ्योनमः, पादयोः

स्वरेभ्यः शक्तिभ्योनमः, सर्वाङ्गेतदुभयकीलकायनमः॥

अथषडङ्गन्यासो यथा॥ अंकंखंगंघंङं

आँऋदयायनमः, इंचंछंजंझंञं-ईंशिरसे स्वाहा,

p. 14) उंटंठंडंढंणं ऊंशिखायैवषट्,

एंतंथंदंधंनं ऐंकवचाय हुम्,

ओंपंफंबंभंमं-औंनेत्रत्रयायवौषट्,

अंयंरंलंवंशंषंसंहंलंक्षं अः अस्त्राय फट्॥

एवङ्करन्यासो यथा॥ अंकंखंगंघंङं आँ

अङ्गुष्ठाभ्यान्नमः, इंचंछंजंझंञं-

ईंतर्ज्जनीभ्यांस्वाहा, उंटंठंडंढंणं-

ऊंमध्यमाभ्यांवषट्, एंतंथंदंधंनं-ऐं

अनामिकाभ्यांहुम्, ओंपंफंबंभंमं

औंकनिष्ठिकाभ्यांवौषट्,

अंयंरंलंवंशंषंसंहंलंक्षं-अः

करतलकरपृष्ठाभ्यांफट्॥ अथ ध्यानम् -

पञ्चाशल्लिपिभिर्विभक्तसुखदोःपन्मध्यवक्षःस्थलान्भास्वन्मौलि
निबद्धचन्द्रशकलामापीनतुङ्गस्तनीम्।
मुद्रामक्षगुणं सुधाढ्यकलशं
व्याख्याञ्चहस्ताम्बुजैर्बिभ्राणाँविशदप्रभान्त्रिनयनाँवाग्देवत्
आमाश्रये॥

अथान्तर्मातृकान्यासः॥ अं-इं-उं-ऋं-ऌं-एं-ऐं-ओं-औं नमैति
धूम्राभेषोडशदलेकण्ठेन्यसेत्,
कंखंगंघंङंचंछंजंझंञंटंठंनमैतिद्वाद
सदलेप्रवालनिभेहृदये,
डंढंणंतंथंदंधंनंपंफंनम
इतिनीलजीमूतसन्निभे दशदलेनाभेरुपरिमणिपूरे,
बंभंमंयंरंलंनम-इतिविद्युन्निभेषड्दलेनाभेरधः
स्वाधिष्ठाने, वंशंषंसंनमैतिसुवर्णाभे
चतुर्दलेमूलाधारे, हंक्षंनमैतिद्विदलेचन्द्राभे भ्रूमध्ये
आज्ञाचक्रे न्यसेत्। सहस्त्रारेहिमनिभे सर्ववर्ण्णविभूषिते॥
अकखादित्रिरेखासु आलक्षत्रयभूषिते॥ परबिन्दुभ्योनमैतिन्यसेत्।
मूलादिब्रह्मरन्ध्रान्तन्बिन्दुश्चिदात्मकन्न्यात्वातत्स्त्रुतसुधासारैर्

मातृकान्तर्पयेत्। ललाटे अंनमः, मुखवृत्ते आंनमः, दक्षनेत्रे
इंनमः, वामनेत्रे ईंनमः, दक्षकर्णे उंनमः, वामकर्णे
ऊंनमः, दक्षनासायां ऋंनमः, वामनासायाम् ॠंनमः,
दक्षगण्डे ऌंनमः, वामगण्डे ॡंनमः, ऊर्ध्वौष्ठे एंनमः,
अधरोष्ठे ऐंनमः, ऊर्ध्वदन्तपङ्क्तौ ओंनमः, अधोदन्तपंक्तौ
औंनमः, शिरसि अंनमः, मुखे अःनमः। वीरचूडामणौ तु-
जिह्वाग्रे अंनमः, कण्ठदेशे अःनमः, दक्षिणबाहुमूले कंनमः,
कूर्परे खंनमः, मणिबन्धे गंनमः, अङ्गुलीमूले घंनमः,
अङ्गुल्यग्रे ङंनमः, वामबाहुमूले

p.15) चंनमः, कूर्परे छंनमः, मणिबन्धे जंनमः,
अङ्गुलीमूले झंनमः, अङ्गुल्यग्रे ञंनमः, दक्षिणोरुमूले
टंनमः, जानुनि ठंनमः, गुल्फे डंनमः, अङ्गुलीमूले
ढंनमः, अङ्गुल्यग्रे णंनमः, वामोरुमूले तं नमः, जानुनि
थंनमः, गुल्फे दंनमः, अङ्गुलीमूले धंनमः, अङ्गुल्यग्रे
नंनमः, दक्षपार्श्वे पंनमः, वामपार्श्वे फंनमः, पृष्ठे
बंनमः, नाभौ भंनमः, उदरे मंनमः, हृदये
यंत्वगात्मने नमः, दक्षांसेरं-असृगात्मनेनमः, ककुदि
लंमांसात्मनेनमः, वामांसे वंमेद-आत्मनेनमः,
हृदयाद्दक्षभुजाग्रान्तं शं-अस्थ्यात्मने नमः,

हृदयाद्वामभुजाग्रान्तं षंमज्जात्मनेनमः,

हृदयाद्दक्षपादाग्रान्तंशुक्रात्मनेनमः,

हृदादिवामपादाग्रान्तंहं-आत्मनेनमः,

हृदयान्मस्तकान्तंलंपरमात्मने नमः, इति बहिर्मातृकान्यासः॥

अथ सृष्टिक्रमः। तत्रतुविसर्गान्वितः

प्रणवपुटितोवामायालक्ष्मीबीजपूर्वोवावाग्भवाद्योवान्यस्तव्यः।

तत्र वाग्भवाद्यो यथा-जिह्वाग्रे-ऐं-अंनमः, कण्ठदेशतः ऐं-अः

नमः, दक्षिणबाहुमूले-ऐंकंनमः, कूर्परे-ऐंखंनमः,

मणिबन्धे ऐंगंनमः, अङ्गुलीमूले ऐंघंनमः, अङ्गुल्यग्रे-

ऐंङंनमः, वामबाहुमूले-ऐंचंनमः, कूर्परे-

ऐंछंनमः, मणिबन्धे-ऐंजंनमः, अङ्गुलीमूले-ऐंझंनमः,

अङ्गुल्यग्रे ऐंञंनमः, दक्षिणोरुमूले ऐंटंनमः, जानुनि

ऐंठंनमः, गुल्फे-ऐंडंनमः, अङ्गुलीमूले ऐंढंनमः,

अङ्गुल्यग्रे-ऐंणंनमः, वामोरुमूले ऐंतंनमः, जानुनि

ऐंथंनमः, गुल्फे ऐंदंनमः, अङ्गुलीमूले-ऐंधंनमः,

अङ्गुल्यग्रे ऐंनंनमः, दक्षपार्श्वे ऐंपंनमः, वामपार्श्वे-

ऐंफंनमः, पृष्ठे ऐंबंनमः, नाभौ ऐंभंनमः, उदरे-

ऐंमंनमः, हृदये-ऐंपं त्वगात्मने नमः, दक्षांसे ऐंरं-

असृगात्मनेनमः, ककुदि-ऐंलंमांसात्मने नमः, वामांसे

ऐंवंमेद आत्मने नमः, हृदयाद्दक्षभुजाग्रान्तम् ऐंशं

अस्थ्यात्मनेनमः, हृदयाद्वामभुजाग्रान्तम्

ऐंषंमज्जात्मनेनमः, हृदयाद्दक्षपादाग्रान्तम्,

ऐंसंशुक्रात्मनेनमः, हृदादिवामपादाग्रान्तम् ऐंहं

आत्मनेनमः, हृदयान्मस्तकान्तम् ऐंलंपरमात्मनेनमः॥

p.16) अथ स्थितिक्रमः

तत्र प्रथमन्ध्यानँयथा -

सिन्दूरकान्तिमसिताभरणान्त्रिनेत्राँ

व्विद्याक्षसूत्रमृगपोतवरान्दधानाम्॥

पार्श्वस्थिताम्भगवतीमपिकाञ्चनाङ्गीन्ध्यायेत्कराब्जधृतपुस्तकव्

अर्णमालाम्॥ एवं ध्यात्वा न्यसेत्। तद्यथा-ललाटे

टंठंडंनमः, मुखवृत्ते टंठंडंनमः, दक्षनेत्रे

टंठंडंनमः, वामनेत्रे टंठंडंनमः, दक्षकर्णे

टंठंडंनमः, वामकर्णे टंठंडंनमः, दक्षनासायाम्

टंठंडंनमः,वामनासायाम् टंठंडंनमः, दक्षगण्डे

टंठंडंनमः, वामगण्डे टंठंडंनमः, उर्द्धौष्ठे

टंठंडंनमः, अधरोष्ठे टंठंडंनमः,

ऊर्ध्वदन्तपङ्क्तौ टंठंडंनमः, अधोदन्तपङ्क्तौ

टंठंडंनमः, शिरसि टंठंडंनमः, मुखे

टंठंडंनमः, जिह्वाग्रे टंठंडंनमः, कण्ठदेशे

टंठंडंनमः, दक्षिणबाहुमूले टंठंडंनमः, कूर्परे

टंठंडंनमः, मणिबन्धे टंठंडंनमः, अङ्गुलीमूले

टंठंडंनमः, अङ्गुल्यग्रे टंठंडंनमः, वामबाहुमूले

टंठंडंनमः, कूर्परे टंठंडंनमः, मणिबन्धे

टंठंडंनमः, अङ्गुलीमूले टंठंडंनमः, दक्षिणोरुमूले

टंठंडंनमः, जानुनि टंठंडंनमः, गुल्फे

टंठंडंनमः, अङ्गुलीमूले टंठंडंनमः, अङ्गुल्यग्रे

टंठंडंनमः, वामोरुमूले टंठंडंनमः, जानुनि

टंठंडंनमः, गुल्फे टंठंडंनमः, अङ्गुलीमूले

टंठंडंनमः, अङ्गुल्यग्रे टंठंडंनमः, दक्षपार्श्वे

टंठंडंनमः, वामपार्श्वे टंठंडंनमः, पृष्ठे

टंठंडंनमः, उदरे टंठंडंनमः, हृदये

टंठंडंनमः, दक्षांसे टंठंडंनमः, ककुदि

टंठंडंनमः, वामांसे टंठंडंनमः,

हृदयाद्दक्षभुजाग्रान्तम् टंठंडंनमः,

हृदयाद्वामभुजाग्रान्तम् टंठंडंनमः,

हृदयाद्दक्षपादाग्रान्तम् टंठंडंनमः,

हृदयाद्वामपादाग्रान्तम् टंठंडंनमः, हृदयान्मस्तकान्तम्

टंठंडंनमः।

इति स्थितिक्रमः।

अथ संहारक्रम

तत्र ध्यानं यथा- अक्षस्त्रजं हरिणपोतमुद्रग्रटंकं
विद्याकरैरविरतंदधतीं त्रिनेत्राम्।
अर्द्धेन्दुमौलिभरणामरविन्दवासां वर्णेश्वरीं
प्रणमतंस्तनभारखिन्नाम्

p. 17)॥ तत्रक्रमः॥ ललाटे क्षंनमः, मुखवृत्ते हंनमः,
दक्षनेत्रे संनमः, वामनेत्रे षंनमः, दक्षकर्णे शंनमः,
वामकर्णे वंनमः, दक्षनासायां लंनमः, वामनासायां
रंनमः, दक्षगण्डे यंनमः, वामगण्डे मंनमः,
ऊर्द्धोष्ठे भंनमः, अधरोष्ठे बंनमः, ऊर्द्धदन्तपङ्क्तौ
फंनमः, अधोदन्तपङ्क्तौ पंनमः, शिरसि नंनमः, मुखे
धंनमः, दक्षिणबाहुमूले दंनमः, कूर्प्परे थंनमः,
मणिबन्धे तंनमः, अङ्गुलीमूले णंनमः, अङ्गुल्यग्रे ढंनमः,
वामबाहुमूले डंनमः, कूर्प्परे ठंनमः, मणिबन्धे

टंनमः, अङ्गुलीमूले ञंनमः, अङ्गुल्यग्रे झंनमः,

दक्षिणोरुमूले जंनमः, जानुनि छंनमः, गुल्फे चंनमः,

अङ्गुलीमूले ङंनमः, अङ्गुल्यग्रे घंनमः, वामोरुमूले

गंनमः, जानुनि खंनमः, गुल्फे कंनमः, अङ्गुलीमूले अःनमः,

अङ्गुल्यग्रे अंनमः, दक्षपार्श्वे औंनमः, वामपार्श्वे ओंनमः,

पृष्ठे ऐंनमः, नाभौ एंनमः, उदरे ऌंनमः, हृदये

ॡंनमः, दक्षांसे ॠंनमः, ककुदि ॠंनमः, वामांसे

ऊंनमः, हृदयाद्दक्षभुजाग्रान्तम् उं-अस्थ्यात्मने नमः,

हृदयाद्वामभुजाग्रान्तम् ईंमज्जात्मनेनमः,

हृदयाद्दक्षपादाग्रान्तम् इंशुक्रात्मनेनमः,

हृदादिवामपादाग्रान्तम् आं-आत्मनेनमः, हृदयान्मस्तकान्तम्

अंपरमात्मनेनमः॥ इति संहारक्रमः॥ अथश्रीकण्ठादिन्यासः॥

तत्र ध्यानं यथा अतिश्यामांत्रिनयनांशवासनसमुन्नताम्॥

बिभ्रतीं विविधाकल्पाञ्चतुर्दिक्षुशिवायुताम्॥

पाशाङ्कुशवराक्षस्रक्पाणिं शीतांशुशेखराम्॥ त्र्यक्षं

रक्तसुवर्ण्णाभमर्द्धनारीश्वरं भजे॥ शक्तिध्यानं यथा एता

रुद्राङ्गपीठस्थाः सिन्दूरारुणविग्रहाः। रक्तोत्पलाः

कपालाभ्यामलङ्कृतकराम्बुजाः इतिरुद्रन्यासे ध्यानं कर्त्तव्यम्॥

अस्य श्रीकण्ठादिन्यासस्य

दक्षिणामूर्तिर्ऋषिर्ग्गायत्रीछन्दोऽर्द्धनारीश्वरो देवता,

श्रीकण्ठादिन्यासे विनियोगः॥ ललाटे

अंश्रीकण्ठायपूर्णोदर्यैनमः, मुखवृत्ते आं-

अनन्नायवीर्यायैनमः,

p. 18) दक्षनेत्रे इंसूक्ष्मेशायशाल्मल्यैनमः, वामनेत्रे

ईंत्रिमूर्तयेलोलाक्ष्यैनमः, दक्षकर्णे उं-

अमरेशायवर्तुलाक्ष्यैनमः, वामकर्णे ऊं-

अर्धांशायदीग्घ्रघोणायैनमः, दक्षनासायाम्

ऋंमारभूतयेदीर्घमुख्यैनमः, वामनासायाम्

ॠंतिथीशायगोमुख्यैनमः, दक्षगण्डे

लृंस्थाराधीशायदीर्घजिह्वायैनमः, वामगण्डे

लॄंहरायकुण्डोदर्यैनमः, ऊर्द्धोष्ठे एंझिणीशाय-

ऊर्द्धकेश्यैनमः अधरोष्ठे ऐंभौक्तिकायविकृतमुख्यै नमः,

उर्द्धदन्तपङ्क्तौ ओंसद्योजातायज्वालामुख्यैनमः,

अधोदन्तपङ्क्तौ औं-अनुग्रहेशाय-उल्कामुख्यैनमः, शिरसि अं-

अक्रूरायश्रीमुख्यैनमः, मुखे अःमहासेनायविद्यामुख्यैनमः,

दक्षिणबाहुमूले कंक्रोधीशाय महाकाल्यैनमः, कूर्प्परे

खंचण्डीशायसरस्वत्यैनमः, मणिबन्धे

गंपञ्चान्तकायगौर्यैनमः, अङ्गुलीमूले

घंशिवोन्नमायत्रैलोक्यविद्यायैनमः, अङ्गुल्यग्रे ङं-

एकरुद्रायमन्त्रशक्तयेनमः, वामबाहुमूले चंकूर्मेशाय-

आत्मशक्त्यैनमः, कूर्परे छं-एकनेत्रायभूतिमात्रेनमः,

मणिबन्धे जंचतुराननायलम्बोदर्यैनमः, अङ्गुलीमूले झं

अजेशायद्राविण्यैनमः, अङ्गुल्यग्रे ञंसर्वेशायनागर्यैनमः,

दक्षिणोरुमूले टंसोमेशायखेचर्यैनमः, जानुनि

ठंलाङ्गलीशायमङ्गर्यै नमः, गुल्फे

डंडारकेशायरूपिण्यैनमः, अङ्गुलीमूले ढं-

अर्द्धनारीशायवीरिण्यैनमः, अङ्गुल्यग्रे णं-

उमाकान्तायकाकोदर्यैनमः, वामोरुमूले तं-

आषाढिनेपूतनायैनमः, जानुनि थंदण्डिनेभद्रकाल्यैनमः,

गुल्फे दं-अत्रीशाययोगिन्यैनमः, अङ्गुलीमूले

धंमीनेशायशंखिन्यै नमः, अङ्गुल्यग्रे

नंमेषेशायगर्जिन्यैनमः, दक्षपार्श्वे

पंलोहितायकालरात्र्यैनमः, वामपार्श्वे

फंशिखीशायवकूर्दिन्यैनमः, पृष्ठे

बंछगलण्डायकपर्दिन्यैनमः, नाभौ

भंद्विरंडेशायवज्रायैनमः, उदरे

मंमहाकालायजयायैनमः, हृदये

यंवाणीशायसुमुखैश्वर्यैनमः, दक्षांसे

रंभुजङ्गायरेवत्यैनमः, ककुदि लंपिनाकिनेमाधव्यैनमः,

वामांसे

p.19) वंषङ्गीशायवारुण्यैनमः, हृदयाद्दक्षभुजाग्रान्तं

शंबकेशायवायव्यै नमः, हृदयादिवामभुजाग्रान्तं

षंश्वेतायरक्षोविदारिण्यै नमः, हृदयाद्दक्षपादाग्रान्तं

संभृगवेसहजायैनमः, हृदादिवामपादाग्रान्तम्

हंनकुलीशायलक्ष्म्यैनमः, हृदयान्मस्तकान्तं

क्षंसँवर्त्तकायमहामायायैनमः॥ इति रुद्रन्यासः॥

अथ कालीतन्त्रोक्तप्रकारेण षोढान्यासः कर्त्तव्यः

यथामातृकान्यासः प्रथमः॥ अं आं इं ईं उं ऊं ऋं

ॠं ऌं ॡं नमो हृदि, एं ऐं ओं औं अं अः कं खं गं घं

दक्षभुजे, ङं चं छं जं झं ञं टं ठं डं ढं

वामभुजे, णं तं थं दं धं नं पं फं बं भं

दक्षपादे, मं यं रं लं वं शं षं सं हं लं क्षं

इतिवामपादे विन्यसेत्॥ इति मातृकान्यासः प्रथमः॥

अथ द्वितीयः

ललाटे श्रीं अं श्रीं अं श्रीं अं नमः, मुखवृत्ते श्रीं
आं श्रीं आं श्रीं आं नमः, दक्षनेत्रे श्रीं इं श्रीं इं श्रीं
इं नमः, वामनेत्रे श्रीं ईं श्रीं ईं श्रीं ईं नमः, दक्षकर्णे
श्रीं उं श्रीं उं श्रीं उं नमः, वामकर्णे श्रीं ऊं श्रीं
ऊं श्रीं ऊं नमः, दक्षनासायां श्रीं ऋं श्रीं ऋं श्रीं ऋं
नमः, वामनासायां श्रीं ॠं श्रीं ॠं श्रीं ॠं नमः,
दक्षगण्डे श्रीं ऌं श्रीं ऌं श्रीं ऌं नमः, वामगण्डे श्रीं
ॡं श्रीं ॡं श्रीं ॡं नमः, उर्द्धोष्ठे श्रीं एं श्रीं एं
श्रीं एं नमः, अधरोष्ठे श्रीं ऐं श्रीं ऐं श्रीं ऐं नमः,
ऊर्ध्वदन्तपङ्क्तौ श्रीं ओं श्रीं ओं श्रीं ओं नमः
अधोदन्तपङ्क्तौ श्रीं औं श्रीं औं श्रीं औं नमः, शिरसि श्रीं
अं श्रीं अं श्रीं अं नमः, मुखे श्रीं अः श्रीं अः श्रीं अः
नमः, दक्षिणबाहुमूले श्रीं कं श्रीं कं श्रीं कं नमः,
कूर्परे श्रीं खं श्रीं खं श्रीं खं नमः, मणिबन्धे श्रीं
गं श्रीं गं श्रीं गं नमः, अङ्गुलीमूले श्रीं घं श्रीं
घं श्रीं घं नमः, अङ्गुल्यग्रे श्रीं ङं श्रीं ङं श्रीं
ङं नमः, वामबाहुमूले श्रीं चं श्रीं चं श्रीं चं नमः,
कूर्परे श्रीं छं श्रीं छं श्रीं छं नमः, मणिबन्धे श्रीं
जं श्रीं जं श्रीं जं नमः, अङ्गुलीमूले श्रीं झं श्रीं झं
श्रीं झं नमः, अङ्गुल्यग्रे श्रीं ञं श्रीं ञं श्रीं ञं

नमः,

p. 20) दक्षिणोरुमूले श्रीं टं श्रीं टं श्रीं टं नमः, जानुनि
श्रीं ठं श्रीं ठं श्रीं ठं नमः, गुल्फे श्रीं डं श्रीं
डं श्रीं डं नमः, अङ्गुलीमूले श्रीं ढं श्रीं ढं श्रीं
ढं नमः, अङ्गुल्यग्रे श्रीं णं श्रीं णं श्रीं णं नमः,
वामोरुमूले श्रीं तं श्रीं तं श्रीं तं नमः, जानुनि श्रीं थं
श्रीं थं श्रीं थं नमः, गुल्फे श्रीं दं श्रीं दं श्रीं दं
नमः, अङ्गुलीमूले श्रीं धं श्रीं धं श्रीं धं नमः,
अङ्गुल्यग्रे श्रीं नं श्रीं नं श्रीं नं नमः, दक्षपार्श्वे
श्रीं पं श्रीं पं श्रीं पं नमः, वामपार्श्वे श्रीं फं
श्रीं फं श्रीं फं नमः, पृष्ठे श्रीं बं श्रीं बं श्रीं
बं नमः, नाभौ श्रीं भं श्रीं भं श्रीं भं नमः, उदरे
श्रीं मं श्रीं मं श्रीं मं नमः, हृदये श्रीं यं श्रीं
यं श्रीं यं त्वगात्मनेनमः, दक्षांसे श्रीं रं श्रीं रं
श्रीं रं असृगात्मनेनमः, ककुदि श्रीं लं श्रीं लं श्रीं लं
मांसात्मनेनमः, वामांसे श्रीं वं श्रीं वं श्रीं वं मेद
आत्मनेनमः, हृदयाद्दक्षभुजाग्रान्तं श्रीं शं श्रीं शं
श्रीं शं अस्थ्यात्मनेनमः, हृदयाद्वामभुजाग्रान्तं श्रीं षं
श्रीं षं श्रीं षं मज्जात्मनेनमः, हृदयाद्दक्षपादाग्रान्तं

श्रीं सं श्रीं सं श्रीं सं शुक्रात्मनेनमः,
हृदादिवामपादाग्रान्तं श्रीं हं श्रीं हं श्रीं हं आत्मने
नमः, हृदयान्मस्तकान्तम् श्रीं क्षं श्रीं क्षं श्रीं क्षं
परमात्मने नमः॥ इति द्वितीयः॥

अथ तृतीयः

ललाटे क्लीं श्रीं क्लीं श्रीं क्लीं श्रीं नमः, मुखवृते क्लीं
श्रीं क्लीं श्रीं क्लीं श्रीं नमः, दक्षनेत्रे क्लीं श्रीं क्लीं
श्रीं क्लीं श्रीं नमः, वामनेत्रे क्लीं श्रीं क्लीं श्रीं क्लीं
श्रीं नमः, दक्षकर्णे क्लीं श्रीं क्लीं श्रीं क्लीं श्रीं नमः,
वामकर्णे क्लीं श्रीं क्लीं श्रीं क्लीं श्रीं नमः,दक्षनासायां
क्लीं श्रीं क्लीं श्रीं क्लीं श्रीं नमः, वामनासायां क्लीं
श्रीं क्लीं श्रीं क्लीं श्रीं नमः, दक्षगण्डे क्लीं श्रीं क्लीं
श्रीं क्लीं श्रीं नमः, वामगण्डे क्लीं श्रीं क्लीं श्रीं क्लीं
श्रीं नमः, ऊर्द्धोष्ठे क्लीं श्रीं क्लीं श्रीं क्लीं श्रीं नमः,
अधरोष्ठे क्लीं श्रीं क्लीं श्रीं क्लीं श्रीं नमः,
ऊर्ध्वदन्तपङ्क्तौ क्लीं श्रीं क्लीं श्रीं क्लीं श्रीं नमः,
अधोदन्तपङ्क्तौ क्लीं श्रीं क्लीं श्रीं क्लीं श्रीं नमः, शिरसि
क्लीं श्रीं क्लीं श्रीं क्लीं श्रीं नमः, मुखे क्लीं श्रीं क्लीं

श्रीं क्लीं श्रीं नमः, दक्षिणबाहुमूले क्लीं श्रीं

p. 21) क्लीं श्रीं क्लीं श्रीं नमः, कूर्परे क्लीं श्रीं क्लीं श्रीं
क्लीं श्रीं नमः, मणिबन्धे क्लीं श्रीं क्लीं श्रीं क्लीं श्रीं
नमः, अङ्गुलीनूले क्लीं श्रीं क्लीं श्रीं क्लीं श्रीं नमः,
अङ्गुल्यग्रे क्लीं श्रीं क्लीं श्रीं क्लीं श्रीं नमः, वामबाहुमूले
क्लीं श्रीं क्लीं श्रीं क्लीं श्रीं नमः, कूर्परे क्लीं श्रीं क्लीं
श्रीं क्लीं श्रीं नमः, मणिबन्धे क्लीं श्रीं क्लीं श्रीं क्लीं
श्रीं नमः, अङ्गुलीमूले क्लीं श्रीं क्लीं श्रीं क्लीं श्रीं नमः,
अङ्गुल्यग्रे क्लीं श्रीं क्लीं श्रीं क्लीं श्रीं नमः, दक्षिणोरुमूले
क्लीं श्रीं क्लीं श्रीं क्लीं श्रीं नमः, जानुनि क्लीं श्रीं क्लीं
श्रीं क्लीं श्रीं नमः, गुल्फे क्लीं श्रीं क्लीं श्रीं क्लीं श्रीं
नमः, अङ्गुलीमूले क्लीं श्रीं क्लीं श्रीं क्लीं श्रीं नमः,
अङ्गुल्यग्रे क्लीं श्रीं क्लीं श्रीं क्लीं श्रीं नमः, वामोरुमूले
क्लीं श्रीं क्लीं श्रीं क्लीं श्रीं नमः, जानुनि क्लीं श्रीं क्लीं
श्रीं क्लीं श्रीं नमः, गुल्फे क्लीं श्रीं क्लीं श्रीं क्लीं श्रीं
नमः, अङ्गुलीमूले क्लीं श्रीं क्लीं श्रीं क्लीं श्रीं नमः,
अङ्गुल्यग्रे क्लीं श्रीं क्लीं श्रीं क्लीं श्रीं नमः, दक्षपार्श्वे
क्लीं श्रीं क्लीं श्रीं क्लीं श्रीं नमः, वामपार्श्वे क्लीं श्रीं
क्लीं श्रीं क्लीं श्रीं नमः, पृष्ठे क्लीं श्रीं क्लीं श्रीं क्लीं

श्रीं नमः, नाभौ क्लीं श्रीं क्लीं श्रीं क्लीं श्रीं नमः, उदरे
क्लीं श्रीं क्लीं श्रीं क्लीं श्रीं नमः, हृदये क्लीं श्रीं क्लीं
श्रीं क्लीं श्रीं नमः, दक्षांसे क्लीं श्रीं क्लीं श्रीं क्लीं
श्रीं नमः, ककुदि क्लीं श्रीं क्लीं श्रीं क्लीं श्रीं नमः,
वामांसे क्लीं श्रीं क्लीं श्रीं क्लीं श्रीं नमः,
हृदयाद्दक्षभुजाग्रान्तं क्लीं श्रीं क्लीं श्रीं क्लीं श्रीं
नमः, हृदयाद्वामभुजाग्रान्तं क्लीं श्रीं क्लीं श्रीं क्लीं
श्रीं नमः, हृदयादक्षपादाग्रान्तं क्लीं श्रीं क्लीं श्रीं क्लीं
श्रीं नमः, हृदादिवामपादाग्रान्तं क्लीं श्रीं क्लीं श्रीं क्लीं
श्रीं नमः, हृदयान्मस्तकान्तं क्लीं श्रीं क्लीं श्रीं क्लीं श्रीं
नमः॥ इतितृतीयः॥

अथ चतुर्थः

ललाटे ह्रीं श्रीं ह्रीं श्रीं ह्रीं श्रीं नमः, मुखवृत्ते ह्रीं
श्रीं ह्रीं श्रीं ह्रीं श्रीं नमः, दक्षनेत्रे ह्रीं श्रीं ह्रीं
श्रीं ह्रीं श्रीं नमः, वामनेत्रे ह्रीं श्रीं ह्रीं श्रीं ह्रीं
श्रीं नमः,

p. 22) दक्षकर्णे ह्रीं श्रीं ह्रीं श्रीं ह्रीं श्रीं नमः,

वामकर्णे ह्रीं श्रीं ह्रीं श्रीं ह्रीं श्रीं नमः,

दक्षनासायां ह्रीं श्रीं ह्रीं श्रीं ह्रीं श्रीं नमः,

वामनासायां ह्रीं श्रीं ह्रीं श्रीं ह्रीं श्रीं नमः,

दक्षगण्डे ह्रीं श्रीं ह्रीं श्रीं ह्रीं श्रीं नमः, वामगण्डे

ह्रीं श्रीं ह्रीं श्रीं ह्रीं श्रीं नमः, उर्द्धोष्ठे ह्रीं श्रीं

ह्रीं श्रीं ह्रीं श्रीं नमः, अधरोष्ठे ह्रीं श्रीं ह्रीं श्रीं

ह्रीं श्रीं नमः, उर्द्धदन्तपङ्क्तौ ह्रीं श्रीं ह्रीं श्रीं ह्रीं

श्रीं नमः, अधोदन्तपङ्क्तौ ह्रीं श्रीं ह्रीं श्रीं ह्रीं श्रीं

नमः, शिरसि ह्रीं श्रीं ह्रीं श्रीं ह्रीं श्रीं नमः, मुखे ह्रीं

श्रीं ह्रीं श्रीं ह्रीं श्रीं नमः, दक्षिणबाहुमूले ह्रीं श्रीं

ह्रीं श्रीं ह्रीं श्रीं नमः, कूर्परे ह्रीं श्रीं ह्रीं श्रीं ह्रीं

श्रीं नमः, मणिबन्धे ह्रीं श्रीं ह्रीं श्रीं ह्रीं श्रीं नमः,

अङ्गुलीमूले ह्रीं श्रीं ह्रीं श्रीं ह्रीं श्रीं नमः, अङ्गुल्यग्रे

ह्रीं श्रीं ह्रीं श्रीं ह्रीं श्रीं नमः, वामबाहुमूले ह्रीं

श्रीं ह्रीं श्रीं ह्रीं श्रीं नमः, कूर्परे ह्रीं श्रीं ह्रीं श्रीं

ह्रीं श्रीं नमः, मणिबन्धे ह्रीं श्रीं ह्रीं श्रीं ह्रीं श्रीं

नमः, अङ्गुलीमूले ह्रीं श्रीं ह्रीं श्रीं ह्रीं श्रीं नमः,

अङ्गुल्यग्रे ह्रीं श्रीं ह्रीं श्रीं ह्रीं श्रीं नमः, दक्षिणोरुमूले

ह्रीं श्रीं ह्रीं श्रीं ह्रीं श्रीं नमः, जानुनि ह्रीं श्रीं ह्रीं

श्रीं ह्रीं श्रीं नमः, गुल्फे ह्रीं श्रीं ह्रीं श्रीं ह्रीं श्रीं

नमः, अङ्गुलीमूले ह्रीं श्रीं ह्रीं श्रीं ह्रीं श्रीं नमः,
अङ्गुल्यग्रे ह्रीं श्रीं ह्रीं श्रीं ह्रीं श्रीं नमः, वामोरुमूले
ह्रीं श्रीं ह्रीं श्रीं ह्रीं श्रीं नमः, जानुनि ह्रीं श्रीं ह्रीं
श्रीं ह्रीं श्रीं नमः, गुल्फे ह्रीं श्रीं ह्रीं श्रीं ह्रीं श्रीं
नमः, अङ्गुलीमूले ह्रीं श्रीं ह्रीं श्रीं ह्रीं श्रीं नमः,
अङ्गुल्यग्रे ह्रीं श्रीं ह्रीं श्रीं ह्रीं श्रीं नमः, दक्षिणपार्श्वे
ह्रीं श्रीं ह्रीं श्रीं ह्रीं श्रीं नमः, वामपार्श्वे ह्रीं श्रीं
ह्रीं श्रीं ह्रीं श्रीं नमः, पृष्ठे ह्रीं श्रीं ह्रीं श्रीं ह्रीं
श्रीं नमः, नाभौ ह्रीं श्रीं ह्रीं श्रीं ह्रीं श्रीं नमः, उदरे
ह्रीं श्रीं ह्रीं श्रीं ह्रीं श्रीं नमः, हृदये ह्रीं श्रीं ह्रीं
श्रीं ह्रीं श्रीं नमः, दक्षांसे ह्रीं श्रीं ह्रीं श्रीं ह्रीं
श्रीं नमः, ककुदि ह्रीं श्रीं ह्रीं श्रीं ह्रीं श्रीं नमः,
वामांसे ह्रीं श्रीं ह्रीं श्रीं ह्रीं श्रीं नमः,
हृदयाद्दक्षभुजाग्रान्तम् ह्रीं श्रीं ह्रीं श्रीं ह्रीं श्रीं
नमः, हृदयाद्वामभुजाग्रान्तम् ह्रीं श्रीं ह्रीं श्रीं ह्रीं
श्रीं नमः, हृदयादिवामपादाग्रान्तम् ह्रीं श्रीं ह्रीं श्रीं
ह्रीं श्रीं नमः, हृदयान्मस्तकान्तम् ह्रीं श्रीं ह्रीं श्रीं ह्रीं
श्रीं नमः॥ इतिचतुर्थः॥

p. 23) **अथ पञ्चमः**

ललाटे मूलं ह्रां ह्रां ऋं ॠं क्लूं नमः, मुखवृत्ते मूलं
ह्रां ह्रां ऋं ॠं क्लूं नमः, दक्षनेत्रे मूलं ह्रां ह्रां ऋं
ॠं क्लूं नमः, वामनेत्रे मूलं ह्रां ह्रां ऋं ॠं क्लूं
नमः, दक्षकर्णे मूलं ह्रां ह्रां ऋं ॠं क्लूं नमः,
वामकर्णे मूलं ह्रां ह्रां ऋं ॠं क्लूं नमः, दक्षनासायाम्
मूलं ह्रां ह्रां ऋं ॠं क्लूं नमः, वामनासायां मूलं
ह्रां ह्रां ऋं ॠं क्लूं नमः, दक्षगण्डे मूलं ह्रां ह्रां
ऋं ॠं क्लूं नमः, वामगण्डे मूलं ह्रां ह्रां ऋं ॠं क्लूं
नमः, ऊर्द्धोष्ठे मूलं ह्रां ह्रां ऋं ॠं क्लूं नमः,
अधरोष्ठे मूलं ह्रां ह्रां ऋं ॠं क्लूं नमः,
ऊर्द्धदन्तपङ्क्तौ मूलं ह्रां ह्रां ऋं ॠं क्लूं नमः,
अधोदन्तपङ्क्तौ मूलं ह्रां ह्रां ऋं ॠं क्लूं नमः, शिरसि
मूलं ह्रां ह्रां ऋं ॠं क्लूं नमः, मुखे मूलं ह्रां ह्रां
ऋं ॠं क्लूं नमः, दक्षिणबाहुमूले मूलं ह्रां ह्रां ऋं ॠं
क्लूं नमः, कूर्परे मूलं ह्रां ह्रां ऋं ॠं क्लूं नमः,
मणिबन्धे मूलं ह्रां ह्रां ऋं ॠं क्लूं नमः, अङ्गुलीमूले
मूलं ह्रां ह्रां ऋं ॠं क्लूं नमः, अङ्गुल्यग्रे मूलं ह्रां
ह्रां ऋं ॠं क्लूं नमः, वामबाहुमूले मूलं ह्रां ह्रां ऋं
ॠं क्लूं नमः, कूर्परे मूलं ह्रां ह्रां ऋं ॠं क्लूं नमः,

मणिबन्धे मूलं ह्रां ह्रां ऋं ॠं क्लूं नमः, अङ्गुलीमूले
मूलं ह्रां ह्रां ऋं ॠं क्लूं नमः, अङ्गुल्यग्रे मूलं ह्रां
ह्रां ऋं ॠं क्लूं नमः, दक्षिणोरुमूले मूलं ह्रां ह्रां ऋं
ॠं क्लूं नमः, जानुनि मूलं ह्रां ह्रां ऋं ॠं क्लूं नमः,
गुल्फे मूलं ह्रां ह्रां ऋं ॠं क्लूं नमः, अङ्गुलीमूले मूलं
ह्रां ह्रां ऋं ॠं क्लूं नमः, अङ्गुल्यग्रे मूलं ह्रां ह्रां ऋं
ॠं क्लूं नमः, वामोरुमूले मूलं ह्रां ह्रां ऋं ॠं क्लूं
नमः, जानुनि मूलं ह्रां ह्रां ऋं ॠं क्लूं नमः, गुल्फे
मूलं ह्रां ह्रां ऋं ॠं क्लूं नमः, अङ्गुलीमूले मूलं ह्रां
ह्रां ऋं ॠं क्लूं नमः, अङ्गुल्यग्रे मूलं ह्रां ह्रां ऋं ॠं
क्लूं नमः, दक्षपार्श्वे मूलं ह्रां ह्रां ऋं ॠं क्लूं नमः,
वामपार्श्वे मूलं ह्रां ह्रां ऋं ॠं क्लूं नमः, पृष्ठे
मूलं ह्रां ह्रां ऋं ॠं क्लूं नमः, नाभौ मूलं ह्रां
ह्रां ऋं ॠं क्लूं नमः, उदरे मूलं ह्रां ह्रां ऋं ॠं क्लूं
नमः, हृदये मूलं ह्रां ह्रां ऋं ॠं क्लूं नमः, दक्षांसे
मूलं ह्रां ह्रां ऋं ॠं क्लूं नमः, ककुदि मूलं ह्रां ह्रां
ऋं ॠं क्लूं नमः, वामांसे मूलं ह्रां ह्रां ऋं ॠं क्लूं
नमः, हृदयाद्दक्षपादाग्रान्तम् मूलं ह्रां ह्रां ऋं ॠं
क्लूं नमः,

p. 24) हृदयाद्वामभुजाग्रान्तम् मूलं ह्रां ह्रां ऋं ऋं क्लूं

नमः, हृदयाद्दक्षपादाग्रान्तम् मूलं ह्रां ह्रां ऋं ऋं

क्लूं नमः, हृदादिवामपादाग्रान्तम् मूलं ह्रां ह्रां ऋं ऋं

क्लूं नमः, हृदयान्मस्तकान्तम् मूलं ह्रां ह्रां ऋं ऋं क्लूं

नमः॥ इति पञ्चमः॥

अथ षष्ठः

ललाटे मूलंनमः, मुखवृत्ते मूलंनमः, दक्षनेत्रे

मूलंनमः, वामनेत्रे मूलंनमः, दक्षकर्णे मूलंनमः,

वामकर्णे मूलंनमः, दक्षनासायां मूलंनमः,

वामनासायां मूलंनमः, दक्षगण्डे मूलंनमः, वामगण्डे

मूलंनमः, ऊर्द्धोष्ठे मूलंनमः, अधरोष्ठे मूलंनमः,

ऊर्द्धदन्तपङ्क्तौ मूलंनमः, अधोदन्तपङ्क्तौ मूलंनमः,

शिरसि मूलंनमः, मुखे मूलंनमः, दक्षिणबाहुमूले

मूलंनमः, कूर्परे मूलंनमः, मणिबन्धे मूलंनमः,

अङ्गुलीमूले मूलंनमः, अङ्गुल्यग्रे मूलंनमः, वामबाहुमूले

मूलंनमः, कूर्परे मूलंनमः, मणिबन्धे मूलंनमः,

अङ्गुलीमूले मूलंनमः, अङ्गुल्यग्रे मूलंनमः, दक्षिणोरुमूले

मूलंनमः, जानुनि मूलंनमः, गुल्फे मूलंनमः, अङ्गुलीमूले

मूलंनमः, अङ्गुल्यग्रे मूलंनमः, वामोरुमूले मूलंनमः,
जानुनि मूलंनमः, गुल्फे मूलंनमः, अङ्गुलीमूले मूलंनमः,
अङ्गुल्यग्रे मूलंनमः, दक्षपार्श्वे मूलंनमः, वामपार्श्वे
मूलंनमः, पृष्ठे मूलंनमः, नाभौ मूलंनमः, उदरे
मूलंनमः, हृदये मूलंनमः, दक्षांसे मूलंनमः, ककुदि
मूलंनमः, वामांसे मूलंनमः, हृदयाद्दक्षभुजाग्रान्तम्
मूलंनमः, हृदयाद्वामभुजाग्रान्तम् मूलंनमः,
हृदयाद्दक्षपादाग्रान्तम् मूलंनमः, हृदादिवामपादाग्रान्तम्
मूलंनमः, हृदयान्मस्तकान्तम् मूलंनमः ॥

इत्यनुलोमः

p. 25) अथ विलोमः

हृदयान्मस्तकान्तम् मूलंनमः, हृदादिवामपादाग्रान्तम्
मूलंनमः, हृदयाद्दक्षपादाग्रान्तम् मूलंनमः,
हृदयाद्वामभुजाग्रान्तम् मूलंनमः, हृदयाद्दक्षभुजाग्रान्तम्
मूलंनमः, वामांसे मूलंनमः, ककुदि मूलंनमः,
दक्षांसे मूलंनमः, हृदये मूलंनमः, उदरे मूलंनमः,
नाभौ मूलंनमः, पृष्ठे मूलंनमः, वामपार्श्वे

मूलंनमः, दक्षपार्श्वे मूलंनमः, अङ्गुल्यग्रे मूलंनमः,
अङ्गुलीमूले मूलंनमः, गुल्फे मूलंनमः, जानुनि मूलंनमः,
वामोरुमूले मूलंनमः, अङ्गुल्यग्रे मूलंनमः,अङ्गुलीमूले
मूलंनमः, गुल्फे मूलंनमः, जानुनि मूलंनमः,
दक्षिणोरुमूले मूलंनमः, अङ्गुल्यग्रे मूलंनमः, अङ्गुलीमूले
मूलंनमः, मणिबन्धे मूलंनमः, कूर्परे मूलंनमः,
वामबाहुमूले मूलंनमः, अङ्गुल्यग्रे मूलंनमः, अङ्गुलीमूले
मूलंनमः, मणिबन्धे मूलंनमः, कूर्परे मूलंनमः,
दक्षिणबाहुमूले मूलंनमः, मुखे मूलंनमः, शिरसि
मूलंनमः, अधोदन्तपङ्क्तौ मूलंनमः, ऊर्ध्वदन्तपङ्क्तौ
मूलंनमः, अधरोष्ठे मूलंनमः, ऊर्ध्वोष्ठे मूलंनमः,
वामगण्डे मूलंनमः, दक्षगण्डे मूलंनमः, वामनासायां
मूलंनमः, दक्षनासायां मूलंनमः वामकर्णे
मूलंनमः, दक्षकर्णे मूलंनमः वामनेत्रे मूलंनमः
दक्षनेत्रे मूलंनमः, मुखवृत्ते मूलंनमः, ललाटे
मूलंनमः॥ इति विलोमः॥ अष्टोत्तरशतसङ्ख्यकमूलेन
व्यापकन्यासं कुर्यादिति षष्ठः॥

अथ तत्त्वन्यासः

तद्यथा - - पादादिनाभिपर्यन्तं क्रीं क्रीं क्रीं ह्रीं ह्रीं हूं

हूं ॐ आत्मतत्त्वायनमः, नाभ्यादिहृदयपर्यन्तं दक्षिणे कालिके ॐ

विद्यातत्त्वायनमः,

p. 26) हृदादिशिरःपर्यन्तं क्रीं क्रीं क्रीं ह्रीं ह्रीं हूं हूं

स्वाहा ॐ शिवतत्त्वायनमः॥

अथ बीजन्यासः

तथाहि - ब्रह्मरन्ध्रे क्रींनमः, भ्रूमध्ये क्रींनमः,

ललाटे क्रींनमः, नाभौ ह्रींनमः, गुह्ये ह्रींनमः, वक्त्रे

हूंनमः, गुर्वङ्गे हूंनमः इति॥ इमौ न्यासौ॥ क्रीं क्रीं क्रीं

ह्रीं ह्रीं हूं हूं दक्षिणे कालिके क्रीं क्रीं क्रीं ह्रीं ह्रीं

हूं हूं स्वाहा इति विद्याबीजेन ततो मूलेन नवधा सप्तधा

पञ्चधा व्यापकन्यासं कुर्यात्। ततो ध्यानं कुर्यात्तद्यथा -

करालवदनांघोरांमुक्तकेशीञ्चतुर्भुजाम्।

कालिकांदक्षिणांदिव्याम्मुण्डमालाविभूषिताम्॥

सद्यश्छिन्नशिरःखड्गवामोर्ध्वाधःकराम्बुजाम्॥

अभयंवरदञ्चैवदक्षिणाधोर्ध्वपाणिकाम्॥

महामेघप्रभांश्यामांतथाचैवदिगम्बराम्।

कण्ठावसक्तमुण्डालीगलद्रुधिरचर्च्चिताम्॥

कर्णावतंसतानीतशवयुग्मभयानकाम्।

घोरदंष्ट्राङ्करालास्याम्पीनोन्नतपयोधराम्॥

शवानाङ्करसङ्घातैः कृतकाञ्चीं हसन्मुखीम्।

सृक्कद्वयगलद्रक्तधाराविस्फुरिताननाम्॥

घोररावाम्महारौद्रींश्मशानालयवासिनीम्।

दन्तुरां दक्षिणव्यापिलम्बमानकचोच्चयाम्॥

शवरूपमहादेवहृदयोपरिसंस्थिताम्।

शिवाभिर्घोररूपाभिश्चतुर्दिक्षुसमन्विताम्॥

महाकालेनचसमंविपरीतरतातुराम्।

एवंसञ्चिन्तयेद्देवीं सर्वकामार्थसिद्धये॥

ततः समस्तकिल्बिषरहितं निर्मलदेहं विचिन्त्य आत्मानं देवीरूपं विभावयेत्॥ अथ पीठदेवताया देहे पीठमयं विभावयेत्॥ तद्यथा - आधारे मण्डूकायनमः, स्वाधिष्ठाने कालाग्निरुद्रायनमः, नाभौ कच्छपायनमः, हृदये ॐ आधारशक्तयेनमः, कूर्मायनमः, धरायैनमः, सुधासमुद्रायनमः, कल्पवृक्षायनमः, मणिहर्म्म्यायनमः, हेमपीठायनमः, इतिहृदयेन्यसेत्॥

p. 27) दक्षबाहौ धर्मायनमः, वामे ज्ञानायनमः, वामोरौ

वैराग्यायनमः, दक्षोरौ ऐश्वर्यायनमः, वदने अधर्मायनमः,

वामपार्श्वे अज्ञानायनमः, नाभौ अवैराग्यायनमः,

दक्षिणपार्श्वे अनैश्वर्यायनमः, हृदिसंसत्त्वायनमः,

रंरजसेनमः, तंतमसेनमः, तपिन्यादिकलाभ्योनमः,

अमृतादिकलाभ्योनमः, धूम्रार्चिकलाभ्योनमः, आं-आत्मनेनमः,

अं-अन्तरात्मनेनमः, पंपरमात्मनेनमः,

ह्रींज्ञानात्मनेनमः, मंमायातत्त्वायनमः,

कंकलातत्त्वायनमः, विंविद्यातत्त्वायनमः, पंपरतत्त्वायनमः,

श्मशानायनमः, मुनिभ्योदेवेभ्योनमः,

बहुमांसास्थिमोदमानाभ्यः शिवाभ्योनमः,

शवमुण्डचिताङ्गारेभ्योनमः, ॐजयायैनमः, ॐविजयायैनमः,

ॐजितायैनमः, ॐ-अपराजितायैनमः, ॐ नित्यायैनमः,

ॐविलासिन्यैनमः, ॐदोग्ध्यैनमः, ॐ-अघोरायैनमः,

ॐमङ्गलायैनमः, ततः ह्सौंमहाप्रेतपद्मासनायनमः,

एवंदेहमयंपीठं विभाव्य प्रातःकृत्योक्तप्रकारेण

कुण्डल्युत्थानादि कृत्वा देवींध्यात्वा तत्तन्मुद्राः प्रदर्श्य

मानसैरुपचारैः पूजयेत्। तद्यथा - मूलाधारे ध्वजाधोगुदोर्ध्वे

चतुःशोणपत्रे वंशंषंसमितिसहिते प्रसुप्तभुजगाकारां

स्वयम्भूलिङ्गवेष्टिनीं ध्यायेत्॥ तद्यथा॥

ध्यायेत्कुण्डलिनीं सूक्ष्मां मूलाधारनिवासिनीम्।

प्रसुप्तभुजगाकारां विद्युत्पटलसन्निभाम्॥

तामिष्टदेवतारूपां सार्द्धत्रिवलयान्विताम्।

कोटिसौदामिनीभासां स्वयम्भूलिङ्गवेष्टिनीम्॥

तामुत्थाप्य महादेवीं हंसं मन्त्रेण साधकः।

उद्यद्दिनकरद्योतांयावच्छासन्दृढासनः॥

अशेषाशुभशान्त्यर्थंसमाहितमनाश्चिरम्।

तत्प्रभापटलव्याप्तं शरीरमपि चिन्तयेत्॥

सुषुम्नावर्त्मनैवैनां परब्रह्मणि योजयेत्।

तत्र परब्रह्मणि सङ्गमय्य ततश्चन्द्रमण्डलान्तर्गतामृतधारां

निपीय तया

लोलीभूताञ्चैतन्यमयीञ्चरणयुगलान्तर्विगलितैरमृतनिवहैः

प्रपञ्चं सञ्चतीम्मूलाधारमानयेत्॥ आत्मानं

शुद्धचैतन्यानन्दमयं

p. 28) देवतारूपं विभावयेत्॥ ततो मूलाधारात्कुण्डलिनीं

हंसंमन्त्रेणोत्थाप्य द्वादशदले हृदयसरसिजे,

षड्बिंदुलाञ्छितकादिचान्तसहिते गत्वा प्रदीपकलिकाकारजीवरूपां

द्वितीयाम्प्रदीपकलिकामाकृष्य स्वमुखे निःक्षिप्तवतीम्परब्रह्मणि

सङ्गमय्य पुनर्हृदयदेशमानीय तन्मुखात्प्रदीपकलिकां

विनिष्कृष्य मूलाधारे संस्थापयेत्॥

ताम्प्रदीपकलिकान्देवतारूपान्ध्यायेत्॥ तद्यथा॥

मेघाङ्गींविगताम्बरां

शवशिवारावान्त्रिनेत्राम्पराङ्कण्णालम्बितवालयुग्मभयदाम्मुण्

डस्त्रजामालिनीम्॥ वामाधोर्ध्वकराम्बुजे नरशिरःखड्गञ्च

सव्येतरे दानाभीतिविमुक्तकेशनिचयाँव्वन्दे सदा कालिकाम्॥

इतिध्यात्वा तत्तन्मुद्राम्प्रदर्श्य मानसैरुपचारैःपूजयेत्॥ तत्र

प्रार्थयेदनेन मन्त्रेण ॐ स्वागतन्देवदेवेशि सन्निधौ भव कालिके॥

गृहाण मानसीम्पूजाँय्यथार्त्थपरिभाषिताम् ततोऽष्टोत्तरशतँ

व्वर्णमय्या मालया जपेत्॥ इति मानसपूजाविधिः॥

अथ बहिःपूजा

तत्र प्राणायामषडङ्गन्यासादि कुर्यात्॥ तद्यथा॥

क्रांहृदयाय नमः, क्रींशिरसेस्वाहा, क्रूंशिखायैवषट्,

क्रैंकवचायहुम्, क्रौंनेत्रत्रयायवौषट्, क्रः-अस्त्रायफट्,

इतिछोटिकया दिग्बन्धनङ्कुर्यात्॥ एवं करन्यासः।

क्रांअङ्गुष्ठाभ्यांनमः, क्रींतर्ज्जनीभ्यांस्वाहा,

क्रूंमध्यमाभ्यांव्वौषट्, क्रैं अनामिकाभ्यांहुम्,

क्रौंकनिष्ठिकाभ्यांवौषट्, क्रःकरतलकरपृष्ठाभ्याम्फट्,

एवन्न्यासादिकङ्कृत्वा आःसुरेखेवज्ररेखेहुँहङ्वाहा अनेन

मन्त्रेण कुङ्कुमसिन्दूरादिभिः
सौवर्णराजतताम्रस्फाटिकवैद्रुमाद्यन्यतमपात्रे
षट्कोणत्रिकोणाष्टदलभूपुरात्मकँय्यन्त्रं लिखेत्॥ तदुक्तं
रुद्रयामले ततः कुङ्कुमसिन्दूरैः कार्यँय्यन्त्रन्तु योगिनाम्॥
सौवर्णेराजतेताम्रे स्फाटिके वैद्रुमे तथा॥ चक्रेयथोक्तविधिना

p. 29) पूज्या देवी नरोत्तमैः॥ सारसङ्ग्रहेऽपि ताम्रेद्वादशकँ
व्वर्षं स्फाटिकादौ तु सर्वदा॥ तेषाम्मध्येस्फाटिकन्तु
सर्वसिद्धिप्रदम्भवेत् इत्यादि॥ तन्त्रान्तरेपि यावज्जीवं सुवर्णे
स्याद्रौप्ये द्वाविंशति प्रिये॥ ताम्रेद्वादशवर्षान्तन्तदर्द्ध
भूर्ज्जपत्रके॥ एकतोलन्द्वितोलँव्वा त्रितोलँव्वेदतोलकम्॥
स्वेच्छातोलन्नरःकृत्वा प्रत्यवायं समश्नुते॥ इति बहिःपूजा॥

अथार्घ्यस्थापनविधिः

तद्यथा- आत्मयन्त्रयोर्म्मध्ये
त्रिकोणवृत्तषट्कोणचतुरस्त्रमण्डलँव्विरच्य ईमितिविलिख्य,
मूलखण्डत्रयेण त्रिकोणं सम्पूज्यषट्कोणेषुषडङ्गं सम्पूज्य
चतुरस्त्रे पूर्णगिरिपीठायनमः इति पूर्व्वे,
उड्डीयानपीठायनमः इतिदक्षिणे कामरूपपीठायनमः

इतिपश्चिमे, जालन्धरपीठायनमः इत्युत्तरे, इतिसम्पूज्य मध्ये ॐ
आधारशक्तयेनमः इतिसम्पूज्य त्रिकोणगर्भत्रिकोणषट्कोणभूषिताँ
य्यँरिकाम्मूलेन संस्थाप्य नमः
इतिसामान्यार्घस्थजलेनाभ्युक्ष्य
वांवींवुंहसक्षमलवरयूंधर्मदवह्निमण्डलात्मनेकालिकार्
ग्घ्यपात्राधारायनमः इतिसम्पूज्य यंधूम्रार्च्चिषेनमः, रं
ऊष्मायैनमः, लंज्वलिन्यैनमः, वंज्वालिन्यैनमः,
शंविस्फुलिङ्गिन्यैनमः, षंसुश्रियैनमः, संसुरूपायैनमः,
हंकपिलायैनमः, लंहव्यवाहायैनमः, क्षंकव्यवाहायैनमः,
इतिबह्निदशकलाः सम्पूज्य षट्कोणेषु षडङ्गञ्च सम्पूज्य
मध्यमूलेनदेवीम्प्रपूज्य श्रीकालिकाश्रीपात्रं
स्थापयामिनमः, इतिपठित्वा तदुपरि सौवर्णराजतन्ताम्रन्नारिकेलँ
व्वा पात्रं फडितिप्रक्षालितं संस्थाप्य ह्रीं ह्रीं हूं
हसक्षमलवरयूंवसुप्रदतपिन्यादिद्वादशकलात्मने
अर्कमण्डलायश्रीदक्षिणाकालिकार्घ्यपात्रायनमः, इतिसम्पूज्य
पूर्वादिप्रादक्षिण्येन कलाम्पूजयेत्तद्यथा -
कंभंतपिन्यैनमः, खंबंतापिन्यैनमः,

p. 30) गंफंधूम्रायै नमः, घंपंमरीच्यैनमः,
ङंनंज्वालिन्यैनमः, चंधंरुच्यैनमः,

छंदंसुषुम्नायैनमः, जंथंभोगदायै नमः,

झंतंविश्वायैनमः, ञंणंबोधिन्यैनमः,

टंढंधारिण्यैनमः, ठंडंक्षमायैनमः इति सम्पूज्य

तत्पात्रमध्येत्रिकोणं षट्कोणवृत्तम्मूलेनविलिख्य

षडङ्गंसम्पूज्यमूलेनत्रिकोणं सम्पूज्य विलोममातृकया

दशधाजप्तेन वा क्षीरञ्जलँव्वा मधुसँविदादि वा निक्षिप्य तेन

त्रिकोणम्परिपूर्य यंरंवमितिदोषशोषणदहनप्लावनानि कृत्वा

सांसींसूंसहक्षमलवरयूंकामप्रदामृतादिषोडशकलात्मने

सोममण्डलाय स्त्रीदक्षिणाकालिकाग्घ्यांमृतायनमः इतिसम्पूज्य

कलाःपूजयेत्। अं अमृतायैनमः, आंमानदायैनमः,

इंपूषायैनमः, ईंतुष्ट्यैनमः, उंपुष्ट्यैनमः,

ऊंवृत्त्यैनमः, ऋंधृत्यैनमः, ॠंशशिन्यैनमः

लृंचन्द्रिकायैनमः, लॄंकान्त्यैनमः, एंज्योत्स्नायैनमः,

ऐंश्रियैनमः, ओंप्रीत्यैनमः, औं-अङ्गदायैनमः,

अंपूर्णायैनमः, अःपूर्णामृतायैनमः इतिकलाः सम्पूज्य

एलालवङ्गकर्पूरादिसुगन्धादिनिःक्षिप्य पूर्ववद्यन्त्रन्द्रव्ये विलिख्य

त्रिकोणरेखायाम् अं १६ कं १६ खं १६ इतिविलिख्य मध्ये

हंलंक्षं इतिसँलिख्य मूलखण्डत्रयेण सम्पूज्य

गङ्गेचयमुनेचैवगोदावरिसरस्वति॥

नर्म्मदेसिन्धुकावेरिजलेस्मिन्सन्निधिङ्कुरु॥ ॐ ब्रह्माण्डोदरतीर्थानि

करैः स्पृष्टानि ते रवे॥ तेन सत्येन मे देव तीर्थन्देहिदिवाकर

इत्यादिभिस्तीर्थान्यावाह्याङ्कुशमुद्रया वौषट् इतिपुष्पं वषट्

इत्यनेन गालिनींमुद्रांप्रदर्श्य। गालिनीमुद्रा यथा

कनिष्ठाङ्गुष्ठकौयुक्तौकरयोरितरेतरम्॥

तर्ज्जनीमध्यमानामासंहताभुग्नवर्ज्जिताः॥ वमितिधेनुमुद्रया

अमृतीकृत्य इष्टदेवतान्ध्यात्वा सम्पूज्य

सङ्कलीकृत्यशङ्खमुद्राम्प्रदर्श्य, षड्कोणे च षडङ्गं सम्पूज्य

पूर्वे ग्लूंगगनरत्नेभ्योनमः, दक्षिणे स्लूंस्वर्गरत्नेभ्योनमः,

इति पश्चिमे प्लूंपातालरत्नेभ्योनमः, उत्तरे म्लूं

मनुष्यरत्नेभ्योनमः, नूंनागरत्नेभ्योनमः, इतिमध्ये

p. 31) सम्पूज्य ऐंमूलं अमृते-अमृतोद्भवे-अमृतेश्वरि-अमृतवर्षिणि

अमृतंस्रावयसांजूंजूं-अमृतेश्वर्यै स्वाहा

इत्यमृतेश्वरीन्त्रिधा जप्त्वा त्रैयम्बकेन गायत्र्या वा

शांशींशूंशैंशौंशः शुक्रशापविमोचितायैस्वाहा

इत्यमृतेशी स्मृत्वा

अखण्डैकवरानन्दकरेपरसुधात्मनि।

स्वच्छन्दस्फुरणामत्र निधेह्यमृतरूपिणी॥

सूर्यकोटिप्रतीकाशञ्चन्द्रकोटिसुशीतलम्।

अष्टादशभुजन्देवम्पञ्चवक्त्रन्त्रिलोचनम्।

अमृतार्णवमध्यस्थब्रह्मपद्मोपरिस्थितम्।

वृषारूढन्नीलकण्ठं सर्वाभरणभूषितम्।

कपालखट्वाङ्गधरञ्चण्टाडमरुवादिनम्॥

पाशाङ्कुशधरन्देवञ्चदामुशलधारिणम्।

खड्गखेटकपट्टीशमुद्गरोच्छूलकुन्तिनम्॥

विचित्रखेटकम्मुण्डँव्वरदाभयमालिनम्।

लोहितन्देवदेवेशम्भावयेत्साधकोत्तमः॥

भावयेच्च सुरान्देवीञ्चन्द्रकोट्ययुतप्रभाम्।

हिमकुन्देन्दुधवलाम्पञ्चवक्त्रान्त्रिलोचनाम्॥

अष्टादशभुजैर्युक्तां सर्वानन्दकरोद्यताम्।

प्रहसन्तींव्विशालाक्षीन्देवदेवस्यसम्मुखीम्॥

इतिमन्त्रेणवामाङ्गुष्ठमध्यमाभ्यान्द्रव्यमुद्धृत्यानंदभैर

वमिथुनन्तत्रैवसम्पूज्यसन्तर्प्यच-अमृतेशींस्मृत्वा

क्लींकुलस्थामृताकारेसिद्धिज्ञानकरेपरे॥ अमृतत्वन्निधेह्यत्र वस्तुनि

क्लिन्नरूपिणि॥ हंसःतर्पयामिनमः इतिपूर्ववत्संतर्प्य

अमृतेशींस्मृत्वा सौं तद्रूपैकरसाख्यञ्च दत्वाह्येतत्स्वरूपिणी॥

भूत्वा कुलामृताकारम्मयि विस्फुरणङ्कुरु॥ हंसः इति

प्राग्वत्सन्तर्प्यमूलं सप्तधाजप्त्वा कवचेनावगुण्ठ्यास्त्रेण

संरक्ष्य मत्स्यमुद्रयाच्छाद्य योनिधेनुमुद्रे प्रदर्शयेत्॥

इतिश्रीपात्रस्थापनविधिः॥ दक्षिणे अग्र्घ्यस्थापनं कुर्यात्॥ तद्यथा

॥ त्रिकोणवृत्तषट्कोणभूपुराणिकृत्वा। आधारशक्तयेनः
इत्यभ्यर्च्यांग्निमूर्द्धङ्कोणाग्रङ्कृत्वा शङ्खमुद्रान्दर्शयेत्॥
शङ्खमुद्रा यथा - वाममुष्यन्तरेङ्गुष्ठन्निवेश्य

p. 32) सरलाङ्गुलीः॥ दक्षिणस्य करस्यैव वामाङ्गुष्ठेनसंस्पृशेत्॥
शङ्खमुद्रेयमाख्याता मन्त्रविद्भिरनुत्तमा इतिपुष्पाक्षतैः
षडङ्गानि-अग्नीशासुरवायव्येषु मध्यदिक्षु चसम्पूज्य फट् इति
प्रक्षालितमाधारं संस्थाप्य तत्र वह्निमण्डलमभ्यर्च्य, तर
पूर्वबीजेन शङ्खम्प्रक्षाल्य, तत्र संस्थाप्य,
पूर्वोक्तमन्त्रेणार्कमण्डलन्तत्र सम्पूज्य मूलेन जलन्दत्वा,
पूर्वोक्तमन्त्रेण चन्द्रमण्डलमभ्यर्च्य गङ्गेच इत्यादिना
तीर्थमावाह्य, वौषट् इतिसँओज्य सम्पूज्य तीर्थशक्तिञ्च सम्पूज्य
वषट् इति पुष्पन्न्यस्य गालिनीमुद्राम्प्रदर्श्य, रम् इति स्वधाबीजेन
धेनुमुद्रया अमृतीकृत्य, इष्टदेवतान्ध्यात्वा, सकलीकृत्य, षडङ्गानि
सन्न्यस्य, अस्त्रेण संरक्ष्य सम्पूज्य अष्टकृत्वोमूलेनाभिमन्त्र्य,
मत्स्यमुद्रयाच्छाद्य,
कुशाग्राक्षततिलव्रीहियवाज्यसिद्धार्थम्पुष्पाणि सङ्क्षिप्य,
योनिमुद्रान्दर्शयित्वा,
श्रीपात्रस्थजलङ्किञ्चित्सङ्क्षिपेदित्यग्घ्र्यस्थापनविधिः॥ तद्वामे
पाद्यपात्रन्त्रिकोणवृत्तचतुरस्रे आधारशक्तिं सम्पूज्यपात्रं

साधारं संस्थाप्य नमः इतिमूलेन वा जलेन प्रपूर्य वषट्
इतिपुष्पं नमः इति गन्धञ्च निःक्षिप्य उशीरं रोचनञ्च
श्यामाकविष्णुक्रान्ताक्षदूर्वा-इतिवा
सङ्क्षिप्यास्त्रेणाष्टकृत्वोऽभिमन्त्र्य मूलेनाभिमन्त्र्यधेनुयोनिमुद्रे
दर्शयेत्॥ एवन्तत्पार्श्वे आचमनीयपात्रन्त्रिरावृत्तचतुरस्त्रे
आधारशक्तिं सम्पूज्य पात्रं साधारं संस्थाप्य नमः
इतिमूलेन वा जलेन प्रपूर्य वषट् इति पुष्पं नमः इति गन्धञ्च
निःक्षिप्य
जातिकर्पूरकङ्कोललवङ्गतमालकादिचूर्णान्निक्षिप्यास्त्रेणाष्टकृत्वोऽ
भिमन्त्र्य मूलेनाभिमन्त्र्य धुनुयोनिमुद्रेदर्शयेत्॥ तद्दक्षिणे
मधुपर्कपात्रन्त्रिकोणवृत्तचतुरस्त्रे आधारशक्तिसम्पूज्य पात्र
साधारम्मधुघृतशर्करादधिदुग्धयुतं
संस्थाप्यास्त्रेणाष्टकृत्वोभिमन्त्र्यमूलेनाभिमन्त्र्यधेनुयोनिमुद्रे
दर्शयेत्॥ तद्दक्षे स्नानीयपात्रन्त्रिकोणवृत्तचतुरस्त्रे आधारशक्ति
सम्पूज्य पात्रं साधारं संस्थाप्य नमः इति मूलेन वा जलेन

p. 33) प्रपूर्य वषट् इतिपुष्पं नमः इतिगन्धञ्च निक्षिप्य उशीरं
रोचनञ्च
संक्षिप्यास्त्रेणाष्टकृत्वोऽभिमन्त्र्यमूलेनाभिमन्त्र्यधेनुयोनिमुद्रे
दर्शयेत्। तत्रैव श्रीचन्दनादिपुष्पन्दक्षेवसनभूषणादि तत्रैव

स्थापयेत्

सामान्याग्घ्र्यस्थजलेनविशेषजलेनवाभिषिच्यमूलेनाष्टवारमभिम्

अन्त्र्य धेनुयोनिमुद्रे दर्शयेत्। एवं सर्ववस्तुशोधनँ

व्विशेषजलेनात्ममृर्ध्नि भैरवौ तर्पयेत्। श्रीपात्रामृतेन

विशेषाग्घ्र्यपात्रेण वा देवीं हृदि त्रिवारन्तर्पयेत्॥ तर्पणञ्च

तत्त्वमुद्रया॥ सा चानामिकाङ्गुष्ठयोगेन बोध्या॥ अत्र

तत्त्वशुद्ध्याद्यपि कौलिकैराचरणीयम्॥ तद्यथा तत्र श्रुतिः॥

प्राणापानव्यानोदानसमाना मे शुध्यन्तां ज्योतिरहं विरजा

विपाप्मा भूयासं स्वाहा। ॐ पृथिव्यप्तेजोवाय्वाकाशानि मे

शुद्ध्यन्तामित्यादि ॐ प्रकृत्यहङ्कारबुद्धिमनःश्रोत्राणि मे

शुद्ध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा। ॐ

स्पर्शरूपरसगन्धाकाशानि मे शुद्ध्यन्ताम् ज्योतिरहं विरजा

विपाप्मा भूयासं स्वाहा। ॐ वायुतेजःसलिलभूम्यात्मानो मे

शुद्ध्यन्ताञ्ज्योतिरहं व्विरजा विपाप्मा भूयासं स्वाहा। इति

परामृशन् सप्तधा सर्वाङ्गे ॐ त्वक्चक्षुर्जिह्वाघ्राणवचांसि मे

शुद्ध्यन्ताम्॥ ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा। ॐ

पाणिपादपायूपस्थशब्दा मे शुद्ध्यन्ताम् ज्योतिरहँव्विरजा

विपाप्मा भूयासं स्वाहा॥ इतितत्त्वशुद्धिः॥

ईशानवह्निनिर्ऋतिवायुकोणेषु मण्डलानि विधाय

बटुकयोगिनीगणेशक्षेत्रपालभूतेभ्यः सम्पूज्य

वटकादिबलिन्दद्यात्। मण्डलमभ्यर्च्च्य वटकादिद्रव्यसंस्थापयेत्॥
ॐ एह्येहिदेवी पुत्रकपिशजटाभारभास्वरज्वालामुख
सर्वविघ्नान्नाशय नाशय सर्वोपचारसहितम्बलिङ्गृह्णगृह्ण
स्वाहा॥ अनेनाङ्गुष्ठानामिकायोगेन ईशाने बटुकाय बलिन्दद्यात्॥
ऊर्द्धम्ब्रह्माण्डतो वा दिविगतसुतले भूतले निष्कले वा पाताले
वानले वा सलिलपवनयोर्यत्रतत्रस्थितावा॥ क्षेत्रे पीठोपपीठादिषु
कृतसुपदाः

p.34) पुष्पधूपादिकेन प्रीता देव्यस्सदाताश्शुभवलिविधिनायान्तु
देवेन्द्रतुल्याः॥ यां यीं यूं यैं यौं यः योगिनीभ्यः
हूँहट्वाहा अनेन कनिष्ठाङ्गुष्ठयोगेन वह्निकोणे बलिन्दद्यात्॥
क्षांक्षींक्षूंक्षैंक्षौंक्षः
क्षेत्रपालधूपदीपादिसहितम्बलिं गृह्णगृह्णस्वाहा
अङ्गुष्ठतर्ज्जनीभ्याँव्वायुकोणे बलिन्दद्यात्॥
गांगींगूंवरवरदसर्वजनम्मे वशमानय बलिं गृह्णगृह्ण
स्वाहा मुष्टिमध्यस्थामङ्गुलीन्दण्डवत्कृत्वा नैऋते बलिन्दद्यात्॥
वामभागे मण्डलं कृत्वा साधारपात्रं संस्थाप्य तत्र
बलिद्रव्यन्दत्त्वा सेकादिकृत्वा ॐ
ह्रींसर्वविघ्नकृद्भ्यःसर्वभूतेभ्योहूँहट्वाहा इत्यनेन
तत्त्वमुद्रया भूतेह्यो बलिन्दद्यात्। इदम्बलिदानँअस्तुतःपुरश्चरणे

एव कर्त्तव्यम्॥ सुवर्णस्फटिकादौ

काश्मीरमृगनाभिमलयोद्भवरक्तचन्दनादिद्रव्येण

आसुरेखेवज्ररेखेहूम्फड्वाहा इतिमन्त्रेण च

षट्कोणगर्भन्त्रिकोणत्रयाष्टदलभूपुरात्मकँय्यन्त्रँल्लिखेत्॥ तत्र

पञ्चगव्येन पञ्चामृतेन च प्रक्षाल्य प्राणप्रतिष्ठामन्त्रेण

अष्टोत्तरशतकृत्वः प्राणान् प्रतिष्ठाप्य॥ मन्त्रोयथा

आंह्रीक्रोंयंरंलंवंशंषंसंहोंॐक्षंसंहंसःह्रीं

ॐ हंसः

श्रीमद्दक्षिणकालिकायाष्षट्कोणगर्भत्रिकोणत्रयाष्टदलभूपुरात्

मकयन्त्रस्य सजीववाङ्मनश्चक्षुश्श्रोत्रघ्राणप्राणा इहागत्य

सुखं चिरन्तिष्ठन्तु स्वाहा॥ ततः ॐयन्त्रराजाय विद्महे

महायन्त्राय धीमहि। तन्नो यन्त्रःप्रचोदयात् इतिदशधा जप्त्वा,

दशधापुष्पाञ्जलिंसङ्क्षिप्य, होमं कृत्वा प्रतिहोमे

हुतशेषन्तस्मिन्क्षिपेत्। तत्राधारशक्त्यादिपूजनङ्कुर्यात्॥ तद्यथा

ह्रीं आधारशक्तिभ्योनमः इति सम्पूज्य। ततो

रक्तचन्दनपुष्पाक्षतपुञ्जन्निधाय ॐ जयायैनमः

ॐविजयायैनमः ॐ अजितायैनमः ॐ अपराजितायैनमः

ॐनित्यायैनमः ॐविलासिन्यैनमः ॐदोग्ध्र्यैनमः ॐ

अघोरायैनमः ॐमङ्गलायैनमः इतिपीठशक्तीरभ्यर्च्य

ह्रींकालिकायोगपीठात्मनेनमः

ह्सौंसदाशिवमहाप्रेतपद्मासनायनमः इत्यभ्यर्च्य

p. 35) ततो देवींय्यजेत्। हस्तेपुष्पाक्षतपुञ्जन्निधाय
कूर्ममुद्राँविधाय कुलकुण्डलिनी हृदयदेशे आनीय तन्मुखे
प्रक्षिप्य ताम्परब्रह्मणि
सङ्गमय्यचन्द्रमण्डलान्तर्गतामृतलोलीभूतान्द्विदले सन्निवेश्य
वामनासापुटेन यम् इतिनिष्कृष्य पूर्वङ्कामकलान्ध्यायेत्।

मुखम्बिन्दुवदाकारन्तदधःकुचयुग्मकम्।
तदधस्सपराङ्गञ्च सपरिष्कृतमण्डलम्॥

ततः पुष्पादिचक्रे क्षिपेत्। देवीन्ध्यात्वा आवाहयेत्। ध्यानञ्च

करालवदनाङ्घोराम्मुक्तकेशीञ्चतुर्भुजाम्।
कालिकान्दक्षिणान्दिव्याम्मुण्डमालाविभूषिताम्॥ १॥
सद्यश्छिन्नसिरः खड्गवामोर्ध्वाधः कराम्बुजाम्।
अभयँव्वरदञ्चैव दक्षिणाधोर्ध्वपाणिकाम्॥ २॥
महामेघप्रभां श्यामान्तथा चैवदिगम्बराम्।
कण्ठावसक्तमुण्डालीगलद्रुधिरचर्चिताम्॥ ३॥
कर्णावतंसतानीतशवयुग्मभयानकाम्।

घोरदंष्ट्राकरालास्याम्पीनोन्नतपयोधराम्॥ ४॥

शवानाङ्करसङ्घातैःकृताकाञ्चीं हसन्मुखीम्।

सृक्कद्वयगलद्रक्तधाराविस्फुरिताननाम्॥ ५॥

गोररूपाम्महारौद्रीं श्मशानालयवासिनीम्।

दन्तुरान्दक्षिणव्यापिमुक्तलम्बकचोच्चयाम्॥ ६॥

शवरूपमहादेवहृदयोपरिसंस्थिताम्।

शिवाभिर्घोररूपाभिश्चतुर्दिक्षुसमन्विताम्॥ ७॥

महाकालेन सार्द्धोर्द्धमुपविष्टरतातुराम्।

सुखप्रसन्नवदनां स्मेराननसरोरुहाम्॥ ८॥

एवं सञ्चिन्तयेद्देवींश्मशानालयवासिनीम्।

अथवाहंसतन्त्रोक्तन्ध्यानङ्कुर्यात्। यथा-

नमामि दक्षिणामूर्तिङ्कालिकाम्परभैरवीम्।

भिन्नाञ्जनचयप्रख्याम्प्रवीरशवसंस्थिताम्॥ १॥

गलच्छोणितधाराभिः स्मेराननसरोरुहाम्।

पीनोन्नतकुचद्वन्द्वाम्पीनवक्षोनितम्बिनीम्॥ २॥

दक्षिणाम्मुक्तकेशालीन्दिगम्बरविनोदिनीम्।

महाकालशवाविष्टां स्मेरानन्दोपरिस्थिताम्॥ ३॥

मुखंसान्द्रस्मितामोदमोदिनीम्मदविह्वलाम्।

आरक्तमुखसान्द्राभिर्न्नेत्रालीभिर्विराजिताम्॥ ४॥

p.36) शवद्वयकृतोत्तंसां सिन्दूरतिलकोज्ज्वलाम्।

पञ्चाशन्मुण्डघटितमालाशोणितलोहिताम्॥ ५॥

नानामणिविशोभाढ्य-नानालङ्कारशोभिताम्।

शवास्थिकृतकेयूरशङ्खकङ्कणमण्डिताम्॥ ६॥

शववक्षस्स्समारूढाँल्लेलिहानां शवङ्कचित्।

शवमांसकृतग्रासां साट्टहासम्मुहुर्म्मुहुः॥ ७॥

खड्गमुण्डधराँव्वामे सव्येऽभयवरप्रदाम्।

दन्तुराञ्च महारौद्रीञ्चण्डनादातिभीषणाम्॥ ८॥

शिवाभिर्घोररूपाभिर्वेष्टिताम्भयनाशिनीम्।

मा भैर्मा भैस्स्वभक्तेषु जल्पन्तिङ्घोरनिःस्वनैः॥ ९॥

यूयङ्किमिच्छथ ब्रूत ददामीतिप्रभाषिणीम्।

इतिध्यायेत्॥ आवाहनञ्च आत्मसंस्थामजां

शुद्धान्त्वामहम्परमेश्वरीम्॥

आरण्यमिवहव्यांशम्मूर्त्तावावाहयाम्यहम् इतिमूलञ्च पठन्

भगवति दक्षिणकालिके इहागच्छ इति

प्रसारितसंहताङ्गुलीमूलपर्वणोरङ्गुष्ठौ निःक्षिप्य आवाहयेत्॥

ततः ॐ देवेशि भक्तिसुलभे परिवारसमन्विते॥ यावत्त्वाम्पूजयिष्यामि

तावत्त्वं सुस्थिरा भव॥ तवेयम्महिमामूर्तिस्तस्यान्त्वां
सर्वगाम्प्रभो॥ भक्तिस्नेहसमाकृष्टान्दीपवत्स्थापयाम्यहम्॥
इतिमूलम्पठित्वा पूर्वोक्तया अधोमुख्या मुद्रया स्थापयेत्॥ ॐ
सर्वान्तर्यामिन्यै देवि सर्वबीजमये शुभे। स्वात्मस्थायै परं
शुद्धमासनङ्कल्पयाम्यहम् मूलञ्च पठन्पद्ममुद्रया
पुष्पाद्यासनन्दद्यात्॥ ततः ॐ अस्मिन्वरासने देवि
सुखासीनेऽक्षरात्मिके॥ प्रथिष्ठिता भवेस्सा त्वम्प्रसीद परमेश्वरि
मूलञ्च पठन् इह प्रतिष्ठिताभव इतिपूर्वोक्तया मुद्रया
प्रतिष्ठापयेत्। अनन्या तत्र देवेशि मूर्तिशक्तिरियम्प्रभो।
सान्निध्यङ्कुरु तस्यान्त्वम्भक्तानुग्रहतत्परे मूलञ्च पठन् इह
सन्निधेहि उच्छिताङ्गुष्ठमुष्टयोस्सँयोगात्सन्निधापनमुद्रया
सन्निधानङ्कुर्यात्॥ ॐ आज्ञया तव देवेशि कृपाम्भोधे गुणाम्बुधे
॥ आत्मना चैकदृष्टान्त्वां संरुणद्धि महेश्वरि इतिमूलञ्च पठन्

p.37) अन्तः प्रवेशिताङ्गुष्ठमुष्ट्यात्मिकया इह सन्निरुध्यस्व
इतिसन्निरोधनङ्कुर्यात्॥ अज्ञानाद्दुर्मनस्त्वाद्वा वैकल्यात्साधकस्य
च॥ मम ऊनं भवेत्कृत्यन्तदाप्याभिमुखीभव इति, मूलञ्च पठन्
इहसम्मुखीभव
इतित्तानमुष्टियुगलात्मिकयासम्मुखीकरणङ्कुर्यात्॥ ततो हूम
इत्यनेन

सव्यहस्तमुष्टिदीर्घाधोमुखतर्ज्जन्यात्मिकयाऽभितोभ्रामितयाऽवगु।
न्ठयेत्॥ ॐदशपीयूषवर्षिण्यापूरयेद्यज्ञविष्टरम्॥ मूर्त्तौ
वायज्ञसम्मूर्त्तौ स्थिराभव महेश्वरि॥ देवताङ्गे
षडङ्गन्यासात्मकं सकलीकरणङ्कुर्यात्॥ तद्यथा
क्रांहृदयायनमः, क्रींशिरसेस्वाहा, क्रूंशिखायैवषट्,
क्रैंकवचायहूम्, क्रौंनेत्रत्रयायवौषट्, क्रः अस्त्रायफट्॥ ततः
स्वभक्तवाङ्मनश्चक्षुःश्रोत्रदूरार्पितस्थिते॥ स्वतेजः
पञ्जरेणाशु वेष्टिता भव सर्वतः॥ स्वधाबीजेन धेनुमुद्रया
अमृतीकरणम्॥ ततो महामुद्रया परमीकरणम्॥ महामुद्रा यथा -
अन्योन्यग्रथिताङ्गुष्ठाप्रसारितपराङ्गुलिः॥ महामुद्रेयमुदिता
परमीकरणे प्रिये॥ तथा ॐयस्यादर्शनमिच्छन्ति
देवास्स्वाभीष्टसिद्धये॥ तस्यै ते परमैशान्यै आगतं स्वागतञ्च
मे मूलञ्च पठन् साङ्गे सायुधे सवाहने सावरणे
श्रीमद्दक्षिणकालिके तव स्वागतम्
इतिप्रसारिताङ्गुल्यधोमुखकरद्वयेन स्वागतङ्कुर्यात्॥ ॐ
कृतार्थोनुगृहीतोस्मि सफलज्जीवितञ्च मे। आगता देवदेवेशि
सुस्वागतमिदम्पुनः मूलञ्च पठन्नूर्ध्वमुख्या
पूर्वोक्तमुद्रया सुस्वागतङ्कुर्यात्॥
लेलिहानमुद्रयाप्राणस्थापनम्पूर्वोक्तरीत्या कुर्यात्॥ लेलिहानमुद्रा
यथा॥ तर्ज्जनीमध्यमानामां समाङ्कुर्यादधोमुखीम्।

अनामायाङ्गिपेद्वद्धामृजुङ्कृत्वा कनिष्ठिकाम्॥

लेलिहानात्ममुद्रेयञ्जीवन्यासे प्रकीर्त्तिता॥

पूर्वोक्तप्राणस्थापनरीतिर्यथा -

आंह्रींक्रोंयंरंलंवंशंषंसंहोंॐक्षंसंहंसः

ह्रींॐहंसः श्रीमद्दक्षिणकालिकायाः प्राणा इह प्राणाः।

आंह्रीक्रोंयंरंलंवंशंहोंॐक्षंसंहंसःह्रींॐसः

श्रीमद्दक्षिणकालिकाया जीव इह स्थितः। आंह्रींक्रों-

p. 38) यंरंलंवंशंषंसंहोंॐक्षंसंहंसःह्रीं ॐ

हंसः श्रीमद्दक्षिणकालिकायास्सर्वेन्द्रियाणि इह स्थितानि।

आंह्रींक्रोंयंरंलंवंशंषंसंहोंसः

ॐक्षंसंहंसःश्रीमद्दक्षिणकालिकाया

वाङ्मनस्त्वक्चक्षुश्श्रोत्रजिह्वाघ्राणप्राणा इहागत्य

सुखञ्चिरन्तिष्ठन्तु स्वाहा॥ ततो मूलमन्त्रेणाग्घ्यौदकेन

त्रिःप्रोक्षणम्। शालग्रामे मणौ यन्त्रे नावाहनविसर्ज्जने॥

प्राणप्रतिष्ठाञ्च न कुर्यात्॥ योनिम्महायोनिञ्च बध्वा

खड्गमुण्डाऽभयवरमुद्रान्दर्शयेत्। महायोनिमुद्रा यथा -

तर्ज्जन्यनामिके मध्ये कनिष्ठे च क्रमादपि। करयोर्योजयेच्चैव

कनिष्ठामूलभेदतः। अङ्गुष्ठाग्रन्तु निःक्षिप्य महायोनिः

प्रकीर्त्तिता॥ अधोमुखीमिमाङ्कृत्वा दर्शयेद्बीजपूर्विकाम्॥ बीजम्

ऐमिति॥ योनिमुद्रायान्तु- अङ्गुष्ठाग्रन्तु न निःक्षिपेदिति॥
खड्गादिमुद्रा तु स्पष्टैव। ततः पुष्पाञ्जलिन्दद्यात्॥ तत्र एकम्पादे,
द्वितीयञ्जानुनि, तृतीयन्नाभौ, चतुर्थं हृदये, मस्तके पञ्चममिति॥
ततः पाद्यादि दद्यात्॥ तद्यथा।
यद्भक्तिलेशसम्पर्कात्परमानन्दसम्भवः॥ तस्मै ते चरणाब्जाय
पाद्यं शुद्धाय कल्पये इति, मूलञ्च पठन्
इदम्पाद्यन्दक्षिणकालिकायैनिवेदयामि नमः
इतिपूर्वोक्तपुष्पगन्धोशीररोचनश्यामाक
विष्णुक्रान्ताब्जदूर्व्यायुतञ्जलमनामाङ्गुष्ठयोर्योगेन
पादयोर्दद्यात्। ॐ वेदानामपि वेदाय देवानान्देवतात्मने।
आचमङ्कल्पयामीशि शुद्धानां शुद्धिहेतवे मूलञ्च पठन्
इदमाचमनीयन्दक्षिणकालिकायै निवेदयामि
इत्याचमनीयङ्कनिष्ठाहीनोन्नतसँयुक्तचतुरङ्गुलीरूपाचमनमुद्र
याचन्दनपुष्पजातीकर्पूरकङ्कोललवङ्गतमालकादिचूर्णसँयुक्तजल्
अम्मुखे दद्यात्। ॐ सर्वकालूष्यहीनायै परिपूर्णसुखात्मने।
मधुपर्कमिदन्देवि कल्पयामि प्रसीद मे मूलञ्च पठन्
सँयुक्ताधोमुख्यनामिकास्पृष्टाङ्गुष्ठात्मिकयामधुघृतशर्कर
अदधिदुग्धसङ्घातात्मकम्मधुपर्कम्मुखे दद्यात्॥ ॐ
उच्छिष्टोप्यशुचिर्वापि यस्याः

p. 39) स्मरणमात्रतः।

शुद्धिमाप्नोति तस्यै ते पुनराचमनीयकम् इति मूलञ्च

पठन्पूर्ववदाचमनीयम्मुखे दद्यात्॥ ॐ

तापत्रयहरन्दिव्यम्परमानन्दलक्षणम्।

तापत्रयविनिर्मुक्तन्तवार्घ्यङ्कल्पयाम्यहम्॥ इति मूलञ्च पठन्

इदमर्घ्यन्दक्षिणकालिकायै निवेदयामि, एषोर्घः

श्रीमद्दक्षिणकालिकायै स्वाहा इत्यनेन पठितेन

कुशाग्राक्षततिलव्रीहियवाज्यसिद्धार्थपुष्पमिश्रितजलात्मकार्घाञ्छि

रसि सर्वाङ्गुलीसँयोगेन दद्यात्। ततो हरिद्राद्युद्वर्त्तनद्रव्यन्तैलञ्च

दद्यात्॥ ॐ स्नेहं गृहाण स्नेहेन लोकमातर्महाशये। सर्वलोकेषु

शुद्धात्मन्ददामि स्नेहमुत्तमम्। मूलञ्चपठन्

इदंहरिद्रादिद्रव्यन्तैलञ्चदक्षिणकालिकायै निवेदयामि नमः

इत्युक्त्वा उद्वर्त्तयेत्॥ ॐ परमानन्दबोधाब्धिनिमग्ननिजमूर्त्तये।

साङ्गोपाङ्गमिदं स्नानङ्कल्पयाम्यहमीश्वरि मूलञ्चपठन्

इदंस्नानीयन्दक्षिणकालिकायै निवेदयामि, इदं

स्नानीयन्दक्षिणकालिकायैनमः इतिपठित्वा

कनिष्ठाहीनदक्षहस्तमुष्ट्यात्मिकया मुद्रयास्नानीयन्दद्यात्॥

शतकृत्वः सहस्रकृत्वो यथाशक्ति वा मूलम्पठन्स्नपयेत्। ॐ

मायाचित्रपटच्छन्ननिजगुह्योरुतेजसे॥ निवारणाय विज्ञानवासस्ते

कल्पयाम्यहम् मूलञ्च पठन् इदँव्वासो दक्षिणकालिकायै

इत्याद्युक्तवाक्येन
उत्तानदक्षिणहस्ताङ्गुष्ठस्पृष्टतन्मध्यमात्मिकया रक्तँव्वासो
दद्यात्॥ ॐ यामाश्रित्य महादेवो जगत्संहारकस्सदा। तस्यै ते
परमेशान्यै कल्पयाम्युत्तरीयकम् इदमुत्तरीयन्दक्षिणकालिकायै
इत्यादिवाक्येन पूर्वोक्तमुद्रयोत्तरीयन्दद्यात्॥ ततो
मूलेनाष्टोत्तरसहस्त्रशतदशान्यतमवारङ्गन्धोदकैर्देवीमभिषि
न्चेत्॥ ॐ स्वभावसुन्दराङ्गायै नानाशक्त्याश्रिते शिवे॥ भूषणानि
विचित्राणि कल्पयाम्यमरार्चिते एतानि भूषणानि दक्षिणकालिकायै
निवेदयामिनमः इति
वाक्येनदक्षहस्ताङ्गुष्ठस्पृष्टानामिकात्मिकयामुद्रयाभूषणान्
इदद्यात्॥
मूलमन्त्रेणसम्पुटितम्प्रत्येकमातृकाक्षरम्पठन्देवताङ्गेषु

p. 40) विन्यसेत्॥ ॐ परमानन्दसौभाग्यपरिपूर्णदिगन्तरे।
गृहाणपरमङ्गन्यङ्कृपया परमेश्वरि॥ मूलञ्च पठन्
इदञ्चन्दनं श्रीदक्षिणकालिकायै नमः इतिवाक्येन
कर्पूरमिश्रितश्रीखण्डचन्दनम्बहुचंदनञ्च
कनिष्ठाङ्गुष्ठसँयोगेनदेव्यङ्गे निवेदयेत्॥ ॐ अक्षतान्धवलान् देवि
स्वर्णरौप्यमयीकृतान्। गृहाणजगदीशाने प्रसीद परमेश्वरि॥
मूलञ्च पठन् साङ्गायैसायुधायैसबलवाहनायै सपरिवारायै

श्रीदक्षिणकालिकायैनिवेदयामिनमः इतिवाक्येनसर्वाङ्गुलीभिर्दद्यात्

॥ ततः ॐतुरीयवनसम्भूतन्नानागुणमनोहरम्॥

अमन्दसौरभम्पुष्पङ्गृह्यतामिदमुत्तमम् एतानि पुष्पाणि

दक्षिणकालिकायै वौषट् इति, मूलञ्च पठंस्तर्ज्जन्यङ्गुष्ठयोगेन

दद्यात्॥ यथोत्पन्नमपर्युषितमच्छिद्रन्नवं शुभम्पुप्पन्दद्यात्॥

अञ्जलिदाने त्वधोमुखता न दोषाय

श्वेतरक्तजपापुष्पकरवीरतगरजातीसेवन्तीयूयिकाधत्तूराशोकबकुल्

अश्वेतकृष्णापराजिताबकपुष्पबिल्वपत्त्रचम्पकनागकेशरमल्लिकाङ्गिण्

इकाकाञ्चीबर्बराकरक्तपद्मपुष्पामलककोकनदबन्धूककेतक्याद्य्

अन्यतमपुष्पन्निवेदयेत्॥ अर्कमन्दारौ अतिप्रशस्तौ तुलसीम्मालतीँ

व्वर्ज्जयेत्॥ दूर्वया नार्च्चयेत्॥ धूपभाजनं फट् इति सम्प्रोक्ष्य

नमः इत्यभ्यर्च्च्य वायुबीजेन द्वादशवारजप्तेन संशोष्य

वामहस्ततले दक्षहस्तपृष्ठन्निवेश्य रम् इतिबीजेन

षोडशवारजप्तेन सन्दह्य वामहस्तपृष्ठे दक्षहस्ततलन्निवेश्य,

वम् इति षोडशवारजप्तेन धेनुमुद्रयाऽमृतीकृत्य,

मूलेनाष्टशोऽभिमन्त्र्य जयध्वनिमन्त्रमातःस्वाहा इतिघण्टां

सम्पूज्य वामतर्ज्जन्या संस्पृश्य मूलम्पठन् ॐवनस्पतिरसोपेतो

गन्धाढ्यः सुमनोहरः॥ आघ्रेयः

सर्वदेवानान्धूपोऽयम्प्रतिगृह्यताम् एष धूपः

श्रीदक्षिणकालिकायै नमः इतिशङ्खाम्बु प्रक्षिपेद्धूमौ ततो

वामहस्तेन घण्टाँवादयन् दक्षतर्ज्जन्यङ्गुष्ठयोगेन
धूपमुद्रान्दर्शयन् देवतागुणान्कीर्त्तयन्नाभिदेशतो

p. 41) धूपयेत्॥ पुष्पाञ्जलित्रयन्दद्यात्॥ एवन्दीपदानप्रकारः ॐ
सुप्रकाशो महादीपः सर्वतस्तिमिरापहः॥
सबाह्याभ्यन्तरज्योतिर्द्दिपोयम्प्रतिगृह्यताम् इति, मूलञ्चपठन्
मध्यमाङ्गुष्ठयोगेन दीपमुद्राम्प्रदश्र्श्य नेत्रप्रदेशे
दीपन्दश्र्शयेत्॥ घृतदीपो दक्षिणे देयस्तैलदीपो वामतः॥
स्वर्णादिभाजने साज्यशर्करपायसादिकम्परिविष्य चतुरस्त्रे निधाय
फट् इति मन्त्रेण चक्रमुद्रयाऽभिरक्ष्य द्वादशवारजप्तेन यम्
इतिवायुबीजेन संशोष्य वामहस्ततलेदक्षहस्तपृष्ठे निवेश्य रम्
इतिवह्निबीजेन द्वादशवारजप्तेन सन्दह्य, दक्षकराग्रेण संस्पृश्य
वम् इतिसुधाबीजेन धेनुमुद्रयाऽमृतीकृत्य मूलमन्त्रेण
कराभ्यां संस्पृश्य अष्टधाचाभिमन्त्र्य
धेनुमुद्राम्प्रदश्र्श्यगन्धपुष्पैः समभ्यर्च्य तत्त्वाख्यमुद्रया
देव्यै नैवेद्यं हि निवेदयेत्॥ ॐ सत्पात्रसिद्धं
सहविर्विविधानेकभक्षणम्॥ निवेदयामि देवेशि कृपया त्वङ्गृहाण
तत्॥ इतिपठन् ग्रासमुद्राम्प्रदश्र्श्यशङ्खोदकेननिवेदयेत्॥ ततः ॐ
समस्तदेवदेवेशि सर्वावाप्तिकरम्परम्॥ अखण्डानन्दसम्पूर्णे
गृहाणजलमुत्तमम्॥ इतिपानीयमाचमनीयञ्च दत्त्वा

चुलूकँविधिवद्दद्यात्। पञ्चमुद्राः

प्राणापानसमानोदानव्यानाख्याः प्रदर्शयेत्॥ तद्यथा

कनिष्ठानामिकाभ्याम्प्राणमुद्रा।

मध्यमातर्ज्जनीभ्यामपानाख्या। अनामामध्यमाभ्यां

समानाख्या। अनामातर्ज्जनीभ्यामुदानाख्या।

सर्वाङ्गुलीभिव्र्व्यानाख्या। ततो मूलेन ताम्बूलं

साधकस्तत्त्वमुद्रया

एलालवङ्गकर्प्पूरजातीफलादिसँयुतन्तमालदलकर्पूरपूगेरितम्मुद्

आन्वितान्ध्यायन् फट् इतिसम्प्रोक्ष्य नमः इत्यभ्यर्च्य वायुबीजेन

द्वादशवारजप्तेन संशोष्य॥ वामहस्ततलं दक्षहस्तपृष्ठे

निवेश्य रम्

इतिबीजेनद्वादशवारजप्तेनसन्दह्यवामहस्तपृष्ठेदक्षहस्ततलन्निवे

स्य वम् इतिसुधाबीजेनधेनुमुद्रया अमृतीकृत्य

मूलेनाष्टवारमभिमन्त्र्य ॐएलालवङ्गकर्पूरनागवल्लीदलैर्युतम्

॥ पूगभागेरितन्देवि ताम्बूलङ्गृह्यतान्नमः

p.42) मूलम्पठन् इदन्ताम्बूलं श्रीदक्षिणकालिकायै

निवेदयामिनमः इतिमुखप्रदेशे तत्त्वमुद्रया दद्यात्॥ ततः

पुष्पाञ्जलिङ्गृहीत्वा ॐ सँविन्मये परेशानि परामृते चरुप्रिये॥

अनुज्ञान्दक्षिणे देहि परिवारार्च्चनाय मे॥ तत्र प्रथमं

षडङ्गपूजा। अग्नीशासुरवायव्येषु मध्ये दिक्षु च षडङ्गशक्तीः
पूजयेत्॥ तासान्ध्यानन्तु- तुषारस्फटिक
श्यामनीलकृष्णारुणास्तथा॥ वरदाभयधारिण्यः प्रधानतनवः
स्त्रियः इतिध्यात्वा हृदयदेवते-इहागच्छ-
इहतिष्ठक्रांहृदयायनमः श्रीपादुकाम्पूजयामि इतिसम्पूज्य
ततः शिरोदेवते-इहागच्छ-
इहतिष्ठक्रींशिरसेस्वाहाश्रीपादुकाम्पूजयामि शिखादेवते-
इहागच्छ-इहतिष्ठक्रूंशिखायै वषड्श्रीपादुकाम्पूजयामि
कवचदेवते-इहागच्छ-इहतिष्ठक्रैंकवचायहुम्॥
श्रीपादुकाम्पूजयामि नेत्रत्रयदेवते इहागच्छ इह
तिष्ठक्रौंनेत्रत्रयायवौषड्श्रीपादुकाम्पूजयामि अस्त्रदेवते-
इहागच्छ-इहतिष्ठ क्रः अस्त्रायफड्श्रीपादुकाम्पूजयामि ततो
वायव्यादीशानपर्यन्तङ्गुरुपङ्क्तिम्पूजयेत्॥ तत्र गुरुक्रमोयथा
महादेवी महादेवस्त्रिपुरश्चैव भैरवः॥ दिव्यौघा
गुरवःप्रोक्तास्सिद्धौघान्कथयामि ते॥ ब्रह्मानन्दः
पूर्णदेवश्चलच्चित्तश्चलाचलः। कुमारःक्रोधनश्चैव
वरदस्स्मरदीपनः॥ मायामायावती चैव मानवौघाञ्छृणुप्रिये॥
विमलः कुशलश्चैव श्रीमत्सेनस्सुधाकरः॥ प्रह्लादस्सनकश्चैव
वसिष्ठो बोध एवच॥ मीनो गोरक्षकश्चैव भोजदेवःप्रजापतिः॥
मूलदेवो रन्तिदेवो विघ्नेश्वरहुताशनौ॥

समयानन्दसन्तोषौकालिकागुरवस्तथा॥ आनन्दनाथशब्दान्ते

गुरवस्सर्वसिद्धिदाः॥ स्त्रियोपि गुरुरूपाश्चेदम्बान्ताः परिकीर्तिताः॥

ततः पूजा महादेव्यम्ब इहागच्छ

इहतिष्ठमहादेव्यम्बाश्रीपादुकाम्पूजयामि॥ महादेवानन्दनाथ

इहागच्छ इह तिष्ठ महादेवानन्दनाथ श्रीपादुकाम्पूजयामि॥

त्रिपुरानन्दनाथ इहागच्छ इहतिष्ठ

त्रिपुरानन्दनाथश्रीपादुकाम्पूजयामि॥ भैरवानन्दनाथ

p.43) इहागच्छ इहतिष्ठ भैरवानन्दनाथश्रीपादुकाम्पूजयामि।

अथसिद्धौघा-इहागच्छत-इहतिष्ठत

ब्रह्मानन्दानन्दनाथश्रीपादुकाम्पूजयामि।

पूर्णदेवानन्दनाथश्रीपादुकाम्पूजयामि। चलच्चित्तानन्दनाथ

श्रीपादुकाम्पूजयामि। चलाचलानन्दनाथश्रीपादुकाम्पूजयामि॥

कुमारानन्दनाथश्रीपादुकाम्पूजयामि।

क्रोधानन्दनाथश्रीपादुकाम्पूजयामि।

वरदानन्दनाथश्रीपादुकाम्पूजयामि।

स्मरदीपनानन्दनाथश्रीपादुकाम्पूजयामि।

मायाम्बाश्रीपादुकाम्पूजयामि।

मायावत्यम्बाश्रीपादुकाम्पूजयामि॥ इति॥ अथ मानवौघा

इहागच्छत इहतिष्ठत॥ विमलानन्दनाथश्रीपादुकाम्पूजयामि।

कुशलानन्दनाथश्रीपादुकाम्पूजयामि॥

श्रीमत्सेनानन्दनाथश्रीपादुकाम्पूजयामि॥

सुधाकरानन्दनाथश्रीपादुकाम्पूजयामि।

प्रह्लादानन्दनाथश्रीपादुकाम्पूजयामि।

सनकानन्दनाथश्रीपादुकाम्पूजयामि।

वसिष्ठानन्दनाथश्रीपादुकाम्पूजयामि।

बोधानन्दनाथश्रीपादुकाम्पूजयामि।

मीनानन्दनाथश्रीपादुकाम्पूजयामि।

गोरक्षकानन्दनाथश्रीपादुकाम्पूजयामि।

भोजदेवानन्दनाथश्रीपादुकाम्पूजयामि।

प्रजापत्यानन्दनाथश्रीपादुकाम्पूजयामि।

मूलदेवानन्दनाथश्रीपादुकाम्पूजयामि।

रन्तिदेवानन्दनाथश्रीपादुकाम्पूजयामि।

विघ्नेश्वरानन्दनाथश्रीपादुकाम्पूजयामि।

हुताशनानन्दनाथश्रीपादुकाम्पूजयामि।

समयानन्दनाथश्रीपादुकाम्पूजयामि।

सन्तोषानन्दनाथश्रीपादुकाम्पूजयामि। ततो निजगुरुंपुरोध्यात्वा

पञ्चोपचारैस्सम्पूज्य, ततः ॐ अभीष्टसिद्धिम्मेदेहि

शरणागतपालिके। भक्त्या समर्पये तुभ्यमिदमावरणार्च्चनम्

इतिमूलञ्च पठन् पुष्पचन्दनयुतशङ्खोदकेन देव्या वामहस्ते

आवरणपूजां समर्प्पयेत् ततोरश्मिवृन्ददेवताः पूजयेत्।

तासान्ध्यानँय्यथा सर्वाः श्यामा असिकरा

मुण्डमालाविभूषिताः। तर्ज्जनीँ

व्वामहस्तेनधारयन्त्यश्चसस्मिताः॥

p. 44) बाह्यत्रिकोणस्य सम्मुखकोणे

ॐकालीश्रीपादुकाम्पूजयामिनमः इतिपाद्यादिभिस्त्रिः कालीं

सम्पूजयेत्॥ एवन्देव्या वामे ॐ

कपालिनीश्रीपादुकाम्पूजयामिनमः इति॥ दक्षे ॐ

कुल्लाश्रीपादुकाम्पूजयामि इत्यादि तदन्तस्त्रिकोणेसम्मुखे ॐ

कुरुकुल्लाश्रीपादुकाम्पूजयामि इत्यादि॥ वामे ॐ

विरोधिनीश्रीपादुकाम्पूजयामि इत्यादि॥ दक्षे ॐ

विप्रचित्ताश्रीपादुकाम्पूजयामि इत्यादि॥ तदन्तस्त्रिकोणेसम्मुखे

ॐउग्राश्रीपादुकाम्पूजयामि इत्यादि॥ ततो वामे ॐ

उग्रप्रभाश्रीपादुकाम्पूजयामि इत्यादि॥ दक्षे ॐ

दीप्ताश्रीपादुकाम्पूजयामि इत्यादि॥ तदन्तस्त्रिकोणे सम्मुखे ॐ

नीलाश्रीपादुकाम्पूजयामि इत्यादि॥ वामे

घनाश्रीपादुकाम्पूजयामि इत्यादि॥ दक्षे

ॐबलाकाश्रीपादुकाम्पूजयामि इत्यादि। तदन्तस्त्रिकोणे सम्मुखे

ॐमात्राश्रीपादुकाम्पूजयामि इत्यादि॥ वामे

ॐमुद्राश्रीपादुकाम्पूजयामि इत्यादि॥ दक्षे

ॐमित्राश्रीपादुकाम्पूजयामि इत्यादि। पूर्वोक्तवाक्यैः पाद्यादिभिः

पूजयेत्॥ ततो देव्या दक्षे ह्सौंमहाकालायहूंफट्

इतिमन्त्रेणमहाकालम्पूजयेत्॥ कुलार्णवेतु ॐ

ह्रींक्ष्मींहूंमहाकालायहौंमहादेवायक्रींकालिकायै हौ

इतिमहाकालमन्त्रः॥ तद्ध्यानन्तु

अञ्जनाद्रिनिभन्देवम्पिङ्गकेशन्द्विबाहुकम्॥

आशाम्बरंसर्पभूषाभूषितम्प्रणमामि तम्

इतिध्यात्वापूर्वोक्तमन्त्रद्वयान्यतरेण महाकालम्पूजयेत्॥ ततः ॐ

अभीष्टिसिद्धिम्मे देहि शरणागतपालिके।

भक्त्यासमर्प्पयेतुभ्यमिदमावरणार्च्चनम् इतिमन्त्रेण

शङ्खोदकादिना देव्या वामहस्ते आवरणार्च्चनं समर्पयेत्॥

ततोष्टदले पूर्वादिक्रमेणाष्टशक्तीः पूजयेत्॥ तद्यथा पूर्वे ॐ

आंब्रह्माणीश्रीपादुकाम्पूजयामिनमः

इत्यादिवाक्येनपाद्यादिभिस्त्रिस्सम्पूजयेत्। अग्निकोणे ॐ ईं

श्रीनारायणीश्रीपादुकाम्पूजयामि इत्यादि॥ दक्षिणे ॐ ऊं

माहेश्वरीश्रीपादुकाम्पूजयामि

p. 45) इत्यादि॥ नैर्ऋते ॐ ऋं श्रीचामुण्डाश्रीपादुकाम्पूजयामि

इत्यादि पश्चिमे ॐलृंकौमारीश्रीपादुकाम्पूजयामि इत्यादि॥ वायव्ये

ॐ ऐं अपराजिताश्रीपादुकाम्पूजयामि इत्यादि॥ उत्तरे ॐ-

औंवाराहीश्रीपादुकाम्पूजयामि इत्यादि॥ ईशाने

ॐअः नारसिंहीश्रीपादुकाम्पूजयामि इत्यादि॥ आसान्ध्यानन्तु

पूजनतः पूर्वमेवकर्त्तव्यम्॥ तद्यथा

दण्डङ्कमण्डलूम्पश्चादक्षसूत्रम्महाभयम्॥

बिभ्रतीकनकच्छायाम्ब्राह्मी कृष्णाजिनोज्ज्वला॥ १॥

शूलम्परश्वधङ्गुद्रदुन्दुभीनृकरोटिकाम्।

वहन्ती हिमसङ्काशा ध्येया माहेश्वरी शुभा॥ २॥

अङ्कुशन्दण्डखट्वाङ्गौ पाशञ्च दधती करैः।

बन्धूकपुष्पसङ्काशा कुमारी कामदायिनी॥ ३॥

चक्रङ्घण्टाङ्कपालञ्च शङ्खञ्चदधती करैः।

तमालश्यामलाध्येयावैष्णवीविभ्रमोज्ज्वला॥ ४॥

मुशलङ्करवालञ्च खेटकन्दधतीहलम्।

करैश्चतुर्भिर्वाराहीध्येयाकालघनच्छविः॥ ५॥

अङ्कुशन्तोमरँव्विद्युत्कुलिशम्बिभ्रती करैः।

इन्द्रनीलनिमेन्द्राणी ध्येया सर्वसमृद्धिदा॥ ६॥

शूलङ्कपाणं नृशिरः कपालन्दधतीकरैः।

मुण्डस्त्रङ्मण्डिता ध्येया चामुण्डा रक्तविग्रहा॥ ७॥

अक्षस्त्रजम्बीजपूरङ्कपालन्दधती करैः।

वहन्ती हेमसङ्काशा मोहलक्ष्मीस्समीरिता॥ ८॥

इति॥ ततः अभीष्टसिद्धिम्मे देहि शरणागतपालिके। भक्त्या समर्पये

तुभ्यमिदमावरणार्च्चनम् इतिमूलञ्च

पठन्पुष्पचन्दनयुतशङ्खोदकेन देव्या वामहस्ते समर्पयेत्॥

ततः यन्त्राग्रे भैरवान्पूजयेत्॥ तत्र प्रथमन्ध्यानङ्कुर्यात्॥

तद्यथा भीषणास्यन्त्रिनयनमर्द्धचन्द्रविभूषितम्॥

स्फटिकाभङ्कङ्कणादिभूषाशतसमायुतम्॥

अष्टवर्षवयस्कञ्च कुन्तलोल्लसितम्भजे॥

धारयन्तन्दण्डशूलेभैरव्यादिसमायुतम्॥ इति ध्यात्वा पूजयेत्॥

पूजाक्रमस्तु ऐं ह्रीं अं

असिताङ्गभैरवश्रीपादुकाम्पूजयामिनमः॥ ऐंह्रीम्-इं

रुरुभैरवश्रीपादुकाम्पूजयामिनमः॥ ऐंह्रीं-

उंचण्डभैरवश्रीपादुकाम्पूजयामिनमः॥

ऐंह्रींत्रंक्रोधभैरवश्रीपादुकाम्पूजयामिनमः॥

p. 46) ऐं ह्रीं लृं उन्मत्तभैरवश्रीपादुकान्पूजयामिनमः॥
ऐंह्रींएंकपालिभैरवश्रीपादुकाम्पूजयामिनमः॥ ऐं ह्रीं ओं
भीषणभैरवश्रीपादुकाम्पूजयामिनमः॥ ऐंह्रीं-
अंसंहारभैरवश्रीपादुकाम्पूजयामिनमः॥ इतिवामावर्तेन
पूजयेत्॥ तत्रैव पूर्वादितो वामावर्त्तेनाष्टभैरवीः
प्रत्येकन्तत्तन्नामाक्षरस्तास्ताः पूजयेत्॥ तत्रासान्ध्यानन्तु भावये
च महादेवीञ्चन्द्रकोटियुतप्रभाम्॥
हिमकुन्देन्दुधवलाम्पञ्चवक्त्रान्त्रिलोचनाम्॥
अष्टादशभुजैर्युक्तां सर्वानन्दकरोद्यताम्॥ प्रहसन्तीँ
व्विशालाक्षीन्देवदेवस्य सम्मुखीम् इति ध्यात्वा पूजयेत्। यथा
श्रीभैरवीश्रीपादुकाम्पूजयामिनमः।
महाभैरवीश्रीपादुकाम्पूजयामिनमः।
सिंहभैरवीश्रीपादुकाम्पूजयामिनमः।
धूम्रभैरवीश्रीपादुकाम्पूजयामिनमः।
भीमभैरवीश्रीपादुकाम्पूजयामिनमः।
उन्मत्तभैरवीश्रीपादुकांपूजयामिनमः।
वशीकरणभैरवीश्रीपादुकांपूजयामिनमः।
मोहनभैरवीश्रीपादुकाम्पूजयामिनमः। ततः ॐ अमीष्टसिद्धिम्मे

देहि शरणागतपालिके। भक्त्या समर्पये तुभ्यमिदमावरणार्च्चनम्

इतिमन्त्रेण देव्या वामहस्ते आवरणार्चनं समर्प्पयेत्। ततो

यन्त्रबाह्ये इन्द्रादीन्पूजयेत्॥ तेषान्ध्यानँय्यथा इन्द्रं

नीलवर्णमैरावतवाहनँव्वज्रहस्तम्मुकुटधारिणम्

सहस्राक्षन्ध्यायेत्॥ वह्निं रक्तवर्णं

शक्तिहस्तन्त्रिनेत्रम्मेषवाहनन्ध्यायेत्॥

यमम्महिषवाहनन्दण्डपाशधरं श्यामन्ध्यायेत्॥ निर्ऋतिं

श्यामवर्णङ्खड्गहस्तम्मृतपुरुषवाहनन्ध्यायेत्॥

वरुणम्पाशहस्तम्मकरवाहनं शुद्धवर्णन्ध्यायेत्॥

वायुमङ्कुशहस्तम्मृगवाहनन्नीलवर्णन्ध्यायेत्॥

कुबेरङ्गदाहस्तम्मर्त्त्यवाहनं श्यामवर्णन्ध्यायेत्॥ ईशानं

शूलहस्तँव्वृषभवाहनन्त्रिनेत्रङ्गौरवर्णन्ध्यायेत्॥

हंसमारूढं स्वर्णञ्च

चतुर्वक्त्रन्दण्डत्रयाक्षसूत्रङ्कमण्डलून्दधतञ्जटाजूटधरम्ब्र्

अह्माणन्ध्यायेत्॥

श्यामङ्गरुडवाहनंशङ्खचक्रगदापद्मधारिणञ्चतुर्हस्तन्ना

नालङ्कारसंयुक्तंव्विष्णुन्ध्यायेत्॥

p. 47) इतिध्यात्वा इन्द्रादय इहागच्छत इह तिष्ठत इत्यावाह्य॥

पूर्वादितो वामावर्त्तेन पूजयेद्यथा

लंइन्द्रश्रीपादुकाम्पूजयामिनमः।

रंवह्निश्रीपादुकाम्पूजयामिनमः।

यंयमश्रीपादुकाम्पूजयामिनमः।

क्षंनिर्ऋतिश्रीपादुकाम्पूजयामिनमः।

वंवरुणश्रीपादुकाम्पूजयामिनमः।

यंवायुश्रीपादुकाम्पूजयामिनमः।

इंकुबेरश्रीपादुकाम्पूजयामिनमः।

होंईशानश्रीपादुकाम्पूजयामिनमः।

ह्रींब्रह्मश्रीपादुकाम्पूजयामिनमः। ततः

ॐविष्णुश्रीपादुकाम्पूजयामिनमः।

अभीष्टसिद्धिम्मे देहि शरणागतपालिके॥ भक्त्या समर्पये

तुभ्यमिदमावरणार्च्चनम्। इतिमन्त्रेण देव्याः वामहस्ते

आवरणार्च्चनं समर्पयेत्। ततो वामावर्त्तेन तत्तत्स्थले अस्त्राणि

पूजयेद्यथा।

वंवज्रश्रीपादुकाम्पूजयामिनमः॥

शंशक्तिश्रीपादुकाम्पूजयामिनमः।

दंदण्डश्रीपादुकाम्पूजयामिनमः॥

खंखड्गश्रीपादुकाम्पूजयामिनमः॥

पंपाशश्रीपादुकाम्पूजयामिनमः॥

अंअङ्कुशश्रीपादुकाम्पूजयामिनमः॥

गगदाश्रीपादुकाम्पूजयामिनमः॥

शंशूलश्रीपादुकाम्पूजयामिनमः॥

पंपद्मश्रीपादुकाम्पूजयामिनमः॥

चंचक्रश्रीपादुकाम्पूजयामिनमः॥

ततः अभीष्टसिद्धिम्मे देहि शरणागतपालिके॥ भक्त्या समर्प्पये
तुभ्यमिदमावरणार्च्चनम्॥ इतिमन्त्रेणदेव्यावामकरे
आवरणार्च्चनंसमर्प्पयेत्। ततः देव्या वामोर्ध्वहस्ते

खंखड्गश्रीपादुकाम्पूजयामिनमः।

तदधः मुंमुण्डश्रीपादुकाम्पूजयामिनमः।

दक्षोर्द्धे अं अभयश्रीपादुकाम्पूजयामिनमः।

तदधःवंवरश्रीपादुकाम्पूजयामिनमः।

ॐ अभीष्टसिद्धिम्मेदेहिशरणागतपालिके॥
भक्त्यासमर्प्पये तुभ्यमिदमावरणार्च्चनम्। इतिमन्त्रेण
आवरणार्च्चनं देव्यावामकरेसमर्प्पयेत्॥ पुष्पाञ्जलि त्रयन्देव्याः
पादयोर्द्दद्यात्॥ ततष्षडङ्गन्यासम्पूर्वोक्तङ्कुर्यात्॥ तद्यथा
क्रांहृदयायनमः। क्रींशिरसेस्वाहा। क्रूंशिखायै वषट्।

p. 48) क्रैंकवचायहुम्। क्रौंनेत्रत्रयायवौषट्। क्रःअस्त्रायफट्।
एवन्न्यासँविधाय, गन्धपुष्पाक्षतैर्देवींसम्पूज्य, मूलम्पठन्
श्रीमद्दक्षिणकालीन्देवीन्तर्पयामिनमः इति मन्त्रेण
मधुकर्पूरमिश्रितैर्जलैर्द्वादशधा तर्पयेत्। ततो
घण्टाँवादयंस्ततोजपङ्कुर्यात्। तत्र पूर्वोक्तक्रमेण
प्राणायामं षडङ्गन्यासञ्च विदध्यात्॥ तद्यथा क्रींबीजेन १६
षोडशधापूरक ६४ चतुष्षष्टिकुम्भक ३२
द्वात्रिंद्रेचकैस्त्रिवारम्प्राणानायम्य, ततोन्यासः
क्रांहृदयायनमः क्रीशिरसेस्वाहा क्रूँहिखायै वषट्
क्रैंकवचायहुम् क्रौंनेत्रत्रयायवौषट् क्रःअस्त्रायफट् ततः ॐ
माले मालेमहामालेसर्वतत्त्वस्वरूपिणी॥
चतुर्वर्गस्त्वयिन्यस्तस्तस्मान्मे सिद्धिदाभव॥ ॐ ह्रींमालायैनमः
इत्यनेनमालान्दक्षिणकरेनिधाय हृत्प्रदेशेसमानीय, मध्यभागेन
गुटिकां प्रत्येकं संस्पृशन्मेरुमलङ्घयन्
स्वशरीरेकामकालाँविभाव्य, शिरसिगुरुन्ध्यात्वा,
हृदिदेवीम्भावयञ्जिह्वायांमंत्रन्दीपरूपिणाँविभाव्यतत्प्रभाप्
अटलेजिह्वामपिदीपरूपाँविभाव्य, मनसा, उपांशुना वा
करमालया वर्णमालया, वा
संस्कृतमहाशङ्खरुद्राक्षस्फटिकाद्यन्यतममालया, वा

अष्टोत्तरसहस्त्रमष्टोत्तरशतँवाद्रुतमविलम्बितम्प्रजप्य, मालां
शिरसि ॐ त्वम्माले सर्वभूतानां सर्वलोकप्रियामता॥
शिवङ्कुरुष्वमेभद्रेयशोवीर्यञ्चसर्वदा॥ इतिपठन्निधाय
ह्रींसिद्ध्यैनमः इतिसम्पूज्य पुनःप्राणायामन्न्यासादिकञ्च
विधाय, यथा क्रींबीजेन १६ पूरक ६४ कुम्भक ३२
रेचकैस्त्रिवारम्प्राणानायम्य॥ ततो न्यासः॥ क्रांहृदयाय नमः,
क्रींशिरसेस्वाहा। क्रूँहिखायैवषट्। क्रैंकवचायहूं।
क्रौंनेत्रत्रयायवौषट्, क्रः अस्त्रायफट्, इति न्यासादिकृत्वा,
ततोदेवताम्पुष्पाक्षतादिभिः सम्पूज्य,
पुष्पचन्दनाक्षतयुतशङ्खोदकेन
ॐगुह्यातिगुह्यगोप्त्रीत्वङ्गृहाणास्मत्कृतञ्जपम्। सिद्धिर्भवतु मे देवि
त्वत्प्रसादान्महेश्वरि॥ इतिमन्त्रेण देव्या वामकरे
तेजोमयञ्जलन्ध्यात्वा जपं समर्पयेत्॥

p. 49) ततो मालां शिरस उत्तार्य ॐ त्वम्माले सर्वदेवानां
सर्वसिद्धिप्रदा मता॥ तेन सत्येन मे सिद्धिन्देहि मातर्न्नमोस्तु ते॥
इत्यमुम्मन्त्रम्पठन्सम्पूज्य, यत्नतो गोपयेत्॥ ततो देव्यै
पुष्पाञ्जल्यष्टकन्दत्त्वा स्तोत्रकवचादिकम्पठेत्॥
कराङ्गंशेत्तच्छान्त्यर्थमष्टोत्तरशतम्मूलञ्जपेत्॥ ततो वामे
चतुरस्त्रम्मण्डलँव्विधाय, किञ्चित्पात्रे संस्थाप्य,

तस्मिन्मांसमाषान्नशाकाज्यपायसापूपकाद्यन्यतमबलिँविधाय्
अ फट् इतिसम्प्रोक्ष्य नमः इत्यभ्यर्च्च्य यम् इतिवायुबीजेन
द्वादशवारजप्तेन संशोध्य, वामहस्ततले दक्षहस्तपृष्ठन्निवेश्य
रम् इतिवह्निबीजेन षोडशवारजप्तेन संदीप्य वम् इत्यमृतबीजेन
विंशतिवारजप्तेन धेनुमुद्रयाऽमृतीकृत्य हूम् इत्यवगुण्ठ्य
योनिधेनुमुद्रेदर्शयित्वा, तत्त्वमुद्राञ्च प्रदर्श्य ॐ क्रीं श्रीं
दक्षिणकालिकायै स्वाहा एष बलिन्नमः इत्युत्सृज्य नैर्ऋत्यान्दिशि
धारयेत्। एष नित्यबलिदानमन्त्रः॥ रात्रौ काम्यबलिर्देयः॥ तत्र
मन्त्रस्तु ॐ पद्मेपद्मे महापद्मे पद्मावति महायक्षाधिपतये
मयोपनीतमिमं बलिं गृह्णगृह्णगृह्णापयगृह्णापय मम
सर्वशान्तिङ्कुरुकुरु परविद्याञ्चाकृष्याकृष्य छिन्धि ह्रीं हूं
स्वाहा इतिमन्त्रेण चतुष्पथादिस्थाने पूर्वोक्तशोधनँव्विधाय
तत्त्वमुद्राम्प्रदर्श्य मांसाद्यन्यतमबलिन्दद्यात्॥
अधिकभक्त्युत्तरशक्तिकालादिलाभे चतुर्थ्यन्तैः
प्रत्येकैस्सहस्रनामस्तोत्रान्तर्गतनामभिः पुष्पादिना कालीम्पूजयेत्॥
तद्यथा॥

ओं क्रीं काल्यै नमः १ क्रूं कराल्यै नमः २ कल्याण्यै नमः ३
कमलायै नमः ४ कलायै नमः ५ कलावत्यै नमः ६ कलाढ्यायै
नमः ७ कलापूज्यायै नमः ८ कलात्मिकायै नमः ९ कलाहृष्टायै

नमः १० कलापुष्टायै नमः ११ कलामस्तायै नमः १२ कलाकरायै
नमः १३ कलाकोटिसमाभासायै नमः १४ कलाकोटिप्रपूजितायै नमः
१५ कलाकर्म्मकलाधरायै नमः १६ कलापरायै नमः १७

p. 50) कलागमायै नमः १८ कलधारायै नमः १९ कमलिन्यै नमः २०
ककारायै नमः २१ करुणायै नमः २२ कव्यै नमः २३
ककारवर्णसर्वाङ्ग्यै नमः २४ कलाकोटिप्रभूषितायै नमः २५
ककारकोटिगुणितायै नमः २६ ककारकोटिभूषणायै नमः २७
ककारवर्णहृदयायै नमः २८ ककारमनुमण्डितायै नमः २९
ककारवर्णनिलयायै नमः ३० काकशब्दपरायणायै नमः ३१
ककारवर्णमुकुटायै नमः ३२ ककारवर्णभूषणायै नमः ३३
ककारवर्णरूपायै नमः ३४ काकशब्दपरायणायै नमः ३५
ककवीरास्फालरतायै नमः ३६ कमलाकरपूजितायै नमः ३७
कमलाकरनाथायै नमः ३८ कमलाकररूपधृषे नमः ३९
कमलाकरसिद्धिस्थायै नमः ४० कमलाकरपारदायै नमः ४१
कमलाकरमध्यस्थायै नमः ४२ कमलाकरतोषितायै नमः ४३
कथङ्कारपरालापायै नमः ४४ कथङ्कारपरायणायै नमः ४५
कथङ्कारपदान्तस्थायै नमः ४६ कथङ्कारपदार्थभुवे नमः ४७
कमलाक्ष्यै नमः ४८ कमलजायै नमः ४९ कमलाक्षप्रपूजितायै
नमः ५० कमलाक्षवरोद्युक्तायै नमः ५१ ककरायै नमः ५२

कर्बूराक्षरायै नमः ५३ करतारायै नमः ५४ करच्छिन्नायै नमः
५५ करश्यामायै नमः ५६ करार्णवायै नमः ५७ करपूज्यायै नमः
५८ कररतायै नमः ५९ करदायै नमः ६० करजितायै नमः ६१
करतोयायै नमः ६२ करामर्षायै नमः ६३ कर्मनाशायै नमः ६४
करप्रियायै नमः ६५ करप्राणायै नमः ६६ करकजायै नमः ६७
करकायै नमः ६८ करकान्तरायै नमः ६९ करकाचलरूपायै नमः
७० करकाचलशोभिन्यै नमः ७१ करकाचलपुत्र्यै नमः ७२
करकाचलतोषितायै नमः ७३ करकाचलगेहस्थायै नमः ७४
करकाचलरक्षिण्यै नमः ७५ करकाचलसम्मान्यायै नमः ७६
करकाचलकारिण्यै नमः ७७ करकाचलवर्षाढ्यायै नमः ७८

p. 51) करकाचलरञ्जितायै नमः ७९ करकाचलकान्तारायै नमः ८०
करकाचलमालिन्यै नमः ८१ करकाचलभोज्यायै नमः ८२
करकाचलरूपिण्यै नमः ८३ करामलकसंस्थायै नमः ८४
करामलकसिद्धिदायै नमः ८५ करामलकसम्पूज्यायै नमः ८६
करामलकतारिण्यै नमः ८७ करामलककाल्यै नमः ८८
करामलकरोचिन्यै नमः ८९ करामलकमात्रे नमः ९०
करामलकसेविन्यै नमः ९१ करामलकवद्ध्येयायै नमः ९२
करामलकदायिन्यै नमः ९३ कञ्जनेत्रायै नमः ९४ कञ्जमत्यै
नमः ९५ कञ्जस्थायै नमः ९६ कञ्जधारिण्यै नमः ९७

कञ्जमालाप्रियकर्यै नमः ९८ कञ्जरूपायै नमः ९९ कञ्जजायै

नमः १०० कञ्जजात्यै नमः १०१ कञ्जगत्यै नमः १०२

कञ्जहोमपरायणायै नमः १०३ कञ्जमण्डलमध्यस्थायै नमः

१०४ कञ्जाभरणभूषितायै नमः १०५ कञ्जसम्माननिरतायै नमः

१०६ कञ्जोत्पत्तिपरायणायै नमः १०७ कञ्जराशिसमाकारायै नमः

१०८ कञ्जारण्यनिवासिन्यै नमः १०९ करञ्जवृक्षमध्यस्थायै नमः

११० करञ्जवृक्षवासिन्यै नमः १११ करञ्जफलभूषाढ्यायै नमः

११२ करञ्जारण्यवासिन्यै नमः ११३ करञ्जमालाभरणायै नमः

११४ करवालपरायणायै नमः ११५ करवालप्रहृष्टात्मने नमः ११६

करवालप्रियागत्यै नमः ११७ करवालप्रियाकन्थायै नमः ११८

करवालविहारिण्यै नमः ११९ करवालमर्य्यै नमः १२० कर्मायै

नमः १२१ करवालप्रियङ्कर्यै नमः १२२ कबन्धमालाभरणायै

नमः १२३ कबन्धराशिमध्यगायै नमः १२४

कबन्धकूटसंस्थानायै नमः १२५ कबन्धानन्तभूषणायै

नमः १२६ कबन्धनादसन्तुष्टायै नमः १२७ कबन्धासनधारिण्यै

नमः १२८ कबन्धगृहमध्यस्थायै नमः १२९ कबन्धवनवासिन्यै

नमः १३० कबन्धकाञ्च्यै नमः १३१ करण्यै नमः १३२

कबन्धराशिभूषणायै नमः १३३

 कबन्धमालाजयदायै नमः १३४ कबन्धदेहवासिन्यै नमः १३५

कबन्धासनमान्यायै नमः १३६ कपालमाल्यधारिण्यै नमः १३७

कपालमालामध्यस्थायै नमः १३८ कपालब्रततोषितायै नमः १३९

कपालदीपसन्तुष्टायै नमः १४० कपालदीपरूपिण्यै नमः १४१

कपालदीपवरदायै नमः १४२ कपालकज्जलस्थितायै नमः १४३

कपालमालाजयदायै नमः १४४ कपालजलतोषिण्यै नमः १४५

कपालसिद्धिसंहृष्टायै नमः १४६ कपालभोजनोद्यतायै नमः १४७

कपालब्रतसंस्थानायै नमः १४८ कपालकमलालयायै नमः १४९

कवित्वामृतसारायै नमः १५० कवित्वामृतसागरायै नमः १५१

कवित्वसिद्धिसंहृष्टायै नमः १५२ कवित्वादानकारिण्यै नमः १५३

कविपूज्यायै नमः १५४ कविगत्यै नमः १५५ कविरूपायै नमः १५६

कविप्रियायै नमः १५७ कविब्रह्मानन्दरूपायै नमः १५८

कवित्वव्रततोषितायै नमः १५९ कवित्वव्रतसंस्थानायै नमः १६०

कविवाञ्छाप्रपूरिण्यै नमः १६१ कविकण्ठस्थितायै नमः १६२

कंहृंककंकंकविपूर्तिदायै नमः १६३ कज्जलायै नमः १६४

कज्जलदानमानसायै नमः १६५ कज्जलप्रियायै नमः १६६

कपालकज्जलसमायै नमः १६७ कज्जलेशप्रपूजितायै नमः १६८

कज्जलार्णवमध्यस्थायै नमः १६९ कज्जलानन्यरूपिण्यै नमः १७०

कज्जलप्रियसन्तुष्टायै नमः १७१ कज्जलप्रियतोषिण्यै नमः १७२

कपालमालाभरणायै नमः १७३ कपालकरभूषणायै नमः १७४

कपालकरभूषाढ्यायै नमः १७५ कपालचक्रमण्डितायै नमः १७६

कपालकोटिनिलयायै नमः १७७ कपालदुर्गकारिण्यै नमः १७८
कपालगिरिसंस्थानायै नमः १७९ कपालचक्रवासिन्यै नमः १८०
कपालपात्रसन्तुष्टायै नमः १८१ कपालाग्र्घ्यपरायणायै नमः १८२
कपालाग्र्घ्यप्रियप्राणायै नमः १८३ कपालाग्र्घ्यवरप्रदायै नमः
१८४

p. 53) कपालचक्ररूपायै नमः १८५ कपालरूपमात्रगायै नमः १८६
कदल्यै नमः १८७ कदलीरूपायै नमः १८८ कदलीवनवासिन्यै नमः
१८९ कदलीपुष्पसम्प्रीतायै नमः १९० कदलीफलमानसायै नमः १९१
कदलीहोमसन्तुष्टायै नमः १९२ कदलीदर्शनोद्यतायै नमः १९३
कदलीगर्भमध्यस्थायै नमः १९४ कदलीवनसुन्दर्यै नमः १९५
कदम्बपुष्पनिलयायै नमः १९६ कदम्बवनमध्यगायै नमः १९७
कदम्बकुसुमामोदायै नमः १९८ कदम्बवनतोषिण्यै नमः १९९
कदम्बपुष्पसम्पूज्यायै नमः २०० कदम्बपुष्पहोमदायै नमः
२०१ कदम्बपुष्पमध्यस्थायै नमः २०२ कदम्बफलभोजिन्यै नमः
२०३ कदम्बकाननान्तस्थायै नमः २०४ कदम्बाचलवासिन्यै नमः २०५
कक्षपायै नमः २०६ कक्षपाराध्यायै नमः २०७ कच्छपासन
स्थितायै नमः २०८ कर्णपूरायै नमः २०९ कर्णनासायै नमः २१०
कर्णाढ्यायै नमः २११ कालभैरव्यै नमः २१२ कलहप्रीतायै नमः
२१३ कलहदायै नमः २१४ कलहायै नमः २१५ कलहातुरायै नमः २१६

कर्णयक्ष्यै नमः २१७ कथिन्यै नमः २१८ कर्णसुन्दर्यै नमः २१९
कर्णपिशाचिन्यै नमः २२० कर्णमञ्जर्यै नमः २२१ कपिकक्षदायै
नमः २२२ कविकक्षविरूपाढ्यायै नमः २२३ कविकक्षस्वरूपिण्यै
नमः २२४ कस्तूरीमृगसंस्थानायै नमः २२५ कस्तूरीमृगरूपिण्यै
नमः २२६ कस्तूरीमृगसन्तोषायै नमः २२७ कस्तूरीमृगमध्यगायै
नमः २२८ कस्तूरीरसनीलाङ्ग्यै नमः २२९ कस्तूरीगन्धतोषितायै
नमः २३० कस्तूरीपूजकप्राणायै नमः २३१ कस्तूरीपूजकप्रियायै
नमः २३२ कस्तूरीप्रेमसन्तुष्टायै नमः २३३ कस्तूरीप्राणधारिण्यै
नमः २३४ कस्तूरीपूजकानन्दायै नमः २३५ कस्तूरीगन्धरूपिण्यै
नमः २३६ कस्तूरीमालिकारूपायै नमः २३७ कस्तूरीभोजनप्रियायै
नमः २३८

p. 54) कस्तूरीतिलकानन्दायै नमः २३९ कस्तूरीतिलकप्रियायै नमः २४०
कस्तूरीहोमसन्तुष्टायै नमः २४१ कस्तूरीतर्पणोद्यतायै नमः २४२
कस्तूरीमार्ज्जनोद्युक्तायै नमः २४३ कस्तूरीचक्रपूजितायै नमः २४४
कस्तूरीपुष्पसम्पूज्यायै नमः २४५ कस्तूरीचर्वणोद्यतायै नमः २४६
कस्तूरीगर्ब्भमध्यस्थायै नमः २४७ कस्तूरीवस्त्रधारिण्यै नमः
२४८ कस्तूरिकामोदरतायै नमः २४९ कस्तूरीवनवासिन्यै नमः २५०
कस्तूरीवनसंरक्षायै नमः २५१ कस्तूरीप्रेमधारिण्यै नमः २५२
कस्तूरीशक्तिनिलयायै नमः २५३ कस्तूरीशक्तिकुण्डगायै नमः २५४

कस्तूरीकुण्डसंस्नातायै नमः २५५ कस्तूरीकुण्डमज्जनायै नमः
२५६ कस्तूरीजीवसन्तुष्टायै नमः २५७ कस्तूरीजीवधारिण्यै नमः २५८
कस्तूरीपरमामोदायै नमः २५९ कस्तूरीजीवनक्षमायै नमः २६०
कस्तूरीजातिभावस्थायै नमः २६१ कस्तूरीगन्धचुम्बनायै नमः २६२
कस्तूरीगन्धसंशोभाविराजितकपालभुवे नमः २६३
कस्तूरीमदनान्तस्थायै नमः २६४ कस्तूरीमदहर्षदायै नमः २६५
कस्तूर्यै नमः २६६ कविताना‌ढ्यायै नमः २६७
कस्तूरीगृहमध्यगायै नमः २६८ कस्तूरीस्पर्शकप्राणायै नमः
२६९ कस्तूरीनिन्दाकान्तकायै नमः २७० कस्तूर्यामोदरसिकायै नमः
२७१ कस्तूरीक्रीडनोद्यतायै नमः २७२ कस्तूरीदाननिरतायै नमः २७३
कस्तूरीवरदायिन्यै नमः २७४ कस्तूरीस्थापनाशक्तायै नमः २७५
कस्तूरीस्थानरञ्जिन्यै नमः २७६ कस्तूरीकुशलप्राणायै नमः २७७
कस्तूरीस्तुतिवन्दितायै नमः २७८ कस्तूरीवन्दकाराध्यायै नमः २७९
कस्तूरीस्थानवासिन्यै नमः २८० कहरूपायै नमः २८१ कहा‌ढ्यायै
नमः २८२ कहानन्दायै नमः २८३ कहात्मभुवे नमः २८४
कहपूज्यायै नमः २८५ कहेत्याख्यायै नमः २८६ कहहेषायै नमः
२८७

p. 55) कहात्मिकायै नमः २८८ कहमालायै नमः २८९ कण्ठभूषायै
नमः २९० कहमन्त्रजपोद्यतायै नमः २९१ कहनामस्मृतिपरायै

नमः २९२ कहनामपरायणायै नमः २९३ कहपरायणरतायै नमः
२९४ कहदेव्यै नमः २९५ कहेश्वर्यै नमः २९६ कहहेत्वै नमः २९७
कहान्दायै नमः २९८ कहनादपरायणायै नमः २९९ कहमात्रे
नमः ३०० कहान्तस्थायै नमः ३०१ कहमन्त्रायै नमः ३०२
कहेश्वरायै नमः ३०३ कहगेयायै नमः ३०४ कहाराध्यायै नमः
३०५ कहध्यानपरायणायै नमः ३०६ कहतन्त्रायै नमः ३०७
कहकहायै नमः ३०८ कहचर्यापरायणायै नमः ३०९ कहाचारायै
नमः ३१० कहगत्यै नमः ३११ कहताण्डवकारिण्यै नमः ३१२
कहारण्यायै नमः ३१३ कहगत्यै नमः ३१४ कहशक्तिपरायणायै
नमः ३१५ कहराज्यरतायै नमः ३१६ कर्मसाक्षिण्यै नमः ३१७
कर्मसुन्दर्यै नमः ३१८ कर्मविद्यायै नमः ३१९ कर्मगत्यै नमः ३२०
कर्मतन्त्रपरायणायै नमः ३२१ कर्ममात्रायै नमः ३२२
कर्मगात्रायै नमः ३२३ कर्मधर्मपरायणायै नमः ३२४
कर्मरेखानाशकर्त्र्यै नमः ३२५ कर्मरेखाविनोदिन्यै नमः ३२६
कर्मरेखामोहकर्यै नमः ३२७ कर्मकीर्तिपरायणायै नमः ३२८
कर्मविद्यायै नमः ३२९ कर्मसारायै नमः ३३० कर्माधारायै
नमः ३३१ कर्मभुवे नमः ३३२ कर्मकार्यै नमः ३३३ कर्महार्यै
नमः ३३४ कर्मकौतुकसुन्दर्यै नमः ३३५ कर्मकाल्यै नमः ३३६
कर्मतारायै नमः ३३७ कर्मछिन्नायै नमः ३३८ कर्मदायै नमः
३३९ कर्मचाण्डालिन्यै नमः ३४० कर्मवेदमात्रे नमः ३४१ कर्मभुवे

नमः ३४२ कर्मकाण्डरतानन्तायै नमः ३४३

कर्मकाण्डानुमानितायै नमः ३४४ कर्मकाण्डपरीणाहायै नमः

३४५

p. 56) कमठ्यै नमः ३४६ कमठाकृत्यै नमः ३४७

कमठाराध्यहृदयायै नमः ३४८ कमठायै नमः ३४९

कण्ठसुन्दर्यै नमः ३५० कमठासनसंसेव्यायै नमः ३५१

कमठ्यै नमः ३५२ कर्मतत्परायै नमः ३५३ करुणाकरकान्तायै

नमः ३५४ करुणाकरवन्दितायै नमः ३५५ कठोरायै नमः ३५६

करमालायै नमः ३५७ कठोरकुचधारिण्यै नमः ३५८ कपर्द्दिन्यै

नमः ३५९ कपटिन्यै नमः ३६० कठिन्यै नमः ३६१ कङ्कभूषणायै

नमः ३६२ करभोर्वै नमः ३६३ कठिनदायै नमः ३६४ करभायै

नमः ३६५ करभालयायै नमः ३६६ कलभाषामय्यै नमः ३६७

कल्पायै नमः ३६८ कल्पनायै नमः ३६९ कल्पदायिन्यै नमः ३७०

कमलस्थायै नमः ३७१ कलामालायै नमः ३७२ कमलास्यायै नमः

३७३ क्वणत्प्रभायै नमः ३७४ कुकुद्मिन्यै नमः ३७५ कष्टवत्यै नमः

३७६ करणीयकथार्च्चितायै नमः ३७७ कचार्च्चितायै नमः ३७८ कचतन्वै

नमः ३७९ कचसुन्दरधारिण्यै नमः ३८० कठोरकुचसँअग्रायै नमः

३८१ कटिसूत्रविराजितायै नमः ३८२ कर्णभक्षप्रियायै नमः ३८३

कन्दायै नमः ३८४ कथायै नमः ३८५ कन्दगत्यै नमः ३८६ कल्यै

नमः ३८७ कलिघ्न्यै नमः ३८८ कलिदूत्यै नमः ३८९

कविनायकपूजितायै नमः ३९० कणकक्षानियन्त्र्यै नमः ३९१

कश्चित्कविवरार्चितायै नमः ३९२ कर्त्र्यै नमः ३९३ कर्तृकाभूषायै

नमः ३९४ करिण्यै नमः ३९५ कर्णशत्रुपायै नमः ३९६ करणेश्यै

नमः ३९७ कर्णपायै नमः ३९८ कलवाचायै नमः ३९९ कलानिध्यै

नमः ४०० कलनायै नमः ४०१ कलनाधारायै नमः ४०२ कारिकायै

नमः ४०३ करकायै नमः ४०४ करायै नमः ४०५ कलगेयायै नमः ४०६

कर्कराश्यै नमः ४०७ कर्कराशिप्रपूजितायै नमः ४०८

p. 57) कन्याराश्यै नमः ४०९ कन्यकायै नमः ४१०

कन्यकाप्रियभाषिण्यै नमः ४११ कन्यकादानसंतुष्टायै नमः ४१२

कन्यकादानतोषिण्यै नमः ४१३ कन्यादानकरानन्दायै नमः ४१४

कन्यादानग्रहेष्टदायै नमः ४१५ कर्षणायै नमः ४१६

कक्षदहनायै नमः ४१७ कामितायै नमः ४१८ कमलासनायै नमः

४१९ करमालानन्दकर्त्र्यै नमः ४२० करमालाप्रतोषितायै नमः ४२१

करमालाशयानन्दायै नमः ४२२ करमालासमागमायै नमः ४२३

करमालासिद्धिदात्र्यै नमः ४२४ करमालायै नमः ४२५ करप्रियायै

नमः ४२६ करप्रियाकररतायै नमः ४२७ करदानपरायणायै नमः

४२८ कलानन्दायै नमः ४२९ कलिगत्यै नमः ४३० कलिपूज्यायै नमः ४३१

कलिप्रस्वै नमः ४३२ कलनादनिनादस्थायै नमः ४३३

कलनादवरप्रदायै नमः ४३४ कलनादसमाजस्थायै नमः ४३५
कहोलायै नमः ४३६ कहोलदायै नमः ४३७ कहोलगेहमध्यस्थायै
नमः ४३८ कहोलवरदायिन्यै नमः ४३९ कहोलकविताधारायै नमः ४४०
कहोलऋषिमानितायै नमः ४४१ कहोलमानसाराध्यायै नमः ४४२
कहोलवाक्यकारिण्यै नमः ४४३ कर्तृरूपायै नमः ४४४ कर्तृमय्यै
नमः ४४५ कर्तृमात्रे नमः ४४६ कर्तर्यै नमः ४४७ कनीयायै नमः ४४८
कनकाराध्यायै नमः ४४९ कनीनकमय्यै नमः ४५०
कनीयानन्दनिलयायै नमः ४५१ कनकानन्दतोषितायै नमः ४५२
कनीनककरायै नमः ४५३ काष्ठायै नमः ४५४ कथार्णवकर्य्यै
नमः ४५५ कर्य्यै नमः ४५६ करिगम्यायै नमः ४५७ करिगत्यै नमः ४५८
करिध्वजपरायणायै नमः ४५९ करिनाथप्रियायै नमः ४६०
कण्ठायै नमः ४६१ कथानकप्रतोषितायै नमः ४६२ कमनीयायै
नमः ४६३ कमनकायै नमः ४६४ कमनीयविभूषणायै नमः ४६५
कमनीयसमाजस्थायै नमः ४६६

p. 58) कमनीयव्रतप्रियायै नमः ४६७ कमनीयगुणाराध्यायै नमः
४६८ कपिलायै नमः ४६९ कपिलेश्वर्यै नमः ४७० कपिलाराध्यहृदयायै
नमः ४७१ कपिलाप्रियवादिन्यै नमः ४७२ कहचक्रमन्त्रवर्णायै नमः
४७३ कहचक्रप्रसूनकायै नमः ४७४ क-ए-ईल्ह्रींस्वरूपायै नमः ४७५
क-ए-ईल्ह्रींवरप्रदायै नमः ४७६ क-ए-ईल्ह्रींसिद्धिदात्र्यै नमः ४७७

क-ए-ईल्ह्रींस्वरूपिण्यै नमः ४७८ क-ए-ईल्ह्रींमन्त्रवर्णायै नमः ४७९
क-ए-ईल्ह्रींप्रसूकलायै नमः ४८० कवर्गायै नमः ४८१ कपाटस्थायै
नमः ४८२ कपाटोद्घाटनक्षमायै नमः ४८३ कङ्काल्यै नमः ४८४
कपाल्यै नमः ४८५ कङ्कालप्रियमाषिण्यै नमः ४८६
कङ्कालभैरवाराध्यायै नमः ४८७ कङ्कालमानससंस्थितायै
नमः ४८८ कङ्कालमोहनिरतायै नमः ४८९ कङ्कालमोहदायिन्यै
नमः ४९० कलूषघ्न्यै नमः ४९१ कलूषहायै नमः ४९२
कलूषार्त्तिविनाशिन्यै नमः ४९३ कलिपुष्पायै नमः ४९४ कलादानायै
नमः ४९५ कशिष्यै नमः ४९६ कश्यपार्चितायै नमः ४९७ कश्यपायै
नमः ४९८ कश्यपाराध्यायै नमः ४९९ कलिपूर्णकलेवरायै नमः
५०० कलेवरकर्यै नमः ५०१ कांच्यै नमः ५०२ कवर्गायै नमः ५०३
करालकायै नमः ५०४ करालभैरवाराध्यायै नमः ५०५
करालभैरवेश्वर्यै नमः ५०६ करालायै नमः ५०७ कलनाधारायै
नमः ५०८ कपर्द्दीशवरप्रदायै नमः ५०९ कपर्द्दीशप्रेमलतायै
नमः ५१० कपर्द्दिमालिकायै नमः ५११ कपर्द्दिजपमालाढ्यायै
नमः ५१२ करवीरप्रसूनदायै नमः ५१३ करवीरप्रियप्राणायै नमः
५१४ करवीरप्रपूजितायै नमः ५१५ कर्णिकारसमाकारायै नमः ५१६
कर्णिकारप्रपूजितायै नमः ५१७ करीषाग्निस्थितायै नमः ५१८ कर्षायै
नमः ५१९ कर्षमात्रसुवर्णदायै नमः ५२० कलशायै नमः ५२१

p. 59) कलशाराध्यायै नमः ५२२ कषायायै नमः ५२३ करिगानदायै
नमः ५२४ कपिलायै नमः ५२५ कलकण्ठ्यै नमः ५२६ कलिकल्पलतायै
नमः ५२७ कल्पलतायै नमः ५२८ कल्पमात्रे नमः ५२९ कल्पकार्यै
नमः ५३० कल्पभुवे नमः ५३१ कर्पूरामोदरुचिरायै नमः ५३२
कर्पूरामोदधारिण्यै नमः ५३३ कर्पूरमालाभरणायै नमः ५३४
कर्पूरवासपूर्त्तिदायै नमः ५३५ कर्पूरमालाजयदायै नमः ५३६
कर्पूरार्णवमध्यगायै नमः ५३७ कर्पूरतर्पणरतायै नमः ५३८
कटकाम्बरधारिण्यै नमः ५३९ कपटेश्वरसम्पूज्यायै नमः ५४०
कपटेश्वररूपिण्यै नमः ५४१ कद्वै नमः ५४२ कपिध्वजाराध्यायै
नमः ५४३ कलापपुष्परूपिण्यै नमः ५४४ कलापपुष्परुचिरायै नमः
५४५ कलापपुष्पपूजितायै नमः ५४६ क्रकचायै नमः ५४७
क्रकचाराध्यायै नमः ५४८ कथंब्रूमायै नमः ५४९ करलतायै
नमः ५५० कथङ्कारविनिर्मुक्तायै नमः ५५१ काल्यै नमः ५५२
कालक्रियायै नमः ५५३ क्रत्वै नमः ५५४ कामिन्यै नमः ५५५
कामिनीपूज्यायै नमः ५५६ कामिनीपुष्पधारिण्यै नमः ५५७
कामिनीपुष्पनिलयायै नमः ५५८ कामिनीपुष्पपूर्णिमायै नमः ५५९
कामिनीपुष्पपूजार्हायै नमः ५६० कामिनीपुष्पभूषणायै नमः
५६१ कामिनीपुष्पतिलकायै नमः ५६२ कामिनीकुण्डचुम्बनायै नमः
५६३ कामिनीयोगसन्तुष्टायै नमः ५६४ कामिनीयोगभोगदायै नमः ५६५
कामिनीकुण्डसम्मग्नायै नमः ५६६ कामिनीकुण्डमध्यगायै नमः

५६७ कामिनीमानसाराध्यायै नमः ५६८ कामिनीमानतोषितायै नमः
५६९ कामिनीमानसञ्चारायै नमः ५७० कालिकायै नमः ५७१
कालकालिकायै नमः ५७२ कामायै नमः ५७३ कामदेव्यै नमः ५७४
कामेश्यै नमः ५७५ कामसम्भवायै नमः ५७६

p. 60) कामभावायै नमः ५७७ कामरतायै नमः ५७८ कामार्त्तायै
नमः ५७९ काममञ्जर्यै नमः ५८० काममञ्जीररणितायै नमः ५८१
कामदेवप्रियान्तरायै नमः ५८२ कामकाल्यै नमः ५८३ कामकलायै
नमः ५८४ कालिकायै नमः ५८५ कमलार्चितायै नमः ५८६ कादिकायै
नमः ५८७ कमलायै नमः ५८८ काल्यै नमः ५८९
कालानलसमप्रभायै नमः ५९० कल्पान्तदहनायै नमः ५९१
कान्तायै नमः ५९२ कान्तारप्रियावासिन्यै नमः ५९३ कालपूज्यायै
नमः ५९४ कालरतायै नमः ५९५ कालमात्रे नमः ५९६ कालिन्यै नमः
५९७ कालवीरायै नमः ५९८ कालघोरायै नमः ५९९ कालसिद्धायै
नमः ६०० कालदायै नमः ६०१ कालाञ्जनसमाकारायै नमः ६०२
कालञ्जरनिवासिन्यै नमः ६०३ कालऋच्यै नमः ६०४ कालवृच्यै
नमः ६०५ कारागृहविमोचिन्यै नमः ६०६ कादिविद्यायै नमः ६०७
कादिमात्रे नमः ६०८ कादिस्थायै नमः ६०९ कादिसुन्दर्यै नमः ६१०
काश्यै नमः ६११ कांच्यै नमः ६१२ काञ्चीशायै नमः ६१३
काशीशवरदायिन्यै नमः ६१४ क्रींबीजायै नमः ६१५

क्रींबीजाह्रदयायै नमः स्मृतायै नमः ६१६ काम्यायै नमः ६१७
काम्यगत्यै नमः ६१८ काम्यसिद्धिदात्र्यै नमः ६१९ कामभुवे नमः
६२० कामाख्यायै नमः ६२१ कालरूपायै नमः ६२२
कामचापविमोचिन्यै नमः ६२३ कामदेवकलारामायै नमः ६२४
कामदेवकलालयायै नमः ६२५ कामरात्र्यै नमः ६२६ कामदात्र्यै
नमः ६२७ कान्ताराचलवासिन्यै नमः ६२८ कालरूपायै ६२९ कालगत्यै
नमः ६३० कामयोगपरायणायै नमः ६३१ कामसम्मर्द्दनरतायै
नमः ६३२ कामगेहविकाशिन्यै नमः ६३३ कालभैरवभार्यायै नमः
६३४ कालभैरवकामिन्यै नमः ६३५ कालभैरवयोगस्थायै नमः ६३६

p. 61) कालभैरवभोगदायै नमः ६३७ कामधेन्वै नमः ६३८
कामदोग्ध्र्यै नमः ६३९ काममात्रे नमः ६४० कान्तिदायै नमः ६४१
कामुकायै नमः ६४२ कामुकाराध्यायै नमः ६४३
कामुकानन्दवर्द्धिन्यै नमः ६४४ कार्त्तवीर्यायै नमः ६४५
कार्त्तिकेयायै नमः ६४६ कार्त्तिकेयप्रपूजितायै नमः ६४७ कार्यायै
नमः ६४८ कारणदायै नमः ६४९ कार्यकारिण्यै नमः ६५०
कारणान्तरायै नमः ६५१ कान्तिगम्यायै नमः ६५२ कान्तिमय्यै नमः
६५३ कात्यायै नमः ६५४ कात्यायन्यै नमः ६५५ कायै नमः ६५६
कामसारायै नमः ६५७ काश्मीरायै नमः ६५८
काश्मीराचारतत्परायै नमः ६५९ कामरूपाचाररतायै नमः ६६०

कामरूपप्रियँवदायै नमः ६६१ कामरूपाचारसिद्धै नमः ६६२

कामरूपमनोमय्यै नमः ६६३ कार्त्तिक्यै नमः ६६४

कार्त्तिकाराध्यायै नमः ६६५ काञ्चनारप्रसूनभुवे नमः ६६६

काञ्चनारप्रसूनाभायै नमः ६६७ काञ्चनारप्रपूजितायै नमः

६६८ काञ्चरूपायै नमः ६६९ काञ्चभूम्यै नमः ६७०

कांस्यपात्रप्रभोजिन्यै नमः ६७१ कांस्यध्वनिमय्यै नमः ६७२

कामसुन्दर्यै नमः ६७३ कामचुम्बनायै नमः ६७४

काशपुष्पप्रतीकाशै नमः ६७५ कामद्रुमसमागमायै नमः ६७६

कामपुष्पायै नमः ६७७ कामभूम्यै नमः ६७८ कामपूज्यायै

नमः ६७९ कामदायै नमः ६८० कामदेहायै नमः ६८१ कामगेहायै

नमः ६८२ कामबीजपरायणायै नमः ६८३ कामध्वजसमारूढायै

नमः ६८४ कामध्वजसमास्थितायै नमः ६८५ काश्यप्यै नमः ६८६

काश्यपाराध्यायै नमः ६८७ काश्यपानन्ददायिन्यै नमः ६८८

कालिन्दीजलसंकाशायै नमः ६८९ कालिन्दीजलपूजितायै नमः ६९०

कादेवपूजानिरतायै नमः ६९१ कादेवपरमार्थदायै नमः ६९२

कार्मणायै नमः ६९३ कार्मणाकारायै नमः ६९४

p. 62) कामकार्मणकारिण्यै नमः ६९५ कार्मणत्रोटनकर्यै नमः ६९६

काकिन्यै नमः ६९७ कारणाह्वयायै नमः ६९८ काव्यामृतायै नमः

६९९ कालिङ्गायै नमः ७०० कालिङ्गमर्द्दनोद्यतायै नमः ७०१

कालागुरुविभूषाढ्यायै नमः ७०२ कालागुरुविभूतिदायै नमः ७०३
कालागुरुसुगन्धायै नमः ७०४ कालागुरुप्रतर्पणायै नमः ७०५
कावेरीनीरसम्प्रीतायै नमः ७०६ कावेरीतीरवासिन्यै नमः ७०७
कालचक्रभ्रमाकारायै नमः ७०८ कालचक्रनिवासिन्यै नमः ७०९
काननायै नमः ७१० काननाधारायै नमः ७११ काव्यै नमः ७१२
कारुणिकामय्यै नमः ७१३ काम्पिल्यवासिन्यै नमः ७१४ काष्ठायै
नमः ७१५ कामपल्यै नमः ७१६ कानभुवे नमः ७१७
कादम्बरीपानरतायै नमः ७१८ कादम्बर्यै नमः ७१९ कलायै नमः
७२० कामवन्द्यायै नमः ७२१ कामेश्यै नमः ७२२
कामराजप्रपूजितायै नमः ७२३ कामराजेश्वरीविद्यायै नमः ७२४
कामकौतुकसुन्दर्यै नमः ७२५ काम्बोजजायै नमः ७२६ काञ्चिनदायै
नमः ७२७ कांस्यकाञ्चनकारिण्यै नमः ७२८
काञ्चनाद्रिसमाकारायै नमः ७२९ काञ्चनाद्रिप्रदायै नमः ७३०
कामकीर्त्यै नमः ७३१ कामकेश्यै नमः ७३२ कारिकायै नमः ७३३
कान्ताराश्रयायै नमः ७३४ कामभेद्यै नमः ७३५ कामार्त्तिनाशिन्यै
नमः ७३६ कामभूमिकायै नमः ७३७ कालनिर्णाशिन्यै नमः ७३८
काव्यवनितायै नमः ७३९ कामरूपिण्यै नमः ७४०
कायस्थाकामसन्दीप्त्यै नमः ७४१ काव्यदायै नमः ७४२ कालसुन्दर्यै
नमः ७४३ कामेश्यै नमः ७४४ कारणवरायै नमः ७४५
कामेशीपूजनोद्यतायै नमः ७४६ काञ्चीनूपुरभूषाढ्यायै

नमः ७४७ कुङ्कुमाभरणान्वितायै नमः ७४८ कालचक्रायै नमः ७४९
कालगत्यै नमः ७५० कालचक्रमनोभवायै नमः ७५१

p. 63) कुन्दमध्यायै नमः ७५२ कुन्दपुष्पायै नमः ७५३
कुन्दपुष्पप्रियायै नमः ७५४ कुजायै नमः ७५५ कुजमात्रे नमः ७५६
कुजाराध्यायै नमः ७५७ कुठारवरधारिण्यै नमः ७५८
कुञ्जरस्थायै नमः ७५९ कुशरतायै नमः ७६० कुशेशयविलोचनायै
नमः ७६१ कुनठ्यै नमः ७६२ कुरर्यै नमः ७६३ क्रुद्धायै नमः ७६४
कुरङ्ग्यै नमः ७६५ कुटजाश्रयायै नमः ७६६ कुम्भीनसविभूषायै
नमः ७६७ कुम्भीनसवधोद्यतायै नमः ७६८ कुम्भकणमनोल्लासायै
नमः ७६९ कुलचूडामण्यै नमः ७७० कुलायै नमः ७७१
कुलालगृहकन्यायै नमः ७७२ कुलचूडामणिप्रियायै नमः ७७३
कुलपूज्यायै नमः ७७४ कुलाराध्यायै नमः ७७५
कुलपूजापरायणायै नमः ७७६ कुलभूषायै नमः ७७७ कुक्ष्यै
नमः ७७८ कुररीगणसेवितायै नमः ७७९ कुलपुष्पायै नमः ७८०
कुलरतायै नमः ७८१ कुलपुष्पपरायणायै नमः ७८२ कुलवस्त्रायै
नमः ७८३ कुलाराध्यायै नमः ७८४ कुलकुण्डसमप्रभायै नमः ७८५
कुलकुण्डसमोल्लासायै नमः ७८६ कुण्डपुष्पपरायणायै नमः ७८७
कुण्डपुष्पप्रसन्नास्यायै नमः ७८८ कुण्डगोलोद्भवात्मिकायै नमः
७८९ कुण्डगोलोद्भवाधारायै नमः ७९० कुण्डगोलमध्यै नमः ७९१

कुह्वै नमः ७९२ कुण्डगोलप्रियप्राणायै नमः ७९३

कुण्डगोलप्रपूजितायै नमः ७९४ कुण्डगोलमनोल्लासायै नमः ७९५

कुण्डगोलबलप्रदायै नमः ७९६ कुण्डदेवरतायै नमः ७९७

क्रुद्धायै नमः ७९८ कुलसिद्धिकरीपरायै नमः ७९९

कुलकुण्डसमाकारायै नमः ८०० कुलकुण्डसमानभुवे नमः ८०१

कुण्डसिद्ध्यै नमः ८०२ कुण्डऋद्ध्यै नमः ८०३

कुमारीपूजनोद्यतायै नमः ८०४ कुमारीपूजकप्राणायै नमः ८०५

कुमारीपूजकालयायै नमः ८०६ कुमार्यै नमः ८०७ कामसन्तुष्टायै

नमः ८०८ कुमारीपूजनोत्सुकायै नमः ८०९

p. 64) कुमारीव्रतसन्तुष्टायै नमः ८१० कुमारीरूपधारिण्यै नमः

८११ कुमारीभोजनप्रीतायै नमः ८१२ कुमार्यै नमः ८१३ कुमारदायै

नमः ८१४ कुमारमात्रे नमः ८१५ कुलदायै नमः ८१६ कुलयोन्यै

नमः ८१७ कुलेश्वर्यै नमः ८१८ कुललिङ्गायै नमः ८१९ कुलानन्दायै

नमः ८२० कुलरम्यायै नमः ८२१ कुतर्कधृषे नमः ८२२ कुन्त्यै नमः

८२३ कुलकान्तायै नमः ८२४ कुलमार्गपरायणायै नमः ८२५ कुल्लायै

नमः ८२६ कुरुकुल्लायै नमः ८२७ कुल्लुकायै नमः ८२८ कुलकामदायै

नमः ८२९ कुलिशाङ्ग्यै नमः ८३० कुब्जिरिकायै नमः ८३१

कुब्जिकानन्दवर्द्धिन्यै नमः ८३२ कुलीनायै नमः ८३३ कुञ्जरगत्यै

नमः ८३४ कुञ्जरेश्वरगामिन्यै नमः ८३५ कुलपाल्यै नमः ८३६

कुलवत्यै नमः ८३७ कुलदीपिकायै नमः ८३८ कुलयोगेश्वर्यै नमः ८३९

कुण्डायै नमः ८४० कुङ्कुमारुणविग्रहायै नमः ८४१

कुङ्कुमानन्दसन्तोषायै नमः ८४२ कुङ्कुमार्णववासिन्यै नमः ८४३

कुसुमायै नमः ८४४ कुसुमप्रीतायै नमः ८४५ कुलभुवे नमः ८४६

कुलसुन्दर्य्यै नमः ८४७ कुमुद्वत्यै नमः ८४८ कुमुदिन्यै नमः ८४९

कुशलायै नमः ८५० कुलटालयायै नमः ८५१ कुलटालयमध्यस्थायै

नमः ८५२ कुलटासङ्गतोषितायै नमः ८५३ कुलटाभुवनोद्युक्तायै

नमः ८५४ कुशावर्त्तायै नमः ८५५ कुलावर्णवायै नमः ८५६

कुलार्णवाचाररतायै नमः ८५७ कुण्डल्यै नमः ८५८ कुण्डलकृत्यै

नमः ८५९ कुमत्यै नमः ८६० कुलश्रेष्ठायै नमः ८६१

कुलचक्रपरायणायै नमः ८६२ कूटस्थायै नमः ८६३ कूटदृष्ट्यै

नमः ८६४ कुन्तलायै नमः ८६५ कुन्तलाकृत्यै नमः ८६६

कुशलाकृतिरूपायै नमः ८६७ कूर्चबीजधरायै नमः ८६८ कै नमः

८६९ कुंकुंकुंकुंशब्दरतायै नमः ८७०

कुंकुंकुंकुंपरायणायै नमः ८७१

p. 65) कुंकुंकुंशब्दनिलयायै नमः ८७२ कुक्कुरालयवासिन्यै नमः

८७३ कुक्कुरासङ्गसँयुक्तायै नमः ८७४ कुक्कुरानन्तविग्रहायै नमः

८७५ कूर्चारम्भायै नमः ८७६ कूर्चबीजायै नमः ८७७

कूर्चजापपरायणायै नमः ८७८ कुलिन्यै नमः ८७९ कुलसंस्थानायै

नमः ८८० कूर्चकण्ठपरागत्यै नमः ८८१

कूर्चवीणाभालदेशायै नमः ८८२ कूर्चमस्तकभूषितायै नमः

८८३ कुलवृक्षगतायै नमः ८८४ कूर्मायै नमः ८८५

कूर्माचलनिवासिन्यै नमः ८८६ कुलबिन्द्वै नमः ८८७ कुलशिवायै

नमः ८८८ कुलशक्तिपरायणायै नमः ८८९ कुलबिन्दुमणिप्रख्यायै

नमः ८९० कुङ्कुमद्रुमवासिन्यै नमः ८९१ कुचमर्द्दनसन्तुष्टायै

नमः ८९२ कुचजापपरायणायै नमः ८९३ कुचस्पर्शनसन्तुष्टायै

नमः ८९४ कुचालिङ्गनहर्षदायै नमः ८९५ कुगतिघ्न्यै नमः ८९६

कुबेरार्चायै नमः ८९७ कुचभुवे नमः ८९८ कुलनायिकायै नमः ८९९

कुगायनायै नमः ९०० कुचधरायै नमः ९०१ कुमात्रे नमः ९०२

कुन्ददन्तिन्यै नमः ९०३ कुगेयायै नमः ९०४ कुहराभासायै नमः

९०५ कुगेयाकुम्नदारिकायै नमः ९०६ कीर्त्यै नमः ९०७ किरातिन्यै

नमः ९०८ क्लिन्नायै नमः ९०९ किन्नरायै नमः ९१० किन्नर्यै नमः ९११

क्रियायै नमः ९१२ क्रीङ्कारायै नमः ९१३ क्रींजपासक्तायै नमः

९१४ क्रींहूंस्त्रींमन्त्ररूपिण्यै नमः ९१५ किर्मीरितदृशापाङ्ग्यै

नमः ९१६ किशोर्यै नमः ९१७ किरीटिन्यै नमः ९१८ कीटभाषायै नमः

९१९ कीटयोन्यै नमः ९२० कीटमात्रे नमः ९२१ कीटदायै नमः ९२२

किंशुकायै नमः ९२३ कीरमाषायै नमः ९२४ क्रियासारायै नमः

९२५ क्रियावत्यै नमः ९२६ कींकींशब्दपरायै नमः ९२७ क्लीं क्लीं

क्लूँक्लैं क्लों मन्त्ररूपिण्यै नमः ९२८ कां कीं कूं कैं

स्वरूपायै नमः ९२९ कःफट्मन्त्रस्वरूपिण्यै नमः ९३०

केतकीभूषणानन्दायै नमः ९३१

p. 66) केतकीभरणान्वितायै नमः ९३२ कैकदायै नमः ९३३ केशिन्यै

नमः ९३४ केशीसूदनतत्परायै नमः ९३५ केशरूपायै नमः ९३६

केशमुक्तायै नमः ९३७ कैकेय्यै नमः ९३८ कौशिक्यै नमः ९३९

कैरवायै नमः ९४० कैरवाह्लादायै नमः ९४१ केशरायै नमः ९४२

केतुरूपिण्यै नमः ९४३ केशवाराध्यहृदयायै नमः ९४४

केशवासक्तमानसायै नमः ९४५ क्लैव्यविनाशिन्यै नमः ९४६

क्लैंचक्लैंबीजजपतोषितायै नमः ९४७ कौसल्यायै नमः ९४८

कोशलाक्ष्यै नमः ९४९ कोशायै नमः ९५० कोमलायै नमः ९५१

कोलापुरनिवासायै नमः ९५२ कोलासुरविनाशिन्यै नमः ९५३

कोटिरूपायै नमः ९५४ कोटिरतायै नमः ९५५ क्रोधिन्यै नमः ९५६

क्रोधरूपिण्यै नमः ९५७ केकायै नमः ९५८ कोकिलायै नमः ९५९ कोट्यै

नमः ९६० कोटिमन्त्रपरायणायै नमः ९६१ कोट्यनन्तमन्त्रयुतायै

नमः ९६२ कैरूपायै नमः ९६३ केरलाश्रयायै नमः ९६४

केरलाचारनिपुणायै नमः ९६५ केरलेन्द्रगृहेस्थितायै नमः ९६६

केदाराश्रमसंस्थायै नमः ९६७ केदारेश्वरपूजितायै नमः ९६८

क्रोधरूपायै नमः ९६९ क्रोधपदायै नमः ९७० क्रोधमात्रे नमः

९७१ कौशिक्यै नमः ९७२ कोदण्डधारिण्यै नमः ९७३ क्रौंचायै

नमः ९७४ कौशल्यायै नमः ९७५ कौलमार्गगायै नमः ९७६ कौलिन्यै
नमः ९७७ कौलिकाराध्यायै नमः ९७८ कौलिकागारवासिन्यै नमः ९७९
कौतुक्यै नमः ९८० कौमुद्यै नमः ९८१ कौलायै नमः ९८२ कौमार्यै
नमः ९८३ कौरवार्चितायै नमः ९८४ कौण्डिन्यायै नमः ९८५ कौशिक्यै
नमः ९८६ क्रोधज्वालाभासुररूपिण्यै नमः ९८७
कोटिकालानलज्वालायै नमः ९८८ कोटिमार्तण्डविग्रहायै नमः ९८९
कृत्तिकायै नमः ९९० कृष्णवर्णायै नमः ९९१ कृष्णायै नमः ९९२

p. 67) कृत्यायै नमः ९९३ क्रियातुरायै नमः ९९४ कुशाङ्ग्यै नमः ९९५
कृतकृत्यायै नमः ९९६ क्रःफट्वाहास्वरूपिण्यै नमः ९९७
क्रौंक्रौंह्रूँहट्वन्त्रवर्णायै नमः ९९८ क्रीं
ह्रींह्रूँहट्नमस्स्वधायै नमः ९९९
क्रींक्रींह्रींह्रींतथाह्रूँरूँहट्वाहामन्त्ररूपिण्यै नमः
१०००। इतिश्रीसर्वसाम्राज्यमेधाचतुर्थ्यन्तनामसहस्रकं सम्पूर्णम्
॥

अथ कुमारीं सुवासिनीं च पूजयेद्भोजयेच्च॥ तत्क्रमो यथा
पूजागृहे कुमारीमानीय, प्रदक्षिणीकृत्योद्वर्त्तनाद्यैः स्नापयित्वा,
गन्धतैलेन शरीरं संस्कुर्यात्। केशं परिष्कृत्य, ललाटे सिन्दूरम्,
नयनयोः कज्जलम्, सर्वाङ्गे चन्दनम्, वस्त्रालङ्कारैराभूष्य, पादौ

प्रक्षाल्य, पीठोपरि समावेश्य, ताम्बूलेन मुखं संशोध्य,
स्वयमपि न्यासं कृत्वा षडङ्गेषु न्यसेत्। ॐ क्लांकुलकुमारिके
हृदयाय नमः। ॐ क्लीं कुलकुमारिके शिरसेस्वाहा। ॐ
क्लूंकुलकुमारिके शिखायैवषट्। ॐ क्लैंकुलकुमारिके कवचायहुम्।
ॐ क्लौंकुलमुमारिके नेत्रत्रयाय वौषट्। ॐ क्लः कुलकुमारिके
अस्त्रायफट्॥ ततोऽङ्गेषु मातृकान्यासाः॥ स च यथा - अंनमो
ललाटे। आंनमो मुखवृत्ते। इंनमो दक्षनेत्रे। ईंनमो वामनेत्रे।
उंनमो दक्षकर्णे। ऊंनमो वामकर्णे। ऋंनमो दक्षनासायाम्।
ॠंनमो वामनासायाम्। ऌंनमो दक्षगण्डे। ॡंनमो वामगण्डे।
एंनमः ऊर्ध्वोष्ठे। ऐंनमः अधरोष्ठे। ओंनमः
ऊर्ध्वदन्तपङ्क्तौ। औंनमः अधोदन्तपङ्क्तौ। अंनमः शिरसि।
अःनमो मुखे॥ ततो ध्यायेत्

शङ्खकुन्देन्दुधवलां द्विभुजां वरदाभयाम्।
चन्द्रमध्यमहाम्भोजभावहावविराजिताम्॥

एवं ध्यात्वा मानसोपचारैस्सम्पूज्य, पुनर्ध्यात्वा पूजयेत्॥ यथा
इदं पाद्यं ह्रीं कुलकुमारिकायै नमः एवम्
इदमर्घ्यमिदमाचमनीयमिदमनुलेपनमेतेऽक्षताः एतानि पुष्पाणि
एष धूपः एष दीपः इदन्नैवेद्यमिदं ताम्बूलं

ह्रींकुलकुमारिकायै नमः इतिमन्त्रेण

p. 68) पूजयेत्॥ अतः षडङ्गमन्त्रेण षडङ्गानि पूजयेत्॥ तद्यथा
ॐक्लांकुलकुमारिके हृदयाय नमः। ॐक्लींकुलकुमारिके शिरसे
नमः। ॐक्लूंकुलकुमारिके शिखायै नमः। ॐक्लैंकुलकुमारिके
कवचाय नमः। ॐक्लौंकुलकुमारिके नेत्रत्रयाय नमः। ॐ
क्लःकुलकुमारिके अस्त्राय नमः। इत्यङ्गानि पूजयित्वा ॐ
ह्रींहंसःकुलकुमारिकाश्रीपादुकाम्पूजयामि इति
पुष्पाञ्जलित्रयं च दत्त्वा कालीं पूजयेत्। तद्यथा -
ॐ-ऐंसन्ध्यायै नमः। ॐ-ऐंसरस्वत्यै नमः। ॐ-ऐंत्रिमूर्त्यै
नमः। ॐ-ऐंकालिकायै नमः। ॐ-ऐंसुभगायै नमः। ॐ-ऐं-उमायै
नमः। ॐ-ऐंमालिन्यै नमः। ॐ-ऐंकुब्जिकायै नमः। ॐ-
ऐंकालसङ्कर्षिण्यै नमः। ॐ-ऐं-अपराजितायै नमः। ॐ-
ऐंरुद्राण्यै नमः। ॐ-ऐंभैरव्यै नमः। ॐ-ऐंमहालक्ष्म्यै
नमः। ॐ-ऐंपीठनायिकायै नमः। ॐ-ऐंक्षेत्रज्ञायै नमः। ॐ-
ऐंचर्च्चिकायै नमः॥ १६॥ ततो मूलेन पुष्पाञ्जलित्रयन्दत्त्वा,
प्रदक्षिणीकृत्य प्रणमेत्॥ तत्र मन्त्रो यथा॥

ॐजगत्पूज्ये जगद्वन्द्ये सर्वशक्तिस्वरूपिणि॥
पूजां गृहाण कौमारि जगन्मातर्नमोस्तु ते॥ १॥

त्रिपुरां त्रिगुणां धात्रीं ज्ञानमार्गस्वरूपिणीम्॥
त्रैलोक्यवन्दितां देवीं त्रिमूर्तिं पूजयाम्यहम्॥ २॥

कालात्मिकां कालभीतां कारुण्यहृदयां शिवाम्॥
कारुण्यजननीन्नित्यां कल्याणीं पूजयाम्यहम्॥ ३॥

अणिमादिगुणोपेतामकारादिस्वरात्मिकाम्॥
शक्तिभेदात्मिकाँलक्ष्मीं रोहिणीम्पूजयाम्यहम्॥ ४॥

कलाधारां कलारूपां कालचण्डस्वरूपिणीम्।
कामदां करुणाधारां कामिनीम्पूजयाम्यहम्॥ ५॥

चण्डधारां चण्डमायां चण्डमुण्डविनाशिनीम्॥
प्रणमामि च देवेशीं चण्डिकाम्पूजयाम्यहम्॥ ६॥

सुखानन्दकरीं शान्तां सर्वदेवनमस्कृताम्॥
सर्वभूतात्मिकां देवीं शङ्करीं पूजयाम्यहम्॥ ७॥

दुर्गमे दुस्तरे चैव दुःखत्रयविनाशिनीम्॥

पूजयामि सदा भक्त्या दुर्गां दुर्गे नमाम्यहम्॥ ८॥

p. 69) सुन्दरीं स्वर्णवर्णाभां सुखसौभाग्यदायिनीम्॥
सुभद्रजननीं देवीं सुभद्रां प्रणमाम्यहम्॥ ९॥

ततः कर्प्पूरादिवर्त्तिकारचितारार्तिकं दत्त्वा, दक्षिणां च दत्त्वा,
प्रणम्य, विसर्ज्जयेत्॥ कौमारी, त्रिपुरा, कल्याणी, रोहिणी, कामिनी,
चण्डिका, शङ्करी, दुर्गा, सुभद्रा, इतिकुमारीनामानि॥
ततश्छागादिबलिं दद्यात् तद्यथा छागं सिन्दूराद्यैरलङ्कृत्य
अर्घ्योदकेन दुर्गेदुर्गेरक्षिणीस्वाहा इति त्रिः प्रोक्ष्य स्नापयेदनेन

ओंवाराही यमुना गङ्गा करतोया सरस्वती।
कावेरी चन्द्रभागा च सिन्धुभैरवसागराः॥

अजस्नाने महेशानि सान्निध्यमिह कल्पय।
पशुपाशविनाशाय हेमकूटस्थिताय च।
परायपरमेष्ठिने हूङ्काराय च मूर्त्तये॥

ततो गन्धोदकेन त्रिःप्रोक्ष्य कृताञ्जलिः पठेत्॥

ॐ छाग त्वं बलिरूपेण महाभाग्यादुपस्थितः।

प्रणमामि सदा भक्त्या रूपिणं बलिरूपिणम्॥

चण्डिकाप्रीतिकामस्य दातुरापद्विनाशिने।

चण्डिकाबलिरूपाय बले तुभ्यं नमोनमः॥

यज्ञार्थे पशवः सृष्टाः स्वयमेव स्वयम्भुवा।

अतस्त्वां घातयिष्यामि तस्माद्यज्ञे वधोऽवधः॥

ततः पाश्वपूजा

ॐजयन्त्यैनमः ३। ॐमङ्गलायैनमः ३। ॐकाल्यैनमः ३।

ॐभद्रकाल्यैनमः ३। ॐमानस्तोकायैनमः ३। ॐविजयायैनमः ३। ॐ-

अपराजितायैनमः ३। मध्ये ॐ-अनन्तायैनमः। ततः प्रत्यङ्गं

पूजयेत्॥ शिरसि रुधिरवदनायैनमः। कपोले चण्डिकायैनमः।

चक्षुषोः चन्द्रार्काभ्यान्नमः। कर्णयोः बृहस्पतयेनमः।

नासायाम् सरस्वत्यैनमः। जिह्वायाम् उग्रदन्तिकायैनमः।

ग्रीवायां महादन्तिकायैनमः। उदरे पृथिव्यैनमः।

जङ्घाचतुष्टये धर्मायनमः। ततो जलङ्गृहीत्वा हस्ते

ओंह्रींश्रींवरुणमण्डलाधिष्ठितविग्रहायै पशुरूपचण्डिकायै

इमम्पशुम्प्रोक्षामि स्वाहा इति पशुप्रोक्षणम्।

ततस्तिलकुशजलान्यादाय ॐ-

अद्यामुकमास्यमुकपक्षेऽमुकतिथावमुकगोत्रः

p. 70) श्री-अमुकशर्मा

छागसमसङ्ख्यकदशवर्षावच्छिन्नश्रीमद्दक्षिणकालिकाप्रीतिकाम्

ओऽहमेताञ्छागान्वह्निदैवतान् भगवत्यै श्रीदक्षिणकालिकायै

तुभ्यं घातयिष्ये

ततो गन्धादिभिः खड्गमर्च्चयेत्॥

ॐकृष्णाम्पिनाकपाणिञ्च कालरात्रिस्वरूपिणम्।

उग्रं रक्तास्यनयनं रक्तमाल्यानुलेपनम्॥

रक्ताम्बरधरञ्चैव पाशहस्तङ्कुटुम्बिनम्।

पिबमानञ्च रुधिरम्भुञ्जानङ्कव्यसंहतिम्॥

ॐकालिकालिवज्रेश्वरीलौहदण्डाय नमः इति त्रिः सम्पूज्य

सिन्दूरादिना ह्रींकारँव्विलिख्य खड्गायनमः इति सम्पूज्य

बलिकर्णे बलिगायत्रीं श्रावयेत्। ह्रींबलिरूपाय विद्महे

देवीप्रियायधीमहि। तन्नः पशुः प्रचोदयात्॥ ततः खड्गम्प्रार्थयेत्

ॐ-असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः।

श्रीगर्ब्भो विजयश्चैव धर्मपाल नमोस्तु ते॥

इत्यष्टौ तव नामानि स्वयमुक्तानि वेधसा॥

नक्षत्रङ्कृत्तिका ते तु गुरुर्द्देवो महेश्वरः॥

रोहिण्यश्च शरीरन्ते धाता देवो जनार्द्दनः॥

पिता पितामहो देवस्त्वम्माम्पालय सर्वदा॥

नीलजीमूतसङ्काशस्तीक्ष्णदंष्ट्रः कृशोदरः॥

भावशुद्धोऽमर्षणश्च अतितेजास्तथैव च॥

इयँयेन धृता क्षोणी हतश्च महिषासुरः॥

तीक्ष्णधाराय शुद्धाय तस्मै खड्गाय ते नमः॥

चण्डिकारसनाबुद्ध्या एकघाते तु घातयेत्॥

पशुपाशाय विद्महे विप्रकर्णाय धीमहि॥

तन्नश्छागः प्रचोदयात्॥

सकलं रुधिरन्मुण्डञ्च देव्यग्रे कृत्वा समभागेन

संपूर्णम्परमङ्कविर्दीपयेत्। मांससमीपजन्दीपं क्रौंक्रं

नमोनमः अनेन मुण्डे मुण्डे दीपन्दद्यात्ततस्तर्प्पयेदेभिः। पूर्वे

चामुण्डान्तर्पयामिनमः। दक्षिणे योगिनीन्तर्पयामिनमः।

पश्चिमे डाकिनीन्तर्पयामिनमः उत्तरे भैरवीन्तर्पयामिनमः।
आग्नेय्याम् विदारिकान्तर्पयामिनमः। नैर्ऋते
पापराक्षसीन्तर्पयामिनमः। वायव्ये पूतनान्तर्पयामिनमः।
ईशाने कालिकान्तर्पयामिनमः।

p.71) ॐअद्य दशवर्षाविच्छिन्नश्रीदक्षिणकालिकाप्रीतिकाम
इमञ्छागरुधिरं समुण्डँव्विष्णुदैवतम्भगवत्यै
श्रीदक्षिणकाल्यै तुभ्यमहं सम्प्रददे इति छागदानविधिः॥

तत आरार्त्तिकम्॥ तद्यथा कस्मिँहि्चत्स्वर्णादिभाजने
गोधूमचूर्णपिष्टे कर्पूरमिश्रिता एकादश श्वेतवर्त्तिकाः प्रज्वाल्य
धूपदानविध्युक्तप्रकारेण प्रोक्षणादिकङ्कृत्वा आरार्त्तिकन्दद्यात्॥
आरार्त्तिकभाजनं फट् इति सम्प्रोक्ष्य नमः इत्यभ्यर्च्च्य यम्
इतिवायुबीजेन द्वादशवारजप्तेन संशोष्य वामहस्ततले
दक्षहस्तपृष्ठन्निवेश्य रम् इतिबीजेन संदह्य, वामहस्तपृष्ठे
दक्षहस्ततलन्निवेश्य वम् इतिषोडशवारजप्तेन
धेनुमुद्रयाऽमृतीकृत्य, मूलेनाष्टशोऽभिमन्त्र्य,
जयध्वनिमन्त्रमातः स्वाहा इतिघण्टां सम्पूज्य वामतर्ज्जन्या
संस्पृश्य मूलम्पठन् ॐकर्पूरवर्त्तिसँउक्तँवह्निना योजितञ्च यत्॥
आरार्त्तिकमिदन्दिव्यङ्गृहाण जगदीश्वरि॥ मूलञ्च पठन्

इदमारार्त्तिकं साङ्गायै सायुधायै सबलवाहनायै सपरिवारायै
सावरणायै श्रीदक्षिणकालिकाम्पूजयामि नमः इति पठञ्जलन्दत्वा
नेत्रप्रदेशे दशधा भ्रामयेत्। ततः पुष्पाञ्जलित्रयेण
सायुधसवाहनसपरिवारमहाकालसहितश्रीदक्षिणकालिकाम्पूजया
मिनमः इति त्रि सम्पूज्य त्रिस्तप्पयेत्॥ ततो
योनिमुद्रादिकम्पूर्ववद्दर्शयेत्॥ ततश्छत्रचामरे दर्शयित्वा
पुष्पाञ्जलिङ्गृहीत्वा श्लोकचतुष्टयम्पठेत्॥ श्लोका यथा -

बुद्धिश्शरासने क्लृप्ता दर्पणम्मङ्गलानि च।
मनोवृत्तिर्विचित्रा ते नृत्यरूपेण कल्पिता॥ १॥

ध्वनयोगीति रूपेण शब्दवाद्यप्रभेदतः।
छत्राणि तव पद्मानि कल्पितानि मया प्रभो॥ २॥

सुषुम्नाध्वजरूपेण प्राणाद्यावाशरात्मना।
अहङ्कारो गजत्वेन वेगः क्लृप्तोरथात्मना॥ ३॥

इंद्रियाण्यश्वरूपाणि शब्दादीन्थवर्त्मना।
मनः प्रग्रहरूपेण बुद्धिस्सारथिरूपतः॥

सर्वमन्यत्तवाङ्कृत्तन्तवोपकरणात्मना॥ ४॥

p. 72) इति पुष्पाञ्जलिन्दद्यात्प्रार्थयेत्॥ इति
श्रीमद्दक्षिणकाल्यास्सपर्याविधिस्सम्पूर्णः॥

ततो नित्यहोमङ्कुर्यात्॥ तद्यथा स्थण्डिले कुण्डे वा मूलेन
वीक्ष्य, अस्त्रेण प्रोक्षणताडने कृत्वा, कुशैराच्छाद्य,
व्याहृतित्रयमुच्चार्य, वह्निमानीय, तिस्रो रेखाः सँलिख्य, अस्त्रमन्त्रेण
नैर्ऋत्ये क्रव्यादांशम्परित्यज्य मूलेनाभिमन्त्र्य, वम्
इतिधेनुमुद्रयाऽमृतीकृत्यास्त्रेण संरक्ष्य हूम् इत्यवगुण्ठ्य परितो
भ्रामयन् त्रिःप्रणवम्पठन्
शय्यागतामृतुस्नातान्नीलेन्दीवरधारिणीन्देवेन भुज्यमानाँ
वागीश्वरीङ्कुण्डे ध्यात्वा तद्योनिमण्डले ईशरेतो धिया वह्निं
हूं वह्निचैतन्यायनमः इतिपठन्मूलञ्च पठन्स्थापयेत्॥ ततो
वह्निम्पुष्पाक्षतादिना सम्पूज्य तत्र इष्टदेवतामावाह्य, सम्पूज्य,
घृतादिभिर्व्यस्तसमस्ताभिर्महाव्याहृतिभिराहुतिचतुष्टयन्दत्त्वा,
स्वकल्पोक्तकरवीरपुष्पैर्घृतादिना वा पञ्चविंशतिसङ्ख्या
स्वाहान्तम्मूलमंत्रमुच्चार्य तदन्ते चतुर्थ्यन्तन्देवताभिधानं
स्वाहान्तमुच्चार्य जुहुयात्॥ पुनर्व्याहृतिभिर्हुत्वा मूर्त्तौ देवीन्नियोज्य
संहारमुद्रया वह्निँव्विसृज्य, देव्यै आचमनादिकन्दद्यात्॥

चामरादिकं सम्प्रदर्श्य स्तुत्वा, यानि कानि च इत्यादिना त्रिः
प्रदक्षिणङ्कुर्यात्॥ ततो दण्डवत्प्रणिपत्य,
आचमनादिकम्पुष्पाञ्जलिञ्च विधाय ततो ब्रह्मार्पणाख्येन मनुना
आत्मानमर्पयेत्॥ तद्यथा अर्पणमन्त्रस्तु ॐइतः
पूर्वपापबुद्धिन्देवधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु
मनसा वाचा हस्ताभ्याम्पद्भ्यामुदरेण शिश्ना यत्स्मृतँय्यदुक्तँ
यत्कृतन्तत्सर्वम्ब्रह्मार्पणम्भवतु स्वाहा माम्मदीयञ्च
सकलन्देव्यै ते समर्पये ॐतत्सत्। ततः प्राणायामादिकँव्विधाय
पुष्पाक्षतादिभिस्सम्पूज्य, क्षमापयेत्॥ क्षमापनमन्त्रो यथा -

अज्ञानाद्विस्मृतेर्भीत्यायन्न्यूनमधिकङ्कृतम्॥
विपरीतञ्च तत्सर्वङ्क्षमस्व परमेश्वरि॥ १॥

p. 73) मन्त्रहीनङ्क्रियाहीनँव्विधिहीनं सुरेश्वरि॥
सम्पूजिता मया देवि तस्मात्त्वँव्वरदा भव॥ २॥

आवाहनञ्च पूजाञ्च त्वन्माहात्म्यञ्जपन्तथा।
विसर्ज्जनन्न जनामि कालिके त्वङ्क्षमस्व मे॥ ३॥

यदक्षरपदभ्रष्टं स्वरव्यञ्जनवर्जितम्।

तत्सर्वङ्क्षम्यतान्देवि प्रसीद परमेश्वरि॥ ४॥

यस्याः स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु।
न्यूनं सम्पूर्णताँयाति प्रसीद परमेश्वरि॥ ५॥

कामेश्वरि जगन्मातः सच्चिदानन्दविग्रहे॥
गृहाणार्च्चामिमां सर्वाम्प्रसीद परमेश्वरि॥ ६॥

इत्येतैः पुष्पाञ्जलिना क्षमापयेत्॥ ततो योनिमुद्राम्बद्ध्वा प्रणम्य

ॐगच्छ गच्छ परं स्थानं स्वस्थानम्परमेश्वरि।
पूजाराधनकाले च पुनरागमनाय च॥ इति,

मूलमन्त्रम्पठन्संहारमुद्रया देवींविसृज्य स्वहृदये स्थापयेत्॥
तत ऐशान्यान्दिशि ह्रींचण्डेश्वर्यैनमः इति चण्डेश्वरीं
सम्पूज्य चण्डेश्वरि महादेवि निर्माल्यैश्चन्दनादिभिः।
लेह्यचोष्यान्नपानादिनिर्माल्यस्त्रग्विलेपनैः।
निर्माल्यभोजनन्तुभ्यन्ददामि श्रीशिवाज्ञया॥ इति मन्त्रेण
निर्माल्यन्दद्यात्। ततस्तत्रैवोच्छिष्टचाण्डालिनीं सम्पूज्य
तदुच्छिष्टनैवेद्यासवमुच्छिष्टचाण्डाल्यै दद्यात्॥ ततो

ब्राह्मणान्कुमारीश्च सम्भोज्य स्वयम्प्रसादम्भुञ्जीत॥

पुरश्चरणे त्वयँव्विशेषः। लक्षसंख्याकजपः तद्दशांशः

पूर्वोक्तद्रव्यैः पुरश्चरणपद्धत्युक्तक्रमेण पूर्वोक्तविधिना

होमः कर्त्तव्यः॥ तद्दशांशतः

कर्पूरमिश्रिततोयैस्तीर्थतोयैर्न्मधुना वा मूलमन्त्रमुच्चार्य

दक्षिणकालीन्तर्पयामि स्वाहा एतदुच्चार्य किञ्चित्पात्रे देवतां

सम्पूज्य तर्पयेत्। पुनः प्राणायामादि विधाय विसर्ज्जयेत्।

तद्दशांशतो मार्जयेत्॥ तद्यथा आत्मानन्देवताबुद्ध्या ध्यात्वा

सम्पूज्य मूलविद्यां समुच्चार्य तदन्ते

देवताभिधान्द्वितीयान्तामुच्चार्य तदन्ते अभिषिञ्चामि नमः

इत्यात्मानमभिषेचयेत्॥ तद्दशांशब्राह्मणभोजनम्। तदन्ते

महतीम्पूजाञ्च कुर्यात्॥

p. 74) अथ संक्षिप्तपूजाविधिः

तत्र स्ववामे चतुरस्रँल्लिखित्वा तत्र ॐहःसामान्यार्घ्यंस्थापयामि

इतिपुष्पाक्षतान्प्रक्षिप्य तत्र ॐ आधारशक्तिभ्यो नमः इति सम्पूज्य

तत्रार्घपात्रं संस्थाप्य नमः इति जलेनापूर्य तस्मिञ्जले

सूर्यमण्डलादङ्कुशमुद्रया तीर्थान्यावाहयेत्। तत्र मन्त्रः

ॐगङ्गे च यमुने चैव गोदावरि सरस्वति।
नर्मदे सिन्धु कावेरि जलेस्मिन्सन्निधिङ्कुरु॥

ॐब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे।
तेन सत्येन मे देव तीर्थन्देहि दिवाकर

इति तीर्थान्यावाह्य ॐगङ्गादिसकलतीर्थेभ्यो नमः
इतिपुष्पाक्षतादिभिस्सम्पूज्य ॐ अर्कमण्डलाय द्वादशकलात्मने
नमः ॐवह्निमण्डलायदशकलात्मने नमः ॐ
सोममण्डलायषोडशकलात्मने नमः
इत्यर्कवह्निसोममण्डलत्रयं सम्पूज्य ॐ षडङ्गेभ्यो नमः
इतिषडङ्गानि सम्पूज्य अस्त्रे संरक्ष्य कवचेनावगुण्ठ्य वम्
इतिधेनुमुद्रया अमृतीकृत्य मत्स्यमुद्रया आच्छाद्य प्रणवन्दशकृत्वो
जपेत्॥ शङ्खमुद्रां सन्दर्श्य धेनुमुद्रायोनिमुद्रे दर्शयेत्।
इतिसामान्यार्घ्यस्थापनविधिः॥ अथ पूजा॥ यन्त्रँल्लिखित्वा
कुङ्कुमकेशरचन्दनादिभिः
षट्कोणगर्भत्रिकोणत्रयाष्टभूपुरात्मकँल्लिखेत्॥ ततः
ऋष्यादिन्यासङ्कुर्यात् तद्यथा शिरसि भैरवायऋषयेनमः। मुखे
उष्णिक्छन्दसे नमः। हृदये ॐदक्षिणकालिकायै नमः। गुह्ये
क्रींबीजाय नमः। पादयोः हूंशक्तये नमः। सर्वाङ्गे

क्रींकीलकायनमः। अथ षडङ्गन्यासः॥ क्रांहृदयाय नमः

इत्यङ्गुलीभिस्तर्ज्जनीमध्यमानामाभिः प्रसारिताभिर्हृदयं स्पृशेत्।

क्रींशिरसेस्वाहा इतितर्जनीमध्यमाभ्यां शिरः स्पृशेत्।

क्रूंशिखायैवषट्। इतिबद्धमुष्टिनाङ्गुष्ठेन शिखां स्पृशेत्।

क्रैंकवचायहूम् इति मन्त्रेण व्यस्तहस्ताभ्यां सर्वाङ्गे।

क्रोंनेत्रत्रयायवौषट्॥ इतितर्ज्जन्या अनामया नेत्रे मध्यमया

भ्रूमध्यम् एवन्नेत्रत्रयं स्पृशेत्।

p. 75) क्रःअस्त्रायफट्। इतिछोटिकया दिग्वन्धनङ्कुर्यात्।

एवङ्करन्यासः क्रांअङ्गुष्ठाभ्याँअमः।

क्रींतर्ज्जनीभ्यांस्वाहा। क्रूंमध्यमाभ्यांवषट्। क्रैं-

अनामिकाभ्यांहूम्। क्रौंकनिष्ठाभ्यांवौषट्।

क्रःकरतलकरपृष्ठाभ्यांफट् एवन्यासँव्विधाय दशधा

सप्तधा पञ्चधा व्यापकन्यासङ्कुर्यात्॥

ततश्चतुःषोडशाष्टवारजप्तेन मूलमन्त्रेण

पूरककुम्भकरेचकाख्यम्प्राणायामत्रयङ्कुर्यात्॥ ततो

दक्षिणकालीन्ध्यायेत्। तत आवाहयेत्। तद्यथा॥ करकच्छपिकां

सपुष्पाम्बद्धा यथोक्तरूपान्देवीन्ध्यात्वा

हृदयान्नासिकोपरिसमानीय मूलम्पठित्वा एह्येहि महादेवि

पादुकाभ्यान्दयानिधे इत्यञ्जलिस्थपुष्पोपरि समानीय ॐदेवेशि

भक्तिसुलभे परिवारसमन्विते। यावत्त्वाम्पूजयिष्यामि तावत्त्वं
सुस्थिरा भव इतियन्त्रोपरि क्षिपेत्॥ ततो मूलमुच्चार्य साङ्गे सायुधे
सवाहने सावरणे सपरिवारे दक्षिणकालिके इहागच्छ
इत्यावाहनमुद्रयाऽऽवाहयेत्। इहतिष्ठ इतिस्थापनमुद्रया स्थापयेत्
। इहसन्निधेहि इतिसन्निधीकरणमुद्रया सन्निधीकरणम्
इहसन्निरुध्यस्व इतिसन्निरोधनमुद्रया सन्निरोधनम्।
इहसन्मुखीभव इतिसन्मुखीकरणमुद्रया सम्मुखीकरणम्। अस्त्रेण
संरक्ष्य, हूम् इत्यवगुण्ठ्य वम् इतिधेनुमुद्रयाऽमृतीकृत्य
देवताङ्गे षडङ्गान्विन्यस्य मूलमन्त्रेण सकलीकृत्य
आँरींक्रोंस्वाहा इति द्वादशवारञ्जपँल्लेलिहानमुद्रया
देवतायाः प्राणप्रतिष्ठाङ्कुर्यात्॥ तद्यथा,
आँरींक्रोंश्रींदक्षिणकालिकाया
वाङ्मनस्त्वक्क्षुश्श्रोत्रघ्राणप्राणा इहागत्य सुखञ्चिरन्तिष्ठन्तु
स्वाहा इति हस्तन्दत्त्वा पठेत्॥ तत्र धेनुमुद्राम्प्रदर्शयेत्॥ ततो
मूलमन्त्रम्पठन् एष पुष्पाञ्जलिस्साङ्गसायुधसवाहनसावरणस
रिवारदक्षिणकालिकादेवतायैनमः इतिपुष्पाञ्जलिपञ्चकन्दद्यात्॥
एवं सर्वत्र मूलमन्त्रपाठस्साङ्ग इत्यादियोजना च बोध्या॥
इदम्पाद्यमिदमाचमनीयम्

p. 76) एषोऽर्घ्यः एष मधुपर्कः इदम्पुनराचमनीयम् इदं

स्नानीयन्दक्षिणकालिकादेवतायैनमः॥ इदं रक्तचन्दनानुलेपनम्
एते अक्षता इमानि पुष्पाणि अमुकदेवतायैवौषट् एष धूपः एष
दीपः एतानि नैवेद्यानि कालिकादेवतायैनमः॥ इति सङ्क्षेपतः पूजाँ
व्विधाय ततो जपमालामानीय, क्वचित्पात्रे वामहस्ते वा स्थापयित्वा,
मूलमन्त्रेणाग्घोंदकेनाभ्युक्ष्य

ॐ माले माले महामाये सर्वशक्तिस्वरूपिणि।
चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव।

ॐ ह्रींसिद्ध्यैनमः इत्यनेन मालान्दक्षिणकरे निधाय हृत्प्रदेशे
समानीय मध्यमामध्यभागेन गुटिकाम्प्रत्येकं स्पृशन्
मेरुमलङ्घयन् शरीरे कामकलाँव्विभाव्य शिरसि गुरुन्ध्यात्वा हृदि
देवीम्भावयन् जिह्वायाम्मन्त्रन्दीपरूपिणाँव्विभाव्य तत्प्रभापटले
जिह्वामपि दीपरूपिणींव्विभाव्य मनसा उपांशुना वा करमालया
वर्णमालया वा
संस्कृतमहाशङ्खरुद्राक्षस्फटिकाद्यन्यतममालया वा
मूलमन्त्रमष्टोत्तरशतँव्वा अद्रुतमविलम्बितम्प्रजप्य मालां
शिरसि

ॐत्वम्माले सर्वभूतानां सर्वलोकप्रिया मता।

शिवङ्कुरुष्व मे भद्रे यशोवीर्यञ्च सर्वदा इतिपठन्निधाय
ह्रींसिद्ध्यैनमः इति संपूज्य पुनः पूर्ववत्
प्राणायामन्यासादिकञ्च विधाय देवताम्पुष्पाक्षतादिभिः
सम्पूज्य पुष्पचन्दनाक्षतयुतशङ्खोदकेन

ॐगुह्यातिगुह्यगोप्त्री त्वङ्गृहाणास्मत्कृतञ्जपम्॥
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि।

इतिमन्त्रेण देव्या वामकरे तेजोमयञ्जलं ध्यात्वा, समर्पयेत्। ततो
मालां शिरस उत्तार्य

ॐ त्वम्माले सर्वदेवानां सर्वसिद्धिप्रदा मता।
तेन सत्येन मे सिद्धिन्देहि देवि नमोऽस्तु ते।

इत्यमुम्मन्त्रम्पठन्सम्पूज्य यत्नतो गोपयेत्। कराद्भष्टे
तच्छान्त्यर्थमष्टोत्तरशतमूलञ्जपेत् ततो देव्यै
पुष्पाञ्जल्यष्टकन्दत्त्वा स्तोत्रकवचादिकम्पठेत्॥

p. 77) अथ कर्पूरस्तोत्रम्

कर्पूरम्मध्यमान्त्यस्वरपररहितं सेन्दुवामाक्षियुक्तम्बीजन्ते
मातरेतत्त्रिपुरहरवधु त्रिष्कृतँय्ये जपन्ति॥
तेषाङ्गद्यानि पद्यानि च मुखकुहरादुल्लसन्तोव वाचः
स्वच्छन्दध्वान्तधाराधररुचिरुचिरे सर्वसिद्धिङ्गतानाम्॥ १॥

ईशानस्सेन्दुवामश्रवणपरिगतम्बीजमन्यन्महेशि द्वन्द्वन्ते
मन्दचेता यदि जपति जनो वारमेकङ्कदाचित्।
जित्वा वाचामधीशन्धनदमषि
चिरम्मोहयत्यम्बुजाक्षीवृन्दञ्चन्द्रार्द्धचूडे प्रभवति स
महाघोररावावतंसे॥ २॥

ईशो वैश्वानरस्थश्शशाधरविलसद्वामनेत्रेण युक्तम्बीजन्ते
द्वन्द्वमन्यद्विगलितचिकुरे कालिके ये जपन्ति॥
द्वेष्टारन्ते निहन्ति त्रिभुवनमसिते वश्यभावन्नयंति
सृक्कद्वन्द्वास्त्रधाराद्वयधरवदने दक्षिणे कालिकेति॥ ३॥

ऊर्ध्वं व्वामे कृपाणङ्करतलकमले छिन्नमुण्डन्तथाधः सव्ये
भीतिँव्वरञ्च त्रिजगदघहरे दक्षिणे कालिके च॥
जप्त्वैदतन्नामवर्णन्तव
मनुविभवम्भावयन्तस्तदर्थन्तेषामष्टौ करस्थाः प्रकटितवदने

सिद्धयस्त्र्यम्बकस्य॥ ४॥

वर्गाद्यँव्वह्निसंस्थँव्विधुरति ललितन्तत्त्रयङ्कूर्चयुग्मँ
ल्लज्जाद्वन्द्वञ्च पश्चात्स्मितमुखि तदधष्ठद्वयँय्योजयित्वा॥
मातर्यें ये जपन्ति स्मरहरमहिले भावयन्ते स्वरूपन्ते
लक्ष्मीलास्यलीलाकमलदृशः कामरूपा भवन्ति॥ ५॥

प्रत्येकँव्वा द्वयँव्वा त्रयमपि च परम्बीजमत्यन्तगुह्यन्त्वन्नाम्ना
योजयित्वा सकलमपि सदा भाववन्तो जपन्ति॥
तेषान्नेत्रारविन्दे विहरति कमला वक्त्रशुभ्रांशुबिम्बे वाग्देवी
दिव्यमुण्डस्त्रगतिशयलसत्कण्ठपीनस्तनाढ्ये॥ ६॥

गतासूनाम्बाहुप्रकरकृतकाञ्चीपरिलसन्नितम्बान्दिग्वस्त्रान्त्रिभुवन
विधात्रीन्त्रिनयनाम्॥
श्मशानस्थे तल्पे शवहृदि
महाकालसुरतप्रसक्तान्त्वान्ध्यायञ्जननि जडचेता अपि कविः॥ ७॥

p. 78) शिवाभिर्घोराभिश्शवनिवहमुण्डास्थिनिकरैः परं
सङ्कीर्णायाम्प्रकटितचितायां हरवधूम्॥
प्रविष्टां सन्तुष्टामुपरि सुरते नातियुवतीं सदा त्वान्ध्यायन्ति

क्वचिदपि न तेषाम्परिभवः॥ ८॥

वदामस्ते किँवा जननि वयमुच्चैर्ज्जडधियो न धाता नापीशो हरिरपि
न ते वेत्ति परमम्॥
तथापि त्वद्भक्तिर्मुखरयति चास्माकमसिते तदेतत्क्षन्तव्यो न खलू
पशुरोषस्समुचितः॥ ९॥

समन्तादापीनस्तनजघनधृग्यौवनवतीरतासक्तो नक्तँय्यदि जपति
भक्तस्तव मनुम्।
बिवासास्त्वान्ध्यायन्गलितचिकुरस्तस्य वशगाः समस्ताः सिद्धौघा
भुवि चिरतरञ्जीवति कविः॥ १०॥

समस्स्वस्थीभूतो जपति विपरीतो सदा विचिन्त्य
त्वान्ध्यायन्नतिशयमहाकालसुरताम्॥
तदा तस्य क्षोणीतलविहरमाणस्य विदुषः कराम्भोजे वश्याः
स्मरहरवधू सिद्धिनिवहाः॥ ११॥

प्रसूते संसारञ्जननि जगतीम्पालयति वा समस्तङ्क्षित्यादि
प्रलयसमये संहरति च॥
अतस्त्वां धातापि त्रिभुवनपतिः श्रीषतिरपि महेशोपि प्रायः सकलमपि

किं स्तौमि भवतीम्॥ १२॥

अनेके सेवन्ते भवदधिकगीर्वाणनिवहा विमूढास्ते मातः किमपि नहि
जानन्ति परमम्॥
समाराध्यामाद्यां हरिहरविरञ्च्यादिविबुधैः प्रपन्नोस्मि स्वैरं
रतिरसमहानन्दनिरताम्॥ १३॥

धरित्री कीलालं शुचिरपि समीरोपि गगनन्त्वमेका कल्याणी गिरिशरमणी
कालि सकलम्॥
स्तुतिः का ते मातर्निजकरुणया मामगतिकम्प्रसन्ना त्वम्भूया
भवमनु न भूयान्मम जनुः॥ १४॥

श्मशानस्थस्स्वस्थो गलितचिकुरो दिक्पटधरस्सहस्रं
त्वर्क्काणान्निजगलितवीर्येण कुसुमम्॥
जपँत्वत्प्रत्येकम्मनुमपि तव ध्याननिरतो महाकालि स्वैरं स भवति
धरित्रीपरिवृढः॥ १५॥

गृहे सम्मार्ज्जन्या परिगलितवीर्यं हि कुसुमं समूलम्मध्याह्ने
वितरति चितायाङ्कुजदिने॥
समुच्चार्य प्रेम्णा मनुमपि सकृत्कालि सततङ्गजारूढो याति

क्षितिपरिवृढः सत्कविवरः॥ १६॥

p. 79) स्वपुष्पैराकीर्णङ्कुसुमधनुषो मंदिरमहो पुरो
ध्यायन्ध्यायञ्जपति यदि भक्तस्तव मनुम्॥
स गन्धर्वश्रेणीपतिरपि कवित्वामृतनदीनदीनः पर्यन्ते
परमपदलीनः प्रभवति॥ १७॥

त्रिपञ्चारे पीठे शवशिवहृदि
स्मेरवदनाम्महाकालेनोच्चैर्मदनरसलावण्यनिरताम्॥
समासक्तो नक्तं स्वयमपि रतानन्दनिरतो जनो यो ध्यायेत्त्वामपि जननि
स स्यात्स्मरहरः॥ १८॥

सलोमास्थि स्वैरम्पललमपि मार्जारमसिते॥
परञ्चोष्ट्रम्मेषन्नरमहिषयोश्छागमपि वा॥
बलिन्ते पूजायामपि वितरताम्मर्त्त्यवसतां सतां सिद्धिः सर्वा
प्रतिपदमपूर्वा प्रभवति॥ १९॥

वशी लक्षम्मन्त्रम्प्रजपति हविष्याशनरतो दिवा
मातर्युष्मच्चरणयुगलध्याननिरतः॥
परन्नक्तन्नग्नो निधुवनविनोदेन च मनुञ्जनो लक्षं

सम्यक्स्मरहरसमानः क्षितितले॥ २०॥

इदं स्तोत्रं मातस्तव
मनुसमुद्धारणजपस्वरूपाख्यम्पादाम्बुजयुगलपूजाविधियुतम्॥
निशार्द्धे वा पूजासमयमथवा यस्तु पठति प्रलापस्तस्यापि प्रसरति
कवित्वामृतरसः॥ २१॥

कुरङ्गाक्षीवृन्दं तमनुसरति प्रेमतरलँव्वशास्तस्य क्षोणीपतिरपि
कुबेरप्रतिनिधिः॥
रिपुः कारागारं कलयति च तत्केलिकलया चिरञ्जीवन्मुक्तस्स भवति
सुभक्तः प्रतिजनुः॥ २२॥

इति श्रीमहाकालप्रणीतङ्कर्पूरस्तोत्रं सम्पूर्णम्॥

अथ स्तोत्रम्

प्राग्देहस्थो यदाहं तव चरणयुगन्नाश्रितो नार्च्चितोहं
तेनाद्याकीर्तिवर्गैर्ज्जठरजदहनैर्बाध्यमानो बलिष्ठैः॥
क्षिप्त्वा जन्मान्तरान्नः पुनरिह भविता क्काश्रयः क्कापि सेवा

क्षन्तव्यो मेपराधः प्रकटितवदने कामरूपे कराले॥ १॥

बाल्ये बालाभिलापैर्जडितजडमतिर्बालली‌ला प्रसक्तो
न त्वां जानामि मातः कलिकलूषहराम्भोगमोक्षप्रदात्रीम्॥
नाचारो नैव पूजा न च यजनकथा न स्मृतिर्नैव सेवा
क्षन्तव्यो ०॥ २॥

p. 80) प्राप्तोहं यौवनञ्चेद्विषधरसदृशैरिन्द्रियैर्दष्टगात्रो
नष्टप्रज्ञः परस्त्रीपरधनहरणे सर्वदा साभिलाषः॥
त्वत्पादाम्भोजयुग्मङ्क्षणमपि मनसा न स्मृतोहङ्कदापि
क्षन्तव्यो ०॥ ३॥

प्रौढो भिक्षाभिलाषी सुतदुहितृकलत्रार्थमन्नादिचेष्टः
क्व प्राप्स्ये कुत्र यामीत्यनुदिनमनिशञ्चिन्तया मग्नदेहः॥
नो ते ध्यानन्न चास्था न च भजनविधिर्न्नामसङ्कीर्त्तनँव्वा
क्षन्तव्यो ०॥ ४॥

वृद्धत्वे बुद्धिहीनः कृशविवशतनुश्श्वासकासातिसारैः
कर्मानर्होऽक्षिहीनः प्रगलितदशनः क्षुत्पिपासाभिभूतः॥
पश्चात्तापेन दग्धो मरणमनुदिनन्ध्येयमात्रन्न चान्यत्क्षन्तव्यो ०

॥ ५॥

कृत्वा स्नानं दिनादौ क्वचिदपि सलिलं नो कृतं नैव पुष्पन्ते
नैवेद्यादिकञ्च क्वचिदपि न कृतं नापि भावो न भक्तिः॥
न न्यासो नैव पूजा न च गुणकथनं नापि चार्च्चा कृता ते
क्षन्तव्यो ०॥ ६॥

जानामि त्वां न चाहं भवभयहरणी
सर्वसिद्धिप्रदात्रीन्नित्यानन्दोदयाढ्यान्त्रितयगुणमयीन्नित्यशुद्धोद
याढ्याम्॥
मिथ्याकर्माभिलाषैरनुदिनमभितः पीडितो दुःखसङ्घैः
क्षन्तव्यो ०॥ ७॥

कालाभ्रां श्यामलाङ्गींव्विगलितचिकुराङ्घ्रङ्गमुण्डाभिरामान्
त्रासत्राणेष्टदात्रीङ्कुणपगणशिरोमालिनीन्दीर्घनेत्राम्॥
संसारस्यैकसाराम्भवजननहराम्भावितो भावनाभिः
क्षन्तव्यो ०॥ ८॥

ब्रह्मा विष्णुस्तथेशः परिणमति सदा
त्वत्पदाम्भोजयुग्मम्भाग्याभावान्न चाहम्भवजननि

भवत्पादयुग्मम्भजामि॥

नित्यँल्लोभप्रलोभैः कृतवशमतिः कामुकस्त्वाम्प्रयाचे

क्षन्तव्यो ०॥ ९॥

रागद्वेषैः प्रमत्तः कलूषयुततनुः कामनाभोगलूब्धः

कार्याकार्यांविचारी कुलमतिरहितः कौलसङ्घैर्विहीनः॥

क्व ध्यानन्ते क्व चार्च्चा क्व च मनु जपन्नैव किञ्चित्कृतोहङ्क्षन्तव्यो

०॥ १०॥

रोगी दुःखी दरिद्रः परवशकृपणः पांशुलः पापचेता

निद्रालस्यप्रसक्तस्सुजठरभरणे व्याकुलः कल्पितात्मा॥

p. 81) किन्ते पूजाविधानन्त्वयि क्व च नुमतिः क्वानुरागः क्व चास्था

क्षन्तव्यो ०॥ ११॥

मिथ्याव्यामोहरागैः परिवृतमनसः क्लेशसङ्घान्वितस्य

क्षुन्निद्रौघान्वितस्य स्मरणविरहिणः पापकर्मप्रवृत्तेः॥

दारिद्र्यस्य क्व धर्मः क्व च जननि रुचिः क्व स्थितिस्साधुसङ्घैः

क्षन्तव्यो ०॥ १२॥

मातस्तातस्य देहाज्जननि जठरगः संस्थितस्त्वद्वशेहन्त्वं हर्त्रां

कारयित्री करणगुणमयी कर्महेतुस्वरूपा॥

त्वम्बुद्धिश्चित्तसंस्थाप्यहमतिभवती सर्वमेतत्क्षमस्व

क्षन्तव्यो ०॥ १३॥

त्वम्भूमिस्त्वञ्जलञ्च त्वमसि हुतवहस्त्वञ्जगद्वायुरूपा

त्वञ्चाकाशम्मनश्च प्रकृतिरसि महत्पूर्विका पूर्वपूर्वा॥

आत्मा त्वञ्चासि मातः परमसि भवती त्वत्परन्नैव किञ्चित्क्षन्तव्यो ०॥

१४॥

त्वङ्काली त्वञ्च तारा त्वमसि गिरिसुता सुन्दरी भैरवी त्वन्त्वन्दुर्गा

छिन्नमस्ता त्वमसि च भुवना त्वं हि लक्ष्मीः शिवा त्वम्॥

धूमामातङ्गिनी त्वन्त्वमसि च बगला, मङ्गलादिस्तवाख्या

क्षन्तव्यो ०॥ १५॥

स्तोत्रेणानेन देवीम्परिणमति जनो यः सदा भक्तियुक्तो

दुष्कृत्यादुर्गसङ्घम्परितरति शतँव्विघ्नता नाशमेति॥

नाधिर्व्याधिः कदाचिद्भवति यदि पुनस्सर्वदा

सापराधस्सर्वन्तत्कामरूपे त्रिभुवनजननि क्षामयेः पुत्रबुद्ध्या॥

१६॥

ज्ञाता वक्ता कवीशो भवति धनपतिर्दानशीलो दयात्मा
निःपापी निःकलङ्की कुलपतिकुशलस्सत्यवाग्धार्मिकश्च॥
नित्यानन्दो दयाढ्यः पशुगणविमुखस्सत्पथाचारशीलः
संसाराब्धिं सुखेन प्रतरति गिरिजापादयुग्मावलम्बात्॥ १७॥

इति स्तोत्रम्॥

अथ कवचम्

भैरव्युवाच

कालीपूजा श्रुता नाथ भावाश्च विविधाः प्रभो॥
इदानीं श्रोतुमिच्छामि कवचम्पूर्वसूचितम्॥ १॥

त्वमेव स्रष्टा पाता च संहर्ता च त्वमेव हि।
त्वमेव शरणन्नाथ त्राहि मान्दुःखसङ्कटात्॥ २॥

p. 82) भैरव उवाच

रहस्यं शृणु वक्ष्यामि भैरवि प्राणवल्लभे।

श्रीजगन्मङ्गलन्नाम कवचम्मन्त्रविग्रहम्॥ ३॥

पठित्वा धारयित्वा च त्रैलोक्यम्मोहयेत्क्षणात्।
नारायणोऽपि यद्धृत्वा नारी भूत्वा महेश्वरम्॥ ४ ॥

योगिनङ्क्षोभमनयद्यद्धृत्वा च रघूत्तमः।
वरतृप्तो जघानैव रावणादिनिशाचरान् ॥ ५॥

यस्य प्रसादादीशोऽहं त्रैलोक्यविजयी विभुः।
धनाधिपः कुबेरोपि सुरेशोऽभूच्छचीपतिः॥ ६॥

एवं हि सकला देवास्सर्वसिद्धीश्वराः प्रिये।
श्रीजगन्मङ्गलस्यास्य कवचस्य ऋषिः शिवः॥ ७ ॥

छन्दोऽनुष्टुब्देवता च कालिका दक्षिणेरिता।
जगताम्मोहने दुष्टविजये भुक्तिमुक्तिषु॥ ८॥

योषिदाकर्षणे चैव विनियोगः प्रकीर्त्तितः।
शिरो मे कालिका पातु क्रींकारैकाक्षरी परा॥ ९॥

क्रींक्रींक्रीं मे ललाटञ्च कालिका खड्गधारिणी।

हूं हूं पातु नेत्रयुगं ह्रीं ह्रीं पातु श्रुती मम॥ १०॥

दक्षिणे कालिका पातु घ्राणयुग्मम्महेश्वरी।

क्रींक्रींक्रीं रसनाम्पातु हूं हूं पातु कपोलकम्॥ ११ ॥

वदनं सकलम्पातु ह्रींह्रींँस्वाहास्वरूपिणी।

द्वाविंशत्यक्षरी स्कन्धौ महाविद्या सुखप्रदा॥ १२॥

खड्गमुण्डधरा काली सर्वाङ्गमभितोऽवतु।

क्रीहूँरींँ्र्यक्षरी पातु चामुण्डा हृदयम्मम॥ १३॥

ऐंहूँं-ऐं स्तनद्वन्द्वं ह्रींफट्वाहा ककुत्स्थला।

अष्टाक्षरी महाविद्या भुजौ पातु सकर्तृका॥ १४॥

क्रींक्रींहूंहूंह्रींह्रींकारी पातु षडक्षरी मम।

क्रीं नाभिम्मध्यदेशञ्च दक्षिणे कालिकाऽवतु॥ १५॥

क्रींस्वाहा पातु पृष्ठञ्च कालिका सा दशाक्षरी।

क्रीं मे गुह्यं सदा पातु कालिकायै नमस्ततः॥ १६॥

सप्ताक्षरी महाविद्या सर्वतन्त्रेषु गोपिता।

ह्रींह्रीं दक्षिणे कालिके हूंहूं पातु कटिद्वयम्॥ १७॥

काली दशाक्षरी विद्या स्वाहा मामूरुयुग्मकम्।

ॐक्रींक्रीं मे स्वाहा पातु कालिका जानुनी सदा॥ १८॥

कालीहृन्नामविद्येयञ्चतुर्वर्गफलप्रदा।

क्रींह्रींह्रीं पातु सा गुल्फन्दक्षिणे कालिकाऽवतु॥ १९॥

p. 83) क्रींहूंह्रींस्वाहा पदम्पातु चतुर्दशाक्षरी मम।

खड्गमुण्डधरा काली वरदाभयधारिणी॥ २०॥

विद्याभिस्सकलाभिः सा सर्वाङ्गमभितोऽवतु।

काली कपालिनी कुल्ला कुरुकुल्ला विरोधिनी॥ २१॥

विप्रचित्ता तथोग्रोग्रप्रभा दीप्ता घनत्विषा।

नीला घना वलाका च मात्रा मुद्रा मिता च माम्॥ २२॥

एतास्सर्वाः खड्गधरा मुण्डमालाविभूषणाः।

रक्षन्तु दिग्विदिक्षु मां ब्राह्मी नारायणी तथा॥ २३॥

माहेश्वरी च चामुण्डा कौमारी चापराजिता।
वाराही नारसिंही च सर्वाश्चामितभूषणाः॥ २४॥

रक्षन्तु स्वायुधैर्दिक्षु विदिक्षु माँय्यथा तथा।
इति ते कथितन्दिव्यङ्कवचम्परमाद्भुतम्॥ २५॥

श्रीजगन्मङ्गलन्नाम महाविद्यौघविग्रहम्।
त्रैलोक्याकर्षणम्ब्रह्मन्कवचम्मन्मुखोदितम्॥ २६॥

गुरुपूजाँव्विधायाथ विधिवत्प्रपठेत्ततः।
कवचन्त्रिस्सकृद्वापि यावज्जीवञ्च वा पुनः॥ २७॥

एतच्छतार्द्धमावृत्य त्रैलोक्यविजयी भवेत्।
त्रैलोक्यङ्क्षोभयत्येव कवचस्य प्रसादतः॥ २८॥

महाकविर्भवेन्मासं सर्वसिद्धीश्वरो भवेत्।
पुष्पाञ्जलीन्कालिकायै मूलेनैवार्पयेत् सकृत्॥ २९॥

शतवर्षसहस्राणाम्पूजायाः फलमाप्नुयात्।
भूर्जे विलिखितञ्चैतत्स्वर्णस्थन्धारयेद्यदि॥ ३०॥

विशाखायान्दक्षबाहौ कण्ठे वा धारयेद्यदि।
त्रैलोक्यम्मोहयेत्क्रोधात्त्रैलोक्यञ्चूर्णयेत्क्षणात्॥ ३१॥

पुत्रवान्धनवाञ्श्रीमान्नानाविद्यानिधिर्भवेत्।
ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्रस्पर्शनात्ततः॥ ३२॥

नाशमायाति या नारी वन्ध्या वा मृतपुत्रिनी।
बह्वपत्या जीवतोका भवत्येव न संशयः॥ ३३॥

न देयम्परशिष्येभ्यो ह्यभक्तेभ्यो विशेषतः।
शिष्येभ्यो भक्तियुक्तेभ्यो ह्यन्यथा मृत्युमाप्नुयात्॥ ३४॥

स्पर्द्धामुद्धूय कमला वाग्देवी मन्दिरे सुखे।
पौत्रान्तं स्थैर्यमास्थाय निवसत्येव निश्चितम्॥ ३५॥

इदङ्कवचमज्ञात्वा यो भजेद्घोरदक्षिणाम्॥
p. 84) शतलक्षम्प्रजप्त्वापि तस्य विद्या न सिद्ध्यति॥

सहस्रघातमाप्नोति सोऽचिरान्मृत्युमाप्नुयात्॥ ३६॥

इति कवचम् ॥

अथ हृदयम्

श्रीमहाकाल उवाच

महाकौतूहलस्तोत्रं हृदयाख्यम्महोत्तमम्।
शृणु प्रिये महागोप्यन्दक्षिणायाः सुगोपितम्॥ १॥

अवाच्यमपि वक्ष्यामि तव प्रीत्या प्रकाशितम्।
अन्येभ्यः कुरु गोप्यञ्च सत्यं सत्यञ्च शैलजे॥ २॥

श्रीदेव्युवाच

कस्मिन्युगे समुत्पन्नङ्केन स्तोत्रङ्कृतम्पुरा।
तत्सर्वङ्कथ्यतां शम्भो महेश्वर दयानिधे॥ ३॥

श्रीमहाकाल उवाच

पुरा प्रजापतेः शीर्षश्छेदनङ्कृतवानहम्।

ब्रह्महत्याकृतैः पापैर्भैरवत्वम्ममागतम्॥ ४॥

ब्रह्महत्याविनाशाय कृतं स्तोत्रम्मया प्रिये।

कृत्याविनाशकं स्तोत्रम्ब्रह्महत्यापहारकम्॥ ५॥

ॐ अस्य श्रीदक्षिणकाल्या हृदयस्तोत्रमन्त्रस्य

श्रीमहाकालऋषिरुष्णिक्छन्दः॥ श्रीदक्षिणकालिकादेवता क्रींबीजं,

ह्रींशक्तिः, नमः कीलकम्॥ सर्वत्र सर्वदा जपे विनियोगः॥

ॐक्रांहृदयायनमः।

ॐक्रींशिरसेस्वाहा।

ॐक्रूंशिखायैवषट्।

ॐक्रैंकवचायहूम्।

ॐक्रौंनेत्रत्रयायवौषट्।

ॐक्रः-अस्त्रायफट्।

अथ ध्यानम्

ध्यायेत्कालीम्महामायान्त्रिनेत्राम्बहुरूपिणीम्।
चतुर्भुजाँल्ललज्जिह्वाम्पूर्णचन्द्रनिभाननाम्॥ १॥

नीलोत्पलदलप्रख्यां शत्रुशङ्खविदारिणीम्।
नरमुण्डन्तथा खड्गङ्कमलँव्वरदन्तथा॥ २॥

बिभ्राणां रक्तवदनान्दंष्ट्रालीङ्घोररूपिणीम्।
अट्टाट्टहासनिरतां सर्वदा च दिगम्बराम्॥ ३॥

शवासनस्थितान्देवीम्मुण्डमालाविभूषिताम्।
इति ध्यात्वा महादेवीन्ततस्तु हृदयम्पठेत्॥ ४॥

ॐ कालिका घोररूपाद्या सर्वकामफलप्रदा।
सर्वदेवस्तुता देवी शत्रुनाशङ्करोतु मे॥ ५॥

ह्रींह्रींस्वरूपिणी श्रेष्ठा त्रिषु लोकेषु दुर्लभा।
p. 85) तव स्नेहान्मयाख्यातन्न देयँयस्य कस्यचित्॥ ६॥

अथ ध्यानम्प्रवक्ष्यामि निशामय परात्मिके।
यस्य विज्ञानमात्रेण जीवन्मुक्तो भविष्यति॥ ७॥

नागयज्ञोपवीताञ्च चन्द्रार्द्धकृतशेखराम्।
जटाजूटाञ्च सञ्चिन्त्य महाकालसमीपगाम्॥ ८॥

एवन्न्यासादयस्सर्वे ये प्रकुर्वन्ति मानवाः।
प्राप्नुवन्ति च ते मोक्ष सत्यं सत्यँव्वरानने॥ ९॥

यन्त्रं शृणु परन्देव्यास्सर्वार्थसिद्धिदायकम्।
गोप्याद्गोप्यतरं गोप्यङ्गोप्याद्गोप्यतरम्महत्॥ १०॥

त्रिकोणम्पञ्चकञ्चाष्टकमलम्भूपुरान्वितम्।
मुण्डपङ्क्तिञ्च ज्वालाञ्च कालियन्त्रं सुसिद्धिदम्॥ ११॥

मन्त्रन्तु पूर्वकथितन्धारयस्व सदा प्रिये।
देव्या दक्षिणकाल्यास्तु नाममालान्निशामय॥ १२॥

काली दक्षिणकाली च कृष्णरूपा परात्मिका।
मुण्डमाली विशालाक्षी सृष्टिसंहारकारिका॥ १३॥

स्थितिरूपा महामाया योगनिद्रा भगात्मिका।

भगसर्पिः पानरता भगोद्योता भगाङ्गजा॥ १४॥

आद्या सदा नवा घोरा महातेजाः करालिका।
प्रेतवाहा सिद्धिलक्ष्मीरनिरुद्धा सरस्वती॥ १५॥

एतानि नाममाल्यानि ये पठन्ति दिने दिने।
तेषान्दासस्य दासोऽहं सत्यं सत्यम्महेश्वरि॥ १६॥

कालीङ्कालहरान्देवीङ्कङ्कालबीजरूपिणीम्।
काकरूपाङ्कलातीताङ्कालिकान्दक्षिणाम्भजे॥ १७॥

कुण्डगोलप्रियान्देवीं स्वयम्भूकुसुमेरताम्।
रतिप्रियाम्महारौद्रीङ्कालिकाम्प्रणमाम्यहम्॥ १८॥

दूतीप्रियाम्महादूतीन्दूतीयोगेश्वरीम्पराम्।
दूतीयोगोद्भवरतान्दूतीरूपान्नमाम्यहम्॥ १९॥

क्रींमन्त्रेण जलञ्जप्त्वा सप्तधा सेचनेन तु।
सर्वे रोगा विनश्यन्ति नात्र कार्या विचारणा॥ २०॥

क्रींस्वाहान्तैर्महामन्त्रैश्चन्दनं साधयेत्ततः।

तिलकङ्क्रियते प्राज्ञैर्लोको वश्यो भवेत्सदा॥ २१॥

क्रींहूँरींमन्त्रजप्तेन चाक्षतं सप्तभिः प्रिये।

महाभयविनाशश्च जायते नात्र संशयः॥ २२॥

क्रींह्रींहूँवाहामन्त्रेण श्मशानाग्निञ्च मन्त्रयेत्।

p. 86) शत्रोर्गृहे प्रतिक्षिप्त्वा शत्रोर्मृत्युर्भविष्यति॥ २३ ॥

हूँरींक्रीं चैव उच्चाटे पुष्पं संशोध्य सप्तधा।

रिपूणाञ्चैव चोच्चाटन्नयत्येव न संशयः॥ २४॥

आकर्षणे च क्रींक्रींक्रीं जप्त्वाऽक्षतम्प्रतिक्षिपेत्।

सहस्रयोजनस्था च शीघ्रमागच्छति प्रिये॥ २५॥

क्रींक्रींक्रींहूँरूँरींह्रीं च कज्जलं शोधितन्तथा।

तिलकेन जगन्मोहं सप्तधा मन्त्रमाचरेत्॥ २६॥

हृदयम्परमेशानि सर्वपापहरम्परम्।

अश्वमेधादिदानानाङ्कोटिकोटिगुणोत्तरम्॥ २७॥

कन्यादानादिदानानाङ्कोटिकोटिगुणम्फलम्।
दूतीयागादियागानाङ्कोटिकोटिफलं स्मृतम्॥ २८॥

गङ्गादिसर्वतीर्थानाम्फलङ्कोटिगुणं स्मृतम्॥
एकधा पाठमात्रेण सत्यं सत्यम्मयोदितम्॥ २९॥

कौमारी स्वेष्टरूपेण पूजाङ्कृत्वा विधानतः।
पठेत्स्तोत्रम्महेशानि जीवन्मुक्तस्स उच्यते॥ ३०॥

रजस्वलाभगन्दृष्ट्वा पठेदेकाग्रमानसः।
लभते परमं स्थानन्देवीलोके वरानने॥ ३१॥

महादुःखे महारोगे महासङ्कटके दिने।
महाभये महाघोरे पठेत्स्तोत्रं महोत्तमम्।
सत्यं सत्यम्पुनस्सत्यङ्गोपयेन्मातृजारवत्॥ ३२॥

इति हृदयं समाप्तम्॥

अथोपनिषद्

अथ हैनाम्ब्रह्मरन्ध्रे ब्रह्मस्वरूपिणीमाप्नोति
सुभगाङ्कामरेफेन्दिरां समष्टिरूपिणीमादौ
तदन्वकर्तुर्बीजद्वयकूर्चबीजन्तद्वोमषष्ठस्वरबिन्दुमेलनं
रूपन्तदनुभुवना द्वयभुवना तु
व्योमज्वलनेन्दिराशून्यमेलनरूपा दक्षिणे कालिके
वेत्यभिमुखङ्गता तदनु बीजसप्तकमुच्चार्य
बृहद्भानुजायामुच्चरेत्। अयं सर्वमन्त्रोत्तमोत्तम इमं सकृज्जपन् स
तु विश्वेश्वरः स तु नारीश्वरः स तु वेदेश्वरः स सर्वगुरुः
सर्वनमस्यः सर्वेषु वेदेष्वधिश्रितो भवति स सर्वेषु तीर्थेषु स्नातो
भवति सर्वेषु यज्ञेषु दीक्षितो भवति स स्वयं सदाशिवः

p. 87) त्रिकोणत्रिकोणत्रिकोणम्पुनश्चैव त्रिकोणत्रिकोणन्ततो वसुदलं
सार्द्धचन्द्रकेसरँयुग्मशो विलिख्य सम्भृतम्भूपुरैकेन युतं
सर्वज्ञेनाभ्यर्च्य तस्मिन् देवीदले रेखायाँव्विन्यस्य ध्येया
अभिनवजलदवदना घनस्तनी कुटिलदंष्ट्रा शवासना
वराभयखड्गमुण्डमण्डितहस्ता कालिका ध्येया काली कपालिनी
कुल्ला कुरुकुल्ला विरोधिनी विप्रचित्तेति षड्कोणगाः। उग्रा उग्रप्रभा दीप्ता
नीला घना बलाका मात्रा मुद्रा मितेति नवकोणगाः

इत्थम्पञ्चदशकोणगाः। ब्राह्मी नारायणी माहेश्वरी चामुण्डा
कौमारी अपराजिता वाराही नारसिंहीत्यष्टपत्रगाः।
चतुष्।कोणगाश्चत्वारो देवाः माधव-रुद्र-विनायक-सौराः।
चतुर्द्दिक्षु इन्द्र-यम-वरुण-कुबेराः। देवीं सर्वाङ्गेनादौ सम्पूज्य
भगोदकेन तर्पणम्पञ्चमकारेण पूजनमेतस्याः सपर्यायाः
किमधिकन्नो शक्यम्ब्रह्मादि पदं हेयं हेलया प्राप्नोति एतस्या
एकद्वित्रिक्रमेण मनवो भवन्ति नारिमित्रादिलक्षणमत्र वर्त्तते
अमुष्यमन्त्रपाठकस्य गतिरस्ति नान्यस्येह गतिरस्ति एतस्यास्तारा
मनोर्दुर्गा मनोर्वा सिद्धिः इदानीन्तु सर्वाः स्वप्नभूता असितैव
जागर्ति इमामसिताज्ञामुपनिषदँय्यो वाऽधीते सोऽपुत्रः पुत्रीभवति
निर्द्धनो धनायति धर्मार्थकाममोक्षाणाम्पात्रीयत्यन्यस्य
वरदः दृष्ट्वा जगन्मोहयति क्रोधस्तञ्जहाति
गङ्गादितीर्थक्षेत्राणामग्निष्टोमादियज्ञानां फलभागीयति॥
इत्यथर्वणवेदे सौभाग्यकाण्डे कालिकोपनिषत्समाप्ता॥

अथ शतनाम

भैरव उवाच

शतनाम प्रवक्ष्यामि कालिकाया वरानने।

यस्य प्रपठनाद्वाग्ग्मी सर्वत्र विजयी भवेत्॥ १॥

काली कपालिनी कान्ता कामदा कामसुन्दरी।
कालरात्रिः कालिका च कालभैरवपूजिता॥ २॥

कुरुकुल्ला कामिनी च कामनीयस्वभाविनी।
कुलीना कुलकर्त्री च कुलवर्त्त्मप्रकाशिनी॥ ३॥

कस्तूरीरसनीला च काम्या कामस्वरूपिणी।
p. 88) ककारवर्णनिलया कामधेनुः करालिका॥ ४॥

कुलकान्ता करालास्या कामार्त्ता च कलावती।
कृशोदरी च कामाख्या कौमारी कुलपालिनी॥ ५॥

कुलजा कुलकन्या च कलहा कुलपूजिता।
कामेश्वरी कामकान्ता कुञ्जरेश्वरगामिनी॥ ६॥

कामदात्री कामहत्री कृष्णा चैव कपर्द्दिनी।
कुमुदा कृष्णदेहा च कालिन्दी कुलपूजिता॥ ७॥

काश्यपी कृष्णमाता च कुलिशाङ्गी कला तथा।
क्रींरूपा कुलगम्या च कमला कृष्णपूजिता॥ ८॥

कृशाङ्गी किन्नरी कर्त्री कलकण्ठी च कार्तिकी।
कम्बुकण्ठी कौलिनी च कुमुदा कामजीविनी॥ ९॥

कुलस्त्री कीर्त्तिका कृत्या कीर्तिश्च कुलपालिका।
कामदेवकला कल्पलता कामाङ्गवर्द्धिनी॥ १०॥

कुन्ता च कुमुदप्रीता कदम्बकुसुमोत्सुका।
कादम्बिनी कमलिनी कृष्णानन्दप्रदायिनी॥ ११॥

कुमारीपूजनरता कुमारीगणशोभिता।
कुमारीरञ्जनरता कुमारीव्रतधारिणी॥ १२॥

कङ्काली कमनीया च कामशास्त्रविशारदा।
कपालखट्वाङ्गधरा कालभैरवरूपिणी॥ १३॥

कोटरी कोटराक्षी च काशी कैलासवासिनी।
कात्यायिनी कार्यकरी काव्यशास्त्रप्रमोदिनी॥ १४॥

कामाकर्षणरूपा च कामपीठनिवासिनी।

कङ्किनी काकिनी क्रीडा कुत्सिता कलहप्रिया॥ १५॥

कुण्डगोलोद्भवप्राणा कौशिकी कीर्तिवर्द्धिनी।

कुम्भस्तनी कटाक्षा च काव्या कोकनदप्रिया॥ १६॥

कान्तारवासिनी कान्तिः कठिना कृष्णवल्लभा।

इति ते कथितन्देवि गुह्याद्गुह्यतरम्परम्॥ १७॥

प्रपठेद्य इदन्नित्यङ्कालीनाम शताष्टकम्।

त्रिषु लोकेषु देवेशि तस्यासाध्यन्न विद्यते॥ १८॥

प्रातःकाले च मध्याह्ने सायाह्ने च सदा निशि।

यः पठेत्परया भक्त्या कालीनाम शताष्टकम्॥ १९॥

कालिका तस्य गेहे च संस्थानङ्करुते सदा।

शून्यागारे श्मशाने वा प्रान्तरे जलमध्यतः॥ २०॥

वह्निमध्ये च सङ्ग्रामे तथा प्राणस्य संशये।

p. 89) शताष्टकञ्जपन्मन्त्री लभते क्षेममुत्तमम्॥ २१॥

कालीं संस्थाप्य विधिवत्स्तुत्वा नामशताष्टकैः।
साधकस्सिद्धिमाप्नोति कालिकायाः प्रसादतः॥ २२॥

इत्यष्टोत्तरशतनाम समाप्तम्॥

अथ सहस्रनाम

कैलाशशिखरे रम्ये नानादेवगणावृते।
नानावृक्षलताकीर्णे नानापुष्पैरलङ्कृते॥ १॥

चतुर्मण्डलसँयुक्ते शृङ्गारमण्डपे स्थिते।
समाधौ संस्थितं शान्तङ्क्रीडन्तँय्योगिनीप्रियम्॥ २॥

तत्र मौनधरन्दृष्ट्वा देवी पृच्छति शङ्करम्।

देव्युवाच

किन्त्वया जप्यते देव किन्त्वया स्मर्यते सदा॥ ३॥

सृष्टिः कुत्र विलीनास्ति पुनः कुत्र प्रजायते।
ब्रह्माण्डकारणँय्यत्तत्किमाद्यङ्कारणम्महत्॥ ४॥

मनोरथमयी सिद्धिस्तथा वाञ्छामयी शिव।
तृतीया कल्पनासिद्धिः कोटिसिद्धीश्वरत्वकम्॥ ५॥

शक्तिपाताष्टदशकञ्चराचरपुरीगतिः।
महेन्द्रजालमिन्द्रादिजालानां रचनान्तथा॥ ६॥

अणिमाद्यष्टकन्देव परकायप्रवेशनम्।
नवीनसृष्टिकरणं समुद्रशोषणन्तथा॥ ७॥

अमायाञ्चन्द्रसन्दर्शो दिवा चन्द्रप्रकाशनम्।
चन्द्राष्टकञ्चाष्टदिक्षु तथा सूर्याष्टकं शिव॥ ८॥

जले जलमयत्वञ्च वह्नौ वह्निमयत्वकम्।
ब्रह्मविष्ण्वादिनिर्माणमिन्द्राणाङ्कारणङ्करे॥ ९॥

पातालगुटिका यक्षवेतालपञ्चकन्तथा।

रसायनन्तथा गुप्तिस्तथैव चाखिलाञ्जनम्॥ १०॥

महामधुमती सिद्धिस्तथा पद्मावती शिव।
तथा भोगवती सिद्धिर्यावत्यः सन्ति सिद्धयः॥ ११॥

केन मन्त्रेण तपसा कलौ पापसमाकुले।
आयुष्यम्पुण्यरहिते कथम्भवति तद्वद॥ १२॥

शिव उवाच

विना मन्त्रँव्विना स्तोत्रं व्विनैव तपसा प्रिये।
विना बलिँव्विना न्यासम्भूतशुद्धिँव्विना प्रिये॥ १३॥

विना ध्यानँव्विना यन्त्रँव्विना पूजादिना प्रिये।
विना क्लेशादिभिर्देवि देहदुःखादिभिर्विना॥ १४॥

सिद्धिराशु भवेद्येन तदेवङ्कथ्यते मया।
p. 90) शून्ये ब्रह्माण्डगोले तु पञ्चाशच्छून्यमध्यके॥ १५॥

पञ्चशून्यस्थिता तारा सर्वान्ते कालिका स्मृता।

अनन्तकोटिब्रह्माण्ड-राजदन्ताग्रके शिवे॥ १६॥

स्थाप्य शून्यालयङ्कृत्वा कृष्णवर्णंविधाय च।
महानिर्गुणरूपा च वाचातीता परा कला॥ १७॥

क्रीडायां संस्थिता देवी शून्यरूपा प्रकल्पयेत्।
सृष्टेरारम्भकार्ये तु दृष्टा छाया तया यदा॥ १८॥

इच्छाशक्तिस्तु सा जाता तया कालो विनिर्म्मितः।
प्रतिबिम्बन्तत्र दृष्टज्ञाता ज्ञानाभिधा तु सा॥ १९॥

इदमेतत्किँविशिष्टज्ञातँव्विज्ञानकम्मुदा।
तदा क्रियाभिधा जाता तदीक्षातो महेश्वरी॥ २०॥

ब्रह्माण्डगोले देवेशि राजदन्तस्थितञ्च यत्।
सा क्रिया स्थापयामास स्वस्वस्थानक्रमेण च॥ २१॥

तत्रैव स्वेच्छया देवि सामरस्य परायणा।
तदिच्छा कथ्यते देवि यथावदवधारय॥ २२॥

युगादिसमये देवि शिवम्परगुणोत्तमम्।
तदिच्छा निर्गुणं शान्तं सच्चिदानन्दविग्रहम्॥ २३॥

शाश्वतं सुंदरं शुक्लं सर्वदेवयुतँव्वरम्।
आदिनाथङ्गुणातीतङ्काल्या संयुतमीश्वरम्॥ २४॥

विपरीतरतन्देवं सामरस्यपरायणम्।
पूजार्थमागतन्देवगन्धर्वाप्सरसाङ्गणम्॥ २५॥

यक्षिणीं किन्नरीमन्यामुर्वश्याद्यान्तिलोत्तमाम्।
वीक्ष्य तन्मायया प्राह सुन्दरी प्राणवल्लभा॥ २६॥

त्रैलोक्यसुन्दरी प्राणस्वामिनी प्राणरञ्जिनी।
किमागतम्भवत्याद्य मम भाग्यार्णवो महान्॥ २७॥

उक्त्वा मौनधरं शम्भुम्पूजयन्त्यप्सरोगणाः।

अप्सरस ऊचुः॥

संसारात्तारितन्देव त्वया विश्वं जनप्रिय॥ २८॥

सृष्टेरारम्भकार्यार्थमुद्युक्तोसि महाप्रभो।
वेश्याकृत्यमिदन्देव मङ्गलार्थप्रगायनम्॥ २९॥

प्रयाणोत्सवकाले तु समारम्भे प्रगायनम्।
गुणाद्यारम्भकालो हि वर्त्तते शिवशङ्कर॥ ३०॥

इन्द्राणीकोटयः सन्ति तस्याः प्रसवबिन्दुतः।
p. 91) ब्रह्माणी वैष्णवी चैव माहेशीकोटिकोटयः॥ ३१॥

तव सामरसानन्ददर्शनार्थं समुद्भवाः।
सञ्जाताश्चाग्रतो देव चास्माकं सौख्यसागर॥ ३२॥

रतिं हित्वा कामिनीनां नान्यत्सौख्यं महेश्वर।
सा रतिर्दृश्यतेऽस्माभिम्मर्हत्सौख्यार्थकारिका॥ ३३॥

एवमेतत्तु चास्माभिः कर्त्तव्यं भर्तृणा सह।
एवं श्रुत्वा महादेवो ध्यानावस्थितमानसः॥ ३४॥

ध्यानं हित्वा मायया तु प्रोवाच कालिकाम्प्रति।

कालि कालि रुण्डमाले प्रिये भैरववादिनि॥ ३५॥

शिवारूपधरे क्रूरे घोरदंष्ट्रे भयानके।
त्रैलोक्यसुन्दरकरी-सुन्दर्यः सन्ति मेऽग्रतः॥ ३६॥

सुन्दरीवीक्षणङ्कर्म कुरु कालि प्रिये शिवे।
ध्यानं मुञ्च महादेवि ता गच्छन्ति गृहम्प्रति॥ ३७॥

तव रूपम्महाकालि महाकालप्रियङ्करम्।
एतासां सुन्दरं रूपन्त्रैलोक्यप्रियकारकम्॥ ३८॥

एवं मायाप्रभाविष्टो महाकालो वदन्निति।
इति कालवचः श्रुत्वा कालम्प्राह च कालिका॥ ३९॥

मायया च्छाद्य चात्मानं निजस्त्रीरूपधारिणी।
इतः प्रभृति स्त्रीमात्रम्भविष्यति युगे युगे॥ ४०॥

वल्ल्याद्यौषधयो देवि दिवा वल्लीस्वरूपताम्।
रात्रौ स्त्रीरूपमासाद्य रतिकेलिः परस्परम्॥ ४१॥

अज्ञानञ्चैव सर्वेषाम्भविष्यति युगे युगे।
एवं शापञ्च दत्त्वा तु पुनः प्रोवाच कालिका॥ ४२॥

बिपरीतरतिङ्कृत्वा चिन्तयन्ति भजन्ति ये।
तेषाँव्वरम्प्रदास्यामि नित्यन्तत्र वसाम्यहम्॥ ४३॥

इत्युक्त्वा कालिका विद्या तत्रैवान्तरधीयत।
त्रिंशत्त्रिखर्वषड्वृन्दनवत्यर्बुदकोटयः॥ ४४॥

दर्शनार्थन्तपस्तेपे सा वै कुत्र गता प्रिया।
मम प्राणप्रिया देवी हाहा प्राणप्रिये शिवे॥ ४५॥

किङ्करोमि क्व गच्छामि इत्येवम्भ्रमसङ्कुलः।
तस्याः काल्या दया जाता मम चिन्तापरः शिवः॥ ४६॥

यन्त्रप्रस्तारबुद्धिस्तु काल्या दत्तातिसत्वरम्।
यन्त्रयागन्तदारभ्य पूर्व बिन्दुत्वगोचरम्॥ ४७॥

p. 92) श्रीचक्रं यन्त्रप्रस्तार-रचनाभ्यासतत्परः।
इतस्ततो भ्राम्यमाणस्त्रैलोक्यञ्चक्रमध्यकम्॥ ४८॥

चक्रपारन्दर्शनार्थङ्कोट्यर्बुदयुगङ्गतम्।
भक्तप्राणप्रिया देवी महाश्रीचक्रनायिका॥ ४९॥

तत्र बिन्दौ परं रूपं सुन्दरं सुमनोहरम्।
रूपञ्जातम्महेशानि जाग्रत्त्रिपुरसुन्दरि॥ ५०॥

रूपन्दृष्ट्वा महादेवो राजराजेश्वरोऽभवत्।
तस्याः कटाक्षमात्रेण तस्या रूपधरः शिवः॥ ५१॥

विना शृङ्गारसँयुक्ता तदा जाता महेश्वरी।
विना काल्यंशतो देवि जगत्स्थावरजङ्गमम्॥ ५२॥

न शृङ्गारो न शक्तित्वं क्वापि नास्ति महेश्वरी।
सुन्दर्या प्रार्थिता काली तुष्टा प्रोवाच कालिका॥ ५३॥

सर्वासान्नेत्रकेशे च ममांशोऽत्र भविष्यति।
पूर्वावस्थासु देवेशि ममांशस्तिष्ठति प्रिये॥ ५४॥

सावस्था तरुणाख्या तु तदन्ते नैव तिष्ठति।

मद्भक्तानाम्महेशानि सदा तिष्ठति निश्चितम्॥ ५५॥

शक्तिस्तु कुण्ठिता जाता तथा रूपं न सुन्दरम्।
चिन्ताविष्टा तु मालिना जाता तत्र तु सुन्दरी॥ ५६॥

क्षणं स्थित्वा ध्यानपरा काली चिन्तनतत्परा।
तदा काली प्रसन्नाभूत्क्षणार्द्धेन महेश्वरी॥ ५७॥

वरम्ब्रूहि वर्म्ब्रूहि वरम्ब्रूहीति सादरम्।

सुन्दर्युवाच॥

मम सिद्धिवरन्देहि वरो यः प्रार्थ्यते मया॥ ५८॥

तागुद्दपायङ्कथय येन शक्तिर्भविष्यति।

श्रीकाल्युवाच॥

मम नामसहस्रञ्च मया पूर्वंविनिर्मितम्॥ ५९॥

मत्स्वरूपङ्ककाराख्यम्महासाम्राज्यनामकम्।
वरदानाभिधन्नाम क्षणार्द्धाद्वरदायकम्॥ ६०॥

तत्पठस्व महामाये तव शक्तिर्भविष्यति।
ततः प्रभृति श्रीविद्या तन्नामपाठतत्परा॥ ६१॥

तदेव नामसाहस्रं सुन्दरीशक्तिदायकम्।
कथ्यते नामसाहस्रं सावधानमनाः शृणु॥ ६२॥

सर्वसाम्राज्यमेधाख्य-नामसाहस्रकस्य च।
महाकाल ऋषिः प्रोक्त उष्णिक्छन्दः प्रकीर्तितम्॥ ६३॥

देवता दक्षिणा काली मायाबीजम्प्रकीर्तितम्।
हूँहक्तिः कालिकाबीजङ्कीलकम्परिकीर्तितम्॥ ६४॥

p. 93) ध्यानञ्च पूर्ववत्कृत्वा साधयस्वेष्टसाधनम्।
कालिकावरदानादिस्वेष्टार्थे विनियोगतः॥ ६५॥

कीलकेन षडङ्गानि षड्वीग्र्घाजेन कारयेत्।

ओमस्य

श्रीसर्वसाम्राज्यमेधानामकालीरूपककारात्मकसहस्रनामस्तोत्रम्

अन्त्रस्य महाकाल ऋषिरनुष्टुप्छन्दः श्रीदक्षिणमहाकाली देवता,

ह्रीं बीजम्, हूं शक्तिः, क्रींकीलकङ्कालीवरदानाद्यखिलेष्टार्थे

जपे विनियोगः॥

ॐक्रींङ्काली क्रूंकराली च कल्याणी कमला कला।

कलावती कलाढ्या च कलापूज्या कलात्मिका। १॥

कलादृष्टा कलापुष्टा कलामस्ता कलाधरा।

कलाकोटिसमाभासा कलाकोटिप्रपूजिता॥ २॥

कलाकर्मकलाधारा कलापारा कलागमा।

कलाधारा कमलिनी ककारा करुणा कविः॥ ३॥

ककारवर्णसर्वाङ्गी कलाकोटिप्रभूषिता।

ककारकोटिगुणिता ककारकोटिभूषणा॥ ४॥

ककारवर्णहृदया ककारमनुमण्डिता।
ककारवर्णनिलया काकशब्दपरायणा॥ ५॥

ककारवर्णमुकुटा ककारवर्णभूषणा।
ककारवर्णरूपा च ककशब्दपरायणा॥ ६॥

ककवीरास्फालरता कमलाकरपूजिता।
कमलाकरनाथा च कमलाकररूपधृक्॥ ७॥

कमलाकरसिद्धिस्था कमलाकरपारदा।
कमलाकरमध्यस्था कमलाकरतोषिता॥ ८॥

कथङ्कारपरालापा कथङ्कारपरायणा।
कथङ्कारपदान्तस्था कथङ्कारपदार्थभूः॥ ९॥

कमलाक्षी कमलजा कमलाक्षप्रपूजिता।
कमलाक्षवरोद्युक्ता ककाराकर्बुराक्षरा॥ १०॥

करतारा करच्छिन्ना करश्यामा करार्णवा।
करपूज्या कररता करदा करपूजिता॥ ११॥

करतोया करामर्षा कर्मनाशा करप्रिया।

करप्राणा करकजा करका करकान्तरा॥ १२॥

करकाचलरूपा च करकाचलशोभिनी।

करकाचलपुत्री च करकाचलतोषिता॥ १३॥

करकाचलगेहस्था करकाचलरक्षिणी।

करकाचलसम्मान्या करकाचलकारिणी॥ १४॥

करकाचलवर्षाढ्या करकाचलरञ्जिता।

p. 94) करकाचलकान्तारा करकाचलमालिनी॥ १५॥

करकाचलभोज्या च करकाचलरूपिणी।

करामलकसंस्था च करामलकसिद्धिदा॥ १६॥

करामलकसम्पूज्या करामलकतारिणी।

करामलककाली च करामलकरोचिनी॥ १७॥

करामलकमाता च करामलकसेविनी।

करामलकवद्ध्येया करामलकदायिनी॥ १८॥

कञ्जनेत्रा कञ्जगतिः कञ्जस्था कञ्जधारिणी।
कञ्जमालाप्रियकरी कञ्जरूपा च कञ्जना॥ १९॥

कञ्जजातिः कञ्जगतिः कञ्जहोमपरायणा।
कञ्जमण्डलमध्यस्था कञ्जाभरणभूषिता॥ २०॥

कञ्जसम्माननिरता कञ्जोत्पत्तिपरायणा।
कञ्जराशिसमाकारा कञ्जारण्यनिवासिनी॥ २१॥

करञ्जवृक्षमध्यस्था करञ्जवृक्षवासिनी।
करञ्जफलभूषाढ्या करञ्जारण्यवासिनी॥ २२॥

करञ्जमालाभरणा करवालपरायणा।
करवालप्रहृष्टात्मा करवालप्रियागतिः॥ २३॥

करवालप्रियाकन्था करवालविहारिणी।
करवालमयीकर्मा करवालप्रियङ्करी॥ २४॥

कबन्धमालाभरणा कबन्धराशिमध्यगा।

कबन्धकूटसंस्थाना कबन्धानन्तभूषणा॥ २५॥

कबन्धनादसंतुष्टा कबन्धासनधारिणी।

कबन्धगृहमध्यस्था कबन्धवनवासिनी॥ २६॥

कबन्धकाञ्चीकरणी कबन्धराशिभूषणा।

कबन्धमालाजयदा कबन्धदेहवासिनी॥ २७॥

कबन्धासनमान्या च कपालमाल्यधारिणी।

कपालमालामध्यस्था कपालव्रततोषिता॥ २८॥

कपालदीपसन्तुष्टा कपालदीपरूपिणी।

कपालदीपवरदा कपालकज्जलस्थिता॥ २९॥

कपालमालाजयदा कपालजपतोषिणी।

कपालसिद्धिसंहृष्टा कपालभोजनोद्यता॥ ३०॥

कपालव्रतसंस्थाना कपालकमलालया।

कवित्वामृतसारा च कवित्वामृतसागरा॥ ३१॥

कवित्वसिद्धिसंहृष्टा कवित्वादानकारिणी।

कविपूज्या कविगतिः कविरूपा कविप्रिया॥ ३२॥

कविब्रह्मानन्दरूपा कवित्वव्रततोषिता।

p. 95) कविमानससंस्थाना कविवाञ्छाप्रपूरिणी॥ ३३॥

कविकण्ठस्थिता कंह्रींकंकंकंकविपूर्त्तिदा।

कज्जला कज्जलादानमानसा कज्जलप्रिया॥ ३४॥

कपालकज्जलसमा कज्जलेशप्रपूजिता।

कज्जलार्णवमध्यस्था कज्जलानन्दरूपिणी॥ ३५॥

कज्जलप्रियसन्तुष्टा कज्जलप्रियतोषिणी।

कपालमालाभरणा कपालकरभूषणा॥ ३६॥

कपालकरभूषाढ्या कपालचक्रमण्डिता।

कपालकोटिनिलया कपालदुर्गकारिणी॥ ३७॥

कपालगिरिसंस्थाना कपालचक्रवासिनी।

कपालपात्रसन्तुष्टा कपालार्घ्यपरायणा॥ ३८॥

कपालार्घ्यप्रियप्राणा कपालार्घ्यवरप्रदा।
कपालचक्ररूपा च कपालरूपमात्रगा॥ ३९॥

कदली कदलीरूपा कदलीवनवासिनी।
कदलीपुष्पसम्प्रीता कदलीफलमानसा॥ ४०॥

कदलीहोमसन्तुष्टा कदलीदर्शनोद्यता।
कदली गर्भमध्यस्था कदलीवनसुन्दरी॥ ४१॥

कदम्बपुष्पनिलया कदम्बवनमध्यगा।
कदम्बकुसुमामोदा कदम्बवनतोषिणी॥ ४२॥

कदम्बपुष्पसम्पूज्या कदम्बपुष्पहोमदा।
कदम्बपुष्पमध्यस्था कदम्बफलभोजिनी॥ ४३॥

कदम्बकाननांतःस्था कदम्बाचलवासिनी।
कक्षपा कक्षपाराध्या कक्षपासनसंस्थिता॥ ४४॥

कर्णपूरा कर्णनासा कर्णाढ्या कालभैरवी।
कलप्रीता कलहदा कलहा कलहातुरा॥ ४५॥

कर्णयक्षी कर्णवार्त्ता कथिनी कर्णसुन्दरी।
कर्णपिशाचिनी कर्णमञ्जरी कपिकक्षदा॥ ४६॥

कविकक्षाविरूपाढ्या कविकक्षस्वरूपिणी।
कस्तूरीमृगसंस्थाना कस्तूरीमृगरूपिणी॥ ४७॥

कस्तूरीमृगसन्तोषा कस्तूरीमृगमध्यगा।
कस्तूरीरसनीलाङ्गी कस्तूरीगन्धतोषिता॥ ४८॥

कस्तूरीपूजकप्राणा कस्तूरीपूजकप्रिया।
कस्तूरीप्रेमसन्तुष्टा कस्तूरीप्राणधारिणी॥ ४९॥

कस्तूरीपूजकानन्दा कस्तूरीगन्धरूपिणी।
कस्तूरीमालिकारूपा कस्तूरीभोजनप्रिया॥ ५०॥

कस्तूरीतिलकानन्दा कस्तूरीतिलकप्रिया।
p. 51) कस्तूरीहोमसन्तुष्टा कस्तूरीतर्पणोद्यता॥ ५१॥

कस्तूरीमार्जनोद्युक्ता कस्तूरीचक्रपूजिता।
कस्तूरीपुष्पसम्पूज्या कस्तूरीचर्वणोद्यता॥ ५२॥

कस्तूरीगर्भमध्यस्था कस्तूरीवस्त्रधारिणी।
कस्तूरिकामोदरता कस्तूरीवनवासिनी॥ ५३॥

कस्तूरीवनसंरक्षा कस्तूरीप्रेमधारिणी।
कस्तूरीशक्तिनिलया कस्तूरीशक्तिकुण्डगा॥ ५४॥

कस्तूरीकुण्डसंस्नाता कस्तूरीकुण्डमज्जना।
कस्तूरीजीवसन्तुष्टा कस्तूरीजीवधारिणी॥ ५५॥

कस्तूरीपरमामोदा कस्तूरीजीवनक्षमा।
कस्तूरीजातिभावस्था कस्तूरीगन्धचुम्बना॥ ५६॥

कस्तूरीगन्धसंशोभा-विराजितकपालभूः।
कस्तूरीमदनान्तःस्था कस्तूरीमदहर्षदा॥ ५७॥

कस्तूरीकवितानाढ्या कस्तूरीगृहमध्यगा।

कस्तूरीस्पर्शकप्राणा कस्तूरीविन्दकान्तका॥ ५८॥

कस्तूर्यामोदरसिका कस्तूरीक्रीडनोद्यता।
कस्तूरीदाननिरता कस्तूरीवरदायिनी॥ ५९॥

कस्तूरीस्थापनासक्ता कस्तूरीस्थानरञ्जिनी।
कस्तूरीकुशलप्रश्ना कस्तूरीस्तुतिवन्दिता॥ ६०॥

कस्तूरीवन्दकाराध्या कस्तूरीस्थानवासिनी।
कहरूपा कहाढ्या च कहानन्दा कहात्मभूः॥ ६१॥

कहपूज्या कहात्याख्या कहहेया कहात्मिका।
कहमाला कण्ठभूषा कहमन्त्रजपोद्यता॥ ६२॥

कहनामस्मृतिपरा कहनामपरायणा।
कहपरायणरता कहदेवी कहेश्वरी॥ ६३॥

कहहेतुकहानन्दा कहनादपरायणा।
कहमाता कहान्तस्था कहमन्त्रा कहेश्वरा॥ ६४॥

कहगेया कहाराध्या कहध्यानपरायणा।

कहतन्त्रा कहकहा कहचर्यापरायणा॥ ६५॥

कहाचारा कहगतिः कहताण्डवकारिणी।

कहारण्या कहगतिः कहशक्तिपरायणा॥ ६६॥

कहराज्यनता कर्मसाक्षिणी कर्मसुन्दरी।

कर्मविद्या कर्मगतिः कर्मतन्त्रपरायणा॥ ६७॥

कर्ममात्रा कर्मगात्रा कर्मधर्मपरायणा।

कर्मरेखानाशकर्त्री कर्मरेखाविनोदिनी॥ ६८॥

p. 97) कर्मरेखामोहकारी कर्मकीर्तिपरायणा।

कर्मविद्या कर्मसारा कर्माधारा च कर्मभूः॥ ६९॥

कर्मकारी कर्महारी कर्मकौतुकसुन्दरी।

कर्मकाली कर्मतारा कर्मच्छिना च कर्मदा॥ ७०॥

कर्मचाण्डालिनी कर्मवेदमाता च कर्मभूः।

कर्मकाण्डरतानन्ता कर्मकाण्डानुमानिता॥ ७१॥

कर्मकाण्डपरीणाहा कमठी कमठाकृतिः।

कमठाराध्यहृदया कमठाकण्ठसुन्दरी॥ ७२॥

कमठासनसंसेव्या कमठीकर्मतत्परा।

करुणाकरकान्ता च करुणाकरवन्दिता॥ ७३॥

कठोराकरमाला च कठोरकुचधारिणी।

कपर्द्दिनी कपटिनी कठिनी कङ्कभूषणा॥ ७४॥

करभोरूः कठिनदा करभा करभालया।

कलभाषामयी कल्पा कल्पना कल्पदायिनी॥ ७५॥

कमलस्था कलामाला कमलास्या क्वणत्प्रभा।

कुकुद्मिनी कष्टवती करणीयकथार्चिता॥ ७६॥

कचार्चिता कचतनुः कचसुन्दरधारिणी।

कठोकुचसँलग्ना कटिसूत्रविराजिता॥ ७७॥

कर्णभक्षप्रिया कन्दाकथाकन्दगतिः कलिः।

कलिघ्नी कलिदूती च कविनायकपूजिता॥ ७८॥

कणकक्षानियन्त्री च कश्चित्कविवरार्चिता।
कर्त्री च कर्त्तृकाभूषा करिणी कर्णशत्रुपा॥ ७९॥

करणेशी करणपा कलवाचा कलानिधिः।
कलना कलनाधारा कलनाकारिकाकरा॥ ८०॥

कलगेया कर्कराशिः कर्कराशिप्रपूजिता।
कन्याराशिः कन्यका च कन्यकाप्रियभाषिणी॥ ८१॥

कन्यकादानसन्तुष्टा कन्यकादानतोषिणी।
कन्यादानकरानन्दा कन्यादानग्रहेष्टदा॥ ८२॥

कर्षणाकक्षदहना कामिता कमलासना।
करमालानन्दकर्त्री करमालाप्रपोषिता॥ ८३॥

करमालाशयानन्दा करमालासमागमा।
करमालासिद्धिदात्री करमालाकरप्रिया॥ ८४॥

करप्रिया कररता करदानपरायणा।

कलानन्दा कलिगतिः कलिपूज्या कलिप्रसूः॥ ८५॥

p. 98) कलनादनिनादस्था कलनादवरप्रदा।

कलनादसमाजस्था कहोला च कहोलदा॥ ८६॥

कहोलगेहमध्यस्था कहोलवरदायिनी।

कहोलकविताधारा कहोलऋषिमानिता॥ ८७॥

कहोलमानसाराध्या कहोलवाक्यकारिणी।

कर्त्तृरूपा कर्तृमयी कर्तृमाता च कर्त्तरी॥ ८८॥

कनीया कनकाराध्या कनीनकमयी तथा।

कनीयानन्दनिलया कनकानन्दतोषिता॥ ८९॥

कनीयककराकाष्ठा कथार्णवकरी करी।

करिगम्या करिगतिः करिध्वजपरायणा॥ ९०॥

करिनाथप्रिया कण्ठा कथानकप्रतोषिता।

कमनीया कमनका कमनीयविभूषणा॥ ९१॥

कमनीयसमाजस्था कमनीयव्रतप्रिया।
कमनीयगुणाराध्या कपिला कपिलेश्वरी॥ ९२॥

कपिलाराध्यहृदया कपिलाप्रियवादिनी।
कहचक्रमन्त्रवर्णा कहचक्रप्रसूनका॥ ९३॥

क-ए-ई-ल्हींस्वरूपा च क-ए-ईल्हींवरप्रदा।
क-ए-ईल्हींसिद्धिदात्री क-ए-ईल्हींस्वरूपिणी॥ ९४॥

क-ए-ईल्हींमन्त्रवर्णा क-ए-ईल्हींप्रसूकला।
कवर्गा च कपाटस्था कपाटोद्घाटनक्षमा॥ ९५॥

कङ्काली च कपाली च कङ्कालप्रियभाषिणी।
कङ्कालभैरवाराध्या कङ्कालमानसस्थिता॥ ९६॥

कङ्कालमोहनिरता कङ्कालमोहदायिनी।
कलूषघ्नी कलूषहा कलूषार्त्तिविनाशिनी॥ ९७॥

कलिपुष्पा कलादाना कशिपुः कश्यपार्चिता।

कश्यपा कश्यपाराध्या कलिपूर्णकलेवरा॥ ९८॥

कलेवरकरी काञ्ची कवर्गा च करालका।
करालभैरवाराध्या करालभैरवेश्वरी॥ ९९॥

कराला कलनाधारा कपर्दीशवरप्रदा।
कपर्दीशप्रेमलता कपर्द्दिमालिकायुता॥ १००॥

कपर्द्दिजपमालाढ्या करवीरप्रसूनदा।
करवीरप्रियप्राणा करवीरप्रपूजिता॥ १०१॥

कर्णिकारसमाकारा कर्णिकारप्रपूजिता।
करिषाग्निस्थिता कर्षाकर्षमात्रसुवर्णदा॥ १०२॥

कलशा कलशाराध्या कषाया करिगानदा।
कपिला कलकण्ठी च कलिकल्पलता मता॥ १०३॥

p. 99) कल्पलता कल्पमाता कल्पकारी च कल्पभूः।
कर्पूरामोदरुचिरा कर्पूरामोदधारिणी॥ १०४॥

कर्पूरमालाभरणा कर्पूरवासपूर्त्तिदा।
कर्पूरमालाजयदा कर्पूरार्णवमध्यगा॥ १०५॥

कर्पूरतर्पणरता कटकाम्बरधारिणी।
कपटेश्वरसम्पूज्या कपटेश्वररूपिणी॥ १०६॥

कटुः कविध्वजाराध्या कलापपुष्पधारिणी।
कलापपुष्परुचिरा कलापपुष्पपूजिता॥ १०७॥

क्रकचा क्रकचाराध्या कथम्ब्रूमा करालता।
कथङ्कारविनिर्मुक्ता काली कालक्रिया क्रतुः॥ १०८॥

कामिनी कामिनीपूज्या कामिनीपुष्पधारिणी।
कामिनीपुष्पनिलया कामिनीपुष्पपूर्णिमा॥ १०९॥

कामिनीपुष्पपूजार्हा कामिनीपुष्पभूषणा।
कामिनीपुष्पतिलका कामिनीकुण्डचुम्बना॥ ११०॥

कामिनीयोगसन्तुष्टा कामिनीयोगभोगदा।
कामिनीकुण्डसम्मग्ना कामिनीकुण्डमध्यगा॥ १११॥

कामिनीमानसाराध्या कामिनीमानतोषिता।
कामिनीमानसञ्चारा कालिका कालकालिका॥ ११२॥

कामा च कामदेवी च कामेशी कामसम्भवा।
कामभावा कामरता कामार्त्ता काममञ्जरी॥ ११३॥

काममञ्जीररणिता कामदेवप्रियान्तरा।
कामकाली कामकला कालिका कमलार्चिता॥ ११४॥

कादिका कमला काली कालानलसमप्रभा।
कल्पान्तदहना कान्ता कान्तारप्रियवासिनी॥ ११५॥

कालपूज्या कालरता कालमाता च कालिनी।
कालवीरा कालघोरा कालसिद्धा च कालदा॥ ११६॥

कालाञ्जनसमाकारा कालञ्जरनिवासिनी।
कालऋद्धिः कालवृद्धिः कारागृहविमोचिनी॥ ११७॥

कादिविद्या कादिमाता कादिस्था कादिसुन्दरी।

काशी काञ्ची च काञ्चीशा काशीशवरदायिनी॥ ११८॥

क्रीम्बीजा चैव क्राम्बीजाह्रदयायनमस्स्मृता।

काम्या काम्यगतिः काम्यसिद्धिदात्री च कामभूः॥ ११९॥

p. 100) कामाख्या कामरूपा च कामचापविमोचिनी।

कामदेवकलारामा कामदेवकलालया॥ १२०॥

कामरात्रिः कामदात्री कान्ताराचलवासिनी।

कामरूपा कालगतिः कामयोगपरायणा॥ १२१॥

कामसम्मर्द्दनरता कामगेह विकाशिनी।

कालभैरवभार्या च कालभैरवकामिनी॥ १२२॥

कालभैरवयोगस्था कालभैरवभोगदा।

कामधेनुः कामदोग्ध्री काममाता च कान्तिदा॥ १२३॥

कामुका कामुकाराध्या कामुकानन्दवर्द्धिनी।

कार्त्तवीर्या कार्त्तिकेया कार्त्तिकेयप्रपूजिता॥ १२४॥

कार्या कारणदा कार्यकारिणी कारणान्तरा।
कान्तिगम्या कान्तिमयी कात्या कात्यायनी च का॥ १२५॥

कामसारा च काश्मीरा काश्मीराचारतत्परा।
कामरूपाचाररता कामरूपप्रियँवदा॥ १२६॥

कामरूपाचारसिद्धिः कामरूपमनोमयी।
कार्त्तिकी कार्त्तिकाराध्या काञ्चनारप्रसूनभूः॥ १२७॥

काञ्चनारप्रसूनाभा काञ्चनारप्रपूजिता।
काञ्चरूपा काञ्चभूमिः कांस्यपात्रप्रभोजिनी॥ १२८॥

कांस्यध्वनिमयी कामसुन्दरी कामचुम्बना।
काशपुष्पप्रतीकाशा कामद्रुमसमागमा॥ १२९॥

कामपुष्पा कामभूमिः कामपूज्या च कामदा।
कामदेहा कामगेहा कामबीजपरायणा॥ १३०॥

कामध्वजसमारूढा कामध्वजसमास्थिता।
काश्यपी काश्यपाराध्या काश्यपानन्ददायिनी॥ १३१॥

कालिन्दीजलसङ्काशा कालिन्दीजलपूजिता।
कादेवपूजानिरता कादेवपरमार्थदा॥ १३२॥

कार्मणा कार्मणाकारा कामकार्मणकारिणी।
कार्मणत्रोटनकरी काकिनी कारणाह्वया॥ १३३॥

काव्यामृता च कालिङ्गा कालिङ्गमर्दनोद्यता।
कालागुरुविभूषाढ्या कालागुरुविभूतिदा॥ १३४॥

कालागुरुसुगन्धा च कालागुरुप्रतर्पणा।
कावेरीनीरसम्प्रीता कावेरीतीरवासिनी॥ १३५॥

कालचक्रभ्रमाकारा कालचक्रनिवासिनी।
p. 101) कानना काननाधारा कारुः कारुणिकामयी॥ १३६॥

काम्पिल्यवासिनी काष्ठा कामपत्नी च कामभूः।
कादम्बरीपानरता तथा कादम्बरीकला ॥ १३७॥

कामवन्द्या च कामेशी कामराजप्रपूजिता।

कामराजेश्वरीविद्या कामकौतुकसुन्दरी॥ १३८॥

काम्बोजजा काञ्चिनदा कांस्यकाञ्चनकारिणी।
काञ्चनाद्रिसमाकारा काञ्चनाद्रिप्रदानदा॥ १३९॥

कामकीर्त्तिः कामदेशी कारिका कान्तराश्रया।
कामभेदी च कामार्तिनाशिनी कामभूमिका॥ १४०

कालनिर्णाशिनी काव्यवनिता कामरूपिणी।
कायस्था कामसन्दीप्तिः काव्यदा कालसुन्दरी॥ १४१॥

कामेशी कारणवरा कामेशीपूजनोद्यता।
काञ्चीनूपुरभूषाढ्या कुङ्कुमाभरणान्विता॥ १४२॥

कालचक्रा कालगतिः कालचक्रामनोभवा।
कुन्दमध्या कुन्दपुष्पा कुन्दपुष्पप्रिया कुजा॥ १४३॥

कुजमाता कुजाराध्या कुठारवरधारिणी।
कुञ्जरस्था कुशरता कुशेशयविलोचना॥ १४४॥

कुनठी कुररी कुद्रा कुरङ्गी कुटजाश्रया।
कुम्भीनसविभूषा च कुम्भीनसवधोद्यता॥ १४५॥

कुम्भकर्णमनोल्लासा कुलचूडामणिः कुला।
कुलालगृहकन्या च कुलचूडामणिप्रिया॥ १४६॥

कुलपूज्या कुलाराध्या कुलपूजापरायणा।
कुलभूषा तथा कुक्षिः कुररीगणसेविता॥ १४७॥

कुलपुष्पा कुलरता कुलपुष्पपरायणा।
कुलवस्त्रा कुलाराध्या कुलकुण्डसमप्रभा॥ १४८॥

कुलकुण्डसमोल्लासा कुण्डपुष्पपरायणा।
कुण्डपुष्पाप्रसन्नास्या कुण्डगोलोद्भवात्मिका॥ १४९॥

कुण्डगोलोद्भवाधारा कुण्डगोलमयी कुहूः।
कुण्डगोलप्रियप्राणा कुण्डगोलप्रपूजिता॥ १५०॥

कुण्डगोलमनोल्लासा कुण्डगोलबलप्रदा।
कुण्डदेवरता क्रुद्धा कुलसिद्धिकरा परा॥ १५१॥

कुलकुण्डसमाकारा कुलकुण्डसमानभूः।
कुण्डसिद्धिः कुण्डऋद्धिः कुमारीपूजनोद्यता॥ १५२॥

p. 102) कुमारीपूजकप्राणा कुमारीपूजकालया।
कुमारीकामसन्तुष्टा कुमारीपूजनोत्सुका॥ १५३॥

कुमारीव्रतसन्तुष्टा कुमारीरूपधारिणी।
कुमारीभोजनप्रीता कुमारी च कुमारदा॥ १५४॥

कुमारमाता कुलदा कुलयोनिः कुलेश्वरी।
कुललिङ्गा कुलानन्दा कुलरम्या कुतर्कधृक्॥ १५५॥

कुन्ती च कुलकान्ता च कुलमार्गप्रारायणा।
कुल्ला च कुरुकुल्ला च कुल्लुका कुलकामदा॥ १५६॥

कुलिशाङ्गी कुब्जिका च कुब्जिकानन्दवर्द्धिनी।
कुलीना कुञ्जरगतिः कुञ्जरेश्वरगामिनी॥ १५७॥

कुलपाली कुलवती तथैव कुलदीपिका।

कुलयोगेश्वरी कुण्डा कुङ्कुमारुणविग्रहा॥ १५८॥

कुङ्कुमानन्दसन्तोषा कुङ्कुमार्णववासिनी।
कुसुमा कुसुमप्रीता कुलभूः कुलसुन्दरी॥ १५९॥

कुमुद्वती कुमुदिनी कुशला कुलटालया।
कुलटालयमध्यस्था कुलटासङ्गतोषिता॥ १६०॥

कुलटाभवनोद्युक्ता कुशावर्ता कुलार्णवा।
कुलार्णवाचाररता कुण्डली कुण्डलाकृतिः॥ १६१॥

कुमती च कुलश्रेष्ठा कुलचक्रपरायणा।
कूटस्था कूटदृष्टिश्च कुन्तला कुन्तलाकृतिः॥ १६२॥

कुशलाकृतिरूपा च कूर्चबीजधरा च कूः।
कुंकुंकुंकुंशब्दरता क्रूंक्रूंक्रूंक्रूम्परायणा॥ १६३॥

कुंकुंकुंशब्दनिलया कुक्कुरालयवासिनी।
कुक्कुरासङ्गसँउक्ता कुक्कुरानन्तविग्रहा॥ १६४॥

कूर्चारम्भा कूर्चबीजा कूर्चजापपरायणा।
कुचस्पर्शनसन्तुष्टा कुचालिङ्गनहर्षदा॥ १६५॥

कुगतिघ्नी कुबेरार्च्या कुचभूः कुलनायिका।
कुगायना कुचधरा कुमाता कुन्ददन्तिनी॥ १६६॥

कुगेया कुहराभाषा कुगेया कुघ्नदारिका।
कीर्त्तिः किरातिनी क्लिन्ना किन्नरा किन्नरी क्रिया॥ १६७॥

क्रीङ्कारा क्रीञ्जपासक्ता क्रींह्रींस्त्रींमन्त्ररूपिणी।
किर्म्मीरितदृशापाङ्गी किशोरी च किरीटिनी॥ १६८॥

कीटभाषा कीटयोनिः कीटमाता च कीटदा।
किंशुका कीरभाषा च क्रियासारा क्रियावती॥ १६९॥

p. 103) कींकींशब्दपरा क्लींक्लींक्लूंक्लैंक्लौंमन्त्ररूपिणी।
कांकींकूंकैंस्वरूपा च कः फट्मन्त्रस्वरूपिणी॥ १७०॥

केतकीभूषणानन्दा केतकीभरणान्विता।
कैकदा केशिनी केशी केशीसूदनतत्परा॥ १७१॥

केशरूपा केशमुक्ता कैकेयी कौशिकी तथा।
कैरवा कैरवाह्लादा केशरा केतुरूपिणी॥ १७२॥

केशवाराध्यहृदया केशवासक्तमानसा।
क्लैव्यविनाशिनी क्लैञ्च क्लैम्बीजजपतोषिता॥ १७३॥

कौशल्या कोशलाक्षी च कोशा च कोमला तथा।
कोलापुरनिवासा च कोलासुरविनाशिनी॥ १७४॥

कोटिरूपा कोटिरता क्रोधिनी क्रोधरूपिणी।
केका च कोकिला कोटिः कोटिमन्त्रपरायणा॥ १७५॥

कोट्यनन्तमन्त्रयुता कैरूपा केरलाश्रया।
केरलाचारनिपुणा केरलेन्द्रगृहस्थिता॥ १७६॥

केदाराश्रमसंस्था च केदारेश्वरपूजिता।
क्रोधरूपा क्रोधपदा क्रोधमाता च कौशिकी॥ १७७॥

कोदण्डधारिणी क्रौञ्चा कौशिल्या कौलमार्गगा।

कौलिनी कौलिकाराध्या कौलिकागारवासिनी॥ १७८॥

कौतुकी कौमुदी कौला कुमारी कौरवार्च्चिता।
कौण्डिन्या कौशिकी क्रोधाज्वालाभासुररूपिणी॥ १७९॥

कोटिकालानलज्वाला कोटिमार्त्तण्डविग्रहा।
कृत्तिका कृष्णवर्णा च कृष्णकृत्या क्रियातुरा [कृपातुरा]॥ १८०॥

कृशाङ्गी कृतकृत्या च क्रःफट्वाहारूपिणी।
क्रौंक्रौंहूंफट्मन्त्रवर्णा क्रींह्रींहूँहट्नमस्स्वधा॥ १८१
॥

क्रींक्रींह्रींह्रींतथाहूंहूंफट्वाहामन्त्ररूपिणी।
इति श्रीसर्वसाम्राज्यमेधानाम सहस्त्रकम्॥ १८२॥

सुन्दरीशक्तिदानाख्या-स्वरूपाभिधमेव च।
कथितन्दक्षिणाकाल्याः सुन्दर्यै प्रीतियोगतः॥ १॥

वरदानप्रसङ्गेन रहस्यमपि दर्शितम्।

गोपनीयं सदा भक्त्या पठनीयम्परात्परम्॥ २॥

प्रातर्म्मध्याह्नकाले च मध्यार्द्धरात्रयोरपि।

p. 104) यज्ञकाले जपान्ते च पठनीयँव्विशेषतः॥ ३॥

यः पठेत्साधको धीरः कालीरूपो हि वर्षतः।

पठेद्वा पाठयेद्वापि शृणोति श्रावयेदपि॥ ४॥

वाचकन्तोषयेद्वापि स भवेत्कालिकातनुः।

सहेलँव्वा सलीलँव्वा यश्चैनम्मानवः पठेत्॥ ५॥

सर्वदुःखविनिर्मुक्तस्त्रैलोक्यविजयी कविः।

मृतवन्ध्या काकवन्ध्या कन्यावन्ध्या च वन्ध्यका॥ ६॥

पुष्पवन्ध्या शूलवन्ध्या शृणुयात्स्तोत्रमुत्तमम्।

सर्वसिद्धिप्रदातारं सत्कविश्चिरजीवितम्॥ ७॥

पाण्डित्यङ्कीर्त्तिसँउक्तँल्लभते नात्र संशयः।

स य्यङ्काममुपस्कृत्य कालीन्ध्यात्वा जपेत्स्तवम्॥ ८॥

तन्तङ्कामङ्करे कृत्वा मन्त्री भवति नान्यथा।
योनिपुष्पैर्ल्लिङ्गपुष्पैः कुण्डगोलोद्भवैरपि॥ ९॥

सँओगामृतपुष्पैश्च वस्त्रदेवीप्रसूनकैः।
कालिपुष्पैः पीठतोयैर्योनिक्षालनतोयकैः॥ १०॥

कस्तूरीकुङ्कुमैर्देवीन्नखकालागुरुक्रमात्।
अष्टगन्धैर्धूपदीपैर्य्यवयावय-सँयुतैः॥ ११॥

रक्तचन्दनसिन्दूरैर्मत्स्यमांसादिभूषणैः।
मधुभिः पायसैः क्षीरैः शोधितैः शोणितैरपि॥ १२॥

महोपचारै रक्तैश्च नैवेद्यैस्सुरसान्वितैः।
पूजयित्वा महाकालीम्महाकालेन लालिताम्॥ १३॥

विद्याराज्ञीङ्कुलुकाञ्च जप्त्वा स्तोत्रजपेच्छिवे।
कालीभक्तस्त्वेकचित्तः सिन्दूरतिलकान्वितः॥ १४॥

ताम्बूलपूरितमुखो मुक्तकेशो दिगम्बरः।
शवयोनिस्थितो वीरः श्मशानसुरतान्वितः॥ १५॥

शून्यालये बिन्दुपीठे पुष्पाकीर्णे शिवावने।
शयानोत्थप्रभुञ्जानः कालीदर्शनमाप्नुयात्॥ १६॥

तत्र यद्यत्कृतङ्कर्म तदनन्तफलम्भवेत्।
ऐश्वर्ये कमला साक्षात् सिद्धौ श्रीकालिकाम्बिका॥ १७॥

कवित्वे तारिणीतुल्यः सौन्दर्ये सुन्दरीसमः।
सिन्धोर्द्धारासमः कार्ये श्रुतौ श्रुतिधरस्तथा॥ १८॥

वज्रास्त्र इव दुर्द्धर्षस्त्रैलोक्यविजयास्त्रभृत्।
शत्रुहन्ता काव्यकर्त्ता भवेच्छिवसमः कलौ॥ १९॥

p. 105) दिग्विदिक्कन्द्रकर्त्ता च दिवारात्रिविपर्ययी।
महादेवसमो योगी त्रैलोक्यस्तम्भकः क्षणात्॥ २०॥

गानेन तुम्बुरुस्साक्षाद्दाने कर्णसमो भवेत्।
गजाश्वरथपत्तीनामस्त्राणामधिपः कृती॥ २१॥

आयुष्येषु भुशुण्डी च जरापलितनाशकः।

वर्षषोडशवान्भूयात्सर्वकाले महेश्वरी॥ २२॥

ब्रह्माण्डगोले देवेशि न तस्य दुर्लभं क्वचित्।
सर्वं हस्तगतम्भूयान्नात्र कार्या विचारणा॥ २३॥

कुलपुष्पयुतन्दृष्ट्वा तत्र कालींव्विचिन्त्य च।
विद्याराज्ञीन्तु सम्पूज्य पठेन्नामसहस्त्रकम्॥ २४॥

मनोरथमयी सिद्धिस्तस्य हस्ते सदा भवेत्।
परदारान्समालिङ्ग्य सम्पूज्य परमेश्वरीम्॥ २५॥

हस्ताहस्तिकयायोगङ्कृत्वा जप्त्वा स्तवम्पठेत्।
योनींव्वीक्ष्य जपेत्स्तोत्रङ्कुबेरादधिको भवेत्॥ २६॥

कुण्डगोलोद्भवङ्गृह्यवर्णार्क्तं होमयेन्निशि।
पितृभूमौ महेशानि विधिरेखाम्प्रमार्ज्जयेत्॥ २७॥

तरुणीं सुन्दरीं रम्याञ्चञ्चलाङ्कामगर्विताम्।
समानीय प्रयत्नेन संशोध्य न्यासयोगतः॥ २८॥

प्रसूनमञ्चं संस्थाप्य पृथिवीङ्कशिताञ्चरेत्।
मूलचक्रन्तु सम्भाव्य देव्याश्चारणसँयुतम्॥ २९॥

सम्पूज्य परमेशानि सङ्कल्प्य तु महेश्वरि।
जप्त्वा स्तुत्वा महेशानीम्प्रणवं संस्मरेच्छिवे॥ ३०॥

अष्टोत्तरशतैर्योनिम्प्रमन्त्र्याचुम्ब्य यत्नतः।
सँयोगीभूय जप्तव्यं सर्वविद्याधिपो भवेत्॥ ३१॥

शून्यागारे शिवारण्ये शिवदेवालये तथा।
शून्यदेशे तडागे च गङ्गागर्भे चतुष्पथे॥ ३२॥

श्मशाने पर्वतप्रान्ते एकलिङ्गे शिवामुखे।
मुण्डयोनौ ऋतौ स्नात्वा गेहे वेश्यागृहे तथा॥ ३३॥

कुट्टिनीगृहमध्ये च कदलीमण्डपे तथा।
पठेत्सहस्रनामाख्यं स्तोत्रं सर्वार्थसिद्धये॥ ३४॥

अरण्ये शून्यगर्त्ते च रणे शत्रुसमागमे।
प्रजपेच्च ततो नाम काल्याश्चैव सहस्रकम्॥ १३५॥

बालानन्दपरो भूत्वा पठित्वा कालिकास्तवम्।
कालीं सञ्चिन्त्य प्रजपेत्पठेन्नामसहस्रकम्॥ १३६॥

p. 106) सर्वसिद्धीश्वरो भूयाद्वाञ्छासिद्धीश्वरो भवेत्।
मुण्डचूडकयोर्योनि त्वचि वा कोमले शिवे॥ ३७॥

विष्टरे शववस्त्रे वा पुष्पवस्त्रासनेपि वा।
मुक्तकेशो दिशावासा मैथुनी शयने स्थितः॥ ३८॥

जप्त्वा कालीम्पठेत्स्तोत्रङ्खेचरी-सिद्धिभाग्भवेत्।
चिकुरँय्योगमासाद्य शुक्रोत्सारणमेव च॥ ३९॥

जप्त्वा श्रीदक्षिणाङ्कालीं शक्तिपातशतम्भवेत्।
लतां स्पृशञ्जपित्वा च रमित्वा त्वर्चयन्नपि॥ ४०॥

आलोकयन्दिशावासाः परशक्तिँव्विशेषतः।
स्तुत्वा श्रीदक्षिणाङ्कालीँय्योनिं स्वकरगाञ्चरेत्॥ ४१॥

पठेन्नामसहस्रँय्यः स शिवादधिको भवेत्।

लतान्तरेषु जप्तव्यं स्तुत्वा कालीन्निराकुलः॥ ४२॥

दशावधानो भवति मासमात्रेण साधकः।
कालरात्र्याम्महारात्र्याँव्वीररात्र्यामपि प्रिये॥ ४३॥

महारात्र्याञ्चतुर्द्दश्यामष्टम्यां संक्रमेपि वा।
कुहूपूर्णेन्दुशुक्रेषु भौमामायान्निशामुखे॥ ४४॥

नवम्याम्मङ्गलदिने तथा कुलतिथौ शिवे।
कुलक्षेत्रे प्रयत्नेन पठेन्नामसहस्रकम्॥ ४५॥

सौदर्शनो भवेदाशु किन्नरीसिद्धिभाग्भवेत्।
पश्चिमाभिमुखँलिङ्गँव्वृषशून्यम्पुरातनम्॥ ४६॥

तंत्र स्थित्वा जपेत्स्तोत्रं सर्वकामाप्तये शिवे।
भौमवारे निशीथे वा अमावस्यादिने शुभे॥ ४७॥

माषभक्तबलिञ्छागङ्कसरान्नञ्च पायसम्।
दग्धमीनं शोणितञ्च दधिदुग्धङ्गुडाद्रर्कम्॥ ४८॥

बलिन्दत्वा जपेत्तत्रत्वष्टोत्तरसहस्त्रकम्।
देवगन्धर्वसिद्धौघैः सेवितां सुरसुन्दरीम्॥ ४९॥

लभेद्देवेशि मासेन तस्य चासनसंहतिः।
हस्तत्रयम्भवेदूर्ध्वन्नात्र कार्या विचारणा॥ ५०॥

हेलया लीलया भक्त्या कालीं स्तौति नरस्तु यः।
ब्रह्मादींस्तम्भयेद्देवि माहेशीम्मोहयेत्क्षणात्॥ ५१॥

आकर्षयेन् महाविद्यान्दशपूर्वान्त्रियामतः।
कुर्वीत विष्णुनिर्माणँय्यमादीनान्तु मारणम्॥ ५२॥

ध्रुवमुच्चाटयेन्नूनं सृष्टिनूतनतान्नरः।
मेष-माहिष-मार्जार-खर-च्छाग-नरादिकैः॥ ५३॥

p. 107) खड्गी-शूकर-कपोतैष्टिट्टिभैश्शशकैः पलैः।
शोणितैस्सास्थिमांसैश्च कारण्डैर्दुग्धपायसैः॥ ५४॥

कादम्बरीसिन्दुमद्यैस्सुरारिष्टैश्च सासवैः।
योनिक्षालिततोयैश्च योनिलिङ्गामृतैरपि॥ ५५॥

स्वजातकुसुमैः पूज्यां जपान्ते तर्पयेच्छिवाम्।
सर्वसाम्राज्यनाम्ना तु स्तुत्वा नत्वा स्वशक्तितः॥ ५६॥

शक्त्यालभन् पठेत्स्तोत्रङ्कालीरूपो दिनत्रयात्।
दक्षिणाकालिका तस्य गेहे तिष्ठति नान्यथा॥ ५७॥

वेश्यालता गृहे गत्वा तस्याश्चुम्बनतत्परः।
तस्या योनौ मुखन्दत्वा तद्रसँव्विलिहज्जपेत्॥ ५८॥

तदन्ते नाम साहस्रम्पठेद्भक्तिपरायणः।
कालिकादर्शनन्तस्य भवेदेव त्रियामतः॥ ५९॥

नृत्यपात्रगृहे गत्वा मकारपञ्चकान्वितः।
प्रसूनमञ्चे संस्थाप्य शक्तिन्यासपरायणः॥ ६०॥

पात्राणां साधनङ्कृत्वा दिग्वस्त्रान्तां समाचरेत्।
सम्भाव्य चक्रन्तन्मूले तत्र सावरणाञ्जपेत्॥ ६१॥

शतम्भाले शतङ्केशे शतं सिन्दूरमण्डले।

शतत्रयङ्कुचद्वन्द्वे शतन्नाभौ महेश्वरि। ६२॥

शतँय्योनौ महेशानि सँयोगे च शतत्रयम्।
जपेत्तत्र महेशानि तदन्ते प्रपठेत्स्तवम्॥ ६३॥

शतावधानो भवति मासमात्रेण साधकः।
मातङ्गिनीं समानीय किँव्वा कापालिनीं शिवे॥ ६४॥

दन्तमाला जपे कार्या गले धार्या नृमुण्डजा।
नेत्रपद्मे योनिचक्रँशक्तिचक्रँस्ववक्रके॥ ६५॥

कृत्वा जपेन्महेशानि मुण्डयत्रम्प्रपूजयेत्।
मुण्डासनस्थितो वीरो मकारपञ्चकान्वितः॥ ६६॥

अन्यामालिङ्ग्य प्रजपेदन्यां सञ्चुम्ब्य वै पठेत्।
अन्यां सम्पूजयेत्तत्र त्वन्यां सम्मर्द्दयञ्जपेत्॥ ६७॥

अन्यायोनौ शिवन्दत्वा पुनः पूर्ववदाचरेत्।
अवधानसहस्त्रेषु शशिपातशतेषु च॥ ६८॥

राजा भवति देवेशि मासपञ्चकयोगतः।
यवनीशक्तिमानीय गानशक्तिपरायणाम्॥ ६९॥

कुलाचारमतेनैव तस्या योनिंव्विकासयेत्।
p. 108) तत्र जिह्वाम्प्रदत्त्वा तु जपेन्नामसहस्रकम्॥ ७०॥

नृकपाले तत्र दीपं ज्वाल्य यत्नेन वै जपेत्।
महाकविवरो भूयान्नात्र कार्या विचारणा॥ ७१॥

कामार्तो शक्तिमानीय योनौ तु मूलचक्रकम्।
विलिख्य परमेशानि तत्र मन्त्रँल्लिखेच्छिवे॥ ७२॥

तल्लिहन् प्रजपेद्देवि सर्वशास्त्रार्थतत्त्ववित्।
अश्रुतानि च शास्त्राणि वेदादीन्पाठयेद्ध्रुवम्॥ ७३॥

विना न्यासैर्विना पाठैर्विना ध्यानादिभिः प्रिये।
चतुर्वेदाधिपो भूत्वा त्रिकालज्ञस्त्रिवर्षतः॥ ७४॥

चतुर्विधञ्च पाण्डित्यन्तस्य हस्तगतङ्क्षणात्।
शिवाबलिः प्रदातव्या सर्वदा शून्यमण्डले॥ ७५॥

कालीध्यानम्मन्त्रचिन्ता नीलसाधनमेव च।
सहस्त्रनामपाठश्च कालीनामप्रकीर्तनम्॥ ७६॥

भक्तस्य कार्यमेतावदन्यदभ्युदयँव्विदुः।
वीरसाधनकङ्कर्म शिवापूजाबलिस्तथा॥ ७७॥

सिन्दूरतिलको देवि वेश्यालापो निरन्तरम्।
वेश्यागृहे निशाचारो रात्रौ पर्यटनन्तथा॥ ७८॥

शक्तिपूजा योनिदृष्टिः खड्गहस्तो दिगम्बरः।
मुक्तकेशो वीरवेषः कुलमूर्त्तिधरो नरः॥ ७९॥

कालीभक्तो भवेद्देवि नान्यथा क्षोभमाप्नुयात्।
दुग्धस्वादी योनिलेही सँविदासवघूर्णितः॥ ८०॥

वेश्यालतासमायोगान्मासात्कल्पलता स्वयम्।
वेश्याचक्रसमायोगात्कालीचक्रसमस्स्वयम्॥ ८१॥

वेश्यादेहसमायोगात्कालीदेहसमस्स्वयम्।

वेश्यामध्यगतँव्वीरङ्कदा पश्यामि साधकम्॥ ८२॥

एवँव्वदति सा काली तस्माद्वेश्या वरा मता।
वेश्याकन्या तथा पीठ-जातिमेदकुलक्रमात्॥ ८३॥

अकुलक्रमभेदेन ज्ञात्वा चापि कुमारिकाम्।
कुमारीम्पूजयेद्भक्त्या जपान्ते भवनं प्रिये॥ ८४॥

पठेन्नामसहस्रं यः कालीदर्शनभाग्भवेत्।
भक्त्या पूज्य कुमारीञ्च वेश्याकुलसमुद्भवाम्॥ ८५॥

वस्त्रहेमादिभिस्तोष्य यत्नात्स्तोत्रम्पठेच्छिवे।
त्रैलोक्यविजयी भूयाद्दिवाचन्द्रप्रकाशकः॥ ८६॥

p. 109) यद्यद्दत्तङ्कुमार्यै तु तदनन्तफलम्भवेत्।
कुमारीपूजनफलम्मया वक्तुन्न शक्यते॥ ८७॥

चाञ्चल्यादुदितङ्किञ्चित्क्षम्यतामयमञ्जलिः।
एका चेत्पूजिता बाला द्वितीया पूजिता भवेत्॥ ८८॥

कुमार्यश्शक्तयश्चैव सर्वमेतच्चराचरम्।
शक्तिमानीय तद्मात्रे न्यासजालम्प्रविन्यसेत्॥ ८९॥

वामभागे च संस्थाप्य जपेन्नामसहस्त्रकम्।
सर्वसिद्धीश्वरो भूयान्नात्र कार्या विचारणा॥ ९०॥

श्मशानस्थो भवेत्स्वस्थो गलितञ्चिकुरञ्चरेत्।
दिगम्बरः सहस्त्रञ्च सूर्यपुष्पं समानयेत्॥ ९१॥

स्ववीर्येण युतङ्कृत्वा प्रत्येकम्प्रजपन् हुनेत्।
पूज्य ध्यात्वा महाभक्त्या क्षमापालो नरः पठेत्॥ ९२॥

नखकेशं स्ववीर्यञ्च यद्यत्सम्मार्ज्जनीगतम्।
मुक्तकेशो दिशावासो मूलमन्त्रपुरःसरः॥ ९३॥

कुजवारे मध्यरात्रे होमङ्कृत्वा श्मशानके।
पठेन्नाम सहस्रं य्यः पृथ्वीशाकर्षणम्भवेत्॥ ९४॥

पुष्पयुक्ते भगे देवि सँयोगानन्दतत्परः।
पुनश्चिकुरमासाद्य मूलमन्त्रञ्जपञ्शिवे॥ ९५॥

चितावह्नौ मध्यरात्रे वीर्यमुत्सार्य यत्नतः।
कालिकाम्पूजयेत्तत्र पठेन्नामसहस्रकम्॥ ९६॥

पृथ्वीशाकर्षणङ्कुर्यान्नात्र कार्या विचारणा।
कदलीवनमासाद्य लक्षमात्रञ्जपेन्नरः॥ ९७॥

मधुमत्या स्वयन्देव्या सेव्यमानः स्मरोपमः।
श्रीमधुमतीत्युक्त्वा तथा स्थावरजङ्गमान्॥ ९८॥

आकर्षिणीं समुच्चार्य ठं ठं स्वाहा समुच्चरेत्।
त्रैलोक्याकर्षिणी विद्या तस्य हस्ते सदा भवेत्॥ ९९॥

नदीम्पुरीञ्च रत्नानि हेमस्त्रीशैलभूरुहान्।
आकर्षयत्यम्बुनिधिं सुमेरुञ्च दिगन्ततः॥ १००॥

अलभ्यानि च वस्तूनि दूराद्भूमितलादपि।
वृत्तान्तञ्च सुरस्थानाद्रहस्यँव्विदुषामपि॥ १०१॥

राज्ञाञ्च कथयत्येषा सत्यं सत्वरमादिशेत्।

द्वितीयवर्षपाठेन भवेत्पद्मावती शुभा॥ १०२॥

ॐ ह्रींपद्मावतिपदन्ततस्त्रैलोक्यनाम च।
वार्त्ताञ्च कथय द्वन्द्वं स्वाहान्तो मन्त्र ईरितः॥ १०३॥

p. 110) ब्रह्मविष्ण्वादिकानाञ्च त्रैलोक्ये यादृशी भवेत्।
सर्वँव्वदति देवेशी त्रिकालज्ञः कविश्शुभः॥ १०४॥

त्रिवर्षम्पठतो देवि लभेद्भोगवतीङ्कलाम्।
महाकालेन दष्टोऽपि चितामध्यगतोऽपि वा॥ १०५॥

तस्या दर्शनमात्रेण चिरञ्जीवी नरो भवेत्।
मृतसञ्जीविनीत्युक्त्वा मृतमुत्थापय द्वयम्॥ १०६॥

स्वाहान्तो मनुराख्यातो मृतसञ्जीवनात्मकः।
चतुर्वर्षम्पठेद्यस्तु स्वप्नसिद्धस्ततो भवेत्॥ १०७॥

ॐ ह्रींस्वप्नवाराहि कलिस्वप्ने कथयोच्चरेत्।
अमुकस्यामुकन्देहि क्रींस्वाहान्तो मनुर्मतः॥ १०८॥

स्वप्नसिद्धा चतुर्वषात्तस्य स्वप्ने सदा स्थिता।
चतुर्वर्षस्य पाठेन चतुर्वेदाधिपो भवेत्॥ १०९॥

तद्धस्तजलसँयोगान्मूर्खः काव्यङ्करोति च।
तस्य वाक्यपरिचयान्मूर्तिर्विन्दति काव्यताम्॥ ११०॥

मस्तके तु करङ्कृत्वा वद वाणीमिति ब्रुवन्।
साधको वाच्छया कुर्यात्तत्तथैव भविष्यति॥ १११॥

ब्रह्माण्डगोलके याश्च याः काश्चिज्जगतीतले।
समस्तास्सिद्धयो देवि करामलकवद्भवेत्॥ ११२॥

साधकस्मृतिमात्रेण यावन्त्यस्सन्ति सिद्धयः।
स्वयमायान्ति पुरतो जपादीनान्तु का कथा॥ ११३॥

विदेशवर्त्तिनो भूत्वा वर्त्तन्ते चेटका इव।
अमायाञ्चन्द्रसन्दर्शश्चन्द्रग्रहणमेव च॥ ११४॥

अष्टम्याम्पूर्णचन्द्रत्वञ्चन्द्रसूर्याष्टकन्तथा।
अष्टदिक्षु तथाष्टौ च करोत्येव महेश्वरी॥ ११५॥

अणिमाखेचरत्वञ्च चराचरपुरीगतिम्।
पादुकाखड्गवेतालयक्षिणीगुह्यकादयः॥ ११६॥

तिलको गुप्ततादृश्यञ्चराचरकथानकम्।
मृतसञ्जीविनीसिद्धिर्गुटिका च रसायनम्॥ ११७॥

उड्डीनसिद्धिर्देवेशि पष्टिसिद्धीश्वरत्वकम्।
तस्य हस्ते वसेद्देवि नात्र कार्या विचारणा॥ ११८॥

केतौ वा दुन्दुभौ वस्त्रे विताने वेष्टने गृहे।
p. 111) भित्तौ च फलके देवि लेख्यम्पूज्यञ्च यत्नतः॥ ११९॥

मध्ये चक्रन्दशाङ्गोक्तम्परितो नामलेखनम्।
तद्धारणान्महेशानि त्रैलोक्यविजयी भवेत्॥ १२०॥

एको हि शतसाहस्रन्निर्जित्य च रणाङ्गणे।
पुनरायाति च सुखं स्वगृहम्प्रति पार्वति॥ १२१॥

एको हि शतसन्दर्शी लोकानाम्भवति ध्रुवम्।

कशलं स्थाप्य यत्नेन नाम सहस्रकम्पठेत्॥ १२२॥

सेकः कार्यो महेशानि सर्वापतिनिवारणे।
भूतप्रेतग्रहादीनां रक्षसाम्ब्रह्मरक्षसाम्॥ १२३॥

वेतालानाम्भैरवाणां स्कन्दवैनायकादिकान्।
नाशयेत् क्षणमात्रेण नात्रकार्या विचारणा॥ १२४॥

भस्माभिमन्त्रितङ्कृत्वा ग्रहग्रस्ते विलेपयेत्।
भस्मसङ्क्षेपणादेव सर्वग्रहविनाशनम्॥ १२५॥

नवनीतञ्चाभिमन्त्र्य स्त्रीणान्दद्यान्महेश्वरि।
वन्ध्या पुत्रप्रदा देवि नात्र कार्या विचारणा॥ १२६॥

कण्ठे वा वामबाहौ वा योनौ वा धारणाच्छिवे।
बहुपुत्रवती नारी सुभगा जायते ध्रुवम्॥ १२७॥

पुरुषो दक्षिणाङ्गे तु धारयेत्सर्वसिद्धये।
बलवान्कीर्त्तिमान् धन्यो धार्मिकः साधकः कृती॥ १२८॥

बहुपुत्रो रथानाञ्च गजानामधिपः सुधीः।
कामिनीकर्षणोद्युक्तः क्रीञ्चदक्षिणकालिके॥ १२९॥

क्रींस्वाहा प्रजपेन्मन्त्रमयुतन्नामपाठकः।
आकर्षणञ्चरेद्देवि जलखेचरभूगतान्॥ १३०॥

वशीकरणकामो हि हूं हूं ह्रीं ह्रीं च दक्षिणे।
कालिके पूर्वबीजानि पूर्ववत्प्रजपन् पठेत्॥ १३१॥

उर्व्वशीमपि वशयेन्नात्र कार्या विचारणा।
क्रीञ्चदक्षिणकालिके स्वाहायुक्तञ्जपेन्नरः॥ १३२॥

पठेन्नाम सहस्रन्तु त्रैलोक्यम्मारयेद्ध्रुवम्।
सद्भक्ताय प्रदातव्या विद्याराज्ञि शुभे दिने॥ १३३॥

सद्विनीताय शान्ताय दान्तायातिगुणाय च।
भक्ताय ज्येष्ठपुत्राय गुरुभक्तिपराय च॥ १३४॥

वैष्णवाय प्रशुद्धाय शिवावलिरताय च।
वेश्यापूजनयुक्ताय कुमारीपूजकाय च॥ १३५॥

p. 112) दुर्गाभक्ताय रौद्राय महाकालप्रजापिने।
अद्वैतभावयुक्ताय कालीभक्तिपराय च॥ १३६॥

देयं सहस्रं नामाख्यं स्वयङ्काल्या प्रकाशितम्।
गुरुदैवतमन्त्राणां महेशस्यापि पार्वति॥ १३७॥

अभेदेन स्मरेन्मन्त्रं स शिवः स गणाधिपः।
यो मन्त्रम्भावयेन्मन्त्री स शिवो नात्र संशयः॥ १३८॥

स शाक्तो वैष्णवस्सौरः स एव पूर्णदीक्षितः।
अयोग्याय न दातव्यं सिद्धिरोधः प्रजायते॥ १३९॥

वेश्यास्त्रीनिन्दकायाथ सुरासँवित्प्रनिन्दके।
सुरामुखीमनुं स्मृत्वा सुराचारो भविष्यति॥ १४०॥

आसां वाग्देवता घोरे परघोरे च हूँव्वदेत्।
घोररूपे महाघोरे मुखी भीमपदँव्वदेत्॥ १४१॥

भीषण्यमुपषष्ठयन्तं हेतुर्वामयुगे शिवे।

शिववह्नियुगास्त्रं हूँऊँअवचमनुर्भवेत्॥ १४२॥

एतस्य स्मरणादेव दुष्टानाञ्च मुखे सुरा।
अवतीर्णा भवेद्देवी दुष्टानाम्भद्रनाशिनी॥ १४३॥

खलाय परतन्त्राय परनिन्दापराय च।
भ्रष्टाय दुष्टसत्त्वाय परवादरताय च॥ १४४॥

शिवाभक्ताय दुष्टाय परदाररताय च।
न स्तोत्रन्दर्शयेद्देवि शिवाहत्याकरो भवेत्॥ १४५॥

कालिकानन्दहृदयः कालिकाभक्तिमानसः।
कालीभक्तो भवेत्सो हि धन्यरूपस्स एव तु॥ १४६॥

कलौ काली कलौ काली कलौ काली वरप्रदा।
कलौ काली कलौ काली कलौ काली तु केवला॥ १४७॥

बिल्वपत्रसहस्राणि करवीराणि वै तथा।
प्रतिनाम्ना पूजयेद्धि तेन काली वरप्रदा॥ १४८॥

कमलानां सहस्रन्तु प्रतिनाम्ना समर्पयेत्।
चक्रं सम्पूज्य देवेशि कालिकावरमाप्नुयात्॥ १४९॥

मन्त्रक्षोभयुतो नैव कलशस्थजलेन च।
नाम्ना प्रसेचयेद्देवि सर्वक्षोभविनाशकृत्॥ १५०॥

तथा मदनकन्देवि सहस्रमाहरेद्व्रती।
सहस्रनाम्ना सम्पूज्य कालीवरमवाप्नुयात्॥ १५१॥

चक्रँव्विलिख्य देहस्थन्धारयेत्कालिकातनुः।
काल्यै निवेदितं यद्यत्तदंशम्भक्षयेच्छिवे॥ १५२॥

p. 113) दिव्यदेहधरो भूत्वा कालीदेहे स्थिरो भवेत्।
नैवेद्यनिन्दकान् दुष्टान् दृष्ट्वा नृत्यन्ति भैरवाः॥ १५३॥

योगिन्यश्च महावीरा रक्तपानोद्यताः प्रिये।
मांसास्थिचर्मणोद्युक्ता भक्षयन्ति न संशयः॥ १५४॥

तस्मान्न निन्दयेद्देवि मनसा कर्मणा गिरा।
अन्यथा कुरुते यस्तु तस्य नाशो भविष्यति॥ १५५॥

क्रमदीक्षायुतानाञ्च सिद्धिर्भवति नान्यथा।
मन्त्रक्षोभश्च वा भूयात्क्षीणायुर्वा भवेद्ध्रुवम्॥ १५६॥

पुत्रहारी स्त्रियोहारी राज्यहारी भवेद्ध्रुवम्।
क्रमदीक्षायुतो देवि क्रमाद्राज्यमवाप्नुयात्॥ १५७॥

एकवारम्पठेद्देवि सर्वपापविनाशनम्।
द्विवारञ्च पठेद्यो हि वाञ्छाँविन्दति नित्यशः॥ १५८॥

त्रिवारञ्च पठेद्यस्तु वागीशसमताँव्व्रजेत्।
चतुर्वारम्पठेद्देवि चतुर्वर्णाधिपो भवेत्॥ १५९॥

पञ्चवारम्पठेद्देवि पञ्चकामाधिपो भवेत्।
षड्वारञ्च पठेद्देवि षडैश्वर्याधिपो भवेत्॥ १६०॥

सप्तवारम्पठेत्सप्तकामानाञ्चिन्तितँल्लभेत्।
वासुवारम्पठेद्देवि दिगीशो भवति ध्रुवम्॥ १६१॥

नववारम्पठेद्देवि नवनाथसमो भवेत्।

दशवारङ्कीर्त्तयेद्यो दशार्हः खेचरेश्वरः॥ १६२॥

विंशद्वारङ्कीर्त्तयेद्यः सर्वैश्वर्यमयो भवेत्।
पञ्चविंशतिवारैस्तु सर्वचिन्ताविनाशकः॥ १६३॥

पञ्चाशद्वारमावर्त्य पञ्चभूतेश्वरो भवेत्।
शतवारङ्कीर्त्तयेद्यः शताननसमानधीः॥ १६४॥

शतपञ्चकमावर्त्त्यँराजराजेश्वरो भवेत्।
सहस्रावर्त्तनाद्देवि लक्ष्मीरावृणुते स्वयम्॥ १६५॥

त्रिसहस्रं समावर्त्त्य त्रिनेत्रसदृशो भवेत्।
पञ्चसाहस्रमावर्त्त्य कामकोटिविमोहनः॥ १६६॥

दशसहस्रावर्त्तनैर्भवेद्दशमुखेश्वरः।
पञ्चविंशतिसाहस्रैश्चतुर्विंशतिसिद्धिधृक्॥ १६७॥

लक्षावर्त्तनमात्रेण लक्ष्मीपतिसमो भवेत्।
लक्षत्रयावर्त्तनात्तु महादेवँव्विजेष्यति॥ १६८॥

लक्षपञ्चकमावर्त्त्य कलापञ्चकसँयुतः।

दशलक्षावर्तनात्तु दशविद्याप्तिरुत्तमा॥ १६९॥

p. 114) पञ्चविंशतिलक्षैस्तु दशविद्येश्वरो भवेत्।

पञ्चाशल्लक्षमावृत्य महाकालसमो भवेत्॥ १७०॥

कोटिमावर्त्तयेद्यस्तु कालीम्पश्यति चक्षुषा।

वरदानोद्युक्तकराम्महाकालसमन्विताम्॥ १७१॥

प्रत्यक्षम्पश्यति शिवे तस्या देहो भवेद्ध्रुवम्।

श्रीविद्या-कालिका-तारा-त्रिशक्तिविजयी भवेत्॥ १७२॥

विधेर्ल्लिपिञ्च सम्मार्ज्य किङ्करत्वँव्विसृज्य च।

महाराज्यमवाप्नोति नात्र कार्या विचारणा॥ १७३॥

त्रिशक्तिविषये देवि क्रमदीक्षा प्रकीर्त्तिता।

क्रमदीक्षायुतो देवि राजा भवति निश्चितम्॥ १७४॥

क्रमदीक्षाविहीनस्य फलम्पूर्वमिहेरितम्।

क्रमदीक्षायुतो देवि शिव एव न चापरः॥ १७५॥

क्रमदीक्षासमायुक्तः काल्योक्तसिद्धिभाग्भवेत्।
क्रमदीक्षाविहीनस्य सिद्धिहानिः पदे पदे॥ १७६॥

अहो जन्मवताम्मध्ये धन्यः क्रमयुतः कलौ।
तत्रापि धन्यो देवेशि नामसाहस्रपाठकः॥ १७७॥

दशकालीविधौ देवि स्तोत्रमेतत्सदा पठेत्।
सिद्धिंविन्दति देवेशि नात्र कार्या विचारणा॥ १७८॥

काली काली महाविद्या कलौ काली च सिद्धिदा।
कलौ काली च सिद्धा च कलौ काली वरप्रदा॥ १७९॥

कलौ काली साधकस्य दशनार्थं समुद्यता।
कलौ काली केवला स्यान्नात्र कार्या विचारणा॥ १८०॥

नान्यविद्या नान्यविद्या नान्यविद्या कलौ भवेत्।
कलौ कालींव्विहायाथ यः कश्चित्सिद्धिकामुकः॥ १८१॥

स तु शक्तिंव्विना देवि रतिसम्भोगमिच्छति।

कलौकालींव्विना देवि यः कश्चित्सिद्धिमिच्छति॥ १८२॥

स नीलसाधनन्त्यक्त्वा परिभ्रमति सर्वतः।
कलौ कालींव्विहायाथ यः कश्चिन्मोक्षमिच्छति॥ १८३॥

गुरुध्यानम्परित्यज्य सिद्धिमिच्छति साधकः।
कलौ कालींव्विहायाथ यः कश्चिद्राज्यमिच्छति॥ १८४॥

स भोजनम्परित्यज्य भुक्षुवृत्तिमभीप्सति।
p. 115) स धन्यः स च विज्ञानी स एव सुरपूजितः॥ १८५॥

स दीक्षितः सुखी साधुः सत्यवादी जितेन्द्रियः।
स वेदवक्ता स्वाध्यायी नात्र कार्या विचारणा॥ १८६॥

शिवरूपङ्गुरुन्ध्यात्वा शिवरूपङ्गुरुं स्मरेत्।
सदाशिवः स एव स्यान्नात्र कार्या विचारणा॥ १८७॥

स्वस्मिन् कालीन्तु सम्भाव्य पूजयेज्जगदम्बिकाम्।
त्रैलोक्यविजयी भूयान्नात्र कार्या विचारणा॥ १८८॥

गोपनीयङ्गोपनीयङ्गोपनीयम्प्रयत्नतः।
रहस्यातिरहस्यञ्च रहस्यातिरहस्यकम्॥ १८९॥

श्लोकार्द्धम्पादमात्रँव्वा पादार्द्धञ्च तदर्द्धकम्।
नामार्द्धँय्यः पठेद्देवि न वन्ध्यदिवसन्न्यसेत्॥ १९०॥

पुस्तकम्पूजयेद्भक्त्या त्वरितम्फलसिद्धये।
न च मारीभयन्तत्र न चाग्निर्वायुसम्भवम्॥ १९१॥

न भूतादिभयन्तत्र सर्वत्र सुखमेधते।
कुङ्कुमालक्तकेनैव रोचनागुरुयोगतः॥ १९२॥

भूर्ज्जपत्रे लिखेत्पुस्तं सर्वकामार्त्थसिद्धये॥ १९३॥

इति गदितमशेषङ्कालिकावर्णरूपम्प्रपठति यदि भक्त्या
सर्वसिद्धीश्वरः स्यात्॥
अभिनवसुखकामस्सर्वविद्याभिरामो भवति
सकलसिद्धिस्सर्ववीरासमृद्धिः॥ १९४॥

इति सङ्क्षेपतः प्रोक्तङ्किमन्यच्छ्रोतुमिच्छसि॥ १९५॥

इति कालीसहस्रनामस्तोत्रं सम्पूर्णम्॥

॥ इति श्रीशाक्तप्रमोदे कालीतन्त्रं समाप्तम्॥

श्रीः

शिवहरराजधानीपतिश्रीराजादेवनन्दनसिंह-

बहादुरनराधिपसंगृहीतविरचित

शाक्तप्रमोदान्तर्गतं

द्वितीयं

तारातन्त्रम्

उक्तराजगुरुवंश्यपण्डितश्रीरघुराजदुबेजीद्वारा

संशोधितम्

तदेतत्

श्रीकृष्णदासात्मज-खेमराजेन

स्वकीये श्रीवेंकटेश्वर यन्त्रालये

मुद्रयित्वा प्रकाशितम्

बोम्ब-ई

p. 119) श्रीगणेशाय नमः

अथ शाक्तप्रमोदः

तारातन्त्रम्

अथ ताराध्यानम्

प्रत्यालीढपदार्पिताङ्घ्रिशवहृद्घोराट्टहासापरा
खड्गेन्दीवरकर्त्तृखर्परभुजा हुङ्कारबीजोद्भवा।
खर्वा नीलविशालपिङ्गलजटाजूटैकनागैर्युता
जाड्यन्न्यस्य कपालकर्तृजगतां हन्त्युग्रतारा स्वयम्॥

p. 120) अथ यन्त्रोद्धारः

सयोनिञ्चन्दनेनाष्टदलम्पद्मँल्लिखेत्ततः॥
मृद्वासनं समासाद्य मायाम्पूर्वदले लिखेत्॥
बीजन्द्वितीयँय्याम्ये फट् उत्तरे पश्चिमे तु ठम्॥
मध्ये बीजँल्लिखेत्तारम्भूतशुद्धिमथाचरेत्॥

अथ मन्त्रोद्धारः

वाग्बीजम्प्रथमम्प्रोच्य ओङ्कारन्तु ततः पठेत्॥
लज्जाबीजन्ततस्ताराबीजं हूँहट् ततः पठेत्॥

अथ मन्त्रः

ऐं ओं ह्रीं क्रीं हूँफट्॥

अथ तारासपर्यासरणिः

कुशहस्तो मौनी मूलेनाचम्य,
ॐ वज्रोदके हूँहट् इत्यनेन जलङ्गृहीत्वा, ॐ ह्रींस्वाहा
इत्यनेन पादौ प्रक्षाल्य, ॐ
ह्रींस्वविशुद्धधर्मसर्वपापानि
शमयाशेषविकल्पानपनय स्वाहा इत्यनेनाचम्य, ॐ
मणिधरि वज्रिणि शिखरिणि सर्ववशङ्करि हूँहट्
इतिशिखाबन्धनङ्कृत्वा, ॐ रक्षरक्षहूँहट्वाहा इति
भूमिं संशोध्य, ॐ पवित्रवज्रम्मेहूँवाहा
इतिभूमिमभिमन्त्र्य ॐ आसुरेश्वरि वज्ररेखे हूँवाहा
इत्यनेन भूमिं स्पृष्ट्वा,
आधारशक्तिकमलासनायनमः इतिसम्पूज्य, तत आसनं
स्पृष्ट्वा पृथ्वीत्यादिमन्त्रम्पठेत्॥

p. 121) ततः सर्वविघ्नानुत्सार्य ततः

ॐ अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः॥

ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया

इत्यनेनाक्षतप्रक्षेपेण सर्वविघ्नानुत्सारयेत्॥
गन्धपुष्पाभ्यां करौ सम्मर्घ्य,
तत्पुष्पमैशान्यान्नाराचमुद्रया प्रक्षिपेत्॥ तत्र मन्त्रः
ॐ ते सर्वे विलयँय्यान्तु ये मां हिंसन्ति हिंसकाः॥
मृत्युरोगभयक्रोधाः पतन्तु रिपुमस्तके हूँहट्॥
ततस्सामान्यार्घ्यस्थापनविधिः ॥ तत्र ॐ
आधारशक्तयेनमः इत्यनेनाधारशक्तिमभिमन्त्र्य, तत्र
चतुरस्रँल्लिखित्वा, तदुपरि ॐ ह्रः
सामान्यार्घ्यस्थापयामिनमः
इतिसामान्यार्घ्यस्थापनङ्कृत्वा, तस्मिन्प्रणवेन
जलन्निधाय, तत्र गङ्गे च यमुने चैव गोदावरि सरस्वति।
नर्म्मदे सिन्धु कावेरि जलेऽस्मिन्सन्निधिङ्कुरु
इतिसूर्यमण्डलादङ्कुशमुद्रया तीर्थानि तत्रावाह्य,
पुष्पाक्षतैः गङ्गादिसकलतीर्त्थेभ्यो नमः इति तत्र
सम्पूज्य हृदयादिषडङ्गदेवताभ्योनम इतिसम्पूज्य ॐ
आं अर्कमण्डलायद्वादशकलात्मनेनमः इति, ॐ
वह्निमण्डलायदशकलात्मनेनम इति, ॐ
डंसोममण्डलायषोडशकलात्मनेनम इति-

अर्कवह्निचन्द्रमण्डलानि सम्पूज्य, वमिति
धेनुमुद्रयाऽमृतीकृत्य, हूमिति कवचेनावगुण्ठ्य
फडित्यस्त्रेण संरक्ष्य, तत्र प्रणवन्दशवारञ्जपेत्॥ इति
सामान्याग्घ्र्यस्थापनविधिः॥
सामान्याग्घ्र्यस्थजलेनात्मानम्पूजोपकरणानि
चाभिषिच्य, ततो विशेषाग्घ्र्यस्थापनविधिः॥ तद्यथा ॐ
आसुरेखे वज्ररेखे हूँवाहा इति मण्डलँविरच्य, ततः
नवमितिभुवं सम्मृज्य॥ तत्र त्रिकोणवृत्तभूगृहात्मकं
मण्डलँव्विधाय, तत्र आधारशक्तिङ्कूर्मशेषौ च
सम्पूज्य, तत्राधारम् ह्रींफट् इति मन्त्रेण संस्थाप्य,
पूर्वोक्तवह्निमण्डलमन्त्रेण तत्तन्मण्डलमभ्यर्च्च्य, तत्र
शङ्खम् हूंफट् इतिमन्त्रेण प्रक्षालितं संस्थाप्य,
मन्त्रचतुष्टयञ्जपञ्शङ्खमर्च्चयेत्॥ तद्यथा
ह्राँरीँरूँकालीकपालायनमः,

p. 122) स्त्राँत्रीँत्रूँआरिणीकपालायनमः,
ह्राँईँऊँईलकपालायनमः,
ह्राँत्रीँऊँवर्गकपालायसर्वाधाराय सर्वोद्भवाय
सर्वशुद्धिमयाय सर्वासुररुधिरारुणाय शुभ्राय
सुराभाजनाय देवीकपालायनमः इतिमन्त्रचतुष्टयम्॥

ततः पूर्वोक्तार्कमण्डलमन्त्रेण तन्मण्डलं सम्पूज्य,

ततो मूलमन्त्रेण शङ्खे जलन्निधाय, स्वधाबुद्ध्या, तत्र

गन्धपुष्पाक्षतान्क्षिपेत्॥ तत्र

त्रिखण्डाम्मुद्राम्प्रदश्र्श्य तत्र

पूर्वोक्तचन्द्रमण्डलमन्त्रेण तन्मण्डलं सम्पूज्य,

ऐंह्रींश्रींह्रों-ओंह्रींत्रींहूँहट् ह्सौँहूँ

इत्यनेनाष्टकृत्वो जलमभिमन्त्र्य, ह्रीमितिमन्त्रेण

शङ्खमुद्रान्धेनुमुद्राँय्योनिमुद्रान्दर्शयित्वा,

मत्स्यमुद्रया आच्छाद्य, दशवारम्मूलमन्त्रञ्जपेत्॥ तत्र

वृत्ताष्टदलषट्कोणन्ध्यात्वा, देवीम्प्रविचिन्त्य, सम्पूज्य,

मूलेन चतुर्वारं सन्तर्प्प्य, ऐंह्रौंह्सौंनम

आनन्दभैरवन्तर्पयामि इतिमन्त्रेण सन्तर्प्य,

तेनाग्र्घ्यतोयेन पूजासाधनानि प्रोक्षयेत्॥

इतिविशेषाग्र्घ्यस्थापनविधिः॥ ॐ

यथागताभिषेकममाग्निमेहूँहत् इतिमन्त्रेण पुष्पं

संशोध्य, ॐ आँरींस्वाहा इति चित्तशोधनङ्कुर्यात्॥ तत

ऋष्यादिन्यासः॥ तद्यथा -

शिरसि वसिष्ठाय ऋषयेनमः॥

मुखे अनुष्टुप्छन्दसेनमः॥

हृदये त्र्यम्बकदेवतायनमः॥

ततो हृदयादिन्यासः॥

ह्रांहृदयायनमः॥

ह्रींशिरसेस्वाहा।

ह्रूंशिखायैवषट्।

ह्रैंकवचायहुम्।

ह्रौंनेत्रत्रयायवौषट्।

ह्रः अस्त्रायफट्।

ततः करन्यासः॥ यथा॥

ह्रां अङ्गुष्ठाभ्यान्नमः।

ह्रींतर्जनीभ्यांस्वाहा।

ह्रूंमध्यमाभ्यांवषट्।

ह्रैं अनामिकाभ्यांहूम्।

ह्रौंकनिष्ठिकाभ्यां वौषट्।

ह्रः करतलकरपृष्ठाभ्यांफट्॥

ततो मूलेन त्रिधाव्यापकन्यासङ्कुर्यात्॥ ततो मूलेन
स्वबीजेन वा प्राणायामत्रयङ्कुर्यात्। तद्यथा
चतुर्वारजपेन पूरकः, षोडशवारजपेन कुम्भकः,

अष्टवारजपेन रेचकः॥ तद्विपरीतो द्वितीयः॥

तद्विपरीतस्तृतीयः॥ ततः

षट्कोणाष्टदलभूपुरात्मकयन्त्रं विलिख्य,

p. 123) मध्ये ह्सौंबीजँव्विलिख्य यन्त्रसंस्कारञ्च कृत्वा॥

तत्र मध्ये

मेधाप्रज्ञाविद्याधीधृतिस्मृतिबुद्धिविद्यैश्वर्यः

पूज्याः॥ ततः पुष्पङ्गृहीत्वा ह्सौंसरस्वतीयोगपीठाय

नमः इति यन्त्रमध्ये पुष्पम्प्रक्षिपेत्॥ ततो देवीन्ध्यायेत्॥

तद्यथा -

विश्वव्यापकवारिमध्यविलसच्छ्वेताम्बुजन्मास्थितां

कर्त्रीं खड्गकपालनीलनलिनै राजत्करामिन्दुभाम्॥

काञ्चीकुण्डलहारकङ्कणलसत्केयूरमञ्जीरतामाप्तैर्न्न

अगवरैर्विभूषिततनूमारक्तनेत्रत्रयाम्॥ १ ॥

पिङ्गोग्रैकजटाँ

ल्लसत्स्वरसनान्दंष्ट्राकरालाननाञ्चर्मद्वैपिवरङ्कटौ

विदधतीं श्वेतास्थिपट्टालिकाम्॥ अक्षोभ्येण

विराजमानशिरसं स्मेराननाम्भोरुहान्तारां

शावहृदासनान्दृढकुचामम्बान्त्रिलोक्याः स्मरेत्॥ इति

ध्यात्वा करकक्षपिकाम्बद्धा तत्र पुष्पाक्षतङ्गृहीत्वा॥
ततो मूलाधारात् कुण्डलिनीमुत्थाप्य,
द्वितीयाम्मूर्त्तिन्निस्सार्य, तन्मुखे सोहम् इति
प्रदीपकलिकाञ्जीवमूर्त्तिन्निःक्षिप्य तां
सहस्त्रदलपद्मस्थब्रह्मणा सँओज्य,
चन्द्रमण्डलस्थामृतेन सन्तोष्य कुण्डलिन्याजीवमूर्त्तिँ
व्वियोज्य, दक्षिणनासापुटेन निस्सृतम्पुष्पाक्षतँव्विभाव्य,
तत्पुष्पाक्षतषट्कोणाष्टदलभूगृहात्मकयन्त्रे निःक्षिप्य,
तत्र देवीमावाहयेत्॥ तद्यथा -

महापद्मवनान्तस्थे कारणानन्दविग्रहे॥
सर्वभूत हते मातरेह्येहि परमेश्वरि॥

इति पठित्वा मूलञ्च पठन् अमुकदेवि इहागच्छ इह तिष्ठ
मम पूजाङ्गृहाण इह सन्निधेहि इह सन्निरुध्यस्व इह
सम्मुखीभव इति तत्तन्मुद्राः प्रदर्श्य, एष पुष्पाञ्जलिः
मूलमन्त्रमुच्चार्य, अमुकदेवि वज्रपुष्पम्प्रतीक्ष्य
हूँहट्टाहा अमुकदेव्यै नमः इतिपठन्
पुष्पाञ्जलिपञ्चकङ्क्षिपेत्॥
इदम्पाद्यम्मूलमन्त्रमुच्चार्य अमुकदेव्यै नमः।

इदमाचमनीयम् मूलमन्त्रमुच्चार्य अमुकदेव्यै नमः इति
पठित्वा दद्यात्। एष मधुपर्कः मूलमन्त्रमुच्चार्य
अमुकदेव्यैनमः

p. 124) इति पठित्वा मधुपर्कन्दद्यात्। इदं
स्नानीयम्मूलमन्त्रमुच्चार्य अमुकदेव्यै नमः इति देवीं
स्नापयेत्। एवं वसनभूषणे दद्यात्। इमानि पुष्पाणि
मूलमन्त्रमुच्चार्य वज्रपुष्पम्प्रतीक्ष्य हूँहट्वाहा
अमुकदेव्यै वौषट् इति पठित्वा पुष्पाणि दद्यात्। तत
आवरणपूजा, पूर्वं गणेशम्पूजयेत्॥ तद्यथा -
गणेश इहागच्छ इह तिष्ठेत्यादिना पूजयेत्।
पुष्पदाने विशेषमनुः गंगणेश
वज्रपुष्पम्प्रतीक्ष्यफट्वाहा इत्यनेन पुष्पन्दद्यात्।
एवम्बटुकन्दक्षिणे पूजयेत्। एवङ्क्षेत्रपालम्पश्चिमे
पूजयेत्। उत्तरे योगिनीम्पूजयेत्। ततो देव्या मस्तके
अक्षोभ्यम्पूजयेत्। अक्षोभ्यँव्वज्रपुष्पम्प्रतीक्ष्यस्वाहा
इतिमन्त्रेणाक्षोभ्यम्पूजयेत्। ततष्षट्कोणेषु
षडङ्गम्पूजयेत्। तद्यथा एकजटायैनम इतिहृदयाय
तारिण्यै नम इतिशिरसि। वज्रोदकायै नम इतिशिखायाम्।
उग्रतारायैनम इतिकवचे। महापरिशरायैनम इतिनेत्रे

पिङ्गोग्रैकजटायैनम इतिदिक्षु पूजयेत्। ततो दिग्दलेषु
वैरोचनमसिताभम्पद्मनाभं शङ्खपाण्डुरँ
व्वैरोचनवज्रपुष्पम्प्रतीक्ष्यस्वाहा इत्यादिपुष्पदाने
मन्त्रः। नामकम्मामकम्पाण्डुरन्तारकँव्विदिक्षु
पूजयेत्। पुष्पदाने मन्त्रः प्राग्वत्। ततो भूगृहस्य
चतुर्द्वारिषु पूर्वादितः पद्मान्तक-जन्मान्तक-
विघ्नान्तक-नरकान्तकान् पूजयेत्॥ पुष्पदाने मन्त्रः
प्राग्वत्ततस्तद्बाह्ये इन्द्रादीन् दिक्पालान् पूजयेत्॥ तद्बहिः
वज्रशक्तिदण्डखड्गपाशाङ्कुशगदाशूलचक्राणि
पूजयेत्॥ ततो धूपः साङ्गायै सायुधायै सपरिवारायै
सवाहनायै मूलम् अमुकदेवतायै नमः॥ एवन्दीपन्दद्यात्
। ततो नैवेद्यन्दद्यात्। तद्यथा स्वर्णादिभाजने
नैवेद्यम्परिवेष्य वायुबीजन्द्वादशवारञ्जपन्
तज्जातमरुतेन नैवेद्यं संशोध्य दक्षिणकरतले
वामकरतलं सन्न्यस्य तदुत्थेनाग्निना
अग्निबीजन्द्वादशवारञ्जपन्नखिलन्नैवेद्यदोषं सन्दह्य
पुनर्वामकरपृष्ठे दक्षिणहस्तङ्कृत्वा तत्र

p. 125) प्रदर्श्य वंबीजन्द्वादशवारञ्जपन्
तदुत्थयामृतधारया नैवेद्यमभिषिच्यः,

पुनर्मूलेनाभिषिच्य तत्स्पृष्ट्वाष्टशो मूलमन्त्रञ्जपेत्
धेनुमुद्राम्प्रदश्र्श्य गन्धपुष्पैस्तदर्च्चयेत्। ततो
नैवेद्यभाजनँव्वामाङ्गुष्ठेन संस्पृश्य
दक्षिणहस्तेन जलन्धृत्वा मूलम्पठन् इदन्नैवेद्यं
साङ्गायै सायुधायै सपरिवारायै सवाहनायै
सावरणायै अमुकदेव्यै नम इतिनैवेद्यमुत्सृज्य
अङ्गुष्ठानामिकाभ्यान्नैवेद्यमुद्राम्प्रदश्र्श्य
सपुष्पकराभ्यान्त्रिः प्रोद्धरन् ग्रासमुद्राँवामहस्तेन
प्रदर्शयेत्॥ ततः प्राणादिमुद्रान्दर्शयेत्॥ ॐ
प्राणायस्वाहा इतिपठन्कनिष्ठानामिकाङ्गुष्ठैः
प्राणमुद्रान्दर्शयेत्। तत ॐ अपानायस्वाहा
इतिपठंस्तर्ज्जनीमध्यमाङ्गुष्ठैः अपानमुद्रान्दर्शयेत्
। तत ॐ उदानायस्वाहा
इतिपठन्ननामामध्यमाङ्गुष्ठैरुदानमुद्रान्दर्शयेत्।
तत ॐ व्यानायस्वाहा इति
पठन्तर्ज्जन्यनामामध्यमाङ्गुष्ठैर्व्यानमुद्रान्दर्शय्
एत्। ततः ॐ समानायस्वाहा इतिपठन्
सर्वाङ्गुलीभिस्समानमुद्राम्प्रदर्शयेत्॥ ततो देवीं
सन्तुष्टाँव्विभाव्य पानीयन्दद्यात्। मूलमन्त्रमुच्चार्य
इदम्पानीयममुकदेव्यैनमः।

इदमाचमनीयममुकदेव्यैनमः। इदन्ताम्बूलञ्च
एषपुष्पाञ्जिलः॥ अथ जपविधिः॥ पूर्ववत्
ऋष्यादिन्यासकरन्यासषडङ्गन्यासान् ध्यानञ्च विधाय
ह्रींमाले महामाले सर्वतत्त्वस्वरूपिणि। चतुर्वर्गस्त्वयि
न्यस्तस्तस्मान्मे सिद्धिदा भव इति पठन् मूलमन्त्रेण
मालां सम्पूज्य यथाशक्ति जपङ्कुर्यात्॥ जपान्ते पुनः
प्राणायामादिकँव्विधाय देवीन्ध्यात्वा
ॐगुह्यातिगुह्यगोप्त्री त्वङ्गृहाणास्मत्कृतञ्जपम्।
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि इतिपठन्
तेजोमयञ्जलन्ध्यायन् देव्या वामहस्ते जपं समर्प्पयेत्॥
पुष्पाञ्जल्यष्टकन्दत्त्वा स्तोत्रकवचादिकम्पठेत्। ततः
प्रदक्षिणीकृत्य दण्डवत्प्रणिपत्य, ॐ इतः पूर्व
प्राणवृद्धिदेहधर्माधिकारतो
जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा
हस्ताभ्याम्पद्भ्यामुदरेण

p.126) शिश्ना यत्स्मृतँय्यदुक्तं य्यत्कृतन्तत्सर्वं
ब्रह्मार्पणम्भवतु स्वाहा मदीयञ्च सकलन्देव्यै ते
समर्पयेत्॥ ततः पुष्पाञ्जलिङ्गृहीत्वा

ॐमन्त्रहीनङ्क्रियाहीनँव्विधिहीनं सुरेश्वरि॥

यदर्चितम्मया देवि परिपूर्णन्तदस्तु मे॥

आवाहनञ्च पूजाञ्च तन्माहात्म्यञ्जपन्तथा॥

विसर्ज्जनन्न जानामि श्रीदेवि त्वङ्क्षमस्व मे॥

अज्ञानाद्विस्मृतेर्भ्रान्त्या यन्न्यूनमधिकङ्कृतम्॥

विपरीतञ्च तत्सर्वं क्षमस्व परमेश्वरि॥

एष पुष्पाञ्जलिः अमुकदेव्यैनम इति क्षमाप्य, ततः ॐ

गच्छ गच्छ परं स्थानं स्वस्थानम्परमेश्वरि।

पूजाराधनकाले च पुनरागमनाय च इति संहारमुद्रया

पुष्पमेकङ्गृहीत्वा देवींविसृज्य तत्पुष्पम्

ऐशान्याम्पात्रान्तरे क्षिपेत्। तत्र पात्रे चण्डेश्वरीं

समभ्यर्च्च्य

ॐचण्डेश्वरि महादेवि निर्माल्यैश्चन्दनादिभिः।

लेह्यचोष्यान्नपानादि निर्माल्यं स्त्रग्विलेपनम्॥

निर्माल्यभोजनन्तुभ्यन्ददामि श्रीशिवाज्ञया

इदन्निर्माल्यं श्रीचण्डेश्वर्यैनमः

इतिपठन्निर्माल्यङ्क्षिपेत्॥ ततः किञ्चिद्देवीनैवेद्यम्

उच्छिष्टचाण्डाल्यैनम इतिपठंस्तस्यै दद्यात्॥ ततो

नैवेद्यं स्वयम्भुञ्जीत॥

अथ तारास्तोत्रम्

मातर्न्नीलसरस्वति प्रणमतां सौभाग्यसम्पत्प्रदे
प्रत्यालीढपदस्थिते शवहृदि स्मिताननाम्भोरुहे।
फुल्लेन्दीवरलोचने त्रिनयने कर्त्री कपालोत्पले
खड्गञ्चादधती त्वमेव शरणन्त्वामीश्वरीमाश्रपे॥ १
॥

वाचामीश्वरि भक्तकल्पलतिके सर्वार्त्थसिद्धीश्वरि
गद्यप्राकृतपद्यजातरचनासर्वार्त्थसिद्धिप्रदे।
नीलेन्दीवरलोचनत्रययुते कारुण्यवारान्निधे
p. 127) सौभाग्यामृतवर्द्धनेन कृपया
सिञ्चत्वमस्मादृशम्॥ २॥

खर्वे गर्वसमूहपूरिततनौ सर्पादिवेषोज्ज्वले
व्याघ्रत्वक्परिवीतसुन्दरकटिव्याधूतघण्टाङ्किते।
सद्यः कृत्तगलद्रजः परिमिलन्मुण्डद्वयीमूर्द्धज
ग्रन्थिश्रेणिनृमुण्डदामललिते भीमे भयन्नाशय॥ ३॥

मायानङ्गविकाररूपललना बिन्द्वर्द्धचन्द्राम्बिके
हूंफट्कारमयि त्वमेव शरणम्मन्त्रात्मिके मादृशः।
मूर्त्तिस्ते जननि त्रिधामघटिता स्थूलातिसूक्ष्मा परा
वेदानान्नहि गोचरा कथमपि प्राज्ञैर्न्नुतामाश्रये॥ ४॥

त्वत्पादाम्बुजसेवया सुकृतिनो गच्छन्ति सायुज्यतान्
तस्याः श्रीपरमेश्वरत्रिनयनब्रह्मादिसाम्यात्मनः।
संसाराम्बुधिमज्जनेऽपटुतनुर्देवेन्द्रमुख्यान्सुरान्
मातस्त्वत्पदसेवने हि विमुखान् किम्मन्दधीस्सेवते॥ ५॥

मातस्त्वत्पदपङ्कजद्वयरजोमुद्राङ्ककोटीरिणस्ते
देवा जयसङ्गरे विजयिनो निःशङ्कमङ्के गताः।
देवोहम्भुवने न मे सम इति स्पर्द्धाँव्वहन्तः परास्
तत्तुल्यान्नियतँय्यथाशुचिरवी नाशँव्व्रजन्ति स्वयम्॥ ६॥

त्वन्नामस्मरणात्पलायनपरा द्रष्टुञ्च शक्ता न ते
भूतप्रेतपिशाचराक्षसगणा यक्षाश्च नागाधिपाः।
दैत्या दानवपुङ्गवाश्च खचरा व्याघ्रादिका जन्तवो
डाकिन्यः कुपितान्तकश्च मनुजो मातः क्षणम्भूतले॥ ७॥

लक्ष्मीः सिद्धिगणश्च पादुकमुखाः सिद्धास्तथा

वैरिणां

स्तम्भश्चापि वराङ्गने गजघटास्तम्भस्तथा मोहनम्।

मातस्त्पदसेवया खलू नृणां सिद्ध्यन्ति ते ते गुणाः

क्लान्तः कान्तमनोभवस्य भवति क्षुद्रोऽपि वाचस्पतिः॥ ८॥

ताराष्टकमिदम्पुण्यम्भक्तिमान् यः पठेन्नरः॥

प्रातर्मध्याह्नकाले च सायाह्ने नियतः शुचिः॥ ९॥

लभते कवितांव्विद्यां सर्वशास्त्रार्थविद्भवेत्।

लक्ष्मीमनश्वराम्प्राप्य भुक्त्वा भोगान्यथेप्सितान्॥ १०॥

कीर्त्तिङ्कान्तिञ्च नैरुज्यम्प्राप्यान्ते मोक्षमाप्नुयात्॥ ११॥

p. 128) इति नीलतन्त्रे तारास्तोत्रं समाप्तम्॥

अथ ताराकवचम्

ईश्वर उवाच

कोटितन्त्रेषु गोप्या हि विद्यातिभयमोचिनी।
दिव्यं हि कवचन्तस्याः शृणुष्व सर्वकामदम्॥ १॥

ताराकवचस्याक्षोभ्यऋषिस्त्रिष्टुप्छन्दो भगवती
तारादेवता सर्वमन्त्रसिद्धये विनियोगः॥

ॐ प्रणवो मे शिरः पातु ब्रह्मारूपा महेश्वरी।
ह्रींकारः पातु ललाटे बीजरूपा महेश्वरी॥ २॥

स्त्रींकारः पातु वदने लज्जारूपा महेश्वरी।
हूकारँपातु हृदये भवानीशक्तिरूपधृक्॥ ३॥

फट्कारः पातु सर्वाङ्गे सर्वसिद्धिफलप्रदा।
खर्वा माम्पातु देवेशी भ्रूमध्ये सर्वसिद्धिदा॥ ४॥

नीला माम्पातु देवेशी गण्डयुग्मे भयापहा।
लम्बोदरी सदा पातु कर्णयुग्मम्भयापहा॥ ५॥

व्याघ्रचर्मावृतकटिः पातु देवी शिवप्रिया।
पीनोन्नतस्तनी पातु पार्श्वयुग्मे महेश्वरी॥ ६॥

रक्तवर्त्तुलनेत्रा च कटिदेशे सदावतु।
ललज्जिह्वा सदा पातु नाभौ माम्भुवनेश्वरी॥ ७॥

करालास्या सदा पातु लिङ्गे देवी हरप्रिया।
पिङ्गोग्रैकजटा पातु जङ्घायाँव्विघ्ननाशिनी॥ ८॥

खड्गहस्ता महादेवी जानुचक्रे महेश्वरी।
नीलवर्णा सदा पातु जानुनी सर्वदा मम॥ ९॥

नागकुण्डलधर्त्री च पातु पादयुगे ततः।
नागहारधरा देवी सर्वाङ्गम्पातु सर्वदा॥ १०॥

न गाङ्गदधरा देवी पातु पाण्डवदेशतः।
चतुर्भुजा सदा पातु गमने शत्रुनाशिनी॥ ११॥

खड्गहस्ता महादेवी पातु माँव्विजयप्रदा।
नीलाम्बरधरा देवी पातु माँव्विघ्ननाशिनी॥ १२॥

कर्तुहस्ता सदा पातु विवादे शत्रुमध्यतः।

ब्रह्मरूपधरा देवी सङ्ग्रामे पातु सर्वदा॥ १३॥

नागकङ्कणधर्त्री च भोजने पातु सर्वदा।
शवकर्णा महादेवी शयने पातु सर्वदा॥ १४॥

वीरासनधरा देवी निद्रायां पातु सर्वदा॥ १५॥

धनुर्बाणधरा देवी पातु माँव्विघ्नसङ्कुले।
१२९) नागाञ्चितकटिः पातु देवी मां सर्वकर्मसु॥ १६॥

छिन्नमुण्डधरा देवी कानने सर्वदाऽवतु।
चितामध्यस्थिता देवी मारणे पातु सर्वदा॥ १७॥

द्वीपिचर्मधरा देवी पुत्रदारधनादिषु।
अलङ्कारान्विता देवी पातु मां हरवल्लभा॥ १८॥

रक्ष रक्ष नदीकुञ्जे हूँऊँऊँहङ्कमन्विते।
बीजरूपा महादेवी पर्वते पातु सर्वदा॥ १९॥

मणिधरि वज्रिणी देवी महाप्रतिसरे तथा।

रक्ष रक्ष सदा हूँऊँॐ ह्रीं स्वाहा महेश्वरी॥ २०॥

पुष्पकेतुराजार्हते कानने पातु सर्वदा।
ॐ वज्रपुष्पे हूँहट् च पाण्डवे पातु सर्वदा॥ २१॥

पुष्पे पुष्पे महापुष्पे पातु पुत्रान्महेश्वरी।
ॐ स्वाहाशक्तिसँयुक्ता दारान् रक्षतु सर्वदा॥ २२॥

ॐ पवित्रवज्रभूमे हूँहट् स्वाहासमन्विता।
पूरिका पातु मान्देवी सर्वविघ्नविनाशिनी॥ २३॥

आसुरेखे वज्ररेखे हूँहड्डाहासमन्विता।
पाताले पातु मान्देवी नागिनी मानसञ्चिता॥ २४॥

ह्रींकारी पातु पूर्वे मां शक्तिरूपा महेश्वरी।
स्त्रींकारी दक्षिणे पातु स्त्रीरूपा परमेश्वरी॥ २५॥

हूँवरूपा महामाया पातु मां क्रोधरूपिणी।
कस्वरूपा महामाया पश्चिमे पातु सर्वदा॥ २६॥

उत्तरे पातु मान्देवी ढस्वरूपा हरप्रिया।
मध्ये माम्पातु देवेशी हूँवरूपा नगात्मजा॥ २७॥

नीलवर्णा सदा पातु सर्वत्र वाग्भवी सदा।
तारिणी पातु भवने सर्वैश्वर्यप्रदायिनी॥ २८॥

विद्यादानरता देवी पातु वक्त्रे सरस्वती।
शास्त्रे वादे च सङ्ग्रामे जले च विषमे गिरौ॥ २९॥

भीमरूपा सदा पातु श्मशाने भयनाशिनी।
भूतप्रेतालये घोरे दुर्गे माम्मीषणावतु॥ ३०॥

पातु नित्यम्महेशानी सर्वत्र शिवदूतिका।
कवचस्य च माहात्म्यन्नाहँव्वर्षशतैरपि॥ ३१॥

शक्नोमि कथितुन्देवि भवेत्तस्य फलन्तु यत्।
पुत्रदारेषु बन्धूनां सर्वदेशे च सर्वदा॥ ३२॥

न विद्यते भयन्तस्य नृपपूज्यो भवेच्च सः।
शुचिर्भूत्वाऽशुचिर्वापि कवचं सर्वकामदम्॥ ३३॥

p. 130) प्रपठन् वा स्मरन्मर्त्त्यो दुःखशोकविवर्ज्जितः।
सर्वशास्त्रे महेशानि कविराङ्गवति ध्रुवम्॥ ३४॥

सर्ववागीश्वरो मर्त्त्यो लोकवश्यो धनेश्वरः।
रणे द्यूते विवादे च जयस्तस्य भवेद्ध्रुवम्॥ ३५॥

पुत्रपौत्रान्वितो मर्त्त्यो विलासी सर्वयोषिताम्।
शत्रवो दासतां यान्ति सर्वेषां वल्लभः सदा॥ ३६॥

गर्व्वी खर्वी भवत्येव वादी ज्वलति दर्शनात्।
मृत्युश्च वश्यताँयाति दासस्तस्यावनीश्वरः॥ ३७॥

प्रसङ्गात्कथितं सर्वङ्कवचं सर्वकामदम्।
प्रपठन् वा स्मरन्मर्त्त्यः शापानुग्रहणे क्षमः॥ ३८॥

आनन्दवृन्दसिन्धूनामधिपः कविराङ्गवेत्।
सर्वयोगीश्वरो मर्त्त्यो लोकबन्धुस्सदा सुखी॥ ३९॥

गुरोः प्रसादमासाद्य विद्याम्प्राप्य सुगोपिताम्।

तत्रापि कवचन्देवि दुर्ल्लभम्भुवनत्रये॥ ४०॥

गुरुर्देवो हरस्साक्षात् पत्नी तस्य हरप्रिया।
अभेदेन जयेद्यस्तु तस्य सिद्धिरदूरतः॥ ४१॥

मन्त्राचारा महेशानि कथिताः पूर्वतः प्रिये।
नाभौ ज्योतिस्तथा वक्त्रे हृदये परिचिन्तयेत्॥ ४२॥

ऐश्वर्यं सुकवित्वञ्च रुद्रश्च सिद्धिदायकः।
तन्दृष्ट्वा साधकन्देवि लज्जायुक्ता भवन्ति ते॥ ४३॥

स्वर्गे मर्त्त्ये च पाताले ये देवास्सुरसत्तमाः।
प्रशंसन्ति सदा सर्वे तन्दृष्ट्वा साधकोत्तमम्॥ ४४॥

विघ्नात्मानश्च ये देवाः स्वर्गे मर्त्त्ये रसातले।
प्रशंसन्ति सदा सर्वे तन्दृष्ट्वा साधकोत्तमम्॥ ४५॥

इति ते कथितन्देवि मया सम्यक्प्रकीर्त्तितम्।
भुक्तिमुक्तिकरं साक्षात् कल्पवृक्षस्वरूपकम्॥ ४६॥

आसाद्याद्य गुरुम्प्रसाद्य य

इदङ्कल्पद्रुमालम्बनम्मोहेनापि मदेन वा नहि जनो

जाडयेन वा मुह्यति॥

सिद्धोऽसौ भुवि सर्वदुःखविपदाम्पारम्प्रयात्यन्तके

मित्रन्तस्य नृपश्च देवि विपदो नश्यन्ति तस्याशु च॥ ४७॥

तद्गात्रम्प्राप्य शस्त्राणि ब्रह्मास्त्रादीनि वै भुवि।

तस्य गेहे स्थिरा लक्ष्मीर्वाणी वक्त्रे वसेद्ध्रुवम्॥ ४८॥

p. 131) इदङ्कवचमज्ञात्वा ताराँय्यो भजते नरः।

अल्पायुर्न्निर्द्धनो मूर्खो भवत्येव न संशयः॥ ४९॥

लिखित्वा धारयेद्यस्तु कण्ठे वा मस्तके भुजे।

तस्य सर्वार्त्थसिद्धिः स्याद्यद्यन्मनसि वर्त्तते॥ ५०॥

गोरोचनाकुङ्कुमेन रक्तचन्दनकेन वा।

यावकैर्वा महेशानि लिखेन्मन्त्रँव्विशेषतः॥ ५१॥

अष्टम्याम्मङ्गलदिने चतु-ईश्यामथापि वा।

सन्ध्यायान्देवदेवेशि लिखेन्मन्त्रं समाहितः॥ ५२॥

मघायां श्रवणायाँव्वा रेवत्याञ्च विशेषतः।
सिंहराशौ गते चन्द्रे कर्कटस्थे दिवाकरे॥ ५३॥

मीनराशौ गुरौ याते वृश्चिकस्थे शनैश्चरे।
लिखित्वा धारयेद्यस्तु साधको भक्तिभावतः॥
अचिरात्तस्य सिद्धिः स्यान्नात्र कार्या विचारणा॥ ५४॥

वादी मूकति दूषकः स्तवयति क्षोणीपतिर्दासति गर्वी खर्वति
सर्वविच्च जडति वैश्वानरः शीतति।
आचाराद्भवसिद्धिरूपमपरं सिद्धो भवेद्दुर्लभन्त्वाँ
व्वन्दे भवभीतिभञ्जनकरीन्नीलाङ्गिरीशप्रियाम्॥ ५५॥

इति नीलतन्त्रे परमरहस्यकमुग्रताराकवचं समाप्तम्॥

अथ श्रीताराहृदयम्

श्रीशिव उवाच

शृणु पार्वति भद्रन्ते लोकानां हितकारकम्।

कथ्यते सर्वदा गोप्यन्ताराहृदयमुत्तमम्॥ १॥

श्रीपार्वत्युवाच

स्तोत्रङ्कथं समुत्पन्नङ्कृतङ्केन पुरा प्रभो।
कथ्यतां सर्वसद्वृत्तङ्कृपाङ्कृत्वा ममोपरि॥ २॥

श्रीशिव उवाच

रणे देवासुरे पूर्वङ्कृतमिन्द्रेण सुप्रिये।
दुष्टशत्रुविनाशार्त्थम्बलवृद्धियशस्करम्॥ ३॥

ओमस्य श्रीमदुग्रताराहृदयस्तोत्रमन्त्रस्य श्रीभैरव
ऋषिरनुष्टुप्छन्दः श्रीमदुग्रतारा देवता स्त्रींबीजं
हूँहक्तिः नमः कीलकं सकलशत्रुविनाशार्थे पाठे
विनियोगः॥

ॐ स्त्रींहृदयायनमः। ॐ ह्रींशिरसेस्वाहा। ॐ
हूँहिखायैवषट्।

ॐत्रींकवचायहूम्।

p. 132) ॐ ऐंनेत्रत्रयायवौषट्। ॐ हंसः अस्त्रायफट्।

अथ ध्यानम्

ध्यायेत्कोटिदिवाकरद्युतिनिभान्बालेन्दुयुक्छेखरां
रक्ताङ्गीं रसनां सुरक्तवसनाम्पूर्णेन्दुबिम्बाननाम्।
पाशङ्कर्तृमहाङ्कुशादि दधतीन्दोर्भिश्रतुर्भिर्युतान्
नानाभूषणभूषिताम्भगवतीन्ताराञ्जगत्तारिणीम्॥

एवन्ध्यात्वा शुभान्तारान्ततस्तु हृदयम्पठेत्।
तारिणीतत्त्वनिष्ठानां सर्वतत्त्वप्रकाशिका।

रामाभिन्ना पराशक्तिश्शत्रुनाशङ्करोतु मे।
सर्वदा शत्रुसंरम्भे तारा मे कुरुताज्जयम्॥

स्त्रींत्रींस्वरूपिणी देवी त्रिषु लोकेषु विश्रुता।
तवस्नेहान्मयाख्यातन्न पशूनाम्प्रकाश्यताम्॥

श्रृणु देवि तव स्नेहात्तारानामानि तत्त्वतः।
वर्णयिष्यामि गुप्तानि दुर्ल्लभानि जगत्त्रये॥

तारिणी तरला तारा त्रिरूपा तरणिप्रभा।
सत्त्वरूपा महासाध्वी सर्वसज्जनपालिका॥

रमणीया रजोरूपा जगत्सृष्टिकरी परा।
तमोरूपा महामाया घोररावा भयानका॥

कालरूपा कालिकाख्या जगद्विध्वंसकारिका।
तत्त्वज्ञानपरानन्दा तत्त्वज्ञानप्रदानघा॥

रक्ताङ्गी रक्तवस्त्रा च रक्तमालाप्रशोभिता।
सिद्धिलक्ष्मीश्च ब्रह्माणी महाकाली महालया॥

नामान्येतानि ये मर्त्त्यास्सर्वदैकाग्रमानसाः।
प्रपठन्ति प्रिये तेषाङ्किङ्करत्वङ्करोम्यहम्॥

तारान्तारपरान्देवीन्तारकेश्वरपूजिताम्।
तारिणीम्भवपाथोधेरुग्रताराम्भजाम्यहम्॥

स्त्रींह्रींह्रूँरींफण्मन्त्रेण जलञ्जस्त्वाऽभिषेचयेत्।
सर्वे रोगाः प्रणश्यन्ति सत्यं सत्यँव्वदाम्यहम्॥

त्रींस्वाहान्तैर्महामन्त्रैश्चन्दनं साधयेत्ततः।
तिलकङ्कुरुते प्राज्ञो लोको वश्यो भवेत्प्रिये॥

स्त्रींह्रींत्रींस्वाहामन्त्रेण श्मशानम्भस्म मन्त्रयेत्।
शत्रोर्गृहे प्रतिक्षिप्त्वा शत्रोर्मृत्युर्भविष्यति।

ह्रींह्रूँत्रीम्फडन्तमन्त्रैः पुष्पं संशोध्य सप्तधा।
उच्चाटनन्नयत्याशु रिपूणान्नैव संशयः।

स्त्रींत्रींह्रींमन्त्रवर्येण अक्षताश्चाभिमन्त्रिताः।
तत्प्रतिक्षेपमात्रेण शीघ्रमायाति मानिनी॥ (हंसः- ओं
ह्रीं स्त्रीं ह्रूंह्रूंसः)

p. 133) इतिमन्त्रेण जप्तेन शोधितङ्कज्जलम्प्रिये।
तस्यैव तिलकं कृत्वा जगन्मोहं समाचरेत्॥

तारायाः हृदयन्देवि सर्वपापप्रणाशनम्।
वाजपेयादियज्ञानाङ्कोटिकोटिगुणोत्तरम्॥

गङ्गादिसर्वतीर्थानाम्फलङ्कोटिगुणं स्मृतम्।
महादुःखे महारोगे सङ्कटे प्राणसंशये॥

महाभये महाघोरे पठेत्स्तोत्रम्महोत्तमम्।
सत्यं सत्यम्मयोक्तन्ते पार्वति प्राणवल्लभे॥

गोपनीयम्प्रयत्नेन न प्रकाश्यमिदङ्कचित्।

इति श्रीभैरवीतन्त्रे शिवपार्वतीसँवादे
श्रीमदुग्रताराहृदयं संपूर्णम्॥

अथ तारोपनिषत्

ॐ
तत्सद्ब्रह्मतद्रूपम्प्रकृतिपरङ्गगनाभन्तत्परम्परमम्
महत्सत्यन्तदहंह्रींकारं
रक्तवर्णन्नान्नाभिस्त्रींकारम्पिङ्गलाभं हूङ्कारँ

व्विशदाभम्मद्धृदयरूपं

भूमण्डलम्फङ्कारधूम्रवर्णम्मत्खड्गमोङ्कारज्वल्

अद्रूपम्मन्मस्तकँव्वेदा मद्धस्ताश्चन्द्रार्कानला

मन्नेत्रा दिवानक्तम्मत्पादौ सन्ध्या मत्कर्णौ सँवत्सरो

मदुदरो मद्दंष्ट्रा पङ्क्तौ मत्पार्श्वौ वारर्त्तवो

मदङ्गुल्यो विद्या मन्नखाः पावको

मन्मुखम्महीमद्रसना

द्यौर्मन्मुखङ्गगनम्मद्धृदयं भक्तिर्मम चर्म्म

रसम्मद्रुधिरँव्वान्नँव्वासांसि फलानि निरहङ्कारा

अस्थीनि सुधामन्मज्जा स्थावराणि मद्रोमाणि पातालादिलोकौ

मत्कुचौ ब्रह्मनादम्मन्नाड्यं ज्ञानम्मन्मनः

क्षमाबुद्धिःशून्यम्मदासनन्नक्षत्राणि मद्भूषणानि

॥ एतद्वैराटकम्मद्वपुः मज्जलं सत्त्वं

बिन्दुस्वरूपम्महाकारस्वरूपज्योतिर्म्मयँव्विद्धि शिरः

उग्रताराम्महोग्रान्नीलाङ्घनामेकजटाम्महामायाम्प्र

कृतिम्माँविदित्वा यो जपति मद्रूपाणि यो वेत्ति मन्मन्त्रँय्यो

जपति मद्रूपकल्पिताँयो जपति भगम्भजति निर्विकल्पः

साधकः सदा मद्रूपो भवति॥ सर्वाणि कर्माणि साध्यानि

निर्भ्भयो भवति गुरुन्नत्वा स्तुत्वा वस्त्रभूषणानि दत्त्वा

इमामुपनिषद्विद्याम्प्राप्य माँय्यो जपति स जीवन्मुक्तो

भवति॥

p. 134) इत्यथर्वणवेदे सौभाग्यकाण्डे तारोपनिषत्समाप्ता

॥

अथ ताराशतनामस्तोत्रम्

श्रीशिव उवाच

तारणी तरला तन्वी तारा तरुणवल्लरी।
तीररूपातरी श्यामा तनुक्षीणपयोधरा॥ १॥

तुरीया तरला तीव्रगमना नीलवाहिनी।
उग्रतारा जया चण्डी श्रीमदेकजटाशिरा॥ २॥

तरुणी शाम्भवी छिन्नभाला च भद्रतारिणी।
उग्रा उग्रप्रभा नीला कृष्णा नीलसरस्वती॥ ३॥

द्वितीया शोभना नित्या नवीना नित्यनूतना।
चण्डिका विजयाराध्या देवी गगनवाहिनी॥ ४॥

अट्टहास्या करालास्या चरास्यादितिपूजिता।
सगुणा सगुणाराध्या हरीन्द्रदेवपूजिता॥ ५॥

रक्तप्रिया च रक्ताक्षी रुधिरास्यविभूषिता।
बलिप्रिया बलिरता दुर्द्धा बलवती बला॥ ६॥

बलप्रिया बलरता बलरामप्रपूजिता।
अर्द्धकेशेश्वरी केशा केशवा सविभूषिता॥ ७॥

पद्ममाला च पद्माक्षी कामाख्या गिरिनन्दिनी।
दक्षिणा चैव दक्षा च दक्षजा दक्षिणेरता॥ ८॥

वज्रपुष्पप्रिया रक्तप्रिया कुसुमभूषिता।
माहेश्वरी महादेवप्रिया पञ्चविभूषिता॥ ९॥

इडा च पिङ्गला चैव सुषुम्नाप्राणरूपिणी।
गान्धारी पञ्चमी पञ्चाननादिपरिपूजिता॥ १०॥

तथ्यविद्या तथ्यरूपा तथ्यमार्गानुसारिणी।

तत्त्वरूपा तत्त्वप्रिया तत्त्वज्ञानात्मिकानघा॥ ११॥

ताण्डवाचारसन्तुष्टा ताण्डवप्रियकारिणी।
तालदानरता क्रूरतापिनी तरणिप्रभा॥ १२॥

त्रपायुक्ता त्रपामुक्ता तर्पिता तृप्तिकारिणी।
तारुण्यभावसन्तुष्टा शक्तिभक्तानुरागिणी॥ १३॥

शिवासक्ता शिवरतिः शिवभक्तिपरायणा।
ताम्रद्युतिस्ताम्ररागा ताम्रपात्रप्रभोजिनी॥ १४॥

बलभद्रप्रेमरता बलिभुग्बलिकल्पिनी।
रामरूपा रामशक्ती रामरूपानुकारिणी॥ १५॥

इत्येतत्कथितन्देवि रहस्यम्परमाद्भुतम्।
p. 135) श्रुत्वा मोक्षमवाप्नोति तारादेव्याः प्रसादतः॥ १६॥

य इदम्पठति स्तोत्रं तारास्तुतिरहस्यकम्।
सर्वसिद्धियुतो भूत्वा विहरेत् क्षितिमण्डले॥ १७॥

तस्यैव मन्त्रसिद्धिः स्यान्मम सिद्धिरनुत्तमा।
भवत्येव महामाये सत्यं सत्यन्न संशयः॥ १८॥

मन्दे मङ्गलवारे च यः पठेन्निशि सँयतः।
तस्यैव मन्त्रसिद्धिस्स्याद्गाणपत्यँल्लभेत सः॥ १९॥

श्रद्धयाऽश्रद्धया वापि पठेत्तारारहस्यकम्।
सोऽचिरेणैव कालेन जीवन्मुक्तः शिवो भवेत्॥ २०॥

सहस्रावर्त्तनाद्देवि पुरश्चर्याफलँल्लभेत्।
एवंसततयुक्ता ये ध्यायन्तस्त्वामुपासते॥
ते कृतार्था महेशानि मृत्युसंसारवर्त्मनः॥ २१॥

इति स्वर्णमालातन्त्रे तारणीशतनामस्तोत्रं समाप्तम्॥

अथ श्रीतारातकारादिसहस्रनाम

वसिष्ठ उवाच

नाम्नां सहस्रन्तारायाः मुखाम्भोजाद्विनिर्गतम्।
मन्त्रसिद्धिकरम्प्रोक्तन्तन्मे वद पितामह॥ १॥

ब्रह्मोवाच

शृणु वत्स प्रवक्ष्यामि रहस्यं सर्वसिद्धिदम्।
यस्योपदेशमात्रेण तव सिद्धिर्भविष्यति॥ २॥

महाप्रलयकालादौ नष्टे स्थावरजङ्गमे।
महाकारं समाकर्ण्य कृपया संहृतन्तनौ॥ ३॥

नाम्ना तेन महातारा ख्याता सा ब्रह्मरूपिणी।
महाशूलत्रयङ्कृत्वा तत्र चैकाकिनी स्थिता॥ ४॥

पुनः सृष्टेश्चिकीर्षाभूद्दिव्यसाम्राज्यसञ्ज्ञकम्।
नाम्नां सहस्रमस्यास्तु तकाराद्यम्मया स्मृतम्॥ ५॥

तत्प्रभावेण ब्रह्माण्डन्निर्म्मितं सुदृढम्महत्।
आविर्भूता वयन्तत्र यन्त्रैस्तस्याः पुरा द्विज॥ ६॥

स्वस्य कार्यार्त्थिनस्तत्र भ्रान्ता भूम्याँय्यथा वयम्।
तयोपदिष्टाः कृपया भवामस्सृष्टिकारकाः॥ ७॥

तस्याः प्रसादाद्विप्रेन्द्र त्त्रयो ब्रह्माण्डनायकाः।
अन्ये सुरगणास्सर्वे तस्याः पादप्रसेवकाः॥ ८॥

पठनाद्धारणात्सृष्टेः कर्त्ताहम्पालको हरिः।
तत्त्वाक्षरोपदेशेन संहर्त्ता शङ्करस्स्वयम्॥ ९॥

p. 136) ऋषिच्छन्दादिकध्यानम्मूलवत्परिकीर्त्तितम्।
नियोगोमात्रसिद्धौ च पुरुषार्थचतुष्टये॥ १०॥

तारा तारादिपञ्चार्णा तारान्यावेदवीर्यजा।
तारातारहितावर्णा ताराद्या तारारूपिणी॥ ११॥

तारारात्रिसमुत्पन्ना तारारात्रिवरोद्यता।
तारारात्रिजपासक्ता तारारात्रिस्वरूपिणी॥ १२॥

तारराज्ञीस्वसन्तुष्टा तारराज्ञीवरप्रदा।
तारराज्ञीस्वरूपा च तारराज्ञीप्रसिद्धिदा॥ १३॥

ताराहृत्पङ्कजागारा ताराहृत्पङ्कजापरा।

ताराहृत्पङ्कजाधारा ताराहृत्पङ्कजा तथा॥ १४॥

तारेश्वरी च ताराभा तारागणस्वरूपिणी।

तारागणसमाकीर्णा तारागणनिषेविता॥ १५॥

तारा तारान्विता तारा रत्नान्वितविभूषणा।

तारागणरणासन्ना ताराकृत्यप्रपूजिता॥ १६॥

तारागणकृताहारा तारागणकृताश्रया।

तारागणकृतागारा तारागणनतत्परा॥ १७॥

तारागुणगणाकीर्णा तारागुणगणप्रदा।

तारागुणगणासक्ता तारागुणगणालया॥ १८॥

तारेश्वरी तारपूज्या ताराजप्या तु तारणा।

तारमुख्या तु ताराख्या तारदक्षा तु तारिणी॥ १९॥

तारागम्या तु तारस्था तारामृततरङ्गिणी।

तारभव्या तु ताराणा तारहव्या तु तारिणी॥ २०॥

तारका तारकान्तस्स्था तारकाराशिभूषणा।
तारकाहारशोभाढ्या तारकावेष्टिताङ्गणा॥ २१॥

तारकाहंसकाकीर्णा तारकाकृतभूषणा।
तारकाङ्गदशोभाङ्गी तारकाश्रितकङ्कणा॥ २२॥

तारकाञ्चितकाञ्ची च तारकान्वितभक्षणा।
तारकाचित्रवसना तारकासनमण्डला॥ २३॥

तारकाकीर्णमुकुटा तारकाश्रितकुण्डला।
तारकान्वितताटङ्कयुग्मगण्डस्थलोज्ज्वला॥ २४॥

तारकाश्रितपादाब्जा तारकावरदायिका।
तारकादत्तहृदया तारकाञ्चितसायका॥ २५॥

तारकान्यासकुशला तारकान्यासविग्रहा।
तारकान्याससन्तुष्टा तारकान्याससिद्धिदा॥ २६॥

तारकान्यासनिलया तारकान्यासपूजिता।

तारकान्याससंहृष्टा तारकान्याससिद्धिदा॥ २७॥

p. 137) तारकान्याससंम्मग्ना तारकान्यासवासिनी।

तारकान्याससम्पूर्णमन्त्रसिद्धिविधायिनी॥ २८॥

तारकोपासकप्राणा तारकोपासकप्रिया।

तारकोपासकासाध्या तारकोपासकेष्टदा॥ २९॥

तारकोपासकासक्ता तारकोपासकार्त्थिनी।

तारकोपासकाराध्या तारकोपासकाश्रया॥ ३०॥

तारकासुरसन्तुष्टा तारकासुरपूजिता।

तारकासुरनिर्माणकर्त्री तारकवन्दिता॥ ३१॥

तारकासुरसम्मान्या तारकासुरमानदा।

तारकासुरसंसिद्धा तारकासुरदेवता॥ ३२॥

तारकासुरदेहस्था तारकासुरस्वर्गदा।

तारकासुरसंसृष्टा तारकासुरगर्वदा॥ ३३॥

तारकासुरसंहन्त्री तारकासुरमर्द्दिनी।
तारकासुरसङ्ग्रामनर्त्तकी तारकापहा॥ ३४॥

तारकासुरसङ्ग्रामकारिणी तारकारिभृत्।
तारकासुरसङ्ग्रामकबन्धवृन्दवन्दिता॥ ३५॥

तारकारिप्रसूतारिकारिमाता तु कारिका।
तारकारीमनोहारीवस्त्रभूषानुशासिका॥ ३६॥

तारकारीविधात्री च तारकारिनिषेविता।
तारकारीवचस्तुष्टा तारकारीसुशिक्षिता॥ ३७॥

तारकारीसुसन्तुष्टा तारकारिविभूषिता।
तारकारिकृतोत्सङ्गी तारकारिप्रहर्षदा॥ ३८॥

तमः सम्पूर्णसर्वाङ्गी तमोलिप्तकलेबरा।
तमोव्याप्तस्थलासङ्गा तमः पटलसन्निभा॥ ३९॥

तमोहन्त्री तमः कर्त्री तमःसञ्चारकारिणी।

तमोगात्री तमोदात्री तमः पात्री तमोपहा॥ ४०॥

तमोराशिपूर्णराशिस्तमोराशिविनाशिनी।
तमोराशिकृतध्वंसी तमोराशिभयङ्करी॥ ४१॥

तमोगुणप्रसन्नास्या तमोगुणसुसिद्धिदा।
तमोगुणोक्तमार्गस्था तमोगुणविराजिता॥ ४२॥

तमोगुणस्तुतिपरा तमोगुणविवर्धिनी।
तमोगुणाश्रितपरा तमोगुणविनाशिनी॥ ४३॥

तमोगुणाक्षयकरी तमोगुणकलेवरा।
तमोगुणध्वंसतुष्टा तमः पारेप्रतिष्ठिता॥ ४४॥

तमोभवभवप्रीता तमोभवभवप्रिया।
तमोभवभवाश्रद्धा तमोभवभवाश्रया॥ ४५॥

तमोभवभवप्राणा तमोभवभवार्चिता।
p. 138) तमोभवभवप्रीत्यालीढकुम्भस्थलस्थिता॥ ४६॥

तपस्विवृन्दसन्तुष्टा तपस्विवृन्दपुष्टिदा।
तपस्विवृन्दसंस्तुत्या तपस्विवृन्दवन्दिता॥ ४७॥

तपस्विवृन्दसम्पन्ना तपस्विवृन्दहर्षदा।
तपस्विवृन्दसम्पूज्या तपस्विवृन्दभूषिता॥ ४८॥

तपस्विचित्ततल्पस्था तपस्विचित्तमध्यगा।
तपस्विचित्तचित्तार्हा तपस्विचित्तहारिणी॥ ४९॥

तपस्विकल्पवल्ल्याभा तपस्विकल्पपादपी।
तपस्विकामधेनुश्च तपस्विकामपूर्त्तिदा॥ ५०॥

तपस्वित्राणनिरता तपस्विगृहसंस्थिता।
तपस्विगृहराजश्रीस्तपस्विराज्यदायिका॥ ५१॥

तपस्विमानसाराध्या तपस्विमानदायिका।
तपस्वितापसंहर्त्री तपस्वितापशान्तिकृत्॥ ५२॥

तपस्विसिद्धिविद्या च तपस्विमन्त्रसिद्धिकृत्।
तपस्विमन्त्रतन्त्रेशी तपस्विमन्त्ररूपिणी॥ ५३॥

तपस्विमन्त्रनिपुणा तपस्विकर्मकारिणी।
तपस्विकर्मसम्भूता तपस्विकर्मसाक्षिणी॥ ५४॥

तपस्सेव्या तपोभव्या तपोभाव्या तपस्विनी।
तपोवश्या तपोगम्या तपोगेहनिवासिनी॥ ५५॥

तपोधन्या तपोमान्या तपः कन्या तपोवृता।
तपस्तथ्या तपोगोप्या तपोजप्या तपोनृता॥ ५६॥

तपस्साध्या तपोराध्या तपोवन्द्या तपोमयी।
तपस्सन्ध्या तपोवन्ध्या तपस्सान्निध्यकारिणी॥ ५७॥

तपोध्येया तपोगेया तपस्तप्ता तपोबला।
तपोलेया तपोदेया तपस्तत्त्वफलप्रदा॥ ५८॥

तपोविघ्नवरघ्नी च तपोविघ्नविनाशिनी।
तपोविघ्नचयध्वंसी तपोविघ्नभयङ्करी॥ ५९॥

तपोभूमिवरप्राणा तपोभूमिपतिस्तुता।

तपोभूमिपतिध्येया तपोभूमिपतीष्टदा॥ ६०॥

तपोवनकुरङ्गस्था तपोवनविनाशिनी।
तपोवनगतिप्रीता तपोवनविहारिणी॥ ६१॥

तपोवनफलासक्ता तपोवनफलप्रदा।
तपोवनसुसाध्या च तपोवनसुसिद्धिदा॥ ६२॥

तपोवनसुसेव्या च तपोवननिवासिनी।
तपोधनसुसंसेव्या तपोधनसुसाधिता॥ ६३॥

p. 139) तपोधनसुसँलीना तपोधनमनोमयी।
तपोधननमस्कारा तपोधनविमुक्तिदा॥ ६४॥

तपोधनधनासाध्या तपोधनधनात्मिका।
तपोधनधनाराध्या तपोधनफलप्रदा॥ ६५॥

तपोधनधनाढ्या च तपोधनधनेश्वरी।
तपोधनधनप्रीता तपोधनधनालया॥ ६६॥

तपोधनजनाकीर्णा तपोधनजनाश्रया।

तपोधनजनाराध्या तपोधनजनप्रसूः॥ ६७॥

तपोधनजनप्राणा तपोधनजनेष्टदा।

तपोधनजनासाध्या तपोधनजनेश्वरी॥ ६८॥

तरुणासृक्प्रपानार्ता तरुणासृक्प्रतर्पिता।

तरुणासृक्समुद्रस्था तरुणासृक्प्रहर्षदा॥ ६९॥

तरुणासृक्सुसन्तुष्टा तरुणासृग्विलेपिता।

तरुणासृङ्नदीप्राणा तरुणासृग्विभूषणा॥ ७०॥

तरुणौणबलिप्रीता तरुणौणबलिप्रिया।

तरुणौणवलिप्राणा तरुणौणबलीष्टदा॥ ७१॥

तरुणाजबलिप्रीता तरुणाजबलिप्रिया।

तरुणाजबलिघ्राणा तरुणाजबलिप्रभुक्॥ ७२॥

तरुणादित्यसङ्काशा तरुणादित्यविग्रहा।

तरुणादित्यरुचिरा तरुणादित्यनिर्म्मला॥ ७३॥

तरुणादित्यनिलया तरुणादित्यमण्डला।
तरुणादित्यललिता तरुणादित्यकुण्डला॥ ७४॥

तरुणार्कसमज्योत्स्ना तरुणार्कसमप्रभा।
तरुणार्कप्रतीकारा तरुणार्कप्रवर्द्धिता॥ ७५॥

तरुणा तरुणानेत्रा च तरुणा तरुणलोचना।
तरुणा तरुणनेत्रा च तरुणा तरुणभूषणा॥ ७६॥

तरुणीदत्तसङ्केता तरुणीदत्तभूषणा।
तरुणीगणसन्तुष्टा तरुणीतरुणीमणिः॥ ७७॥

तरुणीमणिसंसेव्या तरुणीमणिवन्दिता।
तरुणीमणिसन्तुष्टा तरुणीमणिपूजिता॥ ७८॥

तरुणीवृन्दसँआद्या तरुणीवृन्दवन्दिता।
तरुणीवृन्दसंस्तुत्या तरुणीवृन्दमानदा॥ ७९॥

तरुणीवृन्दमध्यस्था तरुणीवृन्दवेष्टिता।

तरुणीवृन्दसम्प्रीता तरुणीवृन्दभूषिता॥ ८०॥

तरुणीजपसंसिद्धा तरुणीजपमोक्षदा।
तरुणीपूजकासक्ता तरुणीपूजकार्त्थिनी॥ ८१॥

p. 140) तरुणीपूजकश्रीदा तरुणीपूजकार्त्तिहा।
तरुणीपूजकप्राणा तरुणीनिन्दकार्त्तिदा॥ ८२॥

तरुणीकोटिनिलया तरुणीकोटिविग्रहा।
तरुणीकोटिमध्यस्था तरुणीकोटिवेष्टिता॥ ८३॥

तरुणीकोटिदुस्साध्या तरुणीकोटिविग्रहा।
तरुणीकोटिरुचिरा तरुणीतरुणीश्वरी॥ ८४॥

तरुणीमणिहाराढ्या तरुणीमणिकुण्डला।
तरुणीमणिसन्तुष्टा तरुणीमणिमण्डिता॥ ८५॥

तरुणीसरणीप्रीता तरुणीसरणीरता।
तरुणीसरणीस्थाना तरुणीसरणीरता॥ ८६॥

तरणीमण्डलश्रीदा तरणीमण्डलेश्वरी।
तरणीमण्डलश्रद्धा तरणीमण्डलस्थिता॥ ८७॥

तरणीमण्डलाग्र्घाढ्या तरणीमण्डलार्चिता।
तरणीमण्डलध्येया तरणीभवसागरा॥ ८८॥

तरणीकारणासक्ता तरणीतक्षकार्चिता।
तरणीतक्षकश्रीदा तरणीतक्षकार्त्थिनी॥ ८९॥

तरणीतरणशीला च तरीतरणतारिणी।
तरीतरणसँवेद्या तरीतरणकारिणी॥ ९०॥

तरुरूपा तरूपस्था तरुस्तरुलतामयी।
तरुरूपा तरुस्था च तरुमध्यनिवासिनी॥ ९१॥

तप्तकाञ्चनगेहस्था तप्तकाञ्चनभूमिका।
तप्तकाञ्चनप्राकारा तप्तकाञ्चनपादुका॥ ९२॥

तप्तकाञ्चनदीप्ताङ्गी तप्तकाञ्चनसन्निभा।
तप्तकाञ्चनगौराङ्गी तप्तकाञ्चनमञ्चगा॥ ९३॥

तप्तकाञ्चनवस्त्राढ्या तप्तकाञ्चनरूपिणी।
तप्तकाञ्चनमध्यस्था तप्तकाञ्चनकारिणी॥ ९४॥

तप्तकाञ्चनमासाद्र्या तप्तकाञ्चनपात्रभुक्।
तप्तकाञ्चनशैलस्था तप्तकाञ्चनकुण्डला॥ ९५॥

तप्तकाञ्चनक्षत्त्राढ्या तप्तकाञ्चनदण्डधृक्।
तप्तकाञ्चनभूषाढ्या तप्तकाञ्चनदानदा॥ ९६॥

तप्तकाञ्चनदेशेशी तप्तकाञ्चनचापधृक्।
तप्तकाञ्चनतूणाढ्या तप्तकाञ्चनबाणभृत्॥ ९७॥

तलातलविधात्री च तलातलविधायिनी।
तलातलस्वरूपेशी तलातलविहारिणी॥ ९८॥

तलातलजनासाध्या तलातलजनेश्वरी।
तलातलजनाराध्या तलातलजनार्थदा॥ ९९॥

तलातलजयाभाक्षी तलातलजचञ्चला।

p. 141) तलातलजरत्नाढ्या तलातलजदेवता॥ १००॥

तटिनीस्थानरसिका तटिनी तटवासिनी।
तटिनी तटिनीतीरगामिनी तटिनीप्रिया॥ १०१॥

तटिनीप्लवनप्रीता तटिनीप्लवनोद्यता।
तटिनीप्लवनश्लाघ्या तटिनीप्लवनार्त्थदा॥ १०२॥

तटलास्था तटस्थाना तटेशी तटवासिनी।
तटपूज्या तटाराध्या तटरोममुखार्त्थिनी॥ १०३॥

तटजा तटरूपा च तटस्था तटचञ्चला।
तटसन्निधिगेहस्थासहिता तटशायिनी॥ १०४॥

तरङ्गिणी तरङ्गाभा तरङ्गायतलोचना।
तरङ्गसमदुर्द्धर्षा तरङ्गसमचञ्चला॥ १०५॥

तरङ्गसमदीर्घाङ्गी तरङ्गसमवर्द्धिता।
तरङ्गसमसँवृद्धिस्तरङ्गसमनिर्मला॥ १०६॥

तडागमध्यनिलया तडागमध्यासम्भवा।

गडागरचनश्लाघ्या तडागरचनोद्यता॥ १०७॥

तडागकुसुदामोदी तडागेशी तडागिनी।

तडागनीरसंस्नाता तडागनीरनिर्मला॥ १०८॥

तडागकमलागारा तडागकमलालया।

तडागकमलान्तस्स्था तडागकमलोद्यता॥ १०९॥

तडागकमलाङ्गी च तडागकमलानना।

तडागकमलप्राणा तडागकमलेक्षणा॥ ११०॥

तडागरक्तपद्मस्था तडागश्वेतपद्मगा।

तडागनीलपद्माभा तडागनीलपद्मभृत्॥ १११॥

तनुस्तनुगता तन्वी तन्वङ्गी तनुधारिणी।

तनुरूपा तनुगता तनुधृक् तनुरूपिणी॥ ११२॥

तनुस्था तनुमध्याङ्गी तनुकृत्तनुमङ्गला।

तनुसेव्या तु तनुजा तनुजातनुसम्भवा॥ ११३॥

तनुभृत्तनुसम्भूता तनुदातनुकारिणी।
तनुभृत्तनुसंहन्त्री तनुसञ्चारकारिणी॥ ११४॥

तथ्यवाक् तथ्यवचना तथ्यकृत् तथ्यवादिनी।
तथ्यभृत्तथ्यचरिता तथ्यधर्मानुवर्त्तिनी॥ ११५॥

तथ्यभुक् तथ्यगमना तथ्यभक्तिवरप्रदा।
तथ्यनीचेश्वरी तथ्यचित्ताचाराशुसिद्धिदा॥ ११६॥

तर्क्यातर्क्यस्वभावा च तर्कदाया तु तर्ककृत्।
तर्काध्यापनमध्यस्था तर्काध्यापनकारिणी॥ ११७॥

तर्काध्यापनसन्तुष्टा तर्काध्यापनरूपिणी।
p. 142) तर्काध्यापनसंशीला तर्कार्त्थप्रतिपादिता॥ ११८॥

तर्काध्यापनसन्तृप्ता तर्कार्त्थप्रतिपादिका।
तर्कवादाश्रितपदा तर्कवादविवर्द्धिनी॥ ११९॥

तर्कवादैकनिपुणा तर्कवादप्रचारिणी।

तमालदलश्यामाङ्गी तमालदलमालिनी॥ १२०॥

तमालवनसङ्केता तमालपुष्पपूजिता।
तगरी तगराराध्या तगरार्चितपादुका॥ १२१॥

तगरस्रक्सुसन्तुष्टा तगरस्रग्विराजिता।
तगराहुतिसन्तुष्टा तगराहुतिकीर्तिदा॥ १२२॥

तगराहुतिसंसिद्धा तगराहुतिमानदा।
तडित्तडिल्लताकारा तडिच्चञ्चललोचना॥ १२३॥

तडिल्लता तडित्तन्वी तडिद्दीप्ता तडित्प्रभा।
तद्रूपा तत्स्वरूपेशी तन्मयी तत्त्वरूपिणी॥ १२४॥

तत्स्थानदाननिरता तत्कर्मफलदायिनी।
तत्त्वकृत् तत्त्वदा तत्त्वा तत्त्ववित् तत्त्वतर्पिता॥ १२५॥

तत्त्वार्च्या तत्त्वपूजा च तत्त्वाग्र्घ्या तत्त्वरूपिणी।
तत्त्वज्ञानप्रदानेशी तत्त्वज्ञानसुमोक्षदा॥ १२६॥

त्वरिता त्वरितप्रीता त्वरितार्त्तिविनाशिनी।
त्वरितासवसन्तुष्टा त्वरितासवतर्पिता॥ १२७॥

त्वग्वस्त्रा त्वक्परीधाना तरला तरलेक्षणा।
तरक्षुचर्मवसना तरक्षुत्वग्विभूषणा॥ १२८॥

तरक्षुस्तरक्षुप्राणा तरक्षुपृष्ठगामिनी।
तरक्षुपृष्ठसंस्थाना तरक्षुपृष्ठवासिनी॥ १२९॥

तर्पितोदैस्तर्पणाशा तर्पणासक्तमानसा।
तर्पणानन्दहृदया तर्पणाधिपतिस्ततिः॥ १३०॥

त्रयीमयी त्रयीसेव्या त्रयीपूज्या त्रयीकथा।
त्रयीभव्या त्रयीभाव्या त्रयीभाव्या त्रयीयुता॥ १३१॥

त्र्यक्षरी त्र्यक्षरेशानी त्र्यक्षरीशीघ्रसिद्धिदा।
त्र्यक्षरेशी त्र्यक्षरीस्था त्र्यक्षरीपुरुषापदा॥ १३२॥

तपना तपनेष्टा च तपस्तपनकन्यका।
तपनांशुसमासह्या तपनकोटिकान्तिकृत्॥ १३३॥

तपनीया तल्पतल्पगता तल्पविधायिनी।

तल्पकृत्तल्पगा तल्पदात्री तल्पतलाश्रया॥ १३४॥

तपनीयतलारात्री तपनीयांशुप्रार्थिनी।

p. 143) तपनीयप्रदातप्ता तपनीयाद्रिसंस्थिता॥ १३५॥

तल्पेशी तल्पदा तल्पसंस्थिता तल्पवल्लभा।

तल्पप्रिया तल्परता तल्पनिर्माणकारिणी॥ १३६॥

तरसापूजनासक्ता तरसावरदायिनी।

तरसासिद्धिसन्धात्री तरसामोक्षदायिनी॥ १३७॥

तापसी तापसाराध्या तापसार्त्तिविनाशनी।

तापसार्त्ता तापसश्रीस्तापसप्रियवादिनी॥ १३८॥

तापसानन्दहृदया तापसानन्ददायिनी।

तापसाश्रितपादाब्जा तापसक्तमानसा॥ १३९॥

तामसी तामसीपूज्या तामसीप्रणयोत्सुका।

तामसी तामसीसीता तामसीशीघ्रसिद्धिदा॥ १४०॥

तालेशी तालभुक्तालदात्री तालोपमस्तनी।
तालवृक्षस्थिता तालवृक्षजा तालरूपिणी॥ १४१॥

ताक्ष्र्शा ताक्ष्र्शसमारूढा ताक्ष्र्शेशी ताक्ष्र्शपूजिता।
ताक्ष्र्शेश्वरी ताक्ष्र्शमाता ताक्ष्र्शेशीवरदायिनी॥ १४२॥

तापी तु तपिनी तापसंहन्त्री तापनाशिनी।
तापदात्री तापकर्त्री तापविध्वंसकारिणी॥ १४३॥

त्रासकर्त्री त्रासदात्री त्रासहर्त्री च त्रासहा।
त्रासिता त्रासरहिता त्रासनिर्म्मूलकारिणी॥ १४४॥

त्राणकृत्त्राणसंशीला तानेशी तानदायिनी।
तानगानरता तानकारिणी तानगायिनी॥ १४५॥

तारुण्यामृतसम्पूर्णा तारुण्यामृतवारिधिः।
तारुण्यामृतसंतुष्टा तारुण्यामृततर्पिता॥ १४६॥

तारुण्यामृतपूर्णाङ्गी तारुण्यामृतविग्रहा।
तारुण्यगुणसम्पन्ना तारुण्योक्तिविशारदा॥ १४७॥

ताम्बूली ताम्बुलेशानी ताम्बूलचर्वणोद्यता।
ताम्बूलपूरितास्या च ताम्बूलारुणिताधरा॥ १४८॥

ताटङ्करत्नविख्यातिस्ताटङ्करत्नभूषिणी।
ताटङ्करत्नमध्यस्था ताटङ्कद्वयभूषिता॥ १४९॥

तिथीशा तिथिसम्पूज्या तिथिस्था तिथिरूपिणी।
त्रितिथिवासिनीसेव्या तिथीशवरदायिनी॥ १५०॥

तिलोत्तमादिकाराध्या तिलोत्तमादिकप्रभा।
तिलोत्तमा तिलप्रक्षा तिलाराध्या तिलार्चिता॥ १५१॥

p. 144) तिलभुक् तिलसन्दात्री तिलतुष्टा तिलालया।
तलदा तिलसङ्काशा तिलतैलविधायिनी॥ १५२॥

तिलतैलोपलिप्ताङ्गी तिलतैलसुगन्धिनी।
तिलाज्यहोमसन्तुष्टा तिलाज्यहोमसिद्धिदा॥ १५३॥

तिलपुष्पाञ्जलिप्रीता तिलपुष्पाञ्जलिप्रिया।
तिलपुष्पाञ्जलिश्रेष्ठा तिलपुष्पाभनाशिनी॥ १५४॥

तिलकाश्रितसिन्दूरा तिलकाङ्कितचन्दना।
तिलकाहृतकस्तूरी तिलकामोदमोहिनी॥ १५५॥

त्रिगुणा रिगुणाकारा त्रिगुणान्वितविग्रहा।
त्रिगुणाकारविख्याता त्रिमूर्त्तिस्त्रिगुणात्मिका॥ १५६॥

त्रिशिरा त्रिपुरेशानी त्रिपुरा त्रिपुरेश्वरी।
त्रिपुरेशी त्रिलोकस्था त्रिपुरी त्रिपुराम्बिका॥ १५७॥

त्रिपुरारिसमाराध्या त्रिपुरारिवरप्रदा।
त्रिपुरारिशिरोभूषा त्रिपुरारिवरप्रदा ॥ १५८॥

त्रिपुरारीष्टसन्दात्री त्रिपुरारीष्टदेवता।
त्रिपुरारिकृतार्द्धाङ्गी त्रिपुरारिविलासिनी॥ १५९॥

त्रिपुरासुरसंहन्त्री त्रिपुरासुरमर्द्दिनी।

त्रिपुरासुरसंसेव्या त्रिपुरासुरवर्यया॥ १६०॥

त्रिकुटा त्रिकुटाराध्या त्रिकूटार्च्चितविग्रहा।
त्रिकूटाचलमध्यथा त्रिकूटाचलवासिनी॥ १६१॥

त्रिकूटाचलसञ्ज्ञाता त्रिकूटाचलनिर्ग्गता।
त्रिजटा त्रिजटेशानी त्रिजटावरदायिनी॥ १६२॥

त्रिनेत्रेशी त्रिनेत्रा च त्रिनेत्रवरवर्णिनी।
त्रिवली त्रिवलीयुक्ता त्रिशूलवरधारिणी॥ १६३॥

त्रिशूलेशी त्रिशूलीशी त्रिशूलभृत् त्रिशूलिनी।
त्रिमनुस्त्रिमनूपास्या त्रिमनूपासकेश्वरी॥ १६४॥

त्रिमनुजपसन्तुष्टा त्रिमनुस्तूर्णसिद्धिदा।
त्रिमनुपूजनप्रीता त्रिमनुध्यानमोक्षदा॥ १६५॥

त्रिविधा त्रिविधाभक्तिस्त्रिमता त्रिमतेश्वरी।
त्रिभावस्था त्रिभावेशी त्रिभावपरिपूरिता॥ १६६॥

त्रितत्त्वात्मा त्रितत्त्वेशी त्रितत्त्वज्ञा त्रितत्त्वधृक्।
त्रितत्त्वाचमनप्रीता त्रितत्त्वाचमनेष्टदा॥ १६७॥

त्रिकोणस्था त्रिकोणेशी त्रिकोणचक्रवासिनी।
त्रिकोणचक्रमध्यस्था त्रिकोणबिन्दुरूपिणी॥ १६८॥

p. 145) त्रिकोणयन्त्रसंस्थाना त्रिकोणयन्त्ररूपिणी।
त्रिकोणयन्त्रसम्पूज्या त्रिकोणयन्त्रसिद्धिदा॥ १६९॥

त्रिवर्णाढ्या त्रिवर्णेशी त्रिवर्णोपासिरूपिणी।
त्रिवर्णस्था त्रिवर्णाढ्या त्रिवर्णवरदायिनी॥ १७०॥

त्रिवर्णाद्या त्रिवर्णार्च्या त्रिवर्गफलदायिनी।
त्रिवर्गाढ्या त्रिवर्गेशी त्रिवर्गाद्यफलप्रदा॥ १७१॥

त्रिसन्ध्यार्च्या त्रिसन्ध्येशी त्रिसन्ध्याराधनेष्टदा।
त्रिसन्ध्यार्चनसन्तुष्टा त्रिसन्ध्याजपमोक्षदा॥ १७२॥

त्रिपदाराधितपदा त्रिपदा त्रिपदेश्वरी।
त्रिपदाप्रतिपाद्येशी त्रिपदा प्रतिपादिका॥ १७३॥

त्रिशक्तिश्च त्रिशक्तेशी त्रिशक्तेष्टफलप्रदा।

त्रिशक्तेष्टा त्रिशक्तीष्टा त्रिशक्तिपरिवेष्टिता॥ १७४॥

त्रिवेणी च त्रिवेणीस्त्री त्रिवेणीमाधवार्चिता।

त्रिवेणीजलसन्तुष्टा त्रिवेणीस्नानपुण्यदा॥ १७५॥

त्रिवेणीजलसंस्नाता त्रिवेणीजलरूपिणी।

त्रिवेणीजलपूताङ्गी त्रिवेणीजलपूजिता॥ १७६॥

त्रिनाडीस्था त्रिनाडीशी त्रिनाडीमध्यगामिनी।

त्रिनाडीसन्ध्यसञ्छेया त्रिनाडी च त्रिकोटिनी॥ १७७॥

त्रिपञ्चाशत्त्रिरेखा च त्रिशक्तिपथगामिनी।

त्रिपथस्था त्रिलोकेशी त्रिकोटिकुलमोक्षदा॥ १७८॥

त्रिरामेशी त्रिरामार्च्या त्रिरामवरदायिनी।

त्रिदशाश्रितपादाब्जा त्रिदशालयचञ्चला॥ १७९॥

त्रिदशा त्रिदशप्रार्त्या त्रिदशाशुवरप्रदा।

त्रिदशैश्वर्यसम्पन्ना त्रिदशेश्वरसेविता॥ १८०॥

त्रियामार्च्या त्रियामेशी त्रियामानन्तसिद्धिदा।
त्रियामेशाधिकज्योत्स्ना त्रियामेशाधिकानना॥ १८१॥

त्रियामानाथवत्सौम्या त्रियामानाथभूषणा।
त्रियामानाथलावण्या-रत्नकोटियुताननना॥ १८२॥

त्रिकालस्था त्रिकालज्ञा त्रिकालज्ञत्वकारिणी।
त्रिकालेशी त्रिकालार्च्या त्रिकालज्ञत्वदायिनी॥ १८३॥

तीरभुक् तीरगा तीरसरिता तीरवासिनी।
तीरभुग्देशसञ्जाता तीरभुग्देशसंस्थिता॥ १८४॥

तिग्मातिग्मांशुसङ्काशा तिग्मांशुक्रोडसंस्थिता।
p. 146) तिग्मांशुकोटिदीप्ताङ्गी तिग्मांशुकोटिविग्रहा॥ १८५॥

तीक्ष्णा तीक्ष्णतरा तीक्ष्णमहिषासुरमर्द्दिनी।
तीक्ष्णकर्त्रिलसत्पाणिस्तीक्ष्णासिवरधारिणी॥ १८६॥

तीव्रा तीव्रगतिस्तीव्रासुरसङ्घविनाशिनी।
तीव्राष्टनागाभरणा तीव्रमुण्डविभूषणा॥ १८७॥

तीर्त्थात्मिका तीर्त्थमयी तीर्त्थेशी तीर्त्थपूजिता।
तीर्त्थराजेश्वरी तीर्त्थफलदा तीर्त्थदानदा॥ १८८॥

तुमुली तुमुलप्राज्ञी तुमुलासुरघातिनी।
तुमुलक्षतजप्रीता तुमुलाङ्गणवर्त्तकी॥ १८९॥

तुरगी तुरगारूढा तुरङ्गपृष्ठगामिनी।
तुरङ्गगमनाह्लादा तुरङ्गवेगगामिनी॥ १९०॥

तुरीया तुलना तुल्या तुल्यवृत्तिस्तु तुल्यकृत्।
तुलनेशी तुलाराशिस्तुलाराशी त्वसूक्ष्मवित्॥ १९१॥

तुम्बिका तुम्बिकापात्रभोजना तुम्बिकार्थिनी।
तुलसी तुलसीवर्या तुलजा तुलजेश्वरी॥ १९२॥

तुषाग्निव्रतसन्तुष्टा तुषाग्निस्तुषराशिकृत्।
तुषारकरशीताङ्गी तुषारकरपूर्त्तिकृत्॥ १९३॥

तुषाराद्रिस्तुषाराद्रिसुता तुहिनदीधितिः।
तुहिनाचलकन्या च तुहिनाचलवासिनी॥ १९४॥

तूर्यवर्गेश्वरी तूर्यवर्गदा तूर्यवेददा।
तूर्यवर्यात्मिका तूर्यतूर्येश्वरस्वरूपिणी॥ १९५॥

तुष्टिदा तुष्टिकृत् तुष्टिस्तूणीरद्वयपृष्ठधृक्।
तुम्बुराज्ञानसन्तुष्टा तुष्टसंसिद्धिदायिनी॥ १९६॥

तूर्णराज्यप्रदा तूर्णगद्यदा तूर्णपद्यदा।
तूर्णपाण्डित्यसन्दात्री तूर्णापूर्णबलप्रदा॥ १९७॥

तृतीया च तृतीयेशी तृतीयातिथिपूजिता।
तृतीयाचन्द्रचूडेशी तृतीयाचन्द्रभूषणा॥ १९८॥

तृप्तिस्तृप्तिकरी तृप्ता तृष्णा तृष्णाविवर्द्धिनी।
तृष्णापूर्णकरी तृष्णानाशिनी तृषिता तृषा॥ १९९॥

त्रेतासंसाधिता त्रेता त्रेतायुगफलप्रदा।

त्रैलोक्यपूजा त्रैलोक्यदात्री त्रैलोक्यसिद्धिदा॥ २००॥

त्रैलोक्येश्वरतादात्री त्रैलोक्यपरमेश्वरी।
त्रैलोक्यमोहनेशानी त्रैलोक्यराज्यदायिनी॥ २०१॥

तैत्रिशाखेश्वरी त्रैत्रीशाखा तैत्रविवेकदा।
p. 147) तोरणान्वितगेहस्था तोरणासक्तमानसा॥ २०२॥

तोलकास्वर्णसन्दात्री तौलकास्वर्णकङ्कणा।
तोमरायुधरूपा च तोमरायुधधारिणी॥ २०३॥

तौर्यत्रिकेश्वरी तौर्यन्त्रिकी तौर्यन्त्रिकोत्सुकी।
तन्त्रकृत्तन्त्रवत्सूक्ष्मा तन्त्रमन्त्रस्वरूपिणी॥ २०४॥

तन्त्रकृत्तन्त्रसम्पूज्या तन्त्रेशी तन्त्रसम्मता।
तन्त्रज्ञा तन्त्रवित्तन्त्रसाध्या तन्त्रस्वरूपिणी॥ २०५॥

तन्त्रस्था तन्त्रजा तन्त्री तन्त्रभृत्तन्त्रमन्त्रदा।
तन्त्राद्या तन्त्रगा तन्त्रा तन्त्रार्च्या तत्रसिद्धिदा॥ २०६॥

इति ते कथितन्दिव्यङ्कतुकोटिफलप्रदम्।
नाम्नां सहस्त्रन्तारायास्तकाद्यं सुगोपितम्॥ २०७॥

दानँय्यज्ञस्तपस्तीर्त्थँव्रतञ्चानशनादिकम्।
एकैकनामजम्पुण्यं सन्ध्यातुर्गादितम्मया॥ २०८॥

गुरौ देवे तथा मन्त्रे यस्य स्यान्निश्चला मतिः।
तस्यैव स्तोत्रपाठेऽस्मिन्सम्भवेदधिकारिता॥ २०९॥

महाचीनक्रमाभिन्नषोढान्यस्तकलेवरः।
क्रमदीक्षान्वितो मन्त्री पठेदेतन्न चान्यथा॥ २१०॥

गन्धपुष्पादिभिर्द्रव्यैर्मकारैः पञ्चकैर्द्विजः।
सम्पूज्य ताराँव्विधिवत्पठेदेतदनन्यधीः॥ २११॥

अष्टम्याञ्च चतुर्दश्या सङ्क्रान्तौ रविवासरे।
शनिभौमदिने रात्रौ ग्रहणे चन्द्रसूर्ययोः॥ २१२॥

तारारात्रौ कालरात्रौ मोहरात्रौ विशेषतः।
पठनान्मन्त्रसिद्धिः स्यात्सर्वज्ञत्वम्प्रजायते॥ २१३॥

श्मशाने प्रान्तरे रम्ये शून्यागारे विशेषतः।
देवागारे गिरौ वापि स्तवपारायणञ्चरेत्॥ २१४॥

ब्रह्महत्या सुरापानं स्तेयं स्त्रीगमनादिकम्।
गुरुतल्पे तथा चान्यत्पातकन्नश्यति ध्रुवम्॥ २१५॥

लतामध्यगतो मन्त्री श्रद्धया चार्च्चयेद्यदि।
आकर्षयेत्तदा रम्भाम्मेनामपि तथोर्वशीम्॥ २१६॥

संग्रामसमये वीरस्तारासाम्राज्यकीर्त्तनात्।
चतुरङ्गचयञ्जित्वा सर्वसाम्राज्यभाग्भवेत्॥ २१७॥

निशार्द्धे पूजनान्ते च प्रतिनाम्ना प्रपूजयेत्।
एकैककरवीराद्यैर्मन्दौर्नीलवारिजैः॥ २१८॥

p. 148) गद्यपद्यमयीवाणी भूभोज्या च प्रवर्त्तते।
पाण्डित्यं सर्वशास्त्रेषु वादी त्रस्यति दर्शनात्॥ २१९॥

वह्निजायान्तकैरेतैस्ताराद्यैः प्रतिनामभिः।

राजन्यं सर्वराजेषु परकायप्रवेशनम्॥ २२०॥

अन्तर्द्धानञ्चेचरत्वम्बहुकायप्रकाशनम्।
गुटिका पादुका पद्मावती मधुमती तथा॥ २२१॥

रसं रसायनाः सर्वाः सिद्धयः समुपस्थिताः।
कर्पूरागरुकस्तूरीचन्दनैः सँयुतैर्ज्जलैः॥ २२२॥

मूलं सम्पुटितेनैव प्रतिनाम्ना प्रपूजयेत्।
यक्षराक्षसगन्धर्वा विद्याधरमहोरगाः॥ २२३॥

भूतप्रेतपिशाचाद्या डाकिनीशाकिनीगणाः।
दुष्टा भैरववेतालाः कूष्माण्डाः किन्नरीगणाः॥ २२४॥

भयभीताः पलायन्ते तेजसा साधकस्य च।
मन्त्रज्ञाने समुत्पन्ने प्रतिनाम्ना विचारयेत्॥ २२५॥

मन्त्रसम्पुटितेनैव तस्य शान्तिर्भवेद्ध्रुवम्।
ललिता वशमायाति दास्यताँय्यान्ति पार्त्थिवाः॥ २२६॥

अग्नयः शीतताँय्यान्ति जपाकस्य च भाषणात्।
एकावर्त्तनमात्रेण राजभीतिनिवारणम्॥ २२७॥

वेलावर्तनमात्रेण पशुवृद्धिः प्रजायते।
दशावृत्या धनप्राप्तिर्विंशत्या राज्यमाप्नुयात्॥ २२८॥

शतावृत्या गृहे तस्य चञ्चला निश्चला भवेत्।
गङ्गाप्रवाहवद्वाणी प्रलापादपि जायते॥ २२९॥

पुत्रपौत्रान्वितो मन्त्री चिरञ्जीवी तु देववत्।
शतद्वयावर्त्तनेन देववत्पूज्यते जनैः॥ १३०॥

शतपञ्चकमावर्त्त्य स भवेद्भैरवोपमः।
सहस्रावर्त्तनेनैव मन्त्रस्तस्य स्वसिद्धिदः॥ १३१॥

तस्मिन्प्रवर्त्तते सर्वसिद्धिः सर्वार्थसाधिनी।
पादुकाञ्चनवेतालापातालगगनादिकम्॥ २३२॥

विविधा यक्षिणीसिद्धिर्व्वाक्सिद्धिस्तस्य जायते।
शोषणं सागराणाञ्च धाराया भ्रमणन्तथा॥ २३३॥

नवीनसृष्टिनिर्माणं सर्वङ्कर्त्तुङ्क्षमो भवेत्।
आयुतावर्त्तनेनैव ताराम्पश्यति चक्षुषा॥ २३४॥

लक्षावर्त्तनमात्रेण तारापतिसमो भवेत्।
न किञ्चिद्दुर्ल्लभन्तस्य जीवन्मुक्तो हि भूतले॥ २३५॥

p. 149) कल्पान्तेन तु तत्पश्चात्तारासायुज्यमाप्नुयात्।
यद्धि तारासमा विद्या नास्ति तारुण्यरूपिणी॥ २३६॥

न चैतत्सदृशं स्तोत्रम्भवेद्ब्रह्माण्डमण्डले।
वक्रकोटिसहस्रैस्तु जिह्वाकोटिशतैरपि॥ २३७॥

न शक्यते फलँव्वक्तुम्मया कल्पशतैरपि।
चुम्बके निन्दके दुष्टे पिशुने जीवहिंसके॥ २३८॥

सङ्गोप्यं स्तोत्रमेतत्तद्दर्शनेनैव कुत्रचित्।
राज्यन्देयन्धनन्देयं शिरो देयमथापि वा॥ २३९॥

न देयं स्तोत्रवर्यन्तु मन्त्रादपि महोद्यतम्।

अनुलोमविलोमाभ्याम्मूलसम्पुटितन्त्विदम्॥ २४०॥

लिखित्वा भूर्ज्जपत्रादौ गन्धाष्टकपुरस्सरैः।
धारयेद्दक्षिणे बाहौ कण्ठे वामभुजे तथा॥ २४१॥

तस्य सर्वार्त्थसिद्धिस्स्याद्वह्निना नैव दह्यते।
तद्गात्रं शस्त्रसङ्घैश्च भिद्यते न कदाचन॥ २४२॥

स भूमिवलये पुत्र विचरेद्भैरवोपमः।
वन्ध्यापि लभते पुत्रन्निर्द्धनो धनमाप्नुयात्॥
निर्विघ्नो लभते विद्यान्तर्कव्याकरणादिकाम्॥ २४३॥

इति निगदितमस्यास्तादिनाम्नां सहस्रँ
व्वरदमनुनिदानन्दिव्यसाम्राज्यसंज्ञम्।
विधिहरिगिरिशादौ शक्तिदानैकदक्षं
समविधिपठनीयङ्कालितारासमज्ञैः॥ २४४॥

इतिश्रीब्रह्मयामले तारायास्तकारादिसहस्रनामस्तोत्र
सम्पूर्णम्॥

इति श्रीशाक्तप्रमोदे तारातन्त्रं समाप्तम्॥

श्रीः

शिवहरराजधानीपतिश्रीराजादेवनन्दनसिंह-

बहादुरनराधिपसंगृहीतविरचित-

शाक्तप्रमोदान्तर्गतं

तृतीयं

षोडशीतन्त्रम्

उक्तराजगुरुवंश्यपण्डितश्रीरघुराजदुबेजीद्वारा

संशोधितम्

तदेतत्

श्रीकृष्णदासात्मज-खेमराजेन
स्वकीये श्रीवेंकटेश्वर यन्त्रालये

मुद्रयित्वा प्रकाशितम्

बोम्ब-ई

p. 153) श्रीगणेशाय नमः

अथ शाक्तप्रमोदः

षोडशीतन्त्रम्

अथ षोडशीध्यानम्

बालार्कमण्डलाभासां चतुर्बाहात्रिलोचनाम्।
पाशाङ्कुशशरांश्चापन्धारयन्तीं शिवाम्भजे॥

p. 154) **अथ यन्त्रोद्धारः**

बिन्दुत्रिकोणवसुकोणदशायुग्मँवस्वस्त्रनागदलसङ्गतषोडशारम्।
वृत्तत्रयञ्च धरणीसदनत्रयञ्च श्रीचक्रराजमुदितम्परदेवतायाः॥

अथ मन्त्रोद्धारः

आदौ लज्जां समुच्चार्य क-ए-ईल ततः परम्।
पुनश्च लज्जामुच्चार्य हसकहल तु तत्परम्॥ १॥

त लज्जाम्पुनः प्रोच्य लज्जान्तं सकलन्ततः।
षोडशाक्षरमन्त्रोऽयं षोडश्यास्समुदाहृतः॥ २॥

इयन्तु सुन्दरी विद्या देवानामपि दुर्ल्लभा।
गोपनीया प्रयत्नेन सर्वसम्पत्करी मता॥ ३॥

अथ मन्त्रः

॥ ह्रींक-ए-ईलह्रीं हसकहलह्रीं सकलह्रीं॥

अथ पूजाविधिः

ब्राह्मे मुहूर्ते उत्थाय शय्यायामेव स्थित्वा शिरसि
महासहस्रदलकमले श्रीगुरुन्ध्यायेत् -

द्विनेत्रन्द्विभुजं शान्तङ्गुरुम्पद्मासनस्थितम्॥
यथावर्णं सुखासीनम्मुक्तम्भास्वररूपिणम्॥
वराभयकरम्ब्रह्मविष्णुशङ्कररूपिणम्॥
वामेनोत्पलधारिण्या शक्त्या वामाङ्गसँयुतमिति ध्यात्वा।

अखण्डमण्डलाकारँव्याप्तँय्येन चराचरम्॥
तत्पदन्दर्शितँय्येन तस्मै श्रीगुरवे नमः॥
अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया॥

p. 155) चक्षुरुन्मीलितँय्येन तस्मै श्रीगुरवे नमः॥
नमोस्तु गुरवे तस्मै इष्टदेवस्वरूपिणे॥
यस्य वागमृतं हन्ति विषसंसारसङ्कुलम्॥
अनन्तरात्मागुरुन्नमस्कृत्य अन्तर्भावनाङ्कुर्यात्।
मूलमष्टोत्तरशतञ्जपेत्॥

समुद्रमेखले देवि पर्वतस्तनमण्डले॥

विष्णुपत्नि नमस्तुभ्यम्पादस्पर्शङ्क्षमस्व मे इति पठन्
वामपादपुरस्सरम्भूमिं स्पृशेत्॥ तत्र मन्त्रः। लसहह्रीं एँअ-
इक्लींस इतिस्मृत्वा। तत्र चासनमास्तीर्योपविश्य
मूलादिब्रह्मरन्ध्रान्तम्मूलविद्याँविचिन्तयेत्।

उद्यतादित्यसङ्काशान्तडित्कोटिसमप्रभाम्॥
तत्प्रभापटलव्याप्तन्देहं सुपरिचिन्तयेत्॥

षड्चक्रभेदनङ्कुर्यात्॥ तद्यथा -

गुदलिङ्गान्तरे वंशंषंसं इतिचतुर्दलम्पीतवर्णम्मूलाधारम्
अत्र देवता डाकिनी गणेशश्चतुर्द्दन्तस्त्रिकोणविद्युद्वर्णन्तन्मध्ये
बिसतन्तुतनीसी शेषावर्तनिभां
सार्द्धत्रिवलान्विताम्प्रसुप्तभुजगाकारां
सोमसूर्याग्निरूपिणीङ्कुण्डलिनीं शक्तिं हूंकारेण
मनोमयदण्डेनाहत्योत्थाप्य हँअ-इति जप्त्वा॥ १॥

लिङ्गमूले बंभंमंयंरंलमिति रक्तं स्वाधिष्ठानम् तत्र

डाकिनी देवी ब्रह्मा च॥ २॥

नाभौ डं ढं णं तं थं दं धं नं पं फमिति

नीलं मणिपूरम् तत्र लाकिनी देवी विष्णुश्च॥ ३॥

हृदये कंखंगंघंङंचंछंजंझंञंटंठमिति

द्वादशदलन्धूम्रमनाहतचक्रम् तत्र काकिनी देवी रुद्रश्च॥ ४॥

कण्ठे अं-आं-इं-ईं-उं-ऊं-ऋं-ॠं-ऌं-ॡं-एं-ऐं-ओं-

औं-अं-अः इतिषोडशदलं पिङ्गलवर्णं विशुद्धचक्रम् तत्र शाकिनी

देवी शिवात्मा॥ ५॥

भ्रूमध्ये हंलमिति द्विदलमाज्ञाचक्रम् तत्र हाकिनी देवी

परात्मा च॥ ६॥

एवं षड्चक्रम्भित्त्वा सहस्रदलकमलकर्णिकान्तर्गतबिन्दुरूपे

परमशिवे सँयोज्य लक्षाभयरमामृतेन कुण्डलिनीं सन्तर्प्य॥

पुनराज्ञाविशुद्धानाहतन्त्रिपुरस्वाधिष्ठानम्मूलाधारन्नयेत्॥ इति

भावना देवीन्ध्यात्वा मानसोपचारैस्सम्पूज्य जप्त्वा स्तुत्वा नत्वा

आवश्यकशौचादिकङ्कृत्वा दन्तधावनङ्गृहीत्वा

p. 156) क्लींसर्वजनप्रियायै रतिकामस्वरूपायै नम इतिमन्त्रेण
दन्तधावनङ्कुर्यात्। ततो मूलेन मुखप्रक्षालनङ्कृत्वा यथाकाले
जलाशयङ्गत्वा सूर्याभिमुखम्मुसलवदेकवारन्निमज्ज्य
पुरतश्चतुर्हस्तप्रमाणञ्चतुरस्रम्प्रकल्प्य तन्मध्ये त्रिकोणँव्विलिख्य
सूर्यमण्डलादङ्कुशमुद्रया तीर्त्थमानयेत्।

ॐ गङ्गे च यमुने चैव गोदावरि सरस्वति।
नर्म्मदे सिन्धु कावेरि जलेऽस्मिन्सन्निधिङ्कुरु॥

वमिति धेनुमुद्राम्प्रदश्शर्य मूलमष्टधा जपित्वा॥
कलशमुद्रया मूलेन सप्तधा शिरस्सिञ्चयेत्।
सप्तच्छिद्राणि निरुध्य त्रिधा निमज्जयेत्।
पापप्रोक्षणङ्कृत्वा सन्ध्याङ्कुर्यात्॥

प्राणायामत्रयङ्कृत्वा वमिति धेनुमुद्रया जलममृतीकृत्य त्रिभिः शिरो
मूलेनाभ्युक्ष्य नवधाऽचम्य तज्जलन्दक्षिणकरे कृत्वा
लंवंरंयंहमिति पाञ्चभौतिकमन्त्रमष्टधा जपित्वा
मूलन्दशधा जपेत्। वामहस्तानामिकाङ्गुष्ठाभ्याञ्छोटिकायोगेन
त्रिः शिरोभ्युक्ष्यावशिष्टजलँव्वामहस्ते ईडया अन्तर्गतम्मत्वा तेनैव

निश्शेषकलूषन्दग्धँव्विचिन्त्य पिङ्गलायाम्बहिर्गतँव्विभाव्य
तज्जलन्दक्षिणकरे कृत्वा तत्र पापपुरुषँविचिन्त्य वामभागे भूमौ
वज्रशिलान्ध्यात्वा तत्र निःक्षिप्य
पापपुरुषञ्चूर्णितम्भावयेदित्यघमर्षणम्। ततो देवादीन् यथाविधि
सन्तर्प्य। ॐगणेशन्तर्पयामि, बटुकन्तर्पयामि, योगिनीन्तर्पयामि,
सर्वान्देवगणांस्तर्पयामि, सर्वान्पितृगणांस्तर्पयामि,
सर्वान्मातृगणांस्तर्पयामि, सर्वान्मनुष्यगणांस्तर्पयामि,
सर्वान्तर्य्यामि मूलमुच्चार्य श्रीमहात्रिपुरसुन्दरीन्तर्पयामि नम
इतित्रिवारन्तर्पयित्वा ऐं आत्मतत्त्वंशोधयामि, क्लींविद्यातत्त्वं
शोधयामि, सौंशिवतत्त्वं शोधयामि, ऐं क्लीं सौंसर्वतत्त्वं
शोधयामि। ततो जलादुत्थाय धौतवाससी परिधाय मूलेन
तिलकङ्कृत्वा गन्धपुष्पाक्षतैरग्घ्यं सम्पाद्य ओं-ऐं-
ह्रींश्रींकुलमार्तण्डभैरवाय
तिथिवारनक्षत्रयोगकरणप्रकाशशक्तिसहिताय एषोऽग्घ्योंनम
इतिमन्त्रेण सूर्याग्घ्यन्दत्त्वा

p. 157) यथाशक्ति देवतागायत्रीञ्जपेत्।

क्लींकामेश्वरीं व्विद्महे वागीश्वरीन्धीमहि तन्नः क्लिन्ना
प्रचोदयात्।

रात्रौ चन्द्राग्घ्र्यन्दत्त्वा।

क्षीरोदार्णवसम्भूत अत्रिगोत्रसमुद्भव॥
गृहाणाग्घ्र्यमिदन्देव रोहिण्या सहित प्रभो॥

इति चन्द्राग्घ्र्यन्दद्यात्। एवं सन्ध्याकालत्रयेऽपि कुर्यात्। ततो
दिक्पतीन्नमस्कृत्य पूजागृहद्वारमागत्य हस्तौ पादौ प्रक्षाल्याचम्य
अस्त्रायफट्नम इतिद्वारं सम्प्रोक्ष्य पूजयेत्।
वामे शाखायां गंगणेशायनमः,
दक्षिणे क्षंक्षेत्रपालायनमः,
ऊर्द्धे द्वांद्वारश्रियैनमः,
देहलीमध्ये देहल्यैनमः,
वामपार्श्वे क्लींकामदेवायनमः,
रंरत्यैनमः, वांवसन्तायनमः प्रींप्रीत्यैनमः
ॐशङ्खनिधयेनमः, दक्षपाश्र्वे पद्मनिधये नमः
सरस्वत्यैनमः श्रियैनमः मायायैनमः दुर्गायैनमः
भद्रकाल्यैनमः स्वाहायैनमः शुभकर्यैनमः गौर्यैनमः
लोकधात्र्यैनमः वागीश्वर्यैनमः, दक्षपादपुरस्सरमङ्गानि
सङ्कोचयन् गृहान्तः प्रविशेत्। ततो गृहान्तर्पयेत्॥

ऐशान्याम्पूजयेत्॥ ॐ वास्तुपुरुषायनमः ॐब्रह्मणेनमः॥

ततः अपसर्पन्तु ते भूता ये भूता भुवि सँथिताः॥
ये भूता विघ्नकर्त्तारस्ते नश्यन्तु शिवाज्ञया॥

इति तण्डुलांश्चतुर्द्दिक्षु विकिरेदिति भूतापसारणम्॥
ऊर्द्धोर्द्धतालत्रयन्दत्त्वा त्रिविघ्नान् वामपादत्रिघातादुत्सारयेत्॥
ततो व्याघ्राजिनरक्तकम्बलाद्यासनमास्तीर्यासनन्धृत्वा पठेत्॥
अस्यासनमन्त्रस्य मेरुपृष्ठ ऋषिः सुतलञ्छन्दः कूर्मो देवता
आसनोपवेशने विनियोगः॥

ॐपृथ्वि त्वया धृता लोका देवि त्वं व्विष्णुना धृता॥
त्वञ्च धारय मान्नित्यम्पवित्रङ्कुरु चासनम्॥

ततः पूजयेत्। कूंकूर्मासनायनमः,
आधारशक्तिकमलासनायनमः, ऐं ह्रीं श्रीं
सर्वशक्तिकमलासनायनमः, ॐपृथिव्यै नमः॥
ततस्स्वस्तिकाद्यासनेनोपविश्य ऐंह्रींश्रीं अमृतार्णवात्मकायनमः
इतिपादयोः, ऐंह्रींश्रींश्वेताम्बुजासनायनम इति जान्वोः,

p. 158) ऐंह्रींश्रींदेव्यासनायनम इतिपाश्र्वयोः,

ऐंह्रींश्रींचक्रासनायनम इतिगुह्ये, आसनस्य चतुः कोणेषु पूजयेत्।

ॐ गणपतयेनमः, दुर्गायैनमः, बटुकभैरवायनमः,

क्षेत्रपालायनमः, इति वायव्यादि नैर्ऋत्यन्तम्। ततः ह्रींक-ए-ईलह्रीं

हसकहलह्रीं सकलह्रीं गंगणपतये नमः, पृष्ठे

क्षेत्रपालायनमः, सम्मुखे श्रीमहात्रिपुरसुन्दर्यैनमः॥ अथ

भूतशुद्धिः॥ स्वाङ्गे उत्तानौ हस्तौ कृत्वा सोहमिति मन्त्रेण

मूलाधारे यथोक्तरूपाङ्कुण्डलिनीं हूँआरेण

मनोमयदण्डेनाहत्योत्थाप्य

स्वाधीनमणिपूरानाहतप्रदीपकलिकाकारं जीवात्मानन्तया सह

विशुद्धाख्यचक्रम्भित्वा सहस्रदलकमलान्तर्गतबिन्दुरूपे परमशिवे

सँओज्य शरीरं शून्यँव्विचिन्त्य कुक्षौ पापपुरुषन्ध्यायेत्॥

वामकुक्षौ स्थितम्पापपुरुषङ्कज्जलप्रभम्॥

ब्रह्महत्याशिरस्कञ्च स्वर्णस्तेयभुजद्वयम्॥

सुरापानहृदा युक्तङ्गुरुतल्पकटिद्वयम्॥

तत्सँओगिपदद्वन्द्वमङ्गप्रत्यङ्गपातकम्॥

उपपातकरोमाणं रक्तश्मश्रुविलोचनम्॥

अचेतनमधोवक्त्रन्दग्धपादपसन्निभम्॥

खड्गचर्मधरङ्क्रूरम्पापङ्कुक्षौ विचिन्तयेत्॥

इति ध्यात्वा तेन सह शोषणादिकङ्कुर्यात्॥ वामनासापुटेन यमिति
वायुबीजन्धूम्रवर्णं षोडशवारञ्जपन् वायुमुत्तोल्य नाभौ
दशदले नियोज्य समस्तशरीरम्पापपुरुषेण संशोषयेत्। नासापुटौ
धृत्वा रमिति बीजं रक्तवर्णञ्चतुःषष्टिवारान् जपन् कुम्भकयोगेन
शरीरन्तेन सह भस्मीकुर्यात्। वायुमुत्तोल्य हृदि द्वादशदले नियोज्य
वमिति वरुणबीजं शुक्लवर्णन्द्वात्रिंशद्वारञ्जपन्
अमृतधाराम्पातयित्वा चमिति चन्द्रबीजञ्चतुःषष्टिवाराञ्जपन्
अमृतवृष्ट्या कुम्भकयोगेनाप्लाव्य लमिति
भूमिबीजम्पीतवर्णम्मूलाधारस्तम्भूमण्डले नियोज्य
समस्तशरीरम्पुनर्द्देवताराधनयोग्यं शरीरन्दृढीकुर्वन् हंस
इतिमन्त्रेण जीवात्मानं हृदयचक्रे नयेत्॥ कुण्डलिनीम्मूलचक्रन्नयेत्॥
इति भूतशुद्धिः॥

p.159) ततो हृदि हस्तन्दत्त्वा प्राणप्रतिष्ठाङ्कुर्यात्।

अस्य प्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः
ऋग्यजुःसामानि च्छन्दांसि चैतन्यशक्तिः परमात्मा देवता
प्राणप्रतिष्ठायाँव्विनियोगः।

आँह्रीँक्रीं यँअँअँअँहँहँअँअँअँषँअँअः मम प्राणा इह

प्राणाः मम जीव इह स्थितः॥ १५॥ ममेह सर्वेन्द्रियाणि॥ १५॥ मम

वाङ्मनश्चक्षुःश्रोत्रघ्राणत्वग्रसनाप्राणा इहागत्य

सुखञ्चिरन्तिष्ठन्तु स्वाहा॥

अथ प्राणायामः॥

वामनासापुटन्धृत्वा क-ए-ई-ल-ह्रीमिति षोडशवारञ्जपन्

वायुना शनैः शनैः पूरयेदिति पूरकः। नासापुटौ धृत्वा

हसकहलह्रीं इतिचतुःष्षष्टिवारञ्जपन् वायुङ्कुम्भयेत्॥ इतिकुम्भकः

। सकलह्रीमिति बीजन्द्वात्रिंशद्वारञ्जपन् वायुन्दक्षनासापुटेन शनै

रेचयेत्॥ इतिरेचकः॥ एवम्प्राणायामत्रयङ्कुर्यात्। [अथमातृकान्यासः।]

अस्य श्रीमातृकान्यासमन्त्रस्य ब्रह्मर्षिर्गायत्रीछन्दो वर्णजननी

मातृकादेवता हलोबीजानि स्वराः शक्तयः कर्मसाद्गुण्ये विनियोगः॥

ब्रह्मर्षयेनमः शिरसि,

गायत्रीछन्दसेनमः मुखे,

वर्णजननीमातृकादेवतायैनमः हृदि,

हल्बीजेभ्योनमः गुह्ये,

स्वरेभ्यःशक्तिभ्योनमः गुदे,

कर्मसाद्गुण्ये विनियोगः पादयोः।

मातृकान्ध्यायेत्।

पञ्चाशल्लिपिभिर्विभक्तसुखदोष्काम्मध्यवक्षःस्थलां
भासन्मौलिनिबद्धचन्द्रसकलामापीनपिङ्गस्तनीम्॥
अद्रामक्षगुणं सुधाढ्यकलशं विद्यां सुहस्ताम्बुजे
बिभ्राणाँव्विशदप्रभान्त्रिनयनाँव्वाग्देवतामाश्रये॥

अंनमः ललाटे। आंनमः मुखवृत्ते। इं नमः दक्षनेत्रे। ईं
नमः वामनेत्रे। उँअमः दक्षकर्णे। ऊँअमः वामकर्णे। ऋंनमः
दक्षनासापुटे। ॠंनमः वामनासापुटे। ऌंनमः दक्षगण्डे।
ॡंनमः वामगण्डे। एंनमः ओष्ठे। ऐंनमः अधरे। ओं नमः
ऊर्द्धदन्तपङ्क्तौ। औंनमः अधोदन्तपङ्क्तौ। अँअमः शिरसि।
अःनमः मुखे।

दक्षबाहुपञ्चसन्ध्यग्रेषु -

कँअमः खँअमः गँअमः घँअमः ङ्ँअमः।

p. 160) वामबाहुपञ्चसन्ध्यग्रेषु -

चँअमः छँअमः जँअमः झँअमः ञँअमः।

दक्षपादपञ्चसन्ध्यग्रेषु -

टँअमः ठँअमः डँअमः ढँअमः णँअमः।

वामपादपञ्चसन्ध्यग्रेषु -

तँअमः थँअमः दँअमः धँअमः नँअमः।

दक्षपाश्र्वे -

पँअमः फँअमः।

वामपाश्र्वे -

बँअमः पृष्ठे। भँअमः नाभौ। मँअमः उदरे। यँअमः

हृदये। रँअमः दक्षांसे। लँअमः ककुदि। वँअमः वामांसे।

शँअमः हृदयादिदक्षहस्ते। षँअमः हृदयादिवामहस्ते। सँअमः

हृदयादिदक्षपादे। हँअमः हृदयादिवामपादे। लँअमः हृदयादि

उदरे। क्षँअमः हृदयादिमुखे। इति मातृकान्यासः॥

[अथान्तर्मातृकान्यासः] कण्ठे षोडशस्वरान् रक्तवर्णान्। हृदि कादि-

ठान्तान् सिन्दूरवर्णान्। नाभौ डादि-फान्तान्नीलवर्णान्। लिङ्गे बादि-

लान्तान्तडिद्वर्णान्। गुदे वादि-सान्तान् रक्तवर्णान्। भ्रूमध्ये

हँषँइमलवर्णान्। सहस्रारे सहस्रदले अकारादि -क्षकारान्ताँ

ल्लाक्षारसवर्णान् पञ्चाशद्वर्णान्। एवङ्क्रमेण द्विरावृतौ

तृतीयावृत्तौ च विंशत्यावृत्तिपर्यन्तं सहस्रधा न्यसेत्।

मूलाधारमारभ्य सहस्त्रदलपर्यन्तं सर्वत्र सर्वदलेषु
मूलमन्त्रन्न्यसेत्। प्रतिदलम्प्रतिकमलम्प्रतिचक्रङ्कुण्डलिन्या
गतागतेन एकविंशतिशतं जपम्प्रतिश्वासान्भावयेदित्यजपा॥
अन्तर्मातृकान्यासश्च सदा सावधानेन कर्त्तव्यः॥
इत्यन्तर्मातृकान्यासः॥ [अथ कुलूकान्यासः।] ऐं क्लीं ह्रीं श्रीं
भगवतिमहात्रिपुरसुन्दरिस्वाहा॥ इति कुलूकां शिरसि ओंहृदि सेतुं
ह्रींमहासेतुं कण्ठे ह्रींमहासेतुं सहस्त्रारे ओंश्रीं-अँएँक्लीं-
सौं ऐं-अँआँइँईँउँऊँऋँॠँऌँॡँएँऐँओँऔँअँअः
कँहँअँहँअँअँहँअँहँणँअँहँअँहँअँअँहँअँहँअँअँहँअँ
हँअँअँअँअँअँहँहँअँअँअँषँइतिनिर्वाणनाभौ लिङ्गे कामबीजं
जिह्वायां मूलविद्याँव्विचिन्त्य यथाशक्ति जपेत्। इतिकुलूकान्यासः॥ [अथ
पीठन्यासः] ललाटे अँआमरूपपीठाय, नमः सर्वत्र।

p. 161) मुखवृत्ते आँआराणसीपीठाय, दक्षनेत्रे इँएपालपीठाय,
वामनेत्रे ईँपौण्ड्रवर्द्धनपीठाय, दक्षकर्णे उँउरस्तिरपीठाय,
वामकर्णे ऊँआलिकुब्जिपीठाय, दक्षिणनासिकायां
ऋँऊर्णशैलपीठाय, वामनासापुटे ॠँअर्बुदपीठाय, दक्षगण्डे ऌँ
आम्रातकेश्वरपीठाय, वामगण्डे ॡँएकाम्रपीठाय, ओष्ठे
एँरिस्त्रोतपीठाय, अधरे ऐंकामकोटपीठाय, ऊर्द्धदन्तपङ्क्तौ
ओंकेदारपीठाय, अधोदन्तपङ्क्तौ, औंगुप्तनगरपीठाय, शिरसि

अँअन्द्रपुरपीठाय, मुखे अः श्रीपीठाय, दक्षकरपञ्चसन्ध्यग्रेषु
कँओंकारपीठाय, खँआलन्धरपीठाय, गँआनपीठाय,
घँहद्रकोटपीठाय, ङँएवीकोटपीठाय॥
वामकरपञ्चसन्ध्यग्रेषु चँओकर्णपीठाय, छँआरुतेश्वरपीठाय,
जँअङ्गलकोटपीठाय, झँअट्टहासपीठाय, ञँइरजपीठाय॥
दक्षपादपञ्चसन्ध्यग्रेषु टंराजगृहपीठाय,
ठंमहापथपीठाय, डंकोणगिरिपीठाय, ढं-ऐलापुरपीठाय,
णंरामेश्वरपीठाय॥ वामपादपञ्चसन्ध्यग्रेषु
तंजपतीपीठाय, थं-उज्जयिनीपीठाय, दंचरित्रीपीठाय,
धंक्षीरिकापीठाय, नंहस्तिनापुरपीठाय॥ दक्षपाश्र्वे पं-
उड्डीशपीठाय, वामपाश्र्वे फँरयागपीठाय, पृष्ठे
बंषष्ठीशपीठाय, नाभौ भंमायापुरपीठाय, उदरे
मंनिर्जनपीठाय, हृदये यंमलयपीठाय, दक्षांसे
रंश्रीशैलपीठाय, ककुदि लंमहामेरुपीठाय, वामांसे
वंगिरिपीठाय॥ हृदयादिदक्षहस्तपर्यन्ते शंमहेन्द्रपीठाय,
हृदयादिवामहस्तपर्यन्तं षंरसेनपीठाय॥
हृदयादिदक्षपादपर्यन्तं संबदरीपीठाय,
हृदयादिवामपादपर्यन्तं हंमहालक्ष्मीपुरपीठाय, हृदयादि-
उदरपर्यन्तं लं-उड्डीयानपुरपीठाय, हृदयादिमुखपर्यन्तं
क्षंसौम्यपीठाय नमः। ततो मूलाधारे ध्यानपीठायनमः

स्वाधिष्ठाने कामपीठाय नमः मणिपूरे ज्ञानपीठायनमः
अनाहते विदेहपीठायनमः विशुद्धौ नन्दिनीपीठाय० आज्ञायां
नन्दापीठाय०॥ ततः सहस्त्रदलेषु क्षीरनिधिपीठाय०
कल्पवनपीठाय० चिन्तामणिपीठाय०

p. 162) पर्यङ्कपीठाय० शिवासनपीठाय० मूर्त्तिमयपीठाय०
सर्वव्यापकपीठाय०॥ इतिपीठन्यासः॥ [अथ रहस्यन्यासः]

अस्य श्रीरहस्यन्यासमन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः
ऋग्यजुस्सामानि च्छन्दांसि चैतन्यशक्तिमहात्रिपुरसुन्दरी देवता
कृताकृतन्यासपूर्णतासिद्धये विनियोगः॥

ब्रह्मविष्णुमहेश्वरऋषिभ्योनमः शिरसि,
ऋग्यजुस्सामभ्यश्छन्दोभ्योनमः मुखे,
चैतन्यशक्तिमहात्रिपुरसुन्दर्यैदेवतायै नमः हृदये,
कृताकृतन्यासपूर्णतासिद्धये विनियोगः पादयोः। ऐंक्लींसौंक्लीं-
ऐं-श्रींह्रींहंसः सोहं सदाशिवासनायै महात्रिपुरसुन्दर्यै
नमः इति मूलाधारे॥ १॥
ऐंक्लींसौंसौंक्लीं-ऐं-श्रींह्रींहंसः सोहं रतिप्रियायै
महात्रिपुरसुन्दर्यैनमः इतिस्वाधिष्ठाने॥ २॥

ऐंक्लींसौंसौंक्लीं-ऐं-श्रींह्रींहंसः सोहं

ज्ञानस्वरूपायै महात्रिपुरसुन्दर्यैनमः इतिमणिपूरे॥ ३॥

ऐंक्लींसौंसौंक्लीं-ऐं-श्रींह्रींहंसः

सोहंध्यानस्वरूपायै महात्रिपुरसुन्दर्यैनमः इति-अनाहते॥ ४॥

ऐंक्लींसौंसौंक्लीं-ऐं-श्रींह्रींहंसः सोहं

विशुद्धस्वरूपायै महात्रिपुरसुन्दर्यैनमः इतिविशुद्धौ॥ ५॥

ऐंक्लींसौंसौंक्लीं-ऐं-श्रींह्रींहंसः सोहं

स्वतन्त्रस्वरूपायै महात्रिपुरसुन्दर्यैनमः इत्याज्ञायाम्॥ ६॥

ऐंक्लींसौंसौंक्लीं-ऐं-श्रींह्रींहंसःसोहं

आनन्दस्वरूपायै महासुन्दर्यैनमः इतिसहस्त्रारे न्यसेत्॥

इति रहस्यन्यासः॥ [अथ कामन्यासः] ह्रींकामायनमः,

क्लींमन्मथाय०, ऐंकन्दर्पाय०, क्लूंमकरध्वजायनमः

स्त्रींमीनकेतवेनमः॥ तत ऐंहृदयायनमः, क्लींशिरसेस्वाहा, सौं

शिखायैवषट्, ऐंकवचायहुम्, क्लींनेत्रत्रयायवौषट्, सौं

अस्त्रायफट्। इतिद्विरावृत्य मन्त्रेण करयोर्विन्यसेत्॥ इतिकामन्यासः॥ [अथ रत्यादिन्यासः] लिङ्गे ऐंरत्यैनमः हृदि क्लींप्रीत्यैनमः भ्रूमध्ये सौंमनोभवायै० भ्रूमध्ये सौं अमृताश्यै० हृदि क्लींयोगिन्यै० लिङ्गे ऐं विश्वयोन्यैनमः॥ इतिरतिन्यासः॥ [अथ मनोभवन्यासः]

p. 163) शिरसि ह्सौं-ईशानाय मनोभवायनमः, मुखे ह्सौंतत्पुरुषाय मकरध्वजायनमः, हृदि श्रूं-अघोरकुमाराय कन्दर्पाय०, गुह्ये ह्स्त्रींवामदेवायमन्मथाय०, पादयोः ह्स्त्रूंसद्योजाताय कामदेवायनमः, ऊर्द्धे वक्त्रे मस्तके ह्स्त्रौं-ईशानाय मनोभवाय०, पूर्ववक्त्रे भाले ह्स्त्रौंतत्पुरुषाय मकरध्वजाय०, दक्षिणवक्त्रे दक्षकर्णे ह्स्त्रूं-अघोरकुमाराय कन्दर्पाय०, उत्तरवक्त्रे वामकर्णे ह्स्त्रींवामदेवाय मन्मथाय०, पश्चिमवक्त्रे चूडाधः ह्स्त्रूंसद्योजाताय कामदेवायनमः॥ इतिमनोभवन्यासः॥ [अथ बाणन्यासः] ह्साँषोभणबाणायनमः, ह्रींद्रावणबाणाय०, क्लीं-आकर्षणबाणाय०, क्लूंमोहनबाणाय०, सः उन्मादनबाणायनमः॥ इति अङ्गुष्ठादिकनिष्ठान्तङ्करयोर्न्यसेत्॥ इतिबाणन्यासः॥ [अथ स्वतन्त्रन्यासः] अस्य श्रीमहात्रिपुरसुन्दरीस्वतन्त्रन्यासस्य आनन्दभैरवऋषिर्दैवी गायत्री छन्दः श्रीमहात्रिपुरसुन्दरी देवता ऐंबीजं सौःशक्तिः क्लींकीलकं धर्मार्त्थकाममोक्षार्थे विनियोगः

॥

आनन्दभैरवऋषयेनमः शिरसि, दैवीगायत्रीछन्दसेनमः मुखे,
श्रीमहात्रिपुरसुन्दरीदेवतायै नमः हृदये, ऐंबीजाय नमः नाभौ,
सौः शक्तयेनमः स्वाधिष्ठाने, क्लींकीलकायनमः मूलाधारे,
धर्मार्थकाममोक्षात्थें विनियोगः पादयोः॥ ऐंह्रींक्लीं-
अङ्गुष्ठाभ्यान्नमः क्लींश्रींसौःऐंतर्ज्जनीभ्यांस्वाहा, सौः
औंह्रींश्रींमध्यमाभ्यां व्वषट्, ऐं क ए लह्रीं हसकहल्ह्रीं
अनामिकाभ्यांहूम्, क्लींसकलह्रीं कनिष्ठिकाभ्यांवौषट्, सौ सौः
ऐं क्लीं ह्रीं श्रीं करतलपृष्ठाभ्याम्फट्, ऐं ह्रीं श्रीं ऐं क
ए ल ह्रीं सर्वज्ञायै महात्रिपुरसुन्दर्यै हृदयायनमः ऐं ह्रीं
श्रीं क्लीं सहकहल्ह्रीं नित्यतृप्तायै महात्रिपुरसुन्दर्यै शिरसे स्वाहा
ऐं ह्रीं श्रीं सौःसकलह्रीं अनादिबोधायै महात्रिपुरसुन्दर्यै
शिखायैवषट् ऐं ह्रीं श्रीं क ए लह्रीं स्वतन्त्रायै
महात्रिपुरसुन्दर्यै कवचायहुम् ऐं ह्रीं श्रीं क्लीं हसकहल्ह्रीं
नित्यमलूप्तशक्तये महात्रिपुरसुन्दर्यै नेत्रत्रयायवौषट्

p. 164) ऐंह्रींश्रींसौः सकलह्रीं अनन्तायै महात्रिपुरसुन्दर्यै
अस्त्रायफट् हः अस्त्रायफट् इतिदिग्बन्धः॥ इतिस्वतन्त्रन्यासः॥ [अथ
चतुर्द्दशारचक्रन्यासः] ऐंशिरसि, क्लींसौः भ्रुवोः, ऐंललाटे,

क्लींसौः श्रोत्रयोः, ऐंभ्रूमध्ये, क्लींसौः नेत्रयोः, ऐंशिरसि,

क्लींसौः नासिकयोः, ऐंचिबुके, क्लींसौः ओष्ठयोः, ऐं नासिकायाम्,

क्लिंसौः गण्डयोः, ऐंगले, क्लींसौः बाहुमूलयोः, ऐंकण्ठे,

क्लींसौः बाह्वोः, ऐंचिबुके, क्लींसौः स्तनयोः ऐंहृदये, क्लींसौः

पार्श्वयोः, ऐंनाभौ, क्लींसौः स्तनयोः, ऐंहृदये, क्लींसौः

करयोः, ऐंलिङ्गे, क्लींसौः त्रिकयोः, ऐं पृष्ठे, क्लींसौः नितम्बयोः,

ऐंक्लींसौः मूलञ्च सर्वाधारायनमः इति मूलाधारे॥ इति

चतुर्द्दशारन्यासः॥ [ततोऽङ्गदेवतान्यासः॥] अं आं इं ईं उं ऊं

ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः

क्लींरसिनीवाग्देवतायैनमश्शिरसि, कंखंगंघंङं

क्लींकामेश्वरीवाग्देवतायैनमः ललाटे, चंछंजंझंञं

श्रींओदनीवाग्देवतायैनमः मुखे, टंठंडंढंणं

कुंविमलाननावाग्देवतायैनमः कण्ठे, तंथंदंधंनं

श्रीं-अव्ययावाग्देवतायैनमः हृदये, पंफंबंभंमं

श्रींजयिनीवाग्देवतायैनमः नाभौ, यंरंलंवं

क्ष्मींवाग्देवतायैनमः मूलाधारे,

शंषंसंहंलंसंक्षंहं क्ष्मींकौलिनीवाग्देवतायैनमः

इतिपादयोः॥ इत्यङ्गदेवतान्यासः॥ [अथ मन्त्रन्यासः] प्रथमबीजं

शिरसि। द्वितीय बीजं मुखे। तृतीयबीजं हृदये॥ ततः

समस्तमूलमन्त्रं शिरस्तः पादपर्यन्तन्न्यसेत्॥ इति मन्त्रन्यासङ्कृत्वा

पीठन्यासङ्कुर्यात्। प्रथमं हृदये ऐं

आधारशक्तिकमलासनायनमः ऐं-अनन्तायनमः ऐंपृथिव्यैनमः

ऐंरससमुद्रायनमः ऐंरत्नद्वीपायनमः ऐंकल्पवृक्षायनमः

ऐंरत्नमण्डपायनमः दक्षस्कन्धे धर्मायनमः वामस्कन्धे

ज्ञानायनमः दक्षोरौ वैरासनायनमः वामोरौ ऐश्वर्यायनमः

मुखे अधर्मायनमः दक्षपार्श्वे ज्ञानायनमः वामपार्श्वे

अनैश्वर्यायनमः नाभौ अवैराग्यायनमः

p. 165) हृदये अनन्तायनमः पद्मायनमः ॐ-अर्कमण्डलायनमः

ॐसोममण्डलायनमः मँअह्निमण्डलायनमः सँअत्त्वायनमः

रँअजसेनमः तँअमसेनमः हैहेछींहसौः चक्रासनायनमः

सत्त्वमन्त्रासनायनमः साध्यसिद्धासनायनमः॥ ततो

हृत्पद्मचक्रन्ध्यात्वा तदुपरि वेदीङ्गन्धपुष्पाक्षतैः

करकच्छपमुद्राम्बद्ध्वा ध्यायेत्॥ सकुङ्कुममित्यादि।

बालार्कमण्डलाभासाञ्चतुर्बाहुन्त्रिलोचनाम्। पाशाङ्कुशौ

शरांश्चापन्धारयन्तीं शिवां श्रये॥ शिरसि पुष्पन्दत्त्वा०

गुरुभ्योनमः परमगुरुभ्योनमः परात्परगुरुभ्योनमः

परमेष्ठिगुरुभ्योनमः। मनसा देवीं सम्पूज्य आवाहनमुद्राँ

य्योनिमुद्राम्प्रदश्र्य ततोग्र्घ्यस्थापनङ्कुर्यात्। सौः अस्त्रायफट् इति

शङ्खम्प्रक्षाल्य भूमौ त्रिकोणमण्डलङ्कृत्वा ॐ

आधारशक्त्यैनमः कूर्मायनमः अनन्तायनमः पूजयेत्। तदुपरि

नम इति प्रक्षालितान्त्रिपदीन्निधाय तदुपरि शङ्खन्निधाय त्रिधा

मूलेनापूर्य दूर्वाक्षतादि निःक्षिप्य मंदशकलात्मने

सूर्यमण्डलाय नम इति त्रिपदीं सम्पूज्य अँवादशकलात्मने

वह्निमण्डलायनम इतिजले पूजयेत्। उँओममण्डलाय

षोडशकलात्मनेनमः। ॐगङ्गे च यमुने चैव गोदावरि सरस्वति॥

नर्मदे सिन्धु कावेरि जलेऽस्मिन्सन्निधिङ्कुरु॥

इतिसूर्यमण्डलात्तीर्थमङ्कुशमुद्रयानीय

अवगुण्ठनमुद्रयावगुण्ठ्य मूलमष्टधा जप्त्वा

योनिमुद्राम्प्रदश्शर्य अमृतीकृत्य धेनुमुद्रया पुनर्मूलमष्टधा

जपित्वा तेनोदकेनाभ्युक्ष्य स्थापयेदिति। ततो विशेषार्घ्यस्थापनम्।

स्वपुरतः किञ्चिद्वामभागे सामान्यार्घ्यस्य तोयेनाभ्युक्ष्य

त्रिकोणवृत्तगर्भितवृत्तात्मकं षट्कोणवृत्तचतुरस्रमण्डलङ्कृत्वा

अग्न्यादिकोणचतुष्टये पूजयेत्। ॐ

उड्डीयानश्रीपादुकाम्पूजयामिनमः

जांजालन्धरश्रीपादुकाम्पूजयामिनमः।

पूंपूर्णशैलश्रीपादुकाम्पूजयामिनमः

कांकामरूपश्रीपादुकाम्पूजयामिनमः। मूलेन नामोच्चार्य

p. 166) आधारमण्डलायनम इत्याधारं सम्पूज्य

सौःअस्त्रायफट्नम इतित्रिपदीं सम्पूज्य मण्डले स्थापयित्वा पूजयेत्।

मँअह्निमण्डलाय दशकलात्मने नमः। ततः सौः-अस्त्रायफट्नम

इतिशङ्खम्प्रक्षाल्य स्थापयित्वा अंसूर्यमण्डलाय

द्वादशकलात्मनेनमः श्रीमहात्रिपुरसुन्दर्यग्घ्र्यपात्रायनम

इतिशङ्खे सम्पूज्य उंसोममण्डलाय षोडशकलात्मने

श्रीमहात्रिपुरसुन्दर्यागघ्र्यमृतायनम इतिजलेनापूर्य तत्र जले

दूर्वाक्षतादि दत्त्वा ॐगङ्गे च यमुने चैवेत्यादिना

सूर्यमण्डलादङ्कुशमुद्रया तीर्त्थमावाह्य धेनुमुद्रयामृतीकृत्य

योनिमुद्राम्प्रदश्र्य तदुपरि मूलमष्टधा जपित्वा दक्षाङ्गुष्ठेन

जलं स्पृष्ट्वा मूलं स्मृत्वा अग्घ्र्यजलस्य आग्नेयकोणमारभ्य

विन्यसेत्। हृदयायनमः शिरसेस्वाहा शिखायैवौषट् अस्त्रायफट्॥

इतिचतुर्दिक्षु विन्यस्य ह्रीं इतिमन्त्रेण सम्पूज्य पञ्चरत्नानि विन्यसेत्।

ग्लूं श्लूं प्लूं म्लूं ज्लूमिति पञ्चरत्नानि

स्वर्गमर्त्यपातालगमनरत्नानि विन्यसेत्। मत्स्यमुद्रयाच्छाद्य

संरक्षणमुद्रया संरक्ष्य अवगुण्ठनमुद्रया अवगुण्ठ्य

अमृतीकरणमुद्रया अमृतीकृत्य प्रबोधनमुद्रया प्रबोध्य मूलं

स्मृत्वा। अकुलस्थामृताकरे सिद्धिज्ञानकरे परे। अमृतत्वनिधे त्वस्मिन्

वस्तुनि क्लिन्नरूपिणि॥ इतिजलमभिमन्त्र्य

तज्जलेनात्मानम्पूजोपकरणञ्चाभ्युक्ष्य पीठपूजामारभेत्।

ऐंह्रींनमः इतिकुशजलेन भूमिं शोधयित्वा त्रिपदीमारोप्य पूजयेत्।

ऐं-आधारशक्तिकमलासनायनमः कूर्मायनमः अनन्तायनमः
पृथिव्यै रसाम्बुधयेनमः रत्नद्वीपायनमः नन्दनोद्यानायनमः
रत्नमण्डपायनमः रत्नवेदिकायैनमः रत्नसिंहासनायनमः
श्रीचक्रायनमः। ततो ह्रमितिमन्त्रेण ताम्रपीठँव्विशोध्य श्रीयन्त्रं
स्थापयित्वा पीठस्य आग्नेयादिकोणचतुष्टयम्पूजयेत्। धर्मायनमः
ज्ञानायनमः वैराग्यायनमः ऐश्वर्यायनमः। ततः
पूर्वादिचतुर्द्दिक्षु। अधर्मायनमः अज्ञानायनमः
अवैराग्यायनमः।

p. 167) अनैश्वर्यायनमः। पीठस्योपरि-आनन्दकन्दायनमः
सँविन्नालायनमः सर्वतत्त्वानुकम्पायनमः।
पञ्चाशद्वर्णकर्णिकायैनमः विकारमयकेसरेभ्योनमः
प्रकृतिमयपत्रेभ्योनमः। मंवह्निमण्डलायनमः
ॐसूर्यमण्डलायनमः अँओममण्डलायनमः संसत्त्वायनमः
रंरजसेनमः तंतमसेनमः आंआत्मनेनमः अंअन्तरात्मनेनमः
पंपरमात्मनेनमः ह्रींज्ञानात्मनेनमः
ऐंकामरूपपीठायनमः॥ ऐंपूर्णगिरिपीठायनमः
ऐंजालन्धरपीठायनमः ऐं-उड्डीयानपीठायनमः॥ इतिसम्पूज्य
॥ ऐंत्रिपुरेश्वरी मध्यमाभ्यान्नमः। क्लींत्रिपुरेश्वरी
अनामिकाभ्यान्नमः। सौंत्रिपुरेश्वरी कनिष्ठाभ्यान्नमः।

ऐंत्रिपुरेश्वरी अङ्गुष्ठाभ्यान्नमः। क्लीं त्रिपुरेश्वरी

तर्ज्जनीभ्यान्नमः। सौः त्रिपुरेश्वरी करतलकरपृष्ठाभ्यान्नमः।

ह्रींक्लींसौः देव्यासनायनमः। चक्रासनायनमः

सर्वमन्त्रासनायनमः साध्यसिद्धासनायनमः। ऐंत्रिपुरेश्वरी

हृदयायनमः। क्लींत्रिपुरेश्वरी शिरसेस्वाहा। सौः त्रिपुरेश्वरी

शिखायैवषट्। ऐंत्रिपुरेश्वरी कवचायहूम्। क्लींत्रिपुरेश्वरी

नेत्रत्रयायवौषट् सौःत्रिपुरेश्वरी अस्त्रायफट्। ततो ध्यात्वा

पुष्पाञ्जलिना देवितेजः समानीय यन्त्रे कल्पितमूर्तौ आवाहनमुद्रया

आवाह्य स्थापनमुद्रया सँथाप्य त्रिखण्डमुद्राम्बद्धा।

महापद्मवनान्तस्थे करुणामय्यविग्रहे॥ सर्वभूतहिते मातरेह्येहि

परमेश्वरि॥ अमृतीकरणपरमीकरणमुद्राम्प्रदर्श्य मूलमुच्चार्य

श्रीमहात्रिपुरसुन्दरी प्राणा इह सुप्रतिष्ठिता भवन्तु। मूलमुच्चार्य

पाद्यन्नमः मूलमर्घ्योनमः मूलङ्गन्धोनमः।

मूलम्पुष्पन्नमः मूलन्धूपोनमः मूलन्दीपोनमः

मूलन्नैवेद्यन्नमः। लम्पृथिव्यात्मकङ्गन्धं समर्पयामिनमः

हं आकाशात्मकम्पुष्पंसमर्पयामिनमः

यंय्वाव्वात्मकन्धूपंसमर्पयामिनमः

रंवह्न्यात्मकन्दीपंसमर्पयामिनमः वं

अंबात्मकममृतंसमर्पयामिनमः। इतिपञ्चोपचारान्निवेद्य।

श्रीमहात्रिपुरसुन्दरि

p. 168) तवाज्ञाम्प्राप्य परिवारानर्च्चयामि। आज्ञाम्प्राप्य पूजयेत्।

मध्ये ह्रींश्रींकामेश्वर्यैनमः भगमालिन्यैनमः क्लिन्नाय०

भेरुण्डायै० विन्ध्यवासिन्यै० महाविद्येश्वर्यै० शिवदूत्यै० त्वरितायै०

नित्यायै० नीलपताकायै० विजयायै० श्रीयै० सर्वमङ्गलायै०

ज्वालांशुमालिन्यै० ह्रींश्रींविचित्रायैनम इतिसम्पूज्य। पूर्वद्वारे

गङ्गणपतयेनमः। पश्चिमद्वारे बम्बटुकायनमः। उत्तरद्वारे

ह्रींदुर्ग्गायैनमः। दक्षिणद्वारे क्षंक्षेत्रपालायनमः।

बाह्यचतुरस्त्रस्य बाह्ये रेखायां पश्चिमादिद्वारचतुष्टये

ह्रींश्रीं-अणिमादिसिद्धिश्रीपादुकांपूजयामिनमः।

लघिमासिद्धिम्पूजयामिनमः। महिमासिद्धिम्पूजयामिनमः।

ईशसिद्धिम्पूजयामिनमः। बाह्यादिकोणचतुष्टये

वशित्वसिद्धिश्रीम्पूजयामिनमः। प्राकाश्यसिद्धिश्रीम्पूजयामिनमः

। भक्तिसिद्धिश्रीम्पूजयामिनमः। इच्छासिद्धिश्रीम्पूजयामिनमः।

अधस्थात्प्राप्तिसिद्धिश्रीम्पूजयामिनमः। ऊर्द्ध्व

सर्वकामसिद्धिम्पूजयामिनमः। मध्यचतुरस्त्रस्य

पश्चिमादिद्वारचतुष्टये। ह्रींश्रीं-आं ब्राह्म्यैनमः।

ईंमाहेश्वर्यैनमः। उँऔमारीश्रीपादुकाम्पूजयामिनमः।

ऋंवैष्णवीश्री० मध्यचतुरस्त्रस्य बाह्यादिकोणे

ह्रींश्रींलृंवाराहीश्री० ऐं-इन्द्राणीश्री० औंचामुण्डाश्री०

अःमहालक्ष्मीश्री०। अभ्यन्तरचतुरस्त्रस्य पश्चिमादिद्वारचतुष्टये।

त्रिखण्डाक्षमुद्राश्री० ह्रींसर्वसङ्क्षोभिणीमुद्राश्री०

ह्रींसर्वविद्राविणीमुद्राश्री० क्लींसर्वाकर्षिणीमुद्राश्री०।

अभ्यन्तरचतुरश्रस्य बाह्यादिकोणचतुष्टये

क्लुंसर्वावेशकरीमुद्राश्री० सर्वोन्मादकरीमुद्राश्री०

क्लौंमहाङ्कुशामुद्राश्रीपादु० क्लुंखेचरीमुद्राश्री० ततस्त्रिवलये

बीजमुद्राश्री० योनिमुद्राश्री० चार्वाकदर्शनायनमः। ततो

हस्तेनाग्घ्र्यजलङ्गृहीत्वा। अत्र त्रैलोक्यमोहनचतुरस्त्रचक्रे

श्रीमहात्रिपुरसुन्दरीसमधिष्ठिते एता ईशित्वाद्याः प्रकटयोगिन्यः

समुद्राः ससिद्धयः सायुधाः सवाहनाः सपरिवाराः

सर्वोपचारैस्सम्पूजितास्सन्तु इति मूलेनार्पयेत्।

p.169) ततः षोडशदलेषु पश्चिमदलादारभ्य देव्याः

प्रदक्षिणाक्रमेण पूजयेत्। ह्रींश्रीं-अंकामाकर्षिणी नित्याकलाश्री०

आंबुद्ध्याकर्षिणी नित्याकलाश्री० इं-अहङ्काराकर्षिणी नित्याकलाश्री०

ईंशब्दाकर्षिणी नित्याकलाश्री० उंरूपाकर्षिणी नित्याकलाश्री० ऊं

स्पर्शाकर्षिणी नित्याकलाश्री० ऋंरसाकर्षिणी नित्याकलाश्री०

ॠंगन्धाकर्षिणी नित्याकलाश्री० ऌंचिन्ताकर्षिणी नित्याकलाश्री०

ॡंधैर्याकर्षिणी नित्याकलाश्री० एंस्मृत्याकर्षिणी नित्याकलाश्री०

ऐंनासाकर्षिणी नित्याकलाश्री० ओंबीजाकर्षिणी नित्याकलाश्री० अं-

अमृताकर्षिणी नित्याकलाश्री० अःशरीराकर्षिणी नित्याकलाश्री०
रेखायाम्बौद्धदर्शनायनमः। ततो हस्तेनाग्घ्र्यजलङ्गृहीत्वा। अत्र
सर्वाशापरिपूरके षोडशदलचक्रे श्रीमहात्रिपुरसुन्दरीसमधिष्ठिते
एताः कामाकर्षिण्याद्या गुप्तयोगिन्यः समुद्राः ससिद्धयः सायुधाः
सवाहनाः सपरिवाराः सर्वोपचारैः पूजितास्सन्तु। इतिमूलमन्त्रेण
देव्यै निवेदयेत्। ततोऽष्टदलचक्रे पूर्वदलेषु
ह्रींश्रींकँहँअँहँअँअनङ्गकुसुमादेवीश्री०
चँहँअँहँणँअनङ्गमेखलादेवीश्री०
टँहँअँहँअँअनङ्गमदनादेवीश्री०
तँहँअँहँअँअनङ्गमदनातुरादेवीश्री०
पँहँअँहँअँअनङ्गरेखादेवीश्री०
यँअँअँअँअनङ्गवेगिनीदेवीश्री०
शँहँअँअँअनङ्गकुशादेवीश्री०
लँषँअनङ्गमालिनीदेवीश्रीपादुकाम्पूजयामिनमः। अत्र
सङ्क्षोभकरेऽष्टदलचक्रे श्रीमहात्रिपुरसुन्दरीसमधिष्ठिते एता
अनङ्गकुसुमाद्याः गुप्ततरा योगिन्यः समुद्रास्ससिद्धयः
सायुधास्सवाहनास्सपरिवारास्सर्वोपचारैः पूजितास्सन्तु
इत्यग्घ्र्यजलेन देव्यै समर्पयेत्। ह्रींश्रींसर्वसङ्क्षोभिणीशक्तिश्री०
सर्वद्राविणिशक्तिश्रीपादुकाम्पूजयामिनमः
सर्वाकर्षिणीशक्तिश्रीपादुकाम्पूजयामिनमः सर्वाह्लादिनीशक्तिश्री०

सर्वमोहिनीशक्तिश्री० सर्वस्तम्भिनीशक्तिश्री० सर्वजृम्भणीशक्तिश्री०

p. 170) सर्ववशङ्करीशक्तिश्री० सर्वरञ्जिनीशक्तिश्री०
सर्वोन्मादिनीशक्तिश्री० सर्वार्त्थसाधनीशक्तिश्री०
सर्वाशापरिपूरणीशक्तिश्री० सर्वमन्त्रमयीशक्तिश्री०
सर्वद्वन्द्वक्षयङ्करीशक्तिश्री० वहिः
साङ्ख्यनैय्यायिकदर्शनेभ्योनमः। अत्र सौभाग्यदायके
चतुर्द्दशचक्रे श्रीमहात्रिपुरसुन्दरीसमधिष्ठिते
एतास्सङ्क्षोभिण्याद्याश्शक्तयः सम्प्रदाययोगिन्यः
समुद्रास्ससिद्धयः
सायुधास्सवाहनास्सपरिवारास्सर्वोपचारैस्सम्पूजितास्सन्तु।
इत्यग्घ्र्यजलेन मूलन्देव्यै समर्पयेत्॥ ततो बहिर्द्दशारचक्रे
पश्चिमादिदशान्तं पूजयेत्। ह्रींश्रींसर्वसिद्धिप्रदादेवी श्री०
सर्वसम्पदादेवीश्री० सर्वप्रियङ्करीशङ्करीदेवीश्री०
सर्वमङ्गलकारिणीदेवीश्री० सर्वकामप्रदादेवीश्री०
सर्वदुःखविमोचनीदेवीश्री० सर्वाङ्गसुन्दरीदेवीश्री०
सर्वमृत्युविनाशिनीदेवीश्री० सर्वदुःखविनाशिनीदेवीश्री०
सर्वसौभाग्यदायिनीदेवीश्री०। अत्र सर्वाशापरिपूरके चक्रे
श्रीमहात्रिपुरसुन्दरीसमधिष्ठिते एतास्सर्वसिद्धिप्रदाद्या देव्यः
कुलकौलिनीयोगिन्यः

समुद्रास्ससिद्धयस्सायुधास्सवाहनास्सपरिवारास्सर्वोपचारैस्सम्पूजित्
आस्सन्तु। इत्यग्घ्र्यजलेन मूलेन देव्यै समर्पयेत्।
ततोऽन्तर्द्दशारचक्राग्राद्दक्षिणान्तँय्यावत्पूजयेत्।
ह्रींश्रींसर्वज्ञादेवीश्री० सर्वशक्तिमयीदेवीश्री०
सर्वैश्वर्यप्रदादेवी श्री० सर्वज्ञानमयीदेवीश्री०
सर्वव्याधिविनाशिनीदेवीश्री० सर्वाशापरिपूरणीदेवीश्री०
सर्वपापहरादेवीश्री० सर्वानन्दमयीदेवीश्री०
सर्वान्तकामरूपिणीदेवीश्री० सर्वेप्सितफलप्रदादेवीश्री०। अत्र
सर्वरक्षाकरे अन्तर्द्दशारचक्रे
त्रिपुरमालिनीश्रीत्रिपुरसुन्दरीसमधिष्ठिते
एतास्सर्वज्ञाद्यानिर्ब्भययोगिन्यस्समुद्राः ससिद्धयः सायुधाः
सवाहनाः सपरिवाराः सर्वोपचारैस्सम्पूजिताः सन्तु। इत्यग्घ्र्यजलेन
मूलेन देव्यै समर्पयेत्। ततोऽष्टारचक्रे चक्रात्पश्चिमादिदक्षिणान्तं
यावत्पूजयेत्।

p. 171) ह्रींश्रीं अँआँइँईँउँऊँऋँॠँऌँॡँएँऐँओँऔँअँअः
वशिनीवाग्देवताश्री० कँखँगँघँङँकामेश्वरीवाग्देवताश्री० चँ
छँजँझँञँमोदिनीवाग्देवताश्री० टँठँडँढँणँ
विमलावाग्देवताश्री० तँथँदँधँनँअव्ययावाग्देवताश्री० पँफँबँ
भँमँजयिनीवाग्देवताश्री० यँरँलँवँसर्वेश्वरीवाग्देवताश्री० शँ

षँसँहँक्षँकौलिनीवाग्देवताश्री०॥ अत्र सर्वरोगहरे अष्टारचक्रे
श्रीमहात्रिपुरसुन्दरीसमधिष्ठिते एता वशिन्याद्या रहस्ययोगिन्यः
समुद्राः ससिद्धयस्सायुधास्सवाहनाः सपरिवाराः सर्वोपचारैः
सम्पूजितास्सन्तु। इत्यग्घ्यंजलेन मूलेन देव्यै समर्पयेत्।
अभ्यन्तरकोणत्रये पुष्पाञ्जलिँव्वारत्रयन्दद्यात्। चक्रमध्ये दक्षिणे
उत्तमबाणायनमः। वामे मोहधनुषेनमः। तदधः
कर्कशायनमः। दक्षिणे स्तम्भाङ्कुशायनमः। अग्रे क्लीं
कामेश्वर्यैनमः। आंचक्रिण्यैनमः। ऐंभगशालिन्यैनमः।
मूलेन श्रीमहात्रिपुरसुन्दर्यैनमः। ततः त्रिकोणमध्ये
कामकलामीकाररूपां ध्यायेत्। ततो
ब्रह्मविष्णुरुद्रेशानसदाशिवेभ्यः पञ्चप्रेतेभ्योनमः
नवग्रहेभ्योनम इत्यभ्यर्च्य मालाङ्गृहीत्वा यथाशक्ति जपेत्। ततः।
गुह्यातिगुह्यगोप्त्री त्वङ्गृहाणास्मत्कृतञ्जपम्। सिद्धिर्भवतु मे देवि
त्वत्प्रसादान्महेश्वरि॥ इति जलेन देव्या वामहस्ते समर्पयेत्। जपन्देव्या
गृहीतन्तेजोमयँव्विभाव्य। विधिहीनङ्क्रियाहीनम्भक्तिहीनञ्च
यद्भवेत्। पूर्णं भवतु तत्सर्वं त्वत्प्रसादात्त्रिलोचने॥ इति यथाशक्ति
स्तुत्वा प्रदक्षिणन्त्रिः प्रणम्य कृतार्थमात्मानम्भावयेत्।
योनिमुद्राम्प्रदर्शयेत्। संहारमुद्रया विसर्ज्जयेत्। निर्माल्यङ्गृहीत्वा
ऐशान्यान्त्रिकोणमण्डलङ्कृत्वा ऐंचँअण्डेश्वर्यैनमः इत्यभ्यर्च्य
निर्माल्यं शिरसि धृत्वा यथासुखँव्विहरेत्। श्रीविद्याज्ञानमात्रेण

सर्वसिद्धिः प्रजायते॥ अतो विद्या प्रदातव्या नाभक्ताय कदाचन॥ इति पूजापद्धतिः॥

p. 172) अथ स्तोत्रम्

कल्याणवृष्टिभिरिवामृतपूरिताभिर्लक्ष्मीस्वयँवरणमङ्गलदीपिकाभ्
इः। सेवाभिरम्ब तव पादसरोजमूले नाकारि किम्मनसि
भक्तिमताञ्जनानाम्॥ १॥

एतावदेव जननि स्पृहणीयमास्ते त्वद्वन्दनेषु सलिलस्थसरोजनेत्रे।
सान्निध्यमुद्यदरुणाम्बुजसोदरस्य त्वद्विग्रहस्य सुधया परया
प्लुतस्य॥ २॥

ईषत्प्रभावकलूषाः कति नाम सन्ति ब्रह्मादयः
प्रतिदिनम्प्रलयाभिभूताः। एकस्स एव जननि स्थिरसिद्धिरास्ते यः
पादयोस्तव सकृत्प्रणतिङ्करोति॥ ३॥

लब्ध्वा सकृत्त्रिपुरसुन्दरि
तावकीनङ्कारुण्यकन्दलतिकान्तिभरङ्कटाक्षम्।
कन्दर्पभावसुभगास्त्वयि भक्तिभाजः सम्मोहयन्ति

तरुणीम्भुवनत्रयेऽपि॥ ४॥

ह्रीङ्कारमेव तव नाम गृणन्ति ये वा मातस्त्रिकोणनिलये त्रिपुरे त्रिनेत्रे।
त्वत्संस्मृतौ यमभटाभिभवँव्विहाय दिव्यन्ति नन्दनवने सह
लोकपालैः॥ ५॥

हन्तुः पुरामधिगलत्परिपूर्णमानः क्रूरः कथन्न भविता गरलस्य
वेगः। नाश्वासनाय यदि मातरिदन्तवार्द्धदेहस्य
शश्वदमृताप्लुतशीतलस्य॥ ६॥

सर्वज्ञतां सदसि वाक्पटुताम्प्रसूते देवि त्वदङ्घ्रिसरसीरुहयोः
प्रणामः। किञ्च स्फुरन्मुकटमुज्ज्वलमातपत्रन्द्वे चामरे च महतीँ
व्वसुधान्दधाति॥ ७॥

कल्पद्रुमैरभिमतप्रतिपादनेषु कारुण्यवारिधिभिरम्ब
भवत्कटाक्षैः। आलोकय त्रिपुरसुन्दरि मामनाथन्त्वय्येव
भक्तिभरितन्त्वयि बद्धदृष्टिम्॥ ८॥

हन्तेतरेष्वपि निधाय मनांसि चान्ये भक्तिँव्वहन्ति किल सापरदैवतेषु।
त्वामेव देविमनसाऽहमनुस्मरामि त्वामेव नौमि शरणञ्जननि

त्वमेव॥ ९॥

लक्षेषु सत्स्वपि तवाक्षिविलोकनानामालोकय त्रिपुरसुन्दरि माङ्कथञ्चित्।
नूनम्मया च सदृशङ्करुणैकपात्रञ्जातो जनिष्यति जनो न च जायते वा
॥ १०॥

ह्रींह्रीमिति प्रतिदिनञ्जपतान्तवाख्याङ्किन्नाम दुर्ल्लभमिह
त्रिपुराभिधाने।
p. 173) मालाकिरीटमदवारणमाननीयाँतान्सेवते मधुमती स्वयमेव
लक्ष्मीः॥ ११॥

सम्पत्कराणि सकलेन्द्रियनन्दनानि साम्राज्यदानकुशलानि सरोरुहाक्षि।
त्वद्वन्दनानि दुरितोद्धरणोद्यतानि मामेव मातरनिशङ्कलयन्तु
नान्यम्॥ १२॥

कल्पोपसंहरणकल्पिततताण्डवस्य देवस्य खण्डपरशोः परभैरवस्य
। पाशाङ्कुशौक्षवशरासनपुष्पबाणाः सा साक्षिणी विजयते तव
मूर्त्तिरेका॥ १३॥

लग्नं सदा भवतु मातरिदन्त्वदीयन्तेजः

परम्बहुलकुङ्कुमपङ्कशोणम्।

भास्वत्किरीटममृतांशुकलावतंसं रूपं

त्रिकोणमुदितम्परमामृताक्तम्॥ १४॥

ह्रीङ्कारत्रयसम्पुटेन महता मन्त्रेण सन्दीपितं स्तोत्रँय्यः

प्रतिवासरन्तव पुरो मातर्जपेन्मन्त्रवित्। तस्य क्षोणिभुजो भजन्ति वशगा

लक्ष्मीश्चिरं स्थायिनी वाणी निर्मलसूक्तिभावभरिता जागर्ति दीग्घँ

य्यशः॥ १५॥ इतिब्रह्मविरचितं षोडशीकल्याणीस्तोत्रं समाप्तम्॥

अथ कवचम्

देव्यु वाच

देवदेव महादेव भक्तानाम्प्रीतिदायक।

सुचिन्तयन्महादेव्याः कवचङ्कथयस्व मे॥ १॥

श्रीमहादेव उवाच

शृणु देवि प्रवक्ष्यामि कवचन्देवदुर्ल्लभम्।

अप्रकाश्यम्परङ्गुह्यं साधकाभीष्टसिद्धिदम्॥ २॥

कवचस्य ऋषिर्देवि दक्षिणामूर्त्तिरव्ययः।

छन्दः पङ्क्तिः समुद्दिष्टन्देवी त्रिपुरसुन्दरी॥ ३॥

धर्मार्त्थकाममोक्षाणाँव्विनियोगस्तु साधने।

वाग्भवङ्कामबीजञ्च शक्तिबीजं सुरेश्वरि॥ ४॥

वाग्भवम्पातु शीर्षे माङ्कामबीजन्तथा हृदि।

शक्तिबीजं सदा पातु नाभौ गुह्ये च पादयोः॥ ५॥

एँलीँसौंवदने पातु बाला मां सर्वसिद्धये।

हसोः सकलह्रीं पातु भैरवी कण्ठदेशतः॥ ६॥

सुन्दरी नाभिदेशे च शीर्षे कामकला सदा।

भ्रूनासयोरन्तराले महात्रिपुरसुन्दरी॥ ७॥

ललाटे सुभगा पातु भगामाङ्कण्ठदेशतः।

p. 174) भगोदया तु हृदये उदरे भगसर्पिणी॥ ८॥

भगमाला नाभिदेशे लिङ्गे पातु मनोभवा।

गुह्ये पातु महादेवी राजराजेश्वरी शिवा॥ ९॥

चैतन्यरूपिणी पातु पादयोर्जगदम्बिका।
नारायणी सर्वगात्रे सर्वकाये शुभङ्करी॥ १०॥

ब्रह्माणी पातु माम्पूर्वे दक्षिणे वैष्णवी तथा।
पश्चिमे पातु वाराही उत्तरे च महेश्वरी॥ ११॥

आग्नेय्याम्पातु कौमारी महालक्ष्मीस्तु नैर्ऋते।
वायव्याम्पातु चामुण्डा इन्द्राणी पातु ईशके॥ १२॥

जले पातु महामाया पृथिव्यां सर्वमङ्गला।
आकाशे पातु वरदा सर्वत्रिभुवनेश्वरी॥ १३॥

इदन्तु कवचन्देव्या देवानामपि दुर्ल्लभम्।
यः पठेत्प्रातरुत्थाय शुचिः प्रयतमानसः॥ १४॥

नाधयो व्याधयस्तस्य न भयञ्च क्वचिद्भवेत्।
न तु मारीभयन्तस्य पातकानाम्भयन्तथा॥ १५॥

न दारिद्र्यवशाङ्गच्छेत्तिष्ठेन्मृत्युवशे न च।
गच्छेत्स्थिरपुरन्देवि सत्यं सत्यँव्वदाम्यहम्॥ १६॥

इदङ्कवचमज्ञात्वा श्रीविद्याँय्यो जपेत्प्रिये।
स नाप्नोति फलन्तस्य प्राप्नुयाच्छस्त्रघातनम्॥ १७॥

इति सिद्धयामले श्रीषोडशीविद्या कवचं समाप्तम्॥

अथ हृदयम्

कैलासे करुणाक्रान्ता परोपकृतिमानसा।
पप्रच्छ करुणासिन्धुं सुप्रसन्नम्महेश्वरम्॥ १॥

श्रीपार्वत्युवाच

आगामिनि कलौ ब्रह्मन् धर्मकर्मविवर्ज्जिताः।
भविष्यन्ति जनास्तेषाङ्कथं श्रेयो भविष्यति॥ २॥

श्रीशिव उवाच

शृणु देवि प्रवक्ष्यामि तव स्नेहान्महेश्वरि।
दुर्लभन्त्रिषु लोकेषु सुन्दरीहृदयस्तवम्॥ ३॥

ये नरा दुःखसन्तप्ता दारिद्र्यहतमानसाः।
अस्यैव पाठमात्रेण तेषां श्रेयो भविष्यति॥ ४॥

ओमस्य श्रीमहाषोडशीहृदयस्तोत्रमन्त्रस्य
आनन्दभैरवऋषिर्दैवीगायत्रीछन्दः श्रीमहात्रिसुन्दरीदेवता
ऐंबीजं

p. 175) सौःशक्तिः क्लींकीलकं धर्मार्थकाममोक्षार्थे विनियोगः॥

आनन्दभैरवऋषयेनमश्शिरसि॥ देवीगायत्रीछन्दसेनमः मुखे
॥ श्रीमहात्रिपुरसुन्दरीदेवतायैनमः हृदये॥ ऐंबीजायनमः नाभौ
। सौः शक्तयेनमः स्वाधिष्ठाने॥ क्लींकीलकायनमः मूलाधारे।
धर्मार्थकाममोक्षार्थे विनियोगः पादयोः॥ अथ कराङ्गन्यासौ॥
ऐंह्रींक्लीं अङ्गुष्ठाभ्यान्नमः। क्लींश्रींसौः ऐं
तर्ज्जनीभ्यांस्वाहा। सौः ॐह्रींश्रीं मध्यमाभ्याँवषट्। ऐंक-

ए-ईलह्रींहसकहलह्रीं अनामिकाभ्याँऊम्।

क्लींसकलकनिष्ठाभ्याँवौषट्। सौः सौः ऐंक्लींह्रींश्रीं

करतलकरपृष्ठाभ्याम्फट्। एवमङ्गन्यासः॥ ध्यानम्।

बालव्यक्तविभाकरामितनिभाम्भव्यप्रदाम्भारतीमीषत्फुल्लमुखाम्

बुजस्मितकरैराशाभवान्धापहाम्।

पाशँसाभयमङ्कुशञ्च वरदं सम्बिभ्रतीम्भूतिदां

भ्राजन्तीञ्चतुरम्बुजाकृतिकरैर्भक्त्या भजे षोडशीम्॥ ५॥

सुन्दरी सकलकल्मषापहा कोटिकञ्जप्रियकाम्यकान्तिका।

कोटिकल्पकृतपुण्यकर्मणा पूजनीयपदपुण्यपुष्करा॥ ६॥

शर्वरीशसमसुन्दरानना श्रीशशक्तिसुकृताश्रयश्रिता।

सज्जनानुशरणीयसत्पदा सङ्कटे सुरगणैः सुवन्दिता॥ ७॥

या सुरासुररणे जवान्विता आजघान जगदम्बिकाऽजिता।

ताम्भजामि जगताञ्जनिञ्जयाँय्युद्धयुक्तदितिजान्सुदुर्ज्जयान्॥ ८॥

योगिनां हृदयसङ्गतां शिवाँयोगयुक्तमनसाँय्यतात्मनाम्।

जाग्रतीञ्जगति यत्नतो द्विजा याञ्जपन्ति हृदि ताम्भाजाम्यहम्॥ ९॥

कल्पकास्तु कलयन्ति कालिकाँय्यत्कला कलिजनोपकारिका।
कौलिकालिकलिताङ्घ्रिकञ्जकान्ताम्भजामि कलिकल्मषापहाम्॥ १०॥

बालार्कानन्तशोर्चिर्न्निजतनुकिरणैर्द्दीपयन्ती दिगन्तान्
दीप्तैर्दैदीप्यमानान्दनुजदलवनानल्पदावानलाभाम्।
दान्तोदन्तोग्रचित्तान्दलितदितिसुतान्दर्शनीयान्दुरन्तान्देवीन्दीनार्द्र्
अचित्तां हृदि मुदितमनाः षोडशीं संस्मरामि॥ ११॥

p. 176) धीरान्धन्यान्धरित्रीं
धवविधृतशिरोधूतधूल्यब्जपादान्धृष्टान्धाराधराधोविनिधृतच्
अपलाचारुचन्दत्प्रभाभाम्।
धर्मान्धूतोपहारान्धरणिसुरधवोद्धारिणी
ध्येयरूपान्धीमद्धन्यातिधन्यान्धनदधनवृतां
सुन्दरीञ्चिन्तयामि॥ १२॥

जयतु जयतु जल्पा योगिनी योगयुक्ता जयतु जयतु सौम्या सुन्दरी
सुन्दरास्या। जयतु जयतु पद्मा पद्मिनी केशवस्य जयतु जयतु काली
कालिनी कालकान्ता॥ १३॥

जयतु जयतु खर्वा षोडशी वेदहस्ता जयतु जयतु धात्री धर्मिणी

धातृशांतिः। जयतु जयतु वाणी ब्राह्मणा ब्रह्मवन्द्या जयतु जयतु
दुर्गा दारिणी देवशत्रोः॥ १४॥

देवि त्त्वं सृष्टिकाले कमलभवभृता राजसी रक्तरूपा, रक्षाकाले
त्वमम्बा हरिहृदयधृता सात्त्विकी श्वेतरूपा। भूरिक्रोधा भवान्ते
भवभवनगता तामसी कृष्णरूपा, एताश्चान्यास्त्वमेव
क्षितिमनुजमता सुन्दरी केवलाद्या ॥ १५॥

सुमलसुमनमेतद्देवि गोप्यङ्गुणज्ञे ग्रहणमननयोग्यं
षोडशीयङ्खलघ्नम्। सुरतरुसमशीलं
सम्प्रदम्पाठकानाम्प्रभवति हृदयाख्यं स्तोत्रमत्यन्तमान्यम्॥ १६
॥

इदं त्रिपुरसुन्दर्याः षोडश्याः परमाद्भुतम्।
यः शृणोति नरः स्तोत्रं स सदा सुखमश्नुते॥ १७॥

न शूद्राय प्रदातव्यं शठाय समलात्मने।
देयन्दान्ताय भक्ताय ब्राह्मणाय विशेषतः॥ १८॥

इति श्रीत्रिपुरसुन्दरीतन्त्रे षोडशीहृदयस्तोत्रं समाप्तम्॥

अथोपनिषत्

ॐ परमकारणभूता शक्तिः केन नवचक्ररूपो देहः
नवचक्रशक्तिमयं श्रीचक्रँव्वाराही पितृरूपा कुरुकुल्लाचीलदेवता
मातापुरुषार्थाः सागराः देहो नवरत्ने द्वीपः आधारनवकमुद्राः
शक्तयः त्वगादिसप्तधातुभिरनेकैः सँउक्ताः सङ्कल्पाः कल्पतरवः
तेजः कल्पकोद्यानं रसनया भासमाना
मधुराम्लतिक्तकटुकषायलवणरसाः

p. 177) षड्रसाः क्रियाशक्तिपीठङ्कुण्डलिनीज्ञानशक्तिः अहम्
इच्छाशक्तिर्महात्रिपुरसुन्दरी ज्ञाता होता ज्ञानमग्घ्र्य ज्ञेयं हविः
ज्ञातृज्ञानज्ञेया नमो भेदभावनं
श्रीचक्रपूजनन्नियतिसहितश्शृङ्गारादयो नव रसा अणिमादयः
कामक्रोधलोभमोहमदमात्सर्यपुण्यपापमया
ब्राह्म्याद्यष्टशक्तयः आधारं नवकमुद्राशक्तयः
पृथ्व्यप्तेजोवाय्वाकाशश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायु
उपस्थविकाराः षोडशशक्तयः
वचनादानगमनविसर्गानन्दादानोपादानोपेक्षा
बुद्धयोऽनङ्गकुसुमादिशक्तयोष्टौ

अलम्बुषाकुहूविश्वोदरीवरुणाहस्तिजिह्वायशस्विनी
गान्धारीपूषासरस्वती-इडापिङ्गलासुषुम्ना चेति चतुर्दशनाड्यः
सर्वसङ्क्षोभिण्यादिचतुर्दशारदेवताः
प्राणापानव्यानोदानसमाननागकूर्मकृकलदेवदत्तधनञ्जया
दश वायवः सर्वसिद्धिप्रदादिबहिर्दशारदेवताः एतद्वायुदशकं
ससर्गोपाधिभेदेन रेचकपूरकपोषकदाहकाल्पावकामृतमिति
प्राणसख्यत्वेन पञ्चविधोऽस्ति जाठराग्निर्मनुष्याणाम्मोहको
भक्ष्यभोज्यलेह्यचोष्यात्मकञ्चतुर्विधमन्नम्पाचयति॥ तदाकाशवान्
सकलाः सर्वज्ञत्वाद्यन्तर्दशारदेवताः
शीतोष्णसुखदुःखेच्छासत्त्वरजस्तमोगुणादिवशिन्यादिशक्तयोऽष्टौ
शब्दस्पर्शरूपरसगन्धाः पञ्चतन्मात्राः पञ्चपुष्पबाणाः
मनेक्षुधनुर्वल्यो बाणो रागः पाशो
द्वेषोऽङ्कुशोऽव्यक्तमहत्तत्त्वाहङ्कारकामेश्वरी-
वज्रेश्वरीभगमालिन्योऽन्तस्त्रिकोणाग्रदेवताः पञ्चदशतिथिरूपेण
कालस्य परिणामावलोकनपञ्चदश नित्या शुद्धानुरूपाधिदेवता
निरुपाधिसार्वदेवकामेश्वरी सदानन्दपूर्णाः
स्वात्म्यैक्यरूपललिताकामेश्वरी सदानन्दघनपूर्णाः
स्वात्म्यैक्यरूपा देवता ललितामिति साहित्यकरणं सत्त्वं
कर्त्तव्यमकर्त्तव्यमिति भावनामुक्ता उपचारा अहन्त्वमस्ति नास्ति
कर्त्तव्याकर्त्तव्यमुपासितव्यानुपासितव्यमिति विकल्पनामनोविलापनं

होमः बाह्याभ्यन्तरकरणानां

p. 178) रूपग्रहणयोग्यतास्तीत्यावाहनम् तस्य
बाह्याभ्यन्तरकरणानामेकरूपविषयग्रहणमासनम्
रक्तशुक्लपदैकीकरणम्पाद्यम्
उज्ज्वलदामोदानन्दासानन्दनमग्घ्र्यम्
स्वच्छास्वतःशक्तिरित्याचमनम् चिच्चन्द्रमयीस्मरणं स्नानम्
चिदग्निस्वरूपपरमानन्दशक्तिस्मरणँव्वस्त्रम् प्रत्येकं
सप्तविंशतिधा भिन्नत्वेन इच्छाक्रियात्मकब्रह्मग्रन्थिमयी
सतन्तुब्रह्मनाडीब्रह्मसूत्रम् सव्यातिरिक्तवस्त्रसङ्गरहितस्मरणँ
व्विभूषणम् स्वच्छन्दपरिपूर्णस्मरणङ्गन्धः
समस्तविषयाणाम्मनःस्थैर्येणानुसन्धानङ्कुसुमन्तेषामेव
सर्वदा स्वीकरणन्धूपः पवनाच्छिन्नोर्द्धज्वला
सच्चिदाह्लादाकाशदेहो दीपः समस्तयातायातिवर्ज्जनन्नैवेद्यम्
अवस्थात्रयैकीकरणन्ताम्बूलम्
मूलाधारादाब्रह्मरन्ध्रपर्यन्तम्ब्रह्मरन्ध्रादामूलाधारपर्य
न्तङ्गतागतरूपेण प्रादक्षिण्यन्तुरीयावस्थानं
सँकारदेहशून्यप्रमादितावतिमज्जनम्बलिहरणं सत्त्वमस्ति
कर्त्तव्यमकर्त्तव्यमौदासीन्यमात्मविलापनं होमः
भावनाविषयाणामभेदभावना तर्पणम्

स्वयन्तत्पादुकानिमज्जनम्परिपूर्णध्यानम् एवम्मूर्त्तित्रयभावनया
युक्तो मुक्तो भवति तस्य देवतात्मैक्यसिद्धिः चितिकार्याण्यप्रयत्नेन
सिद्ध्यन्ति स एव शिवयोगीति कथ्यते॥ इति षोडश्युपनिषत् समाप्ता॥

अथ शतनाम

भृगुवाच

चतुर्वक्त्र जगन्नाथ स्तोत्रँव्वद मयि प्रभो।
यस्यानुष्ठानमात्रेण नरो भक्तिमवाप्नुयात्॥ १॥

ब्रह्मोवाच

सहस्रनाम्नामाकृष्य नाम्नामष्टोत्तरं शतम्।
गुह्याद्गुह्यतरञ्जुह्यं सुन्दर्याः परिकीर्त्तितम्॥ २॥

ओमस्य श्रीषोडश्यष्टोत्तरशतनामस्तोत्रस्य शम्भुर्ऋषिरनुष्टुप्-
छन्दः श्रीषोडशीदेवता धर्मार्थकाममोक्षसिद्धये विनियोगः॥

ॐ त्रिपुरा षोडशीमाता त्र्यक्षरा त्रितया त्रयी।

सुन्दरी सुमुखी सेव्या सामवेदपरायणा॥ ३॥

शारदा शब्दनिलया सागरा सरिताम्बरा।

p. 179) शुद्धाशुद्धतमुस्साध्वी शिवध्यानपरायणा॥ ४॥

स्वामिनी शम्भुवनिता शाम्भवी च सरस्वती।

समुद्रमथिनी शीघ्रगामिनी शीघ्रसिद्धिदा॥ ५॥

साधुसेव्या साधुगम्या साधुसन्तुष्टमानसा।

खट्वाङ्गधारिणी खर्वा खड्गखर्परधारिणी॥ ६॥

षड्वर्गभावरहिता षड्वर्गपरिचारिका।

षड्वर्गा च षडङ्गा च षोढा षोडशवार्षिकी॥ ७॥

क्रतुरूपा क्रतुमती ऋभुक्षा क्रतुमण्डिता।

कवर्गादि-पवर्गान्ता अन्तस्थानन्तरूपिणी॥ ८॥

अकाराकाररहिता कालमृत्युजरापहा।

तन्वी तत्त्वेश्वरी तारा त्रिवर्षा ज्ञानरूपिणी॥ ९॥

काली कराली कामेशी च्छाया सञ्ज्ञाप्यरुन्धती।
निर्विकल्पा महावेगा महोत्साहा महोदरी॥ १०॥

मेघा बालका विमला विमलज्ञानदायिनी।
गौरी वसुन्धरा गोघ्नी गवाम्पतिनिषेविता॥ ११॥

भगाङ्गा भगरूपा च भक्तिभावपरायणा।
छिन्नमस्ता महाधूमा तथा धूम्रविभूषणा॥ १२॥

धर्मकर्मादिरहिता धर्मकर्मपरायणा।
सीता मातङ्गिनी मेधा मधुदैत्यविनाशिनी॥ १३॥

भैरवी भुवनामाताऽभयदा भवसुन्दरी।
भावुका बगला कृत्या बाला त्रिपुरसुन्दरी॥ १४॥

रोहिणी रेवती रम्या रम्भा रावणवन्दिता।
शतयज्ञमयी सत्त्वा शतक्रतुवरप्रदा॥ १५॥

शतचन्द्रानना देवी सहस्रादित्यसन्निभा।
सोमसूर्याग्निनयना व्याघ्रचर्माम्बरावृता॥ १६॥

अर्द्धेन्दुधारिणी मत्ता मदिरा मदिरेक्षणा।

इति ते कथितञ्चोप्यन्नाम्नामष्टोत्तरं शतम्॥ १७॥

सुन्दर्याः सर्वदं सेव्यम्महापातकनाशनम्।

गोपनीयञ्चोपनीयञ्चोपनीयङ्कलौ युगे॥ १८॥

सहस्रनामपाठस्य फलँय्यद्वै प्रकीर्त्तितम्।

तस्मात्कोटिगुणम्पुण्यं स्तवस्यास्य प्रकीर्तनात्॥ १९॥

पठेत्सदा भक्तियुतो नरो यो निशीथकालेऽप्यरुणोदये वा।

प्रदोषकाले नवमीदिनेऽथवा लभेत् भोगान्परमाद्भुतान् प्रियान्

॥ २०॥

p. 180) इति ब्रह्मयामले पूर्वखण्डे षोडश्यष्टोत्तरशतनामस्तोत्रं

समाप्तम्॥

अथ सहस्रनाम

कैलासशिखरे रम्ये नानारत्नोपशोभिते।

कल्पपादपमध्यस्थे नानापुष्पोपशोभिते।

मणिमण्डपमध्यस्थे मुनिगन्धर्वसेविते।
तङ्कश्चित्सुखमासीनम्भगवन्तञ्जगद्गुरुम्॥

कपालखट्वाङ्गधरञ्चन्द्रार्द्धकृतशेखरम्।
त्रिशूलडमरूहस्तम्महावृषभवाहनम्॥

जटाजूटधरन्देवँव्वासुकीकण्ठभूषणम्।
विभूतिभूषणन्देवन्नीलकण्ठन्त्रिलोचनम्॥

द्वीपिचर्मपरीधानं शुद्धस्फटिकसन्निभम्।
सहस्रादित्यसङ्काशञ्गिरिजार्द्धाङ्गभूषणम्॥

प्रणम्य शिरसा नाथङ्कारणँव्विश्वरूपिणम्।
कृताञ्जलिपुटो भूत्वा प्राहैनं शिखिवाहनः॥

कार्त्तिकेय उवाच

देवदेव जगन्नाथ सृष्टिस्थितिलयात्मक।

त्वमेव परमात्मा च त्वङ्गतिः सर्वदेहिनाम्॥

त्वं ग्गतिस्सर्वलोकानान्दीनानाञ्च त्वमेव हि।
त्वमेव जगदाधारस्त्वमेष विश्वकारणः॥

त्वमेव पूज्यस्सर्वेषान्त्वदन्यो नास्ति मे गतिः।
किञ्जुह्यम्परमं ल्लोके किमेकं सर्वसिद्धिदम्॥

किमेकम्परमं श्रेष्ठङ्किँयोगं स्वर्गमोक्षदम्।
विना तीर्त्थेन तपसा विना दानैर्विना मखैः॥

विना लयेन ध्यानेन नरः सिद्धिमवाप्नुयात्।
कस्मादुत्पद्यते सृष्टिः कस्मिंश्च प्रलयो भवेत्॥

कस्मादुत्तीर्यते देव संसारार्णवसङ्कटात्।
तदहं श्रोतुमिच्छामि कथयस्व महेश्वर॥

ईश्वर उवाच

साधु साधु त्वया पृष्टम्पार्वतीप्रियनन्दन।

अस्ति गुह्यतमम्पुत्र कथयिष्याम्यसंशयम्॥

सत्त्वं रजस्तमश्चैव ये चान्ये महदादयः।
ये चान्ये बहवो भूताः सर्वप्रकृतिसम्भवाः॥

सैव देवी पराशक्तिर्महात्रिपुरसुन्दरी।
सैव प्रसूयते विश्वँव्विश्वं सैव प्रयास्यति॥

सैव संहरते विश्वञ्जगदेतच्चराचरम्।
आधारस्सर्वभूतानां सैव रोगार्त्तिहारिणी॥

p. 181) इच्छाज्ञानक्रियाशक्तिर्ब्रह्मविष्णुशिवादयः।
त्रिधा शक्तिस्वरूपेण सृष्टिस्थितिविनाशिनी।

सृज्यते ब्रह्मरूपेण विष्णुरूपेण पाल्यते।
संहरेद्रुद्ररूपेण जगदेतच्चराचरम्॥

यस्या योनौ जगत्सर्वमद्यापि परिवर्त्तते।
यस्याम्प्रलीयते चान्ते यस्याञ्च जायते पुनः।

यां समाराध्य त्रैलोक्यं सम्प्राप्तम्पदमुत्तमम्।

तस्या नाम सहस्त्रन्तु कथयामि शृणुष्व तत्॥

ॐ अस्य श्रीमहात्रिपुरसुन्दरीसहस्त्रनामस्तोत्रमन्त्रस्य

श्रीभगवान्दक्षिणामूर्त्तिर्ऋषिः जगतीच्छन्दः

समस्तप्रकटगुप्तसम्प्रदायकुलकौलोत्तीर्णनिर्गर्ब्भरहस्याचिन्त्यप्रभा

वती देवता ॐबीजम्॥ मायाशक्तिः कामराजबीजकीलकम् जीवो बीजम्

सुषुम्ना नाडी सरस्वती शक्तिर्धर्मार्त्थकाममोक्षार्त्थे जपे विनियोगः

॥ आधारे तरुणार्कबिम्बरुचिरं

हेमप्रभम्वाग्भवम्बीजम्मन्मथमिन्द्रगोपसदृशं हृत्पङ्कजे

संस्थितम्॥ विष्णुब्रह्मपदस्थशक्तिकलितं सोमप्रभाभासुरँय्ये

ध्यायन्ति पदत्रयन्तव शिवे ते यान्ति सौख्यम्पदम्॥

कल्याणी कमला काली कराली कामरूपिणी।

कामाख्या कामदा काम्या कामना कामचारिणी॥

कालरात्रिर्महारात्रिः कपाली कालरूपिणी।

कौमारी करुणामुक्तिः कलिकल्मषनाशिनी॥

कात्यायनी कराधारा कौमुदी कमलप्रिया।

कीर्त्तिदा बुद्धिदा मेधा नीतिज्ञा नीतिवत्सला॥

माहेश्वरी महामाया महातेजा महेश्वरी।
महाजिह्वा महाघोरा महादंष्ट्रा महाभुजा॥

महामोहान्धकारघ्नी महामोक्षप्रदायिनी।
महादारिद्र्यनाशा च महाशत्रुविमर्द्दिनी॥

महामाया महावीर्या महापातकनाशिनी।
महामखा मन्त्रमयी मणिपूरकवासिनी॥

मानसी मानदा मान्या मनश्चक्षू रणेचरा।
गणमाता च गायत्री गणगन्धर्वसेविता॥

गिरिजा गिरिशा साध्वी गिरिस्था गिरिवल्लभा।
चण्डेश्वरी चण्डरूपा प्रचण्डा चण्डमालिनी॥

p. 182) चर्विका चर्चिकाकारा चण्डिका चारुरूपिणी।
यज्ञेश्वरी यज्ञरूपा जपयज्ञपरायणा॥

यज्ञमाता यज्ञभोक्त्री यज्ञेशी यज्ञसम्भवा।
सिद्धयज्ञक्रियासिद्धिर्यज्ञाङ्गी यज्ञरक्षिका॥

यज्ञक्रिया यज्ञरूपा यज्ञाङ्गी यज्ञरक्षिका।
यज्ञक्रिया च यज्ञा च यज्ञायज्ञक्रियालया॥

जालन्धरी जगन्माता जातवेदा जगत्प्रिया।
जितेन्द्रिया जितक्रोधा जननी जन्मदायिनी॥

गङ्गा गोदावरी चैव गोमती च शतद्रुका।
घग्घरा वेदगर्भा च रेचिका समवासिनी॥

सिन्धुर्म्मन्दाकिनी क्षिप्रा यमुना च सरस्वती।
भद्रा रागविपाशा च गण्डकी विन्ध्यवासिनी॥

नर्मदा सिन्धु कावेरी वेत्रवत्या सुकौशिकी।
महेन्द्रतनया चैव अहल्या चर्मकावती॥

अयोध्या मथुरा माया काशी काञ्ची अवन्तिका।
पुरी द्वारावती तीर्त्था महाकिल्बिषनाशिनी॥

पद्मिनी पद्ममध्यस्था पद्मकिञ्जल्कवासिनी।
पद्मवक्त्रा चकोराक्षी पद्मस्था पद्मसम्भवा॥

ह्रीङ्कारी कुण्डलीधारी हृत्पद्मस्था सुलोचना।
श्रीङ्कारीभूषणा लक्ष्मीः क्लीङ्कारी क्लेशनाशिनी॥

हरिवक्त्रोद्भवा शान्ता हरिवक्त्रकृतालया।
हरिवक्त्रोद्भवा शान्ता हरिवक्षस्स्थलस्थिता॥

वैष्णवी विष्णुरूपा च विष्णुमातृस्वरूपिणी।
विष्णुमाया विशालाक्षी विशालनयनोज्ज्वला॥

विश्वेश्वरी च विश्वात्मा विश्वेशी विश्वरूपिणी।
विश्वेश्वरी शिवाराध्या शिवनाथा शिवप्रिया॥

शिवमाता शिवाख्या च शिवदा शिवरूपिणी।
भवेश्वरी भवाराध्या भवेशी भवनायिका॥

भवमाता भवगम्या भवकण्टकनाशिनी।

भवप्रिया भवानन्दा भवानी भवमोहिनी॥

गायत्री चैव सावित्री ब्रह्माणी ब्रह्मरूपिणी।
ब्रह्मेशी ब्रह्मदा ब्रह्मा ब्रह्माणी ब्रह्मवादिनी॥

दुर्गस्था दुर्गरूपा च दुर्गा दुर्ग्गार्तिनाशिनी।
सुगमा दुर्गमा दान्ता दया दोग्ध्री दुरापहा॥

दुरितघ्नी दुराध्यक्षा दुरा दुष्कृतनाशिनी।
पञ्चास्या पञ्चमी पूर्णा पूर्णपीठनिवासिनी॥

p. 183) सत्त्वस्था सत्त्वरूपा च सत्त्वस्था सत्त्वसम्भवा।
रजस्स्था च रजोरूपा रजोगुणसमुद्भवा॥

तमस्स्था च तमोरूपा तामसी तामसप्रिया।
तमोगुणसमुद्भूता सात्त्विकी राजसी कला॥

काष्ठा मुहूर्ता निमिषा अनिमेषा ततः परम्।
अर्द्धमासा च मासा च सँवत्सरस्वरूपिणी॥

योगस्था योगरूपा च कल्पस्था कल्परूपिणी।
नानारत्नविचित्राङ्गी नानाभरणमण्डिता॥

विश्वात्मिका विश्वमाता विश्वपाशविनाशिनी।
विश्वासकारिणी विश्वा विश्वशक्तिविचारणा॥

यवाकुसुमसङ्काशा दाडिमीकुसुमोपमा।
चतुरङ्गी चतुर्ब्बाहुश्चतुराचारवासिनी॥

सर्वेशी सर्वदा सर्वा सर्वदा सर्वदायिनी।
माहेश्वरी च सर्वाद्या शर्वाणी सर्वमङ्गला॥

नलिनी नन्दिनी नन्दा आनन्दा नन्दवर्द्धिनी।
व्यापिनी सर्वभूतेषु शवभारविनाशिनी॥

सर्वशृङ्गारवेषाढ्या पाशाङ्कुशकरोद्यता।
सूर्यकोटिसहस्राभा चन्द्रकोटिनिभानना॥

गणेशकोटिलावण्या विष्णुकोट्यरिमर्दिनी।
दावाग्निकोटिनलिनी रुद्रकोट्युग्ररूपिणी॥

समुद्रकोटिगम्भीरा वायुकोटिमहाबला।
आकाशकोटिविस्तारा यमकोटिभयङ्करी॥

मेरुकोटिसमुच्छ्राया गणकोटिसमृद्धिदा।
निष्कस्तोका निराधारा निर्गुणा गुणवर्जिता॥

अशोका शोकरहिता तापत्रयविवर्जिता।
वसिष्ठा विश्वजननी विश्वाख्या विश्ववर्द्धिनी।

चित्रा विचित्रचित्राङ्गी हेतुगर्भा कुलेश्वरी।
इच्छाशक्तिर्ज्ञानशक्तिः क्रियाशक्तिः शुचिस्मिता॥

शुचिः स्मृतिमयी सत्या श्रुतिरूपा श्रुतिप्रिया।
महासत्त्वमयी सत्त्वा पञ्चतत्त्वोपरिस्थिता॥

पार्वती हिमवत्पुत्री पारस्था पाररूपिणी।
जयन्ती भद्रकाली च अहल्या कुलनायिका॥

भूतधात्री च भूतेशी भूतस्था भूतभावना।

महाकुण्डलिनी शक्तिर्महाविभववर्द्धिनी॥

हंसाक्षी हंसरूपा च हंसस्था हंसरूपिणी।

p. 184) सोमसूर्याग्निमध्यस्था मणिमण्डलवासिनी॥

द्वादशारसरोजस्था सूर्यमण्डलवासिनी।

अकलङ्का शशाङ्काभा षोडशारनिवासिनी॥

डाकिनी राकिनी चैव लाकिनी काकिनी तथा।

शाकिनी हाकिनी चैव षड्चक्रेषु निवासिनी॥

सृष्टिस्थितिविनाशाय सृष्टिस्थित्यन्तकारिणी।

श्रीकण्ठप्रियहृत्कण्ठा नन्दाख्या बिन्दुमालिनी॥

चतुष्षष्टिकलाधारा देहदण्डसमाश्रिता।

माया काली धृतिर्मेधा क्षुधा तुष्टिर्महाद्युतिः॥

हिङ्गुला मङ्गला सीता सुषुम्नामध्यगामिनी।

परघोरा करालाक्षी विजया जयदायिनी॥

हृत्पद्मनिलया भीममहाभैरवनादिनी।
आकाशलिङ्गसम्भूता भुवनोद्यानवासिनी॥

महत्सूक्ष्मा च कङ्काली भीमरूपा महाबला।
मेनकागर्ब्भसम्भूता तप्तकाञ्चनसन्निभा॥

अन्तरस्था कूटबीजा त्रिकूटाचलवासिनी।
वर्णाख्या वर्णरहिता पञ्चाशद्वर्णभेदिनी॥

विद्याधरी लोकधात्री अप्सरा अप्सरः प्रिया।
दीक्षा दाक्षायणी दक्षा दक्षयज्ञविनाशिनी॥

यशः पूर्णा यशोदा च यशोदागर्ब्भसम्भवा।
देवकी देवमाता च राधिका कृष्णवल्लभा॥

अरुन्धती शचीन्द्राणी गान्धारी गन्धमालिनी।
ध्यानातीता ध्यानगम्या ध्यानज्ञा ध्यानधारिणी॥

लम्बोदरी च लम्बोष्ठी जाम्बवन्ती जलोदरी।
महोदरी मुक्तकेशी मुक्तकामार्त्थसिद्धिदा॥

तपस्विनी तपोनिष्ठा सुपर्णा धर्मवासिनी।
वाणचापधरा धीरा पाञ्चाली पञ्चमप्रिया॥

गुह्याङ्गी च सुभीमा च गुह्यतत्त्वा निरञ्जना।
अशरीरा शरीरस्था संसारार्णवतारिणी॥

अमृता निष्कला भद्रा सकला कृष्णपिङ्गला।
चक्रप्रिया च चक्राह्वा पञ्चचक्रादिदारिणी॥

पद्मरागप्रतीकाशा निर्मलाकाशसन्निभा।
अधःस्था ऊर्द्धरूपा च ऊर्द्धपद्मनिवासिनी॥

कार्यकारण कर्त्तृत्वे शश्वद्रूपेषु संस्थिता।
रसज्ञा रसमध्यस्था गन्धस्था गन्धरूपिणी॥

p. 185) प्रब्रह्मस्वरूपा च परब्रह्मनिवासिनी।
शब्दब्रह्मस्वरूपा च शब्दस्था शब्दवर्जिता॥

सिद्धिर्ब्बुद्धिः पराबुद्धिः सन्दीप्तिर्मध्यसंस्थिता।

स्वगुह्या शाम्भवी-शक्तिस्तत्त्वस्था तत्त्वरूपिणी॥

शाश्वती भूतमाता च महाभूताधिपप्रिया।
शुचिप्रेता धर्मसिद्धिर्धर्मवृद्धिः पराजिता॥

कामसन्दीपिणी कामा सदा कौतूहलप्रिया।
जटाजूटधरा मुक्ता सूक्ष्मा शक्तिविभूषणा॥

द्वीपिचर्मपरीधाना चीरवल्कलधारिणी।
त्रिशूलडमरुधरा नरमालाविभूषणा॥

अत्युग्ररूपिणी चोग्रा कल्पान्तदहनोपमा।
त्रैलोक्यसाधिनी साध्या सिद्धिसाधकवत्सला॥

सर्वविद्यामयी सारा चासुराणाँव्विनाशिनी।
दमनी दामनी दान्ता दया दोग्ध्री दुरापहा॥

अग्निजिह्वोपमा घोरा घोरघोरतराननना।
नारायणी नारसिंही नृसिंहहृदयेस्थिता॥

योगेश्वरी योगरूपा योगमाता च योगिनी।
खेचरी खचरी खेला निर्वाणपदसंश्रया॥

नागिनी नागकन्या च सुवेशा नागनायिका।
विषज्वालावती दीप्ता कलाशतविभूषणा॥

तीव्रवक्त्रा महावक्त्रा नागकोटित्वधारिणी।
महासत्त्वा च धर्मज्ञा धर्मातिसुखदायिनी॥

कृष्णमूर्द्धा महामूर्द्धा घोरमूर्द्धा वरानना।
सर्वेन्द्रियमनोन्मत्ता सर्वेन्द्रियमनोमयी॥

सर्वसङ्ग्रामजयदा सर्वप्रहरणोद्यता।
सर्वपीडोपशमनी सर्वारिष्टनिवारिणी॥

सर्वैश्वर्यसमुत्पन्ना सर्वग्रहविनाशिनी।
मातङ्गी मत्तमातङ्गी मातङ्गीप्रियमण्डला॥

अमृतोदधिमध्यस्था कटिसूत्रैरलङ्कृता।
अमृतोदधिमध्यस्था प्रवालवसनाम्बुजा॥

मणिमण्डलमध्यस्था ईषत्प्रहसिताननना।
कुमुदा ललिता लोला लाक्षा लोहितलोचना॥

दिग्वासा देवदूती च देवदेवाधिदेवता।
सिंहोपरिसमारूढा हिमाचलनिवासिनी॥

अट्टाट्टहासिनी घोरा घोरदैत्यविनाशिनी।
अत्युग्ररक्तवस्त्राभा नागकेयूरमण्डिता॥

p. 186) मुक्ताहारलतोपेता तुङ्गपीनपयोधरा।
रक्तोत्पलदलाकारा मदाघूर्णितलोचना॥

समस्तदेवतामूर्त्तिः सुरारिक्षयकारिणी।
खड्गिनी शूलहस्ता च चक्रिणी चक्रमालिनी॥

शङ्खिनी चापिनी वाणी वज्रिणी वज्रदण्डिनी।
आनन्दोदधिमध्यस्था कटिसूत्रैरलङ्कृता॥

नानाभरणदीप्ताङ्गा नानामणिविभूषिता।

जगदानन्दसम्भूता चिन्तामणिगुणान्विता॥

त्रैलोक्यनमिता तुर्या चिन्मयानन्दरूपिणी।
त्रैलोक्यनन्दिनी देवी दुःखसुस्स्वप्ननाशिनी॥

घोराग्निदाहशमनी राज्यदेवार्त्थसाधिनी।
महापराधराशिघ्नी महाचौरभयापहा॥

रागादिदोषरहिता जरामरणवर्ज्जिता।
चन्द्रमण्डलमध्यस्था पीयूषार्णवसम्भवा॥

सर्वदेवैः स्तुता देवी सर्वसिद्धैर्न्नमस्कृता।
अचिन्त्यशक्तिरूपा च मणिमन्त्रमहौषधी॥

अस्तिस्वस्तिमयी बाला मलयाचलवासिनी।
धात्री विधात्री संहारी रतिज्ञा रतिदायिनी॥

रुद्राणी रुद्ररूपा च रुद्ररौद्रार्त्तिनाशिनी।
सर्वज्ञा चैव धर्मज्ञा रसज्ञा दीनवत्सला॥

अनाहता त्रिनयना निर्ब्भारा निर्वृतिः परा।
पराघोरा करालाक्षी सुमती श्रेष्ठदायिनी॥

मन्त्रालिका मन्त्रगम्या मन्त्रमाला सुमन्त्रिणी।
श्रद्धानन्दा महाभद्रा निर्द्वन्द्वा निर्गुणात्मिका॥

धरिणी धारिणी पृथ्वी धरा धात्री वसुन्धरा।
मेरुमन्दरमध्यस्थास्थितिः शङ्करवल्लभा॥

श्रीमती श्रीमयी श्रेष्ठा श्रीकरी भावभाविनी।
श्रीदा श्रीमा श्रीनिवासा श्रीमती श्रीमताङ्गतिः॥

उमा सारङ्गिणी कृष्णा कुटिला कुटिलालका।
त्रिलोचना त्रिलोकात्मा पुण्यपुण्या प्रकीर्त्तिता॥

अमृता सत्यसङ्कल्पा सासत्या ग्रन्थिभेदिनी।
परेशी परमा साध्या पराविद्या परात्परा॥

सुन्दराङ्गी सुवर्णाभा सुरासुरनमस्कृता।
प्रजा प्रजावती धन्या धनधान्यसमृद्धिदा॥

ईशानी भुवनेशानी भवानी भुवनेश्वरी।

p. 187) अनन्तानतमहिता जगत्सारा जगद्भवा॥

अचिन्त्यात्मा चिन्त्यशक्तिश्चिन्त्याचिन्त्यस्वरूपिणी।

ज्ञानगम्या ज्ञानमूर्त्तिर्ज्ञानिनी ज्ञानशालिनी॥

असिता घोररूपा च सुधाधारा सुधावहा।

भास्करी भास्वती भीतिर्ब्भास्वदक्षानुशायिनी॥

अनसूया क्षमा लज्जा दुर्ल्लभा भरणात्मिका।

विश्वघ्नी विश्ववीरा च विश्वघ्नी विश्वसंस्थिता॥

शीलस्था शीलरूपा च शीला शीलप्रदायिनी।

बोधनी बोधकुशला रोधनी बोधनी तथा॥

विद्योतिनी विचित्रात्मा विद्युत्पटलसन्निभा।

विश्वयोनिर्महायोनिः कर्मयोनिः प्रियात्मिका॥

रोहिणी रोगशमनी महारोगज्वरापहा।

रसदा पुष्टिदा पुष्टिर्मानदा मानवप्रिया॥

कृष्णाङ्गवाहिनी कृष्णा कृष्णाकृष्णसहोदरी।
शाम्भवी शम्भुरूपा च शम्भुस्था शम्भुसम्भवा॥

विश्वोदरी योगमाता योगमुद्राध्नयोगिनी।
वागीश्वरी योगनिद्रा योगिनीकोटिसेविता॥

कौलिका मन्दकन्या च शृङ्गारपीठवासिनी।
क्षेमङ्करी सर्वरूपा दिव्यरूपा दिगम्बरी॥

धूम्रवक्त्रा धूम्रनेत्रा धूम्रकेशी च धूसरा।
पिनाकी रुद्रवेताली महावेतालरूपिणी॥

तपिनी तापिनी दीक्षा विष्णुविद्यात्मनाश्रीता।
मन्थरा जठरा तीव्रा अग्निजिह्वा भयापहा॥

पशुघ्नी पशुरूपा च पशुहा पशुबाहिनी।
पीता माता च धीरा च पशुपाशविनाशिनी॥

चन्द्रप्रभा चन्द्ररेखा चन्द्रकान्तिविभूषिणी।
कुङ्कुमाङ्कितसर्वाङ्गी सुधासद्गुरुलोचना॥

शुक्लाम्बरधरा देवी वीणापुस्तकधारिणी।
ऐरावतपद्मधारा श्वेतपद्मासनस्थिता॥

रक्ताम्बरधरा देवी रक्तपद्मविलोचना।
दुस्तरा तारिणी तारा तरुणी तारारूपिणी॥

सुधाधारा च धर्मज्ञा धर्मसङ्गोपदेशिनी।
भगेश्वरी भगाराध्या भगिनी भगनायिका॥

भगबिम्बा भगक्लिन्ना भगयोनिर्भगप्रदा।
भगेश्वरी भगाराध्या भगिनी भगनायका॥

भगेशी भगरूपा च भगगुह्या भगावहा।
p. 188) भगोदरी भगानन्दा भगस्था भगशालिनी॥

सर्वसङ्क्षोभिणी शक्तिस्सर्वविद्राविणी तथा।
मालिनी माधवी माध्वी मधुरूपा महोत्कटा॥

भरुण्डचन्द्रिका ज्योत्स्ना विश्वचक्षुस्तमोपहा।
सुप्रसन्ना महादूती यमदूती भयङ्करी॥

उन्मादिनी महारूपा दिव्यरूपा सुरार्चिता।
चैतन्यरूपिणी नित्या क्लिन्ना काममदोद्धता॥

मदिरानन्दकैवल्या मदिराक्षी मदालसा।
सिद्धेश्वरी सिद्धविद्या सिद्धाद्या सिद्धसम्भवा॥

सिद्धर्द्धिः सिद्धमाता च सिद्धिस्सर्वार्त्थसिद्धिदा।
मनोमयी गुणातीता परज्योतिःस्वरूपिणी॥

परेशी परगा पारा परासिद्धिः परागतिः।
विमला मोहिनी आद्या मधुपानपरायणा॥

वेदवेदाङ्गजननी सर्वशास्त्रविशारदा।
सर्वदेवमयी विद्या सर्वशास्त्रमयी तथा॥

सर्वज्ञानमयी देवी सर्वधर्ममयीश्वरी।

सर्वयज्ञमयी यज्ञा सर्वमन्त्राधिकारिणी॥

सर्वसम्पत्प्रतिष्ठात्री सर्वविद्राविणी परा।
सर्वसङ्क्षोभिणी देवी सर्वमङ्गलकारिणी॥

त्रैलोक्याकर्षिणी देवी सर्वाह्लादनकारिणी।
सर्वसम्मोहिनी देवी सर्वस्तम्भनकारिणी॥

त्रैलोक्यजृम्भिणी देवी तथा सर्ववशङ्करी।

त्रैलोक्यरञ्जिनी देवी सर्वसम्पत्तिदायिनी।
सर्वमन्त्रमयी देवी सर्वद्वन्द्वक्षयङ्करी॥

सर्वसिद्धिप्रदा देवी सर्वसम्पत्प्रदायिनी।
सर्वप्रियकरी देवी सर्वमङ्गलकारिणी॥

सर्वकामप्रदा देवी सर्वदुःखविमोचिनी।
सर्वमृत्युप्रशमनी सर्वविघ्नविनाशिनी॥

सर्वाङ्गसुन्दरी माता सर्वसौभाग्यदायिनी।

सर्वज्ञा सर्वशक्तिश्च सर्वैश्वर्यफलप्रदा॥

सर्वज्ञानमयी देवी सर्वव्याधिविनाशिनी।
सर्वाधारस्वरूपा च सर्वपापहरा तथा॥

सर्वानन्दमयी देवी सर्वेक्षायाःस्वरूपिणी।
सर्वलक्ष्मीमयी विद्या सर्वेप्सितफलप्रदा॥

सर्वारिष्टप्रशमनी परमानन्ददायिनी।
त्रिकोणनिलया त्रिस्था त्रिमात्रा त्रितनुस्थिता॥

p.189) त्रिवेणी त्रिपथा त्रिस्था त्रिमूर्त्तिस्त्रिपुरेश्वरी।
त्रिधाम्नी त्रिदशाध्यक्षा त्रिविक्तिपुरवासिनी॥

त्रयीविद्या च त्रिशिरा त्रैलोक्या च त्रिपुष्करा।
त्रिकोटरस्था त्रिविधा त्रिपुरा त्रिपुरात्मिका॥

त्रिपुराश्री त्रिजननी त्रिपुरा त्रिपुरसुन्दरी।
इदन्त्रिपुरसुन्दर्याः स्तोत्रन्नाम सहस्त्रकम्॥

गुह्याद्गुह्यतरम्पुत्र तव प्रीत्यै प्रकीर्त्तितम्।
गोपनीयम्प्रयत्नेन पठनीयम्प्रयत्नतः॥

नातः परतरम्पुण्यन्नातः परतरन्तपः।
नातः परतरं स्तोत्रन्नातः परतरा गतिः॥

स्तोत्रं सहस्रनामाख्यं मम वक्त्राद्विनिर्गतम्।
यः पठेत्प्रयतो भक्त्या शृणुयाद्वा समाहितः॥

मोक्षार्त्थी लभते मोक्षं स्वर्गार्त्थी स्वर्गमाप्नुयात्।
कामांश्च प्राप्नुयात्कामी धनार्त्थी च लभेद्धनम्॥

विद्यार्त्थी लभते विद्याँय्यशोर्त्थी लभते यशः।
कन्यार्त्थी लभते कन्यां सुतार्त्थी लभते सुतम्॥

गुर्विणी जनयेत्पुत्रङ्कन्या विन्दति सत्पतिम्।
मूक्खोंऽपि लभते शास्त्रं हीनोऽपि लभते गतिम्॥

सङ्क्रान्त्याँव्वार्कामावस्यामष्टम्याञ्च विशेषतः।
पौर्णमास्याञ्चतुर्द्दश्यान्नवम्याम्भौमवासरे॥

पठेद्वा पाठयेद्वापि शृणुयाद्वा समाहितः।
स मुक्तस्सर्वपापेभ्यः कामेश्वरसमो भवेत्॥

लक्ष्मीवान्धर्मवांश्चैव वल्लभस्सर्वयोषिताम्।
तस्य वश्यम्भवेदाशु त्रैलोक्यं सचराचरम्॥

रुद्रन्दृष्ट्वा यथा देवा विष्णुन्दृष्ट्वा च दानवाः।
यथाहिर्गरुडन्दृष्ट्वा सिंहन्दृष्ट्वा यथा गजाः।

कीटवत्प्रपलायन्ते तस्य वक्त्रावलोकनात्।
अग्निचौरभयन्तस्य कदाचिन्नैव सम्भवेत्॥

पातका विविधाः शान्तिर्मेरुपर्वतसन्निभाः।
यस्मात्तच्छृणुयाद्विघ्नांस्तृणँव्वह्निहुतँय्यथा॥

एकदा पठनादेव सर्वपापक्षयो भवेत्।
दशधा पठनादेव वाचा सिद्धिः प्रजायते॥

शतधा पठनाद्वापि खेचरो जायते नरः।

सहस्त्रदशसङ्ख्यातँय्यः पठेद्भक्तिमानसः॥

p. 190) मातास्य जगतान्धात्री प्रत्यक्षा भवति ध्रुवम्।
लक्षपूर्णे यथा पुत्र स्तोत्रराजम्पठेत्सुधीः॥

भवपाशविनिर्मुक्तो मम तुल्यो न संशयः।
सर्वतीर्त्थेषु यत्पुण्यं सकृज्जप्त्वा लभेन्नरः॥

सर्ववेदेषु यत्प्रोक्तन्तत्फलम्परिकीर्त्तितम्।
भूत्वा च बलवान्पुत्र धनवान्सर्वसम्पदः॥

देहान्ते परमं स्थानँय्यत्सुरैरपि दुर्ल्लभम्।
स यास्यति न सन्देहः स्तवराजस्य कीर्त्तनात्॥

इति श्रीवामकेश्वरतन्त्रे हरकुमारसँवादे महात्रिपुरसुन्दर्याः
षोडश्याः सहस्त्रनामस्तोत्रं समाप्तम्॥

इति श्रीशाक्तप्रमोदे त्रिपुरसुन्दरीषोडशीतन्त्रं समाप्तम्।

श्रीः

शिवहरराजधानीपतिश्रीराजादेवनन्दनसिंह-
बहादुरनराधिपसंगृहीतविरचित-

शाक्तप्रमोदान्तर्गतं

चतुर्थं

भुवनेश्वरीतन्त्रम्

उक्तराजगुरुवंश्यपण्डितश्रीरघुराजदुबेजीद्वारा
संशोधितम्

तदेतत्

शीकृष्णदासात्मज-खेमराजेन

स्वकीये श्रीवेंकटेश्वर यन्त्रालये

मुद्रयित्वा प्रकाशितम्

बोम्ब-ई

श्रीगणेशाय नमः

अथ शाक्तप्रमोदः

भुवनेश्वरीतन्त्रम्

अथ भुवनेश्वरीध्यानम्

उद्यद्दिनद्युतिमिन्दुकिरीटान्तुङ्गकुचान्नयनत्रययुक्ताम्। स्मेरमुखीँ
ववरदाङ्कुशपाशाभीतिकराम्प्रभजे भुवनेशीम्॥

p. 194) अथ यन्त्रोद्धारः

पद्ममष्टदलम्बाह्ये वृत्तं षोडशभिर्दलैः।

विलिखेत्कर्णिकामध्ये षट्कोणमतिसुन्दरम्॥

चतुरस्त्रञ्चतुर्द्वारमेवम्मण्डलमालिखेत्॥

अथमन्त्रोद्धारः

नकुलीशोग्निमारूढो वामनेत्रार्द्धचन्द्रवत्।

बीजन्तस्याः समाख्यातं सेवितं सिद्धिकाङ्क्षिभिः॥

अथ मन्त्रः। ह्रीँ

अथ पूजाप्रयोगः

प्रातः कृत्यादिपीठन्यासान्तङ्कर्म विधाय केसरेषु मध्ये च

पीठशक्तीन्न्यसेत्॥ ॐजयायैनमः एवँव्विजयायै नमः अजितायै०

अपराजितायै० नित्यायै ० विलासिन्यै दोग्ध्र्यै० अघोरायै० मङ्गलायै०

कर्णिकायां ह्रीँअर्वशक्तिकमलासनायनमः। ततः ऋष्यादिन्यासः।

अस्य भुवनेश्वरीमन्त्रस्य शक्ति ऋषिर्गायत्री छन्दो भुवनेश्वरी देवता

हकारो बीजम् ईकारः शक्तिः रेफः कीलकं चतुर्वर्गसिद्ध्यर्थे

विनियोगः। शिरसि शक्तयेऋषयेनमः। मुखे गायत्रीछन्दसेनमः। हृदि
भुवनेश्वर्यै देवतायैनमः। गुह्ये हकाराय बीजायनमः। पादयोः
ईकारायशक्तयेनमः। सर्वाङ्गे रकारायकीलकायनमः। ततो न्यासः
। शिरसि ॐहृल्लेखायै नमः

p. 195) वदने एँअगनायैनमः हृदये ऊँअक्तायैनमः गुह्ये
इँअरालिकायैनमः पादयोः अँअहोच्छुष्मायैनमः
ऊर्द्धप्राग्दक्षिणोदीच्यपश्चिमेषु मुखेषु ता विन्यसेत्।
हृल्लेखाम्मूर्द्धिन्नवदने गगनां हृदयाम्बुजे॥
रक्ताङ्करालिकाङ्गुह्ये महोच्छुष्माम्पदद्वये।
सत्यादिपञ्चहस्वाढ्या न्यस्तव्या भूतसप्रभाः॥ ततः
कराङ्गन्यासौ॥ ह्रां-अङ्गुष्ठाभ्यांनमः ह्रींतर्ज्जनीभ्यां
स्वा० ह्रूंमध्यमाभ्यां वषट् ह्रैं अनामिकाभ्यां हूम्
ह्रौंकनिष्ठिकाभ्याँवौषट् ह्रः करतलकरपृष्ठाभ्याम्फट्॥ एवँ
हृदयादिषु॥ षड्दीर्घभाजा बीजेन कुर्यादङ्गक्रियाम्मनोः॥
स्वच्छन्दसङ्ग्रहे॥ स्वरँव्विहाय बीजन्तु दीर्घषड्केन योजयेत्।
षडङ्गानि विधेयानि सर्वत्रायँव्विधिः स्मृतः॥ अङ्गुलीनियमस्तु
पूर्व एवोक्तः। कराङ्गन्यासे एवङ्क्रमः। ततः भाले
ॐगायत्रीसहितब्रह्मणेनमः। दक्षिणकपोले
ॐसावित्रीसहितविष्णवेनमः। वामकपोले

ॐवागीश्वरीसहितमहेश्वरायनमः। वामकर्णे

ॐश्रीसहितधनपतयेनमः। मुखे ॐरतिसहितस्मरायनमः।

दक्षिणकर्णोपरि ॐपुष्टिसहितगणपतयेनमः। इति न्यसेत्।

एवङ्कण्ठमूले

दक्षस्तनवामांसहृदयदक्षिणांसदक्षिणपार्श्ववामपार्श्वना

भिदेशेषु ब्राह्म्यादि न्यसेत्॥ वर्णाभिन्नन्यासो विश्वसारे॥

ॐकारादिनमोन्तञ्च विन्यसेत्तु यथास्थिति। विधिना विन्यसेत्सर्वं

शङ्करस्य मतेन च। एवं सर्वत्र। ततो ललाटे ॐब्राह्म्यैनमः।

वामांसे ॐमाहेश्वर्यैनमः। वामपार्श्वे ॐकौमार्यैनमः।

जठरे ॐवैष्णव्यैनमः। दक्षिणपार्श्वे ॐवाराह्यैनमः।

दक्षिणांसे ॐ-इन्द्राण्यैनमः। ककुदि ॐचामुण्डायैनमः। हृदि

ॐमहालक्ष्म्यैनमः। इति विन्यस्य मूलेन व्यापकत्रयङ्कुर्यात्॥ ततो

ध्यानम्॥

उद्यद्दिनद्युतिमिन्दुकिरीटान्तुङ्गकुचान्नयनत्रययुक्ताम्।

स्मेरमुखींँ्वरदाङ्कुशपाशाभीतिकराम्प्रभजे भुवनेशीम्॥ १॥

एवन्ध्यात्वा मानसैः सम्पूज्य बहिः पूजामारभेत्॥

p. 196) पूजायन्त्रम्॥ पद्ममष्टदलम्बाह्ये वृत्तं षोडशभिर्दलैः

॥ विलिखेत्कर्णिकामध्ये षड्कोणमतिसुन्दरम्॥

चतुरस्त्रञ्चतुर्द्वारमेवम्मण्डलमालिखेत्॥ ततो

दीक्षापद्धत्युक्तपीठपूजाङ्कृत्वा पीठशक्तीः पूजयेत्। तद्यथा।

पूर्वादिकेसरेषु जयायै० विजयायै० अजितायै० अपराजितायै० नित्यायै०

विलासिन्यै० दोग्ध्र्यै० अघोरायै० मध्ये मङ्गलायै०

प्रणवादिनमोन्तेन पूजयेत्। तदुपरि ह्रींसर्वशक्तिकमलासनायनमः

॥ निबन्धे॥ ततस्सम्पूजयेत्पीठन्नानाशक्तिसमन्वितम्॥ जयाख्यां

विजयां पश्चादजितां चापराजिताम्॥ नित्याँ

व्विलासिनीन्दोग्ध्रीमघोराम्मङ्गलामपि॥ बीजाद्यमासनन्दत्त्वा

मूर्त्तिन्तत्रैव कल्पयेत्॥ ततः पूर्ववद्यात्वाऽवाहनादि

पञ्चपुष्पाञ्जलिदानपर्यन्तँव्विधाय। केसरेषु ऐशान्यादिकोणे

मध्ये दिक्षु च। ततो ह्रींहृदयायनमः इत्यादिना षडङ्गेन

पूजयित्वा पञ्चपुष्पाञ्जलीन्दद्यात्॥ तत आवरणपूजा।

कर्णिकामध्ये ॐहल्लेखायैनमः॥ पूर्वे ऐंगगनायै०। दक्षिणे

ऊंरक्तायै०। उत्तरे ईंकरालिकायै०। पश्चिमे हूँअहोच्छुष्मायै०।

षड्कोणे पूर्वे ॐगायत्र्यैनमः ॐब्रह्मणेनमः। नैर्ऋत्ये

ॐसावित्र्यैनमः ॐविष्णवेनमः॥ वायव्ये ॐसरस्वत्यैनमः

ॐरुद्रायनमः। वह्निकोणे ॐश्रियैनमः ॐधनपतयेनमः। पश्चिमे

ॐरत्यैनमः ॐस्मरायनमः। ऐशान्याम् ॐपुष्ट्यैनमः

ॐगणपतयेनमः। षड्कोणस्योभयपार्श्वयोः ॐशङ्खनिधयेनमः

ॐपद्मनिधयेनमः॥ केसरेषु अग्निनैर्ऋतिवाय्वीशानाग्रेषु चतुर्दिक्षु
च ह्राँत्रृदयायनम इत्यादिना षडङ्गेन पूजयेत्॥ तथा च निबन्धे।
केसरेष्वग्निकोणादि हृदयादीनि पूजयेत्॥
नेत्रमग्निदिशाद्यन्तन्ध्यातव्याश्चाङ्गदेवताः॥ एवं सर्वत्र॥
भैरव्यादौ तु विशेषो वक्तव्यः। अष्टदलेषु पूर्वादिक्रमेण। ॐ-
अनङ्गकुसुमायैनमः एवमनङ्गकुसुमातुरायैनमः

p. 197) मनङ्गकुसुमातुरायैनमः अनङ्गमदनायै०
अनङ्गमदनातुरायै० भुवनपालायै० गगनवेगायै० शशिरेखायै०
॥ षोडशदलेषु पूर्वादिदिक्षु ॐकरालिन्यै० एवं विकरालिन्यै० उमायै०
सरस्वत्यै० श्रियै० दुर्गायै० उषायै० लक्ष्म्यै० श्रुत्यै० स्मृत्यै०
धृत्यै० श्रद्धायै० मेधायै० मत्यै० कान्त्यै० आर्यायै०।
पद्माद्बहिः पूर्वादिदिक्षु अनङ्गरूपायै० अनङ्गमदनायै०
मदनातुरायै० भुवनवेगायै० भुवनपालिकायै० सर्वशिशिरायै०
अनङ्गवेदनायै० अनङ्गमेखलायै० प्रणवादिनमोन्तेन पूजयेत्।
तद्बहिर्गृहे पूर्वादि ॐलां इ द्राय देवाधिपतये सायुधायेत्यादि० रं
अग्नये तेजोधिपतये सायुधायेत्यादि० यं यमाय प्रेताधिपतये
सायुधायेत्यादि० क्षां निर्ऋतये रक्षोधिपतये सायुधायेत्यादि० वं
वरुणाय जलाधिपतये सायुधायेत्यादि० वां वायवे प्राणाधिपतये
सायुधायेत्यादि० सं सोमाय ताराधिपतये सायुधायेत्यादि० हां

ईशानाय गणाधिपतये सायुधायेत्यादि० इन्द्रेशानयोर्म्मध्ये
आँरह्मणे प्रजाधिपतये सायु० निर्ऋतिवरुणयोर्म्मध्ये ह्रीं अनन्ताय
नागाधिपतये सायु०। तथा च। लोकपाला बहिः पूज्याः
समस्ताश्चतुरस्त्रके॥ पुरुहूतेशयोर्म्मध्ये रक्षोवरुणयोस्तथा॥
ब्रह्मविष्णू सदा पूज्यौ दिगीशार्च्चाँव्विदुर्बुधाः॥
इन्द्रादिलोकपालानाँय्ये मन्त्रास्ते ध्रुवादिकाः॥ स्वस्वबीजान्विताः सर्वे
चतुर्थ्यन्तनमोन्तकाः॥ इति वचनात्। सर्वत्र प्रणवादि।
एतेषाम्बीजान्याहुः क्रियासारे।
पृथ्व्यग्निपवनाद्यन्तवरुणानिलसेश्वरैः॥
अनन्तबिन्दुसँउक्तैरर्च्चयाः पाशेन मायया॥ तथा च यामले। अन्ते
यज्ञे लोकपालान् मूलपारिदधान्वितान्॥ हेतिजात्यधिपोपेतान् दिक्षु
पूर्वादितो यजेत्॥ सवाहनायेति दीपिका। तद्बहिः पूर्वादि वज्राय
शक्तये दण्डाय खड्गाय पाशाय अङ्कुशाय गदायै शूलाय
पद्माय चक्राय प्रणवादि

p.198) नमोऽन्तेन पूजयेत्। ततो धूपादिविसर्ज्जनान्तङ्कर्म समापयेत्।
अस्य पुरश्चरणन्द्वात्रिंशल्लक्षजपम्प्रजपेत्
मत्रन्द्वात्रिंशल्लक्षमानसः।
त्रिस्वादुयुक्तैर्ज्जुहुयादष्टद्रव्यैर्दशांशतः॥ अष्टद्रव्याणि यथा।
अश्वत्थोदुम्बर प्लक्ष-न्यग्रोध-समिधस्तिलाः। सिद्धर्त्थ-पायसाज्यानि

द्रव्याण्यष्टौ विदुर्ब्बुधाः॥ त्रिस्वाद्विति घृत-मधु-शर्करेति॥ इति
भुवनेश्वरीपूजापद्धतिः॥

अथ स्तोत्रम्

अथानन्दमयीं साक्षाच्छब्दब्रह्मस्वरूपिणीम्।
ईडे सकलसम्पत्त्यै जगत्कारणमम्बिकाम्॥ १॥

विद्यामशेषजननीमरविन्दयोनेर्विष्णोः शिवस्य च वपुः
प्रतिपादयित्रीम्।
सृष्टिस्थितिक्षयकरीञ्जगतान्त्रयाणां स्तुत्वा गिरँ
व्विमलयाम्यहमम्बिके त्वाम्॥ २॥

पृथ्व्या जलेन शिखिना मरुताम्बरेण होत्रेन्दुना दिनकरेण च
मूर्त्तिभाजः।
देवस्य मन्मथरिपोरपि शक्तिमत्ताहेतुस्त्वमेव खलू पर्वतराजपुत्रि॥ ३॥

त्रिस्रोतसः सकलदेवसमर्च्चिताया वैशिष्ट्यकारणमवैमि तदेव मातः
।
त्वत्पादपङ्कजपरागपवित्रितासु सम्भोर्जटासु सततम्परिवर्त्तनँय्यत्॥

४॥

आनन्दयेत्कुमुदिनीमधिपः कलानान्नान्यामिनः कमलिनीमथनेतराँ
व्वा।
एकस्य मोदनविधौ परमेकमीष्टे त्वन्तु प्रपञ्चमभिनन्दयसि
स्वदृष्ट्या॥ ५॥

आद्याप्यशेषजगतान्नवयौवनासि शैलाधिराजतनयाप्यतिकोमलासि।
त्र्य्याः प्रसूरपि तया न समीक्षितासि ध्येयासि गौरि मनसो न पथि
स्थितासि॥ ६॥

आसाद्य जन्म मनुजेषु चिरादुरापन्तत्रापि पाटवमवाप्य
निजेन्द्रियाणाम्।
नाभ्यर्चयन्ति जगताञ्जनयित्रि ये त्वान्निश्रेणिकाग्रमधिरुह्य पुनः
पतन्ति॥ ७॥

कर्पूरचूर्णहिमवारिविलोडितेन ये चन्दनेन कुसुमैश्च सुताजगन्धैः।
आराधयन्ति हि भवानि समुत्सुकास्त्वान्ते
खल्वखण्डभुवनाधिभुवः प्रथन्ते॥ ८॥

p. 199) आविश्य मध्यपदवीम्प्रथमे सरोजे सुप्ता हि राजसदृशी
विरचय्य विश्वम्।
विद्युल्लतावलयविभ्रममुद्वहन्ती पद्मानि पञ्च विदलय्य
समश्नुवाना॥ ९॥

तन्निर्गतामृतरसैरभिषिच्य गात्रमार्गेण तेन विलयम्पुनरप्यवाप्ता।
येषां हृदि स्फुरसि जातु न ते भवेयुर्मातर्महेश्वरकुटुम्बिनि
गर्ब्भभाजः॥ १०॥

आलम्बिकुण्डलभरामभिरामवक्त्रामापीवरस्तनतटीन्तनुवृत्तमध्य
अम्।
चिन्ताक्षसूत्रकलशालिखिताढ्यहस्तामावर्त्तयामि मनसा तव गौरि
मूर्त्तिम्॥ ११॥

आस्थाय योगमविजित्य च वैरिषड्कमाबध्य चेन्द्रियगणम्मनसि
प्रसन्ने।
षाशाङ्कुशाभयवराढ्यकरांशुवक्त्रामालोकयंति भुवनेश्वरि
योगिनस्त्वाम्॥ १२॥

उत्तप्तहाटकनिभाङ्करिभिश्चतुर्भिरावर्त्तितामृतघटैरभिषिच्यमान्

आ।

हस्तद्वयेन नलिने रुचिरे वहन्ती पद्मापि साभयकरा भवसि त्वमेव॥ १३

॥

अष्टाभिरुग्रविविधायुधवाहिनीभिर्दोर्वल्लरीभिरधिरुह्य

मृगाधिवासम्।

दूर्वादलद्युतिरमर्त्यविपक्षपक्षान्भ्यक्कुर्वती त्वमसि देवि भवानि

दुर्गे॥ १४॥

आविर्न्निदाघजलशीकरशोभिवक्त्राङ्गुञ्जाफलेन

परिकल्पितहारयष्टिम्।

रत्नांशुकामसितकान्तिमलङ्कृतान्त्वामाद्याम्पुलिन्दतरुणीमसकृन्न्

अमामि॥ १५॥

हंसैर्ग्गतिः क्वणितनू पुरदूरदृष्टे

मूर्त्तेरिवाप्तवचनैरनुगम्यमानौ।

पद्माविवोर्द्ध्वमुखरूढसुजातनालौ श्रीकण्ठपत्नि शिरसैव दधे

तवाङ्घ्री॥ १६॥

द्वाभ्यां समीक्षितुमतृप्तिमतेव दृग्भ्यामुत्पाद्यता त्रिनयनँ

व्वृषकेतनेन।
सान्द्रानुरागभवनेन निरीक्ष्यमाणे जङ्घे उभे अपि भवानि
तवानतोऽस्मि॥ १७॥

ऊरू स्मरामि जितहस्तिकरावलेपौ स्थौल्येन मार्द्दवतया
परिभूतरम्भौ।
श्रोणीभरस्य सहनौ परिकल्प्य दत्तौ स्तम्भाविवाङ्गवयसा तव
मध्यमेन॥ १८॥

श्रोण्यौ स्तनौ च युगपत्प्रथयिष्यतोच्चैर्बाल्यात्परेण वयसा
परिकृष्णसारः।
p. 200) रोमावलीविलसितेन विभाव्यमूर्त्तिर्मध्यन्तव स्फुरतु मे
हृदयस्य मध्ये॥ १९॥

सख्यास्स्मरस्य हरनेत्रहुताशभीरोर्ल्लावण्यवारिभरितन्नवयौवनेन
।
आपाद्यदत्तमिव पल्लवमप्रविष्टन्नाभिङ्कदापि तव देवि न विस्मरेयम्
॥ २०॥

ईशोपि गेहपिशुनम्भसितन्दधाने काश्मीरकर्द्दममनुस्तनपङ्कजे ते

।

स्नानोत्थितस्य करिणः क्षणलक्षफेनौ सिन्दूरितौ स्मरयतः समदस्य
कुम्भौ॥ २१॥

कण्ठातिरिक्तगलदुज्ज्वलकांतिधारा शोभौ भुजौ
निजरिपोर्मकरध्वजेन।
कण्ठग्रहाय रचितौ किल दीर्घपाशौ मातर्म्मम स्मृतिपथन्न
विलज्जयेताम्॥ २२॥

नात्यायतं रुचिरकम्बुविलासचौर्यं भूषाभरेण विविधेन
विराजमानम्।
कण्ठम्मनोहरगुणङ्गिरिराजकन्ये सञ्चिन्त्य तृप्तिमुपयामि कदापि
नाहम्॥ २३॥

अत्यायताक्षमभिजातललाटपट्टम्मन्दस्मितेन दरफुल्लकपोलरेखम्।
बिम्बाधरं खलू समुन्नतदीर्घनासँय्यत्ते स्मरत्यसकृदम्ब स एव
जातः॥ २४॥

आविस्त्वयारकरलेखमनल्पगन्धपुष्पोपरिभ्रमदलिव्रजनिर्विशेषम्।
यश्चेतसा कलयते तव केशपाशन्तस्य स्वयङ्गलति देवि पुराणपाशः

॥ २५॥

श्रुतिसुरचितपाकन्धीमतां स्तोत्रमेतत् पठति य इह मर्त्त्यो
नित्यमार्द्रान्तरात्मा।
स भवति
पदमुच्चैस्सम्पदाम्पादनम्रक्षितिपमुकुटलक्ष्मीर्ल्लक्षणानाञ्चिरा
य॥ २६॥

इति भुवनेश्वरीस्तोत्रं समाप्तम्॥

अथ कवचम्

देव्युवाच

भुवनेश्याश्च देवेश या या विद्याः प्रकाशिताः।
श्रुताश्चाधिगताः सर्वाः श्रोतुमिच्छामि साम्प्रतम्॥ १॥

त्रैलोक्यमङ्गलन्नाम कवचँय्यत्पुरोदितम्।

ईश्वर उवाच

श्रृणु पार्वति वक्ष्यामि सावधानाऽवधारय॥ २॥

त्रैलोक्यमङ्गलन्नाम कवचम्मन्त्रविग्रहम्।
सिद्धविद्यामयन्देवि सर्वैश्वर्यप्रदायकम्॥ ३॥

पठनाद्धारणान्मर्त्त्यस्त्रैलोक्यैश्वर्यभाग्भवेत्॥ ४॥

त्रैलोक्यमङ्गलस्यास्य कवचस्य ऋषिश्शिवः।
p. 201) छन्दोविराड् जगद्धात्री देवता भुवनेश्वरी॥ ५॥

धर्मार्त्थकाममोक्षेषु विनियोगः प्रकीर्त्तितः।
ह्रींबीजम्मे शिरः पातु भुवनेशी ललाटकम्॥ ६॥

ऐंपातु दक्षनेत्रम्मे ह्रींपातु वामलोचनम्।
श्रींपातु दक्षकर्ण्णम्मे त्रिवर्णात्मा महेश्वरी॥ ७॥

वामकर्ण सदा पातु ऐंघ्राणम्पातु मे सदा।
ह्रींपातु वदनन्देवी ऐंपातु रसनाम्मम॥ ८॥

वाक्पुटा च त्रिवर्णात्मा कण्ठम्पातु पराम्बिका।
श्रीं स्कन्धौ पातु नियतं ह्रीं भुजौ पातु सर्वदा॥ ९॥

क्लीं करौ त्रिपुटेशानी त्रिपुटैश्वर्यदायिनी।
ओम्पातु हृदयं ह्रीं मे मध्यदेशं सदाऽवतु॥ १०॥

क्रौंपातु नाभिदेशं सा त्र्यक्षरी भुवनेश्वरी।
सर्वबीजप्रदा पृष्ठम्पातु सर्ववशङ्करी॥ ११॥

ह्रीं पातु गुददेशम्मे नमो भगवती कटीम्।
माहेश्वरी सदा पातु सक्थिनी जानुयुग्मकम्॥ १२॥

अन्नपूर्णा सदा पातु स्वाहा पातु पदद्वयम्।
सप्तदशाक्षरी पायादन्नपूर्णात्मिका पुरा॥ १३॥

तारम्माया रमा कामः षोडशार्णा ततः परम्।
शिरःस्था सर्वदा पातु विंशत्यर्णात्मिका परा॥ १४॥

तारदुर्गे युगं रक्षिणी स्वाहेति दशाक्षरी।
जय दुर्गा घनश्यामा पातु माम्पूर्वतो मुदा॥ १५॥

मायावीजादिका चैषा दशार्णा परा तथा।
उत्तप्तकाञ्चनाभासा जयदुर्गाननेऽवतु॥ १६॥

तारं ह्रीं दुन्दुर्गायै नमोष्टार्णात्मिका परा।
शङ्खचक्रधनुर्बाणधरामान्दक्षिणेऽवतु॥ १७॥

महिषामर्द्दिनीस्वाहा वसुवर्णात्मिका परा।
नैर्ऋत्यां सर्वदा पातु महिषासुरनाशिनी॥ १८॥

मायापद्मावतीस्वाहा सप्तार्णा परिकीर्त्तिता।
पद्मावती पद्मसँथा पश्चिमे मां सदावतु॥ १९॥

पाशाङ्कुशपुटा माये हि परमेश्वरि स्वाहा।
त्रयोदशार्णा ताराद्या अश्वारूढाननेऽवतु॥ २०॥

सरस्वतीपञ्चशरे नित्यक्लिन्ने मदद्रवे।
स्वाहारव्यक्षरीविद्या मामुत्तरे सदावतु॥ २१॥

p. 202) ताराम्माया तु कवचञ्चे रक्षेत्सततँव्वधूः।

हूँक्षे ह्रीं फट् महाविद्या द्वादशार्णाखिलप्रदा॥ २२॥

त्वरिताष्टाहिभिः पायाच्छिवकोणे सदा च माम्।
ऐं क्लीं सौः सा ततो बाला मामूर्द्धदेशतोऽवतु॥ २३॥

विन्द्धन्ता भैरवी बाला भूमौ च मां सदावतु।
इति ते कथितम्पुण्यन्त्रैलोक्यमङ्गलम्परम्॥ २४॥

सारं सारतरम्पुण्यम्महाविद्यौघविग्रहम्।
अस्यापि पठनात्सद्यः कुबेरोपि धरेश्वरः॥ २५॥

इन्द्राद्याः सकला देवाः पठनाद्धारणाद्यतः।
सर्वसिद्धीश्वराः सन्तः सर्वैश्वर्यमवाप्नुयुः॥ २६॥

पुष्पाञ्जल्यष्टकन्दत्त्वा मूलेनैव पठेत्सकृत्।
सँवत्सरकृतायास्तु पूजायाः फलमाप्नुयात्॥ २७॥

प्रीतिमन्योन्यतः कृत्वा कमला निश्चला गृहे।
वाणी च निवसेद्वक्त्रे सत्यं सत्यन्न संशयः॥ २८॥

यो धारयति पुण्यात्मा त्रैलोक्यमङ्गलाभिधम्।
कवचम्परमम्पुण्यं सोऽपि पुण्यवताँव्वरः॥ २९॥

सर्वैश्बर्ययुतो भूत्वा त्रैलोक्यविजयी भवेत्।
पुरुषो दक्षिणे बाहौ नारी वामभुजे तथा॥ ३०॥

बहुपुत्रवती भूत्वा वन्ध्यापि लभते सुतम्।
ब्रह्मास्त्रादीनि शस्त्राणि नैव कृन्तन्ति तज्जनम्॥ ३१॥

एतत्कवचमज्ञात्वा यो जपेद्भुवनेश्वरीम्।
दारिद्र्यम्परमम्प्राप्य सोऽचिरान्मृत्युमाप्नुयात्॥ ३२॥

इति रुद्रयामले देवीश्वरसँवादे त्रैलोक्यमङ्गलन्नाम
भुवनेश्वरीकवचं समाप्तम्॥

अथ हृदयम्

देव्युवाच

भगवन्ब्रूहि तत्स्तोत्रं सर्वकामप्रसाधनम्।
तस्य श्रवणमात्रेण नान्यच्छ्रोतव्यमिष्यते॥ १॥

यदि मेऽनुग्रहः कार्यः प्रीतिश्चापि ममोपरि।
तदिदङ्कथय ब्रह्मन् विमलँय्यन्महीतले॥ २॥

ईश्वर उवाच

शृणु देवि प्रवक्ष्यामि सर्वकामप्रसाधनम्।
हृदयम्भुवनेश्वर्यास्स्तोत्रमस्ति यशोदयम्॥ ३॥

ॐ अस्य श्रीभुवनेश्वरीहृदयस्तोत्रमन्त्रस्य शक्तिऋषिर्गायत्रीच्छन्दो

p. 203) भुवनेश्वरी देवता हकारो बीजं ईकारः शक्ती रेफः कीलकं
सकलमनोवाञ्छितसिद्ध्यर्थे पाठे विनियोगः॥

अथाङ्गन्यासः

ॐ ह्रीं हृदयायनमः
ॐ श्रीं शिरसेस्वाहा

ॐ ऐं शिखायैवषट्

ॐ ह्रीं कवचायहूम्

ॐ श्रींनेत्रत्रयायवौषट्

ॐ ऐं-अस्त्रायफट्

एवङ्करन्यासः

अथ ध्यानम्

ध्यायेद्ब्रह्मादिकानाङ्कृतजनि जननींँय्योगिनींँ

य्योगयोनिन्देवनाञ्जीवनायोज्ज्वलितजयपरज्योतिरुग्राङ्गधात्रीम्।

शङ्खञ्चक्रञ्च बाणान्धनुरपि

दधतीन्दोश्चतुष्काम्बुजातैर्मायामाद्याँ

व्विशिष्टाम्भवभवभुवनाम्भूभवाभारभूमिम्॥ ४॥

यदाज्ञया यो जगदाद्यशेषं सृजत्यजश्श्रीपतिरौरसँव्वा।

बिभर्त्ति संहन्ति भवस्तदन्ते भजामहे श्रीभुवनेश्वरीन्ताम्॥ ५॥

जगज्जनानन्दकरीञ्जयाख्याँय्यशस्विनींँय्यन्त्रसुयज्ञयोनिम्।

जितामितामित्रकृतप्रपञ्चाम्भजामहे श्रीभुवनेश्वरीन्ताम्॥ ६॥

हरौ प्रसुप्ते भुवनत्रयान्ते अवातरन्नाभिजपद्मजन्मा।
विधिस्ततोऽन्धे विदधारयत्पदम्भजामहे श्रीभुवनेश्वरीन्ताम्॥ ७॥

न विद्यते क्वापि तु जन्म यस्या न वा स्थितिस्सान्ततिकीह यस्याः।
न वा निरोधेऽखिलकर्म यस्या भजामहे ० ॥ ८॥

कटाक्षमोक्षाचरणोग्रवित्ता निवेशितार्णाः करुणार्द्रचित्ता।
सुभक्तये एति समीप्सितँय्या भजामहे ०॥ ९॥

यतो जगज्जन्म बभूव योनेस्तदेव मध्ये प्रतिपाति याँव्वा।
तदत्ति यान्तेऽखिलमुग्रकाली भजामहे०॥ १०॥

सुषुप्तिकाले जनमध्ययन्त्या यया जनस्वप्नमवैति किञ्चित्।
प्रबुध्यते जाग्रति जीव एष भजामहे ०॥ ११॥

दयास्फुरत्कोरकटाक्षलाभान्न के त्रयस्याः प्रलभन्ति सिद्धाः।
कवित्वमीशित्वमपि स्वतन्त्रा भजामहे०॥ १२॥

लसन्मुखाम्भोरुहमुत्फुरन्तं हृदि प्रणिध्याय दिशि स्फुरन्तः।

यस्याः कृपार्द्रम्प्रविकाशयन्ति भजामहे०॥ १३॥

यदानुरागानुगतालिचित्राश्चिरन्तनप्रेमपरिप्लुताङ्गाः।

p. 204) सुनिर्ब्भयास्सन्ति प्रमुद्य यस्या भजामहे०॥ १४॥

हरिर्विरञ्चिर्हर ईशितारः पुरोऽवतिष्ठन्ति परन्नताङ्गाः।

यस्यास्समिच्छन्ति सदानुकूल्यम्भजामहे ०॥ १५॥

मनुँय्यदीयं हरमग्निसँथन्ततश्च वामश्रुतिचन्द्रशक्तम्।

जपन्ति ये स्युस्सुरवन्दितास्ते भजामहे ०॥ १६॥

प्रसीदतु प्रेमरसार्द्रचित्ता सदा हि सा श्रीभुवनेश्वरी मे।

कृपाकटाक्षेण कुबेरकल्पा भवन्ति यस्याः पदभक्तिभाजः॥ १७॥

मुदा सुपाठ्यम्भुवनेश्वरीयं सदा सतां स्तोत्रमिदं सुसेव्यम्।

सुखप्रदं स्यात्कलिकल्मषघ्नं सुश्रृण्वतां सम्पठताम्प्रशस्यम्

॥ १८॥

एतत्तु हृदयस्तोत्रम्पठेद्यस्तु समाहितः।

भवेत्तस्येष्टदा देवी प्रसन्ना भुवनेश्वरी॥ १९॥

ददाति धनमायुष्यम्पुण्यम्पुण्यमतिन्तथा।
नैष्ठिकीन्देवभक्तिञ्च गुरुभक्तिँव्विशेषतः॥ २०॥

पूर्णिमायाञ्चतुर्दश्याङ्कुजवारे विशेषतः।
पठनीयमिदं स्तोत्रन्देवसद्मनि यत्नतः॥ २१॥

यत्र कुत्रापि पाठेन स्तोत्रस्यास्य फलम्भवेत्।
सर्वस्थानेषु देवेश्याः पूतदेहस्सदा पठेत्॥ २२॥

इति नीलसरस्वतीतन्त्रे भुवनेश्वरीपटले श्रीदेवीश्वरसँवादे
श्रीभुवनेश्वरीहृदयस्तोत्रं समाप्तम्॥

अथ शतनाम

कैलासशिखरे रम्ये नानारत्नोपशोभिते।
नरनारीहितार्त्थाय शिवम्पप्रच्छ पार्वती॥ १॥

देव्युवाच

भुवनेश्वरी महाविद्यानाम्नामष्टोत्तरं शतम्।
कथयस्व महादेव यद्यहन्तव वल्लभा॥ २॥

ईश्वर उवाच

शृणु देवि महाभागे स्तवराजमिदं शुभम्।
सहस्त्रनाम्नामधिकं सिद्धिदम्मोक्षहेतुकम्॥ ३॥

शुचिभिः प्रातरुत्थाय पठितव्यं समाहितैः।
त्रिकालं श्रद्धया युक्तैः सर्वकामफलप्रदम्॥ ४॥

ॐ अस्य श्रीभुवनेश्वर्यष्टोत्तरशतनामस्तोत्रस्य शक्तिर्ऋषिर्गायत्री
च्छन्दो भुवनेश्वरी देवता चतुर्वर्गसाधने जपे विनियोगः॥

p. 205) महामाया महाविद्या महायोगा महोत्कटा।
माहेश्वरी कुमारी च ब्रह्माणी ब्रह्मरूपिणी॥ ५॥

वागीश्वरी योगरूपा योगिनीकोटिसेविता।
जया च विजया चैव कौमारी सर्वमङ्गला॥ ६॥

हिङ्गुला च विलासी च ज्वालिनी ज्वालरूपिणी।
ईश्वरी क्रूरसंहारी कुलमार्गप्रदायिनी॥ ७॥

वैष्णवी सुभगाकारी सुकुल्या कुलपूजिता।
वामाङ्गा वामचारा च वामदेव प्रिया तथा॥ ८॥

डाकिनीयोगिनीरूपा भूतेशी भूतनायिका।
पद्मावती पद्मनेत्राप्रबुद्धा च सरस्वती॥ ९॥

भूचरी खेचरी माया मातङ्गी भुवनेश्वरी।
कांता पतिव्रता साक्षी सुचक्षुः कुण्डवासिनी॥ १०॥

उमा कुमारी लोकेशी सुकेशी पद्मरागिणी।
इन्द्राणी ब्रह्मचाण्डाली चण्डिका वायुवल्लभा॥ ११॥

सर्वधातृमयीमूर्त्तिर्ज्जलरूपा जलोदरी।
आकाशी रणगा चैव नृकपालविभूषणा॥ १२॥

नर्मदा मोक्षदा चैव कामधर्मार्त्थदायिनी।

गायत्री चाथ सावित्री त्रिसन्ध्या तीर्त्थगामिनी॥ १३॥

अष्टमी नवमी चैव दशम्येकादशी तथा।
पौर्णमासी कुहूरूपा तिथिमूर्त्तिस्वरूपिणी॥ १४॥

सुरारिनाशकारी च उग्ररूपा च वत्सला।
अनला अर्द्धमात्रा च अरुणा पीतलोचना॥ १५॥

लज्जा सरस्वती विद्या भवानी पापनाशिनी।
नागपाशधरा मूर्त्तिरगाधा धृतकुण्डला॥ १६॥

क्षत्ररूपीक्षयकरी तेजस्विनी शुचिस्मिता।
अव्यक्ताव्यक्तलोका च शम्भुरूपा मनस्विनी॥ १७॥

मातङ्गी मत्तमातङ्गी महादेवप्रिया सदा।
दैत्यहा चै वाराही सर्वशास्त्रमयी शुभा॥ १८॥

य इदम्पठते भक्त्या शृणुयाद्वा समाहितः।
अपुत्रो लभते पुत्रन्निर्द्धनो धनवान् भवेत्॥ १९॥

मूर्खोपि लभते शास्त्रञ्चौरोपि लभते गतिम्।
वेदानाम्पाठको विप्रः क्षत्त्रियो विजयी भवेत्॥ २०॥

वैश्यस्तु धनवान्भूयाच्छूद्रस्तु सुखमेधते।
p. 206) अष्टम्याञ्च चतुर्द्दश्यान्नवम्याञ्चैकचेतसः॥ २१॥

ये पठन्ति सदा भक्त्या न ते वै दुःखभागिनः।
एककालन्द्विकालँव्वा त्रिकालँव्वा चतुर्त्थकम्॥ २२॥

ये पठन्ति सदा भक्त्या स्वर्गलोके च पूजिताः।
रुद्रन्दृष्ट्वा यथा देवाः पन्नगा गरुडँय्यथा॥ २३॥

शत्रवः प्रपलायन्ते तस्य वक्त्रविलोकनात्।

इति श्रीरुद्रयामले देवीशङ्करसँवादे
भुवनेश्वर्यष्टोत्तरशतनामस्तोत्रं समाप्तम्॥

अथ सहस्त्रनाम

ओमस्य श्रीभुवनेश्वरीसहस्रनाममन्त्रस्य सदाशिव ऋषिरनुष्टुप्
छन्दः भुवनेश्वरीदेवता लज्जाबीजम् कमलाशक्तिः
वाग्भवङ्कीलकम् सर्वार्त्थसाधने जपे विनियोगः॥

भुवनेशी भुवाराध्या भवानी भयनाशिनी।
भवरूपा भवानन्दा भवसागरतारिणी॥ १॥

भवोद्भवा भवरता भवभारनिवारिणी।
भव्याना भव्यनयना भव्यरूपा भवौषधिः॥ २॥

भव्याङ्गना भव्यकेशी भवपाशविमोचिनी।
भव्यासना भव्यवस्त्रा भव्याभरणभूषिता॥ ३॥

भगरूपा भगानन्दा भगेशी भगमालिनी।
भगविद्या भगवती भगक्लिन्ना भगावहा॥ ४॥

भगाङ्कुरा भगक्रीडा भगाद्या भगमङ्गला।
भगलीला भगप्रीता भगसम्पद्भगेश्वरी॥ ५॥

भगालया भगोत्साहा भगस्था भगपोषिणी।

भगोत्सवा भगविद्या भगमाता भगस्थिता॥ ६॥

भगशक्तिर्भगनिधिर्भगपूजा भगेषणा।
भगास्वपा भगाधीशा भगार्च्या भगसुन्दरी॥ ७॥

भगरेखा भगस्नेहा भगस्नेहविवर्धिनी।
भगिनी भगबीजस्था भगभोगविलासिनी॥ ८॥

भगाचारा भगाधारा भगाचारा भगाश्रया।
भगपुष्पा भगश्रीदा भगपुष्पनिवासिनी॥ ९॥

भव्यरूपधरा भव्याभव्यपुष्पैरसंस्कृता।
भव्यलीला भव्यमाला भव्याङ्गी भव्यसुन्दरी॥ १०॥

भव्यशीला भव्यलीला भव्याक्षी भव्यनाशिनी।
p. 207) भव्याङ्गिका भव्यवाणी भव्यकान्तिर्भगालिनी॥ ११॥

भव्यत्रपा भव्यनदी भव्यभोगविहारिणी।
भव्यस्तनी भव्यमुखी भव्यगोष्ठी भयापहा॥ १२॥

भक्तेश्वरी भक्तिकरी भक्तानुग्रहकारिणी।
भक्तिदा भक्तिजननी भक्तानन्दविवर्द्धिनी॥ १३॥

भक्तिप्रिया भक्तिरता भक्तिभावविहारिणी।
भक्तिशीला भक्तिलीला भक्तेशी भक्तिपालिनी॥ १४॥

भक्तिविद्या भक्तविद्या भक्तिर्भक्तिविनोदिनी।
भक्तिरीतिर्भक्तिप्रीतिर्भक्तिसाधनसाधिनी॥ १५॥

भक्तिसाध्या भक्तसाध्या भक्तिराली भवेश्वरी।
भटविद्या भटानन्दा भटस्था भटरूपिणी॥ १६॥

भटमान्या भटस्थान्या भटस्थाननिवासिनी।
भटिनी भटरूपेशी भटरूपविवर्द्धिनी॥ १७॥

भटवेशी भटेशी च भगभाग्भवसुन्दरी।
भटप्रीत्या भटरीत्या भटानुग्रहकारिणी॥ १८॥

भटैराध्या भटबोध्या भटबोधविनोदिनी।
भटैस्सेव्या भटवरा भटार्च्या भटबोधिनी॥ १९॥

भटकीर्त्त्या भटकला भटपा भटपालिनी।
भटैश्वर्या भटाधीशा भटेक्षा भटतोषिणी॥ २०॥

भटेशी भटजननी भटभाग्यविवर्द्धिनी।
भटमुक्तिर्भटयुक्तिर्ब्भटप्रीतिविवर्द्धिनी॥ २१॥

भाग्येशी भाग्यजननी भाग्यस्था भाग्यरूपिणी।
भावनाभावकुशला भावदा भाववर्द्धिनी॥ २२॥

भावरूपा भावरसा भावान्तरविहारिणी।
भावाङ्कुरा भावकला भावस्थाननिवासिनी॥ २३॥

भावातुरा भावधृता भावमध्यव्यवस्थिता।
भावऋद्धिर्ब्भावसिद्धिर्ब्भावादिर्ब्भावभाविनी॥ २४॥

भावालया भावपरा भावसाधनतत्परा।
भावेश्वरी भावगम्या भावस्था भावगर्विता॥ २५॥

भाविनी भावरमणी भारती भारतेश्वरी।

भागीरथी भाग्यवती भाग्योदयकरीकला॥ २६॥

भाग्याश्रया भाग्यमयी भाग्या भाग्यफलप्रदा ।
भाग्यचारा भाग्यसारा भाग्यधारा च भग्यदा॥ २७॥

p. 208) भाग्येश्वरी भाग्यनिधिर्भाग्या भाग्यसुमातृका।
भाग्येक्षा भाग्यना भाग्यभाग्यदा भाग्यमातृका॥ २८॥

भाग्येक्षा भाग्यमनसा भाग्यादिर्भाग्यमध्यगा।
भ्रातेश्वरी भ्रातृवती भ्रात्र्यम्बा भ्रातृपालिनी॥ २९॥

भ्रातृस्था भ्रातृकुशला भ्रामरी भ्रमराम्बिका।
भिल्लरूपा भिल्लवती भिल्लस्था भिल्लपालिनी॥ ३०॥

भिल्लमाता भिल्लधात्री भिल्लनी भिल्लकेश्वरी।
भिल्लकीर्त्तिर्भिल्लकला भिल्लमन्दरवासिनी॥ ३१॥

भिल्लक्रीडा भिल्ललीला भिल्लार्च्या भिल्लवल्लभा।
भिल्लस्नुषा भिल्लपुत्री भिल्लनी भिल्लपोषिणी॥ ३५॥

भिल्लपौत्री भिल्लगोष्ठी भिल्लाचारनिवासिनी।
भिल्लपूज्या भिल्लवाणी भिल्लानी भिल्लभितिहा॥ ३३॥

भीतस्था भीतजननी भीतिर्भीतिविनाशिनी।
भीतिदा भितिहा भीत्या भीत्याकारविहारिणी॥ ३४॥

भीतेशी भीतिशमनी भीतस्थाननिवासिनी।
भीतिरीत्या भीतिकला भीतीक्षा भीतिहारिणी॥ ३५॥

भीमेशी भीमजननी भीमा भीमनिवासिनी।
भीमेश्वरी भीमरता भीमाङ्गी भीमपालिनी॥ ३६॥

भीमनादी भीमतन्त्री भीमैश्वर्यविवर्द्धिनी।
भीमगोष्ठी भीमधात्री भीमविद्याविनोदिनी॥ ३७॥

भीमविक्रमदात्री च भीमविक्रमवासिनी।
भीमानन्दकरीदेवी भीमानन्दविहारिणी॥ ३८॥

भीमोपदेशिनी नित्या भीमभाग्यप्रदायिनी।
भीमसिद्धिर्भीमऋद्धिर्भीमभक्तिविवर्द्धिनी॥ ३९॥

भीमस्था भीमवरदा भीमधर्मोपदेशिनी।
भीष्मेश्वरी भीष्मभृती भीष्मबोधप्रबोधिनी॥ ४०॥

भीष्मश्रीर्भीष्मजननी भीष्मज्ञानोपदेशिनी।
भीष्मस्था भीष्मतपसा भीष्मेशी भीष्मतारिणी॥ ४१॥

भीष्मलीला भीष्मशीला भीष्मरोदिनिवासिनी।
भीष्माश्रया भीष्मवरा भीष्महर्षविवर्द्धिनी॥ ४२॥

भुवना भुवनेशानी भुवनानन्दकारिणी।
भुविस्था भुविरूपा च भुविभारनिवारिणी॥ ४३॥

p. 209) भुक्तिस्था भुक्तिदा भुक्तिर्भुक्तेशी भुक्तिरूपिणी।
भुक्तेश्वरी भुक्तिदात्री भुक्तिराकाररूपिणी॥ ४४॥

भुजङ्गस्था भुजङ्गेशी भुजङ्गाकाररूपिणी।
भुजङ्गी भुजगावासा भुजङ्गानन्ददायिनी॥ ४५॥

भूतेशी भूतजननी भूतस्था भूतरूपिणी।

भूतेश्वरी भूतलीला भूतवेषकरी सदा॥ ४६॥

भूतदात्री भूतकेशी भूतधात्री महेश्वरी।
भूतरीत्या भूतपत्नी भूतलोकनिवासिनी॥ ४७॥

भूतसिद्धिर्भूतऋद्धिर्भूतानन्दनिवासिनी।
भूतकीर्त्तिर्भूतलक्ष्मीर्भूतभाग्यविवर्द्धिनी॥ ४८॥

भूताच्र्या भूतरमणी भूतविद्याविनोदिनी।
भूतपौत्री भूतपुत्री भूतभार्याविधेश्वरी॥ ४९॥

भूपस्था भूपरमणी भूपेशी भूपपालिनी।
भूपमाता भूपनिभा भूपैश्वर्यप्रदायिनी॥ ५०॥

भूपचेष्टा भूपनेष्ठा भूपभावविवर्द्धिनी।
भूपभगिनी भूपभूरी भूपपौत्री तथा वधूः॥ ५१॥

भूपकीर्त्तिर्भूपनीतिर्भूपभाग्यविवर्द्धिनी।
भूपक्रिया भूपक्रीडा भूपमन्दरवासिनी॥ ५२॥

भूपार्च्या भूपसँआध्या भूपभोगविवर्द्धिनी।
भूपाश्रया भूपकाला भूपकौतुकदण्डिनी॥ ५३॥

भूषणस्था भूषणेशी भूषा भूषणधारिणी।
भूषणाधारधर्मेशी भूषणाकाररूपिणी॥ ५४॥

भूपताचारनिलया भूपताचारभूषिता।
भूपताचाररचना भूपताचारमण्डिता॥ ५५॥

भूपताचारधर्मेशी भूपताचारकारिणी।
भूपताचारचरिता भूपताचारवर्ज्जिता॥ ५६॥

भूपताचारवृद्धिस्था भूपताचारवृद्धिदा।
भूपताचारकरणा भूपताचारकर्मदा॥ ५७॥

भूपताचारकर्म्मेशी भूपताचारकर्मदा।
भूपताचारदेहस्था भूपताचारकर्मिणी॥ ५८॥

भूपताचारसिद्धिस्था भूपताचारसिद्धिदा।
भूपताचारधर्माणी भूपताचारधारिणी॥ ५९॥

भूपतानन्दलहरी भूपतेश्वररूपिणी।
भूपतेर्न्नीतिनीतिस्था भूपतिस्थानवासिनी॥ ६०॥

भूपतिस्थानगीर्वाणी भूपतेर्वरधारिणी॥ ६१॥

p. 210) भेषजानन्दलहरी भेषजानन्दरूपिणी।
भेषजानन्दमहिषी भेषजानन्दरूपिणी॥ ६२॥

भेषजानन्दकर्मेशी भेषजानन्ददायिनी।
भैषजी भैषजाकन्दा भेषजस्थानवासिनी॥ ६३॥

भेषजेश्वररूपा च भेषजेश्वरसिद्धिदा।
भेषजेश्वरधर्मेशी भेषजेश्वरकर्मदा॥ ६४॥

भेषजेश्वरकर्मेशी भेषजेश्वरकर्मिणी।
भेषजाधीशजननी भेषजाधीशपालिनी॥ ६५॥

भेषजाधीशरचना भेषजाधीशमङ्गला।
भेषजारण्यमध्यस्था भेषजारण्यरक्षिणी॥ ६६॥

भैषज्यविद्या भैषज्या भैषज्येप्सितदायिनी।
भैषज्यस्था भैषजेशी भैषज्यानन्दवर्द्धिनी॥ ६७॥

भैरवी भैरवीचारा भैरवाकाररूपिणी।
भैरवाचारचतुरा भैरवाचारमण्डिता॥ ६८॥

भैरवा भैरवेशी च भैरवानन्ददायिनी।
भैरवानन्दरूपेशी भैरवानन्दरूपिणी॥ ६९॥

भैरवानन्दनिपुणा भैरवानन्दमन्दिरा।
भैरवानन्दतत्त्वज्ञा भैरवानन्दतत्परा॥ ७०॥

भैरवानन्दकुशला भैरवानन्दनीतिदा।
भैरवानन्दप्रीतिस्था भैरवानन्दप्रीतिदा॥ ७१॥

भैरवानन्दमहिषी भैरवानन्दमालिनी।
भैरवानन्दमतिदा भैरवानन्दमातृका॥ ७२॥

भैरवाधारजननी भैरवाधाररक्षिणी।

भैरवाधाररूपेशी भैरवाधाररूपिणी॥ ७३॥

भैरवाधारनिचया भैरवाधारनिश्चया।
भैरवाधारतत्त्वज्ञा भैरवाधारतत्त्वदा॥ ७४॥

भैरवाश्रयतन्त्रेशी भैरवाश्रयमन्त्रिणी।
भैरवाश्रयरचना भैरवाश्रयरञ्जिता॥ ७५॥

भैरवाश्रयनिर्द्धारा भैरवाश्रयनिर्ब्भरा।
भैरवाश्रयनिर्द्धारा भैरवाश्रयनिर्द्धरा॥ ७६॥

भैरवानन्दबोधेशी भैरवानन्दबोधिनी।
भैरवानन्दबोधस्था भैरवानन्दबोधदा॥ ७७॥

भैरव्यैश्वर्यवरदा भैरव्यैश्वर्यदायिनी।
भैरव्यैश्वर्यरचना भैरव्यैश्वर्यवर्द्धिनी॥ ७८॥

भैरव्यैश्वर्यसिद्धिस्था भैरव्यैश्वर्यसिद्धिदा।
भैरव्यैश्वर्यसिद्धेशी भैरव्यैश्वर्यरूपिणी॥ ७९॥

भैरव्यैश्वर्यसुपथा भैरव्यैश्वर्यसुप्रभा।

p. 211) भैरव्यैश्वर्यवृद्धिस्था भैरव्यैश्वर्यवृद्धिदा॥ ८०॥

भैरव्यैश्वर्यकुशला भैरव्यैश्वर्यकामदा।

भैरव्यैश्वर्यसुलभा भैरव्यैश्वर्यसम्प्रदा॥ ८१॥

भैरव्यैश्वर्यविशदा भैरव्यैश्वर्यविक्रिता।

भैरव्यैश्वर्यविनया भैरव्यैश्वर्यवेदिता॥ ८२॥

भैरव्यैश्वर्यमहिमा भैरव्यैश्वर्यमानिनी।

भैरव्यैश्वर्यनिरता भैरव्यैश्वर्यनिर्मिता॥ ८३॥

भोगेश्वरी भोगमाता भोगस्था भोगरक्षिणी।

भोगक्रीडा भोगलीला भोगेशी भोगवर्द्धिनी॥ ८४॥

भोगाङ्गी भोगरमणी भोगाचारविचारिणी।

भोगाश्रया भोगवती भोगिनी भोगरूपिणी॥ ८५॥

भोगाङ्कुरा भोगविधा भोगाधारनिवासिनी।

भोगाम्बिका भोगरता भोगसिद्धिविधायिनी॥ ८६॥

भोजस्था भोजनिरता भोजनानन्ददायिनी।
भोजनानन्दलहरी भोजनान्तर्विहारिणी॥ ८७॥

भोजनानन्दमहिमा भोजनानन्दभोग्यदा।
भोजनानन्दरचना भोजनानन्दहर्षिता॥ ८८॥

भोजनाचारचतुरा भोजनाचारमण्डिता।
भोजनाचारचरिता भोजनाचारचर्चिता॥ ८९॥

भोजनाचारसम्पन्ना भोजनाचारसँयुता।
भोजनाचारचित्तस्था भोजनाचाररीतिदा॥ ९०॥

भोजनाचारविभवा भोजनाचारविस्तृता।
भोजनाचाररमणी भोजनाचाररक्षिणी॥ ९१॥

भोजनाचारहरिणी भोजनाचारभक्षिणी।
भोजनाचारसुखदा भोजनाचारसुस्पृहा॥ ९२॥

भोजनाहारसुरसा भोजनाहारसुन्दरी।

भोजनाहारचरिता भोजनाहारचञ्चला॥ ९३॥

भोजनास्वादविभवा भोजनास्वादवल्लभा।
भोजनास्वादसन्तुष्टा भोजनास्वादसम्प्रदा॥ ९४॥

भोजनास्वादसुपथा भोजनास्वादसंश्रया।
भोजनास्वादनिरता भोजनास्वादनिर्णिता॥ ९५॥

भौक्षरा भौक्षरेशानी भौकाराक्षररूपिणी।
भौक्षरस्था भौक्षरादिर्ब्भौक्षरस्थानवासिनी॥ ९६॥

p. 212) भङ्कारी भर्म्मिणी भर्मी भस्मेशी भस्मरूपिणी।
भङ्कारा भञ्चना भस्मा भस्मस्था भस्मवासिनी॥ ९७॥

भक्षरी भक्षराकारा भक्षरस्थानवासिनी।
भक्षराढ्या भक्षरेशी भरूपा भस्वरूपिणी॥ ९८॥

भूधरस्था भूधरेशी भूधरी भूधरेश्वरी।
भूधरानन्दरमणी भूधरानन्दपालिनी॥ ९९॥

भूधरानन्दजननी भूधरानन्दवासिनी।
भूधरानन्दरमणी भूधरानन्दरक्षिता॥ १००॥

भूधरानन्दमहिमा भूधरानन्दमन्दिरा।
भूधरानन्दसर्वेशी भूधरानन्दसर्वसूः॥ १०१॥

भूधरानन्दमहिषी भूधरानन्ददायिनी।
भूधराधीशधर्मेशी भूधरानन्दधर्मिणी॥ १०२॥

भूधराधीशधर्मेशी भूधराधीशसिद्धिदा।
भूधराधीशकर्मेशी भूधराधीशकामिनी॥ १०३॥

भूधराधीशनिरता भूधराधीशनिर्णिता।
भूधराधीशनीतिस्था भूधराधीशनीतिदा॥ १०४॥

भूधराधीशभाग्येशी भूधराधीशभामिनी।
भूधराधीशबुद्धिस्था भूधराधीशबुद्धिदा॥ १०५॥

भूधराधीशवरदा भूधराधीशवन्दिता।
भूधराधीशाऽराध्या च भूधराधीशचर्चिता॥ १०६॥

भङ्गेश्वरी भङ्गमयी भङ्गस्था भङ्गरूपिणी।
भङ्गाक्षता भङ्गरता भङ्गार्च्या भङ्गरक्षिणी॥ १० ७॥

भङ्गावती भङ्गलीला भङ्गभोगविलासिनी।
भङ्गरङ्गप्रतीकाशा भङ्गरङ्गनिवासिनी॥ १०८॥

भङ्गाशिनी भङ्गमूली भङ्गभोगविधायिनी।
भङ्गाश्रया भङ्गबीजा भङ्गबीजाङ्कुरेश्वरी॥ १०९॥

भङ्गयन्त्रचमत्कारा भङ्गयन्त्रेश्वरी तथा।
भङ्गयन्त्रविमोहिस्था भङ्गयन्त्रविनोदिनी॥ ११०॥

भङ्गयन्त्रविचारस्था भङ्गयन्त्रविचारिणी।
भङ्गयन्त्ररसानन्दा भङ्गयन्त्ररसेश्वरी॥ १११॥

भङ्गयन्त्ररसस्वादा भङ्गयन्त्ररसस्थिता।
भङ्गयन्त्ररसाधारा भङ्गयन्त्ररसाश्रया॥ ११२॥

भूधरात्मजरूपेशी भूधरात्मजरूपिणी।

भूधरात्मजयोगेशी भूधरात्मजपालिनी॥ ११३॥

भूधरात्मजमहिमा भूधरात्मजमालिनी।

p. 213) भूधरात्मजभूतेशी भूधरात्मजरूपिणी॥ ११४॥

भूधरात्मजसिद्धिस्था भूधरात्मजसिद्धिदा।

भूधरात्मजभावेशी भूधरात्मजभाविनी॥ ११५॥

भूधरात्मजभोगस्था भुधरात्मजभोगदा।

भूधरात्मजभोगेशी भूधरात्मजभोगिनी॥ ११६॥

भव्या भव्यतरा भव्याभाविनी भववल्लभा।

भावातिभावा भावाख्या भातिभा भीतिभान्तिका॥ ११७॥

भासान्तिभासा भासस्था भासाभा भास्करोपमा।

भास्करस्था भास्करेशी भास्करैश्वर्यवर्द्धिनी॥ ११८॥

भास्करानन्दजननी भास्करानन्ददायिनी।

भास्करानन्दमहिमा भास्करानन्दमातृका॥ ११९॥

भास्करानन्दनैश्वर्या भास्करानन्दनेश्वरा।

भास्करानन्दसुपथा भास्करानन्दसुप्रभा॥ १२०॥

भास्करानन्दनिचया भास्करानन्दनिर्मिता।

भास्करानन्दनीतिस्था भास्करानन्दनीतिदा॥ १२१॥

भास्करोदयमध्यस्था भास्करोदयमध्यगा।

भास्करोदयतेजःस्था भास्करोदयतेजसा॥ १२२॥

भास्कराचारचतुरा भास्कराचारचन्द्रिका।

भास्कराचारपरमा भास्कराचारचण्डिका॥ १२३॥

भास्कराचारपरमा भास्कराचारपारदा।

भास्कराचारमुक्तिस्था भास्कराचारमुक्तिदा॥ १२४॥

भास्कराचारसिद्धिस्था भास्कराचारसिद्धिदा।

भास्कराचरणाधारा भास्कराचरणाश्रिता॥ १२५॥

भास्कराचारमन्त्रेशी भास्कराचारमन्त्रिणी।

भास्कराचारवित्तेशी भास्कराचारचित्रिणी॥ १२६॥

भास्कराधारधर्मेशी भास्कराधारधारिणी।

भास्कराधाररचना भास्कराधाररक्षिता॥ १२७॥

भास्कराधारकर्माणी भास्कराधारकर्मदा।

भास्कराधाररूपेशी भास्कराधाररूपिणी॥ १२८॥

भास्कराधारकाम्येशी भास्काराधारकामिनी।

भास्कराधारसांशेशी भास्कराधारसांशिनी॥ १२९॥

भास्कराधारधर्मेशी भास्कराधारधामिनी।

भास्कराधारचक्रस्था भास्कराधारचक्रिणी॥ १३०॥

p. 214) भास्करेश्वरक्षत्रेशी भास्करेश्वरक्षत्रिणी।

भास्करेश्वरजननी भास्करेश्वरपालिनी॥ १३१॥

भास्करेश्वरसर्वेशी भास्करेश्वरशर्वरी।

भास्करेश्वरसद्भीमा भास्करेश्वरसन्निभा॥ १३२॥

भास्करेश्वरसुपथा भास्करेश्वरसुप्रभा।

भास्करेश्वरयुवती भास्करेश्वरसुन्दरी॥ १३३॥

भास्करेश्वरमूर्त्तेशी भास्करेश्वरमूर्त्तिनी।
भास्करेश्वरमित्रेशी भास्करेश्वरमन्त्रिणी॥ १३४॥

भास्करेश्वरसानन्दा भास्करेश्वरसाश्रया।
भास्करेश्वरचित्रस्था भास्करेश्वरचित्रदा॥ १३५॥

भास्करेश्वरचित्रेशी भास्करेश्वरचित्रिणी।
भास्करेश्वरभाग्यस्था भास्करेश्वरभाग्यदा॥ १३६॥

भास्करेश्वरभाग्येशी भास्करेश्वरभाविनी।
भास्करेश्वरकीर्त्त्येशी भास्करेश्वरकीर्त्तिनी॥ १३७॥

भास्करेश्वरकीर्त्तिस्था भास्करेश्वरकीर्त्तिदा।
भास्करेश्वरकरुणा भास्करेश्वरकारिणी॥ १३८॥

भास्करेश्वरगीर्वाणी भास्करेश्वरगारुडी।
भास्करेश्वरदेहस्था भास्करेश्वरदेहदा॥ १३९॥

भास्करेश्वरनादस्था भास्करेश्वरनादिनी।
भास्करेश्वरनादेशी भास्करेश्वरनादिनी॥ १४०॥

भास्करेश्वरकोशस्था भास्करेश्वरकोशदा।
भास्करेश्वरकोशेशी भास्करेश्वरकोशिनी॥ १४१॥

भास्करेश्वरशक्तिस्था भास्करेश्वरशक्तिदा।
भास्करेश्वरतोषेशी भास्करेश्वरतोषिणी॥ १४२॥

भास्करेश्वरक्षेत्रेशी भास्करेश्वरक्षेत्रिणी।
भास्करेश्वरयोगस्था भास्करेश्वरयोगदा॥ १४३॥

भास्करेश्वरयोगेशी भास्करेश्वरयोगिनी।
भास्करेश्वरपद्मेशी भास्करेश्वरपद्मिनी॥ १४४॥

भास्करेश्वरहृद्बीजा भास्करेश्वरहृद्धरा।
भास्करेश्वरहृद्योनि-र्भास्करेश्वरहृद्युतिः॥ १४५॥

भास्करेश्वरबुद्धिस्था भास्करेश्वरसद्विधा।
भास्करेश्वरसद्वाणी भास्करेश्वरसद्धरा॥ १४६॥

भास्करेश्वरराज्यस्था भास्करेश्वरराज्यदा।

भास्करेश्वरराज्येशी भास्करेश्वरपोषिणी॥ १४७॥

भास्करेश्वरज्ञानस्था भास्करेश्वरज्ञानदा।

p. 215) भास्करेश्वरज्ञानेशी भास्करेश्वरगामिनी॥ १४८॥

भास्करेश्वरलक्षेशी भास्करेश्वरक्षालिता।

भास्करेश्वरलक्षिता भास्करेश्वररक्षिता॥ १४९॥

भास्करेश्वरखड्गस्था भास्करेश्वरखड्गदा।

भास्करेश्वरखड्गेशी भास्करेश्वरखड्गिनी॥ १५०॥

भास्करेश्वरकार्येशी भास्करेश्वरकामिनी।

भास्करेश्वरकायस्था भास्करेश्वरकायदा॥ १५१॥

भास्करेश्वरचक्षुःस्था भास्करेश्वरचक्षुषा।

भास्करेश्वरसन्नाभा भास्करेश्वरसार्चिता॥ १५२॥

भ्रूणहत्याप्रशमनी भ्रूणपापविनाशिनी।

भ्रूणदारिद्र्यशमनी भ्रूणरोगनिवाशिनी॥ १५३॥

भ्रूणशोकप्रशमनी भ्रूणदोषनिवारिणी।
भ्रूणसन्तापशमनी भ्रूणविभ्रमनाशिनी॥ १५४॥

भवाब्धिस्था भवाब्धीशा भवाब्धिभयनाशिनी।
भवाब्धिपारकरणी भवाब्धिसुखवर्द्धिनी॥ १५५॥

भवाब्धिकार्यकरणी भवाब्धिकरुणानिधिः।
भवाब्धिकालशमनी भवाब्धिवरदायिनी॥ १५६॥

भवाब्धिभजनस्थाना भवाब्धिभजनस्थिता।
भवाब्धिभजनाकारा भवाब्धिभजनक्रिया॥ १५७॥

भवाब्धिभजनाचारा भवाब्धिभजनाङ्कुरा।
भवाब्धिभजनानन्दा भवाब्धिभजनाधिपा॥ १५८॥

भवाब्धिभजनैश्वर्या भवाब्धिभजनेश्वरी।
भवाब्धिभजनासिद्धिर्ब्भवाब्धिभजनारतिः॥ १५९॥

भवाब्धिभजनानित्या भवाब्धिभजनानिशा।

भवाब्धिभजनानिम्ना भवाब्धिभवभीतिहा॥ १६०॥

भवाब्धिभजनाकाम्या भवाब्धिभजनाकला।

भवाब्धिभजनाकीर्त्तिर्ब्भवाब्धिभजनाकृता॥ १६१॥

भवाब्धिशुभदा नित्या भवाब्धिशुभदायिनी।

भवाब्धिसकलानन्दा भवाब्धिसकलाकला॥ १६२॥

भवाब्धिसकलासिद्धिर्ब्भवाब्धिसकलानिधिः।

भवाब्धिसकलासारा भवाब्धिसकलार्त्थदा॥ १६३॥

भवाब्धिभवनामूर्त्तिर्ब्भवाब्धिभवनाकृतिः।

भवाब्धिभवनाभव्या भवाब्धिभवनाम्भसा॥ १६४॥

p. 216) भवाब्धिमदनारूपा भवाब्धिमदनातुरा।

भवाब्धिमदनेशानी भवाब्धिमदनेश्वरी॥ १६५॥

भवाब्धिभाग्यरचना भवाब्धिभाग्यदा सदा।

भवाब्धिभाग्यदाकूला भवाब्धिभाग्यनिर्ब्भरा॥ १६६॥

भवाब्धिभाग्यनिरता भवाब्धिभाग्यभाविता।

भवाब्धिभाग्यसञ्चारा भवाब्धिभाग्यसञ्चिता॥ १६७॥

भवाब्धिभाग्यसुपथा भवाब्धिभाग्यसुप्रदा।

भवाब्धिभाग्यरीतिज्ञा भवाब्धिभाग्यनीतिदा॥ १६८॥

भवाब्धिभाग्यरीत्येशी भवाब्धिभाग्यरीतिनी।

भवाब्धिभोगनिपुणा भवाब्धिभोगसम्प्रदा॥ १६९॥

भवाब्धिभाग्यगहना भवाब्धिभोग्यगुम्फिता।

भवाब्धिभोगगान्धारी भवाब्धिभोगगुम्फिता॥ १७०॥

भवाब्धिभोगसुरसा भवाब्धिभोगसुस्पृहा।

भवाब्धिभोगग्रथिनी भवाब्धिभोगयोगिनी॥ १७१॥

भवाब्धिभोगरसना भवाब्धिभोगराजिता।

भवाब्धिभोगविभवा भवाब्धिभोगविस्तृता॥ १७२॥

भवाब्धिभोगवरदा भवाब्धिभोगवन्दिता।

भवाब्धिभोगकुशला भवाब्धिभोगशोभिता॥ १७३॥

भवाब्धिभेदजननी भवाब्धिभेदपालिनी।
भवाब्धिभेदरचना भवाब्धिभेदरक्षिता॥ १७४॥

भवाब्धिभेदनियता भवाब्धिभेदनिस्पृहा।
भवाब्धिभेदरचना भवाब्धिभेदरोषिता॥ १७५॥

भवाब्धिभेदराशिघ्नी भवाब्धिभेदराशिनी।
भवाब्धिभेदकर्मेशी भवाब्धिभेदकर्मिणी॥ १७६॥

भद्रेशी भद्रजननी भद्रा भद्रनिवासिनी।
भद्रेश्वरी भद्रवती भद्रस्था भद्रदायिनी॥ १७७॥

भद्ररूपा भद्रमयी भद्रदा भद्रभाषिणी।
भद्रकर्णा भद्रवेशा भद्राम्बा भद्रमन्दिरा॥ १७८॥

भद्रक्रिया भद्रकला भद्रिका भद्रवर्द्धिनी।
भद्रक्रीडा भद्रकला भद्रलीलाभिलाषिणी॥ १७९॥

भद्राङ्कुरा भद्ररता भद्राङ्गी भद्रमन्त्रिणी।
भद्रविद्या भद्रविद्या भद्रवाग्भद्रवादिनी॥ १८०॥

भूपमङ्गलदा भूपा भूलता भूमिवाहिनी।
भूपभोगा भूपशोभा भूपाशा भूपरूपदा॥ १८१॥

p. 217) भूपाकृतिर्भूपतिर्भूपश्रीर्भूपश्रेयसी।
भूपनीतिर्भूपरीतिर्भूपभीतिर्भयङ्करी॥ १८२॥

भवदानन्दलहरी भवदानन्दसुन्दरी।
भवदानन्दकरणी भवदानन्दवर्द्धिनी॥ १८३॥

भवदानन्दरमणी भवदानन्ददायिनी।
भवदानन्दजननी भवदानन्दरूपिणी॥ १८४॥

य इदम्पठते स्तोत्रम्प्रत्यहम्भक्तिसँयुतः।
गुरुभक्तियुतो भूत्वा गुरुसेवापरायणः॥ १८५॥

सत्यवादी जितेन्द्री च ताम्बूलपूरिताननः।
दिवा रात्रौ च सन्ध्यायां स भवेत्परमेश्वरः॥ १८६॥

स्तवमात्रस्य पाठेन राजा वश्यो भवेद्ध्रुवम्।
सर्वागमेषु विज्ञानी सर्वतन्त्रे स्वयं हरः॥ १८७॥

गुरोर्मुखात्समभ्यस्य स्थित्वा च गुरुसन्निधौ।
शिवस्थानेषु सन्ध्यायां शून्यागारे चतुष्पथे। १८८॥

यः पठेच्छृणुयाद्वाषि स योगी नात्र संशयः।
सर्वस्वन्दक्षिणान्दद्यात्स्त्रीपुत्रादिकमेव च॥ १८९॥

स्वच्छन्दमानसो भूत्वा स्तवमेतत्समुद्धरेत्।
एतत्स्तोत्ररतो देवि हररूपो न संशयः॥ १९०॥

यः पठेच्छृणुयाद्वापि एकचित्तेन सर्वदा।
स दीर्घायुः सुखी वाग्गमी वाणी तस्य न संशयः॥ १९१॥

गुरुपादरतो भूत्वा कामिनीनाम्भवेत्प्रियः।
धनवान् गुणवाञ्श्रीमान् धीमानिव गुरुः प्रिये॥ १९२॥

सर्वेषान्तु प्रियो भूत्वा पूजयेत्सर्वदा स्तवम्।

मन्त्रसिद्धिः करस्थैव तस्य देवि न संशयः॥ १९३॥

कुबेरत्वम्भवेत्तस्य तस्याधीना हि सिद्धयः।
मृतपुत्रा च या नारी दौर्भाग्यपरिपीडिता॥ १९४॥

वन्ध्या वा काकवन्ध्या वा मृतवत्सा च याऽङ्गना।
धनधान्यविहीना च रोगशोकाकुला च या॥ १९५॥

ताभिरेतन्महादेवि भूर्जपत्रे विलेखयेत्।
सव्ये भुजे च बध्नीयात्सर्वसौख्यवती भवेत्॥ १९६॥

एवम्पुनः पुनः प्रायाद्दुःखेन परिपीडिता।
सभायां व्यसने व्वाणी विवादे शत्रुसङ्कटे॥ १९७॥

p. 218) चतुरङ्गे तथा युद्धे सर्वत्रापदि पीडिते।
स्मरणादस्य कल्याणि संशयँय्याति दूरतः॥ १९८॥

न देयम्परशिष्याय नाभक्ताय च दुर्जने।
दाम्भिकाय कुशीलाय कृपणाय सुरेश्वरि॥ १९९॥

दद्याच्छिष्याय शान्ताय विनीताय जितात्मने।
भक्ताय शान्तियुक्ताय जपपूजारताय च॥ २००॥

जन्मान्तरसहस्रैस्तु वर्णितुन्नैव शक्यते।
स्तवमात्रस्य माहात्म्यँव्वक्रकोटिशतैरपि॥ २०१॥

विष्णवे कथितम्पूर्वं ब्रह्मणापि प्रियँवदे।
अधुनापि तव स्नेहात्कथितम्परमेश्वरि॥ २०२॥

गोपितव्यम्पशुभ्यश्च सर्वथा च प्रकाशयेत्॥ २०३॥

इति श्रीमहातन्त्रार्णवे ईश्वरपार्वतीसँवादे
भुवनेश्वरीभकारादिसहस्रनामस्तोत्रं समाप्तम्॥

इति शाक्तप्रमोदे भुवनेश्वरीतन्त्रं समाप्तम्॥

श्रीः
शिवहरराजधानीपतिश्रीराजादेवनन्दनसिंह-

बहादुरनराधिपसंगृहीतविरचित-

शाक्तप्रमोदान्तर्गतं

पञ्चमं

छिन्नमस्तातन्त्रम्

उक्तराजगुरुवंश्यपण्डितश्रीरघुराजदुबेजीद्वारा
संशोधितम्

तदेतत्

श्रीकृष्णदासात्मज खेमराजेन
स्वकीये श्रीवेंकटेश्वर यन्त्रालये
मुद्रयित्वा प्रकाशितम्

बोम्ब-ई

छिन्नमस्तातन्त्रम्

अथ छिन्नमस्ताध्यानम्

प्रत्यालीढपदां सदैव दधतीञ्छिन्नं
शिरःकर्तृकान्दिग्वस्त्रां
स्वकबन्धशोणितसुधाधाराम्पिबन्तीम्मुदा।
नागाबद्धशिरोमणिन्त्रिनयनां हृद्युत्पलालङ्कृतां
रत्यासक्तमनोभवोपरिदृढान्ध्यायेज्जवासन्निभाम्॥

दक्षे चातिसिताविमुक्तचिकुराकर्त्रीन्तथा खप्परं हस्ताभ्यान्दधती
रजोगुणभवा नाम्नापि सा वर्णिनी।
देव्याश्छिन्नकबन्धतः पतद्सृग्धाराम्पिबन्ती मुदा
नागाबद्धशिरोमणिर्मनुविदा ध्येया सदा सा सुरैः॥

प्रत्यालीढपदा कबन्धविगलद्रक्तम्पिबन्ती मुदा सैषा या प्रलये
समस्तभुवनं भोक्तुं क्षमा तामसी।
शक्तिः सापि परात्परा भगवती नाम्ना परा डाकिनी ध्येया
ध्यानपरैः सदा सविनयं भक्तेष्टभूतिप्रदा॥

p. 222) अथ यन्त्रोद्धारः

त्रिकोणँव्विन्यसेदादौ तन्मध्ये मण्डलत्रयम्।
तन्मध्ये विन्यसेद्योनिन्द्वारत्रयसमन्विताम्॥
बहिरष्टदलम्पद्मम्भूबिम्बत्रितयम्पुनः।
कूर्च्चबीजँल्लिखेन्मध्ये त्रिकोणे फड्वमन्वितम्॥

अथ मन्त्रोद्धारः

लक्ष्मीः प्रथमबीजेऽस्ति लज्जाबीजे मनोभवः॥
तृतीयेऽस्मिन्सदा देवी महापातकनाशिनी॥
चतुर्थे तु गुणातीता मुक्तिविद्याप्रदायिका।
वकारे वरुणः साक्षाज्जकारे तु सुराधिपः॥
रेफे हुताशनो देवो वकारे वसुधाधिपः।
ऐकारे त्रिपुरादेवी रेफे त्रिपुरसुन्दरी॥
त्रैलोक्यविजया देवी सदैवौकारसंस्थिता।
चक्रारे चन्द्रमा देवो नकारे हि विनायकः॥
ईकारे कमला साक्षाद्यकारे च सरस्वती।
मायायुग्मे सदा देवी प्रकृत्या सह सङ्गता॥
वैखरी चैव फड्कारे स्वाकारे कुसुमायुधः।

हाकारे च रतिस्तिष्ठेदेवं मन्त्रसमुच्चये॥

अथ मन्त्रः

॥ श्रीं ह्रीं क्लीं ऐं वज्रवैरोचनीये हूं हूं फट् स्वाहा॥

p. 223) अथ पूजाविधिः

प्रातः कृत्यादिकङ्कृत्वा मन्त्राचमनङ्कुर्य्यात्॥ यथा॥

लक्ष्मीमायाकूर्चबीजैस्त्रिभिः पीत्वाम्बुसाधकः॥
वाग्भवेनोष्ठौ सम्मृज्य मायाभ्यान्तु द्विरुन्मृजेत्॥
कूर्चेन क्षालयेत्पाणी एभिर्म्मन्त्रैश्च विन्यसेत्॥
श्रीमायाकूर्चवाक्कामत्रिपुटाभगवर्णकैः॥
कामकलाङ्कुशाभ्याञ्च वक्त्रनासाक्षिकर्णकान्॥
नाभिहृन्मस्तकञ्चांसौ स्पृष्ट्वा शम्भुर्भवेत्क्षणात्॥
आचम्यैवञ्छिन्नमस्तँव्वत्सरात्ताम्प्रपश्यति।
ततः प्राणायामान्तँव्विधाय षोढान्यासङ्कुर्यात्॥
मन्त्रषोढान्ततः कुर्यात्त्रैलोक्यवशकारिणीम्॥
श्रीबालात्रिपुटायोनि प्रासादप्रणवैस्तथा॥

कालीवध्वङ्कुशैः कामकलाकूर्चास्त्रकैः क्रमात्॥

षोडशी मनुवर्णैश्च पृथगष्टादशाक्षरी॥

एभिर्बीजैर्मातृकार्णां स्वेषु स्थानेषु विन्यसेत्॥

एषा ब्रह्मस्वरूपा हि बीजषोढा प्रकीर्त्तिता॥

अस्याः संन्यसनात्सर्वे वज्रदेहा भवन्ति हि॥

सर्वैश्वर्ययुतास्ते हि जीवन्मुक्ता दशाब्दतः॥

ततः ऋष्यादिन्यासः॥

अस्य मन्त्रस्य भैरव ऋषिः सम्राड्छन्दः छिन्नमस्ता देवता

हूंकारद्वयं बीजं स्वाहा शक्तिरभीष्टार्थसिद्धये विनियोगः।

यथा॥

शिरसि भैरवऋषयेनमः।

मुखे सम्राड्छन्दसेनमः।

हृदि च्छिन्नमस्तादेवतायैनमः गुह्ये हूंहूंबीजायनमः

पादयोः स्वाहाशक्तयेनमः॥

ततः कराङ्गन्यासौ।

ओं आंखङ्गायहृदयायस्वाहा इति कनीयस्योः।

ओं-ईंसुखङ्गायशिरसेस्वाहा इतिपवित्राङ्गुल्योः।

ओं-ऊँउवज्रायशिखायैस्वाहा इतिमध्यमयोः।

ओं-ऐंपाशायकवचायस्वाहा इतितर्ज्जन्योः।

ओं-औं-अङ्कुशायनेत्रत्रयायस्वाहा इत्यङ्गुष्ठयोः।

ओं-अः सुरक्षारक्षासुरक्षायास्त्रायफट् इतिकरतलकरपृष्ठयोः।

एवं हृदयादिषु॥

तदुक्तम्भैरवतन्त्रे॥

उच्चेरत्पूर्वमाकारम्बिन्दुलाञ्छितमस्तकम्॥

खङ्गाय हृदयायेति स्वाहा युक्तङ्कनीयसि॥

p. 224) ईंकारञ्च ततो देवि चन्द्रकोटिसमप्रभम्॥

सुखङ्गाय ततो वाच्यं शिरसे तदनन्तरम्॥

स्वाहायुक्तन्ततो वाच्यम्पवित्राङ्गुलिसँयुतम्॥

ॐकारञ्च ततो वाच्यम्बिन्दुलाञ्छितमस्तकम्॥

सुवज्राय ततो वाच्यं शिखायै तदनन्तरम्॥

स्वाहान्तम्मध्यमायाञ्च विन्यसेत्तदनन्तरम्॥

मात्रान्द्वादशिकान्देवीं व्विन्यसेच्च ततः परम्॥

पाशायेति समुच्चार्य प्रवदेत्कवचाय च॥

स्वाहान्तँव्विन्यसेन्मन्त्रन्तर्ज्जन्यान्तदनन्तरम्॥

ओंकारञ्च ततो देवि चाङ्कुशन्तदनन्तरम्॥

नेत्रत्रयायस्वाहान्तमङ्गुष्ठे करयो द्वयोः॥

अकारञ्च विसर्गान्तं सुरक्षारक्षसँयुतम्।

अःसुरक्षायसँयुक्तमस्त्रायेति ततः परम्॥

षडक्षरसमायुक्तँव्विन्यसेत्करयोर्द्वयोः॥

हृदि मूर्ध्नि शिखायाञ्च कवचे नेत्रमण्डले॥

यावदस्त्रञ्चतुर्द्दिक्षु विदिक्षु च यथाक्रमम्।

त्रिशक्तितन्त्रे भैरववाक्यम्॥

उच्चरेत्प्रणवम्पूर्वमाकारम्बिन्दुसँउतम्॥

इत्यादिवाक्यात् कराङ्गेषु प्रणवसंवलितो न्यासः॥

ततो मूलेन मस्तकादिपादपर्यन्तम्पादादिमस्तकपर्यन्तँ

व्वारत्रयन्न्यसेत्॥

ततो ध्यानम्

स्वनाभौ नीरजन्ध्यायेदर्द्धं व्विकसितं सितम्।
तत्पद्मकोशमध्ये तु मण्डलञ्चण्डरोचिषः॥
जपाकुसुमसङ्काशं रक्तबन्धूकसन्निभम्॥
रजःसत्त्वतमोरेखा योनिमण्डलमण्डितम्॥
मध्ये तु ताम्महादेवीं सूर्यकोटिसमप्रभाम्॥
छिन्नमस्ताङ्करे वामे धारयन्तीं स्वमस्तकम्॥
प्रसारितमुखीन्देवींल्लेलिहानाग्रजिह्विकाम्॥
पिबन्तीं रौधिरीन्धारान्निजकण्ठविनिर्गताम्।
विकीर्णकेशपाशाञ्च नानापुष्पसमन्विताम्॥
दक्षिणे च करे कर्त्रीम्मुण्डमालाविभूषिताम्॥
दिगम्बराम्महाघोराम्प्रत्यालीढपदे स्थिताम्॥
अस्थिमालाधरान्देवीन्नागयज्ञोपवीतिनीम्॥
रतिकामोपरिष्ठाञ्च सदा ध्यायन्ति मन्त्रिणः॥
सदा षोडशवर्षीयाम्पीनोन्नतपयोधराम्॥
विपरीतरतासक्तौ ध्यायेद्रतिमनोभवौ॥
डाकिनीवर्णिनीयुक्तँव्वामदक्षिणयोगतः॥

p. 225) देवीगलोच्छलद्रक्तधारापानम्प्रकुर्व्वतीम्॥

वर्णिनीलोहितां सौम्याम्मुक्तकेशीन्दिगम्बराम्॥

कपालकर्तृकाहस्ताँव्वामदक्षिणयोगतः॥

नागयज्ञोपवीताढ्याज्ज्वलत्तेजोमयीमिव॥

प्रत्यालीडपदाँव्विद्यान्नानालङ्कारभूषिताम्॥

सदा द्वादशवर्षीयामस्थिमालाविभूषिताम्॥

डाकिनीँव्वामपार्श्वे तु कल्पसूर्यानलोपमाम्॥

विद्युज्जटान्त्रिनयनान्दन्तपङ्क्तिबलाकिनीम्॥

दंष्ट्राकरालवदनाम्पीनोन्नतपयोधराम्॥

महादेवीम्महाघोराम्मुक्तकेशीन्दिगम्बराम्॥

लेलिहानमहाजिह्वाम्मुण्डमालाविभूषिताम्॥

कपालकर्तृकाहस्ताँव्वामदक्षिणयोगतः॥

देवीङ्गलोच्छलद्रक्तधारापानम्प्रकुर्वतीम्॥

करस्थितकपालेन भीषणेनातिभीषणाम्॥

आभ्यान्निषेवमाणान्तान्ध्यायेद्देवीं व्विचक्षणः॥

ध्यानस्यावश्यकत्वमाह तन्त्रे॥

प्रचण्डचण्डिकामेवमध्यात्वा यस्तु पूजयेत्॥

सद्यस्तस्य शिरश्छित्त्वा देवी पिबति शोणितम्॥

पिबति तेन मुखेनेति शेषः।

तथा च।

स्वमस्तकं सखर्परं रक्तधाराभिपूरितम्॥
ललज्जिह्वम्महाभीमन्धृतँव्वामभुजे तथा॥

इति भैरवतन्त्रे॥ तत्रैव।

सितङ्कुर्याद्दलम्पूर्वमाग्नेयं रक्तवर्णकम्॥
याम्यङ्कृष्णमतः पीतं शुक्लं रक्तं सितासितम्॥
ततः पीताम्प्रकुर्वीत कर्णिकान्तस्य मध्यगाम्॥
तन्मध्ये तु प्रकुर्वीत मण्डलञ्चण्डरोचिषः॥
रजःसत्त्वतमोरेखा रक्ता शुक्लाऽसिता क्रमात्॥
मायायुग्मन्ततो न्यस्य षडक्षरसमन्वितम्॥
बाह्यन्तस्य च चक्रस्य कुर्यात्प्राकारवेष्टितम्॥
पूर्वं रक्तन्ततः कृष्णं सितम्पीतँय्यथाक्रमम्॥
चतुर्द्वारसमायुक्तङ्क्षेत्रपालैरधिष्ठितम्॥

इत्यस्याः पूजायन्त्रम्॥ यथा वा॥

त्रिकोणँव्विन्यसेदादौ तन्मध्ये मण्डलत्रयम्॥

तन्मध्ये विन्यसेद्योनिन्द्वारत्रयसमन्विताम्॥

बहिरष्टदलम्पद्मम्भूबिम्बत्रितयम्पुनः॥

कूर्चबीजँल्लिखेन्मध्ये त्रिकोणे फट्त्रमन्वितम्॥

यद्वा एतद्ध्यानोक्तँय्यन्त्रम्॥

p. 226) तथाच॥

अपरञ्च प्रवक्ष्यामि शृणु देवि यथाक्रमम्॥

स्वनाभौ नीरजं ध्यायेद्भानुमण्डलसन्निभम्॥

योनिचक्रसमायुक्तङ्गुणत्रितयसंज्ञितम्॥

तत्र मध्ये महादेवीञ्छिन्नमस्तां स्मरेद्यतिः॥

प्रदीपकलिकाकारामद्वितीयव्यवस्थिताम्॥

योनिमुद्रासमायुक्तां हृदयस्थितलोचनाम्॥

ध्येयमेतद्यतीनाञ्च गृहस्थान्नान्निशामय॥ यथा।

अन्तरे स्वशरीरस्य नाभिनीरजसङ्गताम्॥

निर्ल्लेपान्निर्गुणां सूक्ष्माम्बालचन्द्रसमप्रभाम्॥

समाधिमात्रगम्यां तु गुणत्रितयवेष्टिताम्॥

कलातीताङ्गुणातीताम्मुक्तिमात्रप्रदायिनी॥

एवन्ध्यात्वा मानसैः सम्पूज्य तारिणीवच्छङ्खस्थापनङ्कुर्यात्॥

ततः पीठपूजा॥

आधारशक्तयेनमः प्रकृतयेनमः कूर्माय० अनन्ताय० पृथिव्यै०
क्षीरसमुद्राय० रत्नद्वीपाय० कल्पवृक्षाय०। तदधः
स्वर्णसिंहासनाय० आनन्दकन्दाय० सम्बिल्वलाय०
सर्वतत्त्वात्मकपद्माय० संसत्त्वाय० रंरजसे० तंतमसे० आँ
आत्मने० अं-अन्तरात्मने० पंपरात्मने० ह्रींज्ञानात्मनेनमः।
पद्ममध्ये रतिकामार्त्ता। भैरवमते तु। आधारशक्तिङ्कूर्मन्तु
नागराजमतः परम्॥ पद्मनालञ्च पद्मञ्च पूजयेन्मन्त्रविन्नरः
॥ मण्डलञ्चतुरस्रन्तु रजस्सत्त्वन्तमस्तथा॥ रतिकामौ च सम्पूज्य
शक्तिपूजां समाचरेत्॥
रतिकामोपरि वज्रवैरोचनीये देहि २, एहि २, गृह्ण २, मम सिद्धिन्देहि २,
मम शत्रून् मारय २, करालिके हूँफट्वाहा इति पीठमन्त्रस्सर्वत्र
प्रणवादिनमोन्तेन पूजयेत्॥ पुनर्ध्यात्वाऽवाहयेत्
सर्वसिद्धिवर्णनीये सर्वसिद्धिडाकिनीये वज्रवैरोचनीये इहावह-आवह॥
पुनस्तन्मन्त्रमुच्चार्य इहतिष्ठ २, इह सन्निधेहि, इह सन्निरुध्यस्व
इत्यनेनावाह्य ॐ आँह्रीं क्रों हं सः इत्यनेन प्राणप्रतिष्ठां

कृत्वा। ॐ आंषडङ्गायहृदयायस्वाहा॥ इत्यादिना षडङ्गँ
व्विन्यस्य यथाशक्ति पूजाङ्कृत्वा बलिन्दद्यात्। तथा। वज्रवैरोचनीये

p. 227) देहि २, एहि २, गृह्ण २, बलिम्मम सिद्धिन्देहि २, मम शत्रून्मारय
मारय, करालिके हूँफट् स्वाहा॥ २ इतिमन्त्रेण ततो देव्या दक्षिणे
ॐवर्णिन्यैनमः वामे ॐ डाकिन्यै०॥ ततो देव्यङ्गे षडङ्गं
सम्पूज्य दक्षिणे ॐशङ्खनिधयेनमः, वामे ॐपद्मनिधयेनमः,
पूर्वादिदिक्षु लक्ष्मीं लजाम्मायाँव्वाणीञ्च पूजयेत्। विदिक्षु
ब्रह्मविष्णुरुद्रेश्वरान्, मध्ये सदाशिवं, सर्वत्र
प्रणवादिनमोन्तेन पूजयेत्। ततः पञ्चपुष्पाञ्जलीन्दत्वा
आवरणान्पूजयेत्॥ अग्नीशासुरवायुषु मध्ये दिक्षु च ॐ
आँहङ्गायहृदयायस्वाहा इत्यादिना षडङ्गानि सम्पूज्य
अष्टपत्रेषु पूर्वादिक्रमेण ॐह्रींकाल्यैनमः एवं वर्णिन्यै०
डाकिन्यै० भैरव्यै० महाभैरव्यै० इन्द्राक्ष्यै० पिङ्गाक्ष्यै०
संहारिण्यै०। सर्वत्र प्रणवादिनमोन्तेन पूजयेत्। यथा
एकान्नामाभिधाङ्कालीँव्वर्णिनीण्डाकिनीन्तथा। भैरवीञ्च
महापूर्वाम्भैरवीन्तदनन्तरम्॥ इन्द्राक्षीञ्च सपिङ्गाक्षीन्ततः
संहारकारिणीम्॥ पूर्वादिके दले पूज्याः शक्तयश्च यथाक्रमम्॥
प्रणवादिनमोन्तेन लज्जाबीजं समुच्चरन्॥ पद्ममध्ये
हूँऊँहट्नमः स्वाहानमः देव्या दक्षिणे सम्राड्छन्दसेनमः,

देव्या उत्तरे सर्ववर्णेभ्योनमः, पुनर्द्दक्षिणे ॐबीजशक्तिभ्यान्नमः
। पद्माग्रेषु पूर्वादिक्रमेण ब्राह्म्यै० माहेश्वर्यै० वैष्णव्यै०
वाराह्यै० इन्द्राण्यै० चामुण्डायै० महालक्ष्म्यै० सर्वत्र
प्रणवादिनमोन्तेन पूजयेत्। ततश्चतुर्द्दिक्षु द्वारेषु ॐकरालायनमः
विकरालायनमः। एवं अतिकरालाय० महाकरालाय०॥ यथा भैरवीये
। पूर्वद्वारे करालञ्च विकरालञ्च दक्षिणे॥ पश्चिमेऽतिकरालञ्च
महाकरालमुत्तरे॥ ततो धूपादिविसर्ज्जनान्तङ्कर्म समापयेत्।
विसर्ज्जने त्वयँव्विशेषः। संहारमुद्राम्प्रदर्श्य अञ्जलावारोप्य
वामनासापुटेन। योनिमुद्रासमारूढाम्प्रदीपकलिकोज्ज्वलाम्॥
कृष्णपक्षे विधुमिव क्रमेण क्षीणताङ्गताम्॥

p. 228) इमम्मन्त्रं समुच्चार्य चण्डरश्मिन्निवेशयेत्॥ उत्तरे शिखरे
इत्यादि। अस्य पुरश्चरणं लक्षजपः सिद्धविद्यात्वात्। बलिदाने तु
भैरवीये। रात्रौ बलिः प्रदातव्यो मत्स्यमांससुरादिभिः॥ अथवा
मधुपानाद्यैर्मधुरैर्विभवक्रमैः॥ मन्त्रस्तु।
उच्चरेत्प्रणवम्पूर्वं सर्वसिद्धिप्रदेऽन्वितम्॥
वर्णिनीये ततो वाच्यं सर्वसिद्धिप्रदे ततः॥
डाकिनीये ततो वाच्यन्देवीनाम ततः परम्॥
एह्येहीति ततो वाच्यमिमम्बलिमनन्तरम्॥
गृह्ण गृह्ण ततः प्रोक्त्वा मम सिद्धिमनन्तरम्॥

देहि देहीति माया च ततः फट्ताहया युतः॥

बलिमन्त्रः समाख्यातः पूजितोऽयं सुरेश्वरि॥ इति पूजा॥

अथ स्तोत्रम्

ईश्वर उवाच

स्तवराजमहँव्वन्दे वैरोचन्याः शुभप्रदम्।

नाभौ शुभ्रारविन्दन्तदुपरि विलसन्मण्डलञ्चण्डरश्मेः

संसारस्येकसारान्त्रिभुवनजननीन्धर्मकामार्त्थदात्रीम्।

तस्मिन्मध्ये त्रिभागे त्रितयतनुधराञ्छिन्नमस्ताम्प्रशस्तान्ताँ

व्वन्दे छिन्नमस्तां शमनभयहराँय्योगिनीँय्योगमुद्राम्॥ १॥

नाभु

शुद्धसरोजवक्रविलसद्वन्धूकपुष्पारुणम्भास्वद्भास्करमण्डल

न्तदुदरे तद्योनिचक्रम्महत्।

तन्मध्ये

विपरीतमैथुनरतप्रद्युम्नसत्कामिनीपृष्ठस्थान्तरुणार्ककोटिविलसत्ते

जःस्वरूपाम्भजे॥ २॥

वामे छिन्नशिरोधरान्तदितरे पाणौ

महत्कर्तृकाम्प्रत्यालीढपदान्दिगन्तवसनामुन्मुक्तकेशव्रजाम्।

छिन्नात्मीयशिरस्समुच्छलदसृग्धाराम्पिबन्तीम्परम्बालादित्यसमप्र्

अकाशविलसन्नेत्रत्रयोद्भासिनीम्॥ ३॥

वामादन्यत्र नालम्बहु

गहनगलद्रक्तधाराभिरुच्चैर्गायन्तीमस्थिभूषाङ्करकमललसत्कर्त्।

र्कामुग्ररूपाम्।

रक्तामारक्तकेशीमपगतवसनाँ

व्वर्णिनीमात्मशक्तिम्प्रत्यालीढोरुपादामरुणितनयनाँय्योगिनीँ

योगनिद्राम्॥ ४॥

p. 229)

दिग्वस्त्राम्मुक्तकेशीम्प्रलयघनघटाघोररूपाम्प्रचण्डान्दंष्ट्र

आदुः प्रेक्ष्य वक्त्रोदरविवरलसल्लोलजिह्वाग्रभासाम्।

विद्युल्लोलाक्षियुग्मां हृदयतटलसद्भोगिनीम्भीममूर्त्तिं

सद्यश्छिन्नात्मकण्ठप्रगलितरुधिरैर्ड्डाकिनीँव्वर्द्धयन्तीम्॥ ५॥

ब्रह्मेशानाच्युताद्यैः शिरसि विनिहिता

मन्दपादारविन्दैराप्तर्योगीन्द्रमुख्यैः

प्रतिपदमनिशञ्चिन्तिताञ्चिन्त्यरूपाम्।

संसारे

सारभूतान्त्रिभुवनजननीञ्छिन्नमस्ताम्प्रशस्तामिष्टान्तामिष्टदात्

रीङ्कलिकलूषहराञ्चेतसा चिन्तयामि॥ ६॥

उत्पत्तिस्थितिसंहृतीर्घटयितुन्धत्ते त्रिरूपान्तनुन्त्रैगुण्याज्जगतो

यदीयविकृतिर्ब्रह्माच्युतः शूलभृत्।

तामाद्याम्प्रकृतिं स्मरामि मनसा सर्वार्त्थसंसिद्धये यस्याः

स्मेरपदारविन्दयुगले लाभम्भजन्ते नराः॥ ७॥

अभिलषितपरस्त्रीयोगपूजापरोऽहम्बहुविधजनभावारम्भसम्भावित्

ओऽहम्।

पशुजनविरतोऽहम्भैरवीसंस्थितोऽहङ्गुरुचरणपरोऽहम्भैरवोऽह।

म् शिवोऽहम्॥ ८॥

इदं स्तोत्रम्महापुण्यम्ब्रह्मणा भाषितम्पुरा।

सर्वसिद्धिप्रदं साक्षान्महापातकनाशनम्॥ ९॥

यः पठेत्प्रातरुत्थाय देव्यास्सन्निहितोऽपि वा।

तस्य सिद्धिर्ब्भवेद्देवि वाञ्छितार्त्थप्रदायिनी॥ १०॥

धनन्धान्यं सुतज्ञायां हयं हस्तिनमेव च।
वसुन्धराम्महाविद्यामष्टसिद्धिँलभेद्ध्रुवम्॥ ११॥

वैयाघ्राजिनरञ्जितस्वजघनेऽरण्ये प्रलम्बोदरे
खर्वेऽनिर्वचनीयपर्वसुभगे मुण्डावलीमण्डिते।
कर्त्रीङ्कुन्दरुचिँव्विचित्रवनिताज्ञाने दधाने पदे
मातर्भक्तजनानुकम्पिनि महामायेऽस्तु तुभ्यन्नमः॥ १२॥

इति छिन्नमस्तास्तोत्रं समाप्तम्॥

अथ कवचम्

श्रीदेव्युवाच

कथिताश्छिन्नमस्तायाः या या विद्यास्सुगोपिताः।
त्वया नाथेन जीवेश श्रुताश्चाधिगता मया॥ १॥

इदानीं श्रोतुमिच्छामि कवचं पूर्वसूचितम्।
त्रैलोक्यविजयन्नाम कवचङ्कथ्यताम्प्रभो॥ २॥

p. 230) भैरव उवाच

श्रृणु वक्ष्यामि देवीशि सर्वदेवनमस्कृते।
त्रैलोक्यविजयन्नाम कवचं सर्वमोहनम्॥ ३॥

सर्वविद्यामयं साक्षात्सुरासुरजयप्रदम्।
धारणात्पठनादीशस्त्रैलोक्यविजयी विभुः॥ ४॥

ब्रह्मा नारायणो रुद्रो धारणात्पठनाद्यतः।
कर्त्ता पाता च संहर्त्ता भुवनानां सुरेश्वरि॥ ५॥

न देयं परशिष्येभ्य अभक्तेभ्यो विशेषतः।
देयं शिष्याय भक्ताय प्राणेभ्योऽप्यधिकाय च॥ ६॥

देव्याश्च च्छिन्नमस्तायाः कवचस्य च भैरवः।
ऋषिर्विराट् च च्छन्दश्च देवता छिन्नमस्तका॥ ७॥

त्रैलोक्यविजये मुक्तौ विनियोगः प्रकीर्त्तितः।
ओंहूँआरो मे शिरः पातु च्छिन्नमस्ता बलप्रदा॥ ८॥

ह्रीं ह्रीं ऐंत्र्यक्षरी पातु भालवक्रं दिगम्बरी।
श्रींह्रींहूँइं दृशौ पातु मुण्डङ्कर्तृधरापि सा॥ ९॥

सा विद्या प्रणवाद्यन्ता श्रुतियुग्मं सदाऽवतु।
वज्रवैरोचनीयेहूँहङ्काहा च भ्रुवादिकम्॥ १०॥

घ्राणम्पातु च्छिन्नमस्ता मुण्डकर्तृविधारिणी।
श्रीमायाकूर्चवाग्बीजैर्वज्रवैरोचनीये हूं॥ ११॥

हूंफट्काहा महाविद्या षोडशी ब्रह्मरूपिणी।
स्वपार्श्वे बालिका चासृग्धाराम्पाययती मुदा॥ १२॥

वदनं सर्वदा पातु च्छिन्नमस्ता स्वशक्तिका।
मुण्डकर्तृधरारक्ता साधकाभीष्टदायिनी॥ १३॥

वर्णिनी डाकिनीयुक्ता सापि मामभितोऽवतु।
रामाद्या पातु जिह्वाञ्च लज्जाद्या पातु कण्ठकम्॥ १४॥

कूर्चाद्या हृदयम्पातु वागाद्या स्तनयुग्मकम्।
रमया पुटिता विद्या पार्श्वे पातु सुरेश्वरी॥ १५॥

मायया पुटिता विद्या नाभिदेशन्दिगम्बरी।
कूर्चेन पुटिता देवी पृष्ठदेशं सदावतु॥ १६॥

वाग्बीजपुटिता तेषाम्मध्यम्पातु सशक्तिका।
ईश्वरीकूर्चवाग्बीजे वज्रवैरोचनीये हूं॥ १७॥

हूंफट्स्वाहा महाविद्या सूर्यकोटिसमप्रभा।
छिन्नमस्ता सदा पायादूरुयुग्मं सशक्तिका॥ १८॥

p. 231) ह्रींहूंवर्णिनी जानू श्रींहंह्रींहूं च डाकिनीपदम्।
सर्वविद्यास्थिता नित्या सर्वाङ्गम्मे सदावतु॥ १९॥

प्राच्याम्पायादेकलिङ्गा योगिनी पावकेऽवतु।
डाकिनी दक्षिणे पातु श्रीमहाभैरवी च माम्॥ २०॥

नैर्ऋत्यां सततम्पातु भैरवी पश्चिमेऽवतु।
इन्द्राणी पातु वायव्येऽसिताङ्गी पातु चोत्तरे॥ २१॥

संहारिणी सदा पातु शिवकोणे सकर्तृका।

इत्यष्टशक्तयः पान्तु दिग्विदिक्षु सकर्तृकाः॥ २२॥

क्रींक्रींक्रीं सा पातु पूर्वे हूंहूं माम्पातु पावके।
ह्रींह्रीं मान्दक्षिणे पातु दक्षिणे कालिकाऽवतु॥ २३॥

क्रींक्रींक्रीं चैव नैर्ऋत्यां ह्रीं ह्रीं माम्पश्चिमेऽवतु।
ह्रीं ह्रीं पातु मरुत्कोणे स्वाहा पातु सदोत्तरे॥ २४॥

महाकाली खड्गहस्ता शिवकोणे सदाऽवतु।
तारामायावधूः कूर्चं फट्कारो मां महामनुः॥ २५॥

खड्गकर्तृधरा तारा चोर्द्धदेशं सदाऽवतु।
ह्रींश्रींहूंफट् च पाताले मां पातु चैकजटा सती॥ २६॥

तारा तु सहिता खेऽव्यान्महानीलसरस्वती।
इति ते कथितन्देव्याः कवचम्मन्त्रविग्रहम्॥ २७॥

यद्धृत्वा पठनाद्धीमः क्रोधाख्यो भैरवः प्रभुः।
सुरासुरमुनीन्द्राणाङ्कर्त्ता हर्त्ता भवेत्स्वयम्॥ २८॥

यस्याज्ञया मधुमती याति सा साधकालयम्।
भूतिन्याद्याश्च योगिन्यो यक्षिण्याद्याश्च खेचराः॥ २९॥

आज्ञां गृह्णन्ति तास्तस्य कवचस्य प्रसादतः।
एतदेव परब्रह्म कवचम्मन्मुखोदितम्॥ ३०॥

देवीमभ्यर्च्च्य गन्धाद्यैर्म्मूलेनैव पठेत्सकृत्।
सँवत्सरकृतायाश्च पूजायाः फलमाप्नुयात्॥ ३१॥

भूर्ज्जे विलिखितञ्चैव गुटिकाङ्काञ्चनीस्थिताम्।
धारयेद्दक्षिणे बाहौ कण्ठे वा यदि वान्यतः॥ ३२॥

सर्वैश्वर्ययुतो भूत्वा त्रैलोक्यँव्वशमानयेत्।
तस्य गेहे वसेल्लक्ष्मीर्वाणी च वदनाश्रमे॥ ३३॥

ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्रे यान्ति सौम्यताम्।
इदङ्कवचमज्ञात्वा यो भजेच्छिन्नमस्तकाम्।
सोऽपि शस्त्रप्रहारेण मृत्युमाप्नोति सत्वरम्॥ ३४॥

p. 232) इतिश्रीभैरवतन्त्रे भैरवीभैरवसँवादे त्रैलोक्यविजयन्नाम

छिन्नमस्ताकवचं समाप्तम्॥

अथ हृदयम्

श्रीपार्वत्युवाच

श्रुतम्पूजादिकं सम्यग्भवद्वक्त्राब्जनिसृतम्।
हृदयञ्छिन्नमस्तायाश्रोतुमिच्छामि साम्प्रतम्॥

श्रीमहादेव उवाच

नाद्यावधि मया प्रोक्तङ्कस्यापि प्राणवल्लभे।
यत्त्वया परिपृष्टोहँव्वक्ष्ये प्रीत्यै तव प्रिये॥

ओमस्य श्रीछिन्नमस्ताहृदयस्तोत्रमन्त्रस्य भैरवऋषिस्सम्राट्-
छन्दश्छिन्नमस्ता देवता हूंबीजम् ॐशक्तिः ह्रींकीलकम्
शत्रुक्षयकरणार्त्थे पाठे विनियोगः॥

ॐहृदयायनमः ॐहूंशिरसेस्वाहा ॐह्रींशिखायैवषट्
ॐक्लींनेत्रत्रयायवौषट् ॐ-ऐंकवचायहुम् ॐहूं-अस्त्रायफट्॥

एवङ्करन्यासः॥ अथ ध्यानम्॥ रक्ताभां

रक्तकेशीङ्करकमललसत्कर्तृकां कालकान्तिँ

व्विच्छिन्नात्मीयमुण्डासृगरुणबहुलादग्रधाराम्पिबन्तीम्॥

विघ्नाभ्रौघप्रचण्डश्वसनसमनिभां सेवितां सिद्धसङ्घैः

पद्माक्षीञ्छिन्नमस्ताञ्छलकरदितिजच्छेदिनीं संस्मरामि॥ १॥

वन्देऽहञ्छिन्नमस्तान्ताञ्छिन्नमुण्डधराम्पराम्।

छिन्नग्रीवोच्छटाच्छन्नां क्षौमवस्त्रपरिच्छदाम्॥ १॥

सर्वदा सुरसङ्घेन सेविताङ्घ्रिसरोरुहाम्।

सेवे सकलसम्पत्त्यै छिन्नमस्तां शुभप्रदाम्॥ २॥

यज्ञानाँय्योगयज्ञाय यातु जाता युगे युगे।

दानवान्तकरी देवी छिन्नमस्ताम्भजामि ताम्॥ ३॥

वैरोचनीँव्वरारोहां वामदेवविवर्द्धिताम्।

कोटिसूर्यप्रभाँव्वन्दे विद्युद्वर्णाक्षिमण्डिताम्॥ ४॥

निजकण्ठोच्छलद्रक्तधारया या मुहुर्म्मुहुः।

योगिनीस्तर्पयन्त्युग्रा तस्याश्चरणमाश्रये॥ ५॥

हूमित्येकाक्षरं मन्त्रं यदीयँय्युक्तमानसः।

यो जपेत्तस्य विद्वेषी भस्मताँय्याति ताम्भजे॥ ६॥

हूंस्वाहेतिमनुं सम्यग्यः स्मरत्यार्तिमान्नरः।

छिनत्ति च्छिन्नमस्ता या तस्य बाधां नमामि ताम्॥ ७॥

p. 233) यस्याः कटाक्षमात्रेण क्रूरभूतादयो द्रुतम्।

दूरतस्सम्पलायन्ते छिन्नमस्तां भजामि ताम्॥ ८॥

क्षितितलपरिरक्षा क्षान्तरोषा सुदक्षा छलयुतखलकक्षा छेदने

क्षांतिलक्ष्या।

क्षितिदितिजसुपक्षा क्षोणिपाक्षय्यशिक्षा जयतु जयतु चाक्षा

छिन्नमस्तारिभक्षा॥ ९॥

कलिकलूषकलानां कर्त्तने कर्तृहस्ता सुरकुवलयकाशा

मन्दभानुप्रकाशा।

असुरकुलकलापत्रासिका कालमूर्त्तिर्जयतु जयतु काली छिन्नमस्ता कराली

॥ १०॥

भुवनभरणभूरिभ्राजमानानुभावा भवभवविभवानां
भारणोद्भातभूतिः।
द्विजकुलकमलानां भासिनी भानुमूर्त्तिर्ब्भवतु भवतु वाणी
छिन्नमस्ता भवानी॥ ११॥

मम रिपुगणमाशु च्छेत्तुमुग्रङ्कृपाणं सपदि जननि
तीक्ष्णञ्छिन्नमुण्डङ्गृहाण।
भवतु तव यशोलञ्छिन्धि शत्रून्खलान्मे मम च परिदिशेष्टं
छिन्नमस्ते क्षमस्व॥ १२॥

छिन्नग्रीवा छिन्नमस्ता छिन्नमुण्डधराक्षता।
क्षोदक्षेमकरी स्वक्षा क्षोणीशाच्छादनक्षमा॥ १३॥

वैरोचनी वरारोहा बलिदानप्रहर्षिता।
बलिपूजितपादाब्जा वासुदेवप्रपूजिता॥ १४॥

इति द्वादशनामानि छिन्नमस्ताप्रियाणि यः।
स्मरेत्प्रातस्समुत्थाय तस्य नश्यन्ति शत्रवः॥ १५॥

यां स्मृत्वा सन्ति सद्यस्सकलसुरगणास्सर्वदा सम्पदाढ्याः

शत्रूणां सङ्घमाहत्य विशदवदनास्स्वस्थचित्ताश्श्रयन्ति॥
तस्यास्सङ्कल्पवन्तस्सरसिजचरणं सन्ततं संश्रयन्ति साद्या
श्रीशादिसेव्या सुफलतु सुतरां छिन्नमस्ता प्रशस्ता॥ १६॥

हृदयमिदमज्ञात्वा हन्तुमिच्छति यो द्विषम्।
कथं तस्याचिरं शत्रुर्न्नाशमेष्यति पार्वति॥ १७॥

यदीच्छेन्नाशनं शत्रोश्शीघ्रमेतत्पठेन्नरः।
छिन्नमस्ता प्रसन्नापि ददाति फलमीप्सितम्॥ १८॥

शत्रुप्रशमनं पुण्यं समीप्सितफलप्रदम्।
आयुरारोग्यदञ्चैव पठतां पुण्यसाधनम्॥ १९॥

इति श्रीनन्द्यावर्त्ते महादेवपार्वतीसँवादे
श्रीछिन्नमस्ताहृदयस्तोत्रं सम्पूर्णम्॥

p. 234) अथाष्टोत्तरशतनाम

श्रीपार्वत्युवाच

नाम्नां सहस्रं परमं छिन्नमस्ताप्रियं शुभम्।
कथितम्भवता शम्भो सद्यश्शत्रुनिकृन्तनम्॥ १॥

पुनः पृच्छाम्यहन्देव कृपाङ्कुरु ममोपरि।
सहस्रनामपाठे च अशक्तो यः पुमान् भवेत्॥ २॥

तेन किम्पठ्यते नाथ तन्मे ब्रूहि कृपामय।

श्रीसदाशिव उवाच

अष्टोत्तरशतन्नाम्नाम्पठ्यते तेन सर्वदा॥ ३॥

सहस्रनामपाठस्य फलम्प्राप्नोति निश्चितम्।

ॐ अस्य श्रीछिन्नमस्ताष्टोत्तरशतनामस्तोत्रस्य
सदाशिवऋषिरनुष्टुप्छन्दः॥ श्रीछिन्नमस्ता देवता मम
सकलसिद्धिप्राप्तये जपे विनियोगः॥

ॐछिन्नमस्ता महाविद्या महाभीमा महोदरी।
चण्डेश्वरी चण्डमाता चण्डमुण्डप्रभञ्जिनी॥ ४॥

महाचण्डा चण्डरूपा चण्डिका चण्डखण्डिनी।
क्रोधिनी क्रोधजननी क्रोधरूपा कुहूः कला॥ ५॥

कोपातुरा कोपयुता कोपसंहारकारिणी।
वज्रवैरोचनी वज्रा वज्रकल्पा च डाकिनी॥ ६॥

डाकिनीकर्मनिरता डाकिनीकर्मपूजिता।
डाकिनीसङ्गनिरता डाकिनीप्रेमपूरिता॥ ७॥

खड्वाङ्गधारिणी खर्वा खड्गखर्परधारिणी।
प्रेताशना प्रेतयुता प्रेतसङ्गविहारिणी॥ ८॥

छिन्नमुण्डधरा छिन्नचण्डविद्या च चित्रिणी।
घोररूपा घोरदृष्टिर्घोरराव घनोदरी॥ ९॥

योगिनी योगनिरता जपयज्ञपरायणा।
योनिचक्रमयीयोनिर्योनिचक्रप्रवर्त्तिनी॥ १०॥

योनिमुद्रा योनिगम्या योनियन्त्रनिवासिनी।

यन्त्ररूपा यन्त्रमयी यन्त्रेशी यन्त्रपूजिता॥ ११॥

कीर्त्या कपर्द्दिनी काली कङ्काली कलविकारिणी।
आरक्ता रक्तनयना रक्तपानपरायणा॥ १२॥

भवानी भूतिदा भूतिर्भूतिदात्री च भैरवी।
भैरवाचारनिरता भूतभैरवसेविता॥ १३॥

भीमा भीमेश्वरीदेवी भीमनादपरायणा।
भवाराध्या भवनुता भवसागरतारिणी॥ १४॥

p. 235) भद्रकाली भद्रतनुर्भद्ररूपा च भद्रिका।
भद्ररूपा महाभद्रा सुभद्रा भद्रपालिनी॥ १५॥

सुभव्या भव्यवदना सुमुखी सिद्धसेविता।
सिद्धिदा सिद्धिनिवहा सिद्धा सिद्धनिषेविता॥ १६॥

शुभदा शुभगा शुद्धा सुद्धसत्त्वा शुभावहा।
श्रेष्ठादृष्टिमयीदेवी दृष्टिसंहारकारिणी॥ १७॥

शर्वाणी सर्वगा सर्वा सर्वमङ्गलकारिणी।

शिवा शान्ता शान्तिरूपा मृडानी मदनातुरा॥ १८॥

इति ते कथितन्देवि स्तोत्रम्परमदुर्ल्लभम्।

गुह्याद्गुह्यतरञ्चोप्यङ्गोपनीयम्प्रयत्नतः॥ १९॥

किमत्र बहुनोक्तेन त्वदग्रे प्राणवल्लभे।

मारणम्मोहनन्देवि ह्युच्चाटनमतः परम्॥ २०॥

स्तम्भनादिककर्माणि ऋद्धयस्सिद्धयोऽपि च।

त्रिकालपठनादस्य सर्वे सिद्ध्यन्त्यसंशयः॥ २१॥

महोत्तमं स्तोत्रमिदँव्वरानने मयेरितन्नित्यमनन्यबुद्धयः।

पठन्ति ये भक्तियुता नरोत्तमा भवेन्न तेषां रिपुभिः पराजयः॥ २२॥

इति श्रीछिन्नमस्ताष्टोत्तरशतनामस्तोत्रं समाप्तम्॥

अथ सहस्रनाम

श्रीदेव्युवाच

वद देव महादेव सर्वशास्त्रविदाँव्वर।
कृपाङ्कुरु जगन्नाथ कथयस्व मम प्रभो॥

प्रचण्डचण्डिका देवी सर्वलोकहितैषिणी।
तस्याश्च कथितं सर्वं स्तवञ्च कवचादिकम्॥

इदानीञ्छिन्नमस्ताया नाम्नां साहस्रकं शुभम्।
मे प्रकाशय देवेश कृपया भक्तवत्सल॥

शिव उवाच

शृणु देवि प्रवक्ष्यामि च्छिनायास्सुमनोहरम्।
गोपनीयम्प्रयत्नेन यदीच्छेदात्मनो हितम्॥

न वक्तव्यञ्च कुत्रापि प्राणैः कण्ठगतैरपि।
तच्छृणुष्व महेशानि सर्वन्तत्कथयामि ते॥

विना पूजाँव्विना ध्यानँव्विना जाप्येन सिद्ध्यति।
विना ध्यानन्तथा देवि विना भूतादिशोधनम्॥

पठनादेव सिद्धिः स्यात्सत्यं सत्यम्वरानने।
पुरा कैलासशिखरे सर्वदेवसभालये॥

p. 236) परिपप्रच्छ कथितं यथा शृणु वरानने।

अस्य श्रीप्रचण्डचण्डिकासहस्रनामस्तोत्रस्य भैरवऋषिः
सम्म्राट्छन्दः प्रचण्डचण्डिका देवता धर्मार्थकाममोक्षार्थे
जपे विनियोगः॥

प्रचण्डचण्डिका चण्डा चण्डदेव्यविनाशिनी।
चामुण्डा च सुचण्डा च चपला चारुदेहिनी॥

ललज्जिह्वा चलद्रक्ता चारुचन्द्रनिभानना।
चकोराक्षी चण्डनादा चञ्चला च मनोन्मदा॥

चेतना चितिसंस्था च चित्कलाज्ञानरूपिणी।
महाभयङ्करीदेवी वरदाभयधारिणी॥

भयाढ्या भयरूपा च भवबन्धविमोचिनी।
भवानी भुवनेशी च भवसंसारतारिणी॥

भवाब्धिर्ब्भवमोक्षा च भवबन्धविघातिनी।
भागीरथी भगस्था च भाग्यभोग्यप्रदायिनी॥

कमला कामदा दुर्गा दुर्गबन्धविमोचिनी।
दुद्दश्र्शना दुर्गरूपा दुर्ज्ञेया दुर्गनाशिनी॥

दीनदुःखहरा नित्या नित्यशोकनिवाशिनी।
नित्यानन्दमयी देवी नित्यङ्कल्याणकारिणी॥

सर्वार्त्थसाधनकरी सर्वसिद्धिस्वरूपिणी।
सर्वक्षोभनशक्तिश्च सर्वविद्राविणी परा॥

सर्वरञ्जनशक्तिश्च सर्वोन्मादस्वरूपिणी।
सर्वज्ञा सिद्धिदात्री च सिद्धिविद्यास्वरूपिणी॥

सकला निःकला सिद्धा कलातीता कलामयी।

कुलज्ञा कुलरूपा च चक्षुरानन्ददायिनी॥

कुलीना सामरूपा च कामरूपा मनोहरा।
कमलस्था कञ्जमुखी कुञ्जरेश्वरगामिनी॥

कुलरूपा कोटराक्षी कमलैश्वर्यदायिनी।
कुन्ती ककुद्मिनी कुल्ला कुरुकुल्ला करालिका॥

कामेश्वरी काममाता कामतापविमोचिनी।
कामरूपा कामसत्त्वा कामकौतुककारिणी॥

कारुण्यहृदया क्रींक्रींमन्त्ररूपा च कोटरा।
कौमोदकी कुमुदिनी कैवल्या कुलवासिनी॥

केशवी केशवाराध्या केशीदैत्यनिषूदिनी।
क्लेशहा क्लेशरहिता क्लेशसङ्घविनाशिनी॥

कराली च करालास्या करालासुरनाशिनी।
करालचर्मासिधरा करालकुलनाशिनी॥

p. 237) कङ्किनी कङ्कनिरता कपालवरधारिणी।
खड्गहस्ता त्रिनेत्रा च खण्डमुण्डासिधारिणी॥

खलहा खलहन्त्री च क्षरती खगती सदा।
गङ्गा गौतमपूज्या च गौरी गन्धर्ववासिनी॥

गन्धर्वा गगणाराध्या गणागन्धर्वसेविता।
गणत्कारगणा देवी निर्गुणा च गुणात्मिका॥

गुणता गुणदात्री च गुणगौरवदायिनी।
गणेशमाता गम्भीरा गगणाज्योतिकारिणी॥

गौराङ्गी च गयागम्या गौतमस्थानवासिनी।
गदाधरप्रिया ज्ञेया ज्ञानगम्या गुहेश्वरी॥

गायत्री च गुणवती गुणातीता गुणेश्वरी।
गणेशजननी देवी गणेशवरदायिनी॥

गणाध्यक्षनुता नित्या गणाध्यक्षप्रपूजिता।
गिरीशरमणी देवी गिरीशपरिवन्दिता॥

गतिदा गतिहा गीता गौतमीगुरुसेविता।
गुरुपूज्या गुरुयुता गुरुसेवनतत्परा॥

गन्धद्वारा च गन्धाढ्या गन्धात्मा गन्धकारिणी।
गीर्वाणपतिसम्पूज्या गीर्वाणपतितुष्टिदा॥

गीर्वाणाधीशरमणी गीर्वाणाधीशवन्दिता।
गीर्वाणाधीशसंसेव्या गीर्वाणाधीशहर्षदा॥

गानशक्तिर्गानगम्या गानशक्तिप्रदायिनी।
गानविद्या गानसिद्धा गानसन्तुष्टमानसा॥

गानातीता गानगीता गानहर्षप्रपूरिता।
गन्धर्वपतिसंहृष्टा गन्धर्वगुणमण्डिता॥

गन्धर्वगणसंसेव्या गन्धर्वगणमध्यगा।
गन्धर्वगणकुशला गन्धर्वगणपूजिता॥

गन्धर्वगणनिरता गन्धर्वगणभूषिता।

घग्घरा घोररूपा च घोरघुग्घुरनादिनी॥

घर्मबिन्दुसमुद्भूता घर्मबिन्दुस्वरूपिणी।
घण्टारवा घनरवा घनरूपा घनोदरी॥

घोरसत्त्वा च घनदा घण्टानादविनोदिनी।
घोरचाण्डालिनी घोरा घोरचण्डविनाशिनी॥

घोरदानवदमनी घोरदानवनाशिनी।
घोरकर्मादिरहिता घोरकर्मनिषेविता॥

घोरतत्त्वमयी देवी घोरतत्त्वविमोचिनी।
घोरकर्मादिरहिता घोरकर्मादिपूरिता॥

घोरकर्मादिनिरता घोरकर्मप्रवर्द्धिनी।
p. 238) घोरभूतप्रमथनी घोरवेतालनाशिनी॥

घोरदावाग्निदमनी घोरशत्रुनिषूदिनी।
घोरमन्त्रयुता चैव घोरमन्त्रप्रपूजिता॥

घोरमन्त्रमनोऽभिज्ञा घोरमन्त्रफलप्रदा।
घोरमन्त्रनिधिश्चैव घोरमन्त्रकृतास्पदा॥

घोरमन्त्रेश्वरी देवी घोरमन्त्रार्थमानसा।
घोरमन्त्रार्थतत्त्वज्ञा घोरमन्त्रार्थपारगा॥

घोरमन्त्रार्थविभवा घोरमन्त्रार्थबोधिनी।
घोरमन्त्रार्थनिचया घोरमन्त्रार्थजन्मभूः॥

घोरमन्त्रजपरता घोरमन्त्रजपोद्यता।
ङकारवर्णनिलया ङकाराक्षरमण्डिता॥

ङकारापररूपा च ङकाराक्षररूपिणी।
चित्ररूपा चित्रनाडी चारुकेशी चयप्रभा॥

चञ्चला चञ्चलाकारा चारुरूपा च चण्डिका।
चतुर्वेदमयी चण्डा चाण्डालगणमण्डिता॥

चाण्डालच्छेदिनी चण्डतापनिर्मूलकारिणी।
चतुर्भुजा चण्डरूपा चण्डमुण्डविनाशिनी॥

चन्द्रिका चन्द्रकीर्तिश्च चन्द्रकान्तिस्तथैव च।
चन्द्रास्या चन्द्ररूपा च चन्द्रमौलिस्वरूपिणी॥

चन्द्रमौलिप्रिया चन्द्रमौलिसन्तुष्टमानसा।
चकोरबन्धुरमणी चकोरबन्धुपूजिता॥

चक्ररूपा चक्रमयी चक्राकारस्वरूपिणी।
चक्रपाणिप्रिया चक्रपाणिप्रीतिप्रदायिनी॥

चक्रपाणिरसाभिज्ञा चक्रपाणिवरप्रदा।
चक्रपाणिवरोन्मत्ता चक्रपाणिस्वरूपिणी॥

चक्रपाणीश्वरी नित्यं चक्रपाणिनमस्कृता।
चक्रपाणिसमुद्भूता चक्रपाणिगुणास्पदा॥

चन्द्रावली चन्द्रवती चन्द्रकोटिसमप्रभा।
चन्दनार्चितपादाब्जा चन्दनान्वितमस्तका॥

चारुकीर्त्तिश्चारुनेत्रा चारुचन्द्रविभूषणा।

चारुभूषा चारुवेषा चारुवेषप्रदायिनी॥

चारुभूषाभूषिताङ्गी चतुर्वक्त्रवरप्रदा।
चतुर्वक्त्रसमाराध्या चतुर्वक्त्रसमाश्रिता॥

चतुर्वक्त्रा चतुर्बाहा चतुर्त्थी च चतुर्द्दशी।
चित्रा चर्मण्वती चैत्री चन्द्रभागा च चम्पका॥

चतुर्द्दशयमाकारा चतुर्द्दशयमानुगा।
चतुर्द्दशयमप्रीता चतुर्द्दशयमप्रिया॥

p. 239) छलस्था छिद्ररूपा च च्छद्मदा छद्मराजिका।
छिन्नमस्ता तथा छिन्ना छिन्नमुण्डविधारिणी॥

जयदा जयरूपा च जयन्ती जयमोहिनी।
जया जीवनसंस्था च जालन्धरनिवासिनी॥

ज्वालामुखी ज्वालदात्री जाज्वल्यदहनोपमा।
जगद्वन्द्या जगत्पूज्या जगत्त्राणपरायणा॥

जगती जगदाधारा जन्ममृत्युजरापहा।
जननी जन्मभूमिश्च जन्मदा जयशालिनी॥

ज्वररोगहरा ज्वाला ज्वालामालाप्रपूरिता।
जम्भारातीश्वरी जम्भारातिवैभवकारिणी॥

जम्भारातिस्तुता जम्भारातिशत्रुनिषूदिनी।
जयदुर्गा जयाराध्या जयकाली जयेश्वरी॥

जयतारा जयातीता जयशङ्करवल्लभा।
जलदा जह्नुतनया जलधित्रासकारिणी॥

जलधिव्याधिदमनी जलधिज्वरनाशिनी।
जङ्गमेशी जाड्यहरा जाड्यसङ्घनिवारिणी॥

जाड्यग्रस्तजनातीता जाड्यरोगनिवारिणी।
जन्मदात्री जन्महर्त्री जयघोषसमन्विता॥

जपयोगसमायुक्ता जपयोगविनोदिनी।
जपयोगप्रिया जाप्या जपातीता जयस्वना॥

जायाभावस्थिता जाया जायाभावप्रपूरिणी।
जपाकुसुमसङ्काशा जपाकुसुमपूजिता॥

जपाकुसुमसम्प्रीता जपाकुसुममण्डिता।
जपाकुसुमवद्भासा जपाकुसुमरूपिणी॥

जमदग्निस्वरूपा च जानकी जनकात्मजा।
झञ्झावातप्रमुक्ताङ्गी झोरझङ्कारवासिनी॥

झङ्कारकारिणी झञ्झावातरूपा च झङ्करी।
ञकाराणुस्वरूपा च टवट्टङ्कारनादिनी॥

टङ्कारी टकुवाणी च ठकाराक्षररूपिणी।
डिण्डिमा च तथा डिम्भा डिण्डुडिण्डिमनादिनी॥

ढक्कामयी ढिलमयी नृत्यशब्दाविलासिनी।
ढक्का ढक्केश्वरी ढक्काशब्दरूपा तथैव च॥

ढक्कानादप्रिया ढक्कानादसन्तुष्टमानसा।

णकारा णाक्षरमयी णाक्षरादिस्वरूपिणी॥

त्रिपुरा त्रिपुरमयी त्रिशक्तिस्त्रिगुणात्मिका।
तामसी च त्रिलोकेशी त्रिपुरा च त्रयीश्वरी॥

त्रिविद्या च त्रिरूपा च त्रिनेत्रा च त्रिरूपिणी।
p. 240) तारिणी तरला तारा तारकारिप्रपूजिता॥

तारकारिसमाराध्या तारकारिवरप्रदा।
तारकारिप्रसूस्तन्वी तरुणी तरलप्रभा॥

त्रिरूपा च त्रिपुरगा त्रिशूलवरधारिणी।
त्रिशूलिनी तन्त्रमयी तन्त्रशास्त्रविशारदा॥

तन्त्ररूपा तपोमूर्त्तिस्तन्त्रमन्त्रस्वरूपिणी।
तडित्तडिल्लताकारा तत्त्वज्ञानप्रदायिनी॥

तत्त्वज्ञानेश्वरी देवी तत्त्वज्ञानप्रमोदिनी।
त्रयीमयी त्रयीसेव्या त्र्यक्षरी त्र्यक्षरेश्वरी॥

तापविध्वंसिनी तापसङ्घनिर्मूलकारिणी।
त्रासकर्त्री त्रासहर्त्री त्रासदात्री च त्रासहा॥

तिथीशा तिथिरूपा च तिथिस्था तिथिपूजिता।
तिलोत्तमा च तिलदा तिलप्रीता तिलेश्वरी॥

त्रिगुणा त्रिगुणाकारा त्रिपुरी त्रिपुरात्मिका।
त्रिकुटा त्रिकुटाकारा त्रिकुटाचलमध्यगा॥

त्रिजटा च त्रिनेत्रा च त्रिनेत्रवरसुन्दरी।
तृतीया च त्रिवर्षा च त्रिविधा त्रिमतेश्वरी॥

त्रिकोणस्था त्रिकोणेशी त्रिकोणयन्त्रमध्यगा।
त्रिसन्ध्या च त्रिसन्ध्याच्र्या त्रिपदा त्रिपदास्पदा॥

स्थानस्थिता स्थलस्था च धन्यस्थलनिवासिनी।
थकाराक्षररूपा च स्थूलरूपा तथैव च॥

स्थूलहस्ता तथा स्थूला स्थैर्यरूपप्रकाशिनी।
दुर्गा दुर्ग्गार्त्तिहन्त्री च दुर्गबन्धविमोचिनी॥

देवी दानवसंहन्त्री दनुजेशनिषूदिनी।
दारापत्यप्रदा नित्या शङ्करार्द्धाङ्गधारिणी॥

दिव्याङ्गी देवमाता च देवदुष्टविनाशिनी।
दीनदुःखहरा दीनतापनिर्मूलकारिणी॥

दीनमाता दीनसेव्या दीनदम्भविनाशिनी।
दनुजध्वंसिनी देवी देवकी देववल्लभा॥

दानवारिप्रिया दीग्घा दानवारिप्रपूजिता।
दीग्घस्वरा दीग्घतनुर्दीग्घदुर्ग्गतिनाशिनी॥

दीग्घनेत्रा दीग्घचक्षुर्दीग्घकेशी दिगम्बरी।
दिगम्बरप्रिया दान्ता दिगम्बरस्वरूपिणी॥

दुःखहीना दुःखहरा दुःखसागरतारिणी।
दुःखदारिद्र्यशमनी दुःखदारिद्र्यकारिणी॥

दुःखदा दुस्सहा दुष्टखण्डनैकस्वरूपिणी।

p. 241) देववामा देवसेव्या देवशक्तिप्रदायिनी॥

दामिनी दामिनीप्रीता दामिनीशतसुन्दरी।
दामिनीशतसंसेव्या दामिनीदामभूषिता॥

देवताभावसन्तुष्टा देवताशतमध्यगा।
दयार्द्रा च दयारूपा दयादानपरायणा॥

दयाशीला दयासारा दयासागरसंस्थिता।
दशविद्यात्मिका देवी दशविद्यास्वरूपिणी॥

धरणी धनदा धात्री धन्या धान्यपरा शिवा।
धर्मरूपा धनिष्ठा च धेया च धीरगोचरा॥

धर्मराजेश्वरी धर्मकर्मरूपा धनेश्वरी।
धनुर्विद्या धनुर्गम्या धनुर्द्धरवरप्रदा॥

धर्मशीला धर्मलीला धर्मकर्मविवर्जिता।
धर्मदा धर्मनिरता धर्मपाखण्डखण्डिनी॥

धर्मेशी धर्मरूपा च धर्मराजवरप्रदा।
धर्मिणी धर्मगेहस्था धर्माधर्मस्वरूपिणी॥

धनदा धनदप्रीता धनधान्यसमृद्धिदा।
धनधान्यसमृद्धिस्था धनधान्यविनाशिनी॥

धर्मनिष्ठा धर्मधीरा धर्ममार्गरता सदा।
धर्मबीजकृतस्थाना धर्मबीजसुरक्षिणी॥

धर्मबीजेश्वरी धर्मबीजरूप च धर्मगा।
धर्मबीजसमुद्भूता धर्मबीजसमाश्रिता॥

धराधरप्रतिप्राण-धराधरपतिस्तुता।
धराधरेन्द्रतनुजा धराधरेन्द्रवन्दिता॥

धराधरेन्द्रगेहस्था धराधरेन्द्रपालिनी।
धराधरेन्द्रसर्वार्तिनाशिनी धर्मपालिनी॥

नवीना निर्मला नित्या नगराजप्रपूजिता।
नागेश्वरी नागमाता नागकन्या च नग्निका॥

निर्ल्लेपा निर्विकल्पा च निर्ल्लोमा निरुपद्रवा।
निराहारा निराकारा निरञ्जनस्वरूपिणी॥

नागिनी नागविभवा नागराजपरिस्तुता।
नागराजगुणज्ञा च नागराजसुखप्रदा॥

नागलोकगता नित्यं नागलोकनिवासिनी।
नागलोकेश्वरी नागभगिनी नागपूजिता॥

नागमध्यस्थिता नागमोहसङ्क्षोभदायिनी।
नृत्यप्रिया नृत्यवती नृत्यगीतपरायणा॥

नृत्येश्वरी नर्त्तकी च नृत्यरूपा निराश्रया।
नारायणी नरेन्द्रस्था नरमुण्डास्थिमालिनी॥

p. 242) नरमांसप्रिया नित्या नररक्तप्रिया सदा।
नरराजेश्वरी नारीरूपा नारीस्वरूपिणी॥

नारीगणार्च्चिता नारीमध्यगा नूतनाम्बरा।

नर्मदा च नदीरूपा नदीसङ्गमसंस्थिता॥

नर्मदेश्वरसम्प्रीता नर्मदेश्वररूपिणी।
पद्मावती पद्ममुखी पद्मकिञ्जल्कवासिनी॥

पट्टवस्त्रपराधीना पद्मरागविभूषिता।
परमा प्रीतिदा नित्या प्रेतासननिवासिनी॥

परिपूर्णरसोन्मत्ता प्रेमविह्वलवल्लभा।
पवित्राशवनिःपूता प्रेयसी परमात्मिका॥

प्रियव्रतपरा नित्या परमप्रेमदायिनी।
पुष्पप्रिया पद्मकोशा पद्मधर्मनिवासिनी॥

फेत्कारिणीतन्त्ररूपा फेरुफेरवनादिनी।
वंशिनी वेशरूपा च बगलाकामरूपिणी॥

वाङ्मयी वसुधा धृष्या वाग्भवाख्यावरानरा।
बुद्धिदा बुद्धिरूपा च विद्या वादस्वरूपिणी॥

बाला वृद्धमयीरूपा वाणी वाक्यनिवासिनी।
वरुणा वाग्वती वीरा वीरभूषणभूषिता॥

वीरभद्रार्चितपदा वीरभद्रप्रसूरपि।
वेदमार्गरता वेदमन्त्ररूपा वषट्क्रिया॥

वीणावाद्यसमायुक्ता वीणावाद्यपरायणा।
वीणारवा तथा वीणाशब्दरूपा च वैष्णवी॥

वैष्णवाचारनिरता वैष्णवाचारतत्परा।
विष्णुसेव्या विष्णुपत्नी विष्णुरूपा वरानना॥

विश्वेश्वरी विश्वमाता विश्वनिर्माणकारिणी।
विश्वरूपा च विश्वेशी विश्वसंहारकारिणी॥

भैरवी भैरवाराध्या भूतभैरवसेविता।
भैरवेशी तथा भीमा भैरवेश्वरतुष्टिदा॥

भैरवाधीशरमणी भैरवाधीशपालिनी।
भीमेश्वरी भीममाता भीमशब्दपरायणा॥

भीमरूपा च भीमेशी भीमा भीमवरप्रदा।
भीमपूजितपादाब्जा भीमभैरवपालिनी॥

भीमासुरध्वंसकरी भीमदुष्टविनाशिनी।
भुवना भुवनाराध्या भवनी भूतिदा सदा॥

भयदा भयहन्त्री च अभयाभयरूपिणी।
भीमनादाविह्वला च भयभीतिविनाशिनी॥

मत्ता प्रमत्तरूपा च मदोन्मत्तस्वरूपिणी।
मान्यामनोज्ञा माना च मङ्गला च मनोहरा॥

p. 243) माननीया महापूज्या महिषीदुष्टमर्द्दिनी।
महिषासुरहन्त्री च मातङ्गी मयवासिनी॥

माध्वी मधुमयी मुद्रा मुद्रिकामन्त्ररूपिणी।
महाविश्वेश्वरीदूती मौलिचन्द्रप्रकाशिनी॥

यशःस्वरूपिणी देवी योगमार्गप्रदायिनी।

योगिनी योगगम्या च याम्येशी योगरूपिणी॥

यज्ञाङ्गी च योगमयी जपरूपा जपात्मिका।
युगाख्या च युगान्ता च योनिमण्डलवासिनी॥

अयोनिजा योगनिद्रा योगानन्दप्रदायिनी।
रमा रतिप्रिया नित्या रतिरागविवर्द्धिनी॥

रमणी राससम्भूता रम्या रासप्रिया रसा।
रणोत्कण्ठा रणस्था च वरारङ्गप्रदायिनी॥

रेवती रणजैत्री च रसोद्भूता रणोत्सवा।
लता लावण्यरूपा च लवणाब्धिस्वरूपिणी॥

लवङ्गकुसुमाराध्या लोलजिह्वा च लेलिहा।
वशिनी वनसंस्था च वनपुष्पप्रिया वरा॥

प्राणेश्वरी बुद्धिरूपा बुद्धिदात्री बुधात्मिका।
शमनी श्वेतवर्णा च शाङ्करी शिवभाषिणी॥

शाम्यरूपा शक्तिरूपा शक्तिबिन्दुनिवासिनी।
सर्वेश्वरी सर्वदात्री सर्वमाता च शर्वरी॥

शाम्भवी सिद्धिदा सिद्धा सुषुम्नास्वरभासिनी।
सहस्त्रदलमध्यस्था सहस्त्रदलवर्त्तिनी॥

हरप्रिया हरध्येया हूङ्कारबीजरूपिणी।
लङ्केश्वरी च तरला लोममांसप्रपूजिता॥

क्षेम्या क्षेमकरी क्षामा क्षीरबिन्दुस्वरूपिणी।
क्षिप्तचित्तप्रदा नित्या क्षौमवस्त्रविलासिनी।

छिन्ना च छिन्नरूपा च क्षुधा क्षौत्काररूपिणी।
सर्ववर्णमयी देवी सर्वसम्पत्प्रदायिनी॥

सर्वसम्पत्प्रदात्री च सम्पदापदभूषिता।
सत्त्वरूपा च सर्वार्त्था सर्वदेवप्रपूजिता॥

सर्वेश्वरी सर्वमाता सर्वज्ञा सुरसात्मिका।
सिन्धुर्मन्दाकिनी गङ्गा नदीसागररूपिणी॥

सुकेशी मुक्तकेशी च डाकिनी वरवर्णिनी।
ज्ञानदा ज्ञानगगना सोममण्डलवासिनी॥

आकाशनिलया नित्या परमाकाशरूपिणी।
p. 244) अन्नपूर्णा महानित्या महादेवरसोद्भवा॥

मङ्गला कालिका चण्डा चण्डनादातिभीषणा।
चण्डासुरस्य मथिनी चामुण्डा चपलात्मिका॥

चण्डी चामरकेशी च चलत्कुण्डलधारिणी।
मुण्डमालाधरा नित्या खण्डमुण्डविलासिनी॥

खड्गहस्ता मुण्डहस्ता वरहस्ता वरप्रदा।
असिचर्मधरा नित्या पाशाङ्कुशधरा परा॥

शूलहस्ता शिवहस्ता घण्टानादविलासिनी।
धनुर्ब्बाणधरादित्या नागहस्ता नगात्मजा॥

महिषासुरहन्त्री च रक्तबीजविनाशिनी।

रक्तरूपा रक्तगात्रा रक्तहस्ता भयप्रदा॥

असिता च धर्मधरा पाशाङ्कुशधरा परा।
धनुर्बाणधरा नित्या धूम्रलोचननाशिनी॥

परस्था देवतामूर्त्तिः शर्वाणी शारदा परा।
नानावर्णविभूषाङ्गी नानारागसमापिनी॥

पशुवस्त्रपरिधाना पुष्पायुधधरा परा।
मुक्तरञ्जितमालाढ्या मुक्ताहारविलासिनी॥

स्वर्णकुण्डलभूषा च स्वर्णसिंहासनस्थिता।
सुन्दराङ्गी सुवर्णाभा शाम्भवी शकटात्मिका॥

सर्वलोकेशविद्या च मोहसम्मोहकारिणी।
श्रेयसी सृष्टिरूपा च च्छिन्नच्छद्ममयी च्छला॥

छिन्नमुण्डधरा नित्या नित्यानन्दविधायिनी।
नन्दा पूर्णा च रिक्ता च तिथयः पूर्णषोडशी॥

कुहूः संक्रांतिरूपा च पञ्चपर्वविलासिनी।
पञ्चबाणधरा नित्या पञ्चमप्रीतिदा परा॥

पञ्चपत्रमभीलाषा पञ्चामृतविलासिनी।
पाञ्चाली पञ्चमी देवी पञ्चरक्तप्रसारिणी॥

पञ्चबाणधरा नित्या नित्यदात्री दयापरा।
पललादिप्रिया नित्या पशुगम्या परेशिता॥

परा पररहस्या च परमप्रेमविह्वला।
कुलीना केशिमार्गस्था कुलमार्गप्रकाशिनी।

कुलाकुलस्वरूपा च कुलार्णवमयी कुला।
रुक्मा च कालरूपा च कालकम्पनकारिणी॥

विलासरूपिणी भद्रा कुलाकुलनमस्कृता।
कुबेरवित्तधात्री च कुमारजननी परा॥

कुमारीरूपसंस्था च कुमारीपूजनाम्बिका।
p. 245) कुरङ्गनयना देवी दिनेशास्यापराजिता॥

कुण्डली कदलीसेना कुमार्गरहिता वरा।
अनन्तरूपानन्तस्था आनन्दसिन्धुवासिनी॥

ईलास्वरूपिणी देवी इ-ईभेदभयङ्करी।
इङ्गला पिंगला नाडी इकाराक्षररूपिणी॥

उमा उत्पत्तिरूपा च उच्चभावविनाशिनी।
ऋग्वेदा च निराराध्या यजुर्वेदप्रपूजिता॥

सामवेदेन सङ्गीता अथर्ववेदभाषिणी।
ऋकाररूपिणी ऋक्षा निरक्षरस्वरूपिणी॥

अहिदुर्गासमाचारा इकारार्णस्वरूपिणी।
ओंकारा प्रणवस्था च ओंकारादिस्वरूपिणी॥

अनुलोमविलोमस्था थकारवर्णसम्भवा।
पञ्चाशद्वर्णबीजाढ्या पञ्चाशन्मुण्डमालिका॥

प्रत्येकादशसङ्ख्या च षोडशी छिन्नमस्तका।

षडङ्गयुवतीपूज्या षडङ्गरूपवर्जिता॥

षड्चक्रसंश्रिता नित्या विश्वेशी षड्गदालया।
मालामन्त्रमयी मन्त्रजपमाता मदालसा॥

सर्वविश्वेश्वरीशक्तिः सर्वानन्दप्रदायिनी।
इति श्रीछिन्नमस्तायाः सहस्रनाममुत्तमम्॥

पूजाक्रमेण कथितं साधकानां सुखावहम्।
गोपनीयङ्गोपनीयङ्गोपनीयं न संशयः॥

अर्द्धरात्रे मुक्तकेशो भक्तियुतो भवेन्नरः।
जपित्वा पूजयित्वा च पठेन्नामसहस्रकम्॥

विद्यासिद्धिर्भवेत्तस्य षण्मासाभ्यासयोगतः।
येन केन प्रकारेण देवीभक्तिपरो भवेत्॥

अखिलां स्तम्भयेल्लोकान्नाजानमपि मोहयेत्।
आकर्षयेद्देवशक्तिम्मारयेद्देविविद्विषम्॥

शत्रवो दासताँय्यान्ति पापानि यान्ति सङ्क्षयम्।
मृत्युश्च क्षयताँय्याति पठनाद्भाषणात्प्रिये॥

प्रशस्तायाः प्रसादेन किन्न सिद्यति भूतले।
इदं रहस्यम्परमम्परं स्वस्त्ययनम्महत्॥

धृत्वा बाहौ महासिद्धिः प्राप्यते नात्र संशयः।
अनया सदृशी विद्या विद्यते न महेश्वरी।

वारमेकन्तु योऽधीते सर्वसिद्धीश्वरो भवेत्।
कुलवारे कुलाष्टम्याङ्कुहूसङ्क्रांतिपूर्णिमा॥

यश्चेमाम्पठते विद्यान्तस्य सम्यक् फलं शृणु।
अष्टोत्तरशतञ्जप्त्वा पठेन्नामसहस्रकम्॥

p. 246) भक्त्या स्तुत्वा महादेवीं सर्वपापात्प्रमुच्यते।
सर्वपापैर्विनिर्मुक्तः सर्वसिद्धीश्वरो भवेत्॥

अष्टम्याँव्वा निशीथे च चतुष्पथगतो नरः।
माषभक्तबलिन्दत्वा पठेन्नामसहस्रकम्॥

सुदर्शवामवेद्यान्तु मासत्रयविधानतः।
दुर्ज्जयः कामरूपश्च महाबलपराक्रमः॥

कुमारीपूजनन्नाम-मन्त्रमात्रम्पठेन्नरः।
एतन्मन्त्रस्य पठनात्सर्वसिद्धीश्वरो भवेत्॥

इति ते कथितन्देवि सर्वसिद्धिपरन्नरः।
जप्त्वा स्तुत्वा महादेवीं सर्वपापैः प्रमुच्यते॥

न प्रकाश्यमिदन्देवि सर्वदेवनमस्कृतम्।
इदं रहस्यम्परमङ्गोप्तव्यम्पशुसङ्कटे॥

इति सकलविभूतिर्हेतुभूतम्प्रशस्तम्पठति य इह
मार्त्त्यश्छिन्नमस्तास्तवञ्च।
धनद इव धनाढ्यो माननीयो नृपाणां स भवति च
जनानामाश्रयः सिद्धिवेत्ता॥

इति श्री विश्वसारतन्त्रे शिवपार्वतीसँवादे

श्रीछिन्नमस्तासहस्त्रनामस्तोत्रं सम्पूर्णम्॥

इति शाक्तप्रमोदे छिन्नमस्तातन्त्रं समाप्तम्॥

श्रीः

शिवहरराजधानीपतिश्रीराजादेवनन्दनसिंह-
बहादुरनराधिपसंगृहीतविरचित-

शाक्तप्रमोदान्तर्गतम्

षष्ठं

त्रिपुरभैरवीतन्त्रम्

उक्तराजगुरुवंश्यपण्डितश्रीरघुराजदुबेजीद्वारा
संशोधितम्

तदेतत्

श्रीकृष्णदासात्मज-खेमराजेन

स्वकीये श्रीवेंकटेश्वर यन्त्रालये

मुद्रयित्वा प्रकाशितम्

बोम्ब-ई

श्रीगणेशाय नमः

अथ शाक्तप्रमोदः

अथ त्रिपुरभैरवीतन्त्रम्

अथ भैरवीध्यानम्

उद्यद्भानुसहस्रकान्तिमरुणक्षौमां शिरोमालिकां
रक्तालिप्तपयोधराङ्गपपटीँव्विद्यामभीतिँव्वरम्।
हस्ताब्जैर्द्दधतीन्त्रिनेत्रविलसद्वक्त्रारविन्दश्रियं
देवीम्बद्धहिमांशुरत्नमुकुटाँव्वन्दे समन्दस्मिताम्॥

p. 250) अथ यन्त्रोद्धारः

पद्ममष्टदलोपेतन्नवयोन्याढ्यकर्णिकम्।
चतुर्द्वारसमायुक्तं भूगृहँव्विलिखेत्ततः॥

अथ मन्त्रोद्धारः

ईशानोऽकारसँउक्तः पश्चात्सैमितियोजयेत्।
हसकरीमिति ततो हसैं पश्चात्समुच्चरेत्॥
अष्टाक्षरस्तु मन्त्रोऽयम्भैरव्यास्समुदाहृतः।
जपतो धारणाद्वापि सर्वसम्पत्प्रदायकः॥

अथ मन्त्रः

॥ हसैंहसकरींहसैं॥

अथ पूजाविधिः

प्रातः कृत्यादिप्राणायामान्तँव्विधाय पीठन्यासङ्कुर्यात्॥
पूर्वोक्तक्रमेणाधारशक्त्यादि ह्रींज्ञानात्मनेनम इत्यन्तँव्विन्यस्य
हृत्पद्मस्य पूर्वादिकेसरेषु ॐ इच्छायैनमः एवं ज्ञानायै नमः
क्रियायै० कामदायिन्यै० रत्यै० रतिप्रियायै० नन्दायै० मध्ये
ऐंपरायै० अपरायै० हसौंसदाशिवमहाप्रेतपद्मासनायनम
इत्यन्तँव्विन्यस्य ऋष्यादिन्यासङ्कुर्यात्॥

p. 251) यथा - शिरसि दक्षिणामूर्तये नमः।
मुखे पङ्क्तिच्छन्दसेनमः हृदि। त्रिपुरभैरव्यैदेवतायैनमः।
गुह्ये बाग्भवबीजायनमः। पादयोः शक्तिकशक्तयेनमः।
सर्वाङ्गे कामराजायकीलकायनमः। तथा च
दक्षिणामूर्त्तिसंहितायाम्। ऋषिस्तु दक्षिणामूर्त्तिश्शिरसि विन्यसेत्क्रमात्
॥

छन्दः पङ्क्तिस्तु विज्ञेयो मुखे विन्यस्य देवताम्।
हृदि मे त्रिपुरेशानी वाग्भवम्बीजमुच्यते॥
शक्तिबीजं शक्तिरेव कामराजश्च कीलकम्।

ततो नाभ्यादिचरणपर्यन्तं हंसरेनमः॥

हृदादिनाभिपर्यन्तङ्कामबीजम्प्रविन्यसेत्।

सकलः रिंनमः शिरसि हृदयान्तं हंसरेनमः।

एवन्दक्षिणकरे आद्यबीजम्। वामकरे द्वितीयम्। उभयकरे तृतीयम्॥

यथा मूर्द्धि मूलाधारे हृदि यथाशङ्खेन त्रीणि बीजानि विन्यसेत्॥

यथा निबन्धे॥

नाभेराचरणन्तद्वद्वाग्भवन्मन्त्रवित्तमः॥

हृदयान्नाभिपर्यन्तङ्कामबीजम्प्रविन्यसेत्॥

शिरसो हृत्प्रदेशान्तन्तत्त्रयँव्विन्यसेत्ततः॥

आद्यन्द्वितीयङ्करयोस्ततस्त्रिरुभयोर्न्यसेत्॥

मूर्ध्न्याधारे च हृदये भूयो बीजत्रयङ्क्रमात्॥

ततो नवयोन्यात्मकविन्यासः॥

आद्यम्बीजन्दक्षकर्णे द्वितीयम्बीजँव्वामकर्णे तृतीयम्बीजञ्चिबुके

एवं शङ्खयोर्वदने नेत्रयोर्न्नसि अंसयोर्जठरे कूर्परयोः कुक्षौ

जानुनोर्लिङ्गे पादयोर्गुह्ये पार्श्वयोर्हृदि स्तनयोः कण्ठे॥

यथा निबन्धे॥

नवयोन्यात्मकन्न्यासङ्कुर्याद्बीजैस्त्रिभिः क्रमात्॥
कर्णयोश्चिबुके भूयः शङ्खयोर्वदने पुनः॥
नेत्रयोरपि विन्यसेदंसयोर्ज्जठरे पुनः॥
ततः कूर्परयोः कुक्षौ जानुनोर्म्मूर्द्धमूर्द्धनि॥ पादयोर्गुह्यदेशे
च पार्श्वयोर्हृदयाम्बुजे॥
स्तनद्वये कण्ठदेशे रत्यादिमथ विन्यसेत्॥

अथ रत्यादिन्यासः॥

मूलाधारे ऐंरत्यैनमः, हृदि क्लींप्रीत्यैनमः, भ्रुवोर्म्मध्ये
मनोभवायै नमः, पुनः भ्रूमध्ये सौः अमृतेश्यैनमः,

p. 252) हृदि क्लींयोगेश्यैनमः, मूलाधारे ऐंविश्वयोन्यैनमः।

यथा निवन्धे।

मुखे रतिं हृदि प्रीतिम्भुवोर्मध्ये मनोभवाम्॥

बालाबीजैस्त्रिभिर्न्यस्य स्थानेष्वेषु विलोमतः॥

अमृतेशीञ्च योगेशीं विश्वयोनिं क्रमादिमाः॥

विलोमबीजैर्विन्यस्य मूर्त्तिन्यासं समाचरेत्॥

अथ मूर्त्तिन्यासः॥

मूर्ध्नि हसरों ईशानमनोभवायनमः।

वक्त्रे हसरें तत्पुरुषमकरध्वजायनमः।

हृदि हसरूं अघोरकन्दर्पकुमारायनमः।

गुह्ये हसरीं वामदेवमन्मथायनमः।

पादयोः हसरां सद्योजातकामदेवायनमः॥

एवम् ऊर्द्धप्राग्दक्षिणोत्तरपश्चिमेषु मुखेषु

ईशानमनोभवादिपञ्चमूर्त्तीस्तत्तद्बीजादिपूर्वका न्यसेत्॥

यथा निबन्धे॥

स्वस्वपूजादिकं सर्वम्मूर्ध्नीशानमनोभवम्॥

न्यसेद्वक्त्रे तत्पुरुषमकरध्वजमेव च॥

हृद्यघोरकुमारादि कन्दर्पन्तदनन्तरम्॥

गुह्यदेशे प्रविन्यस्य वामदेवादिमन्मथम्॥

सद्योजातङ्कामदेवम्पादयोर्विन्यसेत्ततः॥

ऊर्द्धप्राग्दक्षिणोत्तरपश्चिमेषु मुखेषु तान्॥

प्रविन्यसेद्यथापूर्वं भृगुव्योमाग्निसंस्थितः॥

सत्यादिपञ्चह्रस्वाख्यम्बीजमेषाम्प्रकल्पितम्॥

ततः करयोरङ्गुलीषु पञ्चबाणान् पञ्चकामांश्च न्यसेत्॥

यथा-द्रांद्रविणेश्यैनमः अङ्गुष्ठयोः।

द्रींशोभिन्यैनमस्तर्ज्जन्योः। क्लींवशीकरिण्यैनमः मध्यमयोः।

ब्लुं-आकर्षिण्यैनमः अनामिकयोः। स्त्रीं-उन्मादिन्यैनमः

कनिष्ठयोः॥ एवं ह्रींकामायनमः क्लींमन्मथायनमः

ऐंकन्दर्प्पायनमः ब्लुंमकरध्वजायनमः

स्त्रींमीनकेतनायनमः। यथा ज्ञानार्णवे॥

पञ्चबाणान् क्रमेणैव कराङ्गुलीषु विन्यसेत्॥

न्यासस्तु स्त्रीलिङ्गेनात्र प्रयोगः॥ तन्त्रे तथादर्शनात्॥

अङ्गुष्ठादिकनिष्ठान्तङ्क्रमेण परमेश्वरीम्॥

थान्तद्वयं समालिख्य वह्निस्थन्तङ्क्रमेण तु॥

मुखवृत्तेन नेत्रेण वामेन परिमण्डितम्॥

बाणद्वयमिति प्रोक्तम्मादनम्भूमिसंस्थितम्॥

चतुर्त्थं स्वरविद्याढ्यन्नादरूपँवरानने॥

कान्तवक्त्रेण सँयुक्तँव्वामकर्णविभूषितम्॥

p. 253) बिन्दुनादसमायुक्तं सर्वाङ्गश्चन्द्रमाः प्रिये॥

पञ्चबाणान्महेशानि नामानि शृणु पार्वति॥

क्षोभणो द्रावणो वश्यस्तथा कर्षणसञ्ज्ञकः॥

उन्मादश्च क्रमेणैव नामानि परमेश्वरि॥

कामस्तत्रैव विज्ञेयस्तेषाम्बीजानि त्वं शृणु॥

पराबीजम्मध्यबाणँव्वाग्भवम्परमेश्वरि॥

तुर्यबाणन्ततश्चैव स्त्रीबीजन्तु क्रमात्प्रिये॥

त्रिपुरासारे॥

कपञ्चमं शुचिनयनान्तसँयुतं सवामदृक्पवनगुणान्वितकराः।

रविश्चरो हरिहयः खबिन्दुनान्तँयंन्नंन्तंस्थंलंङम्परान्वितो

भृगुः॥

पञ्चकामा इमे देवि नामानि शृणु वल्लभे॥

काम-मन्मथ-कन्दर्प-मकरध्वजसञ्ज्ञकाः॥

मीनकेतुर्महेशानि पञ्चमः परिकीर्त्तितः॥

पञ्च कामान्ततो देवि नामानि शृणु वल्लभे॥

काममन्मथकन्दर्पबाणस्थानेषु विन्यसेत्॥

एतानि विन्यसेदेव करन्यासस्ततः परम्॥

ततः कराङ्गन्यासौ॥

हसरां अङ्गुष्ठाभ्यां नमः।

स्वाहा हसरीं तर्जनीभ्यांनमः।

हसरूं मध्यमाभ्यांवषट्॥

हसरैं अनामिकाभ्यांहूम्॥

हसरौं कनिष्ठाभ्यांवौषट्॥

हसरः करतलकरपृष्ठाभ्यांफट्॥

एवं हृदयादि। यथा निबन्धे॥

षड्दीर्घयुक्तेनाद्येन बीजेनाङ्गक्रिया मता।

ततो बाणन्यासः॥

मूर्ध्नि द्रांद्राविण्यैनमः, गुह्ये क्लीं-आकर्षिण्यैनमः,

हृदिसम्मोहिन्यैनमः॥

यथा निबन्धे।

द्रामाद्यां द्राविणीं म्मूर्ध्नि द्रीमाद्याङ्कोभिणीम्मते॥

क्लींवशीकरणीं वक्त्रे गुह्ये क्लींबीजपूर्वकम्॥

आकर्षिणीं हृदि पुनः सर्गालःभृगुसँयुतः॥

सम्मोहिनी क्रमादेवं वाणन्यासोयमीरितः॥

एतेन उन्माद-सम्मोहनयोरेकपर्यायः, एषु स्थानेषु कामाँह्च विन्यस्य

। यथा श्रीक्रमे।

ललाटे वदने देवि हृदि नाभौ च गुह्यके॥

एषु कामाँह्च विन्यस्य ताराद्यास्सुभगादिकाः॥

न्यसेदिति शेषः। ततः सुभगादिन्यासः। भाले

ऐंक्लींलूंस्त्रींसुभगायैनमः, भ्रूमध्ये

औंक्लींब्रूंस्त्रींभगायैनमः। वदने भगसर्पिण्यैनमः,

p. 254) कण्ठिकायां भगमालिन्यैनमः, कण्ठे अनङ्गायैनमः, हृदि

५ अनङ्गकुसुमायैनमः, नाभौ ५ अनङ्गमेखलायैनमः लिङ्गमूले

५, अनङ्गमदनायैनमः हृदि ५। यथा निबन्धे। भाले

भ्रूमध्यवदने कण्ठिकाकण्ठहृत्सु च॥

नाभ्यधिष्ठानयोः पञ्चताराद्याः सुभगादिकाः॥

न्यस्तव्या विधिना देवि मन्त्रिणा सुभगा भगा॥

भगसर्पिण्यथ परा भगमालिन्यनन्तरम्॥

अनङ्गानङ्गकुसुमा भूयश्चानङ्गमेखला॥

अनङ्गमदनासर्पा मन्दविभ्रममन्थरा॥

वाक्कामबीजंक्लूंत्रींसस्तारा पञ्चोदितास्त्वमी॥

अथ भूषणन्यासः॥ शिरसि अंनमः, भाले आँअमः, इंईं भ्रुवोः,

एवं कर्णयोः, उं-ऊं नेत्रयोः, ऋं ॠं नासिकायाम् गण्डयोः, लृं

ॡं एं ओष्ठयोः, ऐं ओं दन्तपङ्क्तौ, औं अं आस्ये, अः चिबुके,

कंगले, खंकण्ठे गंपार्श्वयोः, घंङंस्तनद्वये,

चंछंदोर्मूलयोः, जंझंकूर्परयोः, जंझंपादयोः,

ञंचरणाङ्गुष्ठयोः, ञंटंपादयोः, ठंडंकरपृष्ठयोः,

ढंणंनाभौ, तंगुह्ये, थं ऊर्वोः, दंधंजान्वोः,

नंपंजङ्घयोः, फंबंग्रन्थिस्थानयोः, भंमंचरणयोः,

यञ्चरणाङ्गुष्ठयोः, रंकट्याम्, लंकण्ठे, वंग्रीवायाम्,

लंहृदि, शगुह्ये, क्षकर्णयोः, षंगण्डयोः, संमौलौ॥ हयस्था

निबन्धे॥ न्यसेत् शिरसि भाले भ्रूकर्णाक्षियुगले

वक्षगण्डयोरूरुपृष्ठयोः दन्तपङ्क्तौ आस्ये यस्येश्वरान्॥ चिबुकेथ

पार्श्वयोः स्तनयुग्मकेदोर्मूलयोः कूर्परयोः पृष्ठदेशे ततो नाभौ

गुह्ये पुनश्चोर्वोर्ज्जानुनोर्ज्जपयेस्ततः स्फिचोः षदतलयोः पश्चात्

चरणाङ्गुल्योर्द्वयोः॥ कादिवान्तान्न्यसेद्वर्णान् स्थानेष्वेषु समाहितः

॥ कट्यां ग्रैवेयके पश्चात्कटितटे हृदि गुह्यके॥ कर्णयोर्गण्डयोर्मौलौ
बलवान् राक्षसासहौ॥ अस्यविमानान्प्रविन्यस्ये देवन्देशिकसत्तमः॥
ततस्त्रिखण्डाम्मुद्राम्बध्वा ध्यायेत्॥

उद्यद्भानुसहस्रकान्तिमरुणक्षौमांशिरोमालिकां
रक्तालिप्तपयोधराङ्गपपटीँबिद्यामभीतिँव्वरम्।

p. 255)
हस्ताब्जैर्दधतीन्त्रिनेत्रविलसद्वक्त्रारविन्दश्रियन्देवीम्बद्धहिमांशुर्
अत्नमुकुटाँव्वन्दे समन्दस्मिताम्॥ एवन्ध्यात्वा मानसैः
सम्पूज्यशङ्खस्थापनङ्कुर्यात्॥
आधारशक्त्यादिह्रींज्ञानात्मनेनम इत्येवं सम्पूज्य
पूर्वादिकेसरेषु मध्ये च। इच्छा ज्ञानक्रिया पश्चात् कामिनी
कामहाविनी॥ रती रतिप्रिया नन्दा नवमी च मनोन्मनी॥ एताः
प्रणवादिनमोऽन्तेन पूजयेत्, तदेवम्॥ परायै० अपरायै० परायै०
परावत्यै० सदाशिवमहाप्रेतपद्मासनायनमः इति सम्पूज्य
प्रायोस्थोनिरन्तराले श्रीविद्योक्तगुरुपङ्क्तिम्पूजयेत्। यथा निबन्धे।
वाग्भवं रोहितो वापि श्रीकण्ठो लोहितो नलः॥
दीर्घवाण्यै परायै च पश्चादपरायै पुनः॥ सदाशिवम्महाप्रेतं
ङेन्तम्पद्मासनम्मम॥
अनेन मनुना दद्यादासनं श्रीगुरूत्तमम्॥

प्राङ्मध्ययोरन्तराले पूजयेत्कल्पयेत्ततः॥

पञ्चभिः प्रणवैः पूर्वन्तस्यामावाह्य देवताम्॥

तारो वाक्छक्तिकमलाहसखप्लैयशः स्मृताः॥

तदशक्तौ अँउरुभ्योनमः ॐगुरुपादुकाभ्यान्नमः

एवम्परमगुरुभ्योनमः परमगुरुपादुकाभ्यांनमः

ॐपरमेष्ठिगुरुभ्योनमः परमेष्ठिगुरुपादुकाभ्यान्नमः

आचार्येभ्यो आचार्यपादुकाभ्यो०॥ अस्य पूजायन्त्रन्निबन्धे॥

पद्ममष्टदलोपेतन्नवयोन्याढ्यकर्णिकम्॥

चतुर्द्वारसमायुक्तम्भूगृहँव्विलिखेत्ततः॥ ऐंह्रींसहसषह

क्रेह्यैं इतिमन्त्रेण बिन्दुचक्रे मूर्त्तिसंकल्पन्त्रिखण्डमुद्रया

देवीन्ध्यात्वावाहयेत्॥ ॐ देवेशि भद्रसुलभे परिवारसमन्विते॥

यावत्त्वाम्पूजयिष्यामि तावत्त्वं सुस्थिरा भव॥ इत्यावाह्य

प्रीत्यैनमः उग्रकोणे मनोभवायैनमः। ततः केसरेषु अग्न्यादिकोणेषु

मध्ये दिक्षु च पूर्वोक्ताङ्गमन्त्रेण पूजामारभेत्॥ अथ ज्ञानार्णवे

॥ अग्नीशासुरवायुमध्ये दिग्बन्धम्पूजयेत्॥ ततः उत्तरे

द्रांद्राविण्यैनमः द्रींक्षोभिण्यैनमः दक्षिणे

क्लींवशीकरिण्यैनमः लोपाकर्षिण्यैनमः।

p.256) आग्नेय्याम्॥ सम्मोहिन्यैनमः॥ एवम् उत्तरे ह्रींकामायनमः

क्लींमन्मथायनमः॥ दक्षिणे ऐंकन्दर्पायनमः

प्लुंमकरध्वजायनमः॥ आग्नेय्याम् स्त्रींमीनकेतनायनमः॥ यथा
ज्ञानार्णवे॥ उत्तरस्यान्द्वयन्दिशि आग्न्ये चैकङ्क्रमेणैव
पञ्चबाणान्क्रमाद्यजेत्॥ पञ्चबाणस्तथा देवबाणवत्परिपूजयेत्॥
बाणवत्॥ ततोऽष्टयोनिषु पूर्वादि ऐंक्लींस्त्रींसः सुभगायैनमः॥
एवं ऐं० ४ भगायैनमः, ऐं० भगसर्पिण्यैनमः , ऐं०
भगमालिन्यैनमः, ऐं० ४ अनङ्गायैनमः, एवं ऐं० ४
अनङ्गकुसुमायैनमः, ऐं० ४ अनङ्गमेखलायैनमः, ऐं ० ४
अनङ्गमदनायैनमः॥ ततोऽष्टपत्रेषु पूर्वादि ॐ
असिताङ्गब्राह्मीभ्यांनमः, ॐउमामहेश्वराभ्यान्नमः,
ॐचण्डकौमारीभ्यान्नमः, ॐक्रोधवैष्णवीभ्यान्नमः, ॐ-
उत्तरवाराहीभ्यान्नमः, ॐकापालीन्द्राणीभ्यान्नमः,
ॐभीषणचामुण्डाभ्यान्नमः, ॐसंहारमहालक्ष्मीभ्यान्नमः॥
यथा निबन्धे॥ अष्टमे षष्ठशक्तौ च पूजयेत्सुभगादिकाः॥ मातरो
भैरव्याद्याश्च मदविभ्रमविह्वलाः॥ अष्टपत्रेषु सम्पूज्य
यथावत्कुसुमावधि॥ तद्बहिरिन्द्रादीन्सम्पूज्य धूपादिविसर्ज्जनान्तं
कर्म समापयेत्॥ किन्तु नैवेद्यानन्तरं श्रीविद्योक्तबलिचतुष्टयन्देयमिति
॥ अस्य पुरश्चरणं दशलक्षजपः, होमस्तुद्वादशसहस्रम्॥ यथा
निबन्धे॥ दीक्षाम्प्राप्य जपेन्मन्त्रन्तत्त्वलक्षञ्जितेन्द्रियः॥
पुष्पैर्भानुसहस्राणि जुहुयाद्दक्षमक्षजैः॥ इति पूजा॥

अथ स्तोत्रम्

श्रीभैरव उवाच

ब्रह्मादयः स्तुतिशतैरपि सूक्ष्मरूपाञ्जानन्ति नैव
जगदादिमनादिमूर्त्तिम्।
तस्माद्वयङ्कुचनतान्नवकुङ्कुमाभां
स्थूलां स्तुमः सकलवाङ्मयमातृभूताम्॥ १॥

सद्यः समुद्यतसहस्रदिवाकराभां
विद्याक्षसूत्रवरदाभयचिह्नहस्ताम्।
नेत्रोत्पलैस्त्रिभिरलंकृतवक्त्रपद्मां
त्वां हारभाररुचिरान्त्रिपुरे भजामः॥ २॥

सिन्दूरपूररुचिरङ्कुचभारनम्रञ्जन्मान्तरेषु
कृतपुण्यफलैकगम्यम्।
p. 257) अन्योन्यभेदकलहाकुलमानभेदैर्जानन्ति किञ्जडधियस्तव
रूपमम्ब॥ ३॥

स्थूलां वदन्ति मुनयः श्रुतयो गृणन्ति

सूक्ष्मां वदन्ति वचसामधिवासमन्ये।
त्वाम्मूलमाहुरपरे जगताम्भवानि
मन्यामहे वयमपारकृपाम्बुराशिम्॥ ४॥

चन्द्रावतंसकलितां शरदिन्दुशुभ्राम्पञ्चाशदक्षरमयीं हृदि
भावयन्ति।
त्वाम्पुस्तकञ्चपपटीममृताम्भकुम्भां
व्याख्याञ्च हस्तकमलैर्दधतीं त्रिनेत्राम्॥ ५॥

शम्भुस्त्वमद्रितनयाकलितार्द्धभागो
विष्णुस्त्वमम्ब कमलापरिणद्धदेहः।
पद्मोद्भवस्त्वमसि वागधिवासभूमिर्येषां क्रियाश्च जगति त्रिपुरे
त्वमेव॥ ६॥

आश्रित्य वाग्भवभवांश्चतुरः परादीन्भावान्पदात्तु
विहितान्समुदीरयन्तीम्।
कालादिभिश्च करणैः परदेवतान्त्वां
सँविन्मयीं हृदि कदापि न विस्मरामि॥ ७॥

आकुञ्च्य वायुमभिजित्य च वैरिषड्कमालोक्य निश्चलधिया

निजनासिकाग्रम्।

ध्यायन्ति मूर्द्धि कलितेन्दुकलावतंसं

त्वद्रूपमम्ब कृतिनस्तरुणार्कमित्रम्॥ ८॥

त्वम्प्राप्य मन्मथरिपोर्वपुरर्द्धभागं

सृष्टिं करोषि जगतामिति वेदवादः।

सत्यन्तदद्रितनये जगदेकमातर्नो चेदशेषजगतः स्थितिरेव न स्यात्॥ ९॥

पूजाँव्विधाय कुसुमैः सुरपादपानाम्पीठे तवाम्ब

कनकाचलकन्दरेषु।

गायन्ति सिद्धवनिताः सह किन्नरीभिरास्वादितामृतरसारुणपद्मनेत्राः

॥ १०॥

विद्युद्विलासवपुषः श्रियमावहन्तींय्यान्तीं

स्ववासभवनाच्छिवराजधानीम्।

सौषुम्नमार्गकमलानि विकासयन्तीन्देवीम्भजेत

परमामृतसिक्तगात्राम्॥ ११॥

आनन्दजन्मभवनम्भवनं श्रुतीनाञ्चैतन्यमात्रतनुमम्ब

तवाश्रयामि।

ब्रह्मेशविष्णुभिरुपासितपादपद्मां
सौभाग्यजन्मवसतिन्त्रिपुरे यथावत्॥ १२॥

सर्वार्त्थभावि भुवनं सृजतीन्दुरूपा
या तद्विभर्त्ति पुनरर्कतनुः स्वशक्त्या।
ब्रह्मात्मिका हरति तं सकलं य्युगान्ते
तां शारदाम्मनसि जातु न विस्मरामि॥ १३॥

p. 258) नारायणीति नरकार्णवतारिणीति
गौरीति खेदशमनीति सरस्वतीति।
ज्ञानप्रदेति नयनत्रयभूषितेति
त्वामद्रिराजतनये विबुधा वदन्ति॥ १४॥

ये स्तुवन्ति जगन्मातः श्लोकैर्द्वादशभिः क्रमात्।
त्वामनु प्राप्य वाक्सिद्धिम्प्राप्नुयुस्ते परां श्रियम्॥ १५॥

इति ते कथितन्देवि पञ्चाङ्गम्भैरवीमयम्।
गुह्याङ्गोप्यतमङ्गोप्यङ्गोपनीयं स्वयोनिवत्॥ १६॥

इति श्रीरुद्रयामले उमामहेश्वरसँवादे पञ्चाङ्गखण्डनिरूपणे

श्रीभैरवीस्तोत्रं सम्पूर्णम्॥

अथ कवचम्

श्रीपार्वत्युवाच

देवदेव महादेव सर्वशास्त्रविशारद।
कृपाङ्कुरु जगन्नाथ धर्मज्ञोसि महामते॥ १॥

भैरवी या पुरा प्रोक्ता विद्या त्रिपुरपूर्विका।
तस्यास्तु कवचन्दिव्यम्मह्यङ्कथय तत्त्वतः॥ २॥

तस्यास्तु वचनं श्रुत्वा जगाद जगदीश्वरः।
अद्भुतङ्कवचन्देव्या भैरव्या दिव्यरूपि वै॥ ३॥

ईश्वर उवाच

कथयामि महाविद्याकवचं सर्वदुर्ल्लभम्।
शृणुष्व त्वञ्च विधिना श्रुत्वा गोप्प्यन्तवापि तत्॥ ४॥

यस्याः प्रसादात्सकलं बिभर्म्मि भुवनत्रयम्।
यस्याः सर्वं समुत्पन्नँय्यस्यामद्यापि तिष्ठति॥ ५॥

माता पिता जगद्धन्या जगद्ब्रह्मस्वरूपिणी।
सिद्धिदात्री च सिद्धास्स्यादसिद्धा दुष्टजन्तुषु॥ ६॥

सर्वभूतहितकरी सर्वभूतस्वरूपिणी।
ककारी पातु मान्देवी कामिनी कामदायिनी॥ ७॥

एकारी पातु मान्देवी मूलाधारस्वरूपिणी।
इकारी पातु मान्देवी भूरि सर्वसुखप्रदा॥ ८॥

लकारी पातु मान्देवी इन्द्राणी वरवल्लभा।
ह्रींकारी पातु मान्देवी सर्वदा शम्भुसुन्दरी॥ ९॥

एतैर्वर्णैर्महामाया शाम्भवी पातु मस्तकम्।
ककारे पातु मान्देवी शर्वाणी हरगेहिनी॥ १०॥

मकारे पातु मान्देवी सर्वपापप्रणाशिनी।

p.259) ककारे पातु मान्देवी कामरूपधरा सदा॥ ११॥

ककारे पातु मान्देवी शम्बरारिप्रिया सदा।
पकारी पातु मान्देवी धराधरणिरूपधृक्॥ १२॥

ह्रींकारी पातु मान्देवी आकारार्द्धशरीरिणी।
एतैर्वर्णैर्महामाया कामराहुप्रियाऽवतु॥ १३॥

मकारः पातु मान्देवी सावित्री सर्वदायिनी।
ककारः पातु सर्वत्र कलाम्बरस्वरूपिणी॥ १४॥

लकारः पातु मान्देवी लक्ष्मीः सर्वसुलक्षणा।
ह्रीं पातु मान्तु सर्वत्र देवी त्रिभुवनेश्वरी॥ १५॥

एतैर्वर्णैर्महामाया पातु शक्तिस्वरूपिणी।
वाग्भवम्मस्तकमम्पातु वदनङ्कामराजिका॥ १६॥

शक्तिस्वरूपिणी पातु हृदयँय्यन्त्रसिद्धिदा।
सुन्दरी सर्वदा पातु सुन्दरी परिरक्षति॥ १७॥

रक्तवर्णा सदा पातु सुन्दरी सर्वदायिनी।
नानालङ्कारसँयुक्ता सुन्दरी पातु सर्वदा॥ १८॥

सर्वाङ्गसुन्दरी पातु सर्वत्र शिवदायिनी।
जगदाह्लादजननी शम्भुरूपा च मां सदा॥ १९॥

सर्वमन्त्रमयी पातु सर्वसौभाग्यदायिनी।
सर्वलक्ष्मीमयी देवी परमानन्ददायिनी॥ २०॥

पातु मां सर्वदा देवी नानाशङ्खनिधिः शिवा।
पातु पद्मनिधिर्देवी सर्वदा शिवदायिनी॥ २१॥

दक्षिणामूर्त्तिर्माम्पातु ऋषिः सर्वत्र मस्तके।
पङ्क्तिश्छन्दः स्वरूपा तु मुखे पातु सुरेश्वरी॥ २२॥

गन्धाष्टकात्मिका पातु हृदयं शङ्करी सदा।
सर्वसम्मोहिनी पातु पातु सङ्क्षोभिणी सदा॥ २३॥

सर्वसिद्धिप्रदा पातु सर्वाकर्षणकारिणी।
क्षोभिणी सर्वदा पातु वशिनी सर्वदावतु॥ २४॥

आकर्षिणी सदा पातु सम्मोहिनी सदावतु।
रतिर्देवी सदा पातु भगाङ्गा सर्वदावतु॥ २५॥

महेश्वरी सदा पातु कौमारी सर्वदावतु।
सर्वाह्लादनकारी माम्पातु सर्ववशङ्करी॥ २६॥

क्षेमङ्करी सदा पातु सर्वाङ्गसुन्दरी तथा।
सर्वाङ्गयुवतिः सर्वं सर्वसौभाग्यदायिनी॥ २७॥

p. 260) वाग्देवी सर्वदा पातु वाणिनी सर्वदावतु।
वशिनी सर्वदा पातु महासिद्धिप्रदा सदा॥ २८॥

सर्वविद्राविणी पातु गणनाथः सदावतु।
दुर्गा देवी सदा पातु बटुकः सर्वदावतु॥ २९॥

क्षेत्रपालः सदा पातु पातु चावरिशान्तिका।
अनन्तः सर्वदा पातु वराहः सर्वदावतु॥ ३०॥

पृथिवी सर्वदा पातु स्वर्णसिंहासनन्तथा।

रक्तामृतञ्च सततम्पातु मां सर्वकालतः॥ ३१॥

सुरार्णवः सदा पातु कल्पवृक्षः सदावतु।
श्वेतच्छत्रं सदा पातु रक्तदीपः सदावतु॥ ३२॥

नन्दनोद्यानं सततम्पातु मां सर्वसिद्धये।
दिक्पालाः सर्वदा पान्तु द्वन्द्वौघाः सकलास्तथा॥ ३३॥

वाहनानि सदा पान्तु अस्त्राणि पान्तु सर्वदा।
शस्त्राणि सर्वदा पान्तु योगिन्यः पान्तु सर्वदा॥ ३४॥

सिद्धाः पान्तु सदा देवी सर्वसिद्धिप्रदावतु।
सर्वाङ्गसुन्दरी देवी सर्वदावतु मान्तथा॥ ३५॥

आनन्दरूपिणी देवी चित्स्वरूपा चिदात्मिका।
सर्वदा सुन्दरी पातु सुन्दरी भवसुन्दरी॥ ३६॥

पृथग्देवालये घोरे सङ्कटे दुर्गमे गिरौ।
अरण्ये प्रान्तरे वापि पातु मां सुन्दरी सदा॥ ३७॥

इदङ्कवचमित्युक्तम्मन्त्रोद्धारश्च पार्वति।
यः पठेत्प्रयतो भूत्वा त्रिसन्ध्यन्नियतः शुचिः॥ ३८॥

तस्य सर्वार्त्थसिद्धिः स्याद्यद्यन्मनसि वर्त्तते।
गोरोचनाकुङ्कुमेन रक्तचन्दनकेन वा॥ ३९॥

स्वयम्भूकुसुमैः शुक्लैर्भूमिपुत्रे शनौ सुरे।
श्मशाने प्रान्तरे वापि शून्यागारे शिवालये॥ ४०॥

स्वशक्त्या गुरुणा यन्त्रम्पूजयित्वा कुमारिकाः।
तन्मनुम्पूजयित्वा च गुरुपङ्क्तिन्तथैव च॥ ४१॥

देव्यै बलिन्निवेद्याथ नरमार्जारसूकरैः।
नकुलैर्महिषैर्मेषैः पूजयित्वा विधानतः॥ ४२॥

धृत्वा सुवर्णमध्यस्तङ्कण्ठे वा दक्षिणे भुजे।
सुतिथौ शुभनक्षत्रे सूर्यस्योदयने तथा॥ ४३॥

धारयित्वा च कवचं सर्वसिद्धिँल्लभेन्नरः।
कवचस्य च माहात्म्यन्नाहँव्वर्षशतैरपि॥ ४४॥

p. 261) शक्नोमि तु महेशानि वक्तुन्तस्य फलन्तु यत्।
न दुर्भिक्षफलन्तत्र न चापि पीडनन्तथा॥ ४५॥

सर्वविघ्नप्रशमनं सर्वव्याधिविनाशनम्॥ ४६॥

सर्वरक्षाकरञ्चन्तोश्चतुर्वर्गफलप्रदम्।
यत्र कुत्र न वक्तव्यन्न दातव्यङ्कदाचन॥ ४७॥

मन्त्रम्प्राप्य विधानेन पूजयेत्सततं सुधीः।
तत्रापि दुर्ल्लभम्मन्ये कवचन्देवरूपिणम्॥ ४८॥

गुरोः प्रसादमासाद्य विद्याम्प्राप्य सुगोपिताम्।
तत्रापि कवचन्दिव्यन्दुर्ल्लभम्भुवनत्रये॥ ४९॥

श्लोकँव्वा स्तवमेकँव्वा यः पठेत्प्रयतः शुचिः।
तस्य सर्वार्त्थसिद्धिः स्याच्छङ्करेण प्रभाषितम्॥ ५०॥

गुरुर्द्देवो हरः साक्षात्पत्नी तस्य च पार्वती।
अभेदेन यजेद्यस्तु तस्य सिद्धिरदूरतः॥ ५१॥

इति श्रीरुद्रयामले भैरवभैरवीसँआदे श्रीभैरवीकवचं
सम्पूर्णम्॥

अथ हृदयम्

मेरौ गिरिवरेशानी शिवन्ध्यानपरायणम्।
पार्वती परिपप्रच्छ परानुग्रहवाञ्छया॥ १॥

श्रीपार्वत्युवाच

भगवंस्त्वन्मुखाम्भोजाच्छ्रुता धर्मा अनेकशः।
पुनश्श्रोतुं समिच्छामि भैरवीस्तोत्रमुत्तमम्॥ २॥

श्रीशङ्कर उवाच

शृणु देवि प्रवक्ष्यामि भैरवीहृदयाह्वयम्।
स्तोत्रन्तु परमम्पुण्यं सर्वकल्याणकारणम्॥ ३॥

यस्य श्रवणमात्रेण मङ्गलम्भवति ध्रुवम्।
विना ध्यानादिना वापि भैरवी परितुष्यति॥ ४॥

ओमस्य श्रीभैरवीहृदयमन्त्रस्य दक्षिणामूर्त्तिर्ऋषिः पङ्क्तिश्छन्दो
भयविध्वंसिनी भैरवी देवता हकारो बीजं रींशक्ति रैःकीलकं
सर्वभयविध्वंसनार्त्थे पाठे विनियोगः॥

अथाङ्गन्यासः

ॐह्रींहृदयायनमः, ॐश्रींशिरसेस्वाहा, ॐ-ऐंशिखायैवषट्,
ॐह्रींकवचायहुम्, ॐश्रींनेत्रत्रयायवौषट्, ॐ-ऐं-अस्त्रायफट्॥
एवं करन्यासः॥ अथ ध्यानम्॥

p. 262) देवैर्ध्येयान्त्रिनेत्रामसुरदलघनारण्यरोराग्निरूपां
रौद्रीं रक्ताम्बराढ्यां रतिघटिघटितोरोजयुग्मोग्ररूपाम्।
चन्द्रार्द्धभ्राजिभव्याभरणकरलसद्भालबिम्बाम्भवानीं
सिन्दूरापूरिताङ्गीन्त्रिभुवनजननीम्भैरवीम्भावयामि॥ १॥

भवभ्रमत्समस्तभूतवेदमार्गदायिनीन्दुरन्तदुःखदारिणीँ
विदारिणीं सुरद्रुहाम्।

भवप्रदाम्भवान्धकारभेदनप्रभाकरामितप्रभाम्भवच्छिदाम्ब्

हजामि भैरवीं सदा॥ १॥

उरः प्रलम्बिताहिमाल्यचन्द्रभालभूषणान्नवाम्बुदप्रभां

सरोजचारुलोचनत्रयाम्। सुपर्ववृन्दवंदितां

सुरापदन्तकारिकाम्भवानुभावभाविनीम्भजामि भैरवीं सदा॥ २॥

अखण्डभूमिमण्डलैकभारधीरधारिणीं सुभक्तिभावितात्मनाँ

व्विभूतिभव्यदायिनीम्।

भवप्रपञ्चकारिणीं व्विहारिणीम्भवाम्बुधौ भवस्य

हृद्यभाविनीम्भजामि भैरवीं सदा॥ ३॥

शरच्चमत्कृतार्च्यचन्द्रचंद्रिकाविरोधिकप्रभावतीमुखाब्जमञ्जुम

अधुरीमिलद्धिराम्॥

भुजङ्गमालया नृमुण्डमालया च मण्डितां

सुभक्तिमुक्तिभूतिदाम्भजामि भैरवीं सदा॥ ४॥

सुधांशुसूर्यवह्निलोचनत्रयान्विताननान्नरान्तकान्तकप्रभूतिपर्वद्

अत्तदक्षिणाम्।

समुण्डचण्डखण्डनप्रचण्डचन्द्रहासिनीन्तमोमतिप्रकाशिनीम्भजा

मि भैरवीं सदा॥ ५॥

त्रिशूलिनीन्त्रिपुण्ड्रनीं
त्रिखण्डिनीन्त्रिदण्डिनीङ्गुणत्रयातिरक्तमत्यचिन्त्यचित्स्वरूपिणीम्।
सवासवादितेयवैरिवृन्दवंशभेदिनीम्भवप्रभावभाविनीम्भजामि
भैरवीं सदा॥ ६॥

सुदीप्तकोटिबालभानुमण्डलप्रभाङ्गभादिगन्तदारितान्धकारभूरि
पुञ्जपद्धतिम्।
द्विजन्मनित्यधर्मनीतिवृद्धिलग्नमानसां सरोजरोचिराननाम्भजामि
भैरवीं सदा॥ ७॥

चलत्सुवर्णकुण्डलप्रभोल्लसत्कपोलरुक्समाकुलाननाम्बुजस्थशुभ्रकीर
नासिकाम्।
सचन्द्रभालभैरवस्य दर्शनस्पृहच्चकोरनीलकञ्जदर्शनाम्भजामि
भैरवीं सदा॥ ८॥

इमं हृदाख्यसङ्गतस्तवम्पठन्ति येऽनिशम्पतन्ति ते कदापि
नान्धकूपरूपवद्भवे।
p. 263) भवन्ति च प्रभूतिभक्तिमुक्तिमन्त उज्ज्वलास्ततः प्रसीदति

प्रमोदमानसा च भैरवी॥ ९॥

यशोजगत्यजस्त्रमुज्ज्वलञ्जयत्यलं समे न तस्य जायते पराजयोञ्जसा
जगत्त्रये।
सदा स्तुतिं शुभामिमाम्पठत्यनन्यमानसो भवन्ति तस्य सम्पदोऽपि
सन्ततं सुखप्रदाः॥ १०॥

जपपूजादिकास्सर्वाः स्तोत्रपाठादिकाश्च याः।
भैरवीहृदयस्यास्य कलान्नार्हन्ति षोडशीम्॥ ११॥

किमत्र बहुनोक्तेन शृणु देवि महेश्वरि।
नातः परतरङ्किञ्चित्पुण्यमस्ति जगत्त्रये॥ १२॥

इति श्रीभैरवीकुलसर्वस्वे श्रीभैरवीहृदयस्तोत्रं समाप्तम्॥

अथ शतनाम

श्रीदेव्युवाच

कैलासवासिन्भगवन्प्राणेश्वर कृपानिधे।
भक्तवत्सल भैरव्या नाम्नामष्टोत्तरं शतम्॥ १॥

न श्रुतन्देवदेवेश वद मान्दीनवत्सल।

श्रीशिव उवाच

शृणु प्रिये महागोप्यन्नाम्नामष्टोत्तरं शतम्॥ २॥

भैरव्याः शुभदं सेव्यं सर्वसम्पत्प्रदायकम्।
यस्यानुष्ठानमात्रेण किन्न सिद्ध्यति भूतले॥ ३॥

ॐ भैरवी भैरवाराध्या भूतिदा भूतभावना।
आर्या ब्राह्मी कामधेनुः सर्वसम्पत्प्रदायिनी॥ ४॥

त्रैलोक्यवन्दिता देवी महिषासुरमर्द्दिनी।
मोहघ्नी मालतीमाला महापातकनाशिनी॥ ५॥

क्रोधिनी क्रोधनिलया क्रोधरक्तेक्षणा कुहूः।
त्रिपुरा त्रिपुराधारा त्रिनेत्रा भीमभैरवी॥ ६॥

देवकी देवमाता च देवदुष्टविनाशिनी।
दामोदरप्रिया दीग्घा दुर्गा दुर्गतिनाशिनी॥ ७॥

लम्बोदरी लम्बकर्णा प्रलम्बितपयोधरा।
प्रत्यङ्गिरा प्रतिपदा प्रणतक्लेशनाशिनी॥ ८॥

प्रभावती गुणवती गणमाता गुहेश्वरी।
क्षीराब्धितनया क्षेम्या जगत्त्राणविधायिनी॥ ९॥

p. 264) महामारी महामोहा महाक्रोधा महानदी।
महापातकसंहन्त्री महामोहप्रदायिनी॥ १०॥

विकराला महाकाला कालरूपा कलावती।
कपालखट्वाङ्गधरा खड्गखर्परधारिणी॥ ११॥

कुमारी कुङ्कुमप्रीता कुङ्कुमारुणरञ्जिता।
कौमोदकी कुमुदिनी कीर्त्त्या कीर्त्तिप्रदायिनी॥ १२॥

नवीना नीरदा नित्या नन्दिकेश्वरपालिनी।

घग्घरा घग्घरारावा घोरा घोरस्वरूपिणी॥ १३॥

कलिघ्नी कलिधर्मघ्नी कलिकौतुकनाशिनी।
किशोरी केशवप्रीता क्लेशसङ्घनिवारिणी॥ १४॥

महोन्मत्त महामत्ता महाविद्या महीमयी।
महायज्ञा महावाणी महामन्दरधारिणी॥ १५॥

मोक्षदा मोहदा मोहा भुक्तिमुक्तिप्रदायिनी।
अट्टाट्टहासनिरता क्वणन्नूपुरधारिणी॥ १६॥

दीर्घदंष्ट्रा दीर्घमुखी दीर्घघोणा च दीर्घिका।
दनुजान्तकरी दुष्टा दुःखदारिद्र्यभञ्जिनी॥ १७॥

दुराचारा च दोषघ्नी दमपत्नी दयापरा।
मनोभवा मनुमयी मनुवंशप्रवर्द्धिनी॥ १८॥

श्यामा श्यामतनुः शोभा सौम्या शम्भुविलासिनी।
इति ते कथितन्दिव्यन्नाम्नामष्टोत्तरं शतम्॥ १९॥

भैरव्या देवदेवेश्यास्तव प्रीत्यै सुरेश्वरि।
अप्रकाश्यमिदङ्गोप्यम्पठनीयम्प्रयत्नतः॥ २०॥

देवीन्ध्यात्वा सुराम्पीत्वा मकारपञ्चकैः प्रिये।
पूजयेत्सततम्भक्त्या पठेत्स्तोत्रमिदं शुभम्॥ २१॥

षण्मासाभ्यन्तरे सोऽपि गणनाथसमो भवेत्।
किमत्र बहुनोक्तेन त्वदग्रे प्राणवल्लभे॥ २२॥

सर्वज्ञानासि सर्वज्ञे पुनर्माम्परिपृच्छसि।
न देयम्परशिष्येभ्यो निन्दकेभ्यो विशेषतः॥ २३॥

इति श्रीभैरव्यष्टोत्तरशतनामस्तोत्रं सम्पूर्णम्॥

अथ सहस्रनाम

महाकालभैरव उवाच

अथ वक्ष्ये महेशानि देव्या नामसहस्रकम्।
यत्प्रसादान्महादेवि चतुर्वर्गफलँल्लभेत्॥ १॥

p. 265) सर्वरोगप्रशमनं सर्वमृत्युविनाशनम्।

सर्वसिद्धिकरं स्तोत्रन्नातः परतः स्तवः॥ २॥

नातः परतरा विद्या तीर्त्थन्नातः परं स्मृतम्।

यस्यां सर्वं समुत्पन्नँय्यस्यामद्यापि तिष्ठति॥ ३॥

लयमेष्यति तत्सर्वं लयकाले महेश्वरि।

नमामि त्रिपुरान्देवीम्भैरवीं भयमोचिनीम्॥ ४॥

सर्वसिद्धिकरीं साक्षान्महापातकनाशिनीम्।

अस्य श्रीत्रिपुरभैरवीसहस्रनामस्तोत्रस्य भगवानृषिः,

पङ्क्तिश्छन्दः, आद्या शक्तिः, भगवती त्रिपुरभैरवी देवता,

सर्वकामार्त्थसिद्ध्यर्त्थं जपे विनियोगः॥

त्रिपुरा परमेशानी योगसिद्धिनिवासिनी।

सर्वमन्त्रमयी देवी सर्वसिद्धिप्रवर्त्तिनी॥

सर्वाधारमयी देवी सर्वसम्पत्प्रदा शुभा।

योगिनी योगमाता च योगसिद्धिप्रवर्त्तिनी॥

योगिध्येया योगमयी योगयोगनिवासिनी।
हेला लीला तथा क्रीडा कालरूपप्रवर्त्तिनी॥

कालमाता कालरात्रिः काली कामलवासिनी।
कमला कान्तिरूपा च कामराजेश्वरी क्रिया॥

कटुः कपटकेशा च कपटा कुलटाकृतिः।
कुमुदा चर्च्चिका कान्तिः कालरात्रिप्रिया सदा॥

घोराकारा घोरतरा धर्माधर्मप्रदा मतिः।
घण्टा घग्घरदा घण्टा घण्टानादप्रिया सदा॥

सूक्ष्मा सूक्ष्मतरा स्थूला अतिस्थूला सदा मतिः।
अतिसत्या सत्यवती सत्यसङ्केतवासिनी॥

क्षमा भीमा तथा भीमा भीमनादप्रवर्त्तिनी।
भ्रमरूपा भयहरा भयदा भयनाशिनी॥

श्मशानवासिनी देवी श्मशानालयवासिनी।

शवासना शवाहारा शवदेहा शिवाशिवा॥

कण्ठदेशशवाहारा शवकङ्कणधारिणी।

दन्तुरा सुदती सत्या सत्यसङ्केतवासिनी॥

सत्यदेहा सत्यहारा सत्यवादिनिवासिनी।

सत्यालया सत्यसङ्गा सत्यसङ्गरकारिणी॥

असङ्गा साङ्गरहिता सुसङ्गा सङ्गमोहिनी।

मायामतिर्महामाया महामखविलासिनी॥

गलद्रुधिरधारा च मुखद्वयनिवासिनी।

p. 266) सत्यायासा सत्यसङ्गा सत्यसङ्गतिकारिणी॥

असङ्गा सङ्गनिरता सुसङ्गा सङ्गवासिनी।

सदासत्या महासत्या मांसपाशा सुमांसका॥

मांसाहारा मांसधरा मांसाशी मांसभक्षका।

रक्तपाना रक्तरुचिरा रक्ता रक्तवल्लभा॥

रक्ताहारा रक्तप्रिया रक्तनिन्दकनाशिनी।
रक्तपानप्रिया बाला रक्तदेशा सुरक्तिका॥

स्वयम्भूकुसुमस्था च स्वयम्भूकुसुमोत्सुका।
स्वयम्भूकुसुमाहारा स्वयम्भूनिन्दकासना॥

स्वम्भूपुष्पकप्रीता स्वयम्भूपुष्पसम्भवा।
स्वयम्भूपुष्पहाराढ्या स्वयम्भूनिन्दकान्तका॥

कुण्डगोलविलासी च कुण्डगोलसदामतिः।
कुण्डगोलप्रियकरी कुण्डगोलसमुद्भवा॥

शुक्रात्मिका शुक्रकरा सुशुक्रा च सुशुक्तिका।
शुक्रपूजकपूज्या च शुक्रनिन्दकनिन्दका॥

रक्तमाल्या रक्तपुष्पा रक्तपुष्पकपुष्पका।
रक्तचन्दनसिक्ताङ्गी रक्तचन्दननिन्दका॥

मत्स्या मत्स्यप्रिया मान्या मत्स्यभक्षा महोदया।

मत्स्याहारा मत्स्यकामा मत्स्यनिन्दकनाशिनी॥

केकराक्षी तथा क्रूरा क्रूरसैन्यविनाशिनी।
क्रूराङ्गी कुलिशाङ्गी च चक्राङ्गी चक्रसम्भवा॥

चक्रदेहा चक्रहारा चक्रकङ्कालवासिनी।
निम्ननाभी भीतिहरा भयदा भयहारिका॥

भयप्रदा भयभीता अभीमा भीमनादिनी।
सुन्दरी शोभना सत्या क्षेम्या क्षेमकरी तथा॥

सिन्दूराञ्चितसिन्दूरा सिन्दूरसदृशाकृतिः।
रक्तारञ्जितनासा च सुनासा निम्ननासिका॥

खर्वा लम्बोदरी दीर्घा दीर्घघोणा महाकुचा।
कुटिला चञ्चला चण्डी चण्डनादप्रचण्डिका॥

अतिचण्डा महाचण्डा श्रीचण्डाचण्डवेगिनी।
चाण्डाली चण्डिका चण्डशब्दरूपा च चञ्चला॥

चम्पा चम्पावती चोस्ता तीक्ष्णा तीक्ष्णप्रिया क्षतिः।
जलदा जयदा योगा जगदानन्दकारिणी॥

जगद्वन्द्या जगन्माता जगती जगतक्षमा।
जन्या जयजनेत्री च जयिनी जयदा तथा॥

p. 267) जननी च जगद्धात्री जयाख्या जयरूपिणी।
जगन्माता जगन्मान्या जयश्रीर्ज्जयकारिणी॥

जयिनी जयमाता च जया च विजया तथा।
खङ्गिनी खड्गरूपा च सुखड्गा खड्गधारिणी॥

खड्गरूपा खड्गकरा खड्गिनी खड्गवल्लभा।
खड्गदा खड्गभावा च खड्गदेहसमुद्भवा॥

खड्गा खड्गधरा खेला खड्गिनी खड्गमण्डिनी।
शङ्खिनी चापिनी देवी वज्रिणी शुलिनी मतिः॥

वालिनी भिन्दिपाली च पाशी च अङ्कुशी शरी।
धनुषी चटकी चर्मा दन्ती च कर्णनालिकी॥

मुसली हलरूपा च तूणीरगणवासिनी।
तूणालया तूणहरा तूणसम्भवरूपिणी॥

सुतूणी तूणखेदा च तूणाङ्गी तूणवल्लभा।
नानास्त्रधारिणी देवी नानाशस्त्रसमुद्भवा॥

लाक्षा लक्षहरा लाभा सुलाभा लाभनाशिनी।
लाभहारा लाभकरा लाभिनी लाभरूपिणी॥

धरित्री धनदा धान्या धन्यरूपा धरा धनुः।
धुरशब्दा धुरामान्या धराङ्गी धननाशिनी॥

धनहा धनलाभा च धनलभ्या महाधनुः।
अशान्ता शान्तिरूपा च श्वासमार्गनिवासिनी॥

गगणागणसेव्या च गणाङ्गावागवल्लभा।
गणदा गणहा गम्या गमनागमसुन्दरी॥

गम्यदा गणनाशी च गदहा गदवर्द्धिनी।

स्थैर्या च स्थैर्यनाशा च स्थैर्यान्तकरणी कुला॥

दात्री कर्त्री प्रिया प्रेमा प्रियदा प्रियवर्द्धिनी।
प्रियहा प्रियभव्या च प्रियप्रेमाङ्घ्रिपातनुः॥

प्रियजा प्रियभव्या च प्रियस्था भवनस्थिता।
सुस्थिरा स्थिररूपा च स्थिरदा स्थैर्यबर्हिणी॥

चञ्चला चपला चोला चपलाङ्गनिवासिनी।
गौरी काली तथा छिन्ना माया मान्या हरप्रिया॥

सुन्दरी त्रिपुरा भव्या त्रिपुरेश्वरवासिनी।
त्रिपुरनाशिनी देवी त्रिपुरप्राणहारिणी॥

भैरवी भैरवस्था च भैरवस्य प्रिया तनुः।
भवाङ्गी भैरवाकारा भैरवप्रियवल्लभा॥

p.268) कालदा कालरात्रिश्च कामा कात्यायनी क्रिया।
क्रियदा क्रियहा क्लैब्या प्रियप्राणक्रिया तथा॥

क्रीङ्कारी कमला लक्ष्मीः शक्तिः स्वाहा विभुः प्रभुः।
प्रकृतिः पुरुषश्चैव पुरुषापुरुषाकृतिः॥

परमः पुरुषश्चैव माया नारायणी मतिः।
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा॥

वाराही चैव चामुण्डा इन्द्राणी हरवल्लभा।
भग्गीं माहेश्वरी कृष्णा कात्यायन्यपि पूतना॥

राक्षसी डाकिनी चित्रा विचित्रा विभ्रमा तथा।
हाकिनी राकिनी भीता गन्धर्वा गन्धवाहिनी॥

केकरी कोटराक्षी च निर्मांसालूकमांसिका।
ललज्जिह्वा सुजिह्वा च बालदा बालदायिनी॥

चन्द्रा चन्द्रप्रभा चान्द्री चन्द्रकांतिषु तत्परा।
अमृता मानदा पूषा तुष्टिः पुष्टी रतिर्धृतिः॥

शशिनी चन्द्रिका कांतिर्ज्योत्स्ना श्रीः प्रीतिरङ्गदा।
पूर्णा पूर्णामृता कल्पलतिका कल्पदानदा॥

सुकल्पा कल्पहस्ता च कल्पवृक्षकरी हनुः।
कल्पाख्या कल्पभव्या च कल्पानन्दकवन्दिता॥

सूचीमुखी प्रेतमुखी उल्कामुखी महासुखी।
उग्रमुखी च सुमुखी काकास्या विकटानना॥

कृकलास्या च सन्ध्यास्या मुकुलीशा रमाकृतिः।
नानामुखी च नानास्या नानारूपप्रधारिणी॥

विश्वार्च्या विश्वमाता च विश्वाख्या विश्वभाविनी।
सूर्या सुर्यप्रभा शोभा सूर्यमण्डलसंस्थिता॥

सूर्यकांतिः सूर्यकरा सूर्याख्या सूर्यभावना।
तपिनी तापिनी धूम्रा मरीचिर्ज्वालिनी रुचिः॥

सुरदा भोगदा विश्वा बोधिनी धारिणी क्षमा।
युगदा योगहा योग्या योग्यहा योगवर्द्धिनी॥

वह्निमण्डलसंस्था च वह्निमण्डलमध्यगा।

वह्निमण्डलरूपा च वह्निमण्डलसञ्ज्ञका॥

वह्नितेजा वह्निरागा वह्निदा वह्निनाशिनी।
वह्निक्रिया वह्निभुजा कला वह्नौ स्थिता सदा॥

धूम्रार्च्चिषा उज्ज्वलिनी तथा च विस्फुलिङ्गिनी।
शूलिनी च सुरूपा च कपिला हव्यवाहिनी॥

p. 269) नाना तेजस्विनी देवी परब्रह्मकुटुम्बिनी।
ज्योतिर्ब्रह्ममयी देवी प्रब्रह्मस्वरूपिणी॥

परमात्मा परा पुण्या पुण्यदा पुण्यवर्द्धिनी।
पुण्यदा पुण्यनाम्नी च पुण्यगन्धा प्रियातनुः॥

पुण्यदेहा पुण्यकरा पुण्यनिन्दकनिन्दका।
पुण्यकालकरा पुण्या सुपुण्या पुण्यमालिका॥

पुण्यखेला पुण्यकेली पुण्यनामसमा पुरा।
पुण्यसेव्या पुण्यखेल्या पुराणपुण्यवल्लभा॥

पुरुषा पुरुषप्राणा पुरुषात्मस्वरूपिणी।
पुरुषाङ्गी च पुरुषी पुरुषस्य कला सदा॥

सुपुष्पा पुष्पकप्राणा पुष्पहा पुष्पवल्लभा।
पुष्पप्रिया पुष्पहारा पुष्पवन्दकवन्दका॥

पुष्पहा पुष्पमाला च पुष्पनिन्दकनाशिनी।
नक्षत्रप्राणहन्त्री च नक्षत्रालक्षवन्दका॥

लक्ष्यमाल्या लक्षहारा लक्षा लक्षस्वरूपिणी।
नक्षत्राणी सुनक्षत्रा नक्षत्राहा महोदया॥

महामाल्या महामान्या महती मातृपूजिता।
महामहाकनीया च महाकालेश्वरी महा॥

महास्या वन्दनीया च महाशब्दनिवासिनी।
महाशङ्खेश्वरी मीना मत्स्यगन्धा महोदरी॥

लम्बोदरी च लम्बोष्ठी लम्बनिम्नतनूदरी।
लम्बोष्ठी लम्बनासा च लम्बघोणा ललत्सुका॥

अतिलम्बा महालम्बा सुलम्बा लम्बवाहिनी।
लम्बार्हा लम्बशक्तिश्च लम्बस्था लम्बपूर्विका॥

चतुर्घण्टा महाघण्टा घण्टानादप्रिया सदा।
वाद्यप्रिया वाद्यरता सुवाद्या वाद्यनाशिनी॥

रमा रामा सुबाला च रमणीयस्वभाविनी।
सुरम्या रम्यदा रम्भा रम्भोरू रामवल्लभा॥

कामप्रिया कामकरा कामाङ्गी रमणी रतिः।
रतिप्रिया रति रती रतिसेव्या रतिप्रिया॥

सुरभिः सुरभी शोभा दिक्षोभा शुभनाशिनी।
सुशोभा च महाशोभाऽतिशोभा प्रेततापिनी॥

लोभिनी च महालोभा सुलोभा लोभवर्द्धिनी।
लोभाङ्गी लोभवन्द्या च लोभाही लोभभासका॥

लोभप्रिया महालोभा लोभनिन्दकनिन्दका।

p. 270) लोभाङ्गवासिनी गन्धविगन्धा गन्धनाशिनी॥

गन्धाङ्गी गन्धपुष्टा च सुगन्धा प्रेमगन्धिका।
दुर्ग्गन्धा पूतिगन्धा च विगन्धा अतिगन्धिका॥

पद्मान्तिका पद्मवहा पद्मप्रियप्रियङ्करी।
पद्मनिन्दकनिन्दा च पद्मसन्तोषवाहना॥

रक्तोत्पलवरा देवी रक्तोत्पलप्रिया सदा।
रक्तोत्पलसुगन्धा च रक्तोत्पलनिवासिनी॥

रक्तोत्पलग्रहामाला रक्तोत्पलमनोहरा।
रक्तोत्पलसुनेत्रा च रक्तोत्पलस्वरूपधृक्॥

वैष्णवी विष्णुपूज्या च वैष्णवाङ्गनिवासिनी।
विष्णुपूजकपूज्या च वैष्णवे संस्थिता तनुः॥

नारायणस्य देहस्था नारायणमनोहरा।
नारायणस्वरूपा च नारायणमनःस्थिता॥

नारायणाङ्गसम्भूता नारायणप्रियातनुः।
नारी नारायणीगण्या नारायणगृहप्रिया॥

हरपूज्या हरश्रेष्ठा हरस्य वल्लभा क्षमा।
संहारी हरदेहस्था हरपूजनतत्परा॥

हरदेहसमुद्भूता हराङ्गवासिनीकुहूः।
हरपूजकपूज्या च हरवन्दकतत्परा॥

हरदेहसमुत्पन्ना हरक्रीडासदागतिः।
सुगणासङ्गरहिता असङ्गासङ्गनाशिनी॥

निर्ज्जना विजना दुर्गा दुर्गक्लेशनिवारिणी।
दुर्गदेहान्तका दुर्गारूपिणी दुर्गतस्थिका॥

प्रेतकरा प्रेतप्रिया प्रेतदेहसमुद्भवा।
प्रेताङ्गवासिनी प्रेता प्रेतदेहविमर्द्दका॥

डाकिनी योगिनी कालरात्रिः कालप्रिया सदा।
कालरात्रिहरा काला कृष्णदेहा महातनुः॥

कृष्णाङ्गी कुटिलाङ्गी च वज्राङ्गी वज्ररूपधृक्।
नानादेहधरा धन्या षड्चक्रक्रमवासिनी॥

मूलाधारनिवासी च मूलाधारस्थिता सदा।
वायुरूपा महारूपा वायुमार्गनिवासिनी॥

वायुयुक्ता वायुकरा वायुपूरकपूरका।
वायुरूपधरा देवी सुषुम्नामार्गगामिनी॥

देहस्था देहरूपा च देहध्येया सुदेहिका।
नाडीरूपा महीरूपा नाडीस्थाननिवासिनी॥

इङ्गला पिङ्गला चैव सुषुम्नामध्यवासिनी।
सदाशिवप्रियकरी मूलप्रकृतिरूपधृक्॥

अमृतेशी महाशाली शृङ्गाराङ्गनिवासिनी।
p. 271) उपत्तिस्थितिसंहन्त्री प्रलयापदवासिनी॥

महाप्रलययुक्ता च सृष्टिसंहारकारिणी।

स्वधा स्वाहा हव्यवाहा हव्या हव्यप्रिया सदा॥

हव्यस्था हव्यभक्षा च हव्यदेहसमुद्भवा।
हव्यक्रीडा कामधेनुस्वरूपा रूपसम्भवा॥

सुरभी नन्दनी पुण्या यज्ञाङ्गी यज्ञसम्भवा।
यज्ञस्था यज्ञदेहा च योनिजा योनिवासिनी॥

अयोनिजा सती सत्या असती कुटिलातनुः।
अहल्या गौतमी गम्या विदेहा देहनाशिनी॥

गान्धारी द्रौपदी दूती शिवप्रिया त्रयोदशी।
पञ्चदशी पौर्णमासी चतुर्दशी च पञ्चमी॥

षष्ठी च नवमी चैव अष्टमी दशमी तथा।
एकादशी द्वादशी च द्वाररूपीभयप्रदा॥

सङ्क्रान्त्या सामरूपा च कुलीना कुलनाशिनी।
कुलकान्ता कृशा कुम्भा कुम्भदेहविवर्द्धिनी॥

विनीता कुलवत्यर्त्थी अन्तरी चानुगाप्युषा।
नदीसागरदा शान्तिः शान्तिरूपा सुशान्तिका॥

आशा तृष्णा क्षुधा क्षोभ्या क्षोभरूपनिवासिनी।
गङ्गासागरगा कान्तिः श्रुतिः स्मृतिर्द्धृतिर्मही॥

दिवारात्रिः पञ्चभूतदेहा चैव सुदेहका।
तण्डुला च्छिन्नमस्ता च नागयज्ञोपवीतिनी॥

वर्णिनी डाकिनी शक्तिः कुरुकुल्ला सुकुल्लका।
प्रत्यङ्गिराऽपरा देवी अजिता जयदायिनी॥

जया च विजया चैव महिषासुरघातिनी।
मधुकैटभहन्त्री च चण्डमुण्डविनाशिनी॥

निशुम्भशुम्भहननी रक्तबीजक्षयङ्करी।
काशी काशीनिवासी च मधुरा पार्वती परा॥

अपर्णा चण्डिका देवी मृडानी चाम्बिका कला।
शुक्ला कृष्णा वर्णवर्णा शरदिन्दुकलाकृतिः॥

रुक्मिणी राधिका चैव भैरव्याः परिकीर्त्तितम्।
अष्टाधिकसहस्रन्तु देव्या नामानुकीर्त्तनात्॥

महापातकयुक्तोऽपि मुच्यते नात्र संशयः।
ब्रह्महत्या सुरापानं स्तेयङ्गुर्वङ्गनागमः॥

महापातककोट्यस्तु तथा चैवोपपातकाः।
स्तोत्रेण भैरवोक्तेन सर्वन्नश्यति तत्क्षणात्॥

p. 272) सर्वँव्वा श्लोकमेकँव्वा पठनात्स्मरणादपि।
पठेद्वा पाठयेद्वापि सद्यो मुच्येत बन्धनात्॥

राजद्वारे रणे दुर्गे सङ्कटे गिरिदुर्ग्गमे।
प्रान्तरे पर्वते वापि नौकायाँव्वा महेश्वरि॥

वह्निदुर्गभये प्राप्ते सिंहव्याघ्रभ्याकुले।
पठनात्स्मरणान्मर्त्त्यो मुच्यते सर्वसङ्कटात्॥

अपुत्रो लभते पुत्रन्दरिद्रो धनवान्भवेत्।

सर्वशास्त्रपरो विप्रः सर्वयज्ञफलँल्लभेत्॥

अग्निवायुजलस्तम्भङ्गतिस्तम्भँविवस्वतः।
मारणे द्वेषणे चैव तथोच्चाटे महेश्वरि॥

गोरोचनाकुङ्कुमेन लिखेत्स्तोत्रमनन्यधीः।
गुरुणा वैष्णवैर्वापि सर्वयज्ञफलँल्लभेत्॥

वशीकरणमत्रैव जायन्ते सर्वसिद्धयः।
प्रातःकाले शुचिर्भूत्वा मध्याह्ने च निशामुखे॥

पठेद्वा पाठयेद्वापि सर्वयज्ञफलँल्लभेत्।
वादी मूको भवेद्दुष्टो राजा च सेवको यथा॥

आदित्यमङ्गलदिने गुरौ वापि महेश्वरि।
गोरोचनाकुङ्कुमेन लिखेत्स्तोत्रमनन्यधीः॥

गुरुणा वैष्णवैर्वापि सर्वयज्ञफलँल्लभेत्।
धृत्वा सुवर्णमध्यस्थं सर्वान्कामानवाप्नुयात्॥

स्त्रीणाँव्वामकरे धार्यम्पुमान्दक्षकरे तथा।
आदित्यमङ्गलदिने गुरौ वापि महेश्वरि॥

शनैश्चरे लिखेद्वापि सर्वसिद्धिं लभेद्ध्रुवम्।
प्रान्तरे वा श्मशाने वा निशायामर्द्धरात्रके॥

शून्यागारे च देवेशि लिखेद्यत्नेन साधकः।
सिंहराशौ गुरुगते कर्कटस्थे दिवाकरे॥

मीनराशौ गुरुगते लिखेद्यत्नेन साधकः।
रजस्वलाभगन्दृष्ट्वा तत्रस्थो विलिखेत्सदा॥

सुगन्धिकुसुमैः शुक्रैः सुगन्धिगन्धचन्दनैः।
मृगनाभिमृगमदैर्विलिखेद्यत्नपूर्वकम्॥

लिखित्वा च पठित्वा च धारयेच्चाप्यनन्यधीः।
कुमारीम्पूजयित्वा च नारीश्चापि प्रपूजयेत्॥

पूजयित्वा च कुसुमैर्ग्गन्धचन्दनवस्त्रकैः।
सिन्दूररक्तकुसुमैः पूजयेद्भक्तियोगतः॥

अथवा पूजयेद्देवि कुमारीर्द्दशमावधीः।
सर्वाभीष्टफलन्तत्र लभते तत्क्षणादपि॥

नात्र सिद्धाद्यपेक्षास्ति न वा मित्रारिदूषणम्।
p. 273) न विचार्यश्च देवेशि जपमात्रेण सिद्धिदम्॥

सर्वदा सर्वकार्येषु षड्वाहस्त्रप्रमाणतः।
बलिन्दत्त्वा विधानेन प्रत्यहम्पूजयेच्छिवाम्॥

स्वयम्भूकुसुमैः पुष्पैर्ब्बलिदानन्दिवानिशम्।
पूजयेत्पार्वतीन्देवीम्भैरवीन्त्रिपुरात्मिकाम्॥

ब्राह्मणान्भोजयेन्नित्यन्दशकन्द्वादशन्तथा।
अनेन विधिना देवि बालान्नित्यम्प्रपूजयेत्॥

मासमेकम्पठेद्यस्तु त्रिसन्ध्यँव्विधिनामुना।
अपुत्रो लभते पुत्रन्निर्द्धनो धनवान्भवेत्॥

सदा चानेन विधिना तथा मासत्रयेण च।

कृतकार्यं भवेद्देवि तथा मासचतुष्टये॥

दीर्घरोगात्प्रमुच्येत पञ्चमे कविराड्भवेत्।
सर्वैश्वर्यं लभेद्देवि मासषट्के तथैव च॥

सप्तमे खेचरत्वञ्च अष्टमे च वृहद्द्युतिः।
नवमे सर्वसिद्धिः स्याद्दशमे लोकपूजितः॥

एकादशे राजवश्यो द्वादशे तु पुरन्दरः।
वारमेकम्पठेद्यस्तु प्राप्नोति पूजने फलम्॥

समग्रं श्लोकमेकँव्वा यः पठेत्प्रयतः शुचिः।
स पूजाफलमाप्नोति भैरवेण च भाषितम्॥

आयुष्मत्प्रीतियोगे च ब्राह्मैन्द्रे च विशेषतः।
पञ्चम्याञ्च तथा षष्ठ्याँय्यत्र कुत्रापि तिष्ठति॥

शङ्का न विद्यते तत्र न च मायादिदूषणम्।
वारमेकं पठेन्मर्त्त्यो मुच्यते सर्वसङ्कटात्॥

किमन्यद्बहुना देवि सर्वाभीष्टफलँल्लभेत्।

इति श्रीविश्वसारे महाभैरवविरचितं
श्रीमत्त्रिपुरभैरवीसहस्रनामस्तोत्रं समाप्तम्॥

इति शाक्तप्रमोदे त्रिपुरभैरवीतन्त्रं समाप्तम्॥

श्रीः

शिवहरराजधानीपतिश्रीराजादेवनन्दनसिंह-
बहादुरनराधिपसंगृहीतविरचित-

शाक्तप्रमोदान्तर्गतं

सप्तमं

धूमावतीतन्त्रम्

उक्तराजगुरुवंश्यपण्डितश्रीरघुराजदुबेजीद्वारा

संशोधितम्

तदेतत्

श्रीकृष्णदासात्मज-खेमराजेन

स्वकीये श्रीवेंकटेश्वर यन्त्रालये

मुद्रयित्वा प्रकाशितम्

बोम्ब-ई

श्रीगणेशाय नमः

अथ शाक्तप्रमोदः

धूमावतीतन्त्रम्

अथ धूमावतीध्यानम्

विवर्णा चञ्चला दुष्टा दीर्घा च मलिनाम्बरा।
विमुक्तकुन्तला रूक्षा विधवा विरलद्विजा॥

काकध्वजरथारूढा विलम्बितपयोधरा।
शूर्पहस्तातिरूक्षाक्षा धूतहस्ता वरान्विता॥

प्रवृद्धघोणा तु भृशङ्कुटिला कुटिलेक्षणा।
क्षुत्पिपासार्दिता नित्यम्भयदा कलहास्पदा॥

p. 278) अथ यन्त्रोद्धारः

अनुक्तकल्पे यन्त्रन्तु लिखेत्पद्मन्दलाष्टकम्।
षट्कोणकर्णिकन्तत्र वेदद्वारोपशोभितम्॥

अथ मन्त्रोद्धारः

दान्तौ सर्वीशबिन्द्वन्तबीजे धूमावती द्विठः।

धूमावतीमनुः प्रोक्तो वैरिनिग्रहकारकः॥

अथ मन्त्रः

धूँहूँहूमावतीठः ठः

अथ पूजाविधिः

तत्र प्रथममृष्यादिन्यासङ्कुर्यात्॥ शिरसि पिप्पलादमुनये नमः,

मुखे निचृच्छन्दसेनमः, हृदि धूमावत्यै नमः॥

अथाङ्गन्यासः

ॐ धाँऋदयायनमः, ॐधींशिरसेस्वाहा, ॐधूँहिखायैवषट्,

ॐधैंकवचायहूम्, ॐधौंनेत्रत्रयायवौषट्, ॐधः-अस्त्रायफट्।

ततः करन्यासः

ॐ धाँअङ्गुष्ठाभ्यान्नमः, ॐ धीं तर्जनीभ्यांस्वाहा,

ॐ धूँअध्यमाभ्याँवषट्, ॐ धैं अनामिकाभ्यांहूम्,

ॐ धौंकनिष्ठाभ्याँवौषट्॥ ॐ धः करतलकरपृष्ठाभ्याम्फट्॥

ततो ध्यानम्

विवर्णा चञ्चला कृष्णा दीर्घा च मलिनाम्बरा।

विमुक्तकुन्तला रूक्षा विधवा विरलद्विजा॥ १॥

काकध्वजरथारूढा विलम्बितपयोधरा।

p. 279) शूर्पहस्तातिरूक्षाक्षा धूतहस्ता वरान्विता॥ २॥

प्रवृद्धघोणा तु भृशङ्कुटिला कुटिलेक्षणा।

क्षुत्पिपासार्दिता नित्यम्भयदा कलहास्पदा॥ ३॥

इति ध्यात्वा प्राणादीन्प्रतिष्ठापयेत्॥ तद्यथा॥

आँह्रीँक्रों यँरँलँवँशँषँसँहों ॐ क्षँसँहँसः ह्रीँॐ हँसँ

श्रीमद्धूमावत्याः प्राणा इह प्राणाः॥

आँह्रीँक्रों यँरँलँवँशँषँसँहों ॐ क्षँसँहँसः ह्रीं ॐ हँअः

श्रीमद्भूमावत्या जीव इह स्थितः।

ॐ ह्रीं क्रों यँरँलँवँशँषँसँहों ॐ क्षँसँहँअः ह्रीं ॐ हँअः

श्रीमद्भूमावत्यास्सर्वेन्द्रियाणि इह स्थितानि।

आँह्रीं क्रों यँरँलँवँशँषँसँहों ॐ क्षँसँहँअः

श्रीमद्भूमावत्या वाङ्मनश्चक्षुश्श्रोत्रघ्राणप्राणा इहागत्य

सुखञ्चिरन्तिष्ठन्तु स्वाहा॥

ततो देवतारूपमात्मानन्ध्यात्वा॥

प्राणाययममृष्यादिन्यासषडङ्गन्यासकरन्यासान्विधाय

मातृकन्यासमाचरेत्॥ तत्र ओमस्य मातृकामन्त्रस्य ब्रह्मा

ऋषिर्गायत्री छन्दो मातृकासरस्वतीदेवता हलो बीजानि

स्वराश्शक्तयस्तदुभयङ्कीलकमभीष्टसिद्ध्यर्थे विनियोगः।

शिरसि ब्रह्मणे ऋषये नमः। मुखे गायत्रीछन्दसे नमः।

हृदि मातृकासरस्वत्यै देवतायै नमः। लिङ्गे हल्भ्यो बीजेभ्यो नमः।

पादयोस्स्वरेभ्यश्शक्तिभ्योनमः। सर्वांगे तदुभयकीलकाय नमः।

अथ षडङ्गन्यासः

अँकँखँगँघँङँआँहृदयाय नमः,

इँचँछँजँझँञँईँशिरसे स्वाहा,

उँटँठँडँढँणँऊँशिखायैवषट्,

एँतँथँदँधँनँऐं कवचायहुम्,

ओं पँफँबँभँमँऔं नेत्रत्रयायवौषट्,

अँयँरँलँवँशँषँहँक्षँअः अस्त्रायफट्॥

एवङ्करन्यासो यथा

अँकँखँगँघँङँआँअङ्गुष्ठाभ्यान्नमः,

इँचँछँजँझँञँई तर्ज्जनीभ्यां स्वाहा ,

उँटँठँडँढँणँऊँमध्यमाभ्यांव्वषट्,

एँतँथँदँधँनँऐं अनामिकाभ्यांहूम्,

ओं पँफँबँभँमँऔं कनिष्ठिकाभ्याँवौषट्,

अँयँरँलँवँशँषँसँहँक्षँअः करतलकरपृष्ठाभ्याम्फट्॥

अथ मातृकान्यासः

ललाटे अँअमः, मुखवृत्ते आँअमः, दक्षनेत्रे इंनमः, वामनेत्रे

ईँनमः, दक्षकर्णे उँअमः, वामकर्णे ऊँअमः, दक्षनासायाम्

ॠँअमः,

p. 280) वामनासायाम् ॠँअमः, दक्षगण्डे ऌँअमः, वामगण्डे
ॡँअमः, ऊर्ध्वोष्ठे एँअमः, अधरोष्ठे ऐँअमः, ऊर्ध्वदन्तपङ्क्तौ
ओंनमः, अधोदन्तपङ्क्तौ औंनमः, शिरसि अँअमः, मुखे अःनमः,
दक्षिणबाहुमूले कँअमः, कूर्परे खँअमः, मणिबन्धे गँअमः,
अङ्गुलीमूले घँअमः, अङ्गुल्यग्रे ङँअमः, वामबाहुमूले
चँअमः, कूर्परे छँअमः, मणिबन्धे जँअमः, अङ्गुलीमूले
झँअमः, अङ्गुल्यग्रे ञँअमः, दक्षिणोरुमूले टँअमः, जानुनि
ठँअमः, गुल्फे डँअमः, अङ्गुलीमूले ढँअमः, अङ्गुल्यग्रे
णँअमः, वामोरुमूले तँअमः, जानुनि थँअमः, गुल्फे दँअमः,
अङ्गुलीमूले धँअमः, अङ्गुल्यग्रे नँअमः, दक्षपार्श्वे पँअमः,
वामपार्श्वे फँअमः, पृष्ठे बँअमः, नाभौ भँअमः, उदरे
मँअमः, हृदये यँवगात्मनेनमः, दक्षांसे रँअसृगात्मनेनमः,
ककुदि लँआंसात्मनेनमः, वामांसे वँएद्-आत्मनेनमः,
हृदयाद्दक्षभुजाग्रान्तं शमस्थ्यात्मनेनमः,
हृदयाद्वामभुजाग्रान्तं षँअज्जात्मनेनमः,
हृदयाद्दक्षपादाग्रान्तं सँहुक्रात्मनेनमः,
हृदादिवामपादाग्रान्तं हँआत्मनेनमः,
हृदयान्मस्तकान्तं क्षंपरमात्मनेनमः ॥

इतिबहिर्मातृकान्यासः॥ ततो मानसैरुपचौरर्द्देवीम्पूजयेत्॥ तत्र
प्रार्त्थयेदनेन मन्त्रेण॥ धूमावति स्वागतन्ते सन्निधौ भव
साम्प्रतम्॥ गृहाण मानसीम्पूजाँय्यथार्त्थपरिभावितम्॥
ततोऽष्टोत्तरशतम्मूलमन्त्रँव्वर्णमय्या मालया जपेत्॥ इति मानसी
पूजाविधिः॥

अथ बहिः पूजा॥

तत्र प्राणायामषडङ्गन्यासादि विधाय
प्रथमञ्चतुःषोडशाष्टवारजप्तेन मूलमन्त्रेण
पूरककुम्भकरेचकाख्यम्प्राणायामत्रयङ्कृत्वा ततः
षडङ्गन्यासादि कुर्यात्। तद्यथा।

धांहृदयायनमः, धींशिरसेस्वाहा, धूँहिखायैवषट्,
धैंकवचायहूम्, धौंनेत्रत्रयायवौषट्, धः-अस्त्रायफट्॥ इति
छोटिकया दिग्बन्धनङ्कुर्यात्॥

एवङ्करन्यासः॥

धां-अङ्गुष्ठाभ्यान्नमः, धींतर्ज्जनीभ्यांस्वाहा,

धूँअध्यमाभ्यांव्वषट्,

p. 281) धैं-अनामिकाभ्यांहूम्, धौंकनिष्ठिकाभ्याँवौषट्,

धःकरतलकरपृष्ठाभ्याम्फट्॥

एवन्न्यासादि कृत्वा अग्घ्र्यस्थापनङ्कुर्यात्॥ तद्यथा॥

त्रिकोणवृत्तषट्कोणचतुरस्त्रमण्डलँव्विरच्य इमिति विलिख्य मूलमन्त्रेण

त्रिकोणं सम्पूज्य षडङ्गेषु षडङ्गं सम्पूज्य। चतुरस्त्रे

पूर्णगिरिपीठायनम इतिपूर्वे, ऊड्डीयानपीठायनम इतिदक्षिणे,

कामरूपपीठायनम इतिपश्चिमे, जालन्धरपीठायनम इत्युत्तरे॥ इति

सम्पूज्य॥ मध्ये ॐ आधारशक्तयेनमः इति सम्पूज्य॥

त्रिकोणगर्ब्भषट्कोणभूषिताँय्यन्त्रिकाँमूलेन सँथाप्य नम इति

सामान्याग्घ्र्यस्थजलेनाभ्युक्ष्य॥ गङ्गे च यमुने चैव गोदावरि

सरस्वति॥ नर्म्मदे सिन्धुकावेरि जलेस्मिन्सन्निधिङ्कुरु॥

ॐब्रह्माण्डोदरतीर्त्थानि करैस्स्पृष्टानि ते रवे॥ तेन सत्येन मे देव

तीर्त्थन्देहि दिवाकर॥

इत्यादिभिस्तीर्त्थान्यावाह्याङ्कुशमुद्रया वौषडिति पुष्पम्॥

वषडित्यनेन गालिनीमुद्राम्प्रदर्श्य, वमिति धेनुमुद्रयाऽमृतीकृत्य,

इष्टदेवतान्ध्यात्वा, सम्पूज्य सकलीकृत्य, शङ्खमुद्राम्प्रदर्श्य,
षट्कोणे षडङ्गञ्च सम्पूज्य, पूर्ववद्धूमावतीन्देवीन्ध्यात्वा
आवाहयेत्॥ तद्यथा॥ मूलमन्त्रम्पठन् ॐ भगवति धूमावति
इहागच्छ इति प्रसारितसंहताङ्गुलीमूलपर्वणोरङ्गुष्ठौ निःक्षिप्य
आवाहयेत् मूलम्पठन् धूमावति देवि इह तिष्ठ इत्यधोमुख्या
मुद्रया स्थापयेत्॥ मूलम्पठन्॥ पद्ममुद्रया
पुष्पाद्यासनन्दद्यात्॥ ततः ॐ-अस्मिन्वरासने देवि
सुखासीनेऽक्षरात्मिके॥ प्रतिष्ठिता भवेः सा त्वं प्रसीद परमेश्वरि
॥ मूलञ्च पठन् इह प्रतिष्ठिता भवेति पूर्वोक्तया मुद्रया
प्रतिष्ठापयेत्॥ पूर्वोक्तप्राणप्रतिष्ठाविधिना प्राणान्प्रतिष्ठाप्य
ततो मूलमन्त्रेणाग्घ्र्योदकेन त्रिः प्रोक्षणम्॥ ततः पाद्यम्॥
मूलम्पठन्॥ इदम्पाद्यं श्रीधूमावत्यै निवेदयामि नम इति
पादयोर्द्दद्यात्॥ ततो मूलम्पठन् इदमाचमनीयं श्रीधूमावत्यै
निवेदयामि नम इति मुखेद द्यात्॥

p. 282) मूलम्पठन् साङ्गायै सायुधायै सवाहनायै सपरिवारायै
श्रीधूमावत्यै
इमम्मधुघृतशर्क्करादधिदुग्धसङ्घात्मकम्मधुपर्कन्निवेदया
मि नम इति मुखे दद्यात्॥

मूलम्पठन् इदम्पुनराचमनीयं साङ्गायै इत्यादि श्रीधूमावत्यै
निवेदयामि नम इति मुखे दद्यात्॥

मूलम्पठन् इदमर्घ्यं साङ्गायै इत्यादि श्रीधूमावत्यै
निवेदयामि नम इति शिरसि दद्यात्॥

मूलम्पठन् इदं हरिद्राद्युद्वर्त्तनं साङ्गायै इत्यादि
श्रीधूमावत्यै निवेदयामि नमः॥

ॐ परमानन्दबोधाब्धि नमग्ननिजमूर्त्तये।
साङ्गोपाङ्गमिदं स्नानङ्कल्पयाम्य हमीश्वरी॥

मूलञ्च पठन् इदं स्नानीयं साङ्गायै इत्यादि श्रीधूमावत्यै
निवेदयामि नम इति शतकृत्वः सहस्रकृत्वो यथाशक्ति वा स्नापयेत्॥

मूलम्पठन् इदँव्वासस्साङ्गायै इत्यादि श्रीधूमावत्यै निवेदयामि
नम इति वासो दद्यात्॥

मूलम्पठन् इदमुत्तरीयं साङ्गायै इत्यादि श्रीधूमावत्यै
निवेदयामि नम इत्युत्तरीयन्दद्यात्॥

मूलम्पठन् इदञ्चन्दनं साङ्गायै इत्यादि श्रीधूमावत्यै
निवेदयामि नमः॥

मूलम्पठन् एतान् अक्षतान् साङ्गायै इत्यादि श्रीधूमावत्यै
निवेदयामि नमः॥

मूलम्पठन् एतानि पुष्पाणि साङ्गायै इत्यादि श्रीधूमावत्यै वौषट्॥

जयध्वनि मातः स्वाहेति घण्टां सम्पूज्य मूलम्पठन्
ॐवनस्पतिरसोपेतो गन्धाढ्यः सुमनोहरः॥
आघ्रेयः सर्वदेवानान्धूपोऽयम्प्रतिगृह्यताम्॥ एष
धूपस्साङ्गायै इत्यादि श्रीधूमावत्यै निवेदयामि नम इति
वामहस्तेन घण्टाँव्वादयन् दक्षतर्ज्जन्यङ्गुष्ठयोगेन
धूपमुद्राम्प्रदर्शयन् देवतागुणान् कीर्त्तयन् नाभिदेशतो
धूपयेत्॥ मूलम्पठन् एष पुष्पाञ्जलिस्साङ्गायै इत्यादि
श्रीधूमावत्यै निवेदयामि नम इति पुष्पाञ्जलित्रयन्दद्यात्॥
ॐ सुप्रकाशो महादीपः सर्वतस्तिमिरापहः
सबाह्याभ्यन्तरज्योतिर्दीपोऽयम्प्रतिगृह्यताम्॥

मूलञ्च पठन् मध्याङ्गुष्ठयोगेन दीपमुद्राम्प्रदर्श्शयन् नेत्र
प्रदेशे दीपन्दर्श्शयेत्॥

p. 283) घृतदीपो दक्षिणे तैलदीपो वामतः॥
ॐसत्पात्रसिद्धं सहविर्व्विविधानेकभक्षणम्।
निवेदयामि देवेशि कृपया त्वङ्गृहाण तत्॥

मूलञ्च पठन् ग्रासमुद्राम्प्रदर्श्य शङ्खोदकेन निवेदयेत्॥

ॐसमस्तं देवदेवेशि सर्वावाप्तिकरम्परम्॥
अखण्डानन्दसम्पूर्णं गृहाण जलमुत्तमम्॥

इति पानीयञ्च दत्त्वा चुलूकँव्विधिवद्दद्यात्॥

ॐ एलालवङ्गकर्प्पूरनागवल्लीदलैर्युतम्॥
पूगभागेरितन्देवि ताम्बूलम्प्रतिगृह्यताम्॥

मूलञ्च पठन् इदन्ताम्बूलं साङ्गायै इत्यादि श्रीधूमावत्यै
निवेदयामि नम इति मुखप्रदेशे तत्त्वमुद्रया दद्यात्॥ ततः
पुष्पाञ्जलित्रयन्दद्यात्॥ बलिदानप्रकारेण यथाशक्ति बलिमपि दद्यात्

॥ इति श्रीमद्धूमावतीपूजाविधानं सम्पूर्णम्॥

अथ स्तोत्रम्

प्रातर्या स्यात्कुमारी कुसुमकलिकया जापमाला जपन्ती
मध्याह्ने प्रौढरूपा विकसितवदना चारुनेत्रा निशायाम्।
सन्ध्यायां व्वृद्धरूपा गलितकुचयुगा मुण्डमालाँ
व्वहन्ती सा देवी देवदेवी त्रिभुवनजननी कालिका पातु युष्मान्॥ १॥

बद्धा खट्वाङ्गकोटौ कपिलवरजटामण्डलम्पद्मयोनेः
कृत्वा दैत्योत्तमाङ्गैस्स्त्रजमुरसि शिरश्शेखरन्तार्क्ष्यपक्षैः।
पूर्णं रक्तैस्सुराणाँय्यममहिषमहाश्रृङ्गमादाय पाणौ
पायाद्वो वन्द्यमानप्रलयमुदितया भैरवः कालरात्र्याम्॥ २॥

चर्वन्तीमस्थिखण्डम्प्रकटकटकटाशब्दशङ्घातम्-
उग्रङ्कुर्वाणा प्रेतमध्ये कहहकहकहाहास्यमुग्रङ्कृशाङ्गी।
नित्यन्नित्यप्रसक्ता डमरुडिमडिमां स्फारयन्ती मुखाब्जम्-
पायान्नश्चण्डिकेयं झझमझमझमा जल्पमाना भ्रमन्ती॥ ३॥

टण्टण्टण्टण्टटण्टाप्रकरटमटमानाटघण्टाँव्वहन्ती
स्फेंस्फेंस्फेंस्कारकाराटकटकितहसा नादसङ्घट्टभीमा।
लोलम्मुण्डाग्रमाला ललहलहलहालोललोलाग्रवाचञ्चर्वन्ती
चण्डमुण्डं मटमटमटिते चर्वयन्ती पुनातु॥ ४॥

p. 284) वामे कर्णे मृगाङ्कप्रलयपरिगतन्दक्षिणे सूर्यबिम्बङ्कण्ठे
नक्षत्रहारँव्वरविकटजटाजूटके मुण्डमालाम्।
स्कन्धे कृत्वोरगेन्द्रध्वजनिकरयुतम्ब्रह्मकङ्कालभारं
संहारे धारयन्ती मम हरतु भयम्भद्रदा भद्रकाली॥ ५॥

तैलाभ्यक्तैकवेणी त्रपुमयविलसत्कर्णिकाक्रान्तकर्णा
लौहेनैकेन कृत्वा चरणनलिनकामात्मनः पादशोभाम्।
दिग्वासा रासभेन ग्रसति जगदिदँय्या यवाकर्णपूरा
वर्षिण्यातिप्रबद्धा ध्वजवितभुजा सासि देवि त्वमेव॥ ६॥

सङ्ग्रामे हेतिकृत्वैस्सरुधिरदशनैर्यद्भटानां
शिरोभिर्मालामावच्य मूर्ध्नि ध्वजवितभुजा त्वं श्मशाने
प्रविष्टा।
दृष्टा भूतप्रभूतैः पृथुतरजघना वद्धनागेन्द्रकाञ्ची
शूलग्रव्यग्रहस्ता मधुरुधिरसदा ताम्रनेत्रा निशायाम्॥ ७॥

दंष्ट्रा रौद्रे मुखेऽस्मिंस्तव विशति जगद्देवि सर्वं क्षणार्द्धात्
संसारस्यान्तकाले नररुधिरवशा सम्प्लवे भूमधूम्रे।
काली कापालिकी साशवशयनतरा योगिनी योगमुद्रा रक्तारुद्धिः
सभास्था भरणभयहरा त्वं शिवा चण्डघण्टा॥ ८॥

धूमावत्यष्टकम्पुण्यं सर्वापद्विनिवारकम्।
यः पठेत्साधको भक्त्या सिद्धिंव्विन्दन्ति वाञ्छिताम्॥ ९॥

महापदि महाघोरे महारोगे महारणे।
शत्रूच्चाटे मारणादौ जन्तूनाम्मोहने तथा॥ १०॥

पठेत्स्तोत्रमिदन्देवि सर्वत्र सिद्धिभाग्भवेत्।
देवदानवगन्धर्वा यक्षराक्षसपन्नगाः॥ ११॥

सिंहव्याघ्रादिकास्सर्वे स्तोत्रस्मरणमात्रतः।
दूराद्दूरतरँय्यान्ति किम्पुनर्मानुषादयः॥ १२॥

स्तोत्रेणानेन देवेशि किन्न सिद्ध्यति भूतले।
सर्वशान्तिर्ब्भवेद्देवि ह्यन्ते निर्वाणताँव्व्रजेत्॥ १३॥

इत्यूर्द्धाम्नाये धूमावतीस्तोत्रं समाप्तम्॥

अथ कवचम्

श्रीपार्वत्युवाच

धूमावत्यर्च्चनं शम्भो श्रुतँव्विस्तरतो मया।
कवचं श्रोतुमिच्छामि तस्या देव वदस्व मे॥

श्रीभैरव उवाच

शृणु देवि परञ्जुह्यन्न प्रकाश्यङ्कलौ युगे।
कवचं धूमावत्याश्शत्रुनिग्रहकारकम्॥

ब्रह्माद्या देवि सततँय्यद्वशाद्रिघातिनः।
योगिनोऽभवञ्छत्रुघ्ना यस्या ध्यानप्रभावतः॥

ओमस्य श्रीधूमावतीकवचस्य पिप्पलाद ऋषिरनुष्टुब्छन्दः

श्रीधूमावती देवता धूँईजं स्वाहा शक्तिः धूमावती कीलकं
शत्रुहनने पाठे विनियोगः॥

ॐधूँईजं मे शिरः पातु धूं ललाटं सदाऽवतु।
धूमा नेत्रयुगम्पातु वती कर्णौं सदाऽवतु॥

दीग्घा तूदरमध्ये तु नाभिम्मे मलिनाम्बरा।
शूर्पहस्ता पातु गुह्यं रूक्षा रक्षतु जानुनी॥

मुखम्मे पातु भीमाख्या स्वाहा रक्षतु नासिकाम्।
सर्वा विद्याऽवतु कण्ठँव्विवर्णा बाहुयुग्मकम्॥

चञ्चला हृदयम्पातु दुष्टा पाश्र्श्वं सदाऽवतु।
धूमहस्ता सदा पातु पादौ पातु भयावहा॥

प्रवृद्धरोमा तु भृशङ्कुटिला कुटिलेक्षणा।
क्षुत्पिपासार्दिता देवी भयदा कलहप्रिया॥

सर्वाङ्गम्पातु मे देवी सर्वशत्रुविनाशिनी।
इति ते कवचम्पुण्यङ्कथितम्भुवि दुर्ल्लभम्॥

न प्रकाश्यन्न प्रकाश्यन्न प्रकाश्यङ्कलौ युगे।
पठनीयम्महादेवि त्रिसन्ध्यन्ध्यानतत्परैः॥

दुष्टाभिचारो देवेशि तद्गात्रन्नैव संस्पृशेत्।

इति भैरवीभैरवसँवादे धूमावतीतत्त्वे धूमावतीकवचं
सम्पूर्णम्॥

अथ हृदयम्

ओमस्य श्रीधूमावतीहृदयस्तोत्रमन्त्रस्य पिप्पलाद
ऋषिरनुष्टुब्छन्दश्श्रीधूमावती देवता धूम्बीजं ह्रींशक्तिः
क्लींकीलकं सर्वशत्रुसंहारणे पाठे विनियोगः॥

अथाङ्गन्यासः॥

ॐधाँऋदयायनमः, धीं शिरसेस्वाहा, धूँहिखायैवषट्,
धैंकवचायहुम्, धौंनेत्रत्रयायवौषट्, धः अस्त्रायफट्,

p.286) एवङ्करन्यासो यथा॥

धां अङ्गुष्ठाभ्यान्नमः, धींतर्ज्जनीभ्यांस्वाहा,

धूंमध्यमाभ्याँवषट्, धैं-अनामिकाभ्यांहुम्,

धौंकनिष्ठाभ्याँवौषट्, धः करतलकरपृष्ठाभ्याम्फट्,

अथ ध्यानम्

धूम्राभान्धूम्रवस्त्राम्रकटितदशनाम्मुक्तबालाम्बराढ्या

न्काकाङ्कस्यंदनस्थान्धवलकरयुगां शूर्पहस्तातिरूक्षाम्।

नित्यङ्क्षुत्क्षान्तदेहाम्मुहुरतिकुटिलाँव्वारिवाञ्छाविचित्तां

ध्यायेद्धूमावतीँवामनयनयुगलाम्भीतिदाम्भीषणास्याम्॥ १॥

कल्पादौ या कालिकाद्याऽचीकलन्मधुकैटभौ।

कल्पान्ते त्रिजगत्सर्वं धूमावतीम्भजामि ताम्॥ २॥

खड्वाङ्गधारिणी खर्वा खण्डिनी खलरक्षसाम्।

धारिणी खेटकस्यापि धूमावतीम्भजामि ताम्॥ ३॥

गुणागारा गम्यगुणा या गुणा गुणवर्द्धिनी।

गीतावेदार्थतत्त्वज्ञैर्धूमावतीम्भजामि ताम्॥ ४॥

घूर्णघूर्णकरा घोरा घूर्णिताक्षी घनस्वना।
घातिनी घातकानाँय्या धूमावतीम्भजामि ताम्॥ ५॥

चर्वन्तीमस्थिखण्डानाञ्चण्डमुण्डविदारिणीम्।
चण्डाट्टहासिनीन्देवीम्भजे धूमावतीमहम्॥ ६॥

छिन्नग्रीवाङ्गताच्छन्नाञ्छिन्नमस्तास्वरूपिणीम्।
छेदिनीन्दुष्टसङ्घानाम्भजे धूमावतीमहम्॥ ७॥

जाता या याचिता देवैरसुरणाँव्विघातिनीम्।
जल्पन्ती बहु गर्ज्जन्ती भजे तान्धूम्ररूपिणीम्॥ ८॥

झङ्कारकारिणा झञ्झा-झञ्झमाझमवादिनीम्।
झटित्याकर्षिणीन्देवीम्भजे धूमावतीमहम्॥ ९॥

टीपटङ्कारसंयुक्तान्धनुष्टङ्कारकारिणीम्।
घोरा घनघटाटोपाँव्वन्दे धूमावतीमहम्॥ १०॥

ठण्ठण्ठण्ठम्मनुप्रीतिण्ठः ठःमन्त्रस्वरूपिणीम्।
ठमकाह्वगतिप्रीतां भजे धूमावतीमहम्॥ ११॥

डमरूडिण्डिमारावाण्डाकिनीगणमण्डिताम्।
डाकिनीभोगसन्तुष्टाम्भजे धूमावतीमहम्॥ १२॥

ढक्कानादेन सन्तुष्टाण्ढक्कावादकसिद्धिदाम्।
ढक्कावादचलच्चित्ताम्भजे धूमावतीमहम्॥ १३॥

p. 287) तत्त्ववार्त्तापियप्राणाम्भवपाथोधितारिणीम्।
तारस्वरूपिणीन्ताराम्भजे धूमावतीमहम्॥ १४॥

थांथींथूंथेंमन्त्ररूपां थैंथौंथंथः स्वरूपिणीम्।
थकारवर्णसर्वस्वाम्भजे धूमावतीमहम्॥ १५॥

दूर्गास्वरूपिणीन्देवीन्दुष्टदानवदारिणीम्।
देवदैत्यकृतध्वंसाँव्वन्दे धूमावतीमहम्॥ १६॥

ध्वान्ताकारान्धकध्वंसाम्मुक्तधर्मालधारिणीम्।
धूमधाराप्रभान्धीराम्भजे धूमावतीमहम्॥ १७॥

नर्त्तकीनटनप्रीतान्नाट्यकर्मविवर्द्धिनीम्।
नारसिंहीन्नरराध्यान्नौमि धूमावतीमहम्॥ १८॥

पार्वतीपतिसम्पूज्याम्पर्वतोपरिवासिनीम्।
पद्मारूपाम्पद्मपूज्यान्नौमि धूमावतीमहम्॥ १९॥

फूत्कारसहितश्वासाम्फङ्कन्त्रफलदायिनीम्।
फेत्कारिगणसंसेव्यां सेवे धूमावतीमहम्॥ २०॥

बलिपूज्यां बलाराध्याम्बगलारूपिणींव्वराम्।
ब्रह्मादिवन्दिताँव्विद्याँव्वन्दे धूमावतीमहम्॥ २१॥

भव्यरूपाम्भवाराध्याम्भुवनेशीस्वरूपिणीम्।
भक्तभव्यप्रदान्देवीम्भजे धूमावतीमहम्॥ २२॥

मायाम्मधुमतीम्मान्याम्मकरध्वजमानिताम्।
मत्स्यमांसमदास्वादाम्मन्ये धूमावतीमहम्॥ २३॥

योगयज्ञप्रसन्नास्याँय्योगिनीपरिसेविताम्।

यशोदाँय्यज्ञफलदाँय्यजे धूमावतीमहम्॥ २४॥

रामाराध्यपदद्वन्द्वां रावणध्वंसकारिणीम्।
रमेशरमणीपूज्यामहन्धूमावतीं श्रये॥ २५॥

लक्षलीलाकलालक्ष्याँल्लोकवन्द्यपदाम्बुजाम्।
लम्बिताम्बीजकोशाढ्याँव्वन्दे धूमावतीमहम्॥ २६॥

बकपूज्यपदाम्भोजाम्बकध्यानपरायणाम्।
बालाम्बकारिसन्ध्येयाँव्वन्दे धूमावतीमहम्॥ २७॥

शङ्करीं शङ्करप्राणां सङ्कटध्वंसकारिणीम्।
शत्रुसंहारिणीं शुद्धां श्रये धूमावतीमहम्॥ २८॥

षडाननारिसंहन्त्रीं षोडशीरूपधारिणीम्।
षड्रसास्वादिनीं सौम्यां सेवे धूमावतीमहम्॥ २९॥

सुरसेवितपादाब्जां सुरसौख्यप्रदायिनीम्।
सुन्दरीगणसंसेव्यां सेवे धूमावतीमहम्॥ ३०॥

p. 288) हेरम्बजननीँय्योग्यां हास्यलास्यविहारिणीम्।
हारिणीं शत्रुसङ्घानां सेवे धूमावतीमहम्॥ ३१॥

षीरोदतीरसँवासाङ्क्षीरपानप्रहर्षिताम्।
क्षणदेशेज्यपादाब्जां सेवे धूमावतीमहम्॥ ३२॥

चतुस्त्रिंशद्वर्णकानाम्प्रतिवर्णादिनामभिः।
कृतन्तु हृदयस्तोत्रन्धूमावत्यास्सुसिद्धिदम्॥ ३३॥

य इदम्पठति स्तोत्रम्पवित्रं पापनाशनम्।
स प्राप्नोति परां सिद्धिन्धूमावत्याः प्रसादतः॥ ३४॥

पठन्नेकाग्रचित्तो यो यद्यदिच्छति मानवः।
तत्सर्वं समवाप्नोति सत्यं सत्यँव्वदाम्यहम्॥ ३५॥

इति धूमावतीहृदयं समाप्तम्॥

अथ शतनाम

ईश्वर उवाच

ॐ धूमावती धूम्रवर्णा धूम्रपानपरायणा।
धूम्राक्षमथिनी धन्या धन्यस्थाननिवासिनी॥ १॥

अघोराचारसन्तुष्टा-अघोराचारमण्डिता।
अघोरमन्त्रसम्प्रीता अघोरमन्त्रपूजिता॥ २॥

अट्टाट्टहासनिरता मलिनाम्बरधारिणी।
वृद्धा विरूपा विधवा विद्या च विरलद्विजा॥ ३॥

प्रवृद्धघोणा कुमुखी कुटिला कुटिलेक्षणा।
करालीं च करालास्या कङ्काली शूर्पधारिणी॥ ४॥

काकध्वजारथारूढा केवला कठिना कुहूः।
क्षुत्पिपासार्दिता नित्या ललज्जिह्वा दिगम्बरी॥ ५॥

दीर्घोदरी दीर्घरवा दिर्घाङ्गी दीर्घमस्तका।
विमुक्तकुन्तला कीर्त्या कैलासस्थानवासिनी॥ ६॥

क्रूरा कालस्वरूपा च कालचक्रप्रवर्त्तिनी।

विवर्णा चञ्चला दुष्टा दुष्टविध्वंसकारिणी॥ ७॥

चण्डी चण्डस्वरूपा च चामुण्डा चण्डनिस्स्वना।
चण्डवेगा चण्डगतिश्चण्डमुण्डविनाशिनी॥ ८॥

चाण्डालिनी चित्ररेखा चित्राङ्गी चित्ररूपिणी।
कृष्णा कपर्द्दिनी कुल्ला कृष्णारूपा क्रियावती॥ ९॥

कुम्भस्तनी महोन्मत्ता मदिरापानविह्वला।
चतुर्भुजा ललजिह्वा शत्रुसंहारकारिणी॥ १०॥

p. 289) शवारूढा शवगता श्मशानस्थानवासिनी।
दुराराध्या दुराचारा दुर्ज्जनप्रीतिदायिनी॥ ११॥

निर्मांसा च निराकारा धूतहस्ता वरान्विता।
कलहा च कलिप्रीता कलिकल्मषनाशिनी॥ १२॥

महाकालस्वरूपा च महाकालप्रपूजिता।
महादेवप्रिया मेधा महासङ्कटनाशिनी॥ १३॥

भक्तप्रिया भक्तगतिर्भक्तशत्रुविनाशिनी।
भैरवी भुवना भीमा भारती भुवनात्मिका॥ १४॥

भरुण्डा भीमनयना त्रिनेत्रा बहुरूपिणी।
त्रिलोकेशी त्रिकालज्ञा त्रिस्वरूपा त्रयीतनुः॥ १५॥

त्रिमूर्त्तिश्च तथा तन्वी त्रिशक्तिश्च त्रिशूलिनी।
इति धूमा-महत्स्तोत्रन्नाम्नामष्टशतात्मकम्॥ १६॥

मया ते कथितन्देवि शत्रुसङ्घविनाशनम्।
कारागारे रिपुग्रस्ते महोत्पाते महाभये॥ १७॥

इदं स्तोत्रम्पठेन्मर्त्त्यो मुच्यते सर्वसङ्कटैः।
गुह्याद्गुह्यतरं गुह्यङ्गोपनीयम्प्रयत्नतः॥ १८॥

चतुष्पदार्त्थदन्नृणां सर्वसम्पत्प्रदायकम्॥ १९॥

इति धूमावत्यष्टोत्तरशतनामस्तोत्रं सम्पूर्णम्॥

अथ सहस्त्रनाम

श्रीभैरव्युवाच

धूमावत्या धर्मरात्र्याः कथयस्व महेश्वर।
सहस्त्रनामस्तोत्रम्मे सर्वसिद्धिप्रदायकम्॥ १॥

श्रीभैरव उवाच

शृणु देवि महामाये प्रिये प्राणस्वरूपिणि।
सहस्त्रनामस्तोत्रम्मे भवशत्रुविनाशम्॥ २॥

ओमस्य श्रीधूमावतीसहस्त्रनामस्तोत्रस्य पिप्पलाद ऋषिः
पङ्क्तिश्छन्दो धूमावती देवता शत्रुविनिग्रहे पाठे विनियोगः॥

धुमा धूमवती धूमा धूमपानपरायणा।
धौता धौतगिरा धाम्नी धूमेश्वरनिवासिनी॥ ३॥

अनन्ताऽनन्तरूपा च अकाराकाररूपिणी।
आद्या आनन्ददानन्दा इकारा इन्द्ररूपिणी॥ ४॥

धनधान्यार्त्थवाणीदा यशोधर्मप्रियेष्टदा।

भाग्यसौभाग्यभक्तिस्था गृहपर्वतवासिनी॥ ५॥

रामरावणसुग्रीवमोहदा हनुमत्प्रिया।

p. 290) वेदशास्त्रपुराणज्ञा ज्योतिश्छन्दःस्वरूपिणी॥ ६॥

चातुर्यचारुरुचिरा रञ्जनप्रेमतोषदा।

कमलासनसुधावक्त्रा चन्द्रहासा स्मिताननना॥ ७॥

चतुरा चारुकेशी च चतुर्वर्गप्रदा मुदा।

कला कालधरा धीरा धारिणी वसुनीरदा॥ ८॥

हीरा हीरकवर्णाभा हरिणायतलोचना।

दम्भमोहक्रोधलोभस्नेहद्वेषहरा परा॥ ९॥

नारदेवकरी रामा रामानन्दमनोहरा।

योगभोगक्रोधलोभहरा हरनमस्कृता॥ १०॥

दानमानज्ञानमान-पानगानसुखप्रदा।

गजगोश्वपदागङ्गा भूतिदा भूतनाशिनी॥ ११॥

भवभावा तथा बाला वरदा हरवल्लभा।
भगभङ्गभया माला मालती तालनाह्वदा॥ १२॥

जालवालहालकालकपालप्रियवादिनी।
करञ्जशीलगुञ्जाढ्या चूताङ्कुरनिवासिनी॥ १३॥

पनसस्था पानसक्ता पनसेशकुटुम्बिनी।
पावनी पावनाधारा पूर्णा पूर्णमनोरथा॥ १४॥

पूता पूतकला पौरा पुराणसुरसुन्दरी।
परेशी परदा पारा परात्मा परमोहिनी॥ १५॥

जगन्माया जगत्कर्त्री जगत्कीर्त्तिर्जगन्मयी।
जननी जयिनी जाया जिता जिनजयप्रदा॥ १६॥

कीर्त्तिर्ज्ञानध्यानमानदायिनी दानवेश्वरी।
काव्यव्याकरणज्ञाना प्रज्ञाप्रज्ञानदायिनी॥ १७॥

विज्ञाज्ञा विज्ञजयदा विज्ञा विज्ञप्रपूजिता।
परावरेज्या वरदा पारदा शारदा दरा॥ १८॥

दारिणी देवदूती च मदना मदनामदा।
परमज्ञानगम्या च षरेशी परगा परा॥ १९॥

यज्ञा यज्ञप्रदा यज्ञज्ञानकार्यकरी शुभा।
शोभिनी शुभ्रमथिनी निशुम्भासुरमर्द्दिनी॥ २०॥

शाम्भवी शम्भुपत्नी च शम्भुजाया शुभानना।
शाङ्करी शङ्कराराध्या सन्ध्या सन्ध्यासुधर्मिणी॥ २१॥

शत्रुघ्नी शत्रुहा शत्रुप्रदा शात्रवनाशिनी।
शैवी शिवलया शैला शैलराजप्रिया सदा॥ २२॥

शर्वरी शवरी शम्भुः सुधाढ्या सौधवासिनी।
सगुणा गुणरूपा च गौरवी भैरवीरवा॥ २३॥

p. 291) गौराङ्गी गौरदेहा च गौरी गुरुमती गुरुः।
गौग्गौर्गव्यस्वरूपा च गुणानन्दस्वरूपिणी॥ २४॥

गणेशगणदा गुण्या गुणा गौरववाञ्छिता।
गणमाता गणाराध्या गणकोटिविनाशिनी॥ २५॥

दुर्गा दुर्ज्जनहन्त्री च दुर्ज्जनप्रीतिदायिनी।
स्वर्गापवर्गदा दात्री दीना दीनदयावती॥ २६॥

दुर्न्निरीक्ष्या दुरादुःस्था दौःस्थभञ्जनकारिणी।
श्वेतपाण्डुरकृष्णाभा कालदा कालनाशिनी॥ २७॥

कर्मनर्मकरी नर्मा धर्माधर्मविनाशिनी।
गौरी गौरवदा गोदा गणदा गायनप्रिया॥ २८॥

गङ्गा भागीरथी भङ्गा भगा भाग्यविवर्द्धिनी।
भवानी भवहन्त्री च भैरवी भैरवीसमा॥ २९॥

भीमा भीमरवा भैमी भीमानन्दप्रदायिनी।
शरण्या शरणा शम्या शशिनी शङ्खनाशिनी॥ ३०॥

गुणा गुणकरी गौणी प्रियाप्रीतिप्रदायिनी।

जनमोहनकर्त्री च जगदानन्ददायिनी॥ ३१॥

जिता जाया च विजया विजया जयदायिनी।
कामा काली करालास्या खर्वा खड्गा खरा गदा॥ ३२॥

गर्वा गरुत्मती धर्मा घग्घरा घोरनादिनी।
चराचरी चराराध्या छिना छिन्नमनोरथा॥ ३३॥

छिन्नमस्ता जया जाप्या जगज्जाया च झर्झ्झरी।
झकारा झीष्कृतिष्टीका टङ्का टङ्कारनादिनी॥ ३४॥

ठीका ठक्कुरठक्काङ्गी ठठठाङ्कारढुण्ढुरा।
ढुण्ढीताराजतीर्णा च तालस्थाभ्रमनाशिनी॥ ३५॥

थकारा थकरा दात्री दीपा दीपविनाशिनी।
धन्या धना धनवती नर्मदा नर्ममोदिनी॥ ३६॥

पद्मा पद्मावती पीता स्फान्ता फूत्कारकारिणी।
फुल्ला ब्रह्ममयी ब्राह्मी ब्रह्मानन्दप्रदायिनी॥ ३७॥

भवाराध्या भवाध्यक्षा भगाली मन्दगामिनी।

मदिरा मदिरेक्षा च यशोदा यमपूजिता॥ ३८॥

याम्या राम्या रामरूपा रमणी ललिता लता।

लङ्केश्वरी वाक्प्रदा वाच्या सदाश्रमवासिनी॥ ३९॥

श्रान्ता शकाररूपा च षकारखरवाहना।

p. 292) सह्याद्रिरूपा सानन्दा हरिणी हरिरूपिणी॥ ४०॥

हराराध्या वालवाचलवङ्गप्रेमतोषिता।

क्षपा क्षयप्रदा क्षीरा अकारादिस्वरूपिणी॥ ४१॥

कालिका कालमूर्त्तिश्च कलहा कलहप्रिया।

शिवा शान्दायिनी सौम्या शत्रुनिग्रहकारिणी॥ ४२॥

भवानी भवमूर्त्तिश्च शर्वाणी सर्वमङ्गला।

शत्रुविद्राविणी शैवी शुम्भासुरविनाशिनी॥ ४३॥

धकारमन्त्ररूपा च धूम्बीजपरितोषिता।

धनाध्यक्षस्तुता धीरा धरारूपा धरावती॥ ४४॥

चर्विणी चन्द्रपूज्या च च्छन्दोरूपा छटावती।
छाया छायावती स्वच्छा छेदिनी मेदिनी क्षमा॥ ४५॥

वल्गिनी वर्द्धिनी वन्द्या वेदमाता बुधस्तुता।
धारा धारावती धन्या धर्मदानपरायणा॥ ४६॥

गर्विणी गुरुपूज्या च ज्ञानदात्री गुणान्विता।
धर्मिणी धर्मरूपा च घण्टानादपरायणा ... ४७॥

घण्टानिनादिनी घूर्णा घूर्णिता घोररूपिणी।
कलिघ्नी कलिदूती च कलिपूज्या कलिप्रिया॥ ४८॥

कालनिर्णाशिनी काल्या काव्यदा कालरूपिणी।
वर्षिणी वृष्टिदा वृष्टिर्महावृष्टिनिवारिणी॥ ४९॥

घातिनी घाटिनी घोण्टा घातकी घनरूपिणी।
धूम्बीजा धूम्रपानन्दा धूम्बीजजपतोषिता॥ ५०॥

धून्धूम्बीजजपासक्ता धून्धूम्बीजपरायणा।

धूङ्कारहर्षिणी धूमा धनदा धनगर्विता॥ ५१॥

पद्मावती पद्ममाला पद्मयोनिप्रपूजिता।
अपारा पूरणी पूर्णा पूर्णिमापरिवन्दिता॥ ५२॥

फलदा फलभोक्त्री च फलिनी फलदायिनी।
फूत्कारिणी फलावाप्री फलभोक्त्री फलान्विता॥ ५३॥

वारिणी वरणप्रीता वारिपाथोधिपारगा।
विवर्णा धूम्रनयना धूम्राक्षी धूम्ररूपिणी॥ ५४॥

नीतिर्नीतिस्वरूपा च नीतिज्ञा नयकोविदा।
तारिणी ताररूपा च तत्त्वज्ञानपरायणा॥ ५५॥

स्थूला स्थूलाधरा स्थात्री उत्तमस्थानवासिनी।
p. 293) स्थूला पद्मपदस्थाना स्थानभ्रष्टा स्थलस्थिता॥ ५६॥

शोषिणी शोभिनी शीता शीतपानीयपायिनी।
शारिणी शाङ्खिनी शुद्धा शङ्खासुरविनाशिनी॥ ५७॥

शर्वरी शर्वरीपूज्या शर्वरीशप्रपूजिता।
शर्वरीजाग्रिता योग्या योगिनी योगिवन्दिता॥ ५८॥

योगिनीगणसंसेव्या योगिनी योगभाविता।
योगमार्गरतायुक्ता योगमार्गानुसारिणी॥ ५९॥

योगभावा योगयुक्ता यामिनीपतिवन्दिता।
अयोग्या योधिनी योद्री युद्धकर्मविशारदा॥ ६०॥

युद्धमार्गरतानान्ता युद्धस्थाननिवासिनी।
सिद्धा सिद्धेश्वरी सिद्धिः सिद्धिगेहनिवासिनी॥ ६१॥

सिद्धरीतिस्सिद्धप्रीतिः सिद्धा सिद्धान्तकारिणी।
सिद्धगम्या सिद्धपूज्या सिद्धबन्धा सुसिद्धिदा॥ ६२॥

साधिनी साधनप्रीता साध्या साधनकारिणी।
साधनीया साध्यसाध्या साध्यसङ्घसुशोभिनी॥ ६३॥

साध्वी साधुस्वभावा सा साधुसन्ततिदायिनी।
साधुपूज्या साधुवन्द्या साधुसन्दर्शनोद्यता॥ ६४॥

साधुदृष्टा साधुपृष्ठा साधुपोषणतत्परा।
सात्त्विकी सत्त्वसंसिद्धा सत्त्वसेव्या सुखोदया॥ ६५॥

सत्त्ववृद्धिकरी शान्ता सत्त्वसंहर्षमानसा।
सत्त्वज्ञाना सत्त्वविद्या सत्त्वसिद्धान्तकारिणी॥ ६६॥

सत्त्ववृद्धिस्सत्त्वसिद्धिस्सत्त्वसम्पन्नमानसा।
चारुरूपा चारुदेहा चारुचञ्चललोचना॥ ६७॥

छद्मिनी छद्मसङ्कल्पा छद्मवार्त्ता क्षमाप्रिया।
हठिनी हठसम्प्रीतिर्हठवार्त्ता हठोद्यमा॥ ६८॥

हठकार्या हठधर्मा हठकर्मपरायणा।
हठसम्भोगनिरता हठात्काररतिप्रिया॥ ६९॥

हठसम्भेदिनी हृद्या हृद्यवार्त्ता हरिप्रिया।
हरिणी हरिणीदृष्टिर्हरिणीमांसभक्षणा॥ ७०॥

हरिणाक्षी हरिणपा हरिणीगणहर्षदा।

हरिणीगणसंहर्त्री हरिणीपरिपोषिका॥ ७१॥

हरिणीमृगयासक्ता हरिणीमानपुरस्सरा।

p. 294) दीना दीनाकृतिर्दूना द्राविणी द्रविणप्रदा॥ ७२॥

द्रविणाचलसंव्वासा द्रविता द्रव्यसँयुता।

दीग्घा दीग्घपदा दृश्या दर्शनीया दृढाकृतिः॥ ७३॥

दृढा द्विष्टमतिर्दुष्टा द्वेषिणी द्वेषिभञ्जिनी।

दोषिणी दोषसँयुक्ता दुष्टशत्रुविनाशिनी॥ ७४॥

देवतार्त्तिहरा दुष्टदैत्यसङ्घविदारिणी।

दुष्टदानवहन्त्री च दुष्टदैत्यनिषूदिनी॥ ७५॥

देवताप्राणदा देवी देवदुर्गतिनाशिनी।

नटनायकसंसेव्या नर्त्तकी नर्त्तकप्रिया॥ ७६॥

नाट्यविद्या नाट्यकर्त्री नादिनी नादकारिणी।

नवीननूतना नव्या नवीनवस्त्रधारिणी॥ ७७॥

नव्यभूषा नव्यमाल्या नव्यालङ्कारशोभिता।
नकारवादिनी नम्या नवभूषणभूषिता॥ ७८॥

नीचमार्गा नीचभूमिर्नीचमार्गगतिर्गतिः।
नाथसेव्या नाथभक्ता नाथानन्दप्रदायिनी॥ ७९॥

नम्रा नम्रगतिर्न्नेत्री निदानवाक्यवादिनी।
नारीमध्यस्थिता नारी नारीमध्यगताऽनघा॥ ८०॥

नारीप्रीति नराराध्या नरनामप्रकाशिनी।
रती रतिप्रिया रम्या रतिप्रेमा रतिप्रदा॥ ८१॥

रतिस्थानस्थिताराध्या रतिहर्षप्रदायिनी।
रतिरूपा रतिध्याना रतिरीतिसुधारिणी॥ ८२॥

रतिरासमहोल्लासा रतिरासविहारिणी।
रतिकान्तस्तुता राशी राशिरक्षणकारिणी॥ ८३॥

अरूपा शुद्धरूपा च सुरूपा रूपगर्विता।
रूपयौवनसम्पन्ना रूपराशी रमावती॥ ८४॥

रोधिनी रोषिणी रुष्टा रोषिरुद्धा रसप्रदा।

मादिनी मदनप्रीता मधुमत्ता मधुप्रदा॥ ८५॥

मद्यपा मद्यपध्येया मद्यपप्राणरक्षिणी।

मद्यपानन्दसन्दात्री मद्यपप्रेमतोषिता॥ ८६॥

मद्यपानरता मत्ता मद्यपानविहारिणी।

मदिरा मदिरारक्ता मदिरापानहर्षिणी॥ ८७॥

मदिरापानसन्तुष्टा मदिरापानमोहिनी।

मदिरामानसामुग्धा माध्वीपा मदिराप्रदा॥ ८८॥

माध्वीदानसदानन्दा माध्वीपानरता मदा।

p. 295) मोदिनी मोदसन्दात्री मुदिता मोदमानसा॥ ८९॥

मोदकर्त्री मोददात्री मोदमङ्गलकारिणी।

मोदकादानसन्तुष्टा मोदकग्रहणक्षमा॥ ९०॥

मोदकालब्धिसङ्क्रुद्धा मोदकप्राप्तितोषिणी।

मांसादा मांससम्भक्षा मांसभक्षणहर्षिणी॥ ९१॥

मांसपाकपरप्रेमा मांसपाकालयस्थिता।
मत्स्यमांसकृतास्वादा मकारपञ्चकान्विता॥ ९२॥

मुद्रा मुद्रान्विता माता महामोहा मनस्विनी।
मुद्रिका मुद्रिकायुक्ता मुद्रिकाकृतलक्षणा॥ ९३॥

मुद्रिकालङ्कृता माद्री मन्दराचलवासिनी।
मन्दराचलसंसेव्या मन्दराचलवासिनी॥ ९४॥

मन्दरध्येयपादाब्जा मन्दरारण्यवासिनी।
मन्दुरावासिनी मन्दा मारिणी मारिकामिता॥ ९५॥

महामारी महामारीशमिनी शवसंस्थिता।
शवमांसकृताहारा श्मशानालयवासिनी॥ ९६॥

श्मशानसिद्धिसंहृष्टा श्मशानभवनस्थिता।
श्मशानशयनागारा श्मशानभस्मलेपिता॥ ९७॥

श्मशानभस्मभीमाङ्गी श्मशानावासकारिणी।
शामिनी शमनाराध्या शमनस्तुतिवन्दिता॥ ९८॥

शमनाचारसन्तुष्टा शमनागारवासिनी।
शमनस्वामिनी शान्तिः शान्तसज्जनपूजिता॥ ९९॥

शान्तपूजापरा शान्ता शान्तागारप्रभोजिनी।
शान्तपूज्या शान्तवन्द्या शान्तग्रहसुधारिणी॥ १००॥

शान्तरूपा शान्तियुक्ता शान्तचन्द्रप्रभाऽमला।
अमला विमला म्लाना मालती कुञ्जवासिनी॥ १०१॥

मालतीपुष्पसम्प्रीता मालतीपुष्पपूजिता।
महोग्रा महती मध्या मध्यदेशनिवासिनी॥ १०२॥

मध्यमध्वनिसम्प्रीता मध्यमध्वनिकारिणी।
मध्यमा मध्यमप्रीतिर्मध्यमप्रेमपूरिता॥ १०३॥

मध्याङ्गचित्रवसना मध्यखिन्ना महोद्धता।
महेन्द्रकृतसम्पूजा महेन्द्रपरिवन्दिता॥ १०४॥

महेन्द्रजालसँयुक्ता महेन्द्रजालकारिणी।
महेन्द्रमानिताऽमाना मानिनीगणमध्यगा॥ १०५॥

p. 296) मानिनीमानसम्प्रीता मानविध्वंसकारिणी।
मानिन्याकर्षिणी मुक्तिर्मुक्तिदात्री सुमुक्तिदा॥ १०६॥

मुक्तिद्वेषकरी मूल्यकारिणी मूल्यहारिणी।
निर्मला मूलसँयुक्ता मूलिनी मूलमन्त्रिणी॥ १०७॥

मूलमन्त्रकृतार्हाद्या मूलमन्त्राग्घ्यर्हर्षिणी।
मूलमन्त्रप्रतिष्ठात्री मूलमन्त्रप्रहर्षिणी॥ १०८॥

मूलमन्त्रप्रसन्नास्या मूलमन्त्रप्रपूजिता।
मूलमन्त्रप्रणेत्री च मूलमन्त्रकृतार्च्चना॥ १०९॥

मूलमन्त्रप्रहृष्टात्मा मूलविद्या मलापहा।
विद्याऽविद्या वटस्था च वटवृक्षनिवासिनी॥ ११०॥

वटवृक्षकृतस्थाना वटपूजापरायणा।

वटपूजापरिप्रीता वटदर्शनलालसा॥ १११॥

वटपूजा कृता ह्लादा वटपूजाविवर्द्धिनी।
वशिनी विवशाराध्या वशीकरणमन्त्रिणी॥ ११२॥

वशीकरणसम्प्रीता वशीकारकसिद्धिदा।
बटुका बटुकाराध्या बटुकाहारदायिनी॥ ११३॥

बटुकार्च्चापरा पूज्या बटुकार्च्चाविवर्द्धिनी।
बटुकानन्दकर्त्त्री च बटुकप्राणरक्षिणी॥ ११४॥

बटुकेज्याप्रदाऽपारा पारिणी पार्वतीप्रिया।
पर्वताग्रकृतावासा पर्वतेन्द्रप्रपूजिता॥ ११५॥

पार्वतीपतिपूज्या च पार्वतीपतिहर्षदा।
पार्वतीपतिबुद्धिस्था पार्वतीपतिमोहिनी॥ ११६॥

पार्वतीयद्विजाराध्या पर्वतस्था प्रतारिणी।
पद्मला पद्मिनी पद्मा पद्ममालाविभूषिता॥ ११७॥

पद्मजेड्यपदा पद्ममालालङ्कृतमस्तका।
पद्मार्च्चितपदद्वन्द्वा पद्महस्तपयोधिजा॥ ११८॥

पयोधिपारगन्त्री च पाथोधिपरिकीर्त्तिता।
पाथोधिपारगापूता पल्वलाम्बुप्रतर्पिता॥ ११९॥

पल्वलान्तः पयोमग्ना पवमानगतिर्गतिः।
पयः पाना पयोदात्री पानीयपरिकाङ्क्षिणी॥ १२०॥

पयोजमालाभरणा मुण्डमालाविभूषणा।
मुण्डिनी मुण्डहन्त्री च मुण्डिता मुण्डशोभिता॥ १२१॥

मणिभूषा मणिग्रीवा मणिमालाविराजिता।
p. 297) महामोहा महामर्षा महामाया महाहवा॥ १२२॥

मानवी मानवीपूज्या मनुवंशविवर्द्धिनी।
मठिनी मठसंहन्त्री मठसम्पत्तिहारिणी॥ १२३॥

महाक्रोधवती मूढा मूढशत्रुविनाशिनी।
पाठीनभोजिनी पूर्णा पूर्णहारविहारिणी॥ १२४॥

प्रलयानलतुल्याभा प्रलयानलरूपिणी।
प्रलयार्णवसम्मग्ना प्रलयाब्धिविहारिणी॥ १२५॥

महाप्रलयसम्भूता महाप्रलयकारिणी।
महाप्रलयसम्प्रीता महाप्रलयसाधिनी॥ १२६॥

महामहाप्रलयेज्या महाप्रलयमोदिनी।
छेदिनी छिन्नमुण्डोग्रा छिन्ना छिन्नरुहार्त्थिनी॥ १२७॥

शत्रुसञ्छेदिनी छन्ना क्षोदिनी क्षोदकारिणी।
लक्षिणी लक्षसम्पूज्या लक्षिता लक्षणान्विता॥ १२८॥

लक्षशस्त्रसमायुक्ता लक्षबाणप्रमोचिनी।
लक्षपूजापराऽलक्ष्या लक्षकोदण्डखण्डिनी॥ १२९॥

लक्षकोदण्डसँयुक्ता लक्षकोदण्डधारिणी।
लक्षलीलालयालभ्या लाक्षागारनिवासिनी॥ १३०॥

लक्षलोभपरा लोला लक्षभक्तप्रपूजिता।

लोकिनी लोकसम्पूज्या लोकरक्षणकारिणी॥ १३१॥

लोकवन्दितपादाब्जा लोकमोहनकारिणी।
ललिता लालितालीना लोकसंहारकारिणी॥ १३२॥

लोकलीलाकरी लोक्यालोकसम्भवकारिणी।
भूतशुद्धिकरी भूतरक्षिणी भूततोषिणी॥ १३३॥

भूतवेतालसँयुक्ता भूतसेनासमावृता।
भूतप्रेतपिशाचादिस्वामिनी भूतपूजिता॥ १३४॥

डाकिनी शाकिनी डेया डिण्डिमारावकारिणी।
डमरूवाद्यसन्तुष्टा डमरूवाद्यकारिणी॥ १३५॥

हुङ्कारकारिणी होत्री हाविनी हावनार्त्थिनी।
हासिनी ह्रासिनी हास्यहर्षिणी हठवादिनी॥ १३६॥

अट्टाट्टहासिनी टीका टीकानिर्माणकारिणी।
टङ्किनी टङ्किता टङ्का टङ्कमात्रसुवर्णदा॥ १३७॥

टङ्कारिणी टकाराढ्या शत्रुत्रोटनकारिणी।
त्रुटिता त्रुटिरूपा च त्रुटिसन्देहकारिणी॥ १३८॥

p. 298) तर्षिण तृद्दरिक्तान्ता क्षुत्क्षामा क्षुत्परिप्लुता।
अक्षिणी तक्षिणी भिक्षाप्रार्त्थिनी शत्रुभक्षिणी॥ १३९॥

काङ्क्षिणी कुट्टनी क्रूरा कुट्टनीवेश्मवासिनी।
कुट्टनीकोटिसम्पूज्या कुट्टनीकुलमार्गिणी॥ १४०॥

कुट्टनीकुलसंरक्षा कुट्टनीकुलरक्षिणी।
कालपाशावृता कन्या कुमारीपूजनप्रिया॥ १४१॥

कौमुदी कौमुदीहृष्टा करुणादृष्टिसँयुता।
कौतुकाचारनिपुणा कौतुकागारवासिनी॥ १४२॥

काकपक्षधरा काकरक्षिणी काकसँवृता।
काकाङ्करथसंस्थाना काकाङ्कस्यन्दनास्थिता॥ १४३॥

काकिनी काकदृष्टिश्च काकभक्षणदायिनी।
काकमाता काकयोनिः काकमण्डलमण्डिता॥ १४४॥

काकदर्शनसंशीला काकसङ्कीर्णमन्दिरा।
काकध्यानस्थदेहादिध्यानगम्या धमावृता॥ १४५॥

धनिनी धनिसंसेव्या धनच्छेदनकारिणी।
धुन्धुरा धुन्धुराकारा धूम्रलोचनघातिनी॥ १४६॥

धूङ्कारिणी च धूम्मन्त्रपूजिता धर्मनाशिनी।
धूम्रवर्णिनी धूम्राक्षी धूम्राक्षासुरघातिनी॥ १४७॥

धूम्बीजजपसन्तुष्टा धूम्बीजजपमानसा।
धूम्बीजजपपूजार्हा धूम्बीजजपकारिणी॥ १४८॥

धूम्बीजाकर्षिता धृष्या धर्षिणी धृष्टमानसा।
धूलीप्रक्षेपिणी धूलीव्याप्तधम्मिल्लधारिणी॥ १४९॥

धूम्बीजजपमालाढ्या धूम्बीजनिन्दकान्तका।
धर्मविद्वेषिणी धर्मरक्षिणी धर्मतोषिता॥ १५०॥

धारास्तम्भकरी धूर्ता धारावारिविलासिनी।

धांधींधूंधैम्मन्त्रवर्णा धौंधः स्वाहास्वरूपिणी॥ १५१॥

धरित्रीपूजिता धूर्वा धान्यच्छेदनकारिणी।
धिक्कारिणी सुधीपूज्या धामोद्याननिवासिनी॥ १५२॥

धामोद्यानपयोदात्री धामधूलीप्रधूलिता।
महाध्वनिमती धूप्या धूपामोदप्रहर्षिणी॥ १५३॥

धूपादानमतिप्रीता धूपदानविनोदिनी।
धीवरीगणसम्पूज्या धीवरीवरदायिनी॥ १५४॥

p. 299) धीवरीगणमध्यस्था धीवरीधामवासिनी।
धीवरीगणगोघ्री च धीवरीगणतोषिता॥ १५५॥

धीवरीधनदात्री च धीवरीप्राणरक्षिणी।
धात्रीशा धातृसम्पूज्या धात्रीवृक्षसमाश्रया॥ १५६॥

धात्रीपूजनकर्त्री च धात्रीरोपणकारिणी।
धूम्रपानरतासक्ता धूम्रपानरतेष्टदा॥ १५७॥

धूम्रपानकरानन्दा धूम्रवर्षणकारिणी।
धन्यशब्दश्रुतिप्रीता धुन्धुकारीजनच्छिदा॥ १५८॥

धुन्धुकारीष्टसन्दात्री थुन्धुकारिसुमुक्तिदा।
धुन्धुकार्याराध्यरूपा धुन्धुकारिमनस्स्थिता॥ १५९॥

धुन्धुकारिहिताकाङ्क्षा धुन्धुकारिहितैषिणी।
धिन्धिमाराविणी ध्यात्री ध्यानगम्या धनार्थिनी॥ १६०॥

धोरिणी धोरणप्रीता धारिणी घोररूपिणी।
धरित्रीरक्षिणी देवी धराप्रलयकारिणी॥ १६१॥

धराधरसुताऽशेषधाराधरसमद्युतिः।
धनाध्यक्षा धनप्राप्तिर्द्धनधान्यविवर्द्धिनी॥ १६२॥

धनाकर्षणकर्त्री च धनाहरणकारिणी।
धनच्छेदनकर्त्री च धनहीना धनप्रिया॥ १६३॥

धनसँवृद्धिसम्पन्ना धनदानपरायणा॥ १६४॥

धनहृष्टा धनपुष्टा दानाध्ययनकारिणी।
धनरक्षा धनप्राणा धनानन्दकरी सदा॥ १६५॥

शत्रुहन्त्री शवारूढा शत्रुसंहारकारिणी।
शत्रुपक्षक्षतिप्रीता शत्रुपक्षनिषूदिनी॥ १६६॥

शत्रुग्रीवाच्छिदाछाया शत्रुपद्धतिखण्डिनी।
शत्रुप्राणहराहार्या शत्रून्मूलनकारिणी॥ १६७॥

शत्रुकार्यविहन्त्री च साङ्गशत्रुविनाशिनी।
साङ्गशत्रुकुलच्छेत्री शत्रुसद्मप्रदायिनी॥ १६८॥

साङ्गसायुधसर्वारि-सर्वसम्पत्तिनाशिनी।
साङ्गसायुधसर्वारि-देहगेहप्रदाहिनी॥ १६९॥

इतीदन्धूमरूपिण्यास्स्तोत्रन्नाम सहस्त्रकम्।
यः पठेच्छून्यभवने सध्वान्ते यतमानसः॥ १७०॥

मदिरामोदयुक्तो वै देवीध्यानपरायणः।
तस्य शत्रुः क्षयं याति यदि शक्रसमोऽपि वै॥ १७१॥

भवपाशहरम्पुण्यन्धूमावत्याः प्रियम्महत्।
स्तोत्रं सहस्रनामाख्यम्मम वक्त्राद्विनिर्गतम्॥ १७२॥

पठेद्वा शृणुयाद्वापि शत्रुघातकरो भवेत्।
न देयम्परशिष्यायाऽभक्ताय प्राणवल्लभे॥ १७३॥

देयं शिष्याय भक्ताय देवीभक्तिपराय च।
इदं रहस्यम्परमन्दुर्ल्लभन्दुष्टचेतसाम्॥ १७४॥

इति धूमावतीसहस्रनामस्तोत्रं सम्पूर्णम्॥

इति शाक्तप्रमोदे धूमावतीतन्त्रं समाप्तम्॥

श्रीः

शिवहरराजधानीपतिश्रीराजादेवनन्दनसिंह-

बहादुरनराधिपसंगृहीतविरचित-

शाक्तप्रमोदान्तर्गतं

अष्टमं

बगलामुखीतन्त्रम्

उक्तराजगुरुवंश्यपण्डितश्रीरघुराजदुबेजीद्वारा
संशोधितम्

तदेतत्

श्रीकृष्णदासात्मज-खेमराजेन
स्वकीये श्रीवेंकटेश्वर यन्त्रालये

मुद्रयित्वा प्रकाशितम्

बोम्ब-ई

श्रीगणेशाय नमः

शाक्तप्रमोदः

अथ बगलामुखीतन्त्रम्

अथ बगलामुखीध्यानम्

मध्येसुधाब्धिमणिमण्डपरत्नवेदीसैंहासनोपरिगताम्परिपीतवर्ण
अम्।
पीताम्बराभरणमाल्यविभूषिताङ्गीन्देवीन्नमामिधृतमुद्गरवैरिजिह्
वाम्॥ १॥

जिह्वाग्रमादाय करेण देवींव्वामेन शत्रून्परिपीडयन्तीम्।
गदाभिघातेन च दक्षिणेन पीताम्बराढ्यान्द्विभुजान्नमामि॥ २॥

p. 304) अथ यन्त्रोद्धारः

त्र्यस्रं षडस्रं वृत्तमष्टदलम्पद्मम्भूपुरान्वितम्।

अथ मन्त्रोद्धारः

प्रणवं स्थिरमायाञ्च ततश्च बगलामुखि॥
तदन्ते सर्वदुष्टानान्ततो वाचम्मुखम्पदम्॥
स्तम्भयेति ततो जिह्वाङ्कीलयेति पदद्वयम्॥
बुद्धिन्नाशय पश्चात्तु स्थिरमायां समालिखेत्॥
लिखेच्च पुनरोङ्कारं स्वाहेति पदमन्ततः॥
षट्त्रिंशदक्षरी विद्या सर्वसम्पत्करी मता॥

अथ मन्त्रः

ॐ ह्रीं बगलामुखि सर्वदुष्टानाँव्वाचम्मुखं स्तम्भय
जिह्वाङ्कीलय कीलय बुद्धिन्नाशय ह्रीं ॐ स्वाहा॥

अथ पूजाविधिः

प्रातःकृत्यादि प्राणायामान्तँव्विधाय ऋष्यादिन्यासङ्कुर्यात्।
यथा शिरसि नारदऋषयेनमः, मुखे त्रिष्टुप्छन्दसेनमः, हृदि

बगलामुख्यैदेवतायैनमः, गुह्ये ह्लींबीजायनमः, पादयोः
स्वाहाशक्तयेनमः॥ नारदोऽस्य ऋषिर्म्मूर्ध्नि त्रिष्टुब्छन्दश्च
तन्मुखे॥ श्रीबगलामुखीन्देवीं हृदये विन्यसेत्ततः॥
ह्लींबीजङ्गुह्यदेशे तु स्वाहाशक्तिस्तु पादयोः॥ ततः कराङ्गन्यासौ॥
ॐ ह्लीं-अङ्गुष्ठाभ्यान्नमः,

p. 305) बगलामुखीतर्ज्जनीभ्यां स्वाहा,
सर्वदुष्टानाम्मध्यमाभ्याँवषट्, वाचम्मुखंस्तम्भय
अनामिकाभ्यांहूम्, जिह्वाङ्कीलय कीलय कनिष्ठाभ्याँवौषट्,
बुद्धिन्नाशय ह्लींॐ स्वाहा करतलकरपृष्ठाभ्याम्फट्॥ एवं
हृदयादिषु॥ तथा च दिव्यतन्त्रे॥ युग्मबाणेषु सप्ताहिशेषार्णैश्च
मनूद्भवैः॥ करशाखासुतलयोः कराङ्गन्यासमाचरेत्॥ ततो
मूलान्ते आत्मतत्त्वव्यापिनीबगलामुखीश्रीपादुकाम्पूजयामि इति
मूलाधारे, मूलान्ते विद्यातत्त्वव्यापिनीबगलामुखी
श्रीपादुकाम्पूजयामि शिरसि, मूलान्ते शिवतत्त्वव्यापिनीबगलामुखी
श्रीपादुकाम्पूजयामि सर्वाङ्गे॥ ततश्च॥ मूर्ध्नि भाले दृशोः श्रोत्रे
गण्डयोर्न्नासयोः पुनः॥ ओष्ठयोर्म्मुखवृत्ते च दक्षिणांसे च
कूर्परे॥ मणिबन्धेऽङ्गुलेर्मूले गले च कुचयोर्हृदि॥ नाभौ
कट्याङ्गुह्यदेशे वामांसे कूर्परे तथा॥ मणिबन्धेऽङ्गुले मूले
ततश्च विन्यसेत्पुनः॥ दक्षवामे चोरुजान्वोर्ग्गुल्फयोरङ्गुलिमूलयोः॥

क्रमेण मन्त्रवर्णांस्तु न्यस्य ध्यायेद्यथाविधि॥ ततो ध्यानम्॥

मध्ये

सुराब्धिमणिमण्डपरत्नवेदीसिंहासनोपरिगताम्परिपीतवर्णाम्।

पीताम्बराभरणमाल्यविभूषिताङ्गीन्देवीं स्मरामि

धृतमुद्गरवैरिजिह्वाम्॥ जिह्वाग्रमादाय करेण देवीं वामेन

शत्रून्परिपीडयन्तीम्॥ गदाभिघातेन च दक्षिणेन

पीताम्बराढ्यान्द्विभुजान्नमामि॥ एवन्ध्यात्वा मानसैः सम्पूज्य

बहिः पूमारभेत्॥ तत्र प्रथमतोऽग्र्घ्यस्थापनम्॥ यथा॥

अष्टाङ्गुलञ्चतुरस्रँव्विधाय ऐशानादिकोणेषु पूर्वादिदिक्षु च

कुसुमाक्षतरक्तचन्दनैग्लौंगणपतयेनम इत्यनेन गजवदनं

सम्पूज्य तेन मधुना वा अग्र्घ्यपात्रमापूरयेत्। ततो वारत्रयं

विद्यया सम्पूज्य अङ्गानि विन्यसेत्। ततो धेनुयोनिमुद्रे प्रदर्श्य

तेनोदकेन आत्मानम्पूजोपकरणञ्चाभ्युक्षयेत्। ततो मूलमुच्चार्य ॐ

आधारशक्तिकमलासनायनमः। एवं शक्तिपद्मासनायनमः

पूर्ववद्ध्यात्वा पीठे आवाह्य षडङ्गानि न्यसेत्।

p. 306) ततो मुद्राम्प्रदर्श्य पुरतः षडङ्गेन मण्डलँय्यजेत्। ततो

मूलेन मन्त्रयित्वा धेनुयोनिमुद्रे प्रदर्श्य

आत्मविद्याशिवैस्तत्त्वैर्बिन्दुत्रयम्मुखे क्षिप्त्वा तर्ज्जन्यङ्गुष्ठयोगेन

साङ्गावरणाम्बगलामुखीन्तर्पयेत्। ततो यथासम्भवोपचारैः

सम्पूज्य आवरणपूजामारभेत्। षट्कोणेषु पूर्वे ॐसुभगायै नमः,
एवमग्निकोणे भगसर्पिण्यै ० ईशाने भगवाहायै० पश्चिमे
भगसिद्धायै० नैर्ऋत्ये भगपातिन्यै० वायौ भगमालिन्यै०।
ततोऽष्टदलपत्रेषु ब्राह्म्याद्याः पूज्याः। पत्राग्रेषु ॐजयायैनमः,
एवँव्विजयायै० अजितायै० अपराजितायै० स्तम्भिन्यै० जम्भिन्यै० मोहिन्यै०
आकर्षिण्यै०। ततो द्वारेषु ॐभैरवायनमः, तद्बाह्ये
इन्द्रादीन्वज्रादीन्पूजयेत्। ततो मूलेन धूपादिकन्दत्वा यथाशक्ति जपँ
व्विधाय त्रिशूलमुद्राम्प्रदर्श्य पुष्पाञ्जलित्रयन्दत्वा देव्यै
योनिमुद्राम्प्रदर्शयेत्। ततो भैरवाय बलिन्दद्यात्। ततो
विसर्जनान्तङ्कर्म समापयेत्। अस्य पुरश्चरणँल्लक्षजपः। तथा च।
पीताम्बरधरो भूत्वा पूर्वाशाभिमुखस्थितः॥
लक्षमेकञ्जपेन्मन्त्रं हरिद्राग्रन्थिमालया। ब्रह्मचर्यरतो
नित्यम्प्रयतो ध्यानतत्परः॥ प्रियङ्गुकुसुमेनापि पीतपुष्पैश्च होमयेत्
॥

अथ स्तोत्रम्

ॐ अस्य श्रीबगलामुखीस्तोत्रस्य नारदऋषिः श्रीबगलामुखी
देवता मम सन्निहितानाँव्विरोधिनाँव्वाङ्मुखपदबुद्धीनां
स्तम्भनार्थे विनियोगः॥

मध्ये सुधाब्धिमणिमण्डपरत्नवेदीसिंहासनोपरिगतां

परिपीतवर्णाम्।

पीताम्बराभरणमाल्यविभूषिताङ्गीं

देवीम्भजामि धृतमुद्गरवैरिजिह्वाम्॥ १॥

जिह्वाग्रमादाय करेण देवींव्वामेन शत्रून्परिपीडयन्तीम्।

गदाभिघातेन च दक्षिणेन पीताम्बराढ्यान्द्विभुजाम्भजामि॥ २॥

चलत्कनककुण्डलोल्लसितचारुगण्डस्थलाँ

ल्लसत्कनकचम्पकद्युतिमदिन्दुबिम्बाननाम्।

p. 307) गदाहतविपक्षकाङ्कलितलोलजिह्वाञ्चलां स्मरामि बगलामुखीँ

व्विमुखवाङ्मनस्स्तम्भिनीम्॥ ३॥

पीयूषोदधिमध्यचारुविलसद्रत्नोत्पले मण्डपे

सत्सिंहासनमौलिपातितरिपुम्प्रेतासनाध्यासिनीम्।

स्वर्णाभाङ्गरपीडितारिरसनाम्भ्राम्यद्गदाँ

व्विभ्रमामित्थन्ध्यायति यान्ति तस्य विलयं सद्योऽथ सर्वापदः॥ ४॥

देवि त्वच्चरणाम्बुजार्च्चनकृते यः पीतपुष्पाञ्जलीन्भक्त्या वामकरे

निधाय च मनुम्मन्त्री मनोज्ञाक्षरम्।

पीठन्ध्यानपरोऽथ कुम्भकवशाद्बीजं

स्मरेत्पार्थिवस्तस्यामित्रमुखस्य वाचि हृदये जाड्यम्भवेत्तत्क्षणात्॥ ५

॥

वादी मूकति रङ्कति क्षितिपतिर्वैश्वानरः शीतति क्रोधी शाम्यति

दुर्ज्जनः सुजनति क्षिप्रानुगः खञ्जति।

गर्वी खर्वति सर्वविच्च जडति त्वद्यन्त्रणा यन्त्रितः श्रीनित्ये वगलामुखि

प्रतिदिनङ्कल्याणि तुभ्यन्नमः॥ ६॥

मन्त्रस्तावदलँव्विपक्षदलनँस्तोत्रम्पवित्रञ्च ते यन्त्रँ

व्वादिनियन्त्रणन्त्रिजगताञ्जैत्रञ्च चित्रञ्च ते।

मातः श्रीबगलेति नाम ललितं यस्यास्ति जन्तोर्मुखे त्वन्नामग्रहणेन

संसदि मुखस्तम्भो भवेद्वादिनाम्॥ ७॥

दुष्टस्तम्भनमुग्रविघ्नशमनन्दारिद्र्यविद्रावणं

भूभृद्भीशभनञ्चलामृगादृशाञ्चेतस्समाकर्षणम्।

सौभाग्यैकनिकेतनं समदृशः

कारुण्यपूर्णामृतम्मृत्योर्मारणमाविरस्तु पुरतो मातस्त्वदीयँ

व्वपुः॥ ८॥

मातर्भञ्जय मे विपक्षवदनञ्जिह्वाञ्च सङ्कीलय ब्राह्मीम्मुद्रय
नाशयाशु धिषणामुग्राङ्गतिं स्तम्भय।
शत्रूंश्चूर्णय देवि तीक्ष्णगदया गौराङ्गि पीताम्बरे
विघ्नौघम्बगले हर प्रणमताङ्कारुण्यपूर्णेक्षणे॥ ९॥

मातर्भैरवि भद्रकालि विजये वाराहि विश्वाश्रये।
श्रीविद्ये समये महेशि बगले कामेशि रामे रमे॥

मातङ्गि त्रिपुरे परात्परतरे स्वर्गापवर्गप्रदे दासोऽहं शरणागतः
कारुणया विश्वेश्वरि त्राहि माम्॥ १०॥

संरम्भे चौरसङ्घे प्रहरणसमये बन्धने वारिमध्ये विद्यावादे
विवादे प्रकुपितनृपतौ दिव्यकाले निशायाम्।
p. 308) वश्ये वा स्तम्भने वा रिपुवधसमये निर्ज्जने वा वने वा
गच्छंस्तिष्ठंस्त्रिकालँय्यदि पठति शिवम्प्राप्नुयादाशु धीरः॥ ११॥

नित्यं स्तोत्रमिदम्पवित्रमिह यो देव्याः पठत्यादराद्भूत्वा
यन्त्रमिदन्तथैव समरे वाहौ करे वा गले।
राजानोऽप्यरयो मदान्धकरिणस्सर्पा मृगेन्द्रादिकास्ते वै यान्ति

विमोहिता रिपुगणा लक्ष्मीः स्थिरास्सिद्धयः॥ १२॥

त्वँव्विद्या षरमा त्रिलोकजननी विघ्नौघसञ्च्छेदिनी
योषाकर्षणकारिणी त्रिजगतामानन्दसँअर्द्धिनी।
दुष्टोच्चाटनकारिणी जनमनस्सम्मोहसन्दायिनी। जिह्वाकीलनभैरवी
विजयते ब्रह्मादिमन्त्रो यथा॥ १३॥

विद्या लक्ष्मीस्सर्वसौभाग्यमायुः पुत्रैः पौत्रैः सर्वसाम्राज्यसिद्धिः
।
मानम्भोगो वश्यमारोग्यसौख्यम्प्राप्तन्तत्तद्भूतलेऽस्मिन्नरेण ॥ १४
॥

यतकृतञ्जपसन्नाहङ्गदितम्परमेश्वरि। दुष्टानां निग्रहार्त्थाय
तद्गृहाण नमोऽस्तु ते॥ १५॥

ब्रह्मास्त्रमिति विख्यातन्त्रिषु लोकेषु विश्रुतम्।
गुरुभक्ताय दातव्यन्न देयँय्यस्य कस्यचित्॥ १६॥

पीताम्बरान्द्विभुजाञ्च त्रिनेत्राङ्गात्रकोज्ज्वलाम्।
शिलामुद्गरहस्ताञ्च स्मरेत्ताम्बगलामुखीम्॥ १७॥

इति रुद्रयामले बगलामुखीस्तोत्रं समाप्तम्॥

अथ कवचम्

कैलासाचलमध्यगम्पुरवहं शान्तन्त्रिनेत्रं शिवं वामस्था
कवचम्प्रणम्य गिरिजा भूतिप्रदम्पृच्छति॥
देवी श्रीबगलामुखी रिपुकुलारण्याग्निरूपा च या
तस्याश्चापविमुक्तमन्त्रसहितम्प्रीत्याऽधुना ब्रूहि माम्॥ १॥

श्रीशङ्कर उवाच

देवी श्रीभववल्लभे शृणु महामन्त्रँव्विभूतिप्रदन्देव्या
वर्म्मयुतं समस्तसुखदं साम्राज्यदम्मुक्तिदम्।
तारं रुद्रवधूँव्विरञ्चिमहिलाविष्णुप्रियाकामयुक्कान्ते
श्रीबगलानने मम रिपुन्नाशाय युग्मन्त्विति॥ २॥

p. 309) ऐश्वर्याणि पदञ्च देहि युगलं शीघ्रम्मनोवाञ्छितङ्कार्यं
साधय युग्मयुक्छिववधूवह्निप्रियान्तो मनुः।
कंसारेस्तनयञ्च बीजमपरा शक्तिश्च वाणी तथा कीलं श्रीमति

भैरवर्षिसहितञ्छन्दो विराड्ढँयुतम्॥ ३॥

स्वेष्टार्थस्य परस्य वेत्ति नितराङ्कार्यस्य सम्प्राप्तये

नानासाध्यमहागदस्य नियतन्नाशाय वीर्याप्तये।

ध्यात्वा श्रीबगलाननाम्मनुवरञ्जप्त्वा सहस्राख्यकन्दीग्घैः

षड्ढयुतैश्च रुद्रमहिताबीजैर्विनश्याङ्गके॥ ध्यानम्॥

सौवर्णासनसंस्थितान्त्रिनयनाम्पीतांशुकोल्लासिनीं

हेमाभाङ्गरुचिं शशाङ्कमुकुटां स्रक्कम्पकस्रग्युताम्।

हस्तैर्मुद्गरपाशबद्धरसनां

सम्बिभ्रतीम्भूषणव्याप्ताङ्गीम्बगलामुखीन्त्रिजगतां

संस्तम्भिनीञ्चिन्तये॥ ॐ अस्य श्रीबगलामुखीब्रह्मास्त्रमन्त्रकवचस्य

भैरव ऋषिर्विराड्छन्दः श्रीबगलामुखी देवता क्लींबीजम् ऐंशक्तिः

श्रींकीलकं मम परस्य च मनोभिलषितेष्टकार्यसिद्धये विनियोग॥

शिरसि भैरवऋषयेनमः, मुखे विराड्छन्दसे नमः, हृदि

बगलामुखीदेवतायैनमः, गुह्ये क्लींबीजायनमः, पादयोः

ऐंशक्तयेनमः, सर्वाङ्गे श्रींकीलकायनमः, ॐ ह्राँ

अङ्गुष्ठाभ्यान्नमः, ॐ ह्रीं तर्ज्जनीभ्यान्नमः, ॐ ह्रूँ

मध्यमाभ्यान्नमः, ॐ ह्रैं अनामिकाभ्यान्नमः, ॐ ह्रौं

कनिष्ठिकाभ्यान्नमः, ॐ ह्रः करतलकरपृष्ठाभ्यान्नमः,

ॐ ह्राँहृदयायनमः, ॐ ह्रीं शिरसे स्वाहा, ॐह्रूँहिखायैवषट्,

ॐ ह्रैंकवचायहुम्, ॐ ह्रौंनेत्रत्रयायवौषट्, ॐ ह्रः अस्त्राय फट्॥

मन्त्रोद्धारः - ॐ ह्राँऐं श्रीं क्लींश्रीबगलानने मम रिपून्नाशय
२, ममैश्वर्याणि देहि २, शीघ्रम्मनोवाञ्छितकार्यं साधयः २,
ह्रींस्वाहा॥

शिरो मे पातु ॐह्रीं ऐं श्रीं क्लींपातु ललाटकम्।
सम्बोधनपदम्पातु नेत्रे श्रीबगलानने॥ १॥

श्रुतौ मम रिपुम्पातु नासिकान्नाशय द्वयम्।
पातु गण्डौ सदा मामैश्वर्याण्यन्तन्तु मस्तकम्॥ २॥

देहि द्वन्द्वं सदा जिह्वाम्पातु शीघ्रँव्वचो मम।
p. 310) कण्ठदेशं स नः पातु वाञ्छितम्बाहुमूलकम्॥ ३॥

कार्यं साधय द्वन्द्वन्तु करौ पातु सदा मम।
मायायुक्ता तथा स्वाहा हृदयम्पातु सर्वदा॥ ४॥

अष्टाधिकचत्त्वारिंशदण्डाढ्या बगलामुखी।
रक्षाङ्करोतु सर्वत्र गृहेऽरण्ये सदा मम॥ ५॥

ब्रह्मास्त्राख्यो मनुः पातु सर्वाङ्गे सर्वसन्धिषु।
मन्त्रराजः सदा रक्षाङ्करोतु मम सर्वदा॥ ६॥

ॐ ह्रीं पातु नाभिदेशम्मे कटिम्मे बगलावतु।
मुखी वर्णद्वयम्पातु लिङ्गम्मे मुष्कयुग्मकम्॥ ७॥

जानुनी सर्वदुष्टानाम्पातु मे वर्णपञ्चकम्।
वाचम्मुखन्तथा पादं षड्वर्णा परमेश्वरी॥ ८॥

जङ्घायुग्मे सदा पातु बगला रिपुमोहिनी।
स्तम्भयेति पदम्पृष्ठम्पातुवर्णत्रयम्मम॥ ९॥

जिह्वाँव्वर्णद्वयम्पातु गुल्फौ मे कीलयेति च।
पादोर्द्ध्वं सर्वदा पातु बुद्धिं पादतले मम॥ १०॥

विनाशय पदम्पातु पादाङ्गुल्योर्न्नखानि मे।
ह्रीं बीजं सर्वदा पातु बुद्धीन्द्रियवचांसि मे॥ ११॥

सर्वाङ्गम्प्रणवः पातु स्वाहा रोमाणि मेऽवतु।

ब्राह्मी पूर्वदले पातु चाग्नेय्याँविष्णुवल्लभा॥ १२॥

माहेशी दक्षिणे पातु चामुण्डा राक्षसेऽवतु।
कौमारी पश्चिमे पातु वायव्ये चापराजिता॥ १३॥

वाराही चोत्तरे पातु नारसिंही शिवेऽवतु।
ऊर्द्धम्पातु महालक्ष्मीः पाताले शारदाऽवतु॥ १४॥

इत्यष्टौ शक्तयः पान्तु सायुधाश्च सवाहनाः।
राजद्वारे महादुर्ग्गे पातु माङ्गणनायकः॥ १५॥

श्मशाने जलमध्ये च भैरवश्च सदाऽवतु।
द्विभुजा रक्तवसनाः सर्वाभरणभूषिताः॥ १६॥

योगिन्यः सर्वदा पान्तु महारण्ये सदा मम।
इति ते कथितन्देवि कवचम्परमाद्भुतम्॥ १७॥

श्रीविश्वविजयन्नाम कीर्तिश्रीविजयप्रदम्।
अपुत्रो लभते पुत्रन्धीरं शूरं शतायुषम्॥ १८॥

निर्द्धनो धनमाप्नोति कवचस्यास्य पाठतः।
जपित्वा मन्त्रराजन्तु ध्यात्वा श्रीबगलामुखीम्॥ १९॥

p. 311) पठेदिदं हि कवचन्निशायान्नियमात्तु यः।
यद्यत्कामयते कामं साध्यासाध्ये महीतले॥ २०॥

तत्तत्काममवाप्नोति सप्तरात्रेण शङ्करी।
गुरुन्ध्यात्वा सुराम्पीत्वा रात्रौ शक्तिसमन्वितः॥ २१॥

कवचँय्यः पठेद्देवि तस्याऽसाध्यन्न किञ्चन।
यन्ध्यात्वा प्रजपेन्मन्त्रसहस्रङ्कवचम्पठेत्॥ २२॥

त्रिरात्रेण वशँय्याति मृत्युन्तन्नात्र संशयः।
लिखित्वा प्रतिमां शत्रोस्सतालेन हरिद्रया॥ २३॥

लिखित्वा हृदि तन्नाम तन्ध्यात्वा प्रजपेन्मनुम्।
एकविशदिनँय्यावत्प्रत्यहञ्च सहस्रकम्॥ २४॥

जप्त्वा पठेत्तु कवचञ्चतुर्विंशतिवारकम्।
संस्तम्भञ्जायते शत्रोर्न्नात्र कार्या विचारणा॥ २५॥

विवादे विजयन्तस्य सङ्ग्रामे जयमाप्नुयात्।
श्मशाने च भयन्नास्ति कवचस्य प्रभावतः॥ २६॥

नवनीतञ्चाभिमन्त्र्य स्त्रीणान्दद्यान्महेश्वरि।
वन्ध्यायाञ्जायते पुत्रो विद्याबलसमन्वितः॥ २७॥

श्मशानाङ्गारमादाय भौमे रात्रौ शनावथ।
पादोदकेन स्पृष्ट्वा च लिखेल्लौहशलाकया॥ २८॥

भूमौ शत्रोः स्वरूपञ्च हृदि नाम समालिखेत्।
हस्तन्तद्धृदये दत्वा कवचन्तिथिवारकम्॥ २९॥

ध्यात्वा जपेन्मन्त्रराजन्नवरात्रम्प्रयत्नतः।
म्रियते ज्वरदाहेन दशमेऽह्नि न संशयः॥ ३०॥

भूर्ज्जपत्रेष्विदं स्तोत्रमष्टगन्धेन सँलिखेत्।
धारयेद्दक्षिणे बाहौ नारी वामभुजे तथा॥ ३१॥

सङ्ग्रामे जयमाप्नोति नारी पुत्रवती भवेत्।

ब्रह्मास्त्रादीनि शस्त्राणि नैव कृन्तन्ति तज्जनम्॥ ३२॥

सम्पूज्य कवचन्नित्यम्पूजायाः फलमालभेत्।
वृहस्पतिसमो वापि विभवे धनदोपमः॥ ३३॥

कामतुल्यश्च नारीणां शत्रूणाञ्च यमोपमः।
कवितालहरी तस्य भवेद्गङ्गाप्रवाहवत्॥ ३४॥

गद्यपद्यमयी वाणी भवेद्देवीप्रसादतः।
एकादशशतँय्यावत्पुरश्चरणमुच्यते॥ ३५॥

पुरश्चर्याविहीनन्तु न चेदम्फलदायकम्।
न देयम्परशिष्येभ्यो दुष्टेभ्यश्च विशेषतः॥ ३६॥

p. 312) देयं शिष्याय भक्ताय पञ्चत्वञ्चाऽन्यथाप्नुयात्।
इदङ्कवचमज्ञात्वा भजेद्यो बगलामुखीम्॥

शतकोटि जपित्वा तु तस्य सिद्धिर्न्न जायते॥ ३७॥

दाराढ्यो मनुजोस्य लक्षजपतः प्राप्नोति सिद्धिम्परांव्विद्यां

श्रीविजयन्तथा सुनियतन्धारञ्च वीरँव्वरम्॥ ब्रह्मास्त्राख्यमनुँ
व्विलिख्य नितराम्भूर्ज्जेष्टगन्धेन वै धृत्वा राजपुरँव्व्रजन्ति खलू ये
दासोऽस्ति तेषान्नृपः॥ ३८॥

इति विश्वसारोद्धारतन्त्रे पार्वतीश्वरसँवादे बगलामुखीकवचं
सम्पूर्णम्॥

अथ हृदयम्

ॐ अस्य श्रीबगलामुखीहृदयमालामन्त्रस्य नारद
ऋषिरनुष्टुप्छन्दश्श्रीबगलामुखी देवता ह्रींबीजम् क्लींशक्तिः ऐँ
कीलकम् श्रीबगलामुखीप्रसादसिद्ध्यर्त्थे जपे विनियोगः॥

अथ न्यासः॥

ॐ नारदऋषयेनमश्शिरसि, ॐ अनुष्टुप्छन्दसेनमो मुखे, ॐ
श्रीबगलामुख्यै देवतायै नमो हृदये, ॐ ह्रींबीजायनमो गुह्ये,
ॐ क्लींशक्तयेनमः पादयोः, ॐ ऐंकीलकायनमस्सर्वाङ्गे।

अथ कराङ्गन्यासौ

ॐ ह्रीं अङ्गुष्ठाभ्यान्नमः, ॐ क्लीं तर्जनीभ्यान्नमः,

ॐ ऐंमध्यमाभ्यान्नमः, ॐ ह्रीं अनामिकाभ्यान्नमः,।

ॐ क्लींकनिष्ठिकाभ्यान्नमः, ॐ ऐंकरतलकरपृष्ठाभ्यान्नमः॥

ॐ ह्रीं हृदयायनमः, ॐ क्लीं शिरसे स्वाहा, ॐ ऐं शिखायै वषट्।

ॐ ह्रींकवचाय हूम्, ॐ क्लींनेत्रत्रयायवौषट्, ॐ ऐं अस्त्रायफट्,

ॐ ह्रीं क्लीं ऐं इति दिग्बन्धः॥

पीताम्बराम्पीतमाल्यां पीताभरणभूषिताम्।

पीतकञ्जपदद्वन्द्वाम्बगलाञ्चिन्तयेऽनिशम्॥

इति ध्यात्वा सम्पूज्य॥

पीतशङ्खगदाहस्ते पीतचन्दनचर्चिते।

बगले मे वरन्देहि शत्रुसङ्घविदारिणी॥

इति सम्प्रात्थ्य॥

ॐ ह्रीं क्लीं ऐं बगलामुख्यै गदाधारिण्यै प्रेतासनाध्यासिन्यै

स्वाहा॥

इति मन्त्रञ्जपित्वा पुनः पूर्ववद्धृदयादि षडङ्गन्यासङ्कृत्वा
स्तोत्रम्पठेत्॥

p. 313) तद्यथा॥

बन्देऽहम्बगलान्देवीम्पीतभूषणभूषिताम्।
तेजोरूपमयीन्देवीम्पीततेजस्स्वरूपिणीम्॥ १॥

गदाभ्रमणाभिन्नाभ्राम्भ्रकुटीभीषणाननाम्।
भीषयन्तीम्भीमशत्रून्भजे भक्तस्य भव्यदाम्॥ २॥

पूर्णचन्द्रसमानास्याम्पीतगन्धानुलेपनाम्।
पीताम्बरपरीधानाम्पवित्रामाश्रयाम्यहम्॥ ३॥

पालयन्तीमनुपलम्प्रसमीक्ष्यावनीतले।
पीताचाररताम्भक्तांस्ताम्भवानीम्भजाम्यहम्॥ ४॥

पीतपद्मपदद्वन्द्वाञ्चम्पकारण्यरोपिणीम्।

पीतावतंसाम्परमाँव्वन्दे पद्मजवन्दिताम्॥ ५॥

लसच्चारुसिञ्जत्सुमञ्जीरपादाञ्चलत्स्वर्णकर्णावतंसाञ्चितास्याम्।
वलत्पीतचन्द्राननाञ्चन्द्रवन्द्याम्भजे पद्मजादीड्यसत्पादपद्माम्
॥ ६॥

सुपीताभया मालया पूतमन्त्रम्परन्ते जपन्तो जयं सँलभन्ते।
रणे रागरोषाप्लुतानां रिपूणाँव्विवादे बलाद्वैरकृद्धातमातः॥ ७
॥

भरत्पीतभास्वत्प्रभाहस्कराभाङ्गदागञ्जितामित्रगर्वां
गरिष्ठाम्।
गरीयो गुणागारगात्राङ्गुणाढ्याङ्गणेशादिगम्यां श्रये
निर्गुणाढ्याम्॥ ८॥

जना ये जपन्त्युग्रबीजञ्जगत्सु परम्प्रत्यहन्ते स्मरन्तः स्वरूपम्।
भवेद्वादिनाँव्वाङ्मुखस्तम्भ आद्ये जयो जायते जल्पतामाशु तेषाम्॥
९॥

तव ध्याननिष्ठा प्रतिष्ठात्मप्रज्ञावताम्पादपद्मार्च्चने

प्रेमयुक्ताः।

प्रसन्ना नृपाः प्राकृताः पण्डिता वा पुराणादिगा दासतुल्या भवन्ति॥

१०॥

नमामस्ते मातः कनककमनीयांघ्रिजलजँ

व्वलद्विद्युद्वर्णाङ्गनतिमिरविध्वंसकरणम्।

भवाब्धौ मग्नात्मोत्तरणकरणं

सर्वशरणम्प्रपन्नानाम्मातर्ज्जगति बगले दुःखदमनम्॥ ११॥

ज्वलज्ज्योत्स्नारत्नाकरमणिविषक्ताङ्घ्रिभवनं स्मरामस्ते धाम

स्मर-हर-हरीन्द्रेन्दुप्रमुखैः।

अहोरात्रम्प्रातः प्रणयनवनीयं सुविशदं

परम्पीताकारम्परिचितमणिद्वीपवसनम्॥ १२॥

वदामस्ते मातश्श्रुतिसुखकरन्नाम ललितँल्लसन्मात्रावर्णाङ्गगति

बगलेति प्रचरितम्।

p. 314) चलन्तस्तिष्ठन्तो वयमुपविशन्तोपि शयने न भेमो यच्छ्रेयो दिवि

दुरवलभ्यन्दिविषदाम्॥ १३॥

पदार्च्चायाम्प्रीतिः प्रतिदिनमपूर्वा प्रभवतु यथा ते

प्रासन्न्यम्प्रतिपलमपेक्ष्यम्प्रणमताम्।
अनल्पन्तन्मातर्भवति भृतभक्त्या भवतु नो दिशातस्सद्भक्तिम्भुवि
भगवताम्भूरि भवदाम्॥ १४॥

मम सकलरिपूणाँव्वाङ्मुखे स्तम्भयाशु भगवति रिपुजिह्वाङ्कीलय
प्रस्थतुल्याम्।
व्यवसितखलबुद्धिन्नाशयाशु प्रगल्भां मम कुरु बहु कार्यं
सत्कृपेऽम्ब प्रसीद्॥ १५॥

व्रजतु मम रिपूणां सद्मनि प्रेतसँथा करधृतगदया
तान्घातयित्वाशु रोषात्।
सधनवसनधान्यसद्म तेषाम्प्रदह्य पुनरपि बगला
स्वस्थानमायातु शीघ्रम्॥ १६॥

करधृतरिपुजिह्वापीडनव्यग्रहस्ताम्पुनरपि गदया तांस्ताडयन्तीं
सुतन्त्राम्।
प्रणतसुरगणानाम्पालिकाम्पीतवस्त्रां
बहुबलबगलान्ताम्पीतवस्त्रान्नमामः॥ १७॥

हृदयवचनकायैः कुर्वताम्भक्तिपुञ्जम्प्रकटितकरुणार्द्राम्प्रीणती

जल्पतीति।

धनमथ बहुधान्यम्पुत्रपौत्रादिवृद्धिः सकलमपि किमेभ्यो
देयमेवन्त्ववश्यम्॥ १८॥

तव चरणसरोजं सर्वदा सेव्यमानन्द्रुहिण-हरि-
हराद्यैर्देववृन्दैश्शरण्यम्।
मृदुमपि शरणन्ते शर्मदं सूरिसेव्यँव्ययमिह करवामो
मातरेतद्विधेयम्॥ १९॥

बगलाहृदयस्तोत्रमिदम्भक्तिसमन्वितः।
पठेद्यो बगला तस्य प्रसन्ना पाठतो भवेत्॥ २०॥

पीतध्यानपरो भक्तो यश्शृणोत्यविकल्पतः।
निष्कल्मषो भवेन्मर्त्त्यो मृतो मोक्षमवाप्नुयात्॥ २१॥

आश्विनस्य सिते पक्षे महाष्टम्यान्दिवानिशम्।
यस्त्विदम्पठते प्रेम्णा बगलाप्रीतिमेतिः सः॥ २२॥

देव्यालये पठन्मर्त्त्यो बगलान्ध्यायतीश्वरीम्।
पीतवस्त्रावृतो यस्तु तस्य नश्यन्ति शत्रवः॥ २३॥

पीताचाररतो नित्यम्पीतभूषाँव्विचिन्तयन्।
बगलाँय्यः पठेन्नित्यं हृदयस्तोत्रमुत्तमम्॥ २४॥

न किञ्चिद्दुर्ल्लभं तस्य दृश्यते जगतीतले।
p. 315) शत्रवो ग्लानिमायांति तस्य दर्शनमात्रतः॥ २५॥

इति सिद्धेश्वरतन्त्रे उत्तरखण्डे बगलापटले श्रीबगलाहृदयस्तोत्रं
समाप्तम्॥

अथ शतनाम

नारद उवाच

भगवन्देवदेवेश सृष्टिस्थितिलयात्मक।
शतमष्टोत्तरन्नाम्नाम्बगलाया वदाधुना॥ १॥

श्रीभगवानुवाच

शृणु वत्स प्रवक्ष्यामि नाम्नामष्टोत्तरं शतम्।

पीताम्बर्या महादेव्याः स्तोत्रम्पापप्रणाशनम्॥ २॥

यस्य प्रपठनात्सद्यो वादी मूको भवेत्क्षणात्।
रिपूणां स्तम्भनँय्याति सत्यं सत्यँव्वदाम्यहम्॥ ३॥

ॐ अस्य श्रीपीताम्बर्यष्टोत्तरशतनामस्तोत्रस्य सदाशिव
ऋषिरनुष्टुप्छन्दश्श्रीपीताम्बरी देवता श्रीपीताम्बरीप्रीतये जपे
विनियोगः॥

ॐ बगला विष्णुवनिता विष्णुशङ्करभामिनी।
बहुला वेदमाता च महाविष्णुप्रसूरपि॥ १॥

महामत्स्या महाकूर्मा महावाराहरूपिणी।
नरसिंहप्रिया रम्या वामना बटुरूपिणी॥ २॥

जामदग्न्यस्वरूपा च रामा रामप्रपूजिता।
कृष्णा कपर्द्दिनी कृत्या कलहा कलविकारिणी॥ ३॥

बुद्धिरूपा बुद्धभार्या बौद्धपाखण्डखण्डिनी।
कल्किरूपा कलिहरा कलिदुर्गतिनाशिनी॥ ४॥

कोटिसूर्यप्रतीकाशा कोटिकन्दर्पमोहिनी।
केवला कठिना काली कला कैवल्यदायिनी॥ ५॥

केशवी केशवाराध्या किशोरी केशवस्तुता।
रुद्ररूपा रुद्रमूर्त्ती रुद्राणी रुद्रदेवता॥ ६॥

नक्षत्ररूपा नक्षत्रा नक्षत्रेशप्रपूजिता।
नक्षत्रेशप्रिया नित्या नक्षत्रपतिवन्दिता॥ ७॥

नागिनी नागजननी नागराजप्रवन्दिता।
नागेश्वरी नागकन्या नागरी च नगात्मजा॥ ८॥

नगाधिराजतनया नगराजप्रपूजिता।
नवीना नीरदा पीता श्यामा सौन्दर्यकारिणी॥ ९॥

रक्ता नीला घना शुभ्रा श्वेता सौभाग्यदायिनी।
सुन्दरी सौभगा सौम्या स्वर्णभा स्वर्गतिप्रदा॥ १०॥

रिपुत्रासकरी रेखाशत्रुसंहारकारिणी।

p. 316) भामिनी च तथा माया स्तम्भिनी मोहिनी शुभा॥ ११॥

रागद्वेषकरी रात्री रौरवध्वंसकारिणी।
यक्षिणी सिद्धनिवहा सिद्धेशा सिद्धिरूपिणी॥ १२॥

लङ्कापतिध्वंसकरी लङ्केशरिपुवन्दिता।
लङ्कानाथकुलहरा महारावणहारिणी॥ १३॥

देवदानवसिद्धौघ-पूजिता परमेश्वरी।
पराणुरूपा परमा परतन्त्रविनाशिनी॥ १४॥

वरदा वरदाराध्या वरदानपरायणा।
वरदेशप्रिया वीरा वीरभूषणभूषिता॥ १५॥

वसुदा बहुदा वाणी ब्रह्मरूपा वरानना।
बलदा पीतवसना पीतभूषणभूषिता॥ १६॥

पीतपुष्पप्रिया पीतहारा पीतस्वरूपिणी।
इति ते कथितँव्विप्र नाम्नामष्टोत्तरशतम्॥ १७॥

यः पठेत्पाठयेद्वापि शृणुयाद्वा समाहितः।
तस्य शत्रुः क्षयं सद्यो याति नैवात्र संशयः॥ १८॥

प्रभातकाले प्रयतो मनुष्यः पठेत्सुभक्त्या परिचिन्त्य पीताम्।
द्रुतम्भवेत्तस्य समस्तवृद्धिर्विनाशमायाति च तस्य शत्रुः॥ १९॥

इति विष्णुयामले नारदविष्णुसँवादे श्रीबगलाष्टोत्तरशतनामस्तोत्रं
सम्पूर्णम्॥

अथ सहस्रनाम

सुरालयप्रधाने तु देवदेवम्महेश्वरम्।
शैलाधिराजतनया सङ्ग्रहे तमुवाच ह॥ १॥

श्रीदेव्युवाच

परमेष्ठिन्परन्धाम प्रधान परमेश्वर।
नाम्नां सहस्रम्बगलामुख्याद्या ब्रूहि वल्लभ॥ २॥

ईश्वर उवाच

श्रृणु देवि प्रवक्ष्यामि नामधेयसहस्त्रकम्।
परब्रह्मास्त्रविद्यायाश्चतुर्वर्गफलप्रदम्॥ ३॥

गुह्याद्गुह्यतरन्देवि सर्वसिद्धैकवन्दितम्।
अतिगुप्ततरँव्विद्या सर्वतन्त्रेषु गोपिता॥ ४॥

विशेषतः कलियुगे महासिद्धौघदायिनी।
गोपनीयङ्गोपनीयङ्गोपनीयम्प्रयत्नतः॥ ५॥

अप्रकाश्यमिदं सत्यं स्वयोनिरिव सुव्रते।
रोधिनी विघ्नसङ्घानां मोहिनी परयोषिताम्॥ ६॥

p. 317) स्तम्भिनी राजसैन्यानाँव्वादिनी परवादिनाम्।
पुरा चैकार्णवे घोरे काले परमभैरवः॥ ७॥

सुन्दरीसहितो देवः केशवः क्लेशनाशनः।
उरगासनमासीनो योगनिद्रामुपागमत्॥ ८॥

निद्राकाले च ते काले मया प्रोक्तः सनातनः।

महास्तम्भकरन्देवि स्तोत्रँव्वा शतनामकम्॥ ९॥

सहस्रनाम परमँव्वद देवस्य कस्यचित्।

श्रीभगवानुवाच

शृणु शङ्कर देवेश परमातिरहस्यकम्॥ १०॥

अजोहं यत्प्रसादेन विष्णुः सर्वेश्वरेश्वरः।
गोपनीयम्प्रयत्नेन प्रकाशात्सिद्धिहानिकृत्॥ ११॥

ओमस्य श्रीपीताम्बरीसहस्रनामस्तोत्रमन्त्रस्य भगवान्सदाशिव
ऋषिरनुष्टुप्छन्दश्श्रीजगद्वश्यकरी पीताम्बरी देवता
सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः॥

अथ ध्यानम्

पीताम्बरपरीधानां पीनोन्नतपयोधराम्।
जटामुकुटशोभाढ्याम्पीतभूमिसुखासनाम्॥ १२॥

शत्रोर्जिह्वां मुद्गरञ्च बिभ्रतीम्परमाङ्कलाम्।
सर्वागमपुराणेषु विख्याताम्भुवनत्रये॥ १३॥

सृष्टिस्थितिविनाशानामादि भूताम्महेश्वरीम्।
गोप्या सर्वप्रयत्नेन शृणु ताङ्कथयामि ते॥ १४॥

जगद्विध्वंसिनीन्देवीमजरामरकारिणीम्।
तान्नमामि महामायाम्महदैश्वर्यदायिनीम्॥ १५॥

प्रणवम्पूर्वमुद्धृत्य स्थिरमायान्ततो वदेत्।
बगलामुखी सर्वेति दुष्टानाँव्वाचमेव च॥ १६॥

मुखम्पदं स्तम्भयेति जिह्वाङ्कीलय बुद्धिमत्।
विनाशयेति तारञ्च स्थिरमायान्ततो वदेत्॥ १७॥

वह्निप्रियान्ततो मन्त्रश्चतुर्वर्गफलप्रदः।
ब्रह्मास्त्रम्ब्रह्मविद्या च ब्रह्ममाता सनातनी॥ १८॥

ब्रह्मेशी ब्रह्मकैवल्यबगला ब्रह्मचारिणी।
नित्यानन्दा नित्यसिद्धा नित्यरूपा निरामया॥ १९॥

सन्धारिणी महामाया कटाक्षक्षेमकारिणी।
कमला विमला नीला रत्नकान्तिगुणाश्रिता॥ २०॥

कामप्रिया कामरता कामकामस्वरूपिणी।
मङ्गला विजया जाया सर्वमङ्गलकारिणी॥ २१॥

p. 318) कामिनी कामिनीकाम्या कामुका कामचारिणी।
कामप्रिया कामरता कामाकामस्वरूपिणी॥ २२॥

कामाख्या कामबीजस्था कामपीठनिवासिनी।
कामदा कामहा काली कपाली च करालिका॥ २३॥

कंसारिः कमला कामा कैलासेश्वरवल्लभा।
कात्यायनी केशवा च करुणा कामकेलिभुक्॥ २४॥

क्रियाकीर्त्तिः कृत्तिका च काशिका मथुरा शिवा।
कालाक्षी कालिका काली धवलाननसुन्दरी॥ २५॥

खेचरी च खमूर्त्तिश्च क्षुद्रा क्षुद्रक्षुधावरा।

खड्गहस्ता खड्गरता खड्गिनी खर्परप्रिया॥ २६॥

गङ्गा गौरी गामिनी च गीता गोत्रविवर्द्धिनी।
गोधरा गोकरा गोधा गन्धर्वपुरवासिनी॥ २७॥

गन्धर्वा गन्धर्वकला गोपनी गरुडासना।
गोविन्दभावा गोविन्दा गान्धारी गन्धमादिनी॥ २८॥

गौराङ्गी गोपिकामूर्त्तिर्गोपीगोष्ठनिवासिनी।
गन्धा गजेन्द्रगामान्या गदाधरप्रिया ग्रहा॥ २९॥

घोरघोरा घोररूपा घनश्रोणी घनप्रभा।
दैत्येन्द्रप्रबला घण्टावादिनी घोरनिस्स्वना॥ ३०॥

डाकिन्युमा उपेन्द्रा च उर्वशी उरगासना।
उत्तमा उन्नता उन्ना उत्तमस्थानवासिनी॥ ३१॥

चामुण्डा मुण्डिता चण्डी चण्डदर्पहरेति च।
उग्रचण्डा चण्डचण्डा चण्डदैत्यविनाशिनी॥ ३२॥

चण्डरूपा प्रचण्डा च चण्डाचण्डशरीरिणी।
चतुर्भुजा प्रचण्डा च चराचरनिवासिनी॥ ३३॥

क्षत्रप्रायश्शिरोवाहा छला छलतरा छली।
क्षत्ररूपा क्षत्रधरा क्षत्रियक्षयकारिणी॥ ३४॥

जया च जयदुर्गा च जयन्ती जयदा परा।
जायिनी जयिनी ज्योत्स्ना जटाधरप्रिया जिता॥ ३५॥

जितेन्द्रिया जितक्रोधा जयमाना जनेश्वरी।
जितमृत्युर्जरातीता जाह्नवी जनकात्मजा॥ ३६॥

झङ्कारा झञ्झरी झण्टा झङ्कारी झकशोभिनी।
झखा झमेशा झङ्कारी योनिकल्याणदायिनी॥ ३७॥

p. 319) झञ्झरा झमुरी झारा झराझरतरा परा।
झञ्झा झमेता झङ्कारी झणाकल्याणदायिनी॥ ३८॥

ईमना मानसी चिन्त्या ईमुना शङ्करप्रिया।
टङ्कारी टिटिका टीका टङ्किनी च टवर्गगा॥ ३९॥

टापा टोपा टटपतिष्टमनी टमनप्रिया।
ठकारधारिणी ठीका ठङ्करी ठिकरप्रिया॥ ४०॥

ठेकठासा ठकरती ठामिनी ठमनप्रिया।
डारहा डाकिनी डारा डामरा डमरप्रिया॥ ४१॥

डखिनी डडयुक्ता च डमरूकरवल्लभा।
ढक्का ढक्की ढक्कनादा ढोलशब्दप्रबोधिनी॥ ४२॥

ढामिनी ढामनप्रीता ढगतन्त्रप्रकाशिनी।
अनेकरूपिणी अम्बा अणिमासिद्धिदायिनी॥ ४३॥

अमन्त्रिणी अणुकरी अणुमद्धानुसंस्थिता।
तारा तन्त्रावती तन्त्रतत्त्वरूपा तपस्विनी॥ ४४॥

तरङ्गिणी तत्त्वपरा तन्त्रिका तन्त्रविग्रहा।
तपोरूपा तत्त्वदात्री तपःप्रीतिप्रधर्षिणी॥ ४५॥

तन्त्रा यन्त्रार्च्चनपरा तलातलनिवासिनी।

तल्पदा त्वल्पदा काम्या स्थिरा स्थिरतरा स्थितिः॥ ४६॥

स्थाणुप्रिया स्थपरा स्थिता स्थानप्रदायिनी।
दिगम्बरा दयारूपा दावाग्नि दमनीदमा॥ ४७॥

दुर्गा दुर्गापरा देवी दुष्टदैत्यविनाशिनी।
दमनप्रमदा दैत्यदयादानपरायणा॥ ४८॥

दुर्गार्तिनाशिनी दान्ता दम्भिनी दम्भवर्जिता।
दिगम्बरप्रिया दम्भा दैत्यदम्भविदारिणी॥ ४९॥

दमना दशनसौन्दर्या दानवेन्द्रविनाशिनी।
दया धरा च दमनी दर्भपत्रविलासिनी॥ ५०॥

धरिणी धारिणी धात्री धराधरधरप्रिया।
धराधरसुता देवी सुधर्मा धर्मचारिणी॥ ५१॥

धर्मज्ञा धवला धूला धनदा धनवर्द्धिनी।
धीरा धीरा धीरतरा धीरसिद्धिप्रदायिनी॥ ५२॥

धन्वन्तरिधराधीरा ध्येया ध्यानस्वरूपिणी।

नारायणी नारसिंही नित्यानन्दनरोत्तमा॥ ५३॥

नक्ता नक्तावती नित्या नीलजीमूतसन्निभा।

p. 320) नीलाङ्गी नीलवस्त्रा च नीलपर्वतवासिनी॥ ५४॥

सुनीलपुष्पखचिता नीलजम्बुसमप्रभा।

नित्याख्या षोडशी विद्या नित्या नित्यसुखावहा॥ ५५॥

नर्मदा नन्दनानन्दा नन्दानन्दविवर्द्धिनी।

यशोदानन्दतनया नन्दनोद्यानवासिनी॥ ५६॥

नागान्तका नागवृद्धा नागपत्नी च नागिनी।

नमिताशेषजनता नमस्कारवती नमः॥ ५७॥

पीताम्बरा पार्वती च पीताम्बरविभूषिता।

पीतमील्याम्बरधरा पीताभा पिङ्गमूर्द्धजा॥ ५८॥

पीतपुष्पार्च्चनरता पीतपुष्पसमर्च्चिता।

परप्रभा पितृपतिः परसैन्यविनाशिनी॥ ५९॥

परमा परतन्त्रा च परमन्त्रा परात्परा।
पराविद्या परासिद्धिः परास्थानप्रदायिनी॥ ६०॥

पुष्पा पुष्पवती नित्या पुष्पमालाविभूषिता।
पुरातना पूर्वपरा परसिद्धिप्रदायिनी॥ ६१॥

पीतानितम्बिनी पीता पीनोन्नतपयस्तनी।
प्रेमाप्रमध्यमाशेषा पद्मपत्रविलासिनी॥ ६२॥

पद्मावती पद्मनेत्रा पद्मा पद्ममुखी परा।
पद्मासना पद्मप्रिया पद्मरागस्वरूपिणी॥ ६३॥

पावनी पालिका पात्री परदा वरदा शिवा।
प्रेतसंस्था परानन्दा परब्रह्मस्वरूपुणी॥ ६४॥

जिनेश्वरप्रिया देवी पशुरक्तरतप्रिया।
पशुमांसप्रिया पर्णा परामृतपरायणा॥ ६५॥

पाशीनी पाशिका चापि पशुघ्नी पशुभाषिणी।

फुल्लारविन्दवदनी फुल्लोत्पलशरीरिणी॥ ६६॥

परानन्दप्रदा वीणापशुपाशविनाशिनी।
फूत्कारा फुत्परा फेणी फुल्लेन्दीवरलोचना॥ ६७॥

फङ्कन्त्रा स्फटिका स्वाहा स्फोटा च फङ्करूपिणी।
स्फाटिका घुटिका घोरा स्फटिकाद्रिस्वरूपिणी॥ ६८॥

वराङ्गना वरधरा वाराही वासुकी वरा।
बिन्दुस्था बिन्दुनी वाणी बिन्दुचक्रनिवासिनी॥ ६९॥

विद्याधरी विशालाक्षी काशीवासिजनप्रिया।
वेदविद्या विरूपाक्षी विश्वयुग्बहुरूपिणी॥ ७०॥

p. 321) ब्रह्मशक्तिर्विष्णुशक्तिः पञ्चवक्त्रा शिवप्रिया।
वैकुण्ठवासिनी देवी वैकुण्ठपददायिनी॥ ७१॥

ब्रह्मरूपा विष्णुरूपा परब्रह्ममहेश्वरी।
भवप्रिया भवोद्भावा भवरूपा भवोत्तमा॥ ७२॥

भवपारा भवधारा भाग्यवत्प्रियकारिणी।
भद्रा सुभद्रा भवदा शुम्भदैत्यविनाशिनी॥ ७३॥

भवानी भैरवी भीमा भद्रकाली सुभद्रिका।
भगिनी भगरूपा च भगमाना भगोत्तमा॥ ७४॥

भगप्रिया भगवती भगवासा भगाकरा।
भगसृष्टा भाग्यवती भगरूपा भगासिनी॥ ७५॥

भगलिङ्गप्रिया देवी भगलिङ्गपरायणा।
भगलिङ्गस्वरूपा च भगलिङ्गविनोदिनी॥ ७६॥

भगलिङ्गरता देवी भगलिङ्गनिवासिनी।
भगमाला भगकला भगाधारा भगाम्बरा॥ ७७॥

भगवेगा भगाभूषा भगेन्द्रा भाग्यरूपिणी।
भगलिङ्गाङ्गसम्भोगा भगलिङ्गासवावहा॥ ७८॥

भगलिङ्गसमाधुर्या भगलिङ्गनिवेशिता।
भगलिङ्गसुपूजा च भगलिङ्गसमन्विता॥ ७९॥

भगलिङ्गविरक्ता च भगलिङ्गसमावृता।
माधवी माधवीमान्या मधुरा मधुमानिनी॥ ८०॥

मन्दहासा महामाया मोहिनी महदुत्तमा।
महामोहा महाविद्या महाघोरा महास्मृतिः॥ ८१॥

मनस्विनी मानवती मोदिनी मधुराननना।
मेनिका मानिनी मान्या मणिरत्नविभूषणा॥ ८२॥

मल्लिका मौलिका माला मालाधरमदोत्तमा।
मदनासुन्दरी मेधा मधुमत्ता मधुप्रिया॥ ८३॥

मत्तहंसासमोन्नासा मत्तसिंहमहासनी।
महेन्द्रवल्लभा भीमा मौल्यञ्च मिथुनात्मजा॥ ८४॥

महाकाल्या महाकाली महाबुद्धिर्महोत्कटा।
माहेश्वरी महामाया महिषासुरघातिनी॥ ८५॥

मधुराकीर्त्तिमत्ता च मत्तमातङ्गगामिनी।

मदप्रिया मांसरता मत्तयुक्कामकारिणी॥ ८६॥

मैथुन्यवल्लभा देवी महानन्दा महोत्सवा।
मरीचिर्मारतिर्म्माया मनोबुद्धिप्रदायिनी॥ ८७॥

मोहा मोक्षा महालक्ष्मीर्म्महत्पदप्रदायिनी।
p. 322) यमरूपा च यमुना जयन्ती च जयप्रदा॥ ८८॥

याम्या यमवती युद्धा यदोः कुलविवर्द्धिनी।
रमा रामा रामपत्नी रत्नमाला रतिप्रिया॥ ८९॥

रत्नसिंहासनस्था च रत्नाभरणमण्डिता।
रमणी रमणीया च रत्यारसपरायणा॥ ९०॥

रतानन्दा रतवती रघूणाङ्कुलवर्द्धिनी।
रमणारिपरिभ्राज्या रैधाराधिकरत्नजा॥ ९१॥

रावी रसस्वरूपा च रात्रिराजसुखावहा।
ऋतुजा ऋतुदा ऋद्धा ऋतुरूपा ऋतुप्रिया॥ ९२॥

रक्तप्रिया रक्तवती रङ्गिणी रक्तदन्तिका।
लक्ष्मीर्लज्जा लतिका च लीलालग्नानिताक्षिणी॥ ९३॥

लीला लीलावती लोमाहर्षाह्लादनपट्टिका।
ब्रह्मस्थिता ब्रह्मरूपा ब्रह्मणा वेदवन्दिता॥ ९४॥

ब्रह्मोद्भवा ब्रह्मकला ब्रह्माणी ब्रह्मबोधिनी।
वेदाङ्गना वेदरूपा वनिता विनता वसा॥ ९५॥

बाला च युवती वृद्धा ब्रह्मकर्मपरायणा।
विन्ध्यस्था विन्ध्यवासी च बिन्दुयुग्बिन्दुभूषणा॥ ९६॥

विद्यावती वेदधारी व्यापिका बर्हिणी कला।
वामाचारप्रिया वह्निर्वामाचारपरायणा॥ ९७॥

वामाचाररता देवी वामदेवप्रियोत्तमा।
बुद्धेन्द्रिया विबुद्धा च बुद्धाचरणमालिनी॥ ९८॥

बन्धमोचनकर्त्री च वारुणा वरुणालया।
शिवा शिवप्रिया शुद्धा शुद्धाङ्गी शुक्लवर्णिका॥ ९९॥

शुक्लपुष्पप्रिया शुक्ला शिवधर्मपरायणा।
शुक्लस्था शुक्लिनी शुक्लरूपशुक्लपशुप्रिया॥ १००॥

शुक्रस्था शुक्रिणी शुक्रा शुक्ररूपा च शुक्रिका।
षण्मुखी च षडङ्गा च षड्चक्रविनिवासिनी॥ १०१॥

षड्ग्रन्थियुक्ता षोढा च षण्माता च षडात्मिका।
षडङ्गयुवती देवी षडङ्गप्रकृतिर्वशी॥ १०२॥

षडानना षड्रसा च षष्ठी षष्ठेश्वरीप्रिया।
षङ्गवादा षोडशी च षोढान्यासस्वरूपिणी॥ १०३॥

षड्चक्रभेदनकरी षड्चक्रस्थस्वरूपिणी।
षोडशस्वररूपा च षण्मुखी षड्रदान्विता॥ १०४॥

p. 323) सनकादिस्वरूपा च शिवधर्मषरायणा।
सिद्धा सप्तस्वरी शुद्धा सुरमाता स्वरोत्तमा॥ १०५॥

सिद्धविद्या सिधमाता सिद्धा सिद्धस्वरूपिणी।

हरा हरिप्रिया हारा हरिणी हारयुक् तथा॥ १०६॥

हरिरूपा हरिधारा हरिणाक्षी हरिप्रिया।
हेतुप्रिया हेतुरता हिताहितस्वरूपिणी॥ १०७॥

क्षमा क्षमावती क्षीता क्षुद्रघण्टाविभूषणा।
क्षयङ्करी क्षितीशा च क्षीणमध्यसुशोभना॥ १०८॥

अजानन्ता अपर्णा च अहल्याशेषशायिनी।
स्वान्तर्गता च साधूनामन्तरानन्तरूपिणी॥ १०९॥

अरूपा अमला चार्द्धा अनन्तगुणशालिनी।
स्वविद्या विद्यकाविद्या विद्या चार्विन्दलोचना॥ ११०॥

अपराजिता जातवेदा अजपा अमरावती।
अल्पा स्वल्पा अनल्पाद्या अणिमासिद्धिदायिनी॥ १११॥

अष्टसिद्धिप्रदा देवी रूपलक्षणसँयुता।
अरविन्दमुखा देवी भोगसौख्यप्रदायिनी॥ ११२॥

आदिविद्या आदिभूता आदिसिद्धिप्रदायिनी।
सीत्काररूपिणी देवी सर्वासनविभूषिता॥ ११३॥

इन्द्रप्रिया च इन्द्राणी इन्द्रप्रस्थनिवासिनी।
इन्द्राक्षी इन्द्रवज्रा च इन्द्रमद्योक्षणी तथा॥ ११४॥

ईला कामनिवासा च ईश्वरीश्वरवल्लभा।
जननी चेश्वरी दीना भेदाचेश्वरकर्मकृत्॥ ११५॥

उमा कात्यायनी ऊर्द्धा मीना चोत्तरवासिनी।
उमापतिप्रिया देवी शिवा चोङ्काररूपिणी॥ ११६॥

उरगेन्द्रशिरोरत्ना उरगोरगवल्लभा।
उद्यानवासिनी माला प्रशस्तमणिभूषणा॥ ११७॥

उर्द्धदन्तोत्तमाङ्गी च उत्तमा चोर्ध्वकेशिनी।
उमासिद्धिप्रदा या च उरगासनसंस्थिता॥ ११८॥

ऋषिपुत्री ऋषिच्छन्दा ऋद्धिसिद्धिप्रदायिनी।
उत्सवोत्सवसीमन्ता कामिका च गुणान्विता॥ ११९॥

एला एकारविद्या च एणीविद्याधरा तथा।

ॐकारवलयोपेता ॐकारपरमा कला॥ १२०॥

ॐवदवदवाणी च ॐकाराक्षरमण्डिता।

p. 324) ऐन्द्री कुलिशहस्ता च ॐलोकपरवासिनी॥ १२१॥

ॐकारमध्यबीजा च ॐनमोरूपधारिणी।

प्रब्रह्मस्वरूपा च अंशुकांशुकवल्लभा॥ १२२॥

ॐकारा अःफड्मन्त्रा च अक्षाक्षरविभूषिता।

अमन्त्रा मन्त्ररूपा च पदशोभासमन्विता॥ १२३॥

प्रणवोङ्काररूपा च प्रणवोच्चारभाक् पुनः।

ह्रींकाररूपा ह्रींङ्कारी वाग्बीजाक्षरभूषणा॥ १२४॥

हृल्लेखा सिद्धि योगा च हृत्पद्मासनसँस्थिता।

बीजाख्या नेत्रहृदया ह्रीम्बीजाभुवनेश्वरी॥ १२५॥

क्लींकामराजा क्लिन्ना च चतुर्वर्गफलप्रदा।

क्लींक्लींक्लींरूपिका देवी क्रींक्रींक्रींनामधारिणी॥ १२६॥

कमलाशक्तिबीजा च पाशाङ्कुशविभूषिता।
श्रींश्रींकारा महाविद्या श्रद्धा श्रद्धावती तथा॥ १२७॥

ॐ ऐं क्लींह्रींश्रींपरा च क्लीङ्कारी परमा कला।
ह्रींक्लींश्रीङ्कारस्वरूपा सर्वकर्मफलप्रदा॥ १२८॥

सर्वाढ्या सर्वदेवी च सर्वसिद्धिप्रदा तथा।
सर्वज्ञा सर्वशक्तिश्च वाग्विभूतिप्रदायिनी॥ १२९॥

सर्वमोक्षप्रदा देवी सर्वभोगप्रदायिनी।
गुणेन्द्रवल्लभा वामा सर्वशक्तिप्रदायिनी॥ १३०॥

सर्वानन्दमयी चैव सर्वसिद्धिप्रदायिनी।
सर्वचक्रेश्वरी देवी सर्वसिद्धेश्वरी तथा॥ १३१॥

सर्वप्रियङ्करी चैव सर्वसौख्यप्रदायिनी।
सर्वानन्दप्रदा देवी ब्रह्मानन्दप्रदायिनी॥ १३२॥

मनोवाञ्छितदात्री च मनोवृद्धिसमन्विता।
अकारादि-क्षकारान्ता दुर्गा दुर्गार्त्तिनाशिनी॥ १३३॥

पद्मनेत्रा सुनेत्रा च स्वधास्वाहावषट्करी।
स्ववर्गा देववर्गा च तवर्गा च समन्विता॥ १३४॥

अन्तस्स्था वेश्मरूपा च नवदुर्गा नरोत्तमा।
तत्त्वसिद्धिप्रदा नीला तथा नीलपताकिनी॥ १३५॥

नित्यरूपा निशाकारी स्तम्भिनी मोहिनीति च।
वशङ्करी तथोच्चाटी उन्मादी कर्षिणीति च॥ १३६॥

मातङ्गी मधुमत्ता च अणिमा लघिमा तथा।
p. 325) सिद्धा मोक्षप्रदा नित्या नित्यानन्दप्रदायिनी॥ १३७॥

रक्ताङ्गी रक्तनेत्रा च रक्तचन्दनभूषिता।
स्वल्पसिद्धिस्सुकल्पा च दिव्यचारणशुक्रभा॥ १३८॥

सङ्क्रान्तिस्सर्वविद्या च सस्यवासरभूषिता।
प्रथमा च द्वितीया च तृतीया च चतुर्त्थिका॥ १३९॥

पञ्चमी चैव षष्ठी च विशुद्धा सप्तमी तथा।
अष्टमी नवमी चैव दशम्येकादशी तथा॥ १४०॥

द्वादशी त्रयोदशी च चतुर्द्दश्यथ पूर्णिमा।
आमावस्या तथा पूर्वा उत्तरा परिपूर्णिमा॥ १४१॥

खड्गिनी चक्रिणी घोरा गदिनी शूलिनी तथा।
भुशुण्डी चापिनी बाणा सर्वायुधविभूषणा॥ १४२॥

कुलेश्वरी कुलवती कुलाचारपरायणा।
कुलकर्मसुरक्ता च कुलाचारप्रवर्द्धिनी॥ १४३॥

कीर्तिश्श्रीश्च रमा रामा धर्मायै सततन्नमः।
क्षमा धृतिः स्मृतिर्मेधा कल्पवृक्षनिवासिनी॥ १४४॥

उग्रा उग्रप्रभा गौरी वेदविद्याविबोधिनी।
साध्या सिद्धा सुसिद्धा च विप्ररूपा तथैव च॥ १४५॥

काली कराली काल्या च कलादैत्यविनाशिनी।

कौलिनी कालिकी चैव क-च-ट-त-पवर्णिका॥ १४६॥

जयिनी जययुक्ता च जयदा जृम्भिनी तथा।
स्त्राविणी द्राविणी देवी भरुण्डा विन्ध्यवासिनी॥ १४७॥

ज्योतिर्भूता च जयदा ज्वालामालासमाकुला।
भिन्ना भिन्नप्रकाशा च विभिन्ना भिन्नरूपिणी॥ १४८॥

अश्विनी भरणी चैव नक्षत्रसम्भवानिला।
काश्यपी विनता ख्याता दितिजादितिरेव च॥ १४९॥

कीर्त्तिः कामप्रिया देवी कीर्त्त्या कीर्तिविवर्द्धिनी।
सद्योमांससमालब्धा सद्यश्छिन्नासिशङ्करा॥ १५०॥

दक्षिणा चोत्तरा पूर्वा पश्चिमा दिक् तथैव च।
अग्निनैर्ऋतिवायव्या ईशान्यादिक् तथा स्मृता॥ १५१॥

ऊर्ध्वाङ्गाधोगता श्वेता कृष्णा रक्ता च पीतका।
चतुर्वर्गा चतुर्वर्णा चतुर्मात्रात्मिकाक्षरा॥ १५२॥

चतुर्मुखी चतुर्वेदा चतुर्विद्या चतुर्मुखा।

p. 326) चतुर्गणा चतुर्माता चतुर्वर्गफलप्रदा॥ १५३॥

धात्री विधात्री मिथुना नारी नायकवासिनी।

सुरामुदा मुदवती मोदिनी मेनकात्मजा॥ १५४॥

ऊर्द्धकाली सिद्धिकाली दक्षिणाकालिका शिवा।

नील्या सरस्वती सात्वम्बगला छिन्नमस्तका॥ १५५॥

सर्वेश्वरी सिद्धविद्या परा परमदेवता।

हिङ्गुला हिङ्गुलाङ्गी च हिङ्गुलाधरवासिनी॥ १५६॥

हिङ्गुलोत्तमवर्णाभा हिङ्गुलाभरणा च सा।

जाग्रती च जगन्माता जगदीश्वरवल्लभा॥ १५७॥

जनार्द्दनप्रिया देवी जययुक्ता जयप्रदा।

जगदानन्दकरी च जगदाह्लादकारिणी॥ १५८॥

ज्ञानदानकरी यज्ञा जानकी जनकप्रिया।

जयन्ती जयदा नित्या ज्वलदग्निसमप्रभा॥ १५९॥

विद्याधरा च बिम्बोष्ठी कैलासचलवासिनी।

विभवा वडवाग्निश्च अग्निहोत्रफलप्रदा॥ १६०॥

मन्त्ररूपा परा देवी तथैव गुरुरूपिणी।

गया गङ्गा गोमती च प्रभासा पुष्करापि च॥ १६१॥

विन्ध्याचलरता देवी विन्ध्याचलनिवासिनी।

बहू बहुसुन्दरी च कंसासुरविनाशिनी॥ १६२॥

शूलिनी शूलहस्ता च वज्रा वज्रहरापि च।

दूर्गा शिवा शान्तिकरी ब्रह्माणी ब्राह्मणप्रिया॥ १६३॥

सर्वलोकप्रणेत्री च सर्वरोगहरापि च।

मङ्गला शोभना शुद्धा निष्कला परमा कला॥ १६४॥

विश्वेश्वरी विश्वमाता ललिता वसिताननना।

सदाशिवा उमा क्षेमा चण्डिका चण्डविक्रमा॥ १६५॥

सर्वदेवमयी देवी सर्वागमभयापहा।

ब्रह्मेशविष्णुनमिता सर्वकल्याणकारिणी॥ १६६॥

योगिनी योगमाता च योगीन्द्रहृदयस्थिता।
योगिजाया योगवती योगीन्द्रानन्दयोगिनी॥ १६७॥

इन्द्रादिनमिता देवी ईश्वरी चेश्वरप्रिया।
विशुद्धिदा भयहरा भक्तद्वेषिभयङ्करी॥ १६८॥

भववेषा कामिनी च भरुण्डा भयकारिणी।
बलभद्रप्रियाकारा संसारार्णवतारिणी॥ १६९॥

p. 327) पञ्चभूता सर्वभूता विभूतिर्भूतिधारिणी।
सिंहवाहा महामोहा मोहपाशविनाशिनी॥ १७०॥

मन्दुरा मदिरा मुद्रा मुद्रामुद्ररधारिणी।
सावित्री च महादेवी परप्रियनिनायिका॥ १७१॥

यमदूती च पिङ्गाक्षी वैष्णवी शङ्करी तथा।
चन्द्रप्रिया चन्द्ररता चन्दनारण्यवासिनी॥ १७२॥

चन्दनेन्द्रसमायुक्ता चण्डदैत्यविनाशिनी।
सर्वेश्वरी यक्षिणी च किराती राक्षसी तथा॥ १७३॥

महाभोगवती देवी महामोक्षप्रदायिनी।
विश्वहन्त्री विश्वरूपा विश्वसंहारकारिणी॥ १७४॥

धात्री च सर्वलोकानां हितकारणकामिनी।
कमला सूक्ष्मदा देवी धात्री हरविनाशिनी॥ १७५॥

सुरेन्द्रपूजिता सिद्धा महातेजोवतीति च।
परारूपवती देवी त्रैलोक्याकर्षकारिणी॥ १७६॥

इति ते कथितन्देवि पीतानाम सहस्त्रकम्।
पठेद्वा पाठयेद्वापि सर्वसिद्धिर्भवेत्प्रिये॥ १७७॥

इति मे विष्णुना प्रोक्तम्महास्तम्भकरम्परम्।
प्रातः काले च मध्याह्ने सन्ध्याकाले च पार्वति॥ १७८॥

एकचित्तः पठेदेतत्सर्वसिद्धिर्भविष्यति।
एकवारम्पठेद्यस्तु सर्वपापक्षयो भवेत्॥ १७९॥

द्विवारम्प्रपठेद्यस्तु विघ्नेश्वरसमो भवेत्।
त्रिवारम्पठनाद्देवि सर्वं सिद्ध्यति सर्वथा॥ १८०॥

स्तवस्यास्य प्रभावेण साक्षाद्भवति सुव्रते।
मोक्षार्थी लभते मोक्षन्धनार्थी लभते धनम्॥ १८१॥

विद्यार्थी लभते विद्यान्तर्कव्याकरणान्विताम्।
महित्वँव्वत्सरान्ताच्च शत्रुहानिः प्रजायते॥ १८२॥

क्षोणीपतिर्वशस्तस्य स्मरणे सदृशो भवेत्।
यः पठेत्सर्वदा भक्त्या श्रेयस्तु भवति प्रिये॥ १८३॥

गणाध्यक्षप्रतिनिधिः कविकाव्यपरो वरः।
गोपनीयम्प्रयत्नेन जननीजारवत्सदा॥ १८४॥

हेतुयुक्तो भवेन्नित्यं शक्तियुक्तः सदा भवेत्।
य इदम्पठते नित्यं शिवेन सदृशो भवेत्॥ १८५॥

p. 328) जीवन्धर्मार्त्थभोगी स्यान्मृतो मोक्षपतिर्भ्भवेत्।

सत्यं सत्यम्महादेवि सत्यं सत्यन्न संशयः॥ १८६॥

स्तवस्यास्य प्रभावेण देवेन सह मोदते।
सुचित्ताश्च सुरास्सर्वे स्तवराजस्य कीर्त्तनात्॥ १८७॥

पीताम्बरपरीधाना पीतगन्धानुलेपना।
परमोदयकीर्त्तिः स्यात्परतस्सुरसुन्दरि॥ १८८॥

इति श्रीत्कटशाम्बरे नागेन्द्रप्रयाणतन्त्रे षोडशसहस्रे
विष्णुशङ्करसँवादे पीताम्बरीसहस्रनामस्तोत्रं समाप्तम्॥

इति शाक्तप्रमोदे बगलामुखीतन्त्रं समाप्तम्

श्रीः

शिवहरराजधानीपतिश्रीराजादेवनन्दनसिंह-
बहादुरनराधिपसंगृहीतविरचित-
शाक्तप्रमोदान्तर्गतं

नवमं

मातङ्गीतन्त्रम्

उक्तराजगुरुवंश्यपण्डितश्रीरघुराजदुबेजीद्वारा

संशोधितम्

तदेतत्

श्रीकृष्णदासात्मज-खेमराजेन
स्वकीये श्रीवेंकटेश्वर यन्त्रालये

मुद्रयित्वा प्रकाशितम्

बोम्ब-ई

श्रीगणेशाय नमः

शाक्तप्रमोदः

अथ मातङ्गीतन्त्रम्

अथ मातङ्गीध्यानम्

श्यामाङ्गीं शशिशेखरान्त्रिनयनां रत्नसिंहासनस्थिताम्।
वेदैर्ब्बाहुदण्डैरसि-खेटक-पाशाङ्कुशधराम्॥

p. 332) अथ यन्त्रोद्धारः

षट्कोणाष्टदलम्पद्मँलिखेद्यन्त्रम्मनोरमम्।
तत्र पूजा प्रकर्त्तव्या जवापुष्पेण मन्त्रवित्॥

अथ मन्त्रोद्धारः

प्रणवञ्च ततो मायाङ्कामबीजञ्च कूर्च्चकम्॥
मातङ्गी ङेयुता चास्त्रँव्वह्निजायावधिर्म्मनुः॥

अथ मन्त्रः

ॐ ह्रीं क्लीं हूँमातङ्ग्यै फट् स्वाहा॥

अथ पूजाविधिः

अथ वक्ष्ये महादेवीम्मातङ्गीं सर्वसिद्धिदाम्॥
अस्याः पूजनमात्रेण वाक्सिद्धिँल्लभते ध्रुवम्॥

प्रणवञ्च ततो मायाङ्कामबीजञ्च कूर्च्चकम्।
मातङ्गी ङेयुता चास्त्रँवह्निजायावधिर्म्मनुः॥

ऋषिरस्य दक्षिणामूर्त्ति र्विराट् छन्दः प्रकीर्त्तितम्।
मातङ्गीदेवता देवी सर्वसिद्धिप्रदायिनी॥

अङ्गन्यास-करन्यासौ कुर्यान्मन्त्री समाहितः।
षड्दीर्घभाजा बीजेन प्रणवाद्येन कल्पयेत्॥

षट्कोणाष्टदलम्पद्मँल्लिखेद्यन्त्रम्मनोरमम्।

तत्र पूजा प्रकर्त्तव्या जवापुष्पेण मन्त्रवित्॥

अष्टशक्तीश्चाष्टदले पूजयेत्सुसमाहितः।

रतिः प्रीतिर्म्मनोभवा क्रिया शुद्धा च शक्तयः॥

अनङ्गकुसुमानङ्गमदना मदनालसा।

p. 333) इत्यष्टशक्तीः सम्पूज्य उपहारसमन्वितः॥

ततो देवीम्परां ध्यायेत्साधकः स्थिरमानसः।

श्यामाङ्गीं शशिशेखरान्त्रिनयनां रत्नसिंहासनस्थिताम्॥

वेदैर्बाहुदण्डैरसिखेटकपाशाङ्कुशवराम्।

एवन्ध्यात्वा महादेवीङ्गन्धपुष्पैर्म्मनोरमैः॥

नैवेद्यन्तु महादेव्यै पायसं शर्करान्वितम्।

पुरश्चरणकाले तु षड्सहस्रं मनुञ्जपेत्॥

तद्दशांशं हुनेदाज्यैः शर्करामधुभिः सह।

ब्रह्मवृक्षोद्भवैः काष्ठैः साधकः शक्तिभिः सह॥

एवं पुरस्क्रियां कृत्वा प्रयोगविधिमाचरेत्।
चतुष्पथे श्मशाने वा कलामध्ये च मान्त्रिकः॥

मत्स्यम्मांसम्पायसञ्च दद्याद्धूपञ्च गुग्गुलूम्।
रात्रियोगेन कर्त्तव्यं सदा पूर्णश्च साधकः॥

एवम्प्रयोगमात्रेण कविता जायते ध्रुवम्।
अग्निस्तम्भञ्जलस्तम्भँव्वाक्स्तम्भङ्कारयेद्ध्रुवम्॥

मन्त्री जयति शत्रूंश्च ताक्ष्यों भोगिकुलँय्यथा।
शास्त्रे वादे कवित्वे च बृहस्पतिरिवापरः॥

अनेनैव विधानेन मातङ्गी सिद्धिदायिनी।
नूनन्तद्गृहमागत्य कुबेरैर्दीयते वसु॥

विना मत्स्यैर्विना मांसैर्न्नार्च्चयेत्परदेवताम्॥

इति तन्त्रसारः॥

अथमातङ्गीस्तोत्रम्

ईश्वर उवाच

आराध्य मातश्चरणाम्बुजे ते ब्रह्मादयो विस्तृतकीर्त्तिमापुः।
अन्ये परँवा विभवम्मुनीन्द्राः परां श्रियं भक्तिपरेण चान्ये॥ १॥

नमामि देवीन्नवचन्द्रमौलेर्मातङ्गिनीञ्चन्द्रकलावतंसाम्।
आम्नायप्राप्तिप्रतिपादितार्थम्प्रबोधयन्तीम्प्रियमादरेण॥ २॥

विनम्रदेवस्थिरमौलिरन्तैर्विराजितन्ते चरणारविन्दम्।
अकृत्रिमाणाँव्वचसाँविशुक्लम्पदाम्पदं शिक्षितनूपुराभ्याम्॥ ३॥

कृतार्थयन्तीम्पदवीं पदाभ्यामास्फालयन्तीङ्कलवल्लकीन्ताम्।
मातङ्गिनीं स्द्धृदयान्धिनोमि लीलांशुकां शुद्धनितम्बबिम्बाम्॥
४॥

तालीदलेनार्पितकर्णभूषाम्माध्वीमदोद्घूर्णितनेत्रपद्माम्।

p. 334) घनस्तनीं शम्भुवधून्नमामि

तडिल्लताकान्तिमनग्घ्यभूषाम्॥ ५॥

चिरेण लक्ष्यान्नवलोमराज्यां स्मरामि भक्त्या जगतामधीशे।

बलित्रयाढ्यन्तव मध्यमम्ब नीलोत्पलांशुश्रियमावहन्तीम्॥ ६॥

कान्त्या कटाक्षैः कमलाकराणाङ्कदम्बमालाञ्चितकेशपाशाम्।

मातङ्गकन्यां हृदि भावयामि ध्यायेयमारक्तकपोलबिम्बम्॥ ७॥

बिम्बाधरन्यस्तललामवश्यमालोललीलालकमायताक्षम्।

मन्दस्मितन्ते वदनम्महेशि स्तुत्यानया शङ्करधर्मपत्नीम्॥ ८॥

मातङ्गिनींव्वागधिदेवतान्तां स्तुवन्ति ये भक्तियुता मनुष्याः।

परां श्रियन्नित्यमुपाश्रयन्ति परत्र कैलासतले वसन्ति॥ ९॥

इति रुद्रयामले मातङ्गीस्तोत्रं समाप्तम्॥

अथ मातङ्गीकवचम्

श्रीदेव्युवाच

साधु साधु महादेव कथयस्व सुरेश्वर।
मातङ्गीकवचन्दिव्यं सर्वसिद्धिकरन्नृणाम्॥ १॥

श्री ईश्वर उवाच

शृणु देवि प्रवक्ष्यामि मातङ्गीकवचं शुभम्।
गोपनीयम्महादेवि मौनी जापं समाचरेत्॥ २॥

अस्य श्रीमातङ्गीकवचस्य दक्षिणामूर्त्तिर्ऋषिर्विराट् छन्दो मातङ्गी
देवता चतुर्वर्गसिद्धये विनियोगः॥

ॐशिरो मातङ्गिनी पातु भुवनेशी तु चक्षुषी।
तोडला कर्णयुगलन्त्रिपुरा वदनम्मम॥ ३॥

पातु कण्ठे महामाया हृदि माहेश्वरी तथा।
त्रिपुष्पा पार्श्वयोः पातु गुदे कामेश्वरी मम॥ ४॥

ऊरुद्वये तथा चण्डी जङ्घयोश्च हरप्रिया।

महामाया पादयुग्मे सर्वाङ्गेषु कुलेश्वरी॥ ५॥

अङ्गप्रत्यङ्गकञ्चैव सदा रक्षतु वैष्णवी।

ब्रह्मरन्ध्रे सदा रक्षेन्मातङ्गी नाम संस्थिता॥ ६॥

ललाटे रक्षयेन्नित्यम्महापिशाचिनीति च।

नेत्राभ्यां सुमुखी रक्षेद्देवी रक्षतु नासिकाम्॥ ७॥

महापिशाचिनी पायान्मुखे रक्षतु सर्वदा।

p. 335) लज्जा रक्षतु मान्दन्ते चोष्ठौ सम्मार्ज्जनीकरी॥ ८॥

चिबुके कण्ठदेशे तु चकारत्रितयम्पुनः।

सविसर्गम्महादेवी हृदयम्पातु सर्वदा॥ ९॥

नाभिं रक्षतु मा लोला कालिकावतु लोचने।

उदरे पातु चामुण्डा लिङ्गे कात्यायनी तथा॥ १०॥

उग्रतारा गुदे पातु पादौ रक्षतु चाम्बिका।

भुजौ रक्षतु शर्वाणी हृदयञ्चण्डभूषणा॥ ११॥

जिह्वायाम्मातृका रक्षेत्पूर्वे रक्षतु पुष्टिका।
विजया दक्षिणे पातु मेधा रक्षतु वारुणे॥ १२॥

नैर्ऋत्यां सुदया रक्षेद्वायव्याम्पातु लक्ष्मणा।
ऐशान्या रक्षयेद्देवी मातङ्गी शुभकारिणी॥ १३॥

रक्षेत्सुरेशा चाग्नेये बगला पातु चोत्तरे।
ऊर्द्धम्पातु महादेवी देवानां हितकारिणी॥ १४॥

पाताले पातु मा नित्यँव्वशिनी विश्वरूपिणी।
प्रणवञ्च तता माया कामबीजञ्च कूर्चकम्॥ १५॥

मातङ्गिनी ङेन्युतास्त्रँव्वह्निजायावधिर्म्मनुः।
सार्द्धैकादशवर्णा सा सर्वत्र पातु मां सदा॥ १६॥

इति ते कथितन्देवि गुह्याद्गुह्यतरम्परम्।
त्रैलोक्यमङ्गलन्नाम कवचन्देवदुर्ल्लभम्॥ १७॥

य इदम्प्रपठेन्नित्यञ्जायते सम्पदालयम्।
परमैश्वर्यमतुलम्प्राप्नुयान्नात्र संशयः॥ १८॥

गुरुमभ्यर्च्च्य विधिवत्कवचम्प्रपठेद्यदि।
ऐश्वर्यं सुकवित्वञ्च वाक्सिद्धिँल्लभते ध्रुवम्॥ १९॥

नित्यन्तस्य तु मातङ्गी महिला मङ्गलञ्चरेत्।
ब्रह्मा विष्णुश्च रुद्रश्च ये देवाः सुरसत्तमाः॥ २०॥

ब्रह्मराक्षसवेताला ग्रहाद्या भूतजातयः।
तन्दृष्ट्वा साधकन्देवि लज्जायुक्ता भवन्ति ते॥ २१॥

कवचन्धारयेद्यस्तु सर्वसिद्धिँलभेद्ध्रुवम्।
राजानोऽपि च दासत्वं षड्कर्माणि च साधयेत्॥ २२॥

सिद्धो भवति सर्वत्र किमन्यैर्बहु भाषितैः।
इदं कवचमज्ञात्वा मातङ्गीँय्यो भजेन्नरः॥ २३॥

अल्पायुर्निर्द्धनो मूर्खो भवत्येव न संशयः।
गुरौ भक्तिः सदा कार्या कवचे च दृढा मतिः॥ २४॥

p. 336) तस्मै मातङ्गिनी देवीं सर्वसिद्धिम्प्रयच्छति॥ २५॥

इति नन्द्यावर्त्ते उत्तरखण्डे त्वरितफलदायिनीमातङ्गिनीकवचं
समाप्तम्॥

अथ हृदयम्

एकदा कौतुकाविष्टा भैरवं भूतसेवितम्।
भैरवी परिपप्रच्छ सर्वभूतहिते रता॥ १॥

श्रीभैरव्युवाच

भगवन्सर्वधर्मज्ञ भूतवात्सल्यभावन।
अहं वेदितुमिच्छामि सर्वभूतोपकारकम्॥ २॥

केन मन्त्रेण जप्तेन स्तोत्रेण पठितेन च।
सर्वथा श्रेयसाम्प्राप्तिर्भूतानाम्भूतिमिच्छताम्॥ ३॥

श्रीभैरव उवाच

शृणु देवि तव स्नेहात्प्रायो गोप्यमपि प्रिये।
कथयिष्यामि तत्सर्वं सुखसम्पत्करं शुभम्॥ ४॥

पठतां शृण्वतान्नित्यं सर्वसम्पत्तिदायकम्।
विद्यैश्वर्यसुखावाप्ति-मङ्गलप्रदमुत्तमम्॥ ५॥

मातङ्ग्या हृदयस्तोत्रं दुःखदारिद्र्यभञ्जनम्।
मङ्गलम्मङ्गलानाञ्च अस्तिसर्वसुखप्रदम्॥ ६॥

ॐ अस्य श्रीमातङ्गीहृदयस्तोत्रमन्त्रस्य दक्षिणामूर्तिर्ऋषिर्विराट् छन्दो
मातङ्गी देवता ह्रींबीजं हूँहक्तिः क्लींकीलकं
सर्ववाञ्छितार्थसिद्धये पाठे विनियोगः॥

अथाङ्गन्यासः

ॐ ह्रींहृदयायनमः, ॐक्लींशिरसेस्वाहा, ॐहूँहिखायैवषट्,
ॐह्रींनेत्रत्रयायवौषट्, ॐक्लींकवचायहूम्, ॐहूँस्त्रायफट्॥

एवं करन्यासः

अथ ध्यानम्

श्यामां शुभ्रांशुभालान्त्रिकमलनयनां
रत्नसिंहासनस्थाम्भक्ताभीष्टप्रदात्रीं
सुरनिकरकरासेव्यकञ्जाङ्घ्रियुग्माम्।
नीलाम्भोजांशुकान्तिन्निशिचरनिकरारण्यदावाग्निरूपाम्पाशङ्ख।
द्दञ्चतुर्भिर्वरकमलकरैः खेटकञ्चाङ्कुशञ्च॥

मातङ्गीमावहन्तीमभिमतफलदाम्मोदिनीञ्चिन्तयामि॥ ७॥

नमस्ते मातञ्ज्यै मृदुमुदिततन्वै तनुमताम्परश्रेयोदायै
कमलचरणध्यानमनसाम्॥
सदा संसेव्यायै सदसि विबुधैर्द्दिव्यधिषणैर्द्दयार्द्रायै देव्यै
दुरितदलनोद्दण्डमनसे॥ ८॥

p. 337) परम्मातस्ते यो जपति मनुमेवोग्रहृदयः
कवित्वङ्कल्पानाङ्कलयति सुकल्पः प्रतिपदम्।

अपि प्रायोरम्यामृतमयपदा तस्य ललितानटीम्मन्या वाणी नटति
रसनायाञ्चपलिता॥ ९॥

तव ध्यायन्तो ये वपुरनुजपन्ति प्रवलितं सदा मन्त्रम्मातर्न्नहि
भवति तेषाम्परिभवः।
कदम्बानाम्माल्यैश्शिर अपि च युञ्जन्ति यदि ये भवन्ति प्रायस्ते
युवतिजनयूथस्ववशगाः॥ १०॥

सरोजैस्साहस्रैस्सरसिजपदद्वन्द्वमपि ये सहस्रन्नामोक्त्वा तदपि तव
ङेऽन्तम्मनुमितम्।
पृथङ्नाम्ना तेनायुतकलितमर्च्चन्ति प्रसुते सदा
देवव्रातप्रणमितपदाम्भोजयुगला॥ ११॥

तव प्रीत्यै मातर्द्ददति बलिमाधाय बलिना समत्स्यम्मांसँव्वा
सुरुचिरसितं राजरुचितम्।
सुपुण्या ये स्वान्तस्तव चरणप्रेमैकरसिका
अहोभाग्यन्तेषान्त्रिभुवनमलं वश्यमखिलम्॥ १२॥

लसल्लोलश्रोत्राभरणकिरणक्रांतिकलितम्मितस्मित्यापन्नप्रतिभितममन्
नं विकरितम्।

मुखाम्भोजम्मातस्तव परिलूठद्भ्रूमधुकरं रमा ये ध्यायन्ति
त्यजति नहि तेषां सुभवनम्॥ १३॥

परः श्रीमातङ्गी जपति हृदयाख्यस्सुमनसामयं
सेव्यस्सद्योभिमतफलदश्चातिललितः।
नरा ये शृण्वन्ति स्तवमपि पठन्तीममनिशन्न तेषान्दुःप्राप्यङ्गगति
यदलभ्यन्दिविषदाम्॥ १४॥

धनार्थी धनमाप्नोति दारार्थी सुन्दरीम्प्रियाम्।
सुतार्थी लभते पुत्रं स्तवस्यास्य प्रकीर्त्तनात्॥ १५॥

विद्यार्थी लभते विद्याँव्विविधाँव्विभवप्रदाम्।
जयार्थी पठनादस्य जयम्प्राप्नोति निश्चितम्॥ १६॥

नष्टराज्यो लभेद्राज्यं सर्वसम्पत्समाश्रितम्।
कुबेरसमसम्पत्तिः स भवेद्धृदयम्पठन्॥ १७॥

किमत्र बहुनोक्तेन यद्यदिच्छति मानवः।
मातङ्गीहृदयस्तोत्रपाठात्तत्सर्वमाप्नुयात्॥ १८॥

इति श्रीदक्षिणामूर्त्तिसंहितायां श्रीमातङ्गीहृदयस्तोत्रं

समाप्तम्॥

p. 338) अथ शतनामस्तोत्रम्

श्रीभैरव्युवाच

भगवञ्छ्रोतुमिच्छामि मातङ्ग्याः शतनामकम्।

यद्गुह्यं सर्वतन्त्रेषु केनापि न प्रकाशितम्॥ १॥

श्रीभैरव उवाच

शृणु देवि प्रवक्ष्यामि रहस्यातिरहस्यकम्।

नाख्येयँय्यत्र कुत्रापि पठनीयम्परात्परम्॥ २॥

यस्यैकवारपठनात्सर्वे विघ्ना उपद्रवाः।

नश्यन्ति तत्क्षणाद्देवि वह्निना तूलराशिवत्॥ ३॥

प्रसन्ना जायते देवी मातङ्गी चास्य पाठतः।

सहस्त्रनामपठने यत्फलम्परिकीर्त्तितम्।
तत्कोटिगुणितन्देवी नामाष्टशतकं शुभम्।

अस्य श्रीमातंगीशतनाम्नाम्भगवान्मतङ्ग ऋषिरनुष्टुप्छन्दो
मातंगी देवता मातंगीप्रीतये जपे विनियोगः॥

महामत्तमातंगिनी सिद्धिरूपा तथा योगिनी भद्रकाली रमा च।
भवानी भयप्रीतिदा भूतियुक्ता भवाराधिता भूतिसम्पत्करी च॥

जनाधीशमाता घनागारदृष्टिर्द्धनेशार्च्चिता धीरवापी वरांगी।
प्रकृष्टा प्रभारूपिणी कामरूपा प्रहृष्टा महाकीर्त्तिदा कर्णनाली
॥

काली भगाघोररूपा भगाङ्गी भगाह्वा भगप्रीतिदा भीमरूपा।
भवानी महाकौशिकी कोशपूर्णा किशोरी किशोरप्रियानन्द-ईहा॥

महाकारणा कारणा कर्मशीला कपाली प्रसिद्धा महासिद्धखण्डा
।
मकारप्रिया मानरूपा महेशी महोल्लासिनी लास्यलीलालयाङ्गी॥

क्षमा क्षेमशीला क्षपाकारिणी चाक्षयप्रीतिदा भूतियुक्ता भवानी।
भवाराधिता भूतिसत्यात्मिका च प्रभोद्भासिता भानुभास्वत्करा च
॥

धराधीशमाता धनागारदृष्टिर्द्धनेशार्च्चिता धीवरा
धीवरांगी।
प्रकृष्टा प्रभारूपिणी प्राणरूपा प्रकृष्टस्वरूपा स्वरूपप्रिया च
॥

चलत्कुण्डला कामिनी कान्तयुक्ता कपालाचला कालकोद्धारिणी च।
कदम्बप्रिया कोटरी कोटदेहा क्रमा कीर्त्तिदा कर्णरूपा च काक्षमी॥

क्षमांगी क्षयप्रेमरूपा क्षपा च क्षयाक्षा क्षयाह्वा
क्षयप्रान्तरा च।
क्षवत्कामिनी क्षारिणी क्षीरपूषा शिवांगी च शाकम्भरी
शाकदेहा॥

p. 339) महाशाकयज्ञा फलप्राशका च शकाह्वा
शकाह्वाशकाख्या शका च।
शकाक्षान्तरोषा सुरोषा सुरेखा माहाशेषयज्ञोपवीतप्रिया च॥

जयन्ती जया जाग्रती योग्यरूपा जयाङ्गा जपध्यानसन्तुष्टसञ्ज्ञा।
जयप्राणरूपा जयस्वर्णदेहा जयज्वालिनी यामिनी याम्यरूपा॥

जगन्मातृरूपा जगद्रक्षणा च स्वधा वौषडन्ता विलम्बाविलम्बा।
षडङ्गा महालम्बरूपासिहस्तापदा हारिणी हारिणी हारिणी च॥

महामङ्गला मङ्गलप्रेमकीर्त्तिर्निशुम्भक्षिदा शुम्भदर्पत्वहा च
।
तथा नन्दबीजादिमुक्तस्वरूपा तथा चण्डमुण्डापदा मुख्यचण्डा
॥

प्रचण्डाप्रचण्डा महाचण्डवेगा चलच्चामरा चामराचन्द्रकीर्तिः।
सुचामीकरा चित्रभूषोज्वलाङ्गी सुसङ्गीतगीतञ्च पायादपायात्॥

इति ते कथितन्देवि नाम्नामष्टोत्तरं शतम्।
गोप्यञ्च सर्वतन्त्रेषु गोपनीयञ्च सर्वदा।

एतस्य सततभ्यासात्साक्षाद्देवो महेश्वरः।
त्रिसन्ध्यञ्च महाभक्त्या पठनीयं सुखोदयम्॥

न तस्य दुष्करङ्किञ्चिज्जायते स्पश्टर्शतः क्षणात्।
स्वकृतँय्यत्तदेवाप्तन्तस्मादावर्त्तयेत्सदा॥

सदैव सन्निधौ तस्य देवी वसति सादरम्।
अयोगा ये तव एवाग्रे सुयोगाश्च भवन्ति वै॥

त एव मित्रभूताश्च भवंति तत्प्रसादतः।
विषाणि नोपसर्पन्ति व्याधयो न स्पृशन्ति तान्॥

लूताविस्फोटकास्सर्वे शमँय्यांति च तत्क्षणात्।
जरापलितनिर्मुक्तः कल्पजीव भवेन्नरः॥

अपि किम्बहुनोक्तेन सान्निध्यम्फलमाप्नुयात्।
यावन्मया पुरा प्रोक्तम्फलं साहस्त्रनामकम्॥

तत्सर्वं ल्लभते मर्त्त्यो महामायाप्रसादतः।

इति श्रीरुद्रयामले मातङ्गीशतनामस्तोत्रं सम्पूर्णम्॥

अथ सहस्त्रनाम

ईश्वर उवाच

शृणु देवि प्रवक्ष्यामि साम्प्रतन्तत्त्वतः परम्।

p. 340) नाम्नां सहस्त्रम्परमं सुमुख्याः सिद्धये हितम्॥

सहस्त्रनामपाठी यः सर्वत्र विजयी भवेत्।

पराभवो न तस्यास्ति सभायाँव्वा महारणे॥

यथा तुष्टा भवेद्देवी सुमुखी चास्य पाठतः।

तथा भवति देवेशि साधकः शिव एव सः॥

अश्वमेधसहस्त्राणि वाजपेयस्य कोटयः।

सकृत्पाठेन जायन्ते प्रसन्ना सुमुखी भवेत्॥

मतङ्गोऽस्य ऋषिश्छन्दोऽनुष्टुब्देवी समीरिता।

सुमुखी विनियोगः स्यात्सर्वसम्पत्तिहेतवे॥

एवन्ध्यात्वा पठेदेतद्यदीच्छेत्सिद्धिमात्मनः।

देवीं षोडशवार्षिकीं शवगताम्माध्वीरसाघूर्णितां
श्यामाङ्गीमरुणाम्बराम्पृथुकुचाङ्गुञ्जावलीशोभिताम्।

हस्ताभ्यान्दधतीङ्कपालममलन्तीक्ष्णान्तथा
कर्त्रिकान्ध्यायेन्मानसपङ्कजे भगवतीमुच्छिष्टचाण्डालिनीम्॥

ॐ सुमुखी शेमुषीसेव्या सुरसा शशिशेखरा।
समानास्या साधनी च समस्तसुरसन्मुखी॥

सर्वसम्पत्तिजननी सम्मदा सिन्धुसेविनी।
शम्भुसीमन्तिनी सौम्या समाराध्या सुधारसा॥

सारङ्गा सवली वेलालावण्यवनमालिनी।
वनजाक्षी वनचरी वनी वनविनोदिनी॥

वेगिनी वेगदा वेगा बगलस्था बलाधिका।
काली कालप्रिया केली कमला कालकामिनी॥

कमला कमलस्था च कमलस्थाकलावती।
कुलीना कुटिला कान्ता कोकिला कलभाषिणी॥

कीराकेलिकरा काली कपालिन्यपि कालिका।
केशिनी च कुशावर्त्ता कौशाम्भी केशवप्रिया॥

काली काशी महाकालसङ्काशा केशदायिनी।
कुण्डला च कुलस्था च कुण्डलाङ्गदमण्डिता॥

कुण्डपद्मा कुमुदिनी कुमुदप्रीतिवर्द्धिनी।
कुण्डप्रिया कुण्डरुचिः कुरङ्गनयना कुला॥

कुन्दबिम्बालिनदनी कुसुम्भकुसुमाकरा।
काञ्ची कनकशोभाढ्या क्वणत्किङ्किणिकाकटिः॥

कठोरकरणा काष्ठा कौमुदी कण्डवत्यपि।
कपर्द्दिनी कपटिनी कठिनी कलकण्डिनी॥

कीरहस्ता कुमारी च कुरूढकुसुमप्रिया।
p. 341) कुञ्जरस्था कुजरता कुम्भी कुम्भस्तनी कला॥

कुम्भीकाङ्गा करभोरूः कदली कुशशायिनी।
कुपिता कोटरस्था च कङ्काली कन्दलालया॥

कपालवासिनी केशी कम्पमानशिरोरुहा।
कदम्बरी कदम्बस्था कुङ्कुमप्रेमधारिणी॥

कुटुम्बिनी कृपायुक्ता क्रतुः क्रतुकरप्रिया।
कात्यायनी कृत्तिका च कार्त्तिकी कुशवर्त्तिनी॥

कामपत्नी कामदात्री कामेशी कामवन्दिता।
कामरूपा कामरतिः कामाख्या ज्ञानमोहिनी॥

खङ्गिनी खेचरी खञ्जा खञ्जरीटेक्षणा खगा।
खरगा खरनादा च खरस्था खेलनप्रिया॥

खरांशुः खेलनी खट्वाखराखट्वाङ्गधारिणी।
खरखण्डिन्यपि ख्यातिः खण्डिता खण्डनप्रिया॥

खण्डप्रिया खण्डखाद्या खण्ढसिन्धुश्च खण्डिनी।

गङ्गा गोदावरी गौरी गोतम्यपि च गौतमी॥

गङ्गा गया गगनगा गारुडी गरुडध्वजा।
गीता गीतप्रिया गेया गुणप्रीतिग्गुरुर्गिरी।

गौर्गौरी गण्डसदना गोकुला गोःप्रतारिणी।
गोप्ता गोविन्दिनी गूढा गूढविग्रस्तगुञ्जिनी॥

गजगा गोपिनी गोपी गोक्षाजयप्रिया गणा।
गिरिभूपालदुहिता गोगा गोकुलवासिनी॥

घनस्तनी घनरुचिग्घर्घनोरुग्घननिस्स्वना।
घुङ्कारिणी घुक्षकरी घूघूकपरिवारिता॥

घण्टानादप्रिया घण्टा घोटा घोटकवाहिनी।
घोररूपा च घोरा च घृतप्रीतिग्घृताञ्जनी॥

घृताची घृतवृष्टिश्च घण्टा घटघटावृता।
घटस्था घटना घातकरी घातनिवारिणी॥

चञ्चरीकी चकोरी च च चामुण्डा चीरधारिणी।
चातुरी चपला चञ्चुश्चिता चिन्तामणिस्थिता॥

चातुर्वर्ण्यमयी चञ्चुश्चोराचार्या चमत्कृतिः।
चक्रवर्तिवधूश्चित्रा चक्राङ्गी चक्रमोदिनी॥

चेतश्चरी चित्तवृत्तिश्चेतना चेतनप्रिया।
चापिनी चम्पकप्रीतिश्चण्डा चण्डालवासिनी॥

चिरञ्जीविनी तच्चिन्ता चिञ्चामूलनिवासिनी।
छूरिका छत्रमध्यस्था छिन्दा छिन्दकरी छिदा॥

p. 342) छुच्छुन्दरी छलप्रीतिश्छुच्छुन्दरनिभस्वना।
छलिनी छत्रदा छिन्ना छिण्टिच्छेदकरी छटा॥

छद्मिनी छान्दसी छाया छरू छन्दाकरीत्यपि।
जयदा जयदा जाती जायिनी जामला जतुः॥

जम्बूप्रिया जीवनस्था जङ्गमा जङ्गमप्रिया।
जवापुष्पप्रिया जप्या जगज्जीवा जगज्जनिः॥

जगज्जन्तुप्रधाना च जगज्जीवपराजवा।
जातिप्रिया जीवनस्था जीमूतसदृशीरुचिः॥

जन्या जनहिता जाया जन्मभूर्ज्जम्भसी जभूः।
जयदा जगदावासा जायिनी ज्वरकृच्छ्रजित्॥

जपा च जपती जप्या जपाहा जायिनी जना।
जालन्धरमयीजानुर्ज्जालौका जाप्यभूषणा॥

जगज्जीवमयीजीवा जरत्कारुर्ज्जनप्रिया।
जगती जननिरता जगच्छोभाकरी जवा॥

जगतीत्राणकृज्जङ्घा जातीफलविनोदिनी।
जातीपुष्पप्रिया ज्वाला जातिहा जातिरूपिणी॥

जीमूतवाहनरुचिर्ज्जीमूता जीर्णवस्त्रकृत्।
जीर्णवस्त्रधरा जीर्णा ज्वलती जालनाशिनी॥

जगत्क्षोभकरी जातिर्ज्जगत्क्षोभविनाशिनी।

जनापवादा जीवा च जननीगृहवासिनी॥

जनानुरागा जानुस्था जलवासा जलार्त्तिकृत्।
जलजा जलवेला च जलचक्रनिवासिनी॥

जलमुक्ता जलारोहा जलजा जलजेक्षणा।
जलप्रिया जलौका च जलांशोभवती तथा॥

जलविस्फूर्जितवपुर्ज्वलत्पावकशोभिनी।
झिञ्झा झिल्लमयी झिञ्झाझणत्कारकरी जया॥

झञ्झी झम्पकरी झम्पा झम्पत्रासनिवारिणी।
टङ्कारस्था टङ्ककरी टङ्कारकरणांहसा॥

टङ्कारोट्टकृतष्ठीवा डिण्डीरवसनावृता।
डाकिनी डामिरी चैव डिण्डिमध्वनिनादिनी॥

डकारनिस्स्वनरुचिस्तपिनी तापिनी तथा।
तरुणी तुन्दिला तुन्दा तामसी च तमः प्रिया॥

ताम्रा ताम्रवती तन्तुस्तुन्दिला तुलसम्भवा।
तुलाकोटिसुवेगा च तुल्यकामा तुलाश्रया॥

तुदिनी तुनिनी तुम्बा तुल्यकाला तुलाश्रया।
p. 343) तुमुला तुलजा तुल्या तुलादानकरी तथा॥

तुल्यवेगा तुल्यगतिस्तुलाकोटिनिनादिनी।
ताम्रोष्ठा ताम्रपर्णी च तमःसङ्क्षोभकारिणी॥

त्वरिता ज्वरहा तीरा तारकेशी तमालिनी।
तमोदानवती तामतालस्थानवती तमी।

तामसी च तमिस्रा च तीव्रा तीव्रपराक्रमा।
तटस्था तिलतैलाक्ता तरुणी तपनद्युतिः॥

तिलोत्तमा च तिलकृत्तारकाधीशशेखरा।
तिलपुष्पप्रिया तारा तारकेशी कुटुम्बिनी॥

स्थाणुपत्नी स्थिरकरी स्थूलसम्पद्विवर्द्धिनी।
स्थितिः स्थैर्यस्थविष्ठा च स्थपतिः स्थूलविग्रहा॥

स्थूलस्थलवती स्थाली स्थलसङ्गविवर्द्धिनी।
दण्डिनी दन्तिनी दामा दरिद्रा दीनवत्सला॥

देवा देववधूर्द्दित्या दामिनी देवभूषणा।
दया दमवती दीनवत्सला दाडिमस्तनी॥

देवमूर्त्तिकरा दैत्यादारिणी देवतानता।
दोलाक्रीडा दयालूश्च दम्पती देवतामयी॥

दशादीपस्थिता दोषादोषहा दोषकारिणी।
दुर्गा दुर्गार्तिशमनी दुर्गम्या दुर्गवासिनी।

दुर्गन्धनाशिनी दुस्स्था दुःखप्रशमकारिणी।
दुर्ग्गन्धा दुन्दुभीध्वान्ता दूरस्था दूरवासिनी॥

दरदामरदात्री च दुर्व्व्याधदयिता दमी।
धुरन्धरा धुरीणा च धौरेयी धनदायिनी॥

धीरारवा धरित्री च धर्मदा धीरमानसा।

धनुर्द्धरा च धमनी धमनीधूर्त्तविग्रहा॥

धूम्रवर्णा धूम्रपाना धूमला धूममोदिनी।
नन्दिनी नन्दिनीनन्दा नन्दिनीनन्दबालिका॥

नवीना नर्मदा नर्मनेमिर्न्नियमनिस्स्वना।
निर्मला निगमाधारा निम्नगा नग्नकामिनी॥

नीला निरम्बा निर्वाणा निर्ल्लोभा निर्गुणा नतिः।
नीलग्रीवा निरीहा च निरञ्जनजमानवा॥

निर्गुण्डिका च निर्गुण्डा निर्न्नासा नासिकाभिधा।
पताकिनी पताका च पत्रप्रीतिः पयस्विनी॥

पीना पीनस्तनी पत्नी पवनाशी निशामयी।
परापरपराकाली पारकृत्यभुजप्रिया॥

p. 344) पवनस्था च पवना पवनप्रीतिवर्द्धिनी।
पशुवृद्धिकरी पुष्पी पोषका पुष्टिवर्द्धिनी॥

पुष्पिणी पुस्तककरा पूर्णिमातलवासिनी।
पेशी पाशकरी पाशा पांशुहा पांशुला पशुः॥

पटुः पराशा परशुधारिणी पाशिनी तथा।
पापघ्नी पतिपत्नी च पतिता पतितापती॥

पिशाची च पिशाचघ्नी पिशिताशनतोषिणी।
पानदा पानपात्री च पानदानकरोद्यता॥

पेयाप्रसिद्धा पीयूषा पूर्णा पूर्णमनोरथा।
पतङ्गाभा पतङ्गा च पौनःपुन्यपिबापरा॥

पङ्किला पङ्कमग्ना च पानीया पञ्जरस्थिता।
पञ्चमी पञ्चयज्ञा च पञ्चता पञ्चमाप्रिया॥

पिचुमन्दा पुण्डरीका पिकी पिङ्गललोचना।
प्रियङ्गुमञ्जरी पिण्डी पण्डिता पाण्डुरप्रभा॥

प्रेतासना प्रियालस्था पाण्डुघ्नी पीनसापहा।
फलिनी फलदात्री च फलश्रीः फलभूषणा॥

फूत्कारकारिणी रफारी फुल्ला फुल्लाम्बुजानना।
स्फुलिंगहा स्फीतमतिः स्फीतकीर्त्तिकरी तथा॥

बालमाया बलारातिर्ब्बलिनी बलवर्द्धिनी।
वेणुवाद्या वनचरी विरञ्चिजनयत्यपि॥

विद्याप्रदा महाविद्या बोधिनी बोधदायिनी।
बुद्धमाता च बुद्धा च वनमालावती वरा॥

वरदा वारुणी वीणा वीणावादनतत्परा।
विनोदिनी विनोदस्था वैष्णवी विष्णुवल्लभा॥

वैद्या वैद्यचिकित्सा च विवशा विश्वविश्रुता।
विद्यौघविह्वला वेला वित्तदा विगतज्वरा॥

विरावा विवरीकारा बिम्बोष्ठी बिम्बवत्सला।
विन्ध्यस्था परवन्द्या च वीरस्थानवरा च वित्॥

वेदान्तवेद्या विजया विजयाविजयप्रदा।

विरोगी वन्दिनी वन्ध्या वन्द्यबन्धनिवारिणी॥

भगिनी भगमाला च भवानी भवनाशिनी।
भीमा भीमानना भीमाभङ्गुरा भीमदर्शना॥

भिल्ली भिल्लधरा भीरुर्भरुण्डाभी भयावहा।
भगसर्पिण्यपि भगा भगरूपा भगालया॥

भगासना भवाभोगा भेरीझङ्काररञ्जिता।
p. 345) भीषणा भीषणारावा वभगत्यहिभूषणा॥

भारद्वाजा भोगदात्री भूतिघ्नी भूतिभूषणा।
भूमिदाभूमिदात्री च भूपतिर्भरदायिनी॥

भ्रमरी भ्रामरी भाला भूपालकुलसंस्थिता।
माता मनोहरा माया मानिनी मोहिनी मही॥

महालक्ष्मीर्मदक्षीबा मदिरा मदिरालया।
मदोद्धता मतङ्गस्था माधवी मधुमर्द्दिनी॥

मोदा मोदकरी मेधा मेध्यामध्याधिपस्थिता।
मद्यपा मांसलोभस्था मोदिनी मैथुनोद्यता॥

मूर्द्धावती महामाया माया महिममन्दिरा।
महामाला महाविद्या महामारी महेश्वरी॥

महादेववधूमान्या मथुरा मेरुमण्डिता।
मेदस्विनी मिलिन्दाक्षी महिषासुरमर्द्दिनी॥

मण्डलस्था भगस्था च मदिरारागगर्विता।
मोक्षदा मुण्डमाला च माला मालाविलासिनी॥

मातङ्गिनी च मातङ्गी मातङ्गतनयापि च।
मधुस्रवा मधुरसा बन्धूककुसुमप्रिया॥

यामिनी यामिनीनाथभूषा यावकरञ्जिता।
यवाङ्कुरप्रिया यामा यवनी यवनार्दिनी॥

यमघ्नी यमकल्पा च यजमानस्वरूपिणी।
यज्ञा यज्ञयजुर्यक्षी यशोनिः कम्पकाकारिणी॥

यक्षिणी यक्षजननी यशोदायासधारिणी।
यशस्सूत्रप्रदा यामा यज्ञकर्मकरीत्यपि॥

यशस्विनी यकारस्था भूयस्तम्भनिवासिनी।
रञ्जिता राजपत्नी च रमा रेखा रवी रणा॥

रजोवती रजश्चित्रा रञ्जनी रजनीपतिः।
रोगिणी रजनी राज्ञा राज्यदा राज्यवर्द्धिनी॥

राजन्वती राजनीतिस्तथा रजतवासिनी।
रमणीरमणीया च रामा रामावती रतिः।

रेतो रती रतोत्साहा रोगघ्नी रोगकारिणी।
रङ्गा रङ्गवती रागा रागा रागज्ञा रागकृद्दया॥

रामिका रजकी रेवा रजनी रङ्गलोचना।
रक्तचर्मधरा रङ्गी रङ्गस्था रङ्गवाहिनी॥

रमा रम्भाफलप्रीती रम्भोरू राघवप्रिया।

रङ्गा रङ्गाङ्गमधुरा रोदसी च महारवा॥

p.346) रोधकृद्रोगहन्त्री च रूपभृद्रोगस्त्राविणी।

बन्दी वन्दिस्तुता बन्धुर्बन्धूककुसुमाधरा॥

वन्दिता वन्द्यमाना च वैद्रावी वेदविद्विधा।

विकोपा विकपाला च विङ्कस्था विङ्कवत्सला॥

वेदैर्विलग्नलग्ना च विधिविङ्ककरी विधा।

शङ्खिनी शङ्खवलया शङ्खमालावती शमी॥

शङ्खपात्रा शिनी शङ्खस्वनशङ्खगला शशी।

शबरी शम्बरी शम्भुः शम्भुकेशा शरासिनी॥

शवा श्येनवती श्यामा श्यामाङ्गी श्यामलोचना।

श्मशानस्था श्मशाना च श्मशानस्थानभूषणा॥

शमदा शमहन्त्री च शङ्खिनी शङ्खरोषरा।

शान्तिश्शान्तिप्रदा शेषा शेषाख्या शेषशायिनी॥

शेमुषी शोषिणी शेषा शौर्या शौर्यशरा शरी।
शापदा शापहा शापाशापपन्था सदाशिवा॥

शृङ्गिणी शृङ्गिपलभुक् शाङ्करी शाङ्करी शिवा।
शवस्था शवभुक् शान्ता शवकर्णा शवोदरी॥

शाविनी शवशिंशाश्रीः शवा च शमशायिनी।
शवकुण्डलिनी शैवाशीकरा शिशिराशिना॥

शवकाञ्ची शवश्रीका शबमाला शवाकृतिः।
सवन्ती सङ्कुचा शक्तिश्शान्तनुश्शवदायिनी॥

सिन्धुस्सरस्वती सिन्धुस्सुन्दरी सुन्दरानना।
साधुः सिद्धिप्रदात्री च सिद्धा सिद्धसरस्वती॥

सन्ततिस्सम्पदा सँवच्छङ्किसम्पत्तिदायिनी।
सपत्नी सरसा सारा सारस्वतकरी सुधा॥

सुरासमांसाशना च समाराध्या समस्तदा।
समधीस्सामदा सीमा सम्मोहा समदर्शना॥

सामतिस्सामधा सीमा सावित्री सविधा सती।

सवना सवनासारा सवरा सावरा समी॥

सिमरा सतता साध्वी सध्रीची ससहायिनी।

हंसी हंसगतिहंसी हंसोज्ज्वलनिचोलयुक्॥

हलिनी हालिनी हाला हलश्रीर्हरवल्लभा।

हला हलवती ह्येषा हेला हर्षविवर्द्धिनी॥

हन्तिर्हन्ता हयाहाहाहताहन्तातिकारिणी।

हङ्कारी हंकृतिर्हङ्का हीहीहाहाहिताहिता॥

हीतिर्हैमप्रदा हाराराविणी हरिरसम्मता।

p. 347) होरा होत्री होलिका च होमा होमहविर्हविः॥

हरिणी हरिणीनेत्रा हिमाचलनिवासिनी।

लम्बोदरी लम्बकर्णा लम्बिका लम्बविग्रहा॥

लीला लीलावती लोला ललना ललिता लता।

ललामलोचना लोभ्या लोलाक्षी सत्कुलालया॥

लपत्नी लपती लम्पा लोपामुद्रा ललन्तिका।
लतिका लङ्घिनी लङ्घा लालिमा लघुमध्यमा॥

लघीयसी लघूदर्या लूता लूताविनाशिनी।
लोमशा लोमलम्बी च लूलन्ती च लूलूम्पती॥

लूलायस्था बलहरी लङ्कापुरपुरन्दरा।
लक्ष्मीर्ल्लक्ष्मीप्रदा लभ्या लाक्षाक्षी लूलितप्रभा॥

क्षणा क्षणक्षुक्षुक्षिणी क्षमाक्षान्तिः क्षमावती।
क्षामा क्षामोदरी क्षेम्या क्षौमभृत्क्षत्रियाङ्गणा॥

क्षया क्षायाकरी क्षीरा क्षीरदा क्षीरसागरा।
क्षेमङ्करी क्षयकरी क्षयकृत्क्षणदा क्षतिः॥

क्षुद्रिका क्षुद्रिकाक्षुद्रा क्षुत्क्षमा क्षीणपातका।
मातुः सहस्त्रनामेदं सुमुख्यास्सिद्धिदायकम्॥

यः पठेत्प्रयतो नित्यं स एव स्यान्महेश्वरः।
अनाचारात्पठेन्नित्यन्दरिद्रो धनवान्भवेत्॥

मूकस्स्याद्वाक्पतिर्देवि रोगी नीरोगताँव्व्रजेत्।
पुत्रार्त्थी पुत्रमाप्नोति त्रिषु लोकेषु विश्रुतम्॥

वन्ध्यापि सूयते पुत्रँव्विदुषस्सदृशङ्गुरोः।
सत्यञ्च बहुधा भूयाद्गावश्च बहुदुग्धदाः॥

राजानः पादनम्रास्स्युस्तस्य हासा इव स्फुटाः।
अरयस्सङ्क्षयँय्यांति मानसा संस्मृता अपि॥
दर्शनादेव जायन्ते नरा नार्योपि तद्वशाः।
कर्त्ता हर्त्ता स्वयँवीरो जायते नात्र संशयः॥

यँय्यङ्कामयते कामन्तन्तमाप्नोति निश्चितम्।
दुरितन्न च तस्यास्ति नास्ति शोकः कथञ्चन॥

चतुष्पथेऽर्द्धरात्रे च यः पठेत्साधकोत्तमः।
एकाकी निर्भयो वीरो दशावर्त्तस्तवोत्तमम्॥

मनसा चिन्तितङ्कार्यं तस्य सिद्धिर्न्न संशयः।
विना सहस्रनाम्नाँय्यो जपेन्मन्त्रङ्कदाचन॥

न सिद्धिर्ज्जायते तस्य मन्त्रङ्कल्पशतैरपि।

p. 348) कुजवारे श्मशाने वा मध्याह्ने यो जपेत्सदा॥

कृतकृत्यस्स जायेत कर्त्ता हर्त्ता नृणामिह।

रोगार्त्तोऽर्द्धनिशायाँय्यः पठेदासनसंस्थितः॥

सद्यो नीरोगतामेति यदि स्यान्निर्ब्भयस्तदा।

अर्द्धरात्रे श्मशाने वा शनिवारे जपेन्मनुम्।

अष्टोत्तरसहस्त्रन्तु दशवारञ्जपेत्ततः।

सहस्त्रनाम चैतद्धि तदा याति स्वयं शिवा॥

महापवनरूपेण घोरगोमायुनादिनी।

ततो यदि न भीतिः स्यात्तदा देहीतिवाग्भवेत्॥

तदा पशुबलिन्दद्यात्स्वयं गृह्णाति चण्डिका।

यथेष्टञ्च वरन्दत्त्वा प्रयाति सुमुखी शिवा॥

रोचनागुरुकस्तूरीकर्प्पूरैश्च सचन्दनैः।

कुङ्कुमेन दिने श्रेष्ठे लिखित्वा भूर्ज्जपत्रके॥

शुभनक्षत्रयोगे च कृतमारुतसक्रियः।
कृत्वा सम्पातनविधिन्धारयेद्दक्षिणे करे॥

सहस्रनाम स्वर्णस्थङ्कण्ठे वा विजितेन्द्रियः।
तदायम्प्रणमेन्मन्त्री क्रुद्धस्स म्रियते नरः॥

दुष्टश्वापदजन्तूनान्न भीः कुत्रापि जायते।
बालकानामियं रक्षा गर्भिणीनामपि प्रिये॥

मोहनस्तम्भनाकर्ष-मारणोच्चाटनानि च।
यन्त्रधारणतो नूनञ्जायन्ते साधकस्य तु॥

नीलवस्त्रे विलिखिते ध्वजायाँय्यदि तिष्ठति।
तदा नष्टा भवत्येव प्रचण्डाप्यरिवाहिनी॥

एतज्जप्तम्महाभस्म ललाटे यदि धारयेत्।
तद्विलोकन एव स्युः प्राणिनस्तस्य किङ्कराः॥

राजपत्न्योऽपि विवशाः किमन्याः पुरयोषितः।

एतज्जप्तम्पिबेत्तोयम्मासेन स्यान्महाकविः॥

पण्डितश्च महावादी जायते नात्र संशयः।
अयुतञ्च पठेत्स्तोत्रम्पुरश्चरणसिद्धये॥

दशांशङ्कमलैर्हुत्वा त्रिमध्वाक्तैर्विधानतः।
स्वयमायाति कमला वाण्या सह तदालये॥

मन्त्रो निःकीलतामेति सुमुखी सुमुखी भवेत्।
अनन्तञ्च भवेत्पुण्यमपुण्यञ्च क्षयँव्व्रजेत्॥

पुष्करादिषु तीर्त्थेषु स्नानतो यत्फलम्भवेत्।
तत्फलँल्लभते जन्तुः सुमुख्याः स्तोत्रपाठतः॥

p. 349) एतदुक्तं रहस्यन्ते स्वसर्वस्वँव्वरानने।
न प्रकाश्यन्त्वया देवि यदि सिद्धिञ्च विन्दसि॥

प्रकाशनादसिद्धिस्स्यात्कुपिता सुमुखी भवेत्।
नातः परतरो लोके सिद्धिदः प्राणिनामिह॥

वन्दे श्रीसुमुखीम्प्रसन्नवदनाम्पूर्णेन्दुबिम्बाननां
सिन्दूराङ्कितमस्तकाम्मधुमदोल्लोलाञ्च मुक्तावलीम्।
श्यामाङ्कञ्जलिकाकराङ्करगतञ्चाध्यापयन्तीं
शुकञ्जुञ्जापुञ्जविभूषणां सकरुणामामुक्तवेणीलताम्॥

इति श्रीनन्द्यावर्त्ततन्त्रे उत्तरखण्डे मातङ्गीसहस्रनामस्तोत्रं
संपूर्णम्॥

इति शाक्तप्रमोदे मातङ्गीतन्त्रं समाप्तम्॥

श्रीः

शिवहरराजधानीपतिश्रीराजादेवनन्दनसिंह-
बहादुरनराधिपसंगृहीतविरचित-

शाक्तप्रमोदान्तर्गतं

दशमं

कमलात्मिकातन्त्रम्

उक्तराजगुरुवंश्यपण्डितश्रीरघुराजदुबेजीद्वारा

संशोधितम्

तदेतत्

श्रीकृष्णदासात्मजखेमराजेन

स्वकीये श्रीवेंकटेश्वर यन्त्रालये

मुद्रयित्वा प्रकाशितम्

बोम्ब-ई

श्रीगणेशाय नमः

अथ शाक्तप्रमोदः

अथ कमलात्मिकातन्त्रम्

अथ कमलात्मिकाध्यानम्

कान्त्या काञ्चनसन्निभां हिमगिरिप्रख्यैश्चतुर्भिर्गजै-
र्हस्तोत्क्षिप्तहिरण्मयामृतघटैरासिच्यमानां श्रियम्।
बिभ्राणाँव्वरमब्जयुग्ममभयं हस्तैः किरीटोज्ज्वलां
क्षौमाबद्धनितम्बबिम्बललिताँव्वन्देऽरविन्दस्थिताम्॥ १॥

p. 354) अथ यन्त्रोद्धारः

अनुक्तकल्पे यन्त्रन्तु लिखेत्पद्मन्दलाष्टकम्॥
षट्कोणकर्णिकन्तत्र वेदद्वारोपशोभितम्॥

अथ मन्त्रोद्धारः

तारम्पूर्वं ल्लिखित्वा परमलममलँव्वाग्भवम्बीजमन्य-
ल्लज्जाश्रीबीजपूर्वँव्वशकरणतमङ्कामबीजम्परस्तात्॥
ह्सौः पश्चाद्योजनीयं सुयुतमथ जगत्पूर्विकायाः प्रसूत्या
ङेन्तं रूपन्नमोन्तन्निखिलमनुविदैर्मन्त्रमुक्तं रमायाः॥

अथ मन्त्रः

ॐ ऐंह्रींश्रींक्लींह्सौः जगत्प्रसूत्यै नमः॥

अथ पूजाप्रयोगः

प्रातः कृत्यादि पीठन्यासान्तङ्कर्म विधाय
ह्त्पद्मस्थपूर्वकेसरेषु मध्ये च पीठशक्तीः पीठमनुञ्च न्यसेत्॥

ॐ विभूत्यैनमः, एवम् उन्नत्यै० कान्त्यै० सृष्ट्यै० कीर्त्यै० सन्नत्यै०
व्युष्ट्यै० उत्कृष्ट्यै० ऋद्ध्यै०। ततः श्रीकमलासनायनमः इत्यासनँ

व्विन्यस्य ऋष्यादिन्यासङ्कुर्यात्। शिरसि भृगुऋषयेनमः, मुखे
निचृच्छन्दसेनमः, हृदि श्रियै देवतायै नमः। ततः कराङ्गन्यासौ
कुर्यात्। श्रां-अङ्गुष्ठाभ्यान्नमः, श्रींतर्ज्जनीभ्यांस्वाहा,
श्रूंमध्यमाभ्याँव्वषट् इत्यादि॥

p. 355) एवं श्रांहृदयायनम इत्यादिना च न्यसेत्॥ तथा च निबन्धे॥
अङ्गानि दीर्घयुक्तेन रमाबीजेन कल्पयेत्॥ ततो ध्यानम्॥

कान्त्या काञ्चनसन्निभां
हिमगिरिप्रख्यैश्चतुर्भिर्गजैर्हस्तोत्क्षिप्तहिरण्मयामृतघटैरासिच्यम्
आनां श्रियम्। बिभ्राणाँव्वरमब्जयुग्ममभयं हस्तैः
किरीटोज्वलाङ्क्षौमाबद्धनितम्बललिताँव्वन्देऽरविन्दस्थिताम्॥
एवन्ध्यात्वा मानसैः सम्पूज्य शङ्खस्थापनङ्कुर्यात्॥ ततः
पीठपूजाँव्विधाय केसरेषु मध्ये च विभूत्यादि
पीठमन्वन्तपूजाँव्विधाय पुनर्ध्यात्वा आवाहनादि
पञ्चपुष्पाञ्जलिदानपर्यन्ताँव्विधाय। आवरणपूजामारभेत्॥
अग्न्यादि केसरेषु मध्ये दिक्षु च श्रांहृदयायनमः॥ इत्यादिना
सम्पूज्य दिग्दलेषु पूर्वादिषु॥ ॐवासुदेवायनमः, एवं
सङ्कर्षणाय० प्रद्युम्नाय० अनिरुद्धाय० विदिग्दलेषु ॐ दमकाय०
ॐसलिलाय० ॐगुग्गुलाय० ॐकुरण्टकाय०॥ ततो देव्या दक्षिणे

ॐशङ्खनिधये नमः एवँव्वसुधायैनमः वामे ॐपद्मनिधये०
ॐवसुमत्यै० पत्राग्रेषु पूर्वादितः ॐबलाकायैनमः एवं विमलायै०
वनमालिकायै० बिभीषिकायै० तद्बहिरिन्द्रादीन् वज्रादींश्च पूजयेत्॥
ततो धूपादि विसर्ज्जनान्तङ्कर्म समापयेत्॥ अस्य
पुरश्चरणन्द्वादशलक्षजपः॥ तथा च
भानुलक्षञ्जपेन्मन्त्रन्दीक्षितो विजितेन्द्रियः॥ तत्सहस्रञ्च
जुहुयात्कमलैर्मधुराप्लुतैः॥ जपान्ते जुहुयान्मन्त्री तिलैर्वा
मधुरालूसैः॥ बिल्वैः फलैर्वा जुहुयात्त्रिभिर्वा साधकोत्तमः॥ इति
पूजाप्रयोगः॥

अथ स्तोत्रम्

त्रैलोक्यपूजिते देवि कमले विष्णुवल्लभे।
यथा त्वमचला कृष्णे तथा भव मयि स्थिरा॥ १॥

ईश्वरी कमला लक्ष्मीश्चला भूतिर्हरिप्रिया।
पद्मा पद्मालया सम्यगुच्चैः श्रीपद्मधारिणी॥ २॥

p. 356) द्वादशैतानि नामानि लक्ष्मीं सम्पूज्य यः पठेत्।
स्थिरा लक्ष्मीर्भवेत्तस्य पुत्रदारादिभिः सह॥ ३॥

इति श्रीकमलात्मिकास्तोत्रं समाप्तम्॥

अथ कवचम्

अथ वक्ष्ये महेशानि कवचं सर्वकामदम्।
यस्य विज्ञानमात्रेण भवेत्साक्षात्सदाशिवः॥ १॥

नार्च्चनन्तस्य देवेशि मन्त्रमात्रञ्जपेन्नरः।
स भवेत्पार्वतीपुत्रः सर्वशास्त्रविशारदः॥ २॥

विद्यार्थिनां सदा विद्या धनदातृ विशेषतः।
धमार्त्थिभिस्सदा सेव्या कमला विष्णुवल्लभा॥ ३॥

अस्याश्चतुरक्षरीविष्णुवल्लभायाः कवचस्य भगवान्
ऋषिरनुष्टुप्छन्दो वाग्भवी शक्तिर्देवता वाग्भवं बीजं
लज्जारमाकीलकं कामबीजात्मकङ्कवचं मम सुपाण्डित्यकवित्व-
सर्वसिद्धिसमृद्धये विनियोगः॥

ऐंकारो मस्तके पातु वाग्भवी सर्वसिद्धिदा।
ह्रीं पातु चक्षुषोर्मध्ये चक्षुय्युग्मे च शाङ्करी॥ ४॥

जिह्वायाम्मुखवृत्ते च कर्णयोर्दन्तयोर्नसि।
ओष्ठाधरे दन्तपङ्क्तौ तालूमूले हनौ पुनः॥ ५॥

पातु माँव्विष्णुवनिता लक्ष्मीः श्रीविष्णुरूपिणी॥ ६॥

कर्णयुग्मे भुजद्वन्द्वे स्तनद्वन्द्वे च पार्वती।
हृदये मणिबन्धे च ग्रीवायाम्पार्श्वयोः पुनः॥ ७॥

पृष्ठदेशे तथा गुह्ये वामे च दक्षिणे तथा।
उपस्थे च नितम्बे च नाभौ जङ्घाद्वये पुनः॥ ८॥

जानुचक्रे पदद्वन्द्वे घुटिकेऽङ्गुलिमूलके।
स्वधातुप्राणशक्त्यात्मसीमन्ते मस्तके पुनः॥ ९॥

विजया पातु भवने जया पातु सदा मम।
सर्वाङ्गे पातु कामेशी महादेवी सरस्वती॥ १०॥

तुष्टिः पातु महामाया उत्कृष्टिः सर्वदावतु।
ऋद्धिः पातु महादेवी सर्वत्र शम्भुवल्लभा॥ ११॥

वाग्भवी सर्वदा पातु पातु मां हरगेहिनी।
रमा पातु सदा देवी पातु माया स्वराड्वयम्॥ १२॥

सर्वाङ्गे पातु मां ल्लक्ष्मीर्विष्णुमाया सुरेश्वरी।
p. 353) शिवदूती सदा पातु सुन्दरी पातु सर्वदा॥ १३॥

भैरवी पातु सर्वत्र भेरुण्डा सर्वदावतु।
त्वरिता पातु मान्नित्यमुग्रतारा सदावतु॥ १४॥

पातु माङ्कालिका नित्यङ्कालरात्रिः सदावतु।
नवदुर्गा सदा पातु कामाक्षी सर्वदावतु॥ १५॥

योगिन्यः सर्वदा पान्तु मुद्राः पान्तु सदा मम।
मात्राः पान्तु सदा देव्यश्चक्रस्था योगिनीगणाः॥ १६॥

सर्वत्र सर्वकार्येषु सर्वकर्मषु सर्वदा।

पातु मान्देवदेवी च लक्ष्मीः सर्वसमृद्धिदा॥ १७॥

इति ते कथितं दिव्यङ्कवचं सर्वसिद्धये।
यत्र तत्र न वक्तव्यँय्यदीच्छेदात्मनो हितम्॥ १८॥

शठाय भक्तिहीनाय निन्दकाय महेश्वरी।
न्यूनाङ्गे चातिरिक्ताङ्गे दर्शयेन्न कदाचन॥ १९॥

न स्तवन्दर्शयेद्दिव्यं सन्दर्श्य शिवहा भवेत्।
कुलीनाय महेच्छाय दुर्गाभक्तिपराय च॥ २०॥

वैष्णवाय विशुद्धाय दद्यात्कवचमुत्तमम्।
निजशिष्याय शान्ताय धनिने ज्ञानिने तथा॥ २१॥

दद्यात्कवचमित्युक्तं सर्वतन्त्रसमन्वितम्।
शनौ मङ्गलवारे च रक्तचन्दनकैस्तथा॥ २२॥

यावकेन लिखेन्मन्त्रं सर्वतन्त्रसमन्वितम्।
विलिख्य कवचन्दिव्यं स्वयम्भुकुसुमैः शुभैः॥ २३॥

स्वशुक्रैः परशुक्रैर्वा नानागन्धसमन्वितैः।
गोरोचनाकुङ्कुमेन रक्तचन्दनकेन वा॥ २४॥

सुतिथौ शुभयोगे वा श्रवणायां रवेर्दिने।
अश्विन्याङ्कृत्तिकायाँव्वा फल्गुन्याँव्वा मघासु च॥ २५॥

पूर्वभाद्रपदायोगे स्वात्याम्मङ्गलवासरे।
विलिखेत्प्रपठेत्स्तोत्रं शुभयोगे सुरालये॥ २६॥

आयुष्मत्प्रीतियोगे च ब्रह्मयोगे विशेषतः।
इन्द्रयोगे शुभे योगे शुक्रयोगे तथैव च॥ २७॥

कौलवे बालवे चैव वणिजे चैव सत्तमः।
शून्यागारे श्मशाने च विजने च विशेषतः॥ २८॥

कुमारीम्पूजयित्वाऽदौ यजेद्देवीं सनातनीम्।
मत्स्यैर्मांसैः शाकसूपैः पूजयेत्परदेवताम्॥ २९॥

p. 358) घृताद्यैः सोपकरणैः पूपसूपैर्विशेषतः।
ब्राह्मणान्भोजयित्वा च पूजयेत्परमेश्वरीम्॥ ३०॥

अखेटकमुपाख्यानं तत्र कुर्याद्दिनत्रयम्।

तधाधरन्महाविद्यां शङ्करेण प्रभाषिताम्॥ ३१॥

मारणद्वेषणादीनि लभते नात्र संशयः।

स भवेत्पार्वतीपुत्रः सर्वशास्त्रपुरस्कृतः॥ ३२॥

गुरुर्देवो हरः साक्षात्पत्नी तस्य हरप्रिया।

अभेदेन भजेद्यस्तु तस्य सिद्धिरदूरतः॥ ३३॥

पठति य इह मार्त्त्यो नित्यमार्द्रान्तरात्मा जपफलमनुमेयँल्लप्स्यते

यद्विधेयम्।

स भवति

पदमुच्चैस्सम्पदाम्पादनम्रक्षितिपमुकुटलक्ष्मीर्ल्लक्षणानाञ्चिरा

य॥ ३४॥

इति विश्वसारतन्त्रे कमलात्मिकाकवचं समाप्तम्॥

अथ हृदयम्

आद्यादिश्रीमहालक्ष्मीहृदयमालामन्त्रस्य भार्गव ऋषिः।
आद्यादिश्रीमहालक्ष्मीर्देवता। अनुष्टुबादिनानाछन्दांसि। श्रीँ
बीजम् ह्रीं शक्तिः। ऐं कीलकम्।
आद्यादिमहालक्ष्मीप्रसादसिद्ध्यर्थं जपे विनियोगः॥

अथ न्यासः

ॐ भार्गवऋषयेनमः शिरसि। अनुष्टुबादिनानाछन्दोभ्योनमः मुखे
। आद्यादिश्रीमहालक्ष्म्यै देवतायै नमो हृदये। श्रींबीजायनमः
गुह्ये। ह्रींशक्तयेनमः पादयोः। ऐंकीलकायनमः सर्वाङ्गे॥

अथ करन्यासः

ॐ श्रीं-अङ्गुष्ठाभ्यान्नमः। ॐह्रींतर्ज्जनीभ्यान्नमः।
ॐ-ऐंमध्यमाभ्यान्नमः। ॐ श्रीं-अनामिकाभ्यान्नमः।
ॐह्रींकनिष्ठिकाभ्यान्नमः। ॐ-ऐंकरतलकरपृष्ठाभ्यान्नमः।
ॐश्रींहृदयायनमः ॐह्रींशिरसेस्वाहा ॐ-ऐंशिखायैवषट्
ॐश्रींकवचायहूम् ॐह्रींनेत्रत्रयायवौषट् ॐ-ऐं-अस्त्रायफट्
ॐश्रींह्रीं-ऐं इतिदिग्बन्धः॥

अथ ध्यानम्

हस्तद्वयेन कमले धारयन्तीं स्वलीलया।
हारनूपुरसँयुक्ताँल्लक्ष्मीन्देवीं विचिन्तये॥

इति ध्यात्वा सम्पूज्य॥

शङ्खचक्रगदाहस्ते शुभ्रवर्णे सुवासिनी।
मम देहि वरँल्लक्ष्मि सर्वसिद्धिप्रदायिनि।

p. 359) इति सम्प्रात्थ्र्य ॐ श्रींह्रीं-ऐं महालक्ष्म्यै कमलधारिण्यै
सिंहवाहिन्यै स्वाहा इति मन्त्रञ्जपित्वा पुनः पूर्ववद्धृदयादि
षडंगन्यासं कृत्वा स्तोत्रम्पठेत्॥

तदित्थम्॥

वन्दे लक्ष्मीम्परशिवमयीं
शुद्धजाम्बूनदाभान्तेजोरूपाङ्कनकवसनां
सर्वभूषोज्ज्वलांगीम्।

बीजापूरङ्कनककलशं हेमपद्मन्दधानामाद्यां शक्तिं
सकलजननीं व्विष्णुवामाङ्कसंस्थाम्॥ १॥

श्रीमत्सौभाग्यजननीं स्तौमि लक्ष्मीं सनातनीम्।
सर्वकामफलावाप्तिसाधनैकसुखावहाम्॥ २॥

स्मरामि नित्यन्देवेशि त्वया प्रेरितमानसः।
त्वदाज्ञां शिरसा धृत्वा भजामि परमेश्वरीम्॥ ३॥

समस्तसम्पत्सुखदाम्महाश्रियं समस्तसौभाग्यकरीम्महाश्रियम्
।
समस्तकल्याणकरीम्महाश्रियम्भजाम्यहं
ज्ञानकरीम्महाश्रियम्॥ ४॥

विज्ञानसम्पत्सुखदां सनातनीं व्विचित्रवाग्भूतिकरीम्मनोहराम्।
अनन्तसामोदसुखप्रदायिनीन्नमाम्यहम्भूतिकरीं हरिप्रियाम्॥ ५॥

समस्तभूतान्तरसंस्थिता त्वं समस्तभोक्त्रीश्वरि विश्वरूपे।
तन्नास्ति यत्त्वद्व्यतिरिक्तवस्तु त्वत्पादपद्मम्प्रणमाम्यहं श्रीः॥ ६॥

दारिद्र्यदुःखौघतमोपहन्त्रि त्वत्पादपद्ममयि सन्निधत्स्व।
दीनार्त्तिविच्छेदनहेतुभूतैः कृपाकटाक्षैरभिषिञ्च मां श्रीः॥ ७॥

अम्ब प्रसीद करुणासुधयार्द्रदृष्ट्या
मान्त्वत्कृपाद्रविणगेहमिमङ्कुरुष्व।
आलोकय प्रणतहृद्गतशोकहन्त्रि त्वत्पादपद्मयुगलम्प्रणमाम्यहम्
श्रीः॥ ८॥

शान्त्यै नमोस्तु शरणागतक्षणायै कान्त्यै नमोस्तु
कमनीयगुणाश्रयायै।
क्षान्त्यै नमोस्तु दुरितक्षयकारणायै धात्र्यै नमोस्तु
धनधान्यसमृद्धिदायै॥ ९॥

शक्त्यै नमोस्तु शशिशेखरसंस्तुताय रत्यै नमोऽस्तु
रजनीकरसोदरायै।
भक्त्यै नमोस्तु भवसागरतारकायै मत्यै नमोऽस्तु
मधुसूदनवल्लभायै॥ १०॥

लक्ष्म्यै नमोस्तु शुभलक्षणलक्षितायै सिद्ध्यै नमोस्तु
शिवसिद्धसुपूजितायै।

p. 360) धृत्यै नमोस्त्वमितदुर्गतिभञ्जनायै गत्यै नमोस्तु
वरसद्गतिदायकायै॥ ११॥

देव्यै नमोस्तु दिवि देवगणार्च्चितायै भूत्यै नमोस्तु
भुवनार्त्तिविनाशनायै।
दात्र्यै नमोस्तु धरणीधरवल्लभायै पुष्ट्यै नमोऽस्तु
पुरुषोत्तमवल्लभायै॥ १२॥

सुतीव्रदारिद्र्यविदुःखहन्त्र्यै नमोऽस्तु ते सर्वभयापहर्त्र्यै।
श्रीविष्णुवृक्षस्थलसंस्थितायै नमो नमस्सर्वविभूतिदायै॥ १३॥

जयतु जयतु लक्ष्मीर्लक्षणालंकृताङ्गी जयतु जयतु पद्मा
पद्मसद्माभिवन्द्या।
जयतु जयतु विद्या विष्णुवामाङ्कसंस्था जयतु जयतु
सम्यक्सर्वसम्पत्करी श्रीः॥ १४॥

जयतु जयतु देवी देवसङ्घाभिपूज्या जयतु जयतु भद्रा भार्गवी
भाग्यरूपा।
जयतु जयतु नित्या निर्मलज्ञानवेद्या जयतु जयतु सत्या
सर्वभूतान्तरस्था॥ १५॥

जयतु जयतु रम्या रत्नगर्भान्तरस्था जयतु जयतु शुद्धा
शुद्धजाम्बूनदाभा।
जयतु जयतु कान्ता कान्तिमद्भासिताङ्गी जयतु जयतु शान्ता
शीघ्रमागच्छ सौम्ये॥ १६॥

यस्याः कलाद्याः कमलोद्भवाद्या रुद्राश्च शक्रप्रमुखाश्च
देवाः।
जीवन्ति सर्वा अपि शक्तयस्ताः प्रभुत्वमाप्ताः परमायुषस्ते॥ १७॥

लिलेख निटिले विधिर्म्मम लिपिंव्विसृज्यान्तरन्त्वया विलिखितव्यमेतदिति
तत्फलप्राप्तये।
तदन्तरफले स्फुटङ्कमलवासिनी श्रीरिमां समर्पय समुद्रिकां
सकलभाग्संसूचिकाम्॥ १८॥

कलया ते यथा देवि जीवंति सचराचराः।
तथा सम्पत्करे लक्ष्मि सर्वदा सम्प्रसीद मे॥ १९॥

यथा विष्णुर्द्ध्रुवे नित्यं स्वकलां सन्न्यवेशयत्।
तथैव स्वकलां लक्ष्मि मयि सम्यक् समर्पय॥ २०॥

सर्वसौख्यप्रदे देवि भक्तानामभयप्रदे।

अचलाङ्कुरु यत्नेन कलाम्मयि निवेशिताम्॥ २१॥

मुदास्ताम्मद्भाले परमपदलक्ष्मीः स्फुटकला सदा

वैकुण्ठश्रीर्न्निवसतु कला मे नयनयोः।

p. 361) वसेत्सत्ये लोके मम वचसि लक्ष्मीवरकलाश्रियश्चेतद्वीपे

निवसतु कला मे स्वकरयोः॥ २२॥

तावन्नित्यम्ममाङ्गेषु क्षीराब्धौ श्रीकला वसेत्।

सूर्याचन्द्रमसौ यावद्यावल्लक्ष्मीपतिः श्रिया॥ २३॥

सर्वमङ्गलसम्पूर्णा सर्वैश्वर्यसमन्विता।

आद्यादिश्रीमहालक्ष्मि त्वत्कला मयि तिष्ठतु॥ २४॥

अज्ञानतिमिरं हन्तुं शुद्धज्ञानप्रकाशिका।

सर्वैश्वर्यप्रदा मेस्तु त्वत्कला मयि सँथिता॥ २५॥

अलक्ष्मीं हरतु क्षिप्रन्तमः सूर्यप्रभा यथा।

वितनोतु मम श्रेयस्त्वत्कला मयि संस्थिता॥ २६॥

ऐश्वर्यमङ्गलोत्पत्तिस्त्वत्कला यान्निधीयते।
मयि तस्मात्कृतार्थोऽस्मि पात्रमस्मि स्थितेस्तव॥ २७॥

भवदावेशभाग्यार्हो भाग्यवानस्मि भार्ग्गवि।
त्वत्प्रसादात्पवित्रोहँल्लोकमातर्न्नमोस्तु ते॥ २८॥

पुनासि मान्त्वङ्कलयैव यस्मादतः समागच्छ ममाग्रतस्त्वम्।
परम्पदं श्रीर्ब्भव सुप्रसन्ना मय्यच्युतेन प्रविशादिलक्ष्मि॥ २९॥

श्रीवैकुण्ठस्थिते लक्ष्मि समागच्छ ममाग्रतः।
नारायणेन सह मां कृपादृष्ट्यावलोकय॥ ३०॥

सत्यलोकस्थिते लक्ष्मि त्वम्ममागच्छ सन्निधिम्।
वासुदेवेन सहिता प्रसीद वरदा भव॥ ३१॥

श्वेतद्वीपस्थिते लक्ष्मि शीघ्रमागच्छ सुव्रते।
विष्णुना सहिते देवि जगन्मातः प्रसीद मे॥ ३२॥

क्षीराम्बुधिस्थिते लक्ष्मि समागच्छ स-माधवे।

त्वत्कृपादृष्टिसुधया सततम्माँव्विलोकय॥ ३३॥

रत्नगर्ब्भस्थिते लक्ष्मि परिपूर्णहिरण्मयि।
समागच्छ समागच्छ स्थित्वाशु पुरतो मम॥ ३४॥

स्थिरा भव महालक्ष्मि निश्चला भव निर्म्मले।
प्रसन्ने कमले देवि प्रसन्नहृदया भव॥ ३५॥

श्रीधरे श्रीमहाभूते त्वदन्तः-स्थम्महानिधिम्।
शीघ्रमुद्धृत्य पुरतः प्रदर्शय समर्पय॥ ३६॥

वसुन्धरे श्रीवसुधे वसुदोग्धि कृपामयि।
त्वत्कुक्षिगतसर्वस्वं शीघ्रम्मे सम्प्रदर्शय॥ ३७॥

p. 362) विष्णुप्रिये रत्नगर्ब्भे समस्तफलदे शिवे।
त्वद्गर्भगतहेमादीन्सम्प्रदर्शय दर्शय॥ ३८॥

रसातलगते लक्ष्मि शीघ्रमागच्छ मे पुरः।
न जाने परमं रूपम्मातर्मे सम्प्रदर्शय॥ ३९॥

आविर्भव मनोवेगाच्छीघ्रमागच्छ मे पुरः।
मा वत्स भैरिहेत्युक्त्वा कामङ्गौरिव रक्ष माम्॥ ४०॥

देवि शीघ्रं समागच्छ धरणीगर्ब्भसंस्थिते।
मातस्त्वद्भृत्यभृत्योहम्मृगये त्वाङ्कुतूहलात्॥ ४१॥

उत्तिष्ठ जागृहि त्वम्मे समुत्तिष्ठ सुजागृहि।
अक्षयान्हेमकलशान्सुवर्णेन सुपूरितान्॥ ४२॥

निक्षेपान्मे समाकृष्य समुद्धृत्य ममाग्रतः।
समुन्नताननना भूत्वा समाधेहि धरान्तरात्॥ ४३॥

मत्सन्निधिं समागच्छ मदाहितकृपारसात्।
प्रसीद श्रेयसान्दोग्धि्र लक्ष्मि मे नयनाग्रतः॥ ४४॥

अत्रोपविश लक्ष्मि त्वं स्थिरा भव हिरण्मयि।
सुस्थिरा भव सम्प्रीत्या प्रसीद वरदा भव॥ ४५॥

आनीय त्वन्तथा देवि निधीन्मे सम्प्रदर्शय।
अद्य क्षणेन सहसा दत्वा संरक्ष मां सदा॥ ४६॥

मयि तिष्ठ तथा नित्यँय्यथेन्द्रादिषु तिष्ठसि।
अभयङ्कुरु मे देवि महालक्षि नमोऽस्तु ते॥ ४७॥

समागच्छ महालक्ष्मि शुद्धजाम्बूनदप्रभे।
प्रसीद पुरतः स्थित्वा प्रणतम्माँव्विलोकय॥ ४८॥

लक्ष्मि भुवङ्गता भासि यत्र यत्र हिरण्मयी।
तत्र तत्र स्थिता त्वम्मे तव रूपम्प्रदर्शय॥ ४९॥

क्रीडसे बहुधा भूमौ परिपूर्णहिरण्मयी।
मम मूर्द्धनि ते हस्तमविलम्बितमर्पय॥ ५०॥

फलद्भाग्योदये लक्ष्मि समस्तपुरवासिनि।
प्रसीद मे महालक्ष्मि परिपूर्णमनोरथे॥ ५१॥

अयोध्यादिषु सर्वेषु नगरेषु समास्थिते।
वैभवैर्विविधैय्युक्ता समागच्छ बलान्विते॥ ५२॥

समागच्छ समाच्छ ममाग्रे भव सुस्थिरा।

करुणारसनिष्यन्दनेत्रद्वयविलासिनी॥ ५३॥

सन्निधत्स्व महालक्ष्मि त्वत्पाणिम्मम मस्तके।

p. 363) करुणासुधया मान्त्वमभिषिञ्च स्थिरीकुरु॥ ५४॥

सर्वराजगृहे लक्ष्मि समागच्छ मुदान्विते।

स्थित्वाशु पुरतो मेऽद्य प्रसादेनाभयङ्कुरु॥ ५५॥

सादरम्मस्तके हस्तम्मम त्वङ्कृपयार्पय।

सर्वराजगृहे लक्ष्मि त्वत्कला मयि तिष्ठतु॥ ५६॥

आद्यादिश्रीमहालक्ष्मि विष्णुवामाङ्कसंस्थिते।

प्रत्यक्षङ्कुरु मे रूपं रक्ष मां शरणागतम्॥ ५७॥

प्रसीद मे महालक्ष्मि सुप्रसीद महाशिवे।

अचला भव सम्प्रीत्या सुस्थिरा भव मद्गृहे॥ ५८॥

यावत्तिष्ठन्ति वेदाश्च यावत्त्वन्नाम तिष्ठति।

यावद्विष्णुश्च यावत्त्वन्तावत्कुरु कृपाम्मयि॥ ५९॥

चान्द्री कला यथा शुक्ले वर्द्धते सा दिने दिने।
तथा दया ते मय्येव वर्द्धतामभिवर्द्धताम्॥ ६०॥

यथा वैकुण्ठनगरे यथा वै क्षीरसागरे।
तथा मद्भवने तिष्ठ स्थिरं श्रीविष्णुना सह॥ ६१॥

योगिनां हृदये नित्यँय्यथा तिष्ठसि विष्णुना।
तथा मद्भवने तिष्ठ स्थिरं श्रीविष्णुना सह॥ ६२॥

नारायणस्य हृदये भवती यथास्ते नारायणोपि तव हृत्कमले यथास्ते
।
नारायणस्त्वमपि नित्यमुभौ तथैव तौ तिष्ठतां हृदि ममापि
दयावति श्रीः॥ ६३॥

विज्ञानवृद्धिं हृदये कुरु श्रीः सौभाग्यवृद्धिङ्कुरु मे गृहे श्रीः
।
दया सुवृद्धिङ्कुरुताम्मयि श्रीस्सुवर्णवृद्धिङ्कुरु मे गृहे श्रीः॥ ६४
॥

न मान्त्यजेथाः श्रितकल्पवल्लि सद्भक्तचिन्तामणिकामधेनो।

विश्वस्य मातर्भव सुप्रसन्ना गृहे कलत्रेषु च पुत्रवर्गे॥ ६५॥

आद्यादिमाये त्वमजाण्डबीजन्त्वमेव साकारनिराकृतिस्त्वम्।
त्वया धृताश्चाब्जभवाण्डसङ्घाश्चित्रञ्चरित्रन्तव देवि विष्णोः॥
६६॥

ब्रह्मरुद्रादयो देवा वेदाश्चापि न शक्नुयुः।
महिमानन्तव स्तोतुम्मन्दोऽहं शक्नुयाङ्कथम्॥ ६७॥

अम्ब त्वद्वत्सवाक्यानि सूक्तासूक्तानि यानि च।
तानि स्वीकुरु सर्वज्ञे दयालूत्वेन सादरम्॥ ६८॥

p. 364) भवतीं शरणङ्गत्वा कृतार्थाः स्युः पुरातनाः।
इति सञ्चिन्त्य मनसा त्वामहं शरणँव्व्रजे॥ ६९॥

अनन्ता नित्यसुखिनस्त्वद्भक्तास्त्वत्परायणाः।
इति वेदप्रमाणाद्धि देवि त्वाँशरणँव्व्रजे॥ ७०॥

तव प्रतिज्ञा मद्भक्ता न नश्यन्तीत्यपि क्वचित्।
इति सञ्चिन्त्य सञ्चित्य प्राणान्सन्धारयाम्यहम्॥ ७१॥

त्वदधीनस्त्वहं मातस्त्वत्कृपा मयि विद्यते।
यावत्सम्पूर्णकामः स्यात्तावद्देहि दयानिधे॥ ७२॥

क्षणमात्रन्न शक्नोमि जीवितुन्त्वत्कृपाँव्विना।
न जीवन्तीह जलजा जलन्त्यक्त्वा जलग्रहाः॥ ७३॥

यथा हि पुत्रवात्सल्याज्जननी प्रस्नुतस्तनी।
वत्सन्त्वरितमागत्य सम्प्रीणयति वत्सला॥ ७४॥

यदि स्यान्तव पुत्रोऽहम्माता त्वँय्यदि मामकी।
दयापयोधरस्तन्यसुधाभिरभिषिञ्च माम॥ ७५॥

मृग्यो न गुणलेशोपि मयि दोषैकमन्दिरे।
पांसूनाँव्वृष्टिबिन्दूनान्दोषाणाञ्च न मे मितिः॥ ७६॥

पापिनामहमेवाग्र्यो दयालूनान्त्वमग्रणीः।
दयनीयो मदन्योऽस्ति तव कोऽत्र जगत्त्रये॥ ७७॥

विधिनाहन्न सृष्टश्चेन्न स्यात्तव दयालूता।

आमयो वा न सृष्टश्चेदौषधस्य वृथोदयः॥ ७८॥

कृपा मदग्रजा किन्ते अहङ्किंव्वा तदग्रजः।
विचार्य देहि मे वित्तन्तव देवि दयानिधे॥ ७९॥

माता पिता त्वङ्गुरुसद्गतिः श्रीस्त्वमेव सञ्जीवनहेतुभूता।
अन्यन्न मन्ये जगदेकनाथे त्वमेव सर्वम्मम देवि सत्ये॥ ८०॥

आद्यादिलक्ष्मीर्भव सुप्रसन्ना विशुद्धविज्ञानसुखैकदोग्ध्री।
अज्ञानहन्त्री त्रिगुणातिरिक्ता प्रज्ञाननेत्री भव सुप्रसन्ना॥ ८१॥

अशेषवाग्जाड्यमलापहन्त्री नवन्नवं स्पष्टसुवाक्प्रदायिनी।
ममेह जिह्वाग्रसुरङ्गनर्त्तकी भव प्रसन्ना वदने च मे श्रीः॥ ८२॥

समस्तसम्पत्सु विराजमाना समस्ततेजश्चयभासमाना।
विष्णुप्रिये त्वम्भव दीप्यमाना वाग्देवता मे नयने प्रसन्ना॥ ८३॥

p. 365) सर्वप्रदश्शौ सकलार्त्थदे त्वम्प्रभासुलावण्यदयाप्रदोग्ध्री
।
सुवर्णदे त्वं सुमुखी भव श्रीर्हिरण्मयी मे नयने प्रसन्ना॥ ८४॥

सर्वार्त्थदा सर्वजगत्प्रसूतिःसर्वेश्वरी सर्वभयापहन्त्री।
सर्वोन्नता त्वं सुमुखीभव श्रीर्हिरण्मयी मे नयने प्रसन्ना॥ ८५॥

समस्तविघ्नौघविनाशकारिणी समस्तभक्तोद्धरणे विचक्षणा।
अनन्तसौभाग्यसुखप्रदायिनी हिरण्मयी मे नयने प्रसन्ना॥ ८६॥

देवि प्रसीद दयनीयतमाय मह्यन्देवाधिनाथ भव
देवगणाभिवन्द्ये।
मातस्तथैव भव सन्निहिता दृशोर्म्मे पत्या सममम मुखे भव
सुप्रसन्ना॥ ८७॥

मा वत्स भैरभयदानकरोऽर्पितस्ते मौलौ ममेति मम
दीनदयानुकम्पे।
मातः समर्पय मुदा करुणाकटाक्षम्माङ्गल्यबीजमिह नः सृज
जन्म मातः॥ ८८॥

कटाक्ष इह कामधुक् तव मनस्तु चिन्तामणिः करः सुरतरुः सदा
नवनिधिस्त्वमेवेन्दिरे।
भवेत्तव दयारसो मम रसायनञ्चान्वहम्सुखन्तव

कलानिधिर्विविधवाञ्छितार्थप्रदम्॥ ८९॥

यथा रसस्पर्शनतोऽयसोपि सुवर्णता स्यात्कमले तथा ते।
कटाक्षसंस्पर्शनतो जनानाममङ्गलानामपि मङ्गलन्त्वम्॥ ९०॥

देहीति नास्तीति वचः प्रवेशाद्भीतो रमे त्वां शरणम्प्रपद्ये।
अतः सदास्मिन्नभयप्रदा त्वं सहैव पत्या मयि सन्निधेहि॥ ९१॥

कल्पद्रुमेण मणिना सहिता सुरम्या श्रीस्ते कला मयि रसेन रसायनेन।
आस्ताँय्यतो मम च दृक् शिरपाणिपादस्पृष्टाः सुवर्णवपुषः
स्थिरजङ्गमाः स्युः॥ ९२॥

आद्यादिविष्णोः स्थिरधर्मपत्नी त्वमेव पत्या मयि सन्निधेहि।
आद्यादिलक्ष्मि त्वदनुग्रहेण पदे पदे मे निधिदर्शनं स्यात्॥ ९३॥

आद्यादिलक्ष्मीहृदयम्पठेद्यः स राज्यलक्ष्मीमचलान्तनोति।
महादरिद्रोपि भवेद्धनाढ्यस्तदन्वये श्रीः स्थिरताम्प्रयाति॥ ९४॥

यस्य स्मरणमात्रेण तुष्टा स्याद्विष्णुवल्लभा।
तस्याभीष्टन्ददात्याशु तम्पालयति पुत्रवत्॥ ९५॥

p. 366) इदं रहस्यं हृदयं सर्वकामफलप्रदम्।

जपः पञ्चसहस्रन्तु पुरश्चरणमुच्यते॥ ९६॥

त्रिकालमेककालँव्वा नरो भक्तिसमन्वितः।

यः पठेच्छृणुयाद्वापि स याति परमां श्रियम्॥ ९७॥

महालक्ष्मीं समुद्दिश्य निशि भार्गववासरे।

इदं श्रीहृदयञ्जप्त्वा पञ्चवारन्धनी भवेत्॥ ९८॥

अनेन हृदयेनान्नञ्जर्भिण्या अभिमन्त्रितम्।

ददाति तत्कुले पुत्रो जायते श्रीपतिः स्वयम्॥ ९९॥

नरेण वाथवा नार्या लक्ष्मीहृदयमन्त्रिते।

जले पीते च तद्वंशे मन्दभाग्यो न जायते॥ १००॥

य अश्विने मासि च शुक्लपक्षे रमोत्सवे सन्निहितैकभक्त्या।

पठेत्तथैकोत्तरवारवृद्ध्या लभेत्स सौवर्णमयीं सुवृष्टिम्॥ १०१॥

य एकभक्तोन्वहमेकवर्षं विशुद्धधीः सप्ततिवारजापी।

स मन्दभाग्योपि रमाकटाक्षाद्भवेत्सहस्राक्षशताधिकश्रीः॥ १०२

॥

श्रीशाङ्घ्रिभक्तिं

हरिदासदास्यम्प्रसन्नमन्त्रार्थदृढैकनिष्ठाम्।

गुरोः स्मृतिन्निर्मलबोधबुद्धिम्प्रदेहि मातः परम्पमदं श्रीः॥ १०३

॥

पृथ्वीपतित्वम्पुरुषोत्तमत्वँव्विभूतिवासँव्विविधार्थसिद्धिम्।

सम्पूर्णकीर्त्तिम्बहु वर्षभोगं प्रदेहि मे लक्ष्मि पुनः पुनस्त्वम्॥

१०४॥

वादार्थसिद्धिम्बहुलोकवश्यँव्वयः स्थिरत्वँल्ललनासुभोगम्।

पौत्रादिलब्धिं सकलार्थसिद्धिम्प्रदेहि मे भार्गवि जन्म जन्मनि॥ १०५

॥

सुवर्णवृद्धिङ्कुरु मे गृहे श्रीर्विभूतिवृद्धिङ्कुरु मे गृहे श्रीः॥ १०६

॥

अथ शिरोबीजम्॥

ॐयंहंकंलंपं

श्रीध्यायेल्लक्ष्मीम्प्रहसितमुखीङ्कोटिबालार्कभासाँ

व्विद्युद्वर्णाम्बरवरधराम्भूषणाढ्यां सुशोभाम्।

बीजापूरं सरसिजयुगं बिभ्रतीं स्वर्णपात्रम्भर्त्त्रा

युक्ताम्मुहुरभयदाम्मह्यमप्यच्युतश्रीः॥ १०७॥

गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतञ्जपम्।

सिद्धिर्ब्भवतु मे देवि त्वत्प्रसादान्मयि स्थिता॥ १०८॥

इति श्रीथर्वणरहस्ये लक्ष्मीहृदयस्तोत्रं सम्पूर्णम्॥

p. 367) अथोपनिषत्

अथ लोकान् पर्यटन्सनत्कुमारोह वैदे हः पुण्यचित्ताँल्लोकानतीत्य

वैष्णवन्धाम दिव्यगणोपेतँ

व्विद्रुमवेदिकामणिमुक्तागणार्च्चितम्प्राप।

तत्रापश्यन्महामायाम्पराद्र्ध्यवस्त्राभरणोत्तरीयाम्पर्यङ्कस्थ

अम्पारे चरन्तीमादिदेवम्भगवन्तम्परमेश्वरन्दृष्ट्वा च
ताङ्गद्गदवाक्प्रफुल्लरोमा स्तोतुमुपचक्रमे॥

वाचम्मे दिशतु श्रीर्देवी मनो मे दिशतु वैष्णवी।
ओजस्तेजो बलन्दाक्ष्यम्बुद्धेर्वैभवमस्तु मे॥

त्वत्प्रसादाद्भगवति प्रज्ञानम्मे ध्रुवम्भवेत्।
शन्नो दिशतु श्रीर्द्देवी महामाया वैष्णवीशक्तिराद्या
यामासाद्य स्वयमादिदेवो भगवान्परावरज्ञस्त्रिधासम्भिन्नो
लोकांस्त्रीन्सृजत्यवत्यत्ति च।
यद्भ्रूविक्षेपबलमापन्नो ह्यब्जयोनिस्तदितरे चामरा मुख्याः
सृष्टिचक्रप्रणेतारस्सम्बभूवुः॥ या वै वरदा स्वोपाया सुप्रसन्ना
सुखयति सहस्रपुरुषान् ये लोकाः सन्ततमानमन्ति शिरसा हृदये न च
तामेकाँलोकपूज्यान्न ते दुर्ग्गतिँय्यान्ति भूताः।

अथ महत्या सँवृद्ध्या साम्राज्येन पुत्रैः पौत्रैरन्वितो भूमिपृष्ठे
शतं समास्त इज्याभिरिष्ट्वा देवान् पितॄन् मनुष्यानथ
भूरिदक्षिणाभिस्त्वत्प्रसादान्महान्तो गच्छन्ति वैष्णवँ
ल्लोकमपुनर्ब्भवाय ये राजर्षयो ब्रह्मर्षयस्तेपि
चासत्कृत्त्वाम्प्रागसन्त एव सुखमामनन्ति नान्यः पन्था

विद्यतेऽयनाय किम्पुनरिहादिदेवो

भगवान्नारायणस्त्वामाधिदेवाखिलङ्करोति किँव्वर्णये त्वां

सहस्रकृत्वो नमस्ते य इमा ऋचः पठन्ति प्रातरुत्थाय

भूरिदानतेषाङ्किञ्चिदिह यावशिष्टँ

य्यदैश्वर्यन्दुर्ल्लभम्प्राणिनां हि।

इति कमलात्मिकोपनिषत्समाप्ता॥

p. 368) अथ श्रीसूक्तम्

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम्।

चन्द्रां हिरण्मयीँल्लक्ष्मीञ्जातवेदो ममावह॥ १॥

ताम्म आवह जातवेदो लक्ष्मीमनपगामिनीम्।

यस्यां हिरण्यँव्विन्देयङ्गामश्वम्पुरुषानहम्॥ २॥

अश्वपूर्णां रथमध्यां हस्तिनादप्रमोदिनीम्।

श्रियन्देवीमुपह्वये श्रीर्मा देवी जुषताम्॥ ३॥

कां सोस्मि तां हिरण्यप्राकारामार्द्राञ्ज्वलन्तीन्तृप्तान्तर्पयन्तीम्।
पद्मे स्थिताम्पद्मवर्णान्तामिहोपह्वये श्रियम्॥ ४॥

चन्द्राम्प्रभासाँय्यशसा ज्वलन्तीं श्रियँल्लोके देवजुष्टामुदाराम्।
ताम्पद्मनेमिं शरणमहम्प्रपद्ये अलक्ष्मीर्मे नश्यतान्त्वाँ
व्वृणोमि॥५॥

आदित्यवर्णे तपसोधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः।
तस्य फलानि तपसा नुदन्तु मायान्तरा याश्च बाह्या अलक्ष्मीः॥ ६॥

उपैतु मान्देवसखः कीर्त्तिश्च मणिना सह।
प्रादुर्भूतोसि राष्ट्रेऽस्मिन्कीर्त्तिँव्वृद्धिन्ददातु मे॥ ७॥

छुत्पिपासामला ज्येष्ठा अलक्ष्मीर्न्नाशयाम्यहम्।
अभूतिमसमृद्धिञ्च सर्वान्निर्णुद मे गृहात्॥ ८॥

गन्धद्वारान्दुराधर्षान्नित्यपुष्टाङ्करीषिणीम्।
ईश्वरीं सर्वभूतानान्तामिहोपह्वये श्रियम्॥ ९

मनसः काममाकूतिँव्वाचः सत्यमशीमहि।

षशूनां रूपमन्नस्य मयि श्रीः श्रयतां य्यशः॥ १०॥

कर्द्दमेन प्रजाभूता मयि सम्भ्रमकर्द्दम।
श्रियँव्वासय मे कुले मातरम्पद्ममालिनीम्॥ ११॥

आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे।
निचदेवीम्मातरं श्रियँव्वासय मे कुले॥ १२॥

आर्द्राम्पुष्पकरिणीम्पुष्टिं सुवर्णां हेममालिनीम्।
सूर्यां हिरण्मयींल्लक्ष्मीञ्जातवेदो ममावह॥ १३॥

आर्द्राँय्यः करणींय्यष्टीम्पिङ्गलाम्पद्ममालिनीम्।
चन्द्रां हिरण्मयींल्लक्ष्मीञ्जातवेदो ममावह॥ १४॥

ताम्म आवह जातवेदो लक्ष्मीमनपगामिनीम्।
p. 369) यस्यां हिरण्यम्प्रभूतङ्गावो
दास्योश्वान्विन्देयम्पुरुषानहम्॥ १५॥

यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम्।
श्रियः पञ्चदशर्च्चञ्च श्रीकामः सततञ्जपेत्॥ १६॥

इति श्रीसूक्तम्॥

अथाष्टोत्तरशतनामस्तोत्रम्

श्रीशिव उवाच

शतमष्टोत्तरन्नाम्नाङ्कमलाया वरानने।
प्रवक्ष्याम्यतिगुह्यं हि न कदापि प्रकाशयेत्॥ १॥

महामाया महालक्ष्मीर्महावाणी महेश्वरी।
महादेवी महारात्रिर्महिषासुरमर्द्दिनी॥ २॥

कालरात्रिः कुहूः पूर्णा नन्दाद्या भद्रिका निशा।
जया रिक्ता महाशक्तिर्देवमाता कृशोदरी॥ ३॥

शचीन्द्राणी शक्रनुता शङ्करप्रियवल्लभा।
महावाराहजननी मदनोन्मथिनी मही॥ ४॥

वैकुण्ठनाथरमणी विष्णुवक्षस्स्थलस्थिता।
विश्वेश्वरी विश्वमाता वरदा भयदा शिवा॥ ५॥

शूलिनी चक्रिणी मा च पाशिनी शङ्खधारिणी।
गदिनी मुण्डमाला च कमला करुणालया॥ ६॥

पद्माक्षधारिणी ह्यम्बा महाविष्णुप्रियङ्करी।
गोलोकनाथरमणी गोलोकेश्वरपूजिता॥ ७॥

गया गङ्गा च यमुना गोमती गरुडासना।
गण्डकी सरयू तापी रेवा चैव पयस्विनी॥ ८॥

नर्म्मदा चैव कावेरी केदारस्थलवासिनी।
किशोरी केशवनुता महेन्द्रपरिवन्दिता॥ ९॥

ब्रह्मादिदेवनिर्माणकारिणी वेदपूजिता।
कोटिब्रह्माण्डमध्यस्था कोटिब्रह्माण्डकारिणी॥ १०॥

श्रुतिरूपा श्रुतिकरी श्रुतिस्मृतिपरायणा।
इन्दिरा सिन्धुतनया मातङ्गी लोकमातृका॥ ११॥

त्रिलोकजननी तन्त्रा तन्त्रमन्त्रस्वरूपिणी।
तरुणी च तमोहन्त्री मङ्गला मङ्गलायना॥ १२॥

मधुकैटभमथनी शुम्भासुरविनाशिनी।
निशुम्भादिहरा माता हरिशङ्करपूजिता॥ १३॥

सर्वदेवमयी सर्वा शरणागतपालिनी।
शरण्या शम्भुवनिता सिन्धुतीरनिवासिनी॥ १४॥

p. 370) गन्धर्वगानरसिका गीता गोविन्दवल्लभा।
त्रैलोक्यपालिनी तत्त्वरूप-तारुण्यपूरिता॥ १५॥

चन्द्रावली चन्द्रमुखी चन्द्रिका चन्द्रपूजिता।
चन्द्रा शशाङ्कभगिनी गीतवाद्यपरायणा॥ १६॥

सृष्टिरूपा सृष्टिकरी सृष्टिसंहारकारिणी।
इति ते कथितन्देवि रमानाम शताष्टकम्॥ १७॥

त्रिसन्ध्यम्प्रयतो भूत्वा पठेदेतत्समाहितः।

यं यं कामयते कामन्तन्तम्प्राप्नोत्यसंशयः॥ १८॥

इमं स्तवं यः पठतीह मर्त्यो वैकुण्ठपत्न्याः परमादरेण।
धनाधिपाद्यैः परिवंदितः स्यात्प्रयास्यति श्रीपदमन्तकाले॥ १९॥

इति कमलाया अष्टोत्तरशतनामस्तोत्रं सम्पूर्णम्॥

अथ सहस्रनाम

ॐ तामाह्वयामि सुभगां लक्ष्मीन्त्रैलोक्यपूजिताम्।
एह्येहि देवि पद्माक्षि पद्माकरकृतालये॥ १॥

आगच्छागच्छ वरदे पश्य मां स्वेन चक्षुषा।
आयाह्यायाहि धर्मार्थकाममोक्षमये शुभे॥ २॥

एवँविधैः स्तुतिपदैः सत्यैस्सत्यार्थसंस्तुता।
कनीयसी महाभागा चन्द्रेण परमात्मना॥ ३॥

निशाकरश्च सा देवी भ्रातरौ द्वौ पयोनिधेः।

उत्पन्नमात्रौ तावास्तां शिवकेशवसंश्रितौ॥ ४॥

सनत्कुमारस्तमृषिं समाभाष्य पुरातनम्।
प्रोक्तवानितिहासन्तु लक्ष्म्याः स्तोत्रमनुत्तमम्॥ ५॥

अथेदृशान्महाघोराद्दारिद्र्यान्नरकात्कथम्।
मुक्तिर्भवति लोकेऽस्मिन्दारिद्र्यं य्याति भस्मताम्॥ ६॥

सनत्कुमार उवाच

पूर्वङ्कृतयुगे ब्रह्मा भगवान्सर्वलोककृत्।
सृष्टिन्नानाविधाङ्कृत्वा पश्चाच्चिन्तामुपेयिवान्॥ ७॥

किमाहाराः प्रजास्त्वेताः सम्भविष्यन्ति भूतले।
किमत्र चासान्दारिद्र्यात्कथमुत्तारणम्भवेत्॥ ८॥

दारिद्र्यान्मरणं श्रेयस्त्विति सञ्चिन्त्य चेतसि।
क्षीरोदस्योत्तरे कूले जगाम कमलोद्भवः॥ ९॥

तत्र तीव्रन्तपस्तप्त्वा कदाचित् परमेश्वरम्।

p. 371) ददर्श पुण्डरीकाक्षँव्वासुदेवञ्जगद्गुरुम्॥ १०॥

सर्वज्ञं सर्वशक्तीनां सर्वावासं सनातनम्।
सर्वेश्वरँव्वासुदेवं विष्णुँल्लक्ष्मीपतिम्प्रभुम्॥ ११॥

सोमकोटिप्रतीकाशं क्षीरोदविमले जले।
अनन्तभोगशयनं विश्रान्तं श्रीनिकेतनम्॥ १२॥

कोटिसूर्यप्रतीकाशम्महायोगेश्वरेश्वरम्।
योगनिद्रारतं श्रीशं सर्वावासं सुरेश्वरम्॥ १३॥

जगदुत्पत्तिसंहार-स्थितिकारणकारणम्।
लक्ष्म्यादिशक्तिकरणञ्जातमण्डलमण्डितम्॥ १४॥

आयुधैर्देहवद्भिश्च चक्राद्यैः परिवारितम्।
दुर्न्निरीक्ष्यं सुरैः सिद्धैर्महायोगिशतैरपि॥ १५॥

आधार सर्वशक्तिनाम्परन्तेजः सुदुस्सहम्।
प्रभुद्धन्देवमीशानन्दृष्ट्वा कमलसम्भवः॥ १६॥

शिरस्यञ्जलिमाधाय स्तोत्रम्पूर्वमुवाच ह।
मनोवाञ्छितसिद्धिन्त्वम्पूरयस्व महेश्वर॥ १७॥

जितन्ते पुण्डरीकाक्ष नमस्ते विश्वभावन।
नमस्तेस्तु हृसीकेश महापुरुषपूर्वज॥ १८॥

सर्वेश्वर जयानन्द सर्वावास परात्पर।
प्रसीद मम भक्तस्य च्छिन्धि सन्देहजन्तमः॥ १९॥

एवं स्तुतः स भगवान्ब्रह्मणाऽव्यक्तजन्मना।
प्रासादाभिमुखः प्राह हरिर्विश्रान्तलोचनः॥ २०॥

श्रीभगवानुवाच

हिरण्यगर्भ्भ तुष्टोस्मि ब्रूहि यत्तेऽभिवाञ्छितम्।
तद्वक्ष्यामि न सन्देहो भक्तोसि मम सुव्रत॥ २१॥

केशवाद्वचनं श्रुत्वा करुणाविष्टचेतनः।
प्रत्युवाच महाबुद्धिर्ब्भगवन्तञ्जनार्दनम्॥ २२॥

चतुर्विधभवस्यास्य भूतसर्गस्य केशव।
परित्राणाय मे ब्रूहि रहस्यम्परमाद्भुतम्॥ २३॥

दारिद्र्यशमनन्धन्यम्मनोज्ञम्पावनम्परम्।
सर्वेश्वर महाबुद्धे स्वरूपँव्वैभवम्महत्॥ २४॥

श्रियः सर्वार्त्तिशायिन्यास्तथा ज्ञानञ्च शाश्वतम्।
नामानि चैव मुख्यानि यानि गौणानि चाच्युत॥ २५॥

त्वद्वक्त्रकमलोत्थानि श्रोतुमिच्छामि तत्त्वतः।
p. 372) इति तस्य वचः श्रुत्वा प्रतिवाक्यमुवाच सः॥ २६॥

महाविभूतिसँयुक्तः षाङ्गुण्यवपुषः प्रभोः।
भगवद्वासुदेवस्य नित्यञ्चैषानपायिनी॥ २७॥

एकैव वर्त्तते भिन्ना ज्योत्स्नेव हिमदीधितेः।
सर्वशक्त्यात्मिका चैव विश्वँव्याप्य व्यवस्थिता॥ २८॥

सर्वैश्वर्यगुणोपेता नित्यशुद्धस्वरूपिणी।
प्राणशक्तिः परा ह्येषा सर्वेषाम्प्राणिनाम्भुवि॥ २९॥

शक्तीनाञ्चैव सर्वासाँय्योनिभूता परा कला।
अहन्तस्याः षरन्नाम्नां सहस्त्रमिदमुत्तमम्॥ ३०॥

श्रृणुष्वावहितो भूत्वा परमैश्वर्यभूतिदम्।
देव्याख्या स्मृतिमात्रेण दारिद्र्यँय्याति भस्मताम्॥ ३१॥

श्रीभगवानुवाच

श्रीः पद्मा प्रकृतिः सत्त्वा शान्ता चिच्छक्तिरव्यया।
केवला निष्कला शुद्धा व्यापिनी व्योमविग्रहा॥ ३२॥

व्योमपद्मकृताधारा परा व्योमामतोद्भवा।
निर्व्योमा व्योममध्यस्था पञ्चव्योमपदाश्रिता॥ ३३॥

अच्युता व्योमनिलया परमानन्दरूपिणी।
नित्यशुद्धा नित्यतृप्ता निर्विकारा निरीक्षणा॥ ३४॥

ज्ञानशक्तिः कर्तृशक्तिर्भोक्तृशक्तिः शिखावहा।
स्नेहाभासा निरानन्दा विभूतिर्विमला चला॥ ३५॥

अनन्ता वैष्णवी व्यक्ता विश्वानन्दा विकाशिनी।
शक्तिर्विभिन्नसर्वार्त्तिः समुद्रपरितोषिणी॥ ३६॥

मूर्त्तिः सनातनी हार्द्दी निस्तरङ्गा निरामया।
ज्ञानज्ञेया ज्ञानगम्या ज्ञानज्ञेयविकाशिनी॥ ३७॥

स्वच्छन्दशक्तिगहना निष्कम्पार्च्चिः सुनिर्मला।
सुरूपा सर्वगापारा बृंहिणी सुगुणोर्ज्जिता॥ ३८॥

अकलङ्का निराधारा निस्सङ्कल्पा निराश्रया।
असङ्कीर्णा सुशान्ता च शाश्वती भासुरीस्थिता॥ ३९॥

अनौपम्या निर्विकल्पा निर्यन्त्रा यन्त्रवाहिनी।
अभेद्या भेदिनी भिन्ना भारती वैखरी खगा॥ ४०॥

अग्राह्या ग्राहिका गूढा गम्भीरा विश्वगोपिनी।
अनिर्द्देश्या प्रतिहता निर्ब्बिजा पावनी परा॥ ४१॥

p. 373) अप्रतर्क्या परिमिता भवभ्रान्तिविनाशिनी।

एका द्विरूपा त्रिविधा असङ्ख्याता सुरेश्वरी॥ ४२॥

सुप्रतिष्ठा महाधात्री स्थितिर्वृद्धिर्ध्रुवा गतिः।
ईश्वरी महिमा ऋद्धिः प्रमोदा उज्ज्वलोद्यमा॥ ४३॥

अक्षया वर्द्धमाना च सुप्रकाशा विहङ्गमा।
निरजा जननी नित्या जया रोचिष्मती शुभा॥ ४४॥

तपोनुदा च ज्वाला च सुदीप्तिश्चांशुमालिनी।
अप्रमेया त्रिधा सूक्ष्मा परा निर्वाणदायिनी॥ ४५॥

अवदाता सुशुद्धा च अमोघाख्या परम्परा।
सन्धानकी शुद्धविद्या सर्वभूतमहेश्वरी॥ ४६॥

लक्ष्मीस्तुष्टिर्महाधीरा शान्तिरापूरणे नवा।
अनुग्रहा शक्तिराद्या जगज्ज्येष्ठा जगद्विधिः॥ ४७॥

सत्यापह्ना क्रियायोग्याह्लादिनी चार्पणा शिवा।
सम्पूर्णाह्लादिनी शुद्धा ज्योतिष्मत्यमतावहा॥ ४८॥

रजोवत्यर्कप्रतिभाकर्षिणी कर्षिणी रसा।
परा वसुमती देविकान्तिः शान्तिर्मतिः कला॥ ४९॥

कला कलङ्करहिता विशालोद्दीपनी रतिः।
सम्बोधिनी हारिणी च प्रभावा भवभूतिदा॥ ५०॥

अमृतस्यन्दिनी जीवा जननी खण्डिका स्थिरा।
धूमा कलावती पूर्णा भासुरा सुमती रसा॥ ५१॥

शुद्धाध्वनिः सृतिः सृष्टिर्विकृतिः कृष्टिरेव च।
प्रापणी प्राणदा प्रह्वी विश्वपांडुरवासिनी॥ ५२॥

अवनी वज्रनलिका चित्रा ब्रह्माण्डवासिनी।
अनन्तरूपाऽनन्तात्मनन्तस्थाऽनन्तसम्भवा॥ ५३॥

महाशक्तिः प्राणशक्तिः प्राणदात्री रतिम्भरा।
महासमूहा निखिला इच्छाधारा सुखावहा॥ ५४॥

प्रत्यक्षलक्ष्मीर्निष्कम्पा प्ररोहा बुद्धिगोचरा।
नानादेहा महावर्ता बहुदेहविकाशिनी॥ ५५॥

सहस्राणी प्रधाना च न्यायवस्तुप्रकाशिका।
सर्वाभिलाषपूर्णेच्छा सर्वा सर्वार्त्थभाषिणी॥ ५६॥

नानास्वरूपचिद्धात्री शब्दपूर्वा पुरातना।
व्यक्ताऽव्यक्ता जीवकेशा सर्वेच्छापरिपूरिता॥ ५७॥

p. 374) सङ्कल्पसिद्धा साङ्ख्येया तत्त्वगर्भा धवावहा।
भूतरूपा चित्स्वरूपा त्रिगुणा गुणगर्विता॥ ५८॥

प्रजापतीश्वरी रौद्री सर्वाधारा सुखावहा।
कल्याणवाहिका कल्पा कलिकल्मषनाशिनी॥ ५९॥

निरूपोद्भिन्नसन्ताना सुयन्त्रा त्रिगुणालया।
महामाया योगमाया महायोगेश्वरीप्रिया॥ ६०॥

महास्त्री विमला कीर्त्तिर्ज्जया लक्ष्मीर्निरञ्जनी।
प्रकृतिर्ब्भगवन्मायाशक्तिर्न्निद्रा यशस्करी॥ ६१॥

चिन्ताबुद्धिर्यशः प्राज्ञा शान्तिराप्रीतिवर्द्धनी।

प्रद्युम्नमाता साध्वी च सुखसौभाग्यसिद्धिदा॥ ६२॥

काष्ठा निष्ठा प्रतिष्ठा च ज्येष्ठा श्रेष्ठा जयावहा।
सर्वातिशायिनी प्रीतिर्विश्वशक्तिर्म्महाबला॥ ६३॥

वरिष्ठा विजया वीरा जयन्ती विजयप्रदा।
ह्लद्गहा गोपिनी गुह्या गणगन्धर्वसेविता॥ ६४॥

योगीश्वरी योगमाया योगिनी योगसिद्धिदा।
महायोगेश्वरवृता योगयोगेश्वरप्रिया॥ ६५॥

ब्रह्मेन्द्ररुद्रनमिता सुरासुरवरप्रदा।
त्रिवर्त्मगा त्रिलोकस्था त्रिविक्रमपदोद्भवा॥ ६६॥

सुतारा तारिणी तारा दुर्गा सन्तारणी परा।
सुतारणी तारयन्ती भूरितारेश्वरप्रभा॥ ६७॥

गुह्यविद्या यज्ञविद्या महाविद्या सुशोभिता।
अध्यात्मविद्या विघ्नेशी पद्मस्था परमेष्ठिनी॥ ६८॥

आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिर्न्नयात्मिका।
गौरी वागीश्वरी गोघ्री गायत्री कमलोद्भवा॥ ६९॥

विश्वम्भरा विश्वरूपा विश्वमाता वसुप्रदा।
सिद्धिः स्वाहा स्वधा स्वस्ति सुधा सर्वार्त्थसाधिनी॥ ७०॥

इच्छासृष्टिर्द्युतिर्ब्भूतिः कीर्त्तिः श्रद्धा दया मतिः।
श्रुतिर्मेधा धृतिर्ह्रीश्रीर्विद्या विबुधवन्दिता॥ ७१॥

अनसूया घृणा नीतिर्निर्व्वृतिः कामधुक्करा।
प्रतिज्ञासन्ततिर्ब्भूतिर्द्यौः प्रज्ञाविश्वमानिनी॥ ७२॥

स्मृतिर्वाग्विश्वजननी पश्यन्ती मध्यमा समा।
p. 375) सन्ध्या मेधा प्रभा भीमा सर्वाकारा सरस्वती॥ ७३॥

काङ्क्षा माया महामाया मोहिनी माधवप्रिया।
सौम्या भोगा महाभोगा भ्गिनी भोगदायिका॥ ७४॥

सुधौतकनकप्रख्या सुवर्णकमलासना।
हिरण्यगर्ब्भा सुश्रोणी हारिणी रमणी रमा॥ ७५॥

चन्द्रा हिरण्मयी ज्योत्स्ना रम्या शोभा शुभावहा।
त्रैलोक्यमण्डना नारी नरेश्वरवरार्चिता॥ ७६॥

त्रैलोक्यसुन्दरी रामा महाविभववाहिनी।
पद्मस्था पद्मनिलया पद्ममालाविभूषिता॥ ७७॥

पद्मयुग्मधरा कान्ता दिव्याभरणभूषिता।
विचित्ररत्नमुकुटा विचित्राम्बरभूषणा॥ ७८॥

विचित्रमाल्यगन्धाढ्या विचित्रायुधवाहना।
महानारायणी देवी वैष्णवी वीरवन्दिता॥ ७९॥

कालसङ्कर्षणी घोरा तत्त्वसङ्कर्षणी कला।
जगत्सम्पूरणी विश्वा महाविभवभूषणा॥ ८०॥

वारुणी वरदा व्याख्या घण्टाकर्णविराजिता।
नृसिंही भैरवी ब्राह्मी भास्करी व्योमचारिणी॥ ८१॥

ऐन्द्री कामधेनुः सृष्टिः कामयोनिर्महाप्रभा।

दृष्टाकाम्या विश्वशक्तिर्ब्बीजगत्यात्मदर्शना॥ ८२॥

गरुडारूढहृदया चान्द्री श्रीर्मधुराननाः।
महोग्ररूपा वाराही नारसिंही हतासुरा॥ ८३॥

युगान्तहुतभुग्ज्वाला कराला पिङ्गला कलाः।
त्रैलोक्यभूषणी भीमा श्यामा त्रैलोक्यमोहिनी॥ ८४॥

महोत्कटा महारक्ता महाचण्डा महासनाः।
शङ्खिनी लेखिनी स्वस्था लिखिनी खेचरेश्वरी॥ ८५॥

भद्रकाली चैकवीरा कौमारी भवमालिनीः।
कल्याणी कामधुग्ज्वालामुखी चोत्पलमालिका॥ ८६॥

बालिका धनदा सूर्या हृदयोत्पलमालिकाः।
अजिता वर्षणी रीतिर्ब्भरुण्डा गरुडासना॥ ८७॥

वैश्वानरी महामाया महाकाली विभीषणाः।
महामन्दारविभवा शिवानन्दा रतिप्रिया॥ ८८॥

उद्रीतिः पद्ममाला च धूमवेगा विभावनी।

p. 376) सत्क्रिया देवसेना च हिरण्यरजताश्रया॥ ८९॥

सहसावर्त्तमाना च हस्तिनादप्रबोधिनी।

हिरण्यपद्मवर्णा च हरिभद्रा सुदुर्द्धरा॥ ९०॥

सूर्या हिरण्यप्रकटसदृशी हेममालिनी।

पद्मानना नित्यपुष्टा देवमातामृतोद्भवा॥ ९१॥

महाधना च या शृङ्गी कार्दमी कम्बुकन्धरा।

आदित्यवर्णा चन्द्राभा गन्धद्वारा दुरासदा॥ ९२॥

वरार्च्चिता वरारोहा वरेण्या विष्णुवल्लभा।

कल्याणी वरदा वामा वामेशी विन्ध्यवासिनी॥ ९३॥

योगनिद्रा योगरता देवकी कामरूपिणी।

कंसविद्रावणी दुर्गा कौमारी कौशिकी क्षमा॥ ९४॥

कात्यायनी कालरात्रिर्निशितृप्ता सुदुर्ज्जया।

विरूपाक्षी विशालाक्षी भक्तानाम्परिरक्षिणी॥ ९५॥

बहुरूपा स्वरूपा च विरूपा रूपवर्जिता।
घण्टानिनादबहुला जीमूतध्वनिनिःस्वना॥ ९६॥

महासुरेन्द्रमथनी भ्रुकुटीकुटिलानना।
सत्योपायाचिता चैका कौबेरी ब्रह्मचारिणी॥ ९७॥

आर्या यशोदा सुतदा धर्मकामार्त्थक्षदा।
दारिद्र्यदुःखशमनी घोरदुर्गार्त्तिनाशिनी॥ ९८॥

भक्तार्तिशमनी भव्या भवभर्गापहारिणी।
क्षीराब्धितनया पद्मा कमला धरणी धरा॥ ९९॥

रुक्मिणी रोहिणी सीता सत्यभामा यशस्विनी।
प्रज्ञाधारा मिताबुद्धिर्वेदमाता यशोवती॥ १००॥

समाधिर्भावना मैत्री करुणा भक्तवत्सला।
अन्तर्वेदी दक्षिणा च ब्रह्मचर्यपरागतिः॥ १०१॥

दीक्षा वीक्षा परीक्षा च समीक्षा वीरवत्सला।

अम्बिका सुरभी सिद्धा सिद्धविद्याधरार्चिता॥ १०२॥

सुदीप्ता लेलिहाना च कराली विश्वपूरकी।
विश्वसन्धारणी दीप्तिस्तापनी ताण्डवप्रिया॥ १०३॥

उद्भवा विरजा राज्ञी तापनी बिन्दुमालिनी।
क्षीरधारा सुप्रभावा लोकमाता सुवर्च्चसा॥ १०४॥

हव्यगर्भा चाज्यगर्भा जुह्वतोयज्ञसम्भवा।
आप्यायनी पावनी च दहनी दहनाश्रया॥ १०५॥

p. 377) मातृका माधवी मुच्या मोक्षलक्ष्मीर्महर्द्धिदा।
सर्वकामप्रदा भद्रा सुभद्रा सर्वमङ्गला॥ १०६॥

श्वेता सुशुक्लवसना शुक्लमाल्यानुलेपना।
हंसा हीनकरी हंसी हृद्या हृत्कमलालया॥ १०७॥

सितातपत्रा सुश्रोणी पद्मपत्रायतेक्षणा।
सावित्री सत्यसङ्कल्पा कामदा कामकामिनी॥ १०८॥

दर्शनीया दृशादृश्या स्पृश्यासेव्या वराङ्गना।
भोगप्रिया भोगवती भोगीन्द्रशयनासना॥ १०९॥

आर्द्रा पुष्करिणी पुण्या पावनी पापसूदनी।
श्रीमती च शुभाकारा परमैश्वर्यभूतिदा॥ ११०॥

अचिन्त्यानन्तविभवा भवभावविभावनी।
निश्रेणी सर्वदेहस्था सर्वभूतनमस्कृता॥ १११॥

बलाबलाधिका दैवी गौतमी गोकुलालया।
तोषणी पूर्णचन्द्राभा एकानन्दा शताननना॥ ११२॥

उद्याननगरद्वारहर्म्म्योपवनवासिनी।
कूष्माण्डी दारुणी चण्डा किराती नन्दनालया॥ ११३॥

कालायनी कालगम्या भयदा भयनाशिनी।
सौदामिनी मेघरवा दैत्यदानवमर्द्दिनी॥ ११४॥

जगन्माता भयकरी भूतधर्त्री सुदुर्ल्लभा।
काश्यपी शुभदाना च वनमाला शुभावरा॥ ११५॥

धन्या धन्येश्वरी धन्या रत्नदा वसुवर्द्धिनी।
गन्धर्वी रेवती गङ्गा शकुनी विमलानना॥ ११६॥

इडा शान्तिकरी चैव तामसी कमलालया।
आज्यपा वज्रकौमारी सोमपा कुसुमाश्रया॥ ११७॥

जगत्प्रिया च सरथा दुर्ज्जया खगवाहना।
मनोभवा कामचारा सिद्धचारणसेविता॥ ११८॥

व्योमलक्ष्मीर्महालक्ष्मीस्तेजोलक्ष्मीः सुजाज्वला।
रसलक्ष्मीर्ज्जगद्योनिर्गन्धलक्ष्मीर्वनाश्रया॥ ११९॥

श्रवणी श्रावणी नेत्री रसना प्राणचारिणी।
विरिञ्चिमाता विभवा वरवारिजवाहना॥ १२०॥

वीर्या वीरेश्वरी वन्द्या विशोका वसुवर्द्धिनी।
p. 378) अनाहता कुण्डलिनी नलिनी वनवासिनी॥ १२१॥

गान्धारिणीन्द्रनमिता सुरेन्द्रनमिता सती।

सर्वमङ्गलमाङ्गल्या सर्वकामसमृद्धिदा॥ १२२॥

सर्वानन्दा महानन्दा सत्कीर्त्तिः सिद्धसेविता।
सिनीवाली कुहू राका अमा चानुमतिर्द्युतिः॥ १२३॥

अरुन्धती वसुमती भार्गवी वास्तुदेवता।
मायूरी वज्रवेताली वज्रहस्ता वरानना॥ १२४॥

अनघा धरणी धीरा धमनी मणिभूषणा।
राजश्रीरूपसहिता ब्रह्मश्रीब्रह्मवन्दिता॥ १२५॥

जयश्रीर्जयदा ज्ञेया सर्गश्रीः स्वर्गतिः सताम्।
सुपुष्पा पुष्पनिलया फलश्रीर्निष्कलप्रिया॥ १२६॥

धनुर्लक्ष्मीस्त्वमिलिता परक्रोधनिवारिणी।
कद्रूर्द्धनायुः कपिला सुरसा सुरमोहिनी॥ १२७॥

महाश्वेता महानीला महामूर्त्तिर्विषापहा।
सुप्रभा ज्वालिनी दीप्तिस्तृतिर्व्याप्तिः प्रभाकरी॥ १२८॥

तेजोवती पद्मबोधा मदलेखारुणावती।
रत्ना रत्नावलीभूता शतधामा शतोपहा॥ १२९॥

त्रिगुणा घोषणी रक्षया नर्द्दिनी घोषवर्ज्जिता।
साध्यादितिर्द्दितिर्द्देवी मृगवाहा मृगाङ्कगा॥ १३०॥

चित्रनीलोत्पलगता वृतरत्नाकराश्रया।
हिरण्यरजतद्वन्द्वा शङ्खभद्रासनस्थिता॥ १३१॥

गोमूत्रगोमयक्षीरदधिसर्पिर्जलाश्रया।
मरीचिश्चीरवसना पूर्णचन्द्रार्कविष्टरा॥ १३२॥

सुसूक्ष्मा निर्वृतिस्थूला निर्वृतारातिरेव च।
मारीचिर्ज्वालिनी धूम्रा हव्यवाहा हिरण्यदा॥ १३३॥

दायिनी कालिनी सिद्धिः शोषणीसम्प्रबोधिनी।
भास्वरासंहतिस्तीक्ष्णा प्रचण्डज्वलनोज्ज्वला॥ १३४॥

साङ्गा प्रचण्डा दीप्ता च वैद्युतिः सुमहाद्युतिः।
कपिला नीररक्ता च सुषुम्ना विस्फुलिङ्गिनी॥ १३५॥

अर्च्चिष्मती रिपुहरी दीग्घा धूमावली जरा।
सम्पूर्णमण्डलीपूषा स्रंसिनी सुमनोहरा॥ १३६॥

जया पुष्टिकरी छाया मानसी हृदयोज्ज्वला।
सुवर्णकरणी श्रेष्ठा मृतसञ्जीवनी रणे॥ १३७॥

p. 379) विशल्यकरणी शुभ्रा सन्धिनी परमौषधी।
ब्रह्मिष्ठा ब्रह्मसहिता ऐन्दवी रत्नसम्भवा॥ १३८॥

विद्युत्प्रभा बिन्दुमती त्रिस्वभावगुणाम्बिका।
नित्योदिता नित्यहृष्टा नित्यकामकरीषिणी॥ १३९॥

पद्माङ्का वज्रचिह्ना च वक्रदण्डा विभासिनी।
विदेहपूजिता कन्या माया विजयवाहिनी॥ १४०॥

मानिनी मङ्गला मान्या मानिनी मानदायिनी।
विश्वेश्वरी गणवती मण्डला मण्डलेश्वरी॥ १४१॥

हरिप्रिया भौमसुता मनोज्ञा मतिदायिनी।

प्रत्यङ्गिरा सोमगुप्ता मनोभिज्ञा वदन्मतिः॥ १४२॥

यशोधरी रत्नमाला कृष्णा त्रैलोक्यबन्धनी।
अमृताधारणी हर्षा विनता वल्लकी शची॥ १४३॥

सङ्कल्पा भामिनी मिश्रा कादम्बर्यामृतप्रभा।
आगता निर्गता वज्रा सुहिता सहिताक्षता॥ १४४॥

सर्वार्थसाधनकरी धातुर्द्धारणिकामला।
कारुणाधारसम्भूता कमलाक्षी शशिप्रिया॥ १४५॥

सौम्यरूपा महादीप्ता महाज्वालाविकाशिनी।
माला काञ्चनमाला च सद्वज्रकनकप्रभा॥ १४६॥

प्रक्रिया परमायोक्री क्षोभिका च मुखोदया।
विजृम्भणा च वज्राख्या शृङ्खला कमलेक्षणा॥ १४७॥

जयङ्करी मधुमती हरिता शशिनी शिवा।
मूलप्रकृतिरीशानी योगमाता मनोजवा॥ १४८॥

धर्मोदया भानुमती सर्वाभासा सुखावहा।
धुरन्धरा च बाला च धमसेव्या तथागता॥ १४९॥

सुकुमारा सौम्यमुखी सौम्यसम्बोधनोत्तमा।
सुमुही सर्वतोभद्रा गुह्यशक्तिर्गुहालया॥ १५०॥

हलायुधा च कावीरा सर्वशास्त्रासुधारिणी।
व्योमशक्तिर्महादेहा व्योमगा मगुमन्मयी॥ १५१॥

गङ्गा वितस्ता यमुना चन्द्रभागा सरस्वती।
तिलोत्तमोर्वशी रम्भा स्वामिनी सुरसुन्दरी॥ १५२॥

बाणप्रहरणा बाला बिम्बोष्ठी चारुहासिनी।
ककुद्मिनी चारुपृष्ठी दृष्टादृष्टफलप्रदा॥ १५३॥

p. 180) काम्यचारी च काम्या च कामाचारविहारिणी।
हिमशैलेन्द्रसङ्काशा गजेन्द्रवरवाहना॥ १५४॥

अशेषसुखसौभाग्यसम्पदा योनिरुत्तमा।
सर्वोत्कृष्टा सर्वमयी सर्वा सर्वेश्वरप्रिया॥ १५५॥

सर्वाङ्गयोनिः साव्यक्ता सम्प्रधानेश्वरेश्वरी।
विष्णुवक्षःस्थलगता किमतः परमुच्यते॥ १५६॥

परा निर्महिमा देवी हरिवक्षःस्थलाश्रया।
सा देवी पापहन्त्री च सान्निध्यङ्करुतान्मम॥ १५७॥

इति नाम्नां सहस्रन्तु लक्ष्म्याः प्रोक्तं शुभावहम्।
परावरेण भेदेन मुख्यगौणेन भागतः॥ १५८॥

यश्चैतत्कीर्त्तयेन्नित्यं शृणुयाद्वापि पद्मज।
शुचिः समाहितो भूत्वा भक्तिश्रद्धासमन्वितः॥ १५९॥

श्रीनिवासं समभ्यर्च्च्य पुष्पधूपानुलेपनैः।
भोगैश्च मधुपर्काद्यैर्यथाशक्त्या जगद्गुरुम्॥ १६०॥

तत्पार्श्वस्थां श्रियन्देवीं सम्पूज्य श्रीधरप्रियाम्।
ततो नामसहस्रेण तोषयेत्परमेश्वरीम्॥ १६१॥

नामरत्नावलिस्तोत्रमिदँय्यः सततम्पठेत्।

प्रसादाभिमुख लक्ष्मीः सर्वन्तस्मै प्रयच्छति॥ १६२॥

यस्या लक्ष्म्याश्च सम्भूताश्शक्तयो विश्वगाः सदा।
कारणत्वन्न तिष्ठन्ति जगत्यस्मिंश्चराचरे॥ १६३॥

तस्मात्प्रीता जगन्माता श्रीर्यस्याच्युतवल्लभा।
सुप्रीताश्शक्तयस्तस्य सिद्धिमिष्टान्दिशन्ति हि॥ १६४॥

एक एव जगत्स्वामी शक्तिमानच्युतः प्रभुः।
तदंशशक्तिमन्तोऽन्ये ब्रह्मेशानादयो यथा॥ १६५॥

तथैवैकापरा शक्तिश्श्रीस्तस्य करुणाश्रया।
ज्ञानादिषाड्गुण्यमयी या प्रोक्ता प्रकृतिः परा॥ १६६॥

एकैव शक्तिश्श्रीस्तस्याद्वितीयात्मनिवर्त्तते।
परा परेशा सर्वेशी सर्वाकारा सनातनी॥ १६७॥

अनन्तनामधेया च शक्तिचक्रस्य नायिका।
जगच्चराचरमिदं सर्वं व्याप्य व्यवस्थिता॥ १६८॥

तस्मादेकैव परमा श्रीर्ज्ञेया विश्वरूपिणी।
सौम्यासौम्येन रूपेण संस्थिता नटजीववत्॥ १६९॥

p. 381) यो यो जगति पुम्भावः स विष्णुरिति निश्चयः।
या या तु नारीभावस्था तत्र लक्ष्मीर्व्यवस्थिता॥ १७०॥

प्रकृतेः पुरुषाच्चान्यस्तृतीयो नैव विद्यते।
अथ किं बहुनोक्तेन नरनारीमयो हरिः॥ १७१॥

अनेकमेदभिन्नस्तु क्रियते परमेश्वरः।
महाविभूतिन्दयिताँय्ये स्तुवन्त्यच्युतप्रियाम्॥ १७२॥

ते प्राप्नुवन्ति परमाँल्लक्ष्मीं संशुद्धचेतसः।
पद्मयोनिरिदम्प्राप्य पठन्स्तोत्रमिदं क्रमात्॥ १७३॥

दिव्यमष्टगुणैश्वर्यन्तत्प्रसादाच्च लब्धवान्।
सकामानाञ्च फलदामकामानाञ्च मोक्षदाम्॥ १७४॥

पुस्तकाख्याम्भयत्रात्रीं सितवस्त्रान्त्रिलोचनाम्।
महापद्मनिषण्णान्ताँल्लक्ष्मीमजरतान्नमः॥ १७५॥

करयुगलगृहीतम्पूर्णकुम्भन्दधाना क्वचिदमलगतस्था
शङ्खपद्माक्षपाणिः।
क्वचिदपि दयिताङ्के चामरव्यग्रहस्ता क्वचिदपि सृणिपाशम्बिभ्रती
हेमकान्तिः॥ १७६॥

इत्यादि ब्रह्मपुराणे काश्मीरवर्णने हिरण्यगर्भहृदये
सर्वकामप्रदायिकम्पुरुषोत्तमे न प्रोक्तँल्लक्ष्मीसहस्रनामस्तोत्रं
समाप्तम्॥

इति शाक्तप्रमोदे कमलात्मिकातन्त्रं समाप्तम्

शाक्तप्रमोदः छप्तेर्स् ११-१७ (एन्द्)

श्रीः

शिवहरराजधानीपतिश्रीराजादेवनन्दनसिंह-

बहादुरनराधिपसंगृहीतविरचित-

शाक्तप्रमोदान्तर्गतं

एकादशम्

कूमारिकातन्त्रम्

उक्तराजगुरुवंश्यपण्डितश्रीरघुराजदुबेजीद्वारा
संशोधितम्

तदेतत्

स्त्रीकृष्णदासात्मज-खेमराजेन

स्वकीये श्रीवेंकटेश्वर यन्त्रालये

मुद्रयित्वा प्रकाशितम्

मुम्ब-ई

श्रीगणेशाय नमः

शाक्तप्रमोदः

अथ कुमारीतन्त्रम्

अथ कुमारीपूजानिर्णयः

रुद्रयामलोत्तरखण्डीयषष्ठपटले॥
एकवर्षा भवेत्सन्ध्या द्विवर्षा च सरस्वती॥

त्रिवर्षा च त्रिधा मूर्तिश्चतुर्वर्षा च कालिका।
सुभगा पञ्चवर्षा तु षड्वर्षा च भवेदुमा॥

सप्तभिर्भैल्लिनी साक्षादष्टवर्षा तु कुब्जिका।
नवभिः कालसन्दर्भा दशभिश्चापराजिता॥

एकादशे तु रुद्राणी द्वादशाब्दे तु भैरवी।
त्रयोदशे महालक्ष्मीर्द्विसप्ता पीठनायिका॥

क्षेत्रज्ञा पञ्चदशभिः षोडशे चाम्बिका मता।
एवङ्क्रमेण संगृह्य यावत्पुष्पन्न जायते॥

प्रतिपदादिपूर्णान्तँव्वृद्धिभेदेन पूजयेत्।
एकवर्षेत्यादि सर्वम्बृहन्नीलतन्त्रेऽपि॥

केवलं षड्वर्षा च उमा भवेत्, द्विसप्ता नायिका स्मृता, षोडशे
चर्चिका मतेति पाठभेदो नामभेदश्चेति कुब्जिकातन्त्रे॥

सप्तमपटले तु विशेष उक्तो यथा॥

पञ्चवर्षात्समारभ्य यावद्वादशवार्षिकी।
कुमारी सा भवेद्देवी निजरूपप्रकाशिनी॥

षड्वर्षाच्च समारभ्य यावच्च नववार्षिकी।
तावच्चैव महेशानि साधकाभष्टसिद्धये॥

अष्टवर्षात्समारभ्य यावत्त्रयोदशाब्दिकी।
कुलजान्ताँव्विजानीयात्तत्र पूजां समाचरेत्॥

दशवर्षात्समारभ्य यावत्षोडशवार्षिकी।
युवतीन्ताँव्विजानीयाद्देवतान्ताँव्विचिन्तयेत्॥

अन्नँवस्त्रन्तथा नीरङ्कुमार्यै यो ददाति हि।
अन्नम्मेरुसमन्देवि जलञ्च सागरोपमम्॥

p. 386) वस्त्रैः कोटिसहस्राब्दं शिवलोके महीयते।
पूजोपकरणानीह कुमार्यै यो ददाति हि॥

सन्तुष्टा देवता तस्य पुत्रत्वे सानुकल्प्यते।

विश्वसारे तु॥

अष्टवर्षा तु सा कन्या भवेद्गौरी वरानने।
नववर्षा रोहिणी सा दशवर्षा तु कन्यका॥

अत ऊर्द्धम्महामाया भवेत्सैव रजस्वला।
आरभ्य द्वादशाब्दाच्च यावद्विंशतिसङ्ख्कम्॥

सुकुमारी च सा प्रोक्ता सर्वतन्त्रसमन्विता।
यानपाषाणधातूनान्तेजोरूपेण संस्थिता॥

जीवजंतुषु देवेशि किंव्वक्तव्यमतः परम्।
यत्र नास्ति महामाया तत्र किञ्चिन्न विद्यते॥

इत्युक्तम्॥

तत्पूजाफलँय्योगिनीतन्त्रे पूर्वखण्डे सप्तदशपटले॥
कुमारीपूजनफलँव्वक्तुन्नार्हामि सुन्दरि॥

जिह्वाकोटिसहस्रैस्तु वक्त्रकोटिशतैरपि।
तस्मात्ताम्पूजयेद्बालां सर्वजातिसमुद्भवाम्॥

जातिभेदो न कर्त्तव्यः कुमारीपूजने शिवे।
जातिभेदान्महेशानि नरकान्न निवर्त्तते॥

विचिकित्सापरो मन्त्री ध्रुवं स पातकी भवेत्।
देवीबुद्ध्या महाभक्तस्तस्मात्ताम्परिपूजयेत्॥

सर्वविद्यास्वरूपा हि कुमारी नात्र संशयः।
यदि भाग्यवशाद्देवि वेश्याकुलसमुद्भवाम्॥

कुमारींल्लभते कान्ते सर्वस्वेनापि साधकः।
यत्नतः पूजयेत्तान्तु स्वर्णरौप्यादिभिर्म्मुदा॥

तदा तस्य महासिद्धिर्ज्जायते नात्र संशयः।
कुमारीपूजास्थानफलमपि तत्रैव॥

कुमारी पूज्यते यत्र स देशः क्षितिपावनः।
महापुण्यतमो भूयात्समन्तात्क्रोशपञ्चकम्॥

यामले तत्रैव॥

महापर्वसु सर्वेषु विशेषाच्च पवित्रके।
महानवम्यान्देवेशि कुमारीञ्च प्रपूजयेत्॥

तस्मात्षोडशपर्यन्तँय्युवतीति प्रचक्षते।
तत्र भावप्रकाशस्स्यात्स भावः परमो युतः॥

रक्षितव्याः प्रयत्नेन अक्षतास्ताः प्रकारयेत्।
महापूजादिकङ्कृत्वा वस्त्रालङ्कारभोजनैः॥

पूजयेन्मन्दभाग्योऽपि लभते जयमङ्गलम्।
p. 387) अन्येषाङ्कथने नाथ प्रयोजनमहाफलम्॥

विधिना पूजयेद्यस्तु दिव्यवीरपशुस्थितः।
भावत्रये महासौख्यन्दिव्यकर्मणि सत्फलम्॥

तथा॥

अनेककुलसम्पन्नान्नानाजातिसमुद्भवाम्।
अशेषकुलसम्पन्नान्नानाजातिसमुद्भवाम्॥

नानादेशोद्भवाँव्वापि सगुणाङ्गुणसँयुताम्।
द्वितीयवत्सरादूर्द्धँय्यावत्स्यादष्टमाब्दकम्॥

तावज्जात्वा पूजयित्वा कन्यां सुन्दरमोहिनीम्।
दिव्यभावस्थितस्साक्षात्तन्त्रमन्त्रफलं लभेत्॥

कुमारी पूजनादेव कुमारीभोजनादिभिः।
एकद्वित्र्यादिबीजानाम्फलदा नात्र संशयः॥

ताभ्यः पुष्पम्फलन्दत्त्वा अनुलेपादिकन्तथा।
बालप्रियञ्च नैवेद्यन्दत्त्वा तद्भावभावितः॥

मृदा तदङ्गमात्मानम्बालभावविचेष्टितम्।
अतिप्रियकथालापक्रीडाकौतूहलान्वितः॥

यथार्थं तत्प्रियन्तत्र कृत्वा सिद्धीश्वरो भवेत्।
कन्या सर्वसमृद्धिस्स्यात्कन्या सर्वपरन्तपः॥

होमम्मन्त्रार्चनन्नित्यक्रियाकौलिकसत्क्रियाम्।
नानाफलमहाधर्मङ्कुमारीपूजनँव्विना॥

तत्तत्कर्मफलन्नाथ प्राप्नोति साधकोत्तमः।
फलङ्कोटिगुणँव्वीरः कुमारीपूजया लभेत्॥

कुसुमाञ्जलिपूर्णाञ्च कन्यायै कुलपण्डितः।
ददाति यदि तत्पुष्पङ्कोटिमेरुहिरण्यवत्॥

तद्दानजम्महापुण्यङ्क्षणादेव समालभेत्।
कुमारी भोजिता येन त्रैलोक्यन्तेन भोजितम्॥

कालीतन्त्रे एकादशपटले॥ ॥

कुमारीपूजनङ्कुर्यात्सर्वकर्मफलाप्तये।
रुद्रयामले उत्तरखण्डे सप्तमपटले॥

अथ पूजाम्प्रवक्ष्यामि कुमार्या अतिदुर्ल्लभाम्।
इत्यभिधाय पूजास्थानं महापीठन्देवालयमथापि वा।

नटीकन्यां हीनकन्यान्तथा कापालिकन्यकाम्।
रजकस्यापि कन्याञ्च तथा नापितकन्यकाम्।

गोपालकन्यकाञ्चैव ब्राह्मणस्यापि कन्यकाम्।
शूद्रकन्याँव्वैद्यकन्यान्तथा वैश्यस्य कन्यकाम्॥

चाण्डालकन्यकाँव्वापि यत्र कुत्राश्रमे स्थिताम्।

p. 388) सुहृद्वर्गस्य कन्याञ्च समानीय प्रयत्नतः॥

पूजयेत्परमानन्दैरात्मध्यानपरायणः।

मम पूजाँय्यः करोति प्रत्यहं शुद्धभक्तितः॥

तस्य वश्यङ्कुमारीणाम्पूजनम्भोजनं रवेः।

तेजोरूपँव्विधोश्चाग्नेः सर्वाभावे प्रकाशते॥

तत्पूजनात्तदालापाद्भोजनादपि तच्छुभात्।

ममप्रीतिर्भ्भवेत्साक्षाद्देवतागुप्तसंस्थिता॥

बालभैरवदेवस्य कामिनीवदकस्य च।

मत्पुत्रस्य सर्वलोकपूजितस्य महौजसः॥

पूजाभिर्विविधैर्द्रव्यैः कुमारी देवपूजिता।

कुमारी देवता प्रोक्ता सर्वतो जगदीश्वरी॥

पूजार्थं सर्वलोकस्य समानीय सुरेश्वरीम्।

पूजयन्तीम्महादेवीङ्गुप्तभावनिवासिनीम्॥

सदा भोजनवाञ्छाढ्या मान्या सन्तुष्टहासिनी।
वृथा न रौति सा देवी कुमारी देवनायिका॥

सरस्वतीस्वरूपा सा पूज्यते सर्वनायकैः।
शिवभक्तैर्विष्णुभक्तैस्तथान्यदेवपूजितैः॥

सर्वलोकैः पूजिता सा चावश्यम्पूज्यते बुधैः।
पूजया लभते पुत्रान्पूजया लभते श्रियम्॥

पूजया धनमाप्नोति पूजया लभते महीम्।
पूजया लभते लक्ष्मीं सरस्वतीम्महौजसम्॥

महाविद्याः प्रसीदन्ति सर्वे देवा न संशयः।
कालभैरवब्रह्मेन्द्र-ब्राह्मणा ब्रह्मवेदिनः॥

रुद्रश्च देववर्गाश्च वैष्णवा ब्रह्मरूपिणः।
अवताराश्च द्विभुजा वैष्णवा मनुशोभिताः॥

अन्ये दिक्पालदेवाश्च चराचरगुरुस्तथा।
नानाविद्याश्रिताः सर्वे दानवाः कूटशालिनः॥

उपसर्गास्थिता ये ये ते ते तुष्टा न संशयः।
यद्यहं शुद्धरूपा हि अन्यलोके च का कथा॥

कुमारीपूजनङ्कृत्वा त्रैलोक्यँव्वशमानयेत्।
महाकान्तिर्भवेत्क्षिप्रं सर्वपुण्यफलप्रदम्॥

वृहन्नीलतन्त्रे

महाभयातिदुर्भिक्षाद्युत्पातानि कुलेश्वरी।
दुःस्वप्नभयमृत्युञ्च ये चान्ये च समुद्भवाः॥

कुमारीपूजनादेव न ते च प्रभवन्ति हि।
नित्यङ्क्रमेण देवेशि पूजयेद्विधिपूर्वकम्॥

p. 389) घ्नन्ति विघ्नान्पूजिताश्च भयं शत्रून्महोत्कटान्।
ग्रहा रोगाः क्षयँय्यान्ति भूतवेतालपन्नगाः॥

रुद्रयामले यथा

तत्तन्मन्त्रे समुल्लेख्यात्क्षणात्पुण्यायुतँल्लभेत्।
मन्त्रेण पुटितङ्कृत्वा जप्त्वा सिद्धीश्वरो भवेत्॥

यद्यत्प्रकारमुद्दिश्य वदामि सुरसुन्दरि।
तत्तत्कार्यमवश्यञ्च भिन्नबुद्धिन्न कारयेत्।

तथा॥

शृणु नाथ कुलार्त्थम्मे कुमारीपूजने मनुम्।
महाविद्या महामन्त्रं सिद्धिमन्त्रन्न संशयः॥

एतन्मन्त्रप्रभावेण जीवन्मुक्तो भवेत्सुधीः।
अतिदेविपदँय्याति सत्यमानन्दभैरव॥

ऐहिके सुखसम्पत्तिर्मधुमत्याः प्रसादतः।
अवश्यम्प्राप्नुयान्मर्त्त्यो विश्रामङ्कुरु शङ्कर॥

वाग्भवेन वपुः क्षोभम्मायाबीजे गुणाष्टकम्।

श्रियोबीजे श्रियोलाभो मायाबीजे रिपुक्षयः॥

भैरवेण तु बीजेन खेचरत्वं सुरादिभिः।
कुमारिका ह्यहन्नाथ सदा त्वं हि कुमारकः॥

शतमष्टोत्तराँव्वापि एकाँव्वा परिपूजयेत्।
पूजिताः परिपूज्यन्ते ह्यवघ्नन्त्यवमानिताः॥

कुमारी योगिनी साक्षात्कुमारी परदेवता।
असुरा दुष्टनागाश्च ये ये दुष्टग्रहा अपि॥

भूतवेतालगन्धर्वा डाकिनीयक्षराक्षसाः।
याश्चान्या देवतास्सर्वा भूर्भुवस्स्वश्च भैरवाः॥

पृथिव्यादीनि सर्वाणि ब्रह्माण्डे सचराचरम्।
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः॥

सन्तुष्टाः सर्वतुष्टाश्च यस्तु कन्याम्प्रपूजयेत्।
विधियुक्ताङ्कुमारीन्तु भोजयेच्चैव भैरव॥

पाद्यार्घ्यञ्च तथा धूपङ्कुङ्कुमञ्चन्दनं शुभम्।
भक्तिभावेन सम्पूज्य कुमारीभ्यो निवेदयेत्॥

कुमारीपूजाक्रमः

आनीय सुन्दरीन्नारीङ्कुमारींव्वरनायिकाम्।
रत्नालङ्कारसँयुक्तां शङ्खवस्त्रादिशोभिताम्॥

वाग्भवेन जलन्नाथ तन्नाम्ना परिदापयेत्।
देवीबुद्ध्या सदा ध्यात्वा पूजयेत्साधकोत्तमः॥

p. 390) मायाबीजेन तन्नाम्ना पाद्यन्दद्यात्तथा प्रभो।
लक्ष्मीबीजेन चार्घ्यन्तु कूर्च्चजेन च चन्दनम्॥

मायाबीजेन पुष्पाणि कुमार्यै दापयेत्सुधीः।
सदाशिवेन मन्त्रेण धूपदीपौ महत्तमौ॥

दत्त्वा षडङ्गमन्त्रेण पूजयेद्देवनायक।
तत्प्रकारम्महादेव शृणुष्वानन्दरूपधृक्॥

महातेजोमयं शुभ्रं हृदयं हस्तदक्षिणैः।
विभाव्य प्रपठेद्भक्त्या तन्मन्त्रं शृणु शङ्कर॥

आदौ वाग्भवमुच्चार्य मायाँल्लक्ष्मीञ्च कूर्चकम्।
प्रेतबीजन्ततो ब्रूयात्सविसर्गेन्दुकीलकम्॥

कुलशब्दं समुच्चार्य कुमारिके ततो वदेत्।
हृदयाय नमः प्रोच्य ततः शिरसि भावयेत्॥

शुक्लवर्णं सर्वमयम्बीजमुच्चार्य सन्न्यसेत्।
हकारँव्वाग्भवाद्यञ्च वकारँव्वाग्भवात्मकम्॥

मायाँल्लक्ष्मींव्वाग्भवञ्च द्विठान्तं शिरसे पदम्।
वह्निजायावधिर्मन्त्रो न्यसेच्छिरसि साधकः॥

शिखामध्ये कृष्णवर्णन्नीलाञ्जनचयप्रभम्।
विभाव्य सन्न्यसेन्मन्त्री कुमारी कुलसिद्धये॥

आदौ प्रणवमुद्धृत्य तदंते विष्णुसुन्दरीम्।

शिखायै पदमुद्धृत्य वषट्कारन्ततो वदेत्॥

ततः कवचमध्ये च बलवन्तं सुतेजसम्।
प्रथमारुणसङ्काशन्ध्यात्वा चारु कलेवरम्॥

वाग्भवञ्च समुच्चार्य कुलशब्दन्ततो वदेत्।
वागीश्वरि पदम्पश्चात्कवचाय ततो वदेत्॥

तारकम्ब्रह्मशब्दञ्च कवचन्यासजालकम्।
ततो नेत्रत्रये ध्यात्वा महाबीजम्महाप्रभम्॥

रक्तवर्णङ्कोटिकोटिजवामण्डलमण्डितम्।
विराजितङ्कोटिपुण्यार्ज्जिते तेजसि भास्करे॥

वाग्भवं हि समुच्चार्य कुलेश्वरि पदन्ततः।
नेत्रत्रयाय शब्दान्ते वौषड्लोचनमन्त्रकम्॥

ततस्साधकमन्त्री च वामहस्ततले तथा।
मध्यमातर्ज्जनीभ्याञ्च तालद्वयमुपाचरेत्॥

तन्मन्त्रङ्कोटिसूर्योग्रज्योत्स्नाजालसमप्रभम्।
महाकाशोद्भवं शब्दमहोग्रपरिपीडनम्॥

मायाबीजन्तथास्त्रायपदमुद्धृत्य यत्नतः।
फडन्ते चान्तमुद्धृत्य महामन्त्रम्प्रकीर्तितम्॥

p. 391) ततस्तस्याः कुण्डबिले ध्यात्वा च परिवारकाम्।
पूजयेद्यत्नतो मन्त्री तेजसामृतधारया॥

तर्पयेत्पूजयेद्भक्त्या भैरवम्बालभैरवम्।
देवताभिः पूजयित्वा परिवारान्क्रमेण तु॥

ततो वाग्भवमुच्चार्य सिद्धजयाय शब्दतः।
पूर्वम्पदं समुच्चार्य वक्रायनम ईरितम्॥

ततो वाग्भवमुच्चार्य जयाय शब्दमुद्धरेत्।
उत्तरे वक्रमुद्धृत्य चतुर्थ्यन्तन्नमः पदम्॥

ततो वाग्भवमायाश्रीबीजमुच्चार्य यत्नतः।
कुब्जिके पश्चिमान्ते च वक्राय नम ईरिताम्॥

ततो वाग्भवमुच्चार्य कालिके पदमुच्चरेत्।
दक्षवक्राय शब्दान्ते नमो मन्त्रम्प्रकीर्तितम्॥

एतन्मन्त्राक्षरान्नाथ समुच्चार्य कुलेश्वर।
पूजयित्वा क्रमेणैव भास्करम्परिपूजयेत्॥

चण्डन्दिक्पालदेवञ्च सन्ध्यादीन्परिपूजयेत्।
वीरभद्राम्महाकन्याङ्कौलिनीङ्कुलगामिनीम्॥

अष्टादशभुजाङ्कालीञ्चण्डदुर्गाम्प्रपूजयेत्।
नैवेद्यादीन्समानीय नानाभक्त्यानुराजितम्॥

दुग्धङ्घनावृतङ्क्षीरम्पक्वान्नम्पक्वसम्फलम्।
यद्यत्कालोपयोग्यञ्च सर्वदा मधुमिश्रितम्॥

पञ्चतत्त्वङ्कुलद्रव्यन्निजकल्याणवर्द्धनम्।
नानाद्रव्यञ्च नैवेद्यं स्वस्वल्पोक्तसाधितम्॥

कुमारीभ्यो निवेद्यैवन्नानासौरभशोभितम्।

शीतलञ्जलमानीय दद्यात्ताभ्यो महासुधीः॥

ततो हितम्महामन्त्रङ्कुमार्याश्चातिदुर्ल्लभम्।
अथ वाग्मी समूलञ्च जप्त्वा सिद्धीश्वरो भवेत्॥

समर्प्य प्राणवायूनान्धारणङ्कारयेत्स्वयम्।
अष्टाङ्गादिप्रमाणञ्च कुर्वन्स्तोत्रम्पठेन्नमेत्॥

प्रणाममन्त्रोऽपि तत्रैव॥

नमामि कुलकामिनीम्परमभाग्यसन्दायिनीङ्कुमाररतिचातुरीं
सकलसिद्धिमानन्दिनीम्।
प्रवालगुटिकास्रजरजतरागवस्त्रान्वितां
हिरण्यतुलभूषणाम्भुवनवाक्कुमारीम्भजे॥

इति मन्त्रेण सन्नम्य तारिणीम्परिपूजयेत्।
शिवाङ्गणेशं सम्पूज्य प्रणमेत्साधकोत्तमः॥

दक्षिणाँव्विधिवद्दत्त्वा कुमारीभ्यः क्रमेण तु।
विवाहयेत्स्वयङ्कन्याम्ब्रह्महत्या विनश्यति॥

p. 392) यो यश्च पुण्यकाले तु कन्यादानं समापयेत्।
भूमिमुक्तिफलन्तस्य सौभाग्यं सर्वसम्पदः॥

रुद्रलोके वसेन्नित्यन्त्रिनेत्रो भगवान्हरः।
तीर्थकोटिसहस्राणि अश्वमेधशतानि च।
तत्फलँल्लभते मर्त्यो यस्तु कन्याँव्विवाहयेत्।
वालूका सागरे ज्ञेयास्तावदब्दसहस्रकम्॥

एकैकङ्कुलमुद्धृत्य रुद्रलोके महीयते।
तत्तदिष्टदेवतायाः प्रीतये तुष्टये सुधीः॥

कन्यादानं समाहृत्य मुक्तिमाप्नोति भैरव।
तत्तद्वितीयकन्यायास्तत्तद्बुध्या च साधकः॥

विभाव्य शिवरूपत्वं सम्प्रदानीय कन्यके।
पूर्णरूपं शिवन्ध्यात्वा वरं सर्वाङ्गसुन्दरम्॥

तेजोमयँय्यशः कान्तङ्कालभैरवरूपिणम्।
बटुकेशम्महादेवँव्वरयेत्साधकाग्रणीः॥

बालरूपाञ्च त्रैलोक्यसुन्दरीँव्वरवर्णिनीम्।
नानालङ्कारनम्राङ्गीम्भद्रविद्याप्रकाशिनीम्॥

चारुहास्याम्महानन्दहृदयां शुभदाम् शुभाम्।
ध्यात्वा द्वादशपत्राब्जे पूर्णचन्द्रनिभाननाम्॥

सम्प्रदानं समानीय तत्तन्मन्त्रेण दापयेत्॥

अथ कुमारीमन्त्रपुरश्चरणम्

अष्टमपटले

अथ वक्ष्ये महादेव्याः कुमार्या जपहोमकः॥

लक्षसङ्ख्यञ्जपङ्कृत्वा मायाँव्वा वाग्भवम्मनुम्॥

कालीबीजँव्वापि नाथ अथवा कामबीजकम्॥

सदाशिवेन पुटितम्बिन्दुचन्द्रविभूषितम्॥

अथवा प्रणवेनापि पुटितन्त्रिदशेश्वर॥

तद्दशांशेन जुहुयाद्घृताक्तैर्बिल्वपत्रकैः॥

अथवा श्वेतपुष्पैश्च कुन्दपुष्पैर्म्महाफलम्॥

एवं क्रमेण जुहुयात्करवीरप्रसूनकैः॥

घृताक्तैः केवलैर्वापि चन्दनागरुमिश्रितैः॥

हविष्याशी दिवाभागे रात्रौ पूजापरो भवेत्॥

निजपूजामशेषैस्तु कुलद्रव्यैः प्रपूजयेत्॥

रविसंख्यञ्जपेत्तत्र परमानन्दरूपधृक्॥

जपान्ते जुहुयान्मन्त्री मदुक्तद्रव्यसँयुतैः॥

ततः प्राणात्मकँव्वायुं शोधयित्वा पुनः पुनः॥

p. 393) प्राणायामत्रयङ्कृत्वा चाष्टाङ्गैः प्रणमेन्मुदा।

प्रणामसमये नाथ इदं स्तोत्रम्पठेद्यदि॥

कवचञ्च तथा पाठ्यङ्कुमारीणामथापि वा॥

निजदेव्या महास्तोत्रम्पीठाङ्गङ्कवचन्ततः॥

कुमारीणामहन्देव सहस्रन्नाम साष्टकम्॥

पठित्वा सिद्धिमाप्नोति नात्र कार्या विचारणा॥

तदशक्तौ निजदेव्यास्सहस्रं नाम मङ्गलम्॥

अष्टोत्तरम्पठेन्नाथ सिद्ध्याकाङ्क्षी न संशयः॥

तासां स्तोत्रन्दिव्यन्नाथ शृणु सर्वत्र मङ्गलम्॥

अकस्मात्सिद्धिमाप्नोति पठित्वा साधकोत्तमः ॥

अग्रे संस्थाप्य तास्सर्वा रत्नकोटिसुशीतलाः ॥

ततः स्तोत्रम्पठेद्धीमान्समाहितमना वशी ॥

महादिव्याचाररतो वीरभावोल्बणोऽपि वा ॥

एवं क्रमेण प्रपठेद्भक्तिभावपरायणः ॥

महाविद्यामहासेवाभक्तिश्रद्धाप्लुतार्पितः ॥

महाज्ञानी भवेत्क्षिप्रँव्वाञ्छासिद्धिमवाप्नुयात् ॥

अथ कुमारीपूजाप्रयोगः

तत्र एकवर्षावधिषोडशवर्षपर्यन्तमजातपुष्पा कुमारीसञ्ज्ञा

तत्र वर्षक्रमेण नामानि यथा ॥

सन्ध्या सरस्वती त्रिधामूर्त्तिः कालिका सुभगा उमा॥

मालिनी कुब्जिका कालसन्दर्भा अपराजिता॥

रुद्राणी भैरवी महालक्ष्मीः पीठनायिका क्षेत्रज्ञा अम्बिका
प्रतिपदादिपञ्चदश्यन्तँव्वृद्धिक्रमेण पूजनीयाः॥

कुमारी तु सर्वजातीयैव पूज्या॥

प्रशस्ता नटीकन्या कापालिकाकन्या रजककन्या नापितकन्या
गोपालककन्या ब्राह्मणकन्या शूद्रकन्या वैद्यकन्या वणिक्कन्या
चाण्डालकन्या सुहृद्वर्गकन्याः॥

कुमारीमासने समुपवेश्य ध्यायेद्यथा॥

बालरूपाञ्च त्रैलोक्यसुन्दरीँव्वरवर्णिनीम्॥

नानालंकारनम्राङ्गीम्भद्रविद्याप्रकाशिनीम्॥

चारुहास्याम्महानन्दहृदयां शुभदां शुभाम्॥

एवन्ध्यात्वात्मशिरसि पुष्पन्दत्वा मानसोपचारेण सम्पूज्य
पुनर्ध्यात्वा कुमार्यङ्गे दत्वा इदमासनम् ऐंह्रींहूँसौः
सन्ध्यायै कुमार्यै नमः॥

p. 394) एवम्पूर्वबीजान्युच्चार्य सरस्वत्यै कुमार्यै नम इत्यादि
वत्सरानुक्रमेण चतुर्थ्यन्तेन नाम्ना आसनादिभिः
षोडशभिरुपचारैः सम्पूजयेत्॥

एतज्जलम् ऐंसन्ध्यायै नमः, एतत्पाद्यम् ह्रींसन्ध्यायैनमः,
एतदाभरणं श्रींसरस्वत्यै एष गन्धः हूँअन्ध्यायै नमः, एतानि
पुष्पाणि ह्सौस्सन्ध्यायै नमः, एष धूपः ऐं सन्ध्यायै नमः, एष
दीपः ह्रीं सन्ध्यायै एतन्नैवेद्यम् ऐं ह्रींश्रींहूँसौः
सन्ध्यायै निवेदयामि खड्गमाल्यकज्जलकुङ्कुमादिकमनेन
नमोन्तेन मन्त्रेण देयम्॥

सर्वत्र चतुर्थ्यन्तङ्कुमार्यै इति विशेषणन्दातव्यम्॥

ततः षडङ्गपूजा॥

तत्र क्रमस्तु कुमार्या हृदयन्दक्षिणहस्तेन धृत्वा महातेजोमयं
शुक्लवर्णं व्विभाव्य ऐंह्रींहूँसौः कुलकुमारिके हृदयाय
नमः शिरः शुक्लवर्णं सर्वमयँव्विभाव्य
हैंह्रींश्रींऐंशिरसे स्वाहा शिखान्नीलाञ्जनप्रभाँव्विभाव्य
ॐ श्रीं शिखायै वषट् कवचम्प्रथमारुणसङ्काशं सुतेजस्कँ
व्विभाव्य ऐंकुलवागीश्वरि कवचायहूम् ततो नेत्रत्रयं
सर्वबीजमयम्महाप्रभं रक्तवर्णङ्कोटिजवापुष्पोज्ज्वलँव्विभाव्य
ऐंकुलेश्वरी नेत्रत्रयाय वौषट् ह्रीं-अस्त्रायफडिति वामहस्ततले
तर्ज्जनीमध्यमाभ्यान्तालद्वयन्दद्यात्॥

ततस्तस्याः कुण्डबिले सपरिवारम्बालभैरवन्ध्यात्वा एते गन्धपुष्पे
सपरिवारबालभैरवाय नम इति पूजयेत् एते गन्धपुष्पे
ऐंसिद्धजयाय पूर्ववक्त्राय नमः, एवञ्जयायोत्तरवक्त्राय०,
ऐंह्रींश्रींकुब्जिके पश्चिमवक्त्राय०, ऐंकालिके दक्षिणवक्त्राय०
ॐभास्कराय प्रत्येकन्दिक्पालेभ्यः बीरभद्रायै० महाकन्यायै०
कौलिन्यै० कुलगामिन्यै० अष्टादशभुजायै० काल्यै० चण्डदुर्गायै०
ओङ्कारादिनमोऽन्तेन पूजयेत्॥

ततः कुमारीमूलमन्त्रं स्वीयमन्त्रँव्वा यथाशक्ति जप्त्वा
प्राणायामङ्कृत्वा जपं समर्प्य स्तवकवचादिकम्पठित्वा

अष्टाङ्गम्पञ्चाङ्गँव्वा प्रणम्य दक्षिणान्दद्यात्॥

p. 395) इति कुमारीपूजाप्रयोगः॥

अथ कुमारीतर्पणम्

शृणु नाथ प्रवक्ष्यामि कुमारीतर्पणादिकम्।
यासान्तर्पणमात्रेण कुलसिद्धिर्ब्भवेद्ध्रुवम्॥ १॥

कुलबालाम्मूलपद्मस्थिताङ्कामविहारिणीम्।
शतधा मूलमन्त्रेण तर्पयामि तव प्रिये॥ २॥

मूलपङ्कजयोगाङ्गीँकुमारीँश्रीसरस्वतीम्।
तर्पयामि कुलद्रव्यैस्तव सन्तोषहेतुना॥ ३॥

चारुमूलाधारपद्मे षड्दलान्तः प्रकाशिनीम्।
श्रीबीजेन तर्पयामि भोगमोक्षाय केवलम्॥ ४॥

स्वाधिष्ठानकलोल्लासविष्णुसङ्केतगामिनीम्।

कालिकान्निजबीजेन तर्पयामि कुलामृतैः॥ ५॥

स्वाधिष्ठानाख्यपद्मस्थाम्महातेजोमयीं शिवाम्।
सूर्याणां शीर्षमधुना तर्पयामि कुलेश्वरीम्॥ ६॥

मणिपूराब्जमध्येषु मनोहरकलेवराम्।
उमां देवीन्तर्पयामि मायाबीजेन पार्वतीम्॥ ७॥

मणिपूराम्भोजमध्ये त्रैलोक्यपरपूजिताम्।
मानिनीम्मलचित्तस्य सद्बुद्धिस्तर्पयाम्यहम्॥ ८॥

मणिपूर स्थितां रौद्रीम्परमानन्दवर्द्धिनीम्।
आकाशगामिनीन्देवीङ्कुब्जिकान्तर्पयाम्यहम्॥ ९॥

तर्पयामि महादेवीम्मन्त्रसाधनतत्पराम्।
योगिनीङ्कालसन्दर्भान्तर्पयामि कुलाननाम्॥ १०॥

शक्तिमन्त्रप्रदां रौद्रीं ल्लोलजिह्वासमाकुलाम्।
अपराजिताम्महादेवीन्तर्पयामि कुलेश्वरीम्॥ ११॥

महाकौलप्रियां सिद्धां रुद्रलोकसुखप्रदाम्।
रुद्राणीं रुद्रकिरणान्तर्पयामि मधुप्रियाम्॥ १२॥

षोडशस्वरसंसिद्धिम्महारौरवनाशिनीम्।
महामद्यपानचित्ताम्भैरवीन्तर्पयाम्यहम्॥ १३॥

त्रैलोक्यवरदान्देवीं श्रीबीजमालयावृताम्।
महालक्ष्मीम्भवैश्वर्यान्तर्पयाम्यहमम्बिके॥ १४॥

लोकानां हितकर्त्रीञ्च हिताहितजनप्रियाम्।
तर्पयामि रमाबीजपीठाद्याम्पीठनायिकाम्॥ १५॥

जयन्तीं व्वेदवेदाङ्गमातरं सूर्यमातरम्।
p. 396) तर्पयामि सुधाभिश्च क्षेत्रज्ञाम्माययावृताम्॥ १६॥

तर्पयामि कुलानन्दपारगाम्परमाननाम्।
तर्पयाम्यम्बिकान्देवीम्मायालक्ष्मीं हृदि स्थिताम्॥ १७॥

सर्वासाञ्चरणद्वयाम्बुजतलञ्चैतन्यविद्यावतां सौख्यार्त्थं
शुभषोडशस्मरयुतां श्रीषोडशीम्मङ्गलाम्॥

आनन्दार्णवपद्मरागखचिते सिंहासने शोभिते
त्वान्नित्यम्परितर्पयामि सकलं श्वेताब्जमध्यासने॥ १८॥

ये नित्यं सुप्रतिष्ठितञ्च सकलस्तोत्राङ्गसन्तर्पणँव्विद्यादान-
निदानमोक्षपरमम्मायामयँय्यान्ति ते।
नो सन्ति क्षितिमण्डलेष्वरिगणास्सर्वे विपत्कारका राजानँव्वशयन्ति
योगसकलन्नित्या भवन्ति क्षणात्॥ १९॥

तर्पणात्मकमोक्षाख्यम्पठते यदि मानुषः।
अष्टैश्वर्ययुतो भूत्वा वत्सरान्माम्प्रपश्यति॥ २०॥

महायोगी भवेन्नाथ मासाद्भ्यासतः प्रभो।
त्रैलोक्यङ्क्षोभयेत्क्षिप्रँव्वाञ्छाफलमवाप्नुयात्॥ २१॥

यः पठेदेकभावेन स तर्पणफलँल्लभेत्।
पूजाफलमवाप्नोति कुमारीस्तोत्रपाठतः॥ २२॥

यो न कुर्यात्कुमार्यर्च्चाः स्तोत्रञ्च नित्यमङ्गलम्।
स भवेत्पासवः कल्पो मृत्युस्तस्य पदे पदे॥ २३॥

इति रुद्रयामले उत्तरखण्डे महातन्त्रोद्दीपणे कुमार्युपचर्योपविन्यासे
सिद्धमन्त्रप्रकरणे दिव्यभावनिर्णयभैरवीसँवादे
कुमारीतर्पणात्मकस्तोत्रं समाप्तम्॥

अथ कुमारीस्तोत्रम्

भैरव उवाच

देवेन्द्रोदय-इन्दुकोटिकिरणाँव्वाराणसीवासिनीं व्विद्याँ
व्वाग्भवकामिनीन्त्रिनयनां सूक्ष्मक्रियागामिनीम्।
चण्डोद्वेगनिकृन्तनीन्त्रिजगतान्धात्रीङ्कुमारीँ
व्वराम्मूलाम्भोरुहवासिनीं शशिमुखीं सम्पूजयन्ति श्रिये॥ १॥

भाव्यान्देवगणैः शिवेन्द्रयतिभिर्मोक्षार्थिभिर्बालिकां
संध्यान्नित्यगुणोदयान्द्विजगणश्रेष्ठोदयांशारुहाम्।
शुक्लाभाम्परमेश्वरीं शुभकरीम्भद्राँ
व्विशालाननाङ्गायत्रीङ्गणमातरन्दिनपतिङ्कृष्णाञ्च
वृद्धाम्भजे॥ २॥

p. 397) बालाम्बालकपूजिताङ्घ्रियुताँ

व्विद्यावताम्मोक्षदान्धात्रीं शुक्लसरस्वतीन्नवराँ

व्वाग्वादिनीञ्चण्डिकाम्।

स्वाधिष्ठानहरप्रियाम्प्रियकरीं

व्वेदान्तविद्याप्रदान्नित्यम्मोक्षहिताय योगवपुषा

चैतन्यरूपाम्भजे॥ ३॥

नानारत्नसमूहनिर्मितगृहे पूज्यां सुरैर्ब्बालिकाँव्वन्दे

नन्दनकानने मनसि सिद्धान्तैकबीजानने।

अर्त्थं देहि निरर्त्थकाय वपुषे हित्वा कुमारीङ्कलां

मह्यम्मातृकुमारिके च त्रिविधामूर्त्त्या च तेजोमयी॥ ४॥

हालाहालकरालिकाङ्कुलपथोल्लासैः

कराब्जोद्वहान्नासामोदकरालिनीं हि भजताङ्कामातिरिक्तप्रदाम्।

बालोहम्बटुकेश्वरस्य चरणाम्भोजाश्रितोऽहं सदा हित्वा

बालकुमारिके शिरसि शुक्लाम्भोरुहे सम्भजे॥ ५॥

सूर्याह्लादबलाकिनीङ्कलिमहापापार्द्दितापापहान्तेजोगाम्भुवि

सूर्यगाम्भयहरान्तेजोमयीङ्कालिकाम्।

वन्दे हृत्कमले सदा रविदले बालेन्द्रविद्यां सतीं

साक्षात्सिद्धिकरीङ्कुमारि विमले त्वामाद्यरूपेश्वरीम्॥ ६॥

नित्यं
श्रीकुलकामिनीङ्कुलवतीङ्कौलामुनामम्बिकान्नानायोगविलासिनीं
सुरमणीन्नित्यान्तपस्यान्विताम्।
वेदान्तार्थविशेषदेशवसनाभाषाविशेषस्थिताँव्वन्दे
पर्वतराजराजतनयाङ्कालप्रिये त्वामहम्॥ ७॥

कौमारीङ्कुलमालिनीं रिपुगणक्षोभाग्निसन्दायिनीं
रक्ताभानयनां शुभाम्परममार्गाम्मुक्तिसञ्ज्ञाप्रदाम्।
भार्याम्भोगवतीम्पतिन्त्रिभुवनेष्वामोदपञ्चाननाम्पञ्चास्यप्रिय
कामिनीम्भयहरां सर्पादिहाराम्भजे॥ ८॥

चन्द्रास्याञ्चरणद्वयाभुजमहाशोभाविनोदीन्नदीम्मोहादिक्षयका
रिणीँव्वरकरां श्रीकुब्जिकां सुन्दरीम्।
ये नित्यम्परिपूजयन्ति सहसा राजेन्द्रचूडामणिं
सम्पत्तिन्धनमायुषन्त्रिजगताँव्याप्येश्वरत्वञ्जगुः॥ ९॥

योगीशम्भुवनेश्वरम्प्रियकरं श्रीकालसन्दर्भया
शोभासागरगामिनं सुरतरुँव्वाञ्छाफलोद्दीपनम्।

p. 398) लोकानामघनाशनाय शिवया श्रीसञ्ज्ञया विद्यया
धर्मप्राणसदैवतम्प्रणमताङ्कल्पद्रुमम्भावये॥ १०॥

विद्यान्तामपराजितां मदनगामामोदमत्ताननां
हृत्पद्मस्थितपादुकाङ्कुलकलाङ्कात्यायनीम्भैरवीम्।
ये ये पुण्यधियो भजन्ति परमानन्दाब्धिमध्ये मुदा
सर्वाच्छादिततेजसाभयकरीम्मोक्षाय सत्कीर्त्तये॥ ११॥

रुद्राणीम्प्रणमामि
पद्मवदनाङ्कोट्यर्कतेजोमयीन्नानालङ्कृतभूषणाङ्कुलभुजामा
नन्दसन्दायिनीम्।
श्रीमायाकमलान्वितां हृदिगतां सन्तानबीजक्रियाँव्वन्दे
वाग्भवरूपिणीङ्कुलवधूं हूंकारबीजोद्भवाम्॥ १२॥

नमामि
वरभैरवीङ्गितितलाघकालाननाम्मृणालकुसुमारुणाम्भुवनदोष
संशोधिनीम्।
जगद्भयहराम्परान्त्वरति या च योगेश्वरीं ममापदसहस्त्रकं
सकलभोगदान्तामहम्॥ १३॥

साम्राज्यम्प्रददाति या भगवती विद्या महालक्षणा
साक्षादष्टसमृद्धिदा भुवि महालक्ष्मीः कुलक्षोभहा।
स्वाधिष्ठानसुपङ्कजे विवसिताँव्विष्णोरनन्तश्रिये वन्दे
राजपदप्रदां शुभकरीङ्कीलेश्वरीं सर्वदा॥ १४॥

पीठानामधिपाधिपामसुरहाँव्विद्यां शुभान्नायिकां
सर्वालङ्करणान्विताञ्त्रिजगताङ्क्षोभापहाँव्वारुणीम्।
वन्दे पीठगनायिकाञ्त्रिभुवनच्छायाभिराच्छादितां सर्वेषां
हितकारिणीञ्जयवतामानन्दरूपेश्वरीम्॥ १५॥

क्षेत्रज्ञाम्मदविह्वलाङ्कुलवतीं सिद्धप्रियाम्प्रेयसीं
शम्भोश्श्रीबटुकेश्वरस्य महतामानन्दसञ्चारिणीम्।
साक्षादात्मपरोद्गमान्निजमनः क्षोभापहां शाकिनीँ
व्वाक्यार्त्थप्रकटामहं रजतभाँवन्दे महाभैरवीम्॥ १६॥

सुपूर्णविधुवन्मुखीङ्कमलमध्यसम्भाविनीं शिरोदशशते
दलेऽमृतमहाब्धिधाराधराम्।
प्रणामफलदायिनीं सकलराज्यवश्याङ्गुणान्नमामि
परमाम्बिकाँव्विषयपाशसंहारिणीम्॥ १७॥

साक्षादहन्त्रिभुवनेऽमृतपूर्णदेहां सन्ध्यादिदेवि कललाः

कुलपण्डितेन्द्राम्।

तन्नो भजे सुरवरे वरकालिके त्त्वां सिद्धानले प्रतिदिनम्प्रणमामि

भक्त्या॥ १८॥

p. 399) भक्तिन्धनञ्जयपदँय्यदि देहि

दास्यन्तस्मिन्महामधुमतीलधुगेहभार्याम्॥ १९॥

एतत्स्तोत्रप्रसादेन कवितावाक्पतिर्भवेत्।

महासिद्धीश्वरो दिव्यो वीरभावपरायणः॥ २०॥

सर्वत्र जयमाप्नोति स हि स्याद्धरवल्लभः।

वाचामीशो भवेत्क्षिप्रङ्कामरूपी भवेन्नरः॥ २१॥

पशुरेव महावीरो दिव्यो भवति निश्चितम्।

क्रमशोऽप्यष्टसिद्धिः स्याद्वाग्मी भवति निश्चितम्॥ २२॥

सर्वविद्याः प्रसीदन्ति तुष्टास्सर्वदिगीश्वराः।

वह्निः शीतलताँय्याति जलस्तम्भं सकारयेत्॥ २३॥

धनवान्पुत्रवान्राजा इह लोके भवेन्नरः।
परिचरति वैकुण्ठे कैलासे शिवसन्निधौ॥ २४॥

मुक्त एव महादेव यो नित्यं सर्वादा पठेत्।
महाविद्यापदाम्भोजं स हि पश्यति निश्चितम्॥ २५॥

इति कुमारीस्तोत्रं समाप्तम्॥

अथ कुमारीकवचम्

अथातस्सम्प्रवक्ष्यामि कुमारीकवचं शुभम्।
त्रैलोक्यमङ्गलन्नाम महापातकनाशनम्॥ १॥

पठनाद्धारणाल्लोका महासिद्धाः प्रभाकराः।
शक्रो देवाधिपः श्रीमान्देवगुरुर्बृहस्पतिः॥ २॥

सम्यक्तेजोमयो वह्निर्द्धर्मराजो भयानकः।
वरुणो देवपूज्यो हि जलानामधिपस्स्वयम्॥ ३॥

सर्वहर्त्ता महावायुः कुमारः कुञ्जरेश्वरः।
धनाधिपः प्रियश्शंभोस्सर्वे देवा दिगीश्वराः॥ ४॥

त्वमेकः प्रभुरेकात्मा सर्वेशो निर्मलोदयः।
एतत्कवचपाठेन सर्वे भूपा धनाधिपाः॥ ५॥

प्रणवो मे शिरः पातु माया सन्ध्यात्मिका सती।
ललाटोर्ध्वं महामाया पातु मे श्रीसरस्वती॥ ६॥

कामाख्या बटुकेशानी त्रिमूर्तिर्भालमेव तु।
चामुण्डा बीजरूपा च वदनं कालिका मम॥ ७॥

पातु मां सूर्यगा नित्यन्तथा नेत्रद्वयम्मम।
कर्णयुग्मङ्कामबीजस्वरूपोमा तपस्विनी॥ ८॥

p. 400) रसनाग्रन्तथा पातु वाग्देवी मालिनी मम।
तामवस्था कामरूपा दन्ताग्रङ्कुञ्जिका मम॥ ९॥

देवी प्रणवरूपा सा पातु नित्यं शिरो मम।
ओष्ठाधरं शक्तिबीजात्मिका स्वाहास्वरूपिणी॥ १०॥

गलदेशम्महारौद्री पातु मे चापराजिता।
क्षौंबीजम्मे सदा कण्ठं रुद्राणी स्वाहयान्विता॥ ११॥

हृदयं षोडशी विद्या पातु षोडशसुस्वरा।
द्वौ बाहू पातु सर्वत्र महालक्ष्मीः प्रधानिका॥ १२॥

सर्वमन्त्रस्वरूपा मे चोदरम्पीठनायिका।
पार्श्वयुग्मन्तथा पातु हृद्देवी वाग्भवात्मिका॥ १३॥

कैशोरी कटिदेशम्मे मायाबीजस्वरूपिणी।
जङ्घायुग्मञ्जयन्ती मे योगिनी कुल्लुकावृता॥ १४॥

सर्वाङ्गमम्बिका देवी पातु मन्त्रार्थगामिनी।
केशाग्रङ्कमला देवी नासाग्रं नरमोहिनी॥ १५॥

चिबुकञ्चण्डिका देवी कुमारी पातु मे सदा।
हृदयँल्ललिता देवी पृष्ठम्पर्वतवासिनी॥ १६॥

त्रिशक्तिः षोडशी देवी लिङ्गञ्जुह्यं सदावतु।

श्मशाने चाम्बिका देवी गङ्गागर्भे च भैरवी॥ १७॥

शून्यागारे पञ्चमुद्रा मन्त्रयन्त्रप्रकाशिनी।
चतुष्पथे सदा पातु मामेव वज्रधारिणी॥ १८॥

शवासनगता चण्डा मुण्डमालाविभूषिता।
पातु मामेव लिङ्गे च ईश्वरी शक्तिरूपिणी॥ १९॥

वने पातु महाबाला महारण्ये रणप्रिया।
महाजले तडागे च शत्रुमध्ये सरस्वती॥ २०॥

महाकाशपथे पृथ्वी पातु मां शीतला सदा।
रणमध्ये राजलक्ष्मीः कुमारी कुलकामिनी॥ २१॥

अर्द्धनारीश्वरी पातु मम पादतलम्मही।
नवलक्षमहाविद्या कुमारीरूपधारिणी॥ २२॥

कोटिसूर्यप्रतीकाशा चन्द्रकोटिसुशीला।
पातु माँव्वरदा वाणी बटुकेश्वरकामिनी॥ २३॥

इति ते कथितन्नाथ कवचम्परमाद्भुतम्।
कुमार्याः कुलदायिन्याः पञ्चतत्त्वार्थपारगम्॥ २४॥

p. 401) यो जपेत्पञ्चतत्त्वेन स्तोत्रेण कवचेन च।
आकाशगामिनी सिद्धिर्भवेत्तस्य न संशयः॥ २५॥

वज्रदेही भवेत्क्षिप्रङ्कवचस्य प्रसादतः।
सर्वसिद्धीश्वरो योगी ज्ञानी भवति यः पठेत्॥ २६॥

विवादे व्यवहारे च सङ्ग्रामे कुलमण्डले।
महापथे श्मशाने च योगसिद्ध्युद्भवेन च॥ २७॥

पठित्वा फलमाप्नोति सत्यं सत्यङ्कुलेश्वर।
वशीकरणकवचं सर्वत्र जयदं शुभम्॥ २८॥

पुण्यव्रती पठेन्नित्यँय्यतिश्श्रीमान्भवेद्ध्रुवम्।
सिद्धविद्या कुमारी च ददाति सिद्धिमुत्तमाम्॥ २९॥

पठेद्यः श्रृणुयाद्वापि स भवेत्कल्पपादपः।
भुक्तिं मुक्तिं तुष्टिं पुष्टिं राजलक्ष्मीं सुसम्पदम्॥ ३०॥

प्राप्नोति साधकश्रेष्ठो धारयित्वा भवेज्जयी।
असाध्यं साधयेद्विद्वान्पठित्वा कवचं शुभम्॥ ३१॥

कुलीनानाम्महासौख्यन्धर्मार्त्थकाममोक्षदम्।
योगिनान्दिवसे नित्यङ्कुमारीम्पूजयेन्निशि॥ ३२॥

उपचारविशेषेण त्रैलोक्यँव्वशमानयेत्।
पललेनाशने वापि मत्स्येन मुद्रया सह॥ ३३॥

नानाभक्ष्येण भोज्येन गन्धद्रव्येण साधकः।
माल्येन स्वर्णरजतालङ्कारेण सुचैलकैः॥ ३४॥

पूजयित्वा जपित्वा च तर्पयित्वा वराननाम्।
यज्ञदानतपस्याभिः प्रयोगेण महेश्वर॥ ३५॥

स्तुत्वा कुमारीकवचं यः पठेदेकभावतः।
तस्य सिद्धिर्भवेत्क्षिप्रं राजराजेश्वरो भवेत्॥ ३६॥

वाञ्छाफलमवाप्नोति यद्यन्मनसि वर्त्तते।

भूर्ज्जपत्रे लिखित्वा यः कवचन्धारयेद्यदि॥ ३७॥

शनिमङ्गलवारे च नवम्यामष्टमीदिने।
चतुर्द्दश्याम्पौर्णमास्याङ्कृष्णपक्षे विशेषतः॥ ३८॥

लिखित्वा धारयेद्विद्वानुत्तराभिमुखो भवेत्।
महापातकयुक्तोपि मुक्तस्स्यात्सर्वपातकैः॥ ३९॥

योषिद्वामभुजे धृत्वा सर्वकल्याणमालभेत्।
बहुपुत्रान्विता कान्ता सर्वसम्पत्तिसँयुता॥ ४०॥

तथा श्रीपुरुषश्रेष्ठो दक्षिणे धारयेद्भुजे।
p. 402) ऐहिके दिव्यदेहः स्यात्पञ्चाननसमप्रभः॥ ४१॥

शिवलोके परे याति वायुवेगी निरामयः।
सूर्यमण्डलमाभेद्य परम्मोक्षमवाप्नुयात्॥ ४२॥

लोकानामतिसौख्यदम्भयहरं
श्रीपादभक्तिप्रदम्मोक्षार्त्थङ्कवचं
शुभम्प्रपठतामानन्दसिन्धूद्भवम्।

पन्थानङ्कलिकालघोरकलूषध्वंसैकहेतुञ्च यँय्ये लोकाः
प्रपठन्ति धर्ममतुलम्मोक्षँव्रजन्ति क्षणात्॥ ४३॥

इति रुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने कुमार्युपचर्याविन्यासे
कुमारीकवचोल्लासे सिद्धमन्त्रप्रकरणे भावनिर्णयकुमारीकवचं
समाप्तम्॥

अथान्यत्स्तोत्रम्

जगत्पूज्ये जगद्वन्द्ये सर्वशक्तिस्वरूपिणी।
पूजाङ्गृहाण कौमारि जगन्मातर्न्नमोऽस्तु ते॥ १॥

त्रिपुरात्रिपुराधारात्रिवर्ष्मां ज्ञानरूपिणीम्।
त्रैलोक्यवन्दितान्देवीत्रिमूर्त्तिम्पूजयाम्यहम्॥ २॥

कालात्मिकाङ्कलातीताङ्कारुण्यहृदयां शिवाम्।
कल्याणजननीन्देवीङ्कल्याणीम्पूजयाम्यहम्॥ ३॥

अणिमादिगुणाधारामकाराद्यक्षरात्मिकाम्।

अनन्तशक्तिकाँल्लक्ष्मीं रोहिणीम्पूजयाम्यहम्॥ ४॥

कामचारीं शुभाङ्कान्ताङ्कालचक्रस्वरूपिणीम्।
कामदां करुणोदाराङ्कालिकाम्पूजयाम्यहम्॥ ५॥

चण्डवीराञ्चण्डमायाञ्चण्डमुण्डप्रभञ्जनीम्।
पूजयामि सदा देवीञ्चण्डिकाञ्चण्डविक्रमाम्॥ ६॥

सदानन्दकरीं शान्तां सर्वदेवनमस्कृताम्।
सर्वभूतात्मिकाँल्लक्ष्मीं शाम्भवीम्पूजयाम्यहम्॥ ७॥

दुर्गमे दुस्तरे कार्ये भवदुःखनिवासिनीम्।
पूजयामि सदा भक्त्या दुर्गादुर्गार्त्तिनाशिनीम्॥ ८॥

सुन्दरीं सर्ववर्णाभां सुखसौभाग्यदायिनीम्।
सुभद्राजननीन्देवीं सुभद्राम्पूजयाम्यहम्॥ ९॥

इति कुमारीस्तोत्रम्

इति शक्तप्रमोदे कुमारीतन्त्रं समाप्तम्

श्रीः

शिवहरराजधानीपतिश्रीराजादेवनन्दनसिंह-

बहादुरनराधिपसंगृहीतविरचित-

शाक्तप्रमोदान्तर्गतं

द्वादशं तन्त्रम्

बलिदानक्रमः

उक्तराजगुरुवंश्यपण्डितश्रीरघुराजदुबेजीद्वारा

संशोधितम्

तदेतत्

श्रीकृष्णदासात्मज-खेमराजेन

स्वकीये श्रीवेंकटेश्वर यन्त्रालये

मुद्रयित्वा प्रकाशितम्

मुम्ब-ई

श्रीगणेशाय नमः

अथ शाक्तप्रमोदः

अथ बलिदानक्रमः

स्वयमुत्तराभिमुखः पूर्वाभिमुखम्बलिम् अव्यग्रावयवं सुन्दरं
हृष्टपुष्टम्माल्यङ्कण्ठे वेष्टयित्वा स्नातं समानीय कृताञ्जलिः
पठेत्॥

ॐ वाराही यमुना गङ्गा करतोया सरस्वती।

कावेरी चन्द्रभागा च सिन्धुभैरवसागराः॥

पशुस्नानविधानाय सान्निध्यमिह कल्पय।

इति तीर्त्थान्यावाह्य॥

ॐ अग्निः पशुरासीत्तेनायजन्त स एतँलोकमजयद्यस्मिन्नग्निः स ते लोको
भविष्यति तञ्जेष्यसि पिबैता अपः॥

ॐ वायुः पशुरासीत्तेनायजन्त स एतँल्लोकमजयद्यस्मिन्वायुः स ते लोको
भविष्यति तञ्जेष्यसि पिबैता अपः।

ॐ सूर्यः पशुरासीत्तेनायजन्त स एतँल्लोकमजयद्यस्मिन्सूर्यः स ते लोको
भविष्यति तञ्जेष्यसि पिबैता अपः॥

ॐ वाचन्ते शुन्धामि प्राणन्ते शुन्धामि।

चक्षुस्ते शुन्धामि श्रोत्रन्ते शुन्धामि मेढ्रन्ते शुन्धामि पायुन्ते
शुन्धामि॥

चारित्रांस्ते शुन्धामि।
मनस्त आप्यायताम्।

वाक् त आप्यायताम्॥

प्राणस्त आप्यायताम्॥

चक्षुस्त आप्यायताम्॥

श्रोत्रन्त आप्यायताम्।
यत्ते क्रूरँय्यदस्ति तन्तत्त आप्यायताम्।

निष्ठ्यायताम्।
तत्ते शुद्ध्या तु शोमहोभ्यः स्वाहा।
इति मन्त्रैः स्नापयित्वा ॐ मेधाकारस्तम्भमध्ये पशुबन्धाय
सश्रृङ्गाद्यवयवम्पशुम्बन्धय बन्धय
ब्रह्माण्डखण्डरूपस्तम्भे पशुम्बन्धय बन्धय ह्वः

फट्वाहा ॐ ह्राँरीरूँऊाँचण्डिकायै इमम्पशुम्प्रोक्षामि स्वाहा

इति प्रोक्षणम्॥

ततस्सश्शृङ्गाद्यवयवम्पशुम्मोक्षङ्कुरु कुरु स्वाहेति मोक्षं कृत्वा

क्षमस्वेति

p. 406) ललाटे सिन्दूरन्दत्त्वा ॐ छागपशवे नम इति पाद्यादिकन्दत्त्वा

एतदधिपतये ॐ अग्नये नमः एतत् सम्प्रदानीयायै ह्रीं अमुकदेवतायै

नमः इति पुष्पन्दत्त्वा पशोरङ्गदेवताः पूजयेत्॥

यथा शिरसि ॐ रुधिरवदनायै नमः, ललाटे ॐ शार्ङ्गिण्यै नमः।

भ्रूमध्ये ॐ भङ्गायै नमः, चक्षुषोः ॐ त्रिनेत्रायै नमः,

कर्णयोः ॐ पार्वत्यैनमः, घ्राणे ॐ गौर्यैनमः, चिबुके ॐ

चण्डिकायै नमः, दन्तपङ्क्तौ ॐ उग्रचण्डिकायै नमः, जिह्वायाम् ॐ

चण्डघण्टायै नमः, मुखे ॐ विरूपाक्षायैनमः, ग्रीवायाम् ॐ

चण्डायै नमः, पृष्ठे ॐ महाभैरव्यै नमः, उदरे ॐ

वैष्णव्यैनमः, चतुष्पदे ॐ चण्डप्रियायैनमः, पार्श्वयोः ॐ

सर्वैश्वर्यैनमः, कटिदेशे ॐ विरूपाक्षायै नमः खुराग्रे ॐ

कौशिक्यैनमः, लाङ्गूले ॐ प्रहर्षिण्यै नमः, सर्वाङ्गे ॐ

पश्वधिष्ठातृदेवताभ्यो नमः इति सम्पूज्य उत्सृजेत्॥

विष्णुः ॐ तत्सदद्याश्विने मासि शुक्ले पक्षेऽमुकतिथौ
वार्षिकशरत्कालीनामुकदेवतामहोत्सवे अमुकगोत्रस्यामुकस्य
अमुकदेवताप्रीतिकामनया अमुकदेव्यै इमम्पशुँ
वह्निदैवतन्तुभ्यमहङ्घातयिष्यामि इत्युत्सृज्य कृताञ्जलिः पठेत्॥

ॐ छाग त्वम्बलिरूपेण मम भाग्यादुपस्थितः॥

प्रणमामि ततस्सर्वं रूपिणम्बलिरूपिणम्॥

यज्ञार्थं पशवस्सृष्टास्स्वयमेव स्वयम्भुवा॥

अतस्त्वाङ्घातयिष्यामि तस्माद्यज्ञे वधोऽवधः॥

पशुयोनिप्रसूतोऽसि पूजाहोमादिकर्मसु॥

तुष्टा भवतु सा देवी स रक्तपिशितैस्तव॥

चंडिकाप्रीतिदानेन दातुरापद्विनाशनः॥

चामुण्डाबलिरूपाय बले तुभ्यन्नमोऽस्तु ते॥

ततः॥

पशुपाशाय विद्महे शिरश्छेदाय धीमहि॥

तन्नः पशुः प्रचोदयात्॥

इति कर्णे जपेत्॥

ततः खड्गमानीय ह्रीं इति बीजाक्षरँल्लिखित्वा ध्यायेत्॥

कृष्णम्पिनाकपाणिञ्च कालरात्रिस्वरूपिणिम्॥

उग्ररक्तास्यनयनं रक्तमाल्यानुलेपनम्॥

रक्ताम्बरधरञ्चैव पाशहस्तङ्कुटुम्बिनम्॥

p. 407) पिबमानञ्च रुधिरम्भुञ्जानङ्कव्यसंहतिम्॥

एवङ्खड्गन्ध्यात्वा गृहीत्वा॥

ॐ रसना त्वञ्चण्डिकायाः सुरलोकप्रसाधकः॥

इत्यभिमन्त्र्य॥

ऐंह्रींखड्गायनम इति पाद्यादिभिः सम्पूज्य पुनर्म्मुष्टौ ॐ
महादेवाय नमः, धारे ॐयमायनमः, अग्रे ॐब्रह्मणेनमः॥

ॐ असिर्विशनसः खड्गस्तीक्ष्णधारो दुरासदः॥

श्रीगर्ब्भो विजयश्चैव धर्मपाल नमोऽस्तु ते॥

इत्यष्टौ तव नामानि स्वयमुक्तानि वेधसा॥

नक्षत्रङ्कीर्त्तिका तुभ्यङ्गुरुर्देवो महेश्वरः॥

हिरण्यञ्च शरीरन्ते धाता देवो जनार्दनः॥

पिता पितामहो देवस्त्वम्माम्पालय सर्वदा॥

नीलजीमूतसङ्काशस्तीक्ष्णदंष्ट्रः कृशोदरः॥

भावशुद्धोमर्षणश्च अतितेजास्तथैव च॥

ॐ तीक्ष्णदंष्ट्रायनम इति पुष्पन्दत्त्वा॥

ॐ ह्रींफट् इति खड्गमादाय ॐ कालि कालि वज्रेश्वरी लोहदण्डायै
नमः इति जपित्वा छागस्य ग्रीवायाम्॥

खड्ग त्वं शीघ्रञ्छिन्धि छिन्धि फट् फट् स्वाहा इति
पूर्वाभिमुखम्बलिं स्वयमुत्तराभिमुख उत्तराभिमुखम्बलिं
स्वयम्पूर्वाभिमुखो वा, सकृत्प्रहारेण छिन्द्यात्॥

ततो मृन्मयादिपात्रे रुधिरमादाय चतुर्भागङ्कृत्वा ऐशान्याम्
ॐविदारिकायैनमः, आग्नेय्याम् ॐपूतनायैनमः, नैर्ऋत्याम् ॐ
पापराक्षस्यैनमः, वायव्याम् ॐकौशिक्यैनमः, ॐतत्सदद्यामुके
मास्यमुकपक्षेऽमुकतिथौ वार्षिकशरत्कालीनामुकदेवतामहोत्सवे
ऽमुकगोत्रस्यामुकस्य

दशवर्षावच्छिन्नयामुकदेवताप्रीतिकामनयाऽमुकदेव्यै
छागपशुरुधिरन्दास्यामि इतिसङ्कल्प्य, ॐ कालि कालि महाकालिके
पापनाशिनी॥ शोणितञ्च बलिङ्गृह्ण वरदे वामलोचने॥

एष रुधिरबलिः॥

ॐ दक्षयज्ञेति मन्त्रेण दद्यात्॥

तत ऐंह्रींश्रींकौशिकि रुधिरेणाप्यायतामिति वदेत्॥

ततः शिरसि ज्वलद्दीपशिखान्दत्त्वा ॐ तत्सदद्यामुके
मास्यमुकपक्षेऽमुकतिथौ वार्षिकशरत्कालीनामुकमहोत्सवे

p. 408) अमुकगोत्रस्यामुकस्य
श्रीमदमुकदेवतादर्शनाभिवन्दनस्पर्शनाभिपूजनस्नपनतर्पणज्
अनितपूर्वपूर्वाधिकपुण्यप्राप्तिकामोऽमुकदेव्यै
सप्रदीपच्छागपशुशीर्षन्दास्यामि इति सङ्कल्प्य॥ एष
सप्रदीपच्छागपशुशीर्ष्षबलिः ह्रींदुर्गादेव्यैनम इत्युत्सृज्य॥
ॐ जय त्वं सर्वभूतेशो सर्वभूतसमावृते॥ रक्ष मान्निजभूतेभ्यो
बलिम्भुङ्क्ष्व नमोऽस्तु ते॥ ततः खड्गरुधिरमादाय॥ ॐ यं यं

स्पृशामि पादेन यं यं पश्यामि चक्षुषा॥ स स मे वश्यताँय्यातु
यदि शक्रसमो भवेत्॥ इति ललाटे तिलकङ्कुर्यात्॥ मेषाघाते तु
मेषेत्यूहेन योज्यम्॥ मेषरुधिरदाने तु
एकवर्षावच्छिन्नामुकदेवताप्रीतिकामः प्रभूतबलिदाने तु द्वौ वा
त्रीन् वा अग्रतः कृत्वा सम्प्रोक्ष्य तत्तत्पशुभ्यो नम इति सम्पूज्य छाग
त्वमित्येकवचनानूहेन प्रयोगः॥ पश्चन्तरेऽप्येवम्॥ वाक्ये तु एतान्
पशून् तुभ्यमहङ्घातयिष्ये॥ रुधिरदाने तु एतान् रुधिरबलीन्
दास्यामि इति सङ्कल्प्य प्रत्येकेन दद्यात्॥ शीर्षदानमप्येवम्॥ ततो
मूलमन्त्रँय्यथाशक्ति जप्त्वा॥ समर्प्य प्रणमेदिति
नन्दिकेश्वरपुराणोक्तपद्धतिः॥

अथ तान्त्रिकबलिदानविधिः

तत्र सुलक्षणम्पशुन्देव्यग्रे संस्थाप्य वक्ष्यमाणविधिना
उत्सृजेत्॥ तदुक्तँय्यामले॥ देव्यग्रे स्थापित्वा तु पशुँल्लक्षणसँउतम्॥
श्वेतसर्षपविक्षेपाद्भूतानुत्सारयेत्ततः॥ अग्घ्यौदकेन सम्प्रोक्ष्य
अस्त्रेण संरक्ष्य कवचेनावगुण्ठ्य धेनुमुद्रयामृतीकृत्य
गन्धपुष्पाक्षतैः पशुं सम्पूज्य मूलेन सप्तधा तत्त्वमुद्रया
प्रोक्षणङ्कृत्वा कर्णे इमम्मन्त्रम्पठेत्॥ पशुपाशाय विद्महे

विश्वकर्मणे धीमहि॥ तन्नो जीवः प्रचोदयात्॥ ततो ह्रीं कालि कालि
वज्रेश्वरि लोहदण्डायै नम इति मन्त्रेण खड्गम्पूजयेत्॥ ततः
खड्गस्याग्रमध्यमूलङ्क्रमेण पूजयेत्॥

p. 409) यथा ह्रूँआगीश्वरीब्रह्मभ्यान्नमः॥
ह्रूँअक्ष्मीनारायणाभ्यां नमः॥

ह्रूँउमामहेश्वराभ्यान्नमः॥

ततो ब्रह्मविष्णुशिवशक्तियुक्ताय खड्गाय नम इति सर्वत्र पूजयित्वा
प्रणमेत्॥

खड्गाय खरशाणाय शक्तिकार्यार्त्थतत्परः॥

पशुच्छेद्यस्त्वया शीघ्रङ्खड्गनाथ नमोऽस्तु ते॥

ततो महावाक्यममुकदेवताप्रीतिकामोऽमुकदेव्यै
इमम्पशुन्तुभ्यमहं सम्प्रददे॥ ततो निवेदयेत्॥

यथोक्तेन विधानेन तुभ्यमस्तु समर्पितम्॥

ततो बलिञ्छिन्द्यात्॥

ततो रुधिरं समांसन्देव्यै दद्यात्॥

ततोऽवशिष्टम्बटुकादिभ्यो बलिन्दद्यात्॥ यथा॥

हूँयाँअटुकायनम इति गन्धादिभिस्सम्पूज्य पूर्ववन्मन्त्रेण
वायव्ये बलिन्दद्यात्॥ हूँआँओगिनीभ्योनम इति सम्पूज्य
पूर्ववन्मन्त्रेण ईशाने बलिन्दद्यात्॥

हूँषाँषेत्रपालायनम इति सम्पूज्य पूर्ववन्मन्त्रेण
नैर्ऋत्याम्बलिन्दद्यात्॥

हूँआँअणपतयेनम इति सम्पूज्य पूर्ववन्मन्त्रेण
आग्नेय्याङ्गणेशाय बलिन्दद्यात्॥ इति तन्त्रसारः॥

अथ होमपद्धतिः

तत्रादौ कुण्डस्थण्डिलादिरीतिः॥ मत्स्यपुराणे॥

प्रागुदक्प्रवणाम्भूमिङ्कारयेद्यत्नतो नरः॥

प्रागुदक्प्रवणाम्पूर्वनीचामुत्तरनीचाँव्वा तत्र वसिष्ठपञ्चरात्रे
विज्ञानललितायाञ्च॥

सर्वाधिकारीकङ्कुण्डञ्चतुरस्त्रन्तु सर्वदम्॥

चतुरस्त्रञ्चतुष्कोणम्॥

भविष्योत्तरे॥ सहस्त्रे त्वथ होतव्ये कुर्यात्कुण्डङ्करात्मकम्॥

द्विहस्तमयुते तच्च लक्षहोमे चौष्करम्॥

द्विहस्तादिके यामलः॥

पूर्वपूर्वस्य कुण्डस्य कोणसूत्रेण निर्म्मितम्॥

उत्तरोत्तरकुण्डानाम्मानन्तत्परिकीर्त्तितम्॥

पूर्वपूर्वस्य कुण्डस्य हतद्विहस्तादिमितस्य कोणसूत्रेण
ईशानान्निर्ऋतिकोणदत्तसूत्रेण परिमितँ
य्यन्मानमुत्तरोत्तरकुण्डानान्तदेव पारिभाषिकन्द्विहस्तादिमानन्न
तु प्रकृतहस्तद्वैगुण्यादि मितम्॥

p. 410) तथात्वे द्विहस्तादिमितस्य चतुर्हस्तपरिमाणापत्तेः॥

कृषिकस्य भूमेः परिमाणवत्॥ वसिष्ठपञ्चरात्रे॥

यावान्कुण्डस्य विस्तारः खननन्तावदिष्यते॥

हस्तैके मेखलास्तिस्रो वेदाग्निनयनाङ्गुलाः॥

कुण्डे द्विहस्ते ता ज्ञेया रसवेदगुणाङ्गुलाः॥

चतुर्हस्ते तु कुण्डे ता वसुतर्क्कयुगाङ्गुलाः॥

ब्रह्मचारिमेखलावत्॥

कुण्डवेष्टिता मृद्घटिताः॥

ताश्च खातदेशाद्बाह्ये एकाङ्गुलरूपङ्कण्ठम्परित्यज्य उच्छ्रयेण
विस्तारेण चेत्यादि क्रमेण वेदाद्यङ्गुलाः॥

एतद्विपरीतास्तन्त्रान्तरोक्ता व्यवहारविरुद्धाः॥

वेदाश्चत्वारः, अग्नयस्त्रयः, नयने द्वे, रसाः षट्, गुणास्त्रयः,
वसुतर्कयुगानि अष्टषड्त्वारि पिङ्गलामते।

खातादेकाङ्गुलन्त्यक्त्वा मेखलानाँव्विधिर्ब्भवेत्॥ एककुण्डस्य
पश्चिमदिक्कर्त्तव्यतामाह महादाननिर्णये वसिष्ठपञ्चरात्रे॥
भुक्तौ मुक्तौ तथा पुष्टौ जीर्णोद्धारे तथैव च॥ सदा होमे सदा
शान्तावेकँव्वारुणदिग्गतम्॥ शारदातिलके॥ होतुरग्रे यो
निरासामुपर्यश्वत्थपत्रवत्॥

मुष्टयरत्न्येकहस्तानाङ्कुण्डानाँय्योनिरीरिता॥

षड्वतुर्ब्यङ्गुलायामविस्तारोन्नतिशालिनी॥

एकाङ्गुलन्तु योन्यग्रङ्कुर्यादीषदधोमुखम्॥

एकैकाङ्गुलतो योनिङ्कुण्डेष्वन्येषु वर्द्धयेत्॥

यावद्वयक्रमेणैव योन्यग्रमपि वर्द्धयेत्॥

स्थलादारभ्य नालं स्याद्योन्या मध्ये सरन्ध्रकम्॥

आसाम्मेखलानाम् अश्वत्थपत्रवदित्यनेन

चतुरङ्गुलविस्तृतमूलाद्यथोक्तक्रमेण

एकाङ्गुलान्तस्सङ्कुचितविस्ताराः॥

होमनिमित्ताग्निस्थापनार्त्थस्थण्डिलविधिर्यथा॥

वसिष्ठसंहितायाम् -तस्मात्सम्यक् परीक्ष्यैवङ्कर्त्तव्या शुभवेदिका

॥

हस्तमात्रं स्थण्डिलँव्वा सङ्क्षिप्ते होमकर्मणि।

क्रियासारेऽपि॥

कुण्डमेवँइधन्न्यस्यात्स्थण्डिलँव्वा समाश्रयेत्॥

शारदातिलकेऽपि॥

नित्यन्नैमित्तिकङ्काम्यं स्थण्डिले वा समाचरेत्॥

p. 411) हस्तमात्रं तु तत्कुर्याच्चतुरस्रं समन्ततः॥

इति तिथ्यादितत्त्वे, अपि च गोभिलः॥

अनुगुप्ता अप आहृत्य प्रागुदक्प्रवणन्देशं समँव्वा परिसमुह्य
उपलिप्य मध्यतः प्राचीं रेखामुल्लिख्य उदीचीञ्च
संहताम्पश्चान्मध्ये प्राचीस्तिस्र उल्लिख्याभ्युक्षयेल्लक्षणावृदेषा
सर्वत्रेति॥

अनुगुप्ता आच्छादिताः पतितादिभिरदृष्टा इति यावत्॥

प्राङ्नीचादिफलमाह गृह्यसङ्ग्रहे गोभिलपुत्रः॥

प्राङ्नीचब्रह्मवर्च्चस्यमुदङ्नीचं यशोत्तमम्॥

पित्र्यन्दक्षिणतो नीचम्प्रतिष्ठालम्भकं समम्॥

यशोत्तममित्यत्र सान्ता अप्यदन्ता इत्युक्तेरदन्तोऽपि यशशब्दः
गयाशिरे इतिवत्॥

परिसमुह्य सर्वतः कुशैः पार्श्वादिकमपसार्य उत्तरस्यान्दिशि
सार्द्धहस्तोपरि क्षिपेत्॥

परिसमुह्य वितस्तित्रये उत्तरत उत्करङ्करोतीति हरिशर्म्मधृतवचनात्॥

तत्तदुपलेपनम्॥

तत्र कारणमाह गृह्यसङ्ग्रहः॥

इन्द्रेण वज्राभिहतः पुरा वृत्रो महासुरः॥

मेदसा तस्य सङ्क्लिन्ना तदर्त्थमुपलेपयेत्॥ इति॥

मध्यतः स्थण्डिलाभ्यन्तरे दक्षिणांशेन तु मध्यांशे

उदग्गतैकविंशत्यङ्गुलरेखानुरोधात्॥ अन्यथा॥

कुशैस्सम्मार्ज्जयेद्भूमिं शुद्धामादौ शुचिस्ततः॥

हस्तमात्राञ्चतुरस्त्राङ्गोमयेनोपलेपयेत्॥

इति भारद्वाजीयहस्तप्रमाणस्थण्डिले तदनुपपत्तेः॥

प्राचीम्प्राग्गताम्॥

उदीचीञ्च संहताम्॥

पश्चादिति॥

प्राग्गतायाः पश्चिमे भागे सँलग्नामुदगग्राम् मध्ये
उदग्गतायाः प्राचीः प्रागग्रास्थिस्रो रेखा उल्लिख्याभ्युक्षयेदिति॥

रेखाभ्य उद्धृतमृत्तिकोद्धरणपूर्वकमभ्युक्षयेत्॥

उल्लिख्य उद्धृत्याभ्युक्षयेदिति कात्यायनसूत्रात्॥

उत्करप्रक्षेपदेशमाह गृह्यसङ्ग्रहः॥

उत्करङ्गृह्य रेखाभ्योऽरत्निमात्रे निधापयेत्॥

द्वारमेतत्पदार्थानाम्प्रागुदीच्यान्दिशि स्मृतम्॥ इति॥

परिसमूहनादिपरिषेकान्तङ्कर्म लक्षणसञ्ज्ञकन्तस्य
लक्षणस्यावृत्प्रक्रिया सर्वत्र यत्र यत्राग्निप्रणयनन्तत्र तत्र बोध्या॥

p. 412) रेखाप्रमाणमाह छन्दोगपरिशिष्टे कात्यायनः॥

दक्षिणे प्राग्गतायास्तु प्रमाणन्द्वादशाङ्गुलम्॥

तन्मूललग्ना योदीची तस्या एवन्नवोत्तरम्॥

उदग्गतायास्सँलग्नाश्शेषाः प्रादेशमात्रिकाः॥

सप्तसप्ताङ्गुलांस्त्यक्त्वा कुशेनैव समुल्लिखेत्॥

नवोत्तरन्नवाधिकन्द्वादशाङ्गुलमेकविंशत्यङ्गुलमित्यर्थः॥

शेषाः उक्तरेखयोरवशिष्टास्तिस्रः कुशेन इति सर्वत्राभिसम्बध्यते॥

एवकारेण शाखान्तरोक्तस्य व्यावृत्तिः॥

रेखाणान्देवतावर्णाञ्चाह स्मृतिः॥

प्राग्गता पार्थिवी ज्ञेया चाग्नेयी चाप्युदग्गता॥

प्राजापत्या तथा चैन्द्री सौमी च प्राक्कृता स्मृता॥

पार्थिवी पीतवर्णा स्यादाग्नेयी लोहिता भवेत्॥

प्राजापत्या भवेत्कृष्णा नीला चैन्द्री प्रकीर्त्तिता॥

श्वेतवर्णेन सौमी स्याद्रेखाणाँव्वर्णलक्षणम्॥

अग्निस्थापनपर्यन्तं सव्यहस्तप्रादेशस्य विधानमाह

गृह्यसङ्ग्रहः॥

सव्यम्भूमौ प्रतिष्ठाप्य प्रोल्लिखेद्दक्षिणेन तु॥

तावन्नोत्थापयेत्पाणिं य्यावदग्निन्निधापयेत्॥

मानकर्त्तारमाह च्छन्दोगपरिशिष्टे कात्यायनः॥

मानक्रियायामुक्तायामनुक्ते मानकर्त्तरि॥

मानकृद्यजमानस्स्याद्विदुषामेष निश्चयः॥

अङ्गुष्ठाङ्गुलिमानमाह स एव॥

अङ्गुष्ठाङ्गुलिमानन्तु यत्र यत्रोपदिश्यते॥

तत्र तत्र बृहत्पर्वग्रन्थिभिर्मिनुयात्सदा॥

यजमानासन्निधौ होमे तु सादारणाङ्गुलिमानम्॥

यथा कपिलपञ्चरात्रे -अष्टभिस्तैर्भवेज्जैष्ठ्यँमध्यमं

सप्तभिर्यवैः॥

कन्यसं षड्भिरुद्दिष्टमङ्गुलम्मुनिसत्तमैः॥

तैः प्रक्रम्यमानयवैः॥

कन्यसङ्कनिष्ठिम्॥

मानन्तु पाश्र्वेन॥

षड्यवाः पाश्र्वमिताः॥

इति कात्यायनवचनात्॥

इति संस्कारतत्त्वम्॥

नाजप्तस्सिद्यते मन्त्रो नाहुतश्च फलप्रदः॥

नानिष्टो यच्छते कामांस्तस्मात्त्रितयमर्च्चयेत्॥

पूजया लभते पूजाङ्गपात्सिद्धिर्न्न संशयः॥

विभूतिश्चाग्निकार्येण सर्वसिद्धिञ्च विन्दति॥

p. 413) नीलतन्त्रेपि॥

नित्यहोमम्प्रवक्ष्यामि सर्वार्त्थँय्येन विन्दति॥

सपर्यां सम्यगापाद्य बलिपूर्वञ्चरेद्विधिम्॥

ततो होमन्तर्पणञ्च चरेत्साधकसत्तमः॥

बलिवैश्वादिकञ्चैव ब्राह्मणस्समुपाचरेत्॥

अग्घ्यौदकेन सम्प्रोक्ष्य तिस्रो रेखास्समालिखेत्॥

विधिवदग्निमानीय क्रव्यादेभ्यो नमस्तथा॥

मूलमंत्रं समुच्चार्य कुण्डे व स्थण्डिलेऽपि वा॥

भूमौ वा संस्तरेद्वह्निं व्याहृतित्रितयेन च॥

स्वाहान्तेन त्रिधा हुत्वा षडङ्गं हवनञ्चरेत्॥

तथा॥

ततो देवीं समावाह्य मूलेन षोडशाहुतिम्॥

हुत्वा स्तुत्वा नमस्कृत्य विसृजेदिन्दुमण्डले॥

श्यामादौ विशेषः॥

भैरवाँह्च हुनेदष्टौ आज्यान्वितैस्तिलैश्शुभैः॥

पूर्वादिदिक्क्रमेणैव ततो होमं समाचरेत्॥

अथ संक्षेपहोमप्रयोगः

कुण्डे वा स्थण्डिले वापि वीक्षणाद्यभिसंस्कृते॥

प्रागग्रा उदग्ग्राश्च तिस्त्रो रेखास्समालिखेत्॥

तथा च वीक्षणम्मूलमन्त्रेण शरेण ताडनम्मतम्॥

तेनैव प्रोक्षणं प्रोक्तँव्वर्मणाभ्युक्षणम्मतम्॥

ततो मूलमुच्चार्य कुण्डाय नम इति सम्पूज्य प्रागग्रास्तिस्त्रो रेखाः
कर्त्तव्याः॥

प्रागग्रेषु मुकुन्देशपुरन्दरान् प्रादक्षिण्येन सम्पूज्य उदग्ग्रासु
ब्रह्मवैवस्वतेन्दून् पूजयेत्॥

सुन्दरीपक्षे तु सर्वत्र षड्वारीप्रयोगः॥

षड्वारी च ऐंह्रींश्रीं ऐंक्लींसौः ब्रह्मणे नमः॥

एवङ्क्रमेण पूजयेत्॥

तथा ब्रह्मसंहितायां होमकुण्डे॥

ऐशान्याँव्वेदिकां हस्तविस्तारोन्नतिशालिनीम्॥

कृत्वास्मिंन्स्थापयेत्कुम्भँय्यथोक्तक्रमयोगतः॥

तत्र सम्पूजयेद्देवँय्यथाविध्युपचारकैः॥

ततो होमम्प्रकुर्वीत देवतासन्निधानतः॥

ततः कुण्डमध्ये
षड्कोणवृत्तत्रिकोणन्तद्बहिरष्टदलपद्मन्तद्बहिश्चतुरस्त्रञ्चतुर्द्वार
समेतँल्लिखित्वा तदुपरि मूलेन पुष्पाञ्जलिन्दद्यात् सुन्दरीपक्षे तु
बालया॥

p. 414) ततः सर्वाणि प्रणवेनाभ्युक्ष्य वह्नेर्योगपीठमर्च्चयेत्॥
तद्यथा॥

कर्णिकोपर्याधारशक्त्यादिन्सम्पूज्याऽग्न्यादिकोणचतुष्केषु॥

ॐ धर्मायनमः

ॐ ज्ञानायनमः,

ॐ वैराग्यायनमः,

ॐ ऐश्वर्यायनमः॥

पूर्वादिदिक्षु ॐ अधर्मायनमः,

ॐ अज्ञानायनमः,

ॐ अवैराग्यायनमः,

ॐ अनैश्वर्यायनमः,

मध्ये ॐ अनन्तायनमः,

ॐ पद्मायनमः,

ॐ अं-अर्कमण्डलाय द्वादशकलात्मनेनमः,

ॐ उंसोममण्डलाय षोडशकलात्मनेनमः,

ॐ मँवह्निमण्डलाय दशकलात्मनेनमः ॥

ततः केसरेषु पूर्वादिमध्ये च ॐ पीतायैनमः,

ॐ श्वेतायैनमः,

ॐ अरुणायैनमः,

ॐ कृष्णायैनमः,

ॐ धूम्रायैनमः,

ॐ तीव्रायैनमः,

ॐ स्फुलिङ्गिन्यैनमः,

ॐ रुधिरायैनमः,

ॐ ज्वालिन्यैनमः॥

ततो रँअह्व्यासनायनमः॥ ततः॥

वागीश्वरीमृतुस्नातान्नीलेन्दीवरलोचनाम्॥

वागीश्वरेण सँयुक्ताङ्क्रीडाभावसमन्विताम्॥

इति ध्यात्वा॥

ॐ ह्रींवागीश्वरायनमः, ॐ वागीश्वर्यैनम इतिमन्त्रेण
पञ्चोपचारैस्सम्पूज्य सूर्यकान्तादिसम्भूतं श्रोत्रियगेहजँव्वा
वह्निमानयेत्॥

सुन्दरीपक्षे तु कामेश्वरङ्कामेश्वरीम्पूजयेत्॥

गौतमीये॥ पाषाणभववह्निञ्च यदि वारणिसम्भवम्॥

श्रोत्रियाणाङ्गेहजञ्च वनस्थँव्वाथवा हरेत्॥

यदृच्छालाभसँयुक्तोऽप्ययोग्यो यागकर्मणि॥

निरग्निब्राह्मणाल्लब्धो ह्यर्द्धलाभकरो भवेत्॥

क्षत्रबन्धोश्चतुर्थांशफलन्दद्याद्धुताशनः॥

वैश्याच्छूद्राच्च विफलञ्जायते होमकर्मणि॥

तस्मात्सर्वप्रयत्नेन वह्निमुक्तं समाहरेत्॥ तन्त्रान्तरे॥

द्विजातिभवनाद्वापि वह्निमानीय साधकः॥

वौषडन्तेन मूलेन मन्त्रितन्तँव्विलोकयेत्॥

अग्निमावाहयेदस्त्रमन्त्रेण तदनन्तरम्॥

हूम्फडन्तेन मूलेन क्रव्यादांशम्परित्यजेत्॥

ततः ॐ वह्नेर्योगपीठायनमः॥

चतुर्द्दिक्षु ॐ वामायैनमः, एवं ज्येष्ठायैनमः, रौद्र्यैनमः,
अम्बिकायैनमः, ततो मूलमुच्चार्याऽमुकदेवताकुण्डायनमः॥

p. 415) इति कुण्डं सम्पूज्य तदधो वागीश्वरीम्॥

तत्तद्देवतारूपां ऋतुमतीन्ध्यात्वा यथोक्तवह्निमानीय
वीक्षणादिभिस्संकृत्य रमिति तस्माद्वह्निमुद्धृत्य मूलमूच्चार्य
हूँहद्धव्यादेभ्यः स्वाहा इत्यनेन क्रव्यादांशम्परित्यज्य
वह्निमन्त्रेण संरक्ष्य हूमित्यवगुण्ठ्य धेनुमुद्रयामृतीकृत्य
बाहुभ्यां समुद्धृत्य कुण्डोपरि त्रिः परिभ्राम्य
जानुस्पृष्टमहीतलः शिवबीजबुद्ध्यात्मनोऽभिमुखन्देव्या योनौ
एनङ्क्षिपेत्॥

ततो ह्रींव्वह्निमूर्त्तयेनमः इत्यभ्यर्च्च्य रंवह्निचैतन्यायनमः
इतिचैतन्यन्तत्र सँयोज्य, वोचित् पिङ्गल हन हन दह दह पच पच सर्व
ज्ञापय ज्ञापय स्वाहा इति ज्वालयेत्॥

ततः॥ अग्निम्प्रज्वलितँव्वन्दे जातवेदं हुताशनम्॥

सुवर्णवर्णाममलं समिद्धँविश्वतोमुखम्॥ इत्युपतिष्ठेत्॥

ततोऽग्ने त्वममुकनामासीति नाम कृत्वा ॐ वैश्वानर जातवेद इहावह
लोहिताक्ष सर्वकर्माणि साधय स्वाहा॥

अनेनाग्घ्र्यादिभिः सम्पूज्य ॐ अग्निहिरण्यादिसप्तजिह्वाभ्योनमः,

ॐ सहस्रार्च्चिषे हृदयायनमः,

ॐइत्याद्यग्निषडङ्गेभ्यो नमः,

ॐ अग्नये जातवेदसेत्याद्यष्टमूर्त्तिभ्योनमः,

तद्बाह्ये ॐब्राह्म्याद्यष्टशक्तिभ्यो नमः,

तद्बहिः ॐ पद्माद्यष्टनिधिभ्योनमः,

तद्बाह्ये ॐ इन्द्रादिलोकपालेभ्योनमः॥

तद्वाह्ये ॐ वज्राद्यस्त्रेभ्योनमः, ततः
प्रादेशमात्रङ्कुशपत्रद्वयङ्घृतमध्ये निःक्षिप्य
सव्यासव्यमध्यभागेषु इडाम्पिङ्गलां सुषुम्नान्ध्यात्वा
होमङ्कुर्यात्।

स्रुवेण दक्षिणभागादाज्यङ्गृहीत्वा ॐ अग्नये
स्वाहेत्यग्नेर्दक्षिणनेत्रे जुहुयात्॥ तथा वामभागाज्यङ्गृहीत्वा ॐ
सोमायस्वाहेति वामनेत्रे जुहुयात्॥

ततो मध्यभागादाज्यङ्गृहीत्वा ॐ
अग्नीषोमाभ्यांस्वाहेत्यग्नेर्ल्ललाटनेत्रे जुहुयात्॥

p. 416) पुनर्दक्षिणतः नम इति घृतं गृहीत्वा ॐ अग्नये स्विष्टकृते
स्वाहेत्यग्निमुखे॥

ततो महाव्याहृतिहोमः॥

ॐ भूःस्वाहा, ॐ भुवःस्वाहा, ॐ वैश्वानर जातवेद इहावह
लोहिताक्ष सर्वकर्माणि साधय स्वाहा इत्यनेन त्रिवारञ्जुहुयात्॥

ततोऽग्नौ मूलेन पीठपूर्वकन्देवतां सम्पूज्य तन्मुखे घृतेन
मूलमन्त्रेण पञ्चविंशतिवारञ्जुहुयात्॥

वह्निदेवतयोरात्मना सहैक्यँव्विभाव्य मूलमन्त्रेण
एकादशाहुतीर्ज्जुहुयात्॥

ततो मूलमन्त्रस्याङ्गदेवताभ्यःस्वाहा॥

शक्तश्चेत्प्रत्येकमेकैकाहुतिञ्जुहुयात्॥

ततः सङ्कल्पँव्विधाय तत्तत्कल्पोक्तद्रव्येण होमङ्कुर्यात्॥

ततो मूलमन्त्रेण पूर्णाहुतिन्दत्त्वा संहारमुद्रया स्वेष्टदेवतां
हृदये समानीय क्षमस्वेति विसृज्य दक्षिणान्दत्त्वा
अच्छिद्रावधारणङ्कुर्यात्॥

इति संक्षेपहोमप्रकरणम्॥

श्रीः

शिवहरराजधानीपतिश्रीराजादेवनन्दनसिंह-

बहादुरनराधिपसंगृहीतविरचित-

शाक्तप्रमोदान्तर्गतं

त्रयोदशं

दुर्गातन्त्रम्

उक्तराजगुरुवंश्यपण्डितश्रीरघुराजदुबेजीद्वारा

संशोधितम्

तदेतत्

श्रीकृष्णदासात्मज-खेमराजेन

स्वकीये श्रीवेंकटेश्वर यन्त्रालये

मुद्रयित्वा प्रकाशितम्

मुम्ब-ई

श्रीगणेशाय नमः

शाक्तप्रमोदः

अथ दुर्गातन्त्रम्

अथ दुर्गाध्यानम्

सिंहस्कन्धसमारूढान्नानालङ्कारभूषिताम्॥

चतुर्भुजाम्महादेवीन्नागयज्ञोपवीतिनीम्॥

रक्तवस्त्रपरीधानाम्बालार्कसदृशीतनुम्॥

नारदाद्यैर्मुनिगणैः सेविताम्भवगेहिनीम्॥

त्रिवलीवलयोपेतनाभिनालसुवेशिनीम्॥

रत्नद्वीपे महाद्वीपे सिंहासनसमन्विते॥

प्रफुल्लकमलारूढान्ध्यायेत्ताम्भवगेहिनीम्॥

p. 420) अथ यन्त्रोद्धारः

दुर्गायन्त्रम्प्रवक्ष्यामि शृणुष्व हरवल्लभे॥

त्रिकोणं विन्यसेत्पूर्वन्नवकोनसमन्वितम्॥

त्रैबिम्बसहितं सर्वमष्टपत्रसमन्वितम्॥

त्रिरेखासहितं वज्रम्भूपुरद्वयसँयुतम्॥

समीकृत्य यथोक्तेन विलिखेद्विधिनामुना॥

नानास्त्रसँयुतँल्लेख्यञ्चक्रम्मन्त्रविभूषितम्॥

तत्र ताम्पूजयेद्देवीम्मूलप्रकृतिरूपिणीम्॥

अथ मन्त्रोद्धारः

अथ दुर्गामनुँव्वक्ष्ये दृष्टादृष्टफलप्रदम्॥

मायादिः कर्णविद्धाढ्यो भूयोसौ सर्गवान्भवेत्॥

चान्तकश्च प्रतिष्ठावान्मारुतो भौतिकासनः॥

तारादिहृदयान्तोयम्मन्त्रो वस्वक्षरात्मकः॥

अथ मन्त्रः

ॐ ह्रीं दुन्दुर्गायै नमः।

अथ पूजाविधिः

प्रातः कृत्यादि पीठन्यासान्तँव्विधाय केसरेषु मध्ये च
पीठशक्तीर्विन्यसेत्॥ तद्यथा॥ आंप्रभायैनमः।

ईंमायायैनमः। ऊंजयायैनमः, ऋँऊक्ष्मायैनमः,
लृँइशुद्धायैनमः, ऐंनन्दिन्यैनमः॥

औं सुप्रभायैनमः, अंविजयायैनमः, अःसर्वसिद्धिदायैनमः॥
तदुपरि॥

ॐ वज्रनखदंष्ट्रायुधाय महासिंहासनाय हूंफट्नम
इतिपूजयेत्॥

p. 241) तत ऋष्यादिन्यासः॥ शिरसि नारदऋषये नमः॥

मुखे गायत्रीछन्दसेनमः॥ हृदि दुर्गादेवतायै नमः॥

ततः कराङ्गन्यासौ ह्रांॐह्रींदुन्दुर्गायै अङ्गुष्ठाभ्यान्नमः,

ह्रीं-ॐह्रींदुन्दुर्गायै तर्ज्जनीभ्यां स्वाहा, ह्रूं-ॐ

ह्रींदुन्दुर्गायै मध्यमाभ्याँअषट् ह्रैं-ॐह्रींदुन्दुर्गायै

अनामिकाभ्यांहूम्, ह्रौं-ॐह्रींदुन्दुर्गायै

कनिष्ठिकाभ्याँऔषट्, ह्रः-ॐह्रींदुन्दुर्गायै

करतलकरपृष्ठाभ्यांफट्॥

एवं हृदयादि॥

ह्रां ॐ ह्रीं दुन्दुर्गायै हृदयाय नमः,

ह्रीं ॐ ह्रीं दुन्दुर्गायै शिरसेस्वाहा,

ह्रूं ॐ ह्रीं दुन्दुर्गायै शिखायैवषट्,

ह्रैं ॐ ह्रीं दुन्दुर्गायै नेत्रत्रयायवौषट्,

ह्रौं ॐ ह्रीं दुन्दुर्गायै कवचायहूम्,

ह्रः ॐ ह्रीं दुन्दुर्गायै अस्त्रायफडिति षडङ्गादिन्यासः॥

तथा च निबन्धे।

नमस्कारनियुक्तेन मूलमन्त्रेण देशिकः॥

ह्रीमाद्यैः सह कुर्वीत षडङ्गानि यथाविधि॥

अथ ध्यानम्॥

सिंहस्था शशिशेखरा मरकतप्रख्यैश्चतुर्भिर्भुजैः,

शङ्खञ्चक्रधनुःशरांश्च दधती नेत्रैस्त्रिभिश्शोभिता॥

आमुक्ताङ्गदहारकङ्कणरणत्काञ्चीक्वणन्नूपुरा,

दुर्गादुर्गतिहारिणी भवतु नो रत्नोल्लसत्कुण्डला॥

एवन्ध्यात्वा मानसैः शङ्खस्थापनङ्कुर्यात्॥

ततः पीठपूजाङ्कुर्यात्।

केसरेषु मध्ये च आंप्रभायैनमः,

ईंमायायैनमः, ऊंजयायैनमः, ऋंसूक्ष्मायैनमः,
ऌंविशुद्धायैनमः, ॐ-ऐंनन्दिन्यैनमः॥

औं सुप्रभायैनमः॥ अंविजयायैनमः॥

अःसर्वसिद्धिदायैनमः॥ तदुपरि वज्रनखदंष्ट्रायुधाय
महासिंहासनाय हूम्फट्नमः॥

दद्यादासनमेतेन मूर्त्तिमूलेन कल्पयेत्॥

ततः पुनर्ध्यात्वाऽवाहनादिपञ्चपुष्पाञ्जलिदानपर्यन्तँ
व्विधायावरणपूजामारभेत्॥

अग्निनैर्ऋतिवाय्वीशानकोणमध्ये दिक्षु च॥

ह्राँॐह्रीं दुन्दुर्गायै हृदयायनमः॥

इत्यादिना पूजयेत्॥

ततः पत्रेषु पूर्वादि॥ जंजयायै०, विंविजयायै०, किंकीर्त्यै०,
पंप्रीत्यैनमः, पं प्रभायै०, शुंशुद्धायै०, मंमेधायै०,
शंश्रुत्यै०॥

पत्राग्रेषु लंखड्गायनमः, वंखेटकायनमः,
शंबाणायनमः, षंधनुषेनमः, संशूलाय०, हंतर्ज्जन्यै०
तद्बहिरिन्द्रादिवज्रादींश्च पूजयेत्॥

p. 422) ततो धूपादिविसर्ज्जनान्तङ्कर्म्म समापयेत्॥ अस्या बलिमन्त्रस्तु॥

एहि एहि पदद्वन्द्वम्मदीयञ्च बलिन्देवि लूलायकपदद्वयं साधय
द्वितीयम्ब्रूयात्खादय द्वितीयम्पुनः॥

सर्वसिद्धिपदन्देवी ततः स्वाहापदम्भवेत्॥ बलिदानस्य मन्त्रोऽयं
मन्त्रिण्या परिकीर्त्तितः॥

अस्य पुरश्चरणमष्टलक्षः॥ अष्टसहस्रतिलैर्होमः॥

तथा च॥

वसुलक्षं जपेन्मन्त्रं तत्सहस्रतिलैः सह इत्यादिवचनात्॥

अथ स्तोत्रम्

न मन्त्रन्नो यन्त्रन्तदपि च न जाने स्तुतिमहो
न चाह्वानन्ध्यानन्तदपि च न जाने स्तुतिकथाः॥
न जाने मुद्रास्ते तदपि च न जाने विलपनम्परञ्जाने
मातस्त्वदनुशरणं क्लेशहरणम्॥ १॥

विधेरज्ञानेन द्रविणविरहेणाऽलसतया
विधेयाशक्यत्वात्तव चरणयोर्या च्युतिरभूत्॥
तदेतत्क्षन्तव्यञ्जननि सकलोद्धारिणि शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति॥ २॥

पृथिव्याम्पुत्रास्ते जननि बहवः सन्ति सरलाः
परन्तेषाम्मध्ये विरलतरलोहन्तव सुतः॥
मदीयोऽयन्त्यागः समुचितमिदन्नो तव शिवे

कुपुत्रो जायेत क्वचिदपि कुमाता न भवति॥ ३॥

जगन्मातर्मातस्तव चरणसेवा न रचिता
नवा दत्तन्देवि द्रविणमपि भूयस्तव मया॥
तथाऽपि त्वं स्नेहं मयि निरुपमँय्यत्प्रकुरुषे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति॥ ४॥

परित्यक्त्वा देवान्विविधविधिसेवाकुलतया
मया पञ्चाशीतेरधिकमुपनीते तु वयसि॥
इदानीञ्चेन्मातस्तव यदि कृपा नाऽपि भविता
निरालम्बो लम्बोदरजननि कँय्यामि शरणम्॥ ५॥

श्वपाको जल्पाको भवति मधुपाकोपमगिरा
निरातङ्को रङ्को विहरति चिरङ्कोटिकनकैः॥

p. 423) तवापर्णे कर्णे विशति मनुवर्णे फलमिदञ्जनः
को जानीते जननि जपनीयञ्जपविधौ॥ ६॥

चिताभस्मालेपो गरलमशनन्दिक्पटधरो
जटाधारी कण्ठे भुजगपतिहारी पशुपतिः॥

कपाली भूतेशो भजति जगदीशैकपदवीम्भवानि
त्वत्पाणिग्रहणपरिपाटीफलमिदम्॥ ७॥

न मोक्षस्याकाङ्क्षा न च विभववाञ्छापि च न
मे न विज्ञानापेक्षा शशिमुखि सुखेच्छापि न पुनः॥

अतस्त्वां सँयाचे जननि जननँय्यातु मम वै
मृदानी रुद्राणी शिवशिव भवानीति जपतः॥ ८॥

नाराधितासि विधिना विविधोपचारैः
किं रुक्षचिन्तनपरैर्न्न कृतँव्वचोभिः॥

श्यामे त्वमेव यदि किञ्चन मय्यनाथे
धत्से कृपामुचितमम्ब परन्तवैव॥ ९॥

आपत्सु मग्नः स्मरणन्त्वदीयङ्करोमि दुर्गे करुणार्णवेशि।
नैतच्छठत्वम्मम भावयेथाः क्षुधातृषार्ता जननीं स्मरन्ति॥
१०॥

जगदम्ब विचित्रमत्र किम्परिपूर्णा करुणास्ति चेन्मयि।
अपराधपरम्परावृतन्न हि माता समुपेक्षते सुतम्॥ ११॥

मत्समः पातकी नास्ति पापघ्नी त्वत्समा न हि।
एवं ज्ञात्वा महादेवि यथा योग्यन्तथा कुरु॥ १२॥

इति स्तोत्रम्॥

अथ कवचम्

श्रृणु देवि प्रवक्ष्यामि कवचं सर्वसिद्धिदम्॥
पठित्वा पाठयित्वा च नरो मुच्येत सङ्कटात्॥

अज्ञात्वा कवचन्देवि दुर्गामन्त्रञ्च यो जपेत्।
स नाप्नोति फलन्तस्य परञ्च नरकम्व्रजेत्॥

उमादेवी शिरः पातु ललाटे शूलधारिणी।
चक्षुषी खेचरी पातु कर्णौ चत्वरवासिनी॥

सुगन्धा नासिके पातु वदनं सर्वधारिणी।
जिह्वाञ्च चण्डिका देवी ग्रीवां सौभद्रिका तथा।

अशोकवासिनी चेतो द्वौ बाहू वज्रधारिणी।
हृदयँल्ललिता देवी उदरं सिंहवाहिनी॥

कटिम्भगवती देवी द्वावूरू विन्ध्यवासिनी।
p. 424) महाबला च जङ्घे द्वे पादौ भूतलवासिनी॥

एवं स्थितासि देवि त्वन्त्रैलोक्ये रक्षणात्मिका।
रक्ष मां सर्वगात्रेषु दुर्गे देवि नमोऽस्तु ते॥

इति कवचम्

अथोपनिषत्

सर्वे देवा देवीमुपतस्थुः। कासि त्वम्महादेवि।
साब्रवीदहम्ब्रह्मस्वरूपिणी।

मत्तः प्रकृतिपुरुषात्मकञ्जगत्।

शून्यञ्चाशून्यञ्च अहमानन्दावानन्दौ॥

अहँव्विज्ञानाविज्ञाने।

अहम्ब्रह्माणि वेदब्रह्माणि वेदितव्ये इति चाथर्वणी श्रुतिः॥

अहम्पञ्चभूतानि अहं पञ्चतन्मात्राणि॥

अहमखिलञ्जगत्, वेदोहमवेदोहम्, विद्याहमविद्याहम्,
अजाहमनजाहम्, अधश्चोर्द्धञ्च तिर्यक् चाहम्।
अहं रुद्रेभिर्वसुभिश्चरामि अहमादित्यैरुत विश्वेदेवैः॥

अहम्मित्रावरुणावुभौ बिभर्मि अहमिन्द्राग्नी अहमश्विनावुभौ॥

अहं सोमन्त्वष्टारम्पूषणम्भगं सन्दधामि।

अहँव्विष्णुमुरुक्रमम्ब्रह्माणमुत्प्रजापतिन्दधामि॥

द्रविणं हविष्मते सुप्रजाय यजमानाय सुन्वते॥

अहं राष्ट्री सङ्गमनी वसूनाञ्चिकितुषी प्रथमा यज्ञियानाम्॥

अहं सुवेर्यः पितरमस्य मूर्द्धन्मम योनिरप्स्वन्तः समुद्रे॥

य एवं वेद स देवीपदमाप्नोति। ते देवा अब्रुवन्।

नमो देव्यै महादेव्यै शिवायै सततन्नमः॥
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम्॥

तामग्निवर्णान्तपसा ज्वलन्तीं व्वैरोचनीङ्कर्मफलमुपजुष्टाम्॥

दुर्गान्देवीं शरणमहम्प्रपद्ये सुतरां नाशयते तमः॥

देवीमम्बामजनयन्त देवास्ताँव्विश्वरूपाः षशवो वदन्ति।

सा नो मन्द्रेषमूर्ज्जन्दुहाना धेनुर्वागस्मानुप सुष्टुतैतु॥

कालरात्रीं व्वापस्तुतानान्ताँव्वैष्णवीं स्कन्दमातरं

सरस्वतीमदितिन्दक्षदुहितरन्नमाम्यहं पावनां शिवाम्॥

महालक्ष्म्यै च विद्महे सर्वशक्त्यै च धीमहि॥

तन्नो देवी प्रचोदयात्॥ अदितिह्यजनिष्ट दक्षया दुहिता तव॥

p. 425) तान्देवा अन्वजायन्त भद्रा अमृतबन्धवः॥

कामे योनिः कमलवेत्रपाणिगुहाहस्ता मातरिश्वाशमिन्द्रः
पुनर्गेहा सफला मायया चापृथुकेन विश्वमातादि विद्या एषात्मा
शक्ति। एषा विश्वमोहिनी। पाशाङ्कुशधनुर्बाणधरा एषा
श्रीमहाविद्या य एवँव्वेद स शोकन्तरति। नमस्ते भगवति
मातरस्मान्पाहि सर्वतः। सैषाष्टौ वसवः, सैषा एकादश रुद्राः,
सैषा द्वादशादित्याः, सैषा विश्वेदेवाः, सोमपा असोमपाश्च सैषा
यातुधाना असुरा रक्षांसि पिशाचा यक्षसिद्धाः, सैषा
सत्त्वरजस्तमांसि, सैषा ब्रह्मविष्णुरुद्ररूपिणी, सैषा
प्रजापतीन्द्रमनवः, सैषा ग्रहनक्षत्रज्योतींषि कलाकाष्ठादीनि
भस्मरूपिणी तामहम्प्रणतोस्मि॥

नित्यपापहारिणी देवी भुक्तिमुक्तिप्रदायिनी॥

अनन्ताँव्विजयां शुद्धां शरण्यां शिवदां शुभाम्।

वियदाकारसँयुक्तँव्वीतिहोत्रसमन्वितम्॥

अर्द्धेन्दुलसितन्देव्या बीजं सर्वार्त्थसाधकम्॥

एवमेकाक्षरम्मन्त्रङ्कतवः शुद्धचेतसः॥

ध्यायन्ति परमानन्दमया ज्ञानाम्बुराशयः॥

वामा या ब्रह्मभूतस्मात्यष्टवक्त्रसमन्वितम्॥

सूर्यो वामश्रोत्रबिन्दुः सँयुक्ताष्टातृतीयकः॥

नारायणेन सम्मित्रो सावाद्यश्चाधरयुक्तयः॥

विधे नवार्णकोणः स्यान्महानन्दप्रदायकः॥

हृत्पुण्डरीकमध्यस्थाम्प्रातः सूर्यसमप्रभाम्॥

पाशाङ्कुशधरां सौम्यवरदाभयहस्तकाम्॥

त्रिनेत्रां रक्तवसनाम्भक्तकामदुहाम्भजे॥

भजामि त्वाम्महादेवीम्महाभयविनाशिनीम्॥

महादारिद्र्यशमनी महारूपास्वरूपिणी॥

यस्याः स्वरूपम्ब्रह्मादयो न जानन्ति तस्मादुच्यते अनन्ता। यस्या
गृहन्नोपलक्ष्यते तस्मादुच्यते अलक्ष्यम्। यस्या जननन्नोपलभ्यते
तस्मादुच्यते अजा। एकैव सर्वत्र वर्त्तते तस्मादेका। एकैकविश्वरूपिणी
तस्मादनेका।
अनन्ततपोवाच्यज्ञेयानन्तालक्ष्याजैकानेकानमन्त्राणाम्मातृका
देवी शब्दानां ज्ञानरूपिणी॥

p. 426) ज्ञानानाञ्चिन्मयातीता शून्यानां शून्यसाक्षिणी॥

यस्याः परतरन्नास्ति सैषा दुर्गा प्रकीर्त्तिता।
तान्दुर्गदुर्गमान्देवीन्दुराचारविधायिनीम्॥

नमामि भवभीतोऽहं संसारार्णवतारिणीम्।

य इदमथर्वशीर्षं य्योधीते स पञ्चाथर्वशीर्षफलमाप्नोति

इदमथर्वशीर्षमज्ञात्वा यो अर्चां स्थापयति शतलक्षञ्जप्त्वा

नार्चाशुद्धिञ्च विन्दति। शतमष्टोत्तरञ्चास्य पुरश्चर्याविधिः

स्मृतः। दशवारम्पठेद्यस्तु सद्यः पापैः प्रमुच्यते॥ महादुर्गाणि

तरति महादेव्याः प्रसादतः॥ सायमधीयानो

दिवसकृतम्पापन्नाशयति। सायम्प्रातः प्रयुञ्जानो अपापो भवति।

निशीथे तुरीयसन्ध्यायां वा जप्त्वा वाक्सिद्धिर्भवति।

नूतनायाम्प्रतिमासन्निधौ जप्त्वा देवतासान्निध्यम्भवति।

प्राणप्रतिष्ठायाञ्जप्त्वा देवता भवति॥

भौमाश्विन्याम्महादेवीसन्निधौ जप्त्वा महामृत्युन्तरति

महामृत्युन्तरति य एवँव्वेद॥ इति देव्या अथर्वशीर्षोपनिषत्समाप्ता॥

अथ शतनामाष्टकम्

ईश्वर उवाच

शतनाम प्रवक्ष्यामि शृणुष्व कमलानने।
यस्य प्रसादमात्रेण दुर्गा प्रीता सदा भवेत्॥ १॥

सती साध्वी भवप्रीता भवानी भवमोचनी।
आर्या दुर्गा जया आद्या त्रिनेत्रा शूलधारिणी॥ २॥

पिनाकधारिणी चित्रा चन्द्रघण्टा महातपा।
मनोबुद्धिरहङ्कारा चित्तरूपा चिता चितिः॥ ३॥

सर्वमन्त्रमयी सत्या सत्यानन्दस्वरूपिणी।
अनन्ता भाविनी भाव्या भवा भव्या सदागतिः॥ ४॥

शाम्भुपत्नी देवमाता चिन्ता रत्नप्रिया सदा।
सर्वविद्या दक्षकन्या दक्षयज्ञविनाशिनी॥ ५॥

अपर्णा चैव पर्णा च पाटला पटलावती।
पट्टाम्बरपरीधाना कलमञ्जीररञ्जिनी॥ ६॥

अमेया विक्रमा क्रूरा सुन्दरी कुलसुन्दरी।
p. 427) नवदुर्गा च मातङ्गी मतङ्गमुनिपूजिता॥ ७॥

ब्राह्मी माहेश्वरी चैन्द्री कौमारी वैष्णवी तथा।
चामुण्डा चैव वाराही लक्ष्मीश्च पुरुषाकृतिः॥ ८॥

विमलोत्कर्षिणी ज्ञानक्रिया सत्या च वाक् प्रदा।
बहुला बहुलप्रेमा सर्ववाहनवाहना॥ ९॥

निशुम्भशुम्भहननी महिषासुरमर्द्दिनी।
मधुकैटभहन्त्री च चण्डमुण्डविनाशिनी॥ १०॥

सर्वाऽसुरविनाशा च सर्वदानवघातिनी।
सर्वशास्त्रमयी विद्या सर्वास्त्रधारिणी तथा॥ ११॥

अनेकशस्त्रहस्ता च अनेकास्त्रविधारिणी।
कुमारी चैव कन्या च कौमारी युवती यतिः॥ १२॥

अप्रौढा चैव प्रौढा च वृद्धमाता बलप्रदा।
य इदञ्च पठेत्स्तोत्रन्दुर्गानाम शताष्टकम्॥ १३॥

नासाध्यँविद्यते देवि त्रिषु लोकेषु पार्वति।

धनन्धान्यं सुताञ्जायां हयं हस्तिनमेव च॥ १४॥

चतुर्वर्गन्तथा चान्ते लभेन्मुक्तिञ्च शाश्वतीम्।
कुमारीः पूजयित्वा च ध्यात्वा देवीं सुरेश्वरीम्॥ १५॥

पूजयेत्परया भक्त्या पठेन्नाम शताष्टकम्।
तस्य सिद्धिर्भवेद्देवि सर्वैः सुरवरैरपि।
राजानो दासतां यांति राज्यश्रियमवाप्नुयात्॥ १६॥

गोरोचनालक्तककुङ्कुमेन सिन्दूरकर्पूरमधुत्रयेण।
विलिख्य यन्त्रँव्विधिना विधिज्ञो भवेत्सदा धारयता पुरारिः॥ १७॥

भौमावास्यानिशाभागे चन्द्रे शतभिषाङ्गते।
विलिख्य प्रपठेत्स्तोत्रं स भवेत्सम्पदाम्पदम्॥ १८॥

इति शतनामाष्टोत्तरशतम्॥

अथ सहस्रनाम

श्रीदेव्युवाच

मम नाम सहस्रञ्च शिवपूर्वविनिर्म्मितम्।
तत्पठ्यताँव्विधानेन तदा सर्वम्भविष्यति॥ १॥

इत्युक्त्वा पार्वती देवी श्रावयामास तच्च तान्।
तदेव नाम साहस्रन्दकारादि वरानने॥ २॥

रोगदारिद्र्यदौर्भाग्यशोकदुःखविनाशकम्।
p. 428) सर्वासां पूजितन्नाम श्रीदुर्गादेवता मता॥ ३॥

निजवीजम्भवेद्बीजं मन्त्रङ्कीलकमुच्यते।
सर्वाशापूरणे देवी विनियोगः प्रकीर्त्तितः॥ ४॥

दुन्दुर्गा दुर्गतिहरा दुर्गाजलनिवासिनी॥ ५॥

दुर्गमार्गप्रविष्टा च दुर्गमार्गप्रवेशिनी।
दुर्गमार्गकृतावासा दुर्गमार्गजयप्रिया॥ ६॥

दुर्गमार्गगृहीतार्चा दुर्गमार्गस्थितात्मिका।

दुर्गमार्गस्तुतिपरा दुर्गमार्गस्मृतिपरा॥ ७॥

दुर्गमार्गसदास्थाली दुर्गमार्गरतिप्रिया।
दुर्गमार्गस्थलस्थाना दुर्गमार्गविलासिनी॥ ८॥

दुर्गमार्गत्यक्तवस्त्रा दुर्गमार्गप्रवर्त्तिनी।
दुर्गासुरनिहन्त्री च दुर्गासुरनिषूदिनी॥ ९॥

दुर्गासुरहरादूति दुर्गासुरविनाशिनी।
दुर्गासुरवधोन्मत्ता दुर्गासुरवधोत्सुका॥ १०॥

दुर्गासुरवधोत्साहा दुर्गासुरवधोद्यता।
दुर्गासुरवधप्रेप्सुर्दुर्गासुरमखान्तकृत्॥ ११॥

दुर्गासुरध्वंसतोषा दुर्गदानवदारिणी।
दुर्गविद्रावणकरी दुर्गविद्रावणी सदा॥ १२॥

दुर्गविक्षोभनकरी दुर्गशीर्षनिकृन्तनी।
दुर्गविध्वंसनकरी दुर्गदैत्यनिकृन्तनी॥ १३॥

दुर्गदैत्यप्राणहरा दुर्गदैत्यान्तकारिणी।
दुर्गदैत्यहरत्राता दुर्गदैत्यसृगुन्मदा॥ १४॥

दुर्गदैत्याशनकरी दुर्गचर्माम्बरावृता।
दुर्गयुद्धोत्सवकरी दुर्गयुद्धविशारदा॥ १५॥

दुर्गयुद्धासवरता दुर्गयुद्धविमर्द्दिनी।
दुर्गयुद्धहास्यरता दुर्गयुद्धाट्टहासिनी॥ १६॥

दुर्गयुद्धमहामत्ता दुर्गयुद्धानुसारिणी।
दुर्गयुद्धोत्सवोत्साहा दुर्गदेशनिषेविणी॥ १७॥

दुर्गदेशवासरता दुर्गदेशविलासिनी।
दुर्गदेशार्च्चनरता दुर्गादेशजनप्रिया॥ १८॥

दुर्गमस्थानसंस्थाना दुर्गमध्यानसाधना।
दुर्गमा दुर्गमध्याना दुर्गमात्मस्वरूपिणी॥ १९॥

दुर्गमागमसन्धाना दुर्गमागमसंस्तुता।
दुर्गमागमदुर्ज्ञेया दुर्गमश्रुतिसम्मता॥ २०॥

दुर्गमश्रुतिमान्या च दुर्गमश्रुतिपूजिता।

p. 429) दुर्गमश्रुतिसुप्रीता दुर्गमश्रुतिहर्षदा॥ २१॥

दुर्गमश्रुतिसंस्थाना दुर्गमश्रुतिमानिता।

दुर्गमाचारसन्तुष्टा दुर्गमाचारतोषिता॥ २२॥

दुर्गमाचारनिर्वृत्ता दुर्गमाचारपूजिता।

दुर्गमाचारकसिता दुर्गमस्थानदायिनी॥ २३॥

दुर्गमप्रेमनिरता दुर्गमद्रविणप्रदा।

दुर्गमाम्बुजमध्यस्था दुर्गमाम्बुजवासिनी॥ २४॥

दुर्गनाडीमार्गगतिर्दुर्गनाडीप्रचारिणी।

दुर्गनाडीपद्मरता दुर्गनाड्यम्बुजस्थिता॥ २५॥

दुर्गनाडीगतायाता दुर्गनाडीकृतास्पदा।

दुर्गनाडीरतरता दुर्गनाडीशसँतुता॥ २६॥

दुर्गनाडीश्वररता दुर्गनाडीशचुम्बिता।

दुर्गनाडीशक्रोडस्था दुर्गनाड्युत्थितोत्सुका॥ २७॥

दुर्गनाड्यारोहणा च दुर्गनाडीनिषेविता।
दरीस्थानदरीस्थानवासिनी दनुजान्तकृत्॥ २८॥

दरीकृततपस्या च दरीकृतहरार्चना।
दरीजापितदिष्टा च दरीकृतरतिक्रिया॥ २९॥

दरीकृतहरार्हा च दरीक्रीडितपुत्रिका।
दरीसन्दर्शनरता दरीरोपितवृश्चिका॥ ३०॥

दरीगुप्तिकौतुकाढ्या दरीभ्रमणतत्परा।
दनुजान्तकरी दीनादनुजसन्तानदारिणी॥ ३१॥

दनुजध्वंसिनी दूना दनुजेन्द्रविनाशिनी।
दानवध्वंसिनी देवी दानवानाम्भयङ्करी॥ ३२॥

दानवी दानवाराध्या दानवेन्द्रवरप्रदा।
दानवेन्द्रनिहन्त्री च दानवद्वेषिणीसती॥ ३३॥

दानवारिप्रेमरता दनवारिप्रपूजिता।

दानवारिकृतार्च्चा च दानवारिविभूतिदा॥ ३४॥

दानवारिमहानन्दा दानवारिरतिप्रिया।

दानवारिदानरता दानवारिकृतास्पदा॥ ३५॥

दानवारिस्तुतिरता दनवारिस्मृतिप्रिया।

दानवार्याहाररता दानवारिप्रबोधिनी॥ ३६॥

दानवारिधृतप्रेमा दुःखशोकविमोचिनी।

दुःखहन्त्री दुःखदात्री दुःखनिर्मूलकारिणी॥ ३७॥

दुःखनिर्मूलनकरी दुःखदार्यरिनाशिनी।

p. 430) दुःखहरा दुःखनाशा दुःखग्रामा दुरासदा॥ ३८॥

दुःखहीना दुःखधारा द्रविणाचारदायिनी।

द्रविणोत्सर्गसन्तुष्टा द्रविणत्यागतोषिका॥ ३९॥

द्रविणस्पर्शसन्तुष्टा द्रविणस्पर्शमानदा।

द्रविणस्पर्शहर्षाढ्या द्रविणस्पर्शतुष्टिदा॥ ४०॥

द्रविणस्पर्शनकरी द्रविणस्पर्शनातुरा।
द्रविणस्पर्शनोत्साहा द्रविणस्पर्शसाधिता॥ ४१॥

द्रविणस्पर्शनमता द्रविणस्पर्शपुत्रिका।
द्रविणस्पर्शरक्षिणी द्रविणस्तोमदायिनी॥ ४२॥

द्रविणाकर्षणकरी द्रविणौघविसर्ज्जनी।
द्रविणाचलदानाढ्या द्रविणाचलवासिनी॥ ४३॥

दीनमाता दीनबन्धुर्दीनविघ्नविनाशिनी।
दीनसेव्या दीनसिद्धा दीनसाध्या दिगम्बरी॥ ४४॥

दीनगेहकृतानन्दा दीनगेहविलासिनी।
दीनभावप्रेमरता दीनभावविनोदिनी॥ ४५॥

दीनमानवचेतःस्था दीनमानवहर्षदा।
दीनदैन्यनिघातेच्छुर्दीनद्रविणदायिनी॥ ४६॥

दीनसाधनसन्तुष्टा दीनदर्शनदायिनी।

दीनपुत्रादिदात्री च दीनसम्पद्विधायिनी॥ ४७॥

दत्तात्रेयध्यानरता दत्तात्रेयप्रपूजिता।
दत्तात्रेयर्षिसंसिद्धा दत्तात्रेयविभाविता॥ ४८॥

दत्तात्रेयकृतार्हा च दत्तात्रेयप्रसाधिता।
दत्तात्रेयहर्षदात्री दत्तात्रेयसुखप्रदा॥ ४९॥

दतात्रेयस्तुता चैव दत्तात्रेयनुता सदा।
दत्तात्रेयप्रेमरता दत्तत्रेयानुमानिता॥ ५०॥

दत्तात्रेयसमुद्गीता दत्तात्रेयकुटुम्बिनी।
दत्तात्रेयप्राणतुल्या दत्तात्रेयशरीरिणी॥ ५१॥

दत्तात्रेयकृतानन्दा दत्तात्रेयांशसम्भवा।
दत्तात्रेयविभूतिस्था दत्तात्रेयानुसारिणी॥ ५२॥

दत्तात्रेयगीतिरता दत्तात्रेयधनप्रदा।
दत्तात्रेयदुःखहरा दत्तात्रेयवरप्रदा॥ ५३॥

दत्तात्रेयज्ञानदात्री दत्तात्रेयभयापहा।

देवकन्या देवमान्या देवदुःखविनाशिनी॥ ५४॥

देवसिद्धा देवपूज्या देवेज्या देववन्दिता।

p. 431) देवमान्या देवधन्या देवविघ्नविनाशिनी॥ ५५॥

देवरम्या देवरता देवकौतुकतत्परा।

देवक्रीडा देवव्रीडा देववैरिविनाशिनी॥ ५६॥

देवकामा देवरामा देवद्विष्टविनाशिनी।

देवदेवप्रिया देवी देवदानववन्दिता॥ ५७॥

देवदेवरतानन्दा देवदेववरोत्सुका।

देवदेवप्रेमरता देवदेवप्रियँवदा॥ ५८॥

देवदेवप्राणतुल्या देवदेवनितम्बिनी।

देवदेवहृतमना देवदेवसुखावहा॥ ५९॥

देवदेवक्रोडरता देवदेवसुखप्रदा।

देवदेवमहानन्दा देवदेवप्रचुम्बिता॥ ६०॥

देवदेवोपभुक्ता च देवदेवानुसेविता।
देवदेवगतप्राणा देवदेवगतात्मिका॥ ६१॥

देवदेवहर्षदात्री देवदेवसुखप्रदा।
देवदेवमहानन्दा देवदेवविलासिनी॥ ६२॥

देवदेवधर्मपत्नी देवदेवमनोगता।
देवदेववधूर्देवदेवदेवार्च्चनप्रिया॥ ६३॥

देवदेवाङ्गनिलया देवदेवाङ्गशायिनी।
देवदेवाङ्गसुखिनी देवदेवाङ्गवासिनी॥ ६४॥

देवदेवाङ्गभूषा च देवदेवाङ्गभूषणा।
देवदेवप्रियकरी देवदेवाप्रियान्तकृत्॥

देवदेवप्रियप्राणा देवदेवप्रियात्मिका।
देवदेवार्च्चकप्राणा देवदेवार्च्चकप्रिया॥ ६६॥

देवदेवार्च्चकोत्साहा देवदेवार्च्चकप्रिया।

देवदेवार्च्चका विघ्ना देवदेवप्रसूरपि॥ ६७॥

देवदेवस्य जननी देवदेवविधायिनी।
देवदेवस्य रमणी देवदेवहृदाश्रया॥ ६८॥

देवदेवेष्टदेवी च देवतापसपातिनी।
देवताभावसन्तुष्टा देवताभावतोषिता॥ ६९॥

देवताभाववरदा देवताभावसिद्धिदा।
देवताभावसंसिद्धा देवताभावसम्भवा॥ ७०॥

देवताभावसुखिनीर्देवताभाववन्दिता।
देवताभावसुप्रीता देवताभावहर्षदा॥ ७१॥

देवताविघ्नहन्त्री च देवताद्विष्टनाशिनी।
देवतापूजितपदा देवताप्रेमतोषिता॥ ७२॥

देवतागारनिलया देवतासौख्यदायिनी।
देवतानिजभावा च देवताहृतमानसा॥ ७३॥

देवताकृतपादार्च्चा देवताहृतभक्तिका।

p. 432) देवतागर्वमध्यस्था देवतादेवतादनुः॥ ७४॥

दुन्दुर्गायै नमोनाम्नी दूंफट्मन्त्रस्वरूपिणी।

दूंनमोमन्त्ररूपा च दूंनमोमूर्त्तिकात्मिका॥ ७५॥

दूरदर्शिप्रिया दुष्टादुष्टभूतनिषेविता।

दूरदर्शिप्रेमरता दूरदर्शिप्रियँवदा॥ ७६॥

दूरदर्शिसिद्धिदात्री दूरदर्शिप्रतोषिता।

दूरदर्शिकण्ठसंस्था दूरदर्शिप्रहर्षिता॥ ७७॥

दूरदर्शिगृहीतार्चा दूरदर्शिप्रतर्पिता।

दूरदर्शिप्राणतुल्या दूरदर्शिसुखप्रदा॥ ७८॥

दूरदर्शिभ्रान्तिहरा दूरदर्शिहृदास्पदा।

दूरदृश्यरिविद्भावा दीग्घदर्शिप्रमोदिनी॥ ७९॥

दीग्घदर्शिप्राणतुल्या दीग्घदर्शिवरप्रदा।

दीग्घदर्शिहर्षदात्री दीग्घदर्शिप्रहर्षिता॥ ८०॥

दीग्घदर्शिमहानन्दा दीग्घदर्शिगृहालया।
दीग्घदर्शिगृहीतार्चा दीग्घदर्शिहृतार्हणा॥ ८१॥

दया दानवती दात्री दयालूर्दीनवत्सला।
दयार्द्रा च दयाशीला दयाढ्या च दयात्मिका॥ ८२॥

दयाम्बुधिर्द्दयासारा दयासागरपारगा।
दयासिन्धुर्दयाभारा दयावत्करुणाकरी॥ ८३॥

दयावद्वत्सला देवी दयादानरता सदा।
दयावद्भक्तिसुखिनी दयावत्परितोषिता॥ ८४॥

दयावत्स्नेहनिरता दयावत्प्रतिपादिका।
दयावत्त्राणकर्त्री च द्यावन्मुक्तिदायिनी॥ ८५॥

दयावद्भावसन्तुष्टा दयावत्परितोषिता।
दयावत्तारणपरा दयावत्सिद्धिदायिनी॥ ८६॥

दयावत्पुत्रवद्भावा दयावत्पुत्ररूपिणी।

दयावद्देहंनिलया दयाबन्धु दयाश्रया॥ ८७॥

दयालूवात्सल्यकरी दयालूसिद्धिदायिनी।
दयालूशरणासक्ता दयालूदेहमन्दिरा॥ ८८॥

दयालूभक्तिभावस्था दयालूप्राणरूपिणी।
दयालूसुखदादम्भा दयालूप्रेमवर्षिणी॥ ८९॥

दयालूवशगा दीग्घा दीग्घाङ्गी दीग्घलोचना।
दीग्घनेत्रा दीग्घचक्षुर्दीग्घबाहुलतात्मिका॥ ९०॥

दीग्घकेशी दीग्घमुखी दीग्घघोणा च दारुणा।
दारुणासुरहन्त्री च दारुणासुरदारिणी॥ ९१॥

p. 433) दारुणाहवकर्त्री च दारुणाहवहर्षिता।
दारुणाहवहोमाढ्या दारुणाचलनाशिनी॥ ९२॥

दारुणाचारनिरता दारुणोत्सवहर्षिता।
दारुणोद्यतरूपा च दारुणारिनिवारिणी॥ ९३॥

दारुणेक्षणसँउक्ता दोश्चतुष्कविराजिता।
दशदोष्का दशभुजा दशबाहुविराजिता॥ ९४॥

दशास्त्रधारिणी देवी दशदिक्ख्यातविक्रमा।
दशरथार्च्चितपदा दाशरथिप्रिया सदा॥ ९५॥

दाशरथिप्रेमतुष्टा दाशरथिरतिप्रिया।
दाशरथिप्रियकरी दाशरथिप्रियँवदा॥ ९६॥

दाशरथीष्टसन्दात्री दाशरथीष्टदेवता।
दाशरथिद्वेषिनाशा दाशरथ्यानुकूल्यदा॥ ९७॥

दाशरथिप्रियतमा दाशरथिप्रपूजिता।
दशाननारिसम्पूज्या दशाननारिदेवता॥ ९८॥

दशाननारिप्रमदा दशाननारिजन्मभूः।
दशाननारिरतिदा दशाननारिसेविता॥ ९९॥

दशाननारिसुखदा दशाननारिवैरिहृत्।
दशाननारीष्टदेवी दशग्रीवारिवन्दिता॥ १००॥

दशग्रीवारिजननी दशग्रीवारिभाविनी।
दशग्रीवारिसहिता दशग्रीवसभाजिता॥ १०१॥

दशग्रीवारिरमणी दशग्रीववधूरपि।
दशग्रीवनाशकर्त्री दशग्रीववरप्रदा॥ १०२॥

दशग्रीवपुरस्था च दशग्रीववधोत्सुका।
दशग्रीवप्रीतिदात्री दशग्रीवविनाशिनी॥ १०३॥

दशग्रीवाहवकरी दशग्रीवानपायिनी।
दशग्रीवप्रियावन्द्या दशग्रीवाहृता तथा॥ १०४॥

दशग्रीवाहितकरी दशग्रीवेश्वरप्रिया।
दशग्रीवेश्वरप्राणा दशग्रीववरप्रदा॥ १०५॥

दशग्रीवेश्वररता दशवर्षीयकन्यका।
दशवर्षीयबाला च दशवर्षीयवासिनी॥ १०६॥

दशपापहरा दम्या दशहस्तविभूषिता।

दशशस्त्रलसद्दोष्का दशदिक्पालवन्दिता॥ १०७॥

दशावताररूपा च दशावताररूपिणी।
दशविद्याभिन्नदेवी दशप्राणस्वरूपिणी॥ १०८॥

दशविद्यास्वरूपा च दशविद्यामयी तथा।
दृक्स्वरूपा दृक्प्रदात्री दृग्रूपा दृक्प्रकाशिनी॥ १०९॥

p. 434) दिगन्तरा दिगन्तस्स्था दिगम्बरविलासिनी।
दिगम्बरसमाजस्था दिगम्बरप्रपूजिता॥ ११०॥

दिगम्बरसहचरी दिगम्बरकृतास्पदा।
दिगम्बरहृताचित्ता दिगम्बरकथाप्रिया॥ १११॥

दिगम्बरगुणरता दिगम्बरस्वरूपिणी।
दिगम्बरशिरोधार्या दिगम्बरहृताश्रया॥ ११२॥

दिगम्बरप्रेमरता दिगम्बररतातुरा।
दिगम्बरीस्वरूपा च दिगम्बरीगणार्चिता॥ ११३॥

दिगम्बरीगणप्राणा दिगम्बरीगणप्रिया।
दिगम्बरीगणाराध्या दिगम्बरगणेश्वरी॥ ११४॥

दिगम्बरगणस्पर्शामदिरापानविह्वला।
दिगम्बरीकोटिवृता दिगम्बरीगणावृता॥ ११५॥

दुरन्ता दुष्कृतिहरा दुर्ध्येया दुरतिक्रमा।
दुरन्तदानवद्वेष्टी दुरन्तदनुजान्तकृत्॥ ११६॥

दुरन्तपापहन्त्री च दस्त्रनिस्तारकारिणी।
दस्त्रमानससंस्थाना दस्त्रज्ञानविवर्द्धिनी॥ ११७॥

दस्त्रसम्भोगजननी दस्त्रसम्भोगदायिनी।
दस्त्रसम्भोगभवना दस्त्रविद्याविधायिनी॥ ११८॥

दस्त्रोद्वेगहरा दस्त्रजननी दस्त्रसुन्दरी।
दस्त्रभक्तिविधाज्ञाना दस्त्रद्विष्टविनाशिनी॥ ११९॥

दस्त्रापकारदमनी दस्त्रसिद्धिविधायिनी।
दस्त्रताराराधिता च दस्त्रमातुप्रपूजिता॥ १२०॥

दस्त्रदैन्यहरा चैव दस्त्रतातनिषेविता।
दस्त्रपितृशतज्योतिर्दस्त्रकौशलदायिनी॥ १२१॥

दशशीर्षारिसहिता दशशीर्षारिकामिनी।
दशशीर्षपुरी देवी दशशीर्षसभाजिता॥ १२२॥

दशशीर्षारिसुप्रीता दशशीर्षवधूप्रिया।
दशशीर्षशिरश्छेत्री दशशीर्षनितम्बिनी॥ १२३॥

दशशीर्षहरप्राणा दशशीर्षहरात्मिका।
दशशीर्षहराराध्या दशशीर्षारिवन्दिता॥ १२४॥

दशशीर्षारिसुखदा दशशीर्षकपालिनी।
दशशीर्षज्ञानदात्री दशशीर्षारिदेहिता॥ १२५॥

दशशीर्षवधोपात्तश्रीरामचंद्ररूपता।
दशशीर्षराष्ट्रदेवी दशशीर्षारिसारिणी॥ १२६॥

p. 435) दशशीर्षभ्रातृतुष्टा दशशीर्षवधूप्रिया।

दशशीर्षवधूप्राणा दशशीर्षवधूरता॥ १२७॥

दैत्यगुरुरतासाध्वी दैत्यगुरुप्रपूजिता।
दैत्यगुरूपदेष्ट्री च दैत्यगुरुनिषेविता॥ १२८॥

दैत्यगुरुगतप्राणा दैत्यगुर्त्तापनाशिनी।
दुरन्तदुःखशमनी दुरन्तदमनीतमी॥ १२९॥

दुरन्तशोकशमनी दुरन्तरोगनाशिनी।
दुरन्तवैरिदमनी दुरन्तदैत्यनाशिनी॥ १३०॥

दुरन्तकलूषघ्नी च दुःकृतिस्तोमनाशिनी।
दुराशया दुराधारा दुर्ज्जया दुष्टकामिनी॥ १३१॥

दर्शनीया च दृश्या च दृश्या च दृष्टिगोचरा।
दूतीयागप्रिया दूती दूतीयागकरप्रिया॥ १३२॥

दूतीयागकरानन्दा दूतीयागसुखप्रदा।
दूतीयागकरायाता दूतीयागप्रमोदिनी॥ १३३॥

दुर्वासः पूजिता चैव दूर्वासोमुनिभाविता।
दुर्वासोर्चितपादा च दुर्वासोमुनिभाविता॥ १३४॥

दुर्वासोमुनिवन्द्या च दुर्वासोमुनिदेवता।
दुर्वासोमुनिमाता च दुर्वासोमुनिसिद्धिदा॥ १३५॥

दुर्वासोमुनिभावस्था दुर्वासोमुनिसेविता।
दुर्वासोमुनिचित्तस्था दुर्वासोमुनिमण्डिता॥ १३६॥

दुर्वासोमुनिसञ्चारा दुर्वासोहृदयङ्गमा।
दुर्वासोहृदयाराध्या दुर्वासोहृत्सरोजगा॥ १३७॥

दुर्वासस्तापसाराध्या दुर्वासस्तापसाश्रया।
दुर्वासस्तापसरता दुर्वासस्तापसेश्वरी॥ १३८॥

दुर्वासोमुनिकन्या च दुर्वासोद्भूतसिद्धिदा।
दररात्री दरहरा दरयुक्ता दरापहा॥ १३९॥

दरघ्नी दरहन्त्री च दरयुक्ता दराश्रया॥ १४०॥

दरस्मेरा दरापाङ्गी दयादात्री दयाश्रमा।
दस्त्रपूज्या दस्त्रमाता दस्त्रदेवीदरोन्मदा॥ १४१॥

दस्त्रसिद्धा दस्त्रसंस्था दस्त्रतापविमोचिनी।
दस्त्रक्षोभहरा नित्या दस्त्रलोकगतात्मिका॥ १४२॥

दैत्यगुर्वङ्गनावन्द्या दैत्यगुर्वङ्गनाप्रिया।
दैत्यगुर्वङ्गनासिद्धा दैत्यगुर्वङ्गनोत्सुका॥ १४३॥

दैत्यगुरुप्रियतमा दैत्यगुरुनिषेविता।
p. 436) देवगुरुप्रसूरूपा देवगुरुकृतार्हणा॥ १४४॥

देवगुरुप्रेमयुता देवगुर्वनुमानिता।
देवगुरुप्रभावज्ञा देवगुरुसुखप्रदा॥ १४५॥

देवगुरुज्ञानदात्री देवगुरुप्रमोदिनी।
दैत्यस्त्रीगणसम्पूज्या दैत्यस्त्रीगणपूजिता॥ १४६॥

दैत्यस्त्रीगणरूपा च दैत्यस्त्रीचित्तहारिणी।
देवस्त्रीगणपूज्या च देवस्त्रीगणवन्दिता॥ १४७॥

देवस्त्रीगणचित्तस्था देवस्त्रीगणभूषिता।
देवस्त्रीगणसंसिद्धा देवस्त्रीगणतोषिता॥ १४८॥

देवस्त्रीगणहस्तस्थचारुचामरवीजिता।
देवस्त्रीगणहस्तस्थ-चारुगन्धविलेपिता॥ १४९॥

देवाङ्गनाधृतादर्शदृष्ट्यर्थमुखचन्द्रमा।
देवाङ्गनोत्सृष्टनागवल्लीदलकृतोत्सुका॥ १५०॥

देवस्त्रीगणहस्तस्थदीपमालाविलोकना।
देवस्त्रीगणहस्तस्थ-धूपघ्राणविनोदिनी॥ १५१॥

देवनारीकरगतवासकासवपायिनी।
देवनारीकङ्कतिका-कृत्तकेशनिमार्ज्जना॥ १५२॥

देवनारीरुष्टगात्रा देवनारीकृतोत्सुका।
देवनारीविरचिता-पुष्पमालाविराजिता॥ १५३॥

देवनारीविचित्राङ्गी देवस्त्रीदत्तभोजना।

देवस्त्रीगणगीता च देवस्त्रीगीतसोत्सुका॥ १५४॥

देवस्त्रीनृत्यसुखिनी देवस्त्रीनृत्यप्रदर्शिनी।
देवस्त्रीयोजितलसद्रत्नपादुपदाम्बुजा॥ १५५॥

देवस्त्रीगणविस्तीर्ण-चारुतल्पनिषेदुषी।
देवनारीचारुकरा-कलिताङ्घ्र्यादिदेहिका॥ १५६॥

देवनारीकरव्यग्र-तालवृन्तमरुत्सुखा।
देवनारीवेणुवीणा-नादसोत्कण्ठमानसा॥ १५७॥

देवकोटिस्तुतिनुता देवकोटिकृतार्हणा।
देवकोटिगीतगुणा देवकोटिकृतस्तुतिः॥ १५८॥

दन्तदष्टोद्वेगफला देवकोलाहलाकुला।
द्वेषरागपरित्यक्ता द्वेषरागविवर्जिता॥ १५९॥

दामपूज्या दामभूषा दामोदरविलासिनी।
दामोदरप्रेमरता दामोदरभगिन्यपि॥ १६०॥

दामोदरप्रसूर्द्दामोदरपत्नीपतिव्रता।
दामोदराभिन्नदेहा दामोदररतिप्रिया॥ १६१॥

p. 437) दामोदराभिन्नतनुर्द्दामोदरकृतास्पदा।
दामोदरकृतप्राणा दामोदरगतात्मिका॥ १६२॥

दामोदरकौतुकाढ्या दामोदरकलाकला।
दामोदरालिङ्गिताङ्गी दामोदरकुतूहला॥ १६३॥

दामोदरकृताह्लादा दामोदरसुचुम्बिता।
दामोदरसुताकृष्टा दामोदरसुखप्रदा॥ १६४॥

दामोदरसहाढ्या च दामोदरसहायिनी।
दामोदरगुणज्ञा च दामोदरवरप्रदा॥ १६५॥

दामोदरानुकूला च दामोदरनितम्बिनी।
दामोदरजलक्रीडा-कुशलादर्शनप्रिया॥ १६६॥

दामोदरबलक्रीडा-त्यक्तस्वजनसौहृदा।
दामोदरलसद्रास-केलिकौतुकिनी तथा॥ १६७॥

दामोदरभ्रातृका च दामोदरपरायणा।
दामोदरधरा दामोदरवैरिविनाशिनी॥ १६८॥

दामोदरोपजाया च दामोदरनिमन्त्रिता।
दामोदरपराभूता दामोदरपराजिता॥ १६९॥

दामोदरसमाक्रान्ता दामोदरहताशुभा।
दामोदरोत्सवरता दामोदरोत्सवावहा॥ १७०॥

दामोदरस्तन्यदात्री दामोदरगवेषिता।
दमयन्तीसिद्धिदात्री दमयन्तीप्रसाधिता॥ १७१॥

दमयन्तीष्टदेवी च दमयन्तीस्वरूपिणी।
दमयन्तीकृतार्चा च दमनर्षिविभाविता॥ १७२॥

दमनर्षिप्राणतुल्या दमनर्षिस्वरूपिणी।
दमनर्षिस्वरूपा च दम्भपूरितविग्रहा॥ १७३॥

दम्भहन्त्री दम्भदात्री दम्भलोकविमोहिनी।

दम्भशीला दम्भहरा दम्भवत्परिमर्द्दिनी॥ १७४॥

दम्भरूपा दम्भकरी दम्भसन्तानदारिणी।
दत्तमोक्षा दत्तधना दत्तरोग्याथ दाम्भिका॥ १७५॥

दत्तपुत्रा दत्तदारा दत्तहारा च दारिका।
दत्तभोगा दत्तशोका दत्तहस्त्यादिवाहना॥ १७६॥

दत्तमतिर्दत्तभार्या दत्तशास्त्रावबोधिका।
दत्तपाना दत्तदाना दत्तदारिद्र्यनाशिनी॥ १७७॥

दत्तसौधावनीवासा दत्तस्वर्गा च दासदा।
दास्यतुष्टा दास्यहरा दासदासीशतप्रदा॥ १७८॥

दाररूपा दारवासा दारवासिर्हृदास्पदा।
p. 438) दारवासिजनाराध्या दारवासिजनप्रिया॥ १७९॥

दारवासिविनिर्न्नीता दारवासिसमर्च्चिता।
दारवास्याहृतप्राणा दारवास्यरिनाशिनी॥ १८०॥

दारवासिविघ्नहरा दारवासिविमुक्तिदा।
दाराग्निरूपिणी दारा दारकार्यरिनाशिनी॥ १८१॥

दम्पती दम्पतीष्टा च दम्पतीप्राणरूपिका।
दम्पतिस्नेहनिरता दाम्पत्यसाधनप्रिया॥ १८२॥

दाम्पत्यसुखसेना च दाम्पत्यसुखदायिनी।
दाम्पत्याचारनिरता दम्पत्यामोदमोदिता॥ १८३॥

दम्पत्यामोदसुखिनी दाम्पत्याह्लादकारिणी।
दम्पतीष्टपादपद्मा दाम्पत्यप्रेमरूपिणी॥ १८४॥

दाम्पत्यभोगभवना दाडिमीफलभोजिनी।
दाडिमीफलसन्तुष्टा दाडिमीफलमानसा॥ १८५॥

दाडिमीवृक्षसंस्थाना दाडिमीवृक्षवासिनी।
दाडिमीवृक्षरूपा च दाडिमीवनवासिनी॥ १८६॥

दाडिमीफलसाम्योरुपयोधरविवर्जिता।
दक्षिणा दक्षिणारूपा दक्षिणारूपधारिणी॥ १८७॥

दक्षकन्या दक्षपुत्री दक्षमाता च दक्षसूः।
दक्षगोत्रा दक्षसुता दक्षयज्ञविनाशिनी॥ १८८॥

दक्षयज्ञनाशकर्त्री दक्षयज्ञान्तकारिणी।
दक्षप्रसूतिर्दक्षेज्या दक्षवंशैकपावनी॥ १८९॥

दक्षात्मजा दक्षसूनुर्दक्षजा दक्षजातिका।
दक्षजन्मा दक्षजनुर्दक्षदेहसमुद्भवा॥ १९०॥

दक्षजनिर्दक्षयागध्वंसिनी दक्षकन्यका।
दक्षिणाचारनिरता दक्षिणाचारतुष्टिदा॥ १९१॥

दक्षिणाचारसंसिद्धा दक्षिणाचारभाविता।
दक्षिणाचारसुखिनी दक्षिणाचारसाधिता॥ १९२॥

दक्षिणाचारमोक्षाप्तिर्दक्षिणाचारवन्दिता।
दक्षिणाचारशरणा दक्षिणाचारहर्षिता॥ १९३॥

द्वारपालप्रिया द्वारवासिनी द्वारसंस्थिता।

द्वाररूपा द्वारसंस्था द्वारदेशनिवासिनी॥ १९४॥

द्वारकारी द्वारधात्री दोषमात्रविवर्ज्जिता।
दोषकरा दोषहरा दोषराशिविनाशिनी॥ १९५॥

दोषाकरविभूषाढ्या दोषाकरकपालिनी।
p. 439) दोषाकरसहस्राभा दोषाकरसमानना॥ १९६॥

दोषाकरमुखीदिव्या दोषाकरकराग्रजा।
दोषाकरसमज्योतिर्दोषाकरसुशीतला॥ १९७॥

दोषाकरश्रेणि दोषसदृशापाङ्गवीक्षणा।
दोषाकरेष्टदेवी च दोषाकरनिषेविता॥ १९८॥

दोषाकरप्राणरूपा दोषाकरमरीचिका।
दोषाकरोल्लसद्भाला दोषाकरसुहर्षिणी॥ १९९॥

दोषाकरशिरोभूषा दोषाकरवधूप्रिया।
दोषाकरवधूप्राणा दोषाकरवधूर्म्मता॥ २००॥

दोषाकरवधूप्रीता दोषाकरवधूरपि।
दोषापूज्या तथा दोषापूजिता दोषहारिणी॥ २०१॥

दोषाजापमहानन्दा दोषाजापपरायणा।
दोषापुरश्चाररता दोषापूजकपुत्रिणी॥ २०२॥

दोषापूजकवात्सल्यकारिणी जगदम्बिका।
दोषापूजकवैरिघ्नी दोषापूजकविघ्नहृत्॥ २०३॥

दोषापूजकसन्तुष्टा दोषापूजकमुक्तिदा।
दमप्रसूनसम्पूज्या दमपुष्पप्रिया सदा॥ २०४॥

दुर्योधनपूज्या च दुःशासनसमर्चिता।
दण्डपाणिप्रिया दण्डपाणिमाता दयानिधिः॥ २०५॥

दण्डपाणिसमाराध्या दण्डपाणिप्रपूजिता।
दण्डपाणिगृहासक्ता दण्डपाणिप्रियँवदा॥ २०६॥

दण्डपाणिप्रियमता दण्डपाणिमनोहरा।
दण्डपाणिहृतप्राणा दण्डपाणिसुसिद्धिदा॥ २०७॥

दण्डपाणिपरामृष्टा दण्डपाणिप्रहर्षिता।

दण्डपाणिविघ्नहरा दण्डपाणिशिरोधृता॥ २०८॥

दण्डपाणिप्राप्तचर्च्चा दण्डपाण्युन्मुखी सदा।

दण्डपाणिप्राप्तपदा दण्डपाणिवरोन्मुखी॥ २०९॥

दण्डहस्ता दण्डपाणिर्द्दण्डबाहुर्द्दरान्तकृत्।

दण्डदोष्का दण्डकरा दण्डचित्तकृतास्पदा॥ २१०॥

दण्डविद्या दण्डिमाता दण्डिखण्डकनाशिनी।

दण्डिप्रिया दण्डिपूज्या दण्डिसन्तोषदायिनी॥ २११॥

दस्युपूज्या दस्युरता दस्युद्रविणदायिनी।

दस्युवर्गकृतार्हा च दस्युवर्गविनाशिनी॥ २१२॥

p. 440) दस्युनिर्नाशिनी दस्युकुलनिर्न्नाशिनी तथा।

दस्युप्रियकरी दस्युनृत्यदर्शनतत्परा॥ २१३॥

दुष्टदण्डकरी दुष्टवर्गविद्राविणी तथा।

दुष्टवर्गनिग्रहार्हा दूषकप्राणनाशिनी॥ २१४॥

दूषकोत्तापजननी दूषकारिष्टकारिणी।
दूषकद्वेषनकरी दाहिका दहनात्मिका॥ २१५॥

दारकारीनिहन्त्री च दारुकेश्वरपूजिता।
दारकेश्वरमाता च दारुकेश्वरवन्दिता॥ २१६॥

दर्भहस्ता दर्भयुता दर्भकर्मविवर्जिता।
दर्भमयी दर्भतनुर्दर्भसर्वस्वरूपिणी॥ २१७॥

दर्भकर्माचाररता दर्भहस्तकृतार्हणा।
दर्भानुकूला दार्भय्या दर्वीपात्रानुदामिनी॥ २१८॥

दमघोषप्रपूज्या च दमघोषवरप्रदा।
दमघोषसमाराध्या दावाग्निरूपिणी तथा॥ २१९॥

दावाग्निरूपा दावग्निनिर्न्नाशितमहाबला।
दन्तदंष्ट्रासुरकला दन्तचर्च्चितहस्तिका॥ २२०॥

दन्तदंष्ट्रस्यन्दना च दन्तनिर्न्नाशितासुरा।
दधिपूज्या दधिप्रीता दधीचिवरदायिनी॥ २२१॥

दधीचीष्टदेवता च दधीचिमोक्षदायिनी।
दधीचिदैन्यहन्त्री च दधीचिदरदारिणी॥ २२२॥

दधीचिभक्तिसुखिनी दधीचिमुनिसेविता।
दधीचिज्ञानदात्री च दधीचिगुणदायिनी॥ २२३॥

दधीचिकुलसम्भूषा दधीचिभुक्तिमुक्तिदा।
दधीचिकुलदेवी च दधीचिकुलदेवता॥ २२४॥

दधीचिकुलगम्या च दधीचिकुलपूजिता।
दधीचिसुखदात्री च दधीचिदीनहारिणी॥ २२५॥

दधीचिदुःखहन्त्री च दधीचिकुलसुन्दरी।
दधीचिकुलसम्भूता दधीचिकुलपालिनी॥ २२६॥

दधीचिदानगम्या च दधीचिदानमानिनी।
दधीचिदानसन्तुष्टा दधीचिदानदेवता॥ २२७॥

दधीचिजयसम्प्रीता दधीचिजपमानसा।

दधीचिजपपूजाढ्या दधीचिजपमालिका॥ २२८॥

दधीचिजपसन्तुष्टा दधीचिजपतोषिणी।

p. 441) दधीचितपसाराध्या दधीचिशुभदायिनी॥ २२९॥

दूर्वा दूर्वादलश्यामा दूर्वादलसमद्युतिः।

नाम्नां सहस्त्रन्दुर्गाया दादीनामिति कीर्त्तितम्॥ २३०॥

यः पठेत्साधकाधीशः सर्वसिद्धीर्ल्लभेत्तु सः।

प्रातर्म्मध्याह्नकाले च सन्ध्यायां नियतः शुचिः॥ २३१॥

तथार्द्धरात्रसमये स महेश इवापरः।

शक्तियुक्तो महारात्रौ महावीरः प्रपूजयेत्॥ २३२॥

महादेवीम्मकाराद्यैः पञ्चभिर्द्रव्यसत्तमैः।

तत्पठेत्स्तुतिमिमाँय्यस्स च सिद्धिस्वरूपधृक्॥ २३३॥

देवालये श्मशाने च गङ्गातीरे निजे गृहे।

वाराङ्गनागृहे चैव श्रीगुरोस्सन्निधावपि॥ २३४॥

पर्वते प्रान्तरे घोरे स्तोत्रमेतत्सदा पठेत्।
दुर्गानामसहस्रं हि दुर्गां पश्यति चक्षुषा॥ २३५॥

शतावर्त्तनमेतस्य पुरश्चरणमुच्यते।
स्तुतिसारो निगदितः किम्भूयः श्रोतुमिच्छसि॥ २३६॥

इति श्रीकुलार्णवे दुर्गादकारादिसहस्रनामस्तोत्रं समाप्तम्।

इति शाक्तप्रमोदे दुर्गातन्त्रं समाप्तम्॥

श्रीः

शिवहरराजधानीपतिश्रीराजादेवनन्दनसिंह-
बाहादुरनराधिपसंगृहीतविरचित-

शाक्तप्रमोदान्तर्गतं

चतुर्दशं

शिवतन्त्रम्

उक्तराजगुरुवंश्यपण्डितश्रीरघुराजदुबेजीद्वारा

संशोधितम्

तदेतत्

श्रीकृष्णदासात्मज-खेमराजेन

स्वकीये श्रीवेंकटेश्वर यन्त्रालये

मुद्रयित्वा प्रकाशितम्

मुम्ब-ई

श्रीगणेशाय नमः

अथ शाक्तप्रमोदः

अथ शिवतन्त्रम्

अथ शिवध्यानम्

ध्यायेन्नित्यम्महेशं रजतगिरिनिभञ्चारुचन्द्रावतंसं
रत्नाकाल्पोज्ज्वलाङ्गम्परशुमृगवराभीतिहस्तम्प्रसन्नम्।

पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिँव्वसानँ
व्विश्वाद्यँव्विश्वबीजन्निखिलभयहरम्पञ्चवक्त्रन्त्रिनेत्रम्॥ १॥

p. 446) अथ यन्त्रोद्धारः

अनुक्तकल्पे यन्त्रन्तु लिखेत्पद्मदलाष्टकम्॥

षड्कोणकर्णिकन्तत्र वेदद्वारोपशोभितम्॥

अथ मन्त्रोद्धारः

नमस्कारं समुद्धृत्य वान्तं नेत्रसमन्वितम्।
वारुणम्मुखवृत्तञ्च वायुं लालाटसँयुतम्॥
अमुम्पञ्चाक्षरम्मन्त्रम्पञ्चकामफलप्रदम्।
प्रणवादिर्यदा देवि तदा मन्त्रः षडक्षरः॥

अथ मन्त्रः

ॐ नमश्शिवाय।

अथ पूजाप्रयोगः

प्रातः कृत्यादिकङ्कृत्वा पूजागृहङ्गत्वा आसने उपविश्य
दीपम्प्रज्वाल्य ॐ दींदीपनाथायनम इति दीपं सम्पूज्य
भूतापसर्पणङ्कृत्वा पूजामारमेत्। तद्यथा॥ अथ ध्यानम्॥

बन्धूकसन्निभन्देवन्त्रिनेत्रञ्चन्द्रशेखरम्।

त्रिशूलधारिणन्देवञ्चारुहासं सुनिर्म्मलम्॥ १॥

कपालधारिणन्देवँव्वरदाभयहस्तकम्।

उमया सहितं शम्भुन्ध्यायेत्सोमेश्वरं सदा॥ २॥ इति ध्यानम्॥

अथावाहनम्॥

आयाहि भगवञ्छम्भो शर्व त्वङ्गिरिजापते।

प्रसन्नो भव देवेश नमस्तुभ्यं हि शङ्कर॥ इत्यावाहनम्॥

अथासनम्॥

p. 447) विश्वेश्वर महादेव राजराजेश्वरप्रिय।

आसनन्दिव्यमीशान दास्येऽहन्तुभ्यमीश्वर॥ इत्यासनम्॥

अथपाद्यम्

महादेव महेशान महादेव परात्पर।

पाद्यङ्गृहाण मद्दत्तम्पार्वतीसहितेश्वर॥ इति पाद्यम्॥

अथाग्घ्र्यम्

त्र्यम्बकेश सदाचार जगदादिविधायक।
अग्घ्र्यङ्गृहाण देवश साम्ब सर्वार्त्थदायक॥ इत्यग्घ्र्यम्॥

अथाचमनीयम्

त्रिपुरान्तक दीनार्त्तिनाशक श्रीकण्ठ शाश्वत।
गृहाणाचमनीयञ्च पवित्रोदककल्पितम्॥

इत्याचमनीयम्॥ अथ गोदुग्धस्नानम्॥

मधुरङ्गोपयः पुण्यम्पटपूतम्पुरस्कृतम्।
स्नानार्थन्देवदेवेश गृहाण परमेश्वर॥

इति दुग्धस्नानम्॥ अथ दधिस्नानम्॥

दुर्ल्लभन्दिवि सुस्वादु दधि सर्वप्रियम्परम्।

पुष्टिदम्पार्वतीनाथ स्नानाय प्रतिगृह्यताम्॥

इति दधिस्नानम्॥ अथ घृतस्नानम्॥

घृतङ्गव्यं शुचि स्निग्धं सुसेव्यम्पुष्टिमिच्छताम्।
गृहाणगिरिजानाथ स्नानाय चन्द्रशेखर॥

इति घृतस्नानम्॥ अथ मधुस्नानम्॥

मधुरम्मृदु मोहघ्नं स्वरभङ्गविनाशनम्॥

महादेवेदमुत्सृष्टन्तव स्नानाय शङ्कर॥

इति मधुस्नानम्॥ अथ शर्करास्नानम्॥

तापशान्तिकरी शीता मधुरास्वादसँयुता।
स्नानार्थन्देवदेवेश शर्करेयम्प्रदीयते॥

इति शर्करास्नानम्॥ अथ शुद्धोदकस्नानम्॥

गङ्गा गोदावरी रेवा पयोष्णी यमुना तथा।

सरस्वत्यादि तीर्त्थानि स्नानार्त्थम्प्रतिगृह्यताम्॥

अथ शतरुद्र्या स्नानम्॥ तदुद्धारो यथा॥

नमस्ते रुद्रसूक्तञ्च पुनः षोडशमेव च।

एष ते द्विर्न्नमस्ते द्विर्न्नतविद्वयमेव च॥

मीढुष्टमष्ट चत्वारि वयक्ष्वमष्टमञ्जपेत्॥

ॐ नमस्ते रुद्र मन्यवऽ-उतो त ऽ-इषवे नमः॥ बाहुभ्यामुत ते नमः॥ १

॥

या ते रुद्र शिवा तनूरघोराऽपापकाशिनी॥ तया नस्स्तन्वा शन्तमया

गिरिशन्ताभिचाकशीहि॥ २॥

यामिषुङ्गिरिशन्त हस्ते बिभर्ष्यस्तवे॥

p. 448) शिवाङ्गिरित्र ताङ्कुरु मा हिंसीः पुरुषञ्जगत्॥ ३॥

शिवेन व्वचसा त्वा गिरिशाऽच्छाव्वदामसि।

यथा नः सर्वमिज्जगदयक्ष्मं सुमना ऽ-असत्॥ ४॥

अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक्।
अहींश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्योऽधराचीः परासुव॥
५॥

असौ यस्ताम्रो ऽ-अरुण ऽ-उत बभ्रुः सुमङ्गलः।
ये चैनं रुद्रा ऽ-अभितो दिक्षु श्रिताः सहस्त्रशोऽवैषां हेड ऽ-ईमहे॥
६॥

असौ योऽवसर्पति नीलग्रीवो विलोहितः।
उतैनङ्गोपा ऽदृश्रन्नदृश्रन्नुदहार्यः स दृष्टो मृडयाति नः॥ ७॥

नमोऽस्तु नीलग्रीवाय सहस्त्राक्षाय मीढुषे।
अथो ये ऽ-अस्य सत्वानोऽहन्तेभ्योऽकरन्नमः॥ ८॥

प्रमुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्यार्म्।
याश्च ते हस्त इषवः परा ता भगवो व्वप॥ ९॥

विज्यन्धनुः कपर्दिनो विशल्यो बाणवाँ२॥ ऽ उत॥

अनेशन्नस्य या ऽ-इषव ऽ-आभुरस्य निषङ्गधिः॥ १०॥

या ते हेतिर्म्मीढुष्टम हस्ते बभूव ते धनुः।
तयास्मान्विश्वतस्त्वमयक्ष्मया परिभुज॥ ११॥

परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः।
अथो य ऽ-इषुधिस्तवारे ऽ-अस्मन्निधेहि तम्॥ १२॥

अवतत्य धनुष्ट्वं सहस्राक्ष शतेषुधे।
निशीर्य शल्यानाम्मुखा शिवो नः सुमना भव॥ १३॥

नमस्त ऽ-आयुधायानाततताय धृष्णवे।
उभाभ्यामुत ते नमो बाहुभ्यान्तव धन्वने॥ १४॥

मा नो महान्तमुत मा नो ऽ-अर्ब्भकम्मा न ऽ-उक्षन्तमुत मा न ऽ-
उक्षितम्॥
मा नो व्वधीः पितरम्मोत मातरम्मा नः प्रियास्तन्व्वो रुद्र रीरिषः॥
१५॥

मा नस्तोके तनये मा न ऽ-आयुषि मा नो गोषु मा नो ऽ-अश्वेषु रीरिषः।
मा नो व्वीरान् रुद्रभामिनो व्वधीर्हविष्मन्तः सदमित्त्वा हवामहे॥ १६
॥

नमो हिरण्यबाहवे सेनान्ये दिशाञ्च पतये नमो नमो वृक्षेभ्यो
हरिकेशेभ्यः पशूनाम्पतये नमो नमः शष्पिञ्जराय त्विषीमते
पथीनाम्पतये नमो नमो हरिकेशायोपवीतिने पुष्टानाम्पतये नमः॥
१७॥

p. 449) नमो बभ्लुशाय व्याधिने ऽन्नानाम्पतये नमो नमो भवस्य
हेत्यै जगताम्पतये नमो नमो रुद्रायाततायिने क्षेत्राणाम्पतये नमो
नमः सूतायाहन्त्यै व्वनानाम्पतये नमः॥ १८॥

नमो रोहिताय स्थपतये व्वृक्षाणाम्पतये नमो नमो भुवन्तये
व्वारिवस्कृतायौषधीनाम्पतये नमो नमो मन्त्रिणे व्वाणिजाय
कक्षाणाम्पतये नमो नम ऽ-उच्चैर्घोषाक्रन्दयते पत्तीनाम्पतये
नमः॥ १९॥

नमः कृत्स्नायतया धावते सत्त्वनाम्पतये नमो नमः सहमानाय
निव्व्याधिन आव्व्याधिनीनाम्पतये नमो नमो निषङ्गिणे ककुभाय

स्तेनानाम्पतये नमो नमो निचेरवे परिचरायारण्यानाम्पतये नमः॥ २०
॥

नमो व्वञ्चते परिवञ्चते स्तायूनाम्पतये नमो नमो निषङ्गिण ऽ-
इषुधिमते तस्कराणाम्पतये नमो नमः सृकायिभ्यो जिघांसद्भ्यो
मुष्णताम्पतये नमो नमो ऽसिमद्भ्योनक्तञ्चरद्भ्यो विकृन्तानाम्पतये
नमः॥ २१॥

नम ऽ-उष्णीषिणे गिरिचराय कुलूञ्चानाम्पतये नमो नम ऽ-इषुमद्भ्यो
धन्वायिभ्यश्च वो नमो नम ऽ-आतन्वानेभ्यः प्रतिदधानेभ्यश्च
वो नमो नम ऽ-आयच्छद्भ्योऽस्यद्भ्यश्च वो नमः॥ २२॥

नमो विसृजद्भ्यो विध्यद्भ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च
वो नमो नमः शयानेभ्य ऽ-आसीनेभ्यश्च वो नमो नमस्तिष्ठद्भ्यो
धावद्भ्यश्च वो नमः॥ २३॥

नमः सभाभ्यः सभापतिभ्यश्च वो नमो नमो ऽश्वेभ्यो
ऽश्वपतिभ्यश्च वो नमो नम ऽ-आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो
नमो नम ऽ-उगणाभ्यस्तृंहतीभ्यश्च वो नमः॥ २४॥

नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च
वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो
व्विश्वरूपेभ्यश्च वो नमः॥ २५॥

p. 450) नमः सेनाभ्यः सेनानिभ्यश्च वो नमो नमो रथिभ्यो ऽ-
अरथेभ्यश्च वो नमो नमः क्षत्तृभ्यः संग्रहीतृभ्यश्च वो नमो नमो
महद्भ्यो ऽ-अर्भकेभ्यश्च वो नमः॥ २६॥

नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः
कर्मारेभ्यश्च वो नमो नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च वो नमो
नमः श्वनिभ्यो मृगयुभ्यश्च वो नमः॥ २७॥

नमः श्वभ्यः श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च
नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिण्ठाय च॥ २८॥

नमः कपर्द्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च
शतधन्व्वने च नमो गिरिशयाय च शिपिविष्टाय च नमो मीढुष्टमाय
चेषुमते च॥ २९॥

नमो ह्रस्वाय व्वामनाय च नमो बृहते च वर्षीयसे च नमो वृद्धाय च

सवृधे च नमोऽग्र्याय च प्रथमाय च॥ ३०॥

नम ऽ-आशवे चाजिराय च नमः शीघ्र्याय च शीभ्याय च नम ऽ-
ऊम्र्म्याय चावस्वन्न्याय च नमो नादेयाय च द्वीप्याय च॥ ३१॥

नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च नमो
मध्यमाय चापगल्भाय च नमो जघन्न्याय च बुद्ध्न्याय च॥ ३२॥

नमः सोभ्याय च प्रतिसर्याय च नमो याम्याय च क्षेम्म्याय च नमः
श्लोक्याय चावसान्याय च नम ऽ-उर्वर्याय च खल्ल्याय च॥ ३३॥

नमो व्वन्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्रवाय च नम ऽ-
आशुषेणाय चाशुरथाय च नमः शूराय चावभेदिने च॥ ३४॥

नमो बिल्म्मिने च कवचिने च नमो व्वर्म्मिणे च वरूथिने च नमः श्रुताय
च श्रुतसेनाय च नमो दुन्दुभ्याय चाहनन्न्याय च॥ ३५॥

नमो धृष्णवे च प्रमृशाय च नमो निषङ्गिणे चेषुधिमते च
नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय च सुधन्व्वने च॥ ३६॥

नमः स्रुत्त्याय च पत्थ्याय च नमः काट्याय च नीप्याय च नमः
कुल्याय च सरस्याय च नमो नादेयाय च व्वैशन्ताय च॥ ३७॥

p. 451) नमः कूप्याय चाऽवट्याय च नमो वीद्ध्याय चातप्प्याय च
नमो मेग्घ्याय च विद्युत्त्याय च नमो वर्ष्ष्याय चावर्ष्ष्याय च॥ ३८॥

नमो वात्त्याय च रेष्म्याय च नमो वास्तव्याय च व्वास्तुपाय च नमः
सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च॥ ३९॥

नमः शङ्गवे च पशुपतये च नम ऽ-उग्राय च भीमाय च
नमोऽग्रेवधाय च दूरेवधाय च नमो हंत्रे च हनीयसे च नमो
वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय॥ ४०॥

नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय
च नमः शिवाय च शिवतराय च॥ ४१॥

नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च
नमस्तीर्त्थ्याय च कूल्याय च नमः शष्प्याय च फेन्न्याय च॥ ४२॥

नमः सिकत्त्याय च प्रवाह्याय च नमः किंशिलाय च क्षयणाय च

नमः कपर्दिने च पुलस्तये च नम इरिण्याय च प्रपत्थ्याय च॥ ४३॥

नमो व्रज्याय च गोष्ठ्याय च नमस्तल्प्याय च गेह्याय च नमो
ह्रदय्याय च निवेष्प्याय च नमः काट्याय च गह्वरेष्ठाय च॥ ४४॥

नमः शुष्क्याय च हरित्त्याय च नमः पांसव्याय च रजस्याय च नमो
लोप्प्याय चोलप्प्याय च नम ऊर्व्व्याय च सूर्व्व्याय च॥ ४५॥

नमः पर्णाय च पर्णशदाय च नम उद्गुरमाणाय चाभिघ्नते च
नम ऽखिदते च प्रखिदते च नम ऽ-इषुकृद्भ्यो धनुष्कृद्भ्यश्च वो
नमो नमो वः किरिकेभ्यो देवानां ह्रदयेभ्यो नमो विचिन्वत्त्केभ्यो नमो
विक्षिणत्त्केभ्यो नम ऽ-आनिर्हतेभ्यः॥ ४६॥

द्रापे ऽ-अन्धसस्पते दरिद्र नीललोहित॥
आसाम्प्रजानामेषाम्पशूनाम्मा भेर्म्मा रोङ्म्मो च नः
किञ्चनाममत्॥ ४७॥

p. 452) इमा रुद्राय तवसे कपर्द्दिने क्षयद्वीराय प्रभरामहे मतीः॥
यथा शमसद्द्विपदे चतुष्पदे विश्वम्पुष्टङ्ग्रामे ऽ-अस्मिन्ननातुरम्॥
४८॥

या ते रुद्र शिवा तनूः शिवा विश्वाहा भेषजी।
शिवा रुतस्य भेषजी तया नो मृड जीवसे ॥ ४९॥

परि नो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृड॥ ५०॥

मीढुष्टम शिवतम शिवो नः सुमना भव।
परमे वृक्ष ऽ-आयुधन्निधाय कृत्तिं व्वसान ऽ-अचार
पिनाकम्बिभ्रदागहि॥ ५१॥

विकिरिद्र विलोहित नमस्ते ऽ-अस्तु भगवः।
यास्ते सहस्रं हेतयो ऽन्यमस्म्मन्निवपन्तु ताः॥ ५२॥

सहस्राणि सहस्रशो बाह्वोस्तव हेतयः।
तासामीशानो भगवः पराचीना मुखा कृधि॥ ५३॥

असङ्ख्याता सहस्राणि ये रुद्रा ऽ-अधि भूम्याम्।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि॥ ५४॥

अस्मिन्महत्यर्णवे ऽन्तरिक्षे भवा ऽ-अधि।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि॥ ५५॥

नीलग्रीवाः शितिकण्ठा दिवं रुद्रा ऽ-उपश्रिताः।
तेषाँसहस्रयोजनेऽव धन्वानि तन्मसि॥ ५६॥

नीलग्रीवाः शितिकंठाः शर्वा ऽ-अधः क्षमाचराः।
तेषाँसहस्रयोजनेऽव धन्वानि तन्मसि॥ ५७॥

ये भूतानामधिपतयो विशिखासः कपर्द्दिनः।
तेषाँसहस्रयोजनेऽव धन्वानि तन्मसि॥ ५८॥

ये वृक्षेषु शष्पिञ्जरा नीलग्रीवा ष्विलोहिताः।
तेषाँसहस्रयोजनेऽव धन्वानि तन्मसि॥ ५९॥

ये पथाम्पथिरक्षय ऽ-ऐलबृदा आयुर्युधः।
तेषाँसहस्रयोजनेऽव धन्वानि तन्मसि॥ ६०॥

ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः।
तेषाँसहस्रयोजनेऽव धन्वानि तन्मसि॥ ६१॥

येऽन्नेषु व्विविध्यन्ति पात्रेषु पिबतो जनान्।
तेषाँसहस्रयोजनेऽव धन्वानि तन्न्मसि॥ ६२॥

य ऽ-एतावन्तश्च भूयाँसश्च दिशो रुद्रा व्वितस्थिरे।
p. 453) तेषाँसहस्रयोजनेऽव धन्वानि तन्मसि॥ ६३॥

नमोऽस्तु रुद्रेभ्यो ये दिवि येषाँव्वर्षमिषवः।
तेभ्यो दश प्राचीर्द्दश दक्षिणा दश प्रतीचीर्द्दशोदीचीर्द्दशोर्द्धाः
।
तेभ्यो नमो ऽ-अस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो
द्वेष्टि तमेषाञ्जम्भे दध्मः॥ ६४॥

नमोऽस्तु रुद्रेभ्यो ये ऽन्तरिक्षे येषाँव्वात ऽ-इषवस्तेभ्यो दश
प्राचीर्द्दश दक्षिणा दश प्रतीचीर्द्दशोदीचीर्द्दशोर्द्धाः।
तेभ्यो नमो ऽ-अस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो
द्वेष्टि तमेषाञ्जम्भे दध्मः॥ ६५॥

नमोऽस्तु रुद्रेभ्यो ये पृथिव्याँय्येषामन्नमिषवः।
तेभ्यो दश प्राचीर्द्दश दक्षिणा दश प्रतीचीर्द्दशोदीचीर्द्दशोर्द्धाः

॥

तेभ्यो नमो ऽ-अस्तु ते नोऽवन्तु ते नो मृडयंतु ते यं द्विष्मो यश्च नो

द्वेष्टि तमेषाञ्जम्भे दध्मः॥ ६६॥

नमस्ते रुद्र मन्यव ऽ-उतो त ऽ-इषवे नमः॥

बाहुभ्यामुत ते नमः॥ ६७॥

या ते रुद्र शिवा तनूरघोराऽपापकाशिनी।

तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि॥ ६८॥

यामिषुङ्गिरिशन्त हस्ते ब्बिभर्ष्यस्तवे।

शिवाङ्गिरित्र ताङ्कुरु मा हिंसीः पुरुषञ्जगत्॥ ६९॥

शिवेन व्वचसा त्वा गिरिशाऽच्छाव्वदामसि।

यथा नः सर्वमिज्जगदयक्ष्मं सुमनाऽ-असत्॥ ७०॥

अध्यवोचदधिवक्ता प्रथमो दैव्व्यो भिषक्।

अहींश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्योऽधराचीः परासुव॥

७१॥

असौ यस्ताम्रो ऽ-अरुण ऽ-उत बभ्रुः सुमङ्गलः।

ये चैनं रुद्रा ऽ-अभितो दिक्षु श्रिताः सहस्रशो ऽवैषाँहेड ऽ-ईमहे॥

७२॥

असौ योऽवसर्पति नीलग्रीवो व्विलोहितः। उतैनङ्गोपा ऽ-

अदृश्रन्नदृश्रन्नुदहार्यः स दृष्टो मृडयाति नः॥ ७३॥

नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे।

अथो ये ऽ-अस्य सत्त्वानोऽहन्तेभ्योऽकरन्नमः॥ ७४॥

प्रमुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्ज्याम्।

याश्च ते हस्त ऽ-इषवः परा ता भगवो व्वप॥ ७५॥

विज्यन्धनुः कपर्द्दिनो व्विशल्यो बाणवाँ२॥ उत॥ अनेशन्नस्य या ऽ-इषव

ऽ-आभुरस्य निषङ्गधिः॥ ७६॥

या ते हेतिर्म्मीढुष्टम हस्ते बभूव ते धनुः॥

तयाऽस्मान्विश्वतस्त्वमयक्ष्मया परिभुज॥ ७७॥

परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः।

अथो यऽ-इषुधिस्तवारे ऽ-अस्मन्निधेहि तम्॥ ७८॥

अवतत्त्य धनुष्ट्वं सहस्राक्ष शतेषुधे।

निशीर्य शल्यानाम्मुखा शिवो नः सुमना भव॥ ७९॥

नमस्त ऽ-आयुधायानाततताय धृष्णवे।

उभाभ्यामुत ते नमो बाहुभ्यान्तव धन्वने॥ ८०॥

मा नो महान्तमुत मा नो ऽ-अर्ब्भकम्मा न ऽ-उक्षन्तमुत मा न ऽ-

उक्षितम्।

मा नो व्वधीः पितरम्मोत मातरम्मा नः प्रियास्तन्व्वो रुद्र रीरिषः॥ ८१

॥

मा नस्तोके तनये मा न ऽ-आयुषि मा नो गोषु मा नो ऽ-अश्वेषु रीरिषः॥

मा नो व्वीरान्त्रुद्रभामिनो व्वधीर्हविष्मन्तः सदमित्त्वा हवामहे॥ ८२

॥

एष ते रुद्र भागः सह स्वस्त्राऽम्बिकया तञ्जुषस्व स्वाहैष ते रुद्र

भाग ऽखुस्ते पशुः॥ ८३॥

अव रुद्र मदीमह्यव देवन्त्र्यम्बकम्।

यथा नो व्वस्यसस्करद्यथा नः श्रेयस्करद्यथा नो व्व्यवसाययात्॥ ८४॥

नमस्ते हरसे शोचिषे नमस्ते ऽ-अस्त्वश्विषे।

अन्न्याँते ऽ-अस्म्मत्तपन्तु हेतयः पावको ऽ-अस्मभ्यं शिवो भव॥ ८५॥

नमस्ते ऽ-अस्तु विद्युते नमस्ते स्तनयित्नवे।

नमस्ते भगवन्नस्तु यतः स्वः समीहसे॥ ८६॥

न तँव्विदाथ य ऽ-इमा जजानान्यद्युष्माकमन्तरम्बभूव।

नीहारेण प्रावृता जल्प्या चासुतृप ऽऽ-उक्थशासश्चरन्ति॥ ८७॥

विश्वकर्मा ह्यजनिष्ट देव ऽ-आदिद्गन्धर्वो ऽ-अभवद्द्वितीयः॥

तृतीयः पिता जनितौषधीनामपाङ्गर्भं व्व्यदधात्पुरुत्रा॥ ८८॥

मीढुष्टम शिवतम शिवो नः सुमना भव।

परमे व्वृक्ष ऽ-आयुधन्निधाय कृत्तिं व्वसान ऽ-आचर

पिनाकम्बिभ्रदागहि॥ ८९॥

p. 455) विकिरिद्र व्विलोहित नमस्ते ऽ-अस्तु भगवः।

यास्ते सहस्रं हेतयोऽन्यमस्मन्निवपन्तु ताः॥ ९०॥

सहस्राणि सहस्रशो व्बाह्वोस्तव हेतयः।
तासामीशानो भगवः पराचीना मुखा कृधि॥ ९१॥

असङ्ख्याता सहस्राणि ये रुद्रा ऽ-अधि भूम्म्याम्।
तेषाँसहस्रयोजनेऽव धन्वानि तन्मसि॥ ९२॥

वयं सोम व्रते तव मनस्तनूषु बिभ्रतः।
प्रजावन्तः सचेमहि॥ ९३॥

एष ते रुद्र भागः सह स्वस्राऽम्बिकया तञ्जुषस्व स्वाहैष ते रुद्र
भाग ऽ-आखुस्ते पशुः॥ ९४॥

अव रुद्रमदीमह्यव देवन्त्र्यम्बकम्।
यथा नो वस्यसस्करद्यथा नः श्रेयसस्करद्यथा नो व्यवसाययात्॥ ९५॥

भेषजमसि भेषजङ्गवेऽश्वाय पुरुषाय भेषजम्।
सुखम्मेषाय मेष्यै॥ ९६॥

त्र्यम्बकँय्यजामहे सुगन्धिम्पुष्टिंवर्द्धनम्।

उर्वारुकमिव बन्धनान्न्मृत्योर्मुक्षीयमाऽमृतात्॥

त्र्यम्बकँय्यजामहे सुगन्धिम्पतिवेदनम्।

उर्वारुकमिव बन्धनादितो मुक्षीय मामुतः॥ ९७॥

एतत्ते रुद्राऽवसन्तेन परो मूजवतोऽतीहि॥ ९८॥

त्र्यायुषञ्जमदग्नेः कश्यपस्य त्र्यायुषम्।

यद्देवेषु त्र्यायुषन्तन्नो ऽ-अस्तु त्र्यायुषम्॥ ९९॥

शिवो नामासि स्वधितिस्ते पिता नमस्ते ऽ-अस्तु मा मा हिंसीः।

निवर्त्तयाम्यायुषेऽन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय

सुवीर्याय॥ १००॥

इति शुद्धोदकस्नानम्॥

अथ वस्त्रम्॥

वस्त्राणि पट्टकूलानि विचित्राणि नवानि च।

मयानीतानि देवेश प्रसन्नो भव शङ्कर॥

इति वस्त्रम्॥

अथोपवीतम्

सौवर्णं राजतन्ताम्रङ्कार्पासस्य तथैव च।
उपवीतम्मया दत्तं प्रीत्यर्त्थम्प्रतिगृह्यताम्॥

इत्युपवीतम्

अथ गन्धम्॥

सर्वेश्वर जगद्वन्द्य दिव्यासनसमास्थित।
गन्धङ्गृहाण देवेश चन्दनम्प्रतिगृह्यताम्॥ इति गन्धम्॥

अथाक्षतान्।

गन्धोपरि शुक्लाक्षतान्।

p. 456) अक्षताश्च सुरश्रेष्ठाः शुभ्रा धूताश्च निर्म्मलाः।

मया निवेदिता भक्त्या गृहाण परमेश्वर॥ इत्यक्षतान्।

अथ पुष्पाणि

माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो।
मयाहृतानि पूजार्त्थम्पुष्पाणि प्रतिगृह्यताम्॥ इति पुष्पाणि।

अथ बिल्वपत्राणि।

बिल्व पत्रं सुवर्णेन त्रिशूलाकारमेव च।
मयार्पितम्महादेव बिल्वपत्रङ्गृहाण मे॥

इति बिल्वपत्राणि॥

अथ धूपम्।

वनस्पतिरसोत्पन्नो गन्धाढ्यो गन्ध उत्तमः।
आघ्रेयः सर्वदेवानान्धूपोऽयम्प्रतिगृह्यता॥ इति धूपम्।

अथ दीपम्

आज्यात्तवर्त्तिसँयुक्तँव्वह्निना दीपितन्तु यत्।

दीपङ्गृहाण देवश त्रैलोक्यतिमिरापह॥ इति दीपम्॥

अथ नैवेद्यम्

अपूपानि च पक्वानि मण्डका वटकानि च।

पायसं सूपमन्नञ्च नैवेद्यम्प्रतिगृह्यताम्॥ इति नैवेद्यम्॥

अथाचमनीयम्॥

पानीयं शीतलं शुद्धञ्चाङ्गेयम्महदुत्तमम्।

गृहाण पार्वतीनाथ तव प्रीत्या प्रकल्पितम्॥ इत्याचमनीयम्॥

अथ करोद्वर्त्तनम्

कर्पूरादीनि द्रव्याणि सुगन्धीनि महेश्वर।

गृहाण जगतान्नाथ करोद्वर्त्तनहेतवे॥ इति करोद्वर्त्तनम्।

अथ फलानि।

कूष्माण्डम्मातुलिङ्गञ्च नारिकेलफलानि च।

गृहाण पार्वतीकान्त सोमशेखर शङ्कर। इति फलानि॥

अथ स्पूगीफलताम्बूलादीनि॥

पूगीफलम्महद्दिव्यन्नागवल्लीदलैर्युतम्।

गृहाण देवदेवेश द्राक्षादीनि सुरेश्वर॥ इति पूगीफलादीनि॥

अथ द्रव्यम्॥

हिरण्यगर्भगर्भस्थं हेमबीजसमन्वितम्।

पञ्चरत्नम्मया दत्तङ्गृह्यतां वृषभध्वज॥ इति द्रव्यम्॥

अथ नीराजनम्॥

अग्निर्ज्योती रविर्ज्योतिर्ज्योतिर्न्नारायणो विभुः।

नीराजयामि देवेशम्पञ्चदीपैः सुरेश्वर॥ इति नीराजनम्॥

अथ पुष्पाञ्जलिः॥

हर विश्वाखिलाधार निराधार निराश्रय।

पुष्पाञ्जलिङ्गृहाणेश सोमेश्वर नमोऽस्तु ते॥ इति पुष्पाञ्जलिम्॥

p. 457) अथ प्रणाममन्त्रः।

हेतवे जगतामेव संसारार्णवसेतवे।

प्रभवे सर्वविद्यानां शम्भवे गुरवे नमः॥

इति प्रणाममन्त्रः।

सर्वमन्त्रान्ते साङ्गाय सायुधाय सवाहनाय सपरिवाराय

सावरणाय नम इति योज्यम्॥

अथ शिवसहस्रनामावली

अस्य श्रीसदाशिवसहस्रनामस्तोत्रमन्त्रस्य, नारायण ऋषिः,

श्रीसदाशिवो देवता, अनुष्टुप्छन्दः, सदाशिवो बीजम्, गौरी शक्तिः,

श्रीसदाशिवप्रीत्यर्थन्तद्दिव्यसहस्रनामभिः अमुकद्रव्यसमर्पणे

विनियोगः॥

अथ ध्यानम्

ध्यायेन्नित्यम्महेशं रजतगिरिनिभञ्चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गम्परशुमृगवराभीतिहस्तम्प्रसन्नम्।
पद्मासीनां समन्तात्स्तुतममरगणैर्व्व्याघ्रकृत्तिँर्व्वसाननँ
र्व्विश्वाद्यँर्व्विश्ववन्द्यन्निखिलभयहरम्पञ्चवक्त्रन्त्रिनेत्रम्॥ १॥

स्थिरायनमः॥ १॥ स्थाणवेनमः॥ २॥ प्रभवेनमः॥ ३॥
भीमायनमः॥ ४॥ प्रवरायनमः॥ ५॥ वरदायनमः॥ ६॥
वरायनमः॥ ७॥ सर्वात्मनेनमः॥ ८॥ सर्वविख्यातायनमः॥ ९॥
सर्वस्मैनमः॥ १०॥ सर्वकरायनमः॥ ११॥ भवायनमः॥ १२॥
जटिनेनमः॥ १३॥ चर्म्मिणेनमः॥ १४॥ शिखण्डिनेनमः॥ १५॥
सर्वाङ्गायनमः॥ १६॥ सर्वभावनायनमः॥ १७॥
हरायनमः॥ १८॥ हरिणाक्षायनमः॥ १९॥ सर्वभूतहरायनमः॥ २०
॥ प्रभवेनमः॥ २१॥ प्रवृत्तयेनमः॥ २२॥ निवृत्तायनमः॥ २३॥
नियतायनमः॥ २४॥ शाश्वतायनमः॥ २५॥ ध्रुवायनमः॥ २६॥
श्मशानवासिनेनमः॥ २७॥ भगवतेनमः॥ २८॥ खचरायनमः॥ २९॥
गोचरायनमः॥ ३०॥ अर्द्दनायनमः॥ ३१॥ अभिवाद्यायनमः॥ ३२॥

महाकर्मणेनमः॥ ३३॥

p. 458) तपस्विनेनमः॥ ३४॥ भूतभावनायनमः॥ ३५॥
उन्मत्तवेषप्रच्छन्नायनमः॥ ३६॥ सर्वलोकप्रजापतयेनमः॥ ३७॥
महारूपायनमः॥ ३८॥ महाकायायनमः॥ ३९॥ वृषरूपायनमः॥
४०॥ महायशसेनमः॥ ४१॥ महात्मनेनमः॥ ४२॥
सर्वभूतात्मनेनमः॥ ४३॥ विश्वरूपायनमः॥ ४४॥ महाहनवेनमः
॥ ४५॥ लोकपालायनमः॥ ४६॥ अन्तर्हितात्मनेनमः॥ ४७॥ प्रसादायनमः
॥ ४८॥ हयगर्द्दभयेनमः॥ ४९॥ पवित्रायनमः॥ ५०॥ महतेनमः॥ ५१॥
नियमायनमः॥ ५२॥ नियमाश्रितायनमः॥ ५३॥ सर्वकर्मणेनमः॥ ५४
॥ स्वयम्भूतायनमः॥ ५५॥ आद्येनमः॥ ५६॥ आदिकरायनमः॥ ५७॥
निधयेनमः॥ ५८॥ सहस्राक्षायनमः॥ ५९॥ विशालाक्षायनमः॥ ६०॥
सोमायनमः॥ ६१॥ नक्षत्रसाधकायनमः॥ ६२॥ चन्द्रायनमः॥ ६३॥
सूर्यायनमः॥ ६४॥ शनयेनमः॥ ६५॥ केतवेनमः॥ ६६॥ ग्रहायनमः
॥ ६७॥ ग्रहपतयेनमः॥ ६८॥ वरायनमः॥ ६९॥ अत्रयेनमः॥ ७०॥
अत्र्यानमस्कर्त्रेनमः॥ ७१॥ मृगबाणार्पणायनमः॥ ७२॥
अनघायनमः॥ ७३॥ महातपसेनमः॥ ७४॥ घोरतपसेनमः॥ ७५॥
अदीनायनमः॥ ७६॥ दीनसाधकायनमः॥ ७७॥ सँवत्सरकरायनमः॥
७८॥ मन्त्रायनमः॥ ७९॥ प्रमाणायनमः॥ ८०॥ परमन्तपायनमः॥
८१॥ योगिनेनमः॥ ८२॥ योज्यायनमः॥ ८३॥ महाबीजायनमः॥ ८४॥

महारेतसेनमः॥ ८५॥ महाबलायनमः॥ ८६॥ सुवर्णरेतसेनमः॥ ८७॥
सर्वज्ञायनमः॥ ८८॥ सुबीजायनमः॥ ८९॥ बीजवाहनायनमः ९०॥
दशवाहवेनमः॥ ९१॥ अनिमिषायनमः॥ ९२॥ नीलकण्ठायनमः॥ ९३॥
उमापतयेनमः॥ ९४॥ विश्वरूपायनमः॥ ९५॥

p. 459) स्वयंश्रेष्ठायनमः॥ ९६॥ बलवीरायनमः॥ ९७॥
अबंलगणायनमः॥ ९८॥ गणकर्त्रेनमः॥ ९९॥ गणपतयेनमः॥ १००॥
दिग्वाससेनमः॥ १०१॥ कामायनमः॥ १०२॥ मन्त्रविदेनमः॥ १०३॥
परममन्त्रायनमः॥ १०४॥ सर्वभवकरायनमः॥ १०५॥ हरायनमः॥
१०६॥ कमण्डलूधरायनमः॥ १०७॥ धन्विनेनमः॥ १०८॥
बाणहस्तायनमः॥ १०९॥ कपालवतेनमः॥ ११०॥ अशनिनेनमः॥ १११॥
शतघ्निनेनमः॥ ११२॥ खड्गिनेनमः॥ ११३॥ पट्टिशिनेनमः॥ ११४॥
आयुधिनेनमः॥ ११५॥ महतेनमः॥ ११६॥ स्रुवहस्तायनमः॥ ११७॥
सुरूपायनमः॥ ११८॥ तेजसेनमः॥ ११९॥ तेजस्करनिधयेनमः॥ १२०॥
उष्णीषिणेनमः॥ १२१॥ सुवक्त्रायनमः॥ १२२॥ उदग्रायनमः॥ १२३॥
विनतायनमः॥ १२४॥ दीर्घायनमः॥ १२५॥ हरिकेशायनमः॥ १२६॥
सुतीर्थायनमः॥ १२७॥ कृष्णायनमः॥ १२८॥ सृगालरूपायनमः॥ १२९
॥ सिद्धार्थायनमः॥ १३०॥ मुण्डायनमः॥ १३१॥
सर्वशुभंकरायनमः॥ १३२॥ अजायनमः॥ १३३॥ बहुरूपायनमः॥
१३४॥ गन्धधारिणेनमः॥ १३५॥ कपर्द्दिनेनमः॥ १३६॥

उर्द्धरेतसेनमः॥ १३७॥ उर्द्धलिङ्गायनमः॥ १३८॥

उर्द्धशायिनेनमः॥ १३९॥ नभस्थलायनमः॥ १४०॥ त्रिजटायनमः॥

१४१॥ चीरवाससे नमः॥ १४२॥ रुद्रायनमः॥ १४३॥ सेनापतयेनमः॥ १४४

॥ विभवेनमः॥ १४५॥ अहश्चरायनमः॥ १४६॥ नक्तञ्चरायनमः॥ १४७॥

तिग्ममन्यवेनमः॥ १४८॥ सुवर्च्चसायनमः॥ १४९॥ गजघ्नेनमः॥ १५०॥

दैत्यघ्नेनमः॥ १५१॥ कालायनमः॥ १५२॥ लोकधात्रेनमः॥ १५३॥

गुणाकरायनमः॥ १५४॥

p. 460) सिंहशार्द्दूलरूपायनमः॥ १५५॥

आर्द्रचर्माम्बरावृतायनमः॥ १५६॥ कालयोगिनेनमः॥ १५७॥

महानादायनमः॥ १५८॥ सर्वकामायनमः॥ १५९॥ चतुष्पथायनमः

॥ १६०॥ निशाचरायनमः॥ १६१॥ प्रेतचारिणेनमः॥ १६२॥

भूतचारिणेनमः॥ १६३॥ महेश्वरायनमः॥ १६४॥ बहुभूतायनमः

॥ १६५॥ बहुधरायनमः॥ १६६॥ स्वर्ब्भानवेनमः॥ १६७॥ अमितायनमः

॥ १६८॥ गतयेनमः॥ १६९॥ नृत्यप्रियायनमः॥ १७०॥ नित्यनर्त्तायनमः॥

१७१॥ नर्त्तकायनमः॥ १७२॥ सर्वलालसायनमः॥ १७३॥ घोरायनमः॥

१७४॥ महातपसेनमः॥ १७५॥ पाशायनमः॥ १७६॥ नित्यायनमः॥ १७७॥

गिरिरुहायनमः॥ १७८॥ नभसेनमः॥ १७९॥ सहस्रहस्तायनमः॥ १८०॥

विजयायनमः॥ १८१॥ व्यवसायनमः॥ १८२॥ अतन्द्रितायनमः॥ १८३॥

अधर्षणायनमः॥ १८४॥ धर्षणात्मनेनमः॥ १८५॥ यज्ञघ्नेनमः॥

१८६॥ कामनाशकायनमः॥ १८७॥ दक्षयागापहारिणेनमः॥ १८८॥

सुसहायनमः॥ १८९॥ मध्यमायनमः॥ १९०॥ तेजोपहारिणेनमः॥ १९१॥

बलघ्नेनमः॥ १९२॥ मुदितायनमः॥ १९३॥ अर्त्थायनमः॥ १९४॥

अजितायनमः॥ १९५॥ अवरायनमः॥ १९६॥ गम्भीरायनमः। १९७॥

गभीरायनमः॥ १९८॥ गम्भीरबलवाहनायनमः॥ १९९॥

न्यग्रोधरूपायनमः॥ २००॥ न्यग्रोधायनमः॥ २०१॥

वृक्षकर्णस्थितयेनमः॥ २०२॥ विभवेनमः॥ २०३॥

सुतीक्ष्णदशनायनमः॥ २०४॥ महाकायायनमः॥ २०५॥

महाननायनमः॥ २०६॥ विष्वक्सेनायनमः॥ २०७॥ हरयेनमः॥ २०८॥

यज्ञायनमः॥ २०९॥ सँयुगापीडवाहनायनमः॥ २१०॥

तीक्ष्णतापायनमः॥ २११॥ हर्यश्वायनमः॥ २१२॥

p. 461) सहायायनमः॥ २१३॥ कर्मकालविदेनमः॥ २१४॥

विष्णुप्रसादितायनमः॥ २१५॥ यज्ञायनमः॥ २१६॥ समुद्रायनमः॥

२१७॥ वडवामुखायनमः॥ २१८॥ हुताशनसहायायनमः॥ २१९॥

प्रशान्तात्मनेनमः॥ २२०॥ हुताशनायनमः॥ २२१॥ उग्रतेजसेनमः॥

२२२॥ महातेजसेनमः॥ २२३॥ जन्यायनमः॥ २२४॥ विजयकालविदेनमः॥

२२५॥ ज्योतिषामयनायनमः॥ २२६॥ सिद्धयेनमः॥ २२७॥

सर्वविग्रहायनमः॥ २२८॥ शिखिनेनमः॥ २२९॥ मुण्डिनेनमः॥ २३०॥

जटिनेनमः॥ २३१॥ ज्वालिनेनमः॥ २३२॥ मूर्त्तिजायनमः॥ २३३॥

मूर्द्धगायनमः॥ २३४॥ बलिनेनमः॥ २३५॥ वेणविनेनमः॥ २३६॥
पणविनेनमः॥ २३७॥ तालिनेनमः॥ २३८॥ खलिनेनमः॥ २३९॥
कालकटङ्कटायनमः॥ २४०॥ नक्षत्रविग्रहमतयेनमः॥ २४१॥
गुणबुद्धयेनमः॥ २४२॥ लयायनमः॥ २४३॥ आगमायनमः॥ २४४॥
प्रजापतयेनमः॥ २४५॥ विश्वबाहवेनमः॥ २४६॥ विभागायनमः॥ २४७
॥ सर्वगायनमः॥ २४८॥ अमुखायनमः॥ २४९॥ विमोचनायनमः॥ २५०॥
सुसरणायनमः॥ २५१॥ हिरण्यकवचोद्भवायनमः॥ २५२॥
मेढ्रजायनमः॥ २५३॥ बलचारिणेनमः॥ २५४॥ महीचारिणेनमः॥ २५५
॥ स्रुतायनमः॥ २५६॥ सर्वतूर्यनिनादिनेनमः॥ २५७॥
सर्वतोद्यपरिग्रहायनमः॥ २५८॥ व्यालरूपायनमः॥ २५९॥
गुहावासिनेनमः॥ २६०॥ गुहायनमः॥ २६१॥ मालिनेनमः॥ २६२॥
तरङ्गविदेनमः॥ २६३॥ त्रिदशायनमः॥ २६४॥ त्रिकालधृषेनमः॥ २६५॥
कर्मसर्वबन्धविमोचनायनमः॥ २६६॥ असुरेन्द्राणाम्बन्धनायनमः
॥ २६७॥ युधिशत्रुविनाशनायनमः॥ २६८॥ साङ्ख्यप्रसादायनमः॥
२६९॥

p. 462) दूर्वाससेनमः॥ २७०॥ सर्वसाधुनिषेवितायनमः॥ २७१॥
प्रस्कन्दनायनमः॥ २७२॥ विभागज्ञायनमः॥ २७३॥ अतुल्यायनमः॥
२७४॥ यज्ञभागविदेनमः॥ ३७५॥ सर्ववासायनमः॥ २७६॥
सर्वचारिणेनमः॥ २७७॥ दुर्वाससेनमः॥ २७८॥ वासवायनमः॥ २७९॥

अमरायनमः॥ २८०॥ हैमायनमः॥ २८१॥ हेमकरायनमः॥ २८२॥
अयज्ञायनमः॥ २८३॥ सर्वधारिणेनमः॥ २८४॥ धरोत्तमायनमः॥
२८५॥ लोहिताक्षायनमः॥ २८६॥ महाक्षायनमः॥ २८७॥
विजयाक्षायनमः॥ २८८॥ विशारदायनमः॥ २८९॥ सङ्ग्रहायनमः॥
२९०॥ निग्रहायनमः॥ २९१॥ कर्त्रेनमः॥ २९२॥
सर्पचीरनिवासनायनमः॥ २९३॥ मुख्यायनमः॥ २९४॥
अमुख्यायनमः॥ २९५॥ देहायनमः॥ २९६॥ काहलयेनमः॥ २९७॥
सर्वकामदायनमः॥ २९८॥ सर्वकालप्रसादायनमः॥ २९९॥
सुबलायनमः॥ ३००॥ बलरूपधृषेनमः॥ ३०१॥ सर्वकामवरायनमः
॥ ३०२॥ सर्वदायनमः॥ ३०३॥ सर्वतोमुखायनमः॥ ३०४॥
आकाशनिर्विरूपायनमः॥ ३०५॥ निपातिनेनमः॥ ३०६॥ अवशायनमः॥
३०७॥ खगायनमः॥ ३०८॥ रौद्ररूपायनमः॥ ३०९॥ अंशवेनमः॥ ३१०
॥ आदित्यायनमः॥ ३११॥ बहुरश्मयेनमः॥ ३१२॥ सुवर्च्चस्विनेनमः॥
३१३॥ वसुवेगायनमः॥ ३१४॥ महावेगायनमः॥ ३१५॥
मनोवेगायनमः॥ ३१६॥ निशाचरायनमः॥ ३१७॥ सर्ववासिनेनमः॥ ३१८
॥ श्रियावासिनेनमः॥ ३१९॥ उपदेशकरायनमः॥ ३२०॥ अकारायनमः॥
३२१॥ मुनयेनमः॥ ३२२॥ आत्मनिरालोकायनमः॥ ३२३॥
सम्भग्नायनमः॥ ३२४॥

p. 463) सहस्रदायनमः॥ ३२५॥ पक्षिणेनमः॥ ३२६॥ पक्षरूपायनमः

॥ ३२७॥ अतिदीप्तायनमः॥ ३२८॥ विशाम्पतयेनमः॥ ३२९॥

उन्मादायनमः॥ ३३०॥ मदनायनमः॥ ३३१॥ कामायनमः॥ ३३२॥

अश्वत्थायनमः॥ ३३३॥ अर्त्थकरायनमः॥ ३३४॥ यशसेनमः॥ ३३५॥

वामदेवायनमः॥ ३३६॥ वामायनमः॥ ३३७॥ प्राचेनमः॥ ३३८॥

दक्षिणायनमः॥ ३३९॥ वामनायनमः॥ ३४०॥ सिद्धयोगिनेनमः॥ ३४१॥

महर्षयेनमः॥ ३४२॥ सिद्धार्त्थायनमः॥ ३४३॥ सिद्धसाधकायनमः

॥ ३४४॥ भिक्षवेनमः॥३४५॥ भिक्षुरूपायनमः॥ ३४६॥ विपणायनमः॥

३४७॥ मृदवेनमः॥ ३४८॥ अव्ययायनमः॥ ३४९॥ महासेनायनमः॥ ३५०

॥ विशाखायनमः॥ ३५१॥ षष्टिभागायनमः॥ ३५२॥ गवाम्पतयेनमः

॥ ३५३॥ वज्रहस्तायनमः॥ ३५४॥ विष्कम्भिनेनमः॥ ३५५॥

चमूस्तम्भनायनमः॥ ३५६॥ वृत्तावृत्तकरायनमः॥ ३५७॥

तालायनमः॥ ३५८॥ मधवेनमः॥ ३५९॥ मधुकलोचनायनमः॥ ३६०॥

वाचस्पत्यायनमः॥ ३६१॥ वाजसनायनमः॥ ३६२॥

आश्रमपूजितायनमः॥ ३६३॥ ब्रह्मचारिणेनमः॥ ३६४॥

लोकचारिणेनमः॥ ३६५॥ सर्वचारिणेनमः॥ ३६६॥ विचारविदेनमः॥ ३६७॥

ईशानायनमः॥ ३६८॥ ईश्वरायनमः॥ ३६९॥ कालायनमः॥ ३७०॥

निशाचारिणेनमः॥ ३७१॥ पिनाकधृषेनमः॥ ३७२॥ निमित्तस्थायनमः॥

३७३॥ निमित्तायनमः॥ ३७४॥ नन्दयेनमः॥ ३७५॥ नन्दिकरायनमः॥ ३७६॥

हरयेनमः॥ ३७७॥ नन्दीश्वरायनमः॥ ३७८॥ नन्दिनेनमः॥ ३७९॥

नन्दनायनमः॥ ३८०॥ नन्दिवर्द्धनायनमः॥ ३८१॥ भगहारिणेनमः

॥ ३८२॥

p. 464) निहन्त्रेनमः॥ ३८३॥ कालायनमः॥ ३८४॥ ब्रह्मणेनमः॥ ३८५॥
पितामहायनमः॥ ३८६॥ चतुर्म्मुखायनमः॥ ३८७॥
महालिङ्गायनमः॥ ३८८॥ चारुलिङ्गायनमः॥ ३८९॥
लिङ्गाध्यक्षायनमः॥ ३९०॥ सुराध्यक्षायनमः॥ ३९१॥
योगाध्यक्षायनमः॥ ३९२॥ युगावहायनमः॥ ३९३॥
बीजाध्यक्षायनमः॥ ३९४॥ बीजकर्त्रेनमः॥ ३९५॥
अध्यात्मानुगतायनमः॥ ३९६॥ बलायनमः॥ ३९७॥ इतिहासायनमः॥
३९८॥ सङ्कल्पायनमः॥ ३९९॥ गौतमायनमः॥ ४००॥ निशाकरायनमः
॥ ४०१॥ दम्भायनमः॥ ४०२॥ अदम्भायनमः॥ ४०३॥ वैदम्भायनमः
॥ ४०४॥ वश्यायनमः॥ ४०५॥ वशकरायनमः॥ ४०६॥ कलयेनमः॥ ४०७॥
लोककर्त्रेनमः॥ ४०८॥ पशुपतयेनमः॥ ४०९॥ महाकर्त्रेनमः॥ ४१०॥
अनौषधायनमः॥ ४११॥ अक्षरायनमः॥ ४१२॥ परमब्रह्मणेनमः॥
४१३॥ बलवतेनमः॥ ४१४॥ शक्रायनमः॥ ४१५॥ नीतयेनमः॥ ४१६॥
अनीतयेनमः॥ ४१७॥ शुद्धात्मनेनमः॥ ४१८॥ शुद्धायनमः॥ ४१९॥
मान्यायनमः॥ ४२०॥ गतागतायनमः॥ ४२१॥ बहुप्रसादायनमः॥
४२२॥ सुस्वप्नायनमः॥ ४२३॥ दर्पणायनमः॥ ४२४॥ अमित्रजितेनमः॥ ४२५
॥ वेदकारायनमः॥ ४२६॥ मन्त्रकारायनमः॥ ४२७॥ विदुषेनमः॥ ४२८॥
समरमर्द्दनायनमः॥ ४२९॥ महामेघनिवासिनेनमः॥ ४३०॥

महाघोरायनमः॥ ४३१॥ वशिनेनमः॥ ४३२॥ करायनमः॥ ४३३॥
अग्निज्वालायनमः॥ ४३४॥ महाज्वालायनमः॥ ४३५॥ अतिधूम्रायनमः॥
४३६॥ हुतायनमः॥ ४३७॥ हविषेनमः॥ ४३८॥ वृषणायनमः॥ ४३९॥
शङ्करायनमः॥ ४४०॥ वर्च्चस्विनेनमः॥ ४४१॥ धूमकेतनायनमः॥
४४२॥

p. 465) नीलायनमः ॥ ४४३॥ अङ्गलूब्धायनमः॥ ४४४॥ शोभनायनमः
॥ ४४५॥ निरवग्रहायनमः॥ ४४६॥ स्वस्तिदायनमः॥ ४४७॥
स्वतिभावायनमः॥ ४४८॥ भागिनेनमः॥ ४४९॥ भागकरायनमः॥ ४५०
॥ लघवेनमः॥ ४५१॥ उत्साङ्गायनमः॥ ४५२॥ महाङ्गायनमः॥ ४५३॥
महागर्ब्भपरायणायनमः॥ ४५४॥ कृष्णवर्णायनमः॥४५५॥
सुवर्णायनमः॥ ४५६॥ सर्वदेहिनामिन्द्रियायनमः॥ ४५७॥
महापादायनमः॥ ४५८॥ महाहस्तायनमः॥ ४५९॥
महाकायायनमः॥ ४६०॥ महायशसेनमः॥ ४६१॥
महामूर्द्धेनमः॥ ४६२॥ महामात्रायनमः॥ ४६३॥
महानेत्रायनमः॥ ४६४॥ निशालयायनमः॥ ४६५॥ महान्तकायनमः॥
४६६॥ महाकर्णायनमः॥ ४६७॥ महोष्ठायनमः॥ ४६८॥
महाहनवेनमः॥ ४६९॥ महानासायनमः॥ ४७०॥ महाकम्बवेनमः॥
४७१॥ महाग्रीवायनमः॥ ४७२॥ श्मशानभाजेनमः॥ ४७३॥
महावक्षसेनमः॥ ४७४॥ महोरस्कायनमः॥ ४७५॥ अन्तरात्मनेनमः॥

४७६॥ मृगालयायनमः॥ ४७७॥ लम्बनायनमः॥ ४७८॥
लम्बितोष्ठायनमः॥ ४७९॥ महामायायनमः॥ ४८०॥ पयोनिधयेनमः
॥ ४८१॥ महादन्तायनमः॥ ४८२॥ महादंष्ट्रायनमः॥ ४८३॥
महाजिह्वायनमः॥ ४८४॥ महामुखायनमः॥ ४८५॥
महानखायनमः॥ ४८६॥ महारोम्णेनमः॥ ४८७॥ महाकेशायनमः
॥ ४८८॥ महाजटायनमः॥ ४८९॥ प्रसन्नायनमः॥ ४९०॥ प्रसादायनमः
॥ ४९१॥ प्रत्ययायनमः॥ ४९२॥ गिरिसाधनायनमः॥ ४९३॥
स्नेहनायनमः॥ ४९४॥ अस्नेहनायनमः॥ ४९५॥ अजितायनमः॥ ४९६॥
महामुनयेनमः॥ ४९७॥ वृक्षाकारायनमः॥ ४९८॥ वृक्षकेतवेनमः॥
४९९॥ अनलायनमः॥ ५००॥

p. 466) वायुवाहनायनमः॥ ५०१॥ गण्डलिनेनमः॥ ५०२॥
मेरुधाम्नेनमः॥ ५०३॥ देवाधिपतयेनमः॥ ५०४॥
अथर्वशीर्षायनमः॥ ५०५॥ सामास्यायनमः॥ ५०६॥
ऋक्सहस्रामितेक्षणायनमः॥ ५०७॥ यजुःपादभुजायनमः॥ ५०८॥
गुह्यायनमः॥ ५०९॥ प्रकाशायनमः॥ ५१०॥ जङ्गमायनमः॥ ५११॥
अमोघार्थायनमः॥ ५१२॥ प्रसादायनमः॥ ५१३॥ अभिगम्यायनमः॥
५१४॥ सुदर्शनायनमः॥ ५१५॥ उपकारायनमः॥ ५१६॥ प्रियायनमः॥
५१७॥ सर्वायनमः॥ ५१८॥ कनकायनमः॥ ५१९॥ काञ्चनच्छवयेनमः
॥ ५२०॥ नाभयेनमः॥ ५२१॥ नन्दिकारायनमः॥ ५२२॥ भावायनमः॥

५२३॥ पुष्करस्थपतयेनमः॥ ५२४॥ स्थिरायनमः॥ ५२५॥
द्वादशायनमः॥ ५२६॥ त्रासनायनमः॥ ५२७॥ आद्यायनमः॥ ५२८॥
यज्ञायनमः॥ ५२९॥ यज्ञसमाहितायनमः॥ ५३०॥ नक्तायनमः॥ ५३१
॥ कलयेनमः॥ ५३२॥ कालायनमः॥ ५३३॥ मकरायनमः॥ ५३४॥
कालपूजितायनमः॥ ५३५॥ सगणायनमः॥ ५३६॥ गणकारायनमः॥
५३७॥ भूतवाहनसारथयेनमः॥ ५३८॥ भस्मशयायनमः॥ ५३९॥
भस्मगोघ्नेनमः॥ ५४०॥ भस्मभूतायनमः॥ ५४१॥ तरवेनमः॥ ५४२॥
गणायनमः॥ ५४३॥ लोकपालायनमः॥ ५४४॥ अलोकायनमः॥ ५४५॥
महात्मनेनमः॥ ५४६॥ सर्वपूजितायनमः॥ ५४७॥ शुक्लायनमः॥ ५४८॥
त्रिशुक्लायनमः॥ ५४९॥ सम्पन्नायनमः॥ ५५०॥ शुचयेनमः॥ ५५१॥
भूतनिषेवितायनमः॥ ५५२॥ आश्रमस्थायनमः॥ ५५३॥
क्रियावस्थायनमः॥ ५५४॥ विश्वकर्ममतयेनमः॥ ५५५॥ वरायनमः॥
५५६॥ विशालशाखायनमः॥ ५५७॥

p. 467) ताम्रोष्ठायनमः॥ ५५८॥ अम्बुजालायनमः॥ ५५९॥
सुनिश्चलायनमः॥ ५६०॥ कपिलायनमः॥ ५६१॥ कपिशायनमः॥ ५६२॥
शुक्लायनमः॥ ५६३॥ आयुषेनमः॥ ५६४॥ परायनमः॥ ५६५॥
अपरायनमः॥ ५६६॥ गन्धर्वायनमः॥ ५६७॥ अदितयेनमः॥ ५६८॥
तार्क्ष्यायनमः॥ ५६९॥ सुविज्ञेयायनमः॥ ५७०॥ सुशारदायनमः॥
५७१॥ परश्वधायुधायनमः॥ ५७२॥ देवायनमः॥ ५७३॥

अनुकारिणेनमः॥ ५७४॥ सुबान्धवायनमः। ५७५॥ तुम्बवीणायनमः॥
५७६॥ महाक्रोधायनमः॥ ५७७॥ ऊर्द्धरेतसेनमः॥ ५७८॥
जलेशायनमः॥ ५७९॥ उग्रायनमः॥ ५८०॥ वंशकरायनमः॥ ५८१॥
वंशायनमः॥ ५८२॥ वंशनादायनमः॥ ५८३॥ अनिन्दितायनमः॥
५८४॥ सर्वाङ्गरूपायनमः॥ ५८५॥ मायाविनेनमः॥ ५८६॥
सुहृदायनमः॥ ५८७॥ अनिलायनमः॥ ५८८॥ अनलायनमः॥ ५८९॥
बन्धनायनमः॥ ५९०॥ बन्धकर्त्रेनमः॥ ५९१॥
सुबन्धनविमोचनायनमः॥ ५९२॥ सयज्ञारयेनमः॥ ५९३॥
सकामारयेनमः॥ ५९४॥ महादंष्ट्रायनमः॥ ५९५॥
महायुधायनमः॥ ५९६॥ बहुधानिन्दितायनमः॥ ५९७॥ शर्वायनमः
॥ ५९८॥ शङ्करायनमः॥ ५९९॥ शङ्करायनमः॥ ६००॥ अधनायनमः
॥ ६०१॥ अमरेशायनमः॥ ६०२॥ महादेवायनमः॥ ६०३॥
विश्वदेवायनमः॥ ६०४॥ सुरारिघ्नेनमः॥ ६०५॥ अहिर्ब्बुध्न्यायनमः॥
अनिलाभायनमः॥ ६०७॥ चेकितायनमः॥ ६०८॥ हविषेनमः॥ ६०९॥
अजैकपदेनमः॥ ६१०॥ कपालिनेनमः॥ ६११॥ त्रिशङ्कवेनमः॥ ६१२॥
अजितायनमः॥ ६१३॥ शिवायनमः॥ ६१४॥

p. 468) धन्वन्तरयेनमः॥ ६१५॥ धूमकेतवेनमः॥ ६१६॥
स्कन्दायनमः॥ ६१७॥ वैश्रवणायनमः॥ ६१८॥ धात्रेनमः॥ ६१९॥
शक्रायनमः॥ ६२०॥ विष्णवेनमः॥ ६२१॥ मित्रायनमः॥ ६२२॥

त्वष्ट्रेनमः॥ ६२३॥ ध्रुवायनमः॥ ६२४॥ धरायनमः॥ ६२५॥

प्रभावायनमः॥ ६२६॥ सर्वगवेनमः॥ ६२७॥ अर्यम्णेनमः॥ ६२८॥

सवित्रेनमः॥ ६२९॥ रवयेनमः॥ ६३०॥ उषङ्गवेनमः॥ ६३१॥

विधात्रेनमः॥ ६३२॥ मान्धात्रेनमः॥ ६३३॥ भूतभावनायनमः॥

६३४॥ विभवेनमः॥ ६३५॥ वर्णविभाविनेनमः॥ ६३६॥

सर्वकामगुणावहायनमः॥ ६३७॥ पद्मनाभायनमः॥ ६३८॥

महागर्भायनमः॥ ६३९॥ चन्द्रवक्त्रायनमः॥ ६४०॥ अनिलायनमः॥

६४१॥ अनलायनमः॥ ६४२॥ बलवतेनमः॥ ६४३॥ उपशान्तायनमः॥ ६४४॥

पुराणायनमः॥ ६४५॥ पुण्यचञ्चवेनमः॥ ६४६॥ ईत्यैनमः॥ ६४७॥

कुरुकर्त्रेनमः॥ ६४८॥ कुरुवासिनेनमः॥ ६४९॥ पुरुहूतायनमः॥ ६५०॥

गुणौषधायनमः॥ ६५१॥ सर्वाशयायनमः॥ ६५२॥

दर्भचारिणेनमः॥ ६५३॥ सर्वेषांप्राणिपतयेनमः॥ ६५४॥

देवदेवायनमः॥ ६५५॥ सुखासक्तायनमः॥ ६५६॥ सतेनमः॥ ६५७॥

असतेनमः॥ ६५८॥ सर्वरत्नविदेनमः॥ ६५९॥ कैलासगिरिवासिनेनमः॥ ६६०॥

हिमवद्गिरिसंश्रयायनमः॥ ६६१॥ कूलहारिणेनमः॥ ६६२॥

कूलकर्त्रेनमः॥ ६६३॥ बहुविद्यायनमः॥ ६६४॥ बहुप्रदायनमः॥ ६६५

॥ वणिजायनमः॥ ६६६॥ वर्द्धकिनेनमः॥ ६६७॥ वृक्षायनमः॥ ६६८॥

वकुलायनमः॥ ६६९॥ चन्दनायनमः॥ ६७०॥ छन्दसेनमः॥ ६७१॥

सारग्रीवायनमः॥ ६७२॥ महाजत्रवेनमः॥ ६७३॥

p. 469) अलोलायनमः॥ ६७४॥ महौषधायनमः॥ ६७५॥

सिद्धार्थकारिणेनमः॥ ६७६॥ छन्दोव्याकरणोत्तरसिद्धार्थायनमः॥

६७७॥ सिंहनादायनमः॥ ६७८॥ सिंहदंष्ट्रायनमः॥ ६७९॥

सिंहगायनमः॥ ६८०॥ सिंहवाहनायनमः॥ ६८१॥

प्रभावात्मनेनमः॥ ६८२॥ जगत्कालस्थालायनमः॥ ६८३॥

लोकहितायनमः॥ ६८४॥ तरवेनमः॥ ६८५॥ सारङ्गायनमः॥ ६८६॥

नवचक्राङ्गायनमः॥ ६८७॥ केतुमालिनेनमः॥ ६८८॥

सभावनायनमः॥ ६८९॥ भूतालयायनमः॥ ६९०॥ भूतपतयेनमः॥

६९१॥ अहोरात्रायनमः॥ ६९२॥ अनिन्दितायनमः॥ ६९३॥

सर्वभूतवाहित्रेनमः॥ ६९४॥ सर्वभूतनिलयायनमः॥ ६९५॥

विभवेनमः॥ ६९६॥ भवायनमः॥ ६९७॥ अमोघायनमः॥ ६९८॥

सँयतायनमः॥ ६९९॥ अश्वायनमः॥ ७००॥ भोजनायनमः॥ ७०१॥

प्राणधारणायनमः॥ ७०२॥ धृतिमतेनमः॥ ७०३॥ मतिमतेनमः॥ ७०४

॥ दक्षायनमः॥ ७०५॥ सत्कृतायनमः॥ ७०६॥ युगाधिपायनमः॥ ७०७॥

गोपालायनमः॥ ७०८॥ गोपतयेनमः॥ ७०९॥ ग्रामायनमः॥ ७१०॥

गोचर्मवसनायनमः॥ ७११॥ हरयेनमः॥ ७१२॥ हिरण्यबाहवेनमः॥

७१३॥ प्रवेशिनाङ्गुहापालायनमः॥ ७१४॥ प्रकृष्टारयेनमः॥ ७१५॥

महाहर्षायनमः॥ ७१६॥ जितकामायनमः॥ ७१७॥ जितेन्द्रियायनमः॥

७१८॥ गान्धारायनमः॥ ७१९॥ सुवासायनमः॥ ७२०॥

तपःसक्तायनमः॥ ७२१॥ रतयेनमः॥ ७२२॥ नरायनमः॥ ७२३॥

महागीतायनमः॥ ७२४॥ महनृत्यायनमः॥ ७२५॥

अप्सरोगणसेवितायनमः॥ ७२६॥ महाकेतवेनमः॥ ७२७॥

महाघातवेनमः॥ ७२८॥ नैकसानुचरायनमः॥ ७२९॥ चलायनमः॥

७३०॥ आवेदनीयायनमः॥ ७३१॥

p. 470) आदेशायनमः॥ ७३२॥ सर्वगन्धसुखावहायनमः॥ ७३३॥

तोरणायनमः॥ ७३४॥ तारणायनमः॥ ७३५॥ वातायनमः॥ ७३६॥

परिधयेनमः॥ ७३७॥ पतिखेचरायनमः॥ ७३८॥

सँयोगवर्द्धनायनमः॥ ७३९॥ गुणाधिकवृद्धायनमः॥ ७४०॥

अतिवृद्धायनमः॥ ७४१॥ गुणाधिकायनमः॥ ७४२॥

नित्यात्मसहायायनमः॥ ७४३॥ देवासुरपतयेनमः॥ ७४४॥ पत्येनमः॥

७४५॥ युक्तायनमः॥ ७४६॥ युक्तबाहवेनमः॥ ७४७॥

दिविसुपर्वदेवायनमः॥ ७४८॥ आषाढायनमः॥ ७४९॥

सुषाढायनमः॥ ७५०॥ ध्रुवायनमः॥ ७५१॥ हरणायनमः॥ ७५२॥

हरायनमः॥ ७५३॥ आवर्त्तमानवपुषेनमः॥ ७५४॥

वसुश्रेष्ठायनमः॥ ७५५॥ महापथायनमः॥ ७५६॥

विमर्शशिरोहारिणेनमः॥ ७५७॥ सर्वलक्षणलक्षितायनमः॥ ७५८॥

अक्षरथयोगिनेनमः॥ ७५९॥ सर्वयोगिनेनमः॥ ७६०॥ महाबलायनमः॥

७६१॥ समाम्नायायनमः॥ ७६२॥ असाम्नायायनमः॥ ७६३॥

तीर्त्थदेवायनमः॥ ७६४॥ महारथायनमः॥ ७६५॥ निर्ज्जीवायनमः॥

७६६॥ जीवनायनमः॥ ७६७॥ मन्त्रायनमः॥ ७६८॥ शुभाक्षायनमः॥
७६९॥ बहुकर्कशायनमः॥ ७७०॥ रत्नप्रभूतायनमः॥ ७७१॥
रत्नाङ्गायनमः॥ ७७२॥ महार्णवनिपानविदेनमः॥ ७७३॥
मूलायनमः॥ ७७४॥ विशालायनमः॥ ७७५॥ अमृतायनमः॥ ७७६॥
व्यक्ताव्यक्तायनमः॥ ७७७॥ तपोनिधयेनमः॥ ७७८॥ आरोहणायनमः॥
७७९॥ अधिरोधायनमः॥ ७८०॥ शूलधारिणेनमः॥ ७८१॥
महायशसेनमः॥ ७८२॥ सेनाकल्पायनमः॥ ७८३॥ महाकल्पायनमः॥
७८४॥ योगायनमः॥ ७८५॥ युगकरायनमः॥ ७८६॥ हरयेनमः॥ ७८७॥

p. 471) युगरूपायनमः॥ ७८८॥ महारूपायनमः॥ ७८९॥
महानागहनायनमः॥ ७९०॥ वधायनमः॥ ७९१॥
न्यायनिर्वपणायनमः॥ ७९२॥ पादायनमः॥ ७९३॥ पण्डितायनमः॥
७९४॥ अचलोपमायनमः॥ ७९५॥ बहुमालायनमः॥ ७९६॥
महामालायनमः॥ ७९७॥ शशिहरसुलोचनायनमः॥ ७९८॥
विस्तारलवणकूपायनमः॥ ७९९॥ त्रियुगायनमः॥ ८००॥
सफलोदनायनमः॥ ८०१॥ त्रिनेत्रायनमः॥ ८०२॥ विषण्णाङ्गायनमः
॥ ८०३॥ मणिविद्धायनमः॥ ८०४॥ जटाधरायनमः॥॥ ८०५॥
बिन्दवेनमः॥ ८०६॥ विसर्गायनमः॥ ८०७॥ सुमुखायनमः॥ ८०८॥
शरायनमः॥ ८०९॥ सर्वायुधायनमः॥ ८१०॥ सहायनमः॥ ८११॥
निवेदनायनमः॥ ८१२॥ सुखाजातायनमः॥ ८१३॥ सुगन्धारायनमः॥

८१४॥ महाधनुषेनमः॥ ८१५॥ गन्धपालिभगवतेनमः॥ ८१६॥
सर्वकर्मोत्थानायनमः॥ ८१७॥ मन्थानबहुलवायवेनमः॥ ८१८॥
सकलायनमः॥ ८१९॥ सर्वलोचनायनमः॥ ८२०॥ तलस्तालायनमः॥ ८२१॥
करस्थालिनेनमः॥ ८२२॥ ऊर्द्धसंहननायनमः॥ ८२३॥ महतेनमः
॥ ८२४॥ छत्रायनमः॥ ८२५॥ सुच्छत्रायनमः॥ ८२६॥
विख्यातलोकायनमः॥ ८२७॥ सर्वाश्रयक्रमायनमः॥ ८२८॥
मुण्डायनमः॥ ८२९॥ विरूपायनमः॥ ८३०॥ विकृतायनमः॥ ८३१॥
दण्डिनेनमः॥ ८३२॥ कुण्डिनेनमः॥ ८३३॥ विकुर्वाणायनमः॥ ८३४॥
हर्यक्षायनमः॥ ८३५॥ ककुभायनमः॥ ८३६॥ वज्रिणेनमः॥ ८३७॥
शतजिह्वायनमः॥ ८३८॥ सहस्रपत्सहस्रमूर्द्धेनमः॥ ८३९॥
देवेन्द्रायनमः॥ ८४०॥ सर्वदेवमयायनमः॥ ८४१॥ गुरवेनमः॥ ८४२॥
सहस्रबाहवेनमः॥ ८४३॥

p. 472) सर्वाङ्गायनमः॥ ८४४॥ शरण्यायनमः॥ ८४५॥
सर्वलोककृतेनमः॥ ८४६॥ पवित्रायनमः। ८४७॥ त्रिककुन्मन्त्रायनमः॥
८४८॥ कनिष्ठायनमः॥ ८४९॥ कृष्णपिङ्गलायनमः॥ ८५०॥
ब्रह्मदण्डविनिर्मात्रेनमः॥ ८५१॥ शतघ्नीपाशशक्तिमतेनमः॥ ८५२॥
पद्मगर्ब्भायनमः॥ ८५३॥ महागर्ब्भायनमः॥ ८५४॥
ब्रह्मगर्ब्भायनमः॥ ८५५॥ जलजोद्भवायनमः॥ ८५६॥ गभस्तयेनमः
॥ ८५७॥ ब्रह्मकृतेनमः॥ ८५८॥ ब्रह्मिणेनमः॥ ८५९॥ ब्रह्मविदेनमः॥

८६०॥ ब्राह्मणायनमः॥ ८६१॥ गतयेनमः॥ ८६२॥ अनन्तरूपायनमः॥
८६३॥ नैकात्मनेनमः॥ ८६४॥ स्वयम्भुवस्तिग्मतेजसेनमः॥ ८६५॥
उर्द्धगात्मनेनमः॥ ८६६॥ पशुपतयेनमः॥ ८६७॥ वातरंहसेनमः॥
८६८॥ मनोजवायनमः॥ ८६९॥ चन्दनिनेनमः॥ ८७०॥
पद्मनालाग्रायनमः॥ ८७१॥ सुरभ्युत्तारणायनमः॥ ८७२॥
नरायनमः॥ ८७३॥ कर्णिकारमहास्त्रग्विणेनमः॥ ८७४॥
नीलमौलयेनमः॥ ८७५॥ पिनाकधृषेनमः॥ ८७६॥ उमापतयेनमः॥ ८७७
॥ उमाकान्तायनमः॥ ८७८॥ जाह्नवीधृषेनमः॥ ८७९॥
उमाधवायनमः॥ ८८०॥ वरवराहायनमः॥ ८८१॥ वरदायनमः॥
८८२॥ वरेण्यायनमः॥ ८८३॥ सुमहास्वनायनमः॥ ८८४॥
महाप्रसादायनमः॥ ८८५॥ दमनायनमः॥ ८८६॥ शत्रुघ्नेनमः॥
८८७॥ श्वेतपिङ्गलायनमः॥ ८८८॥ पीतात्मनेनमः॥ ८८९॥
परमात्मनेनमः॥ ८९०॥ प्रयतात्मनेनमः॥ ८९१॥ प्रधानधृषेनमः
॥ ८९२॥ सर्वपार्श्वमुखायनमः॥ ८९३॥ त्र्यक्षाय नमः॥ ८९४॥
धर्मसाधारणवरायनमः॥ ८९५॥ चराचरात्मनेनमः॥ ८९६॥
सूक्ष्मात्मनेनमः॥ ८९७॥ अमृतगोवृषेश्वरायनमः॥ ८९८॥

p. 473) साध्यर्षयेनमः॥ ८९९॥ आदित्यवासवेनमः॥ ९००॥
विवस्वत्सवित्रमृतायनमः॥ ९०१॥ व्यासायनमः॥ ९०२॥
सर्गसुसङ्क्षेपविस्तरायनमः॥ ९०३॥ पर्ययनरायनमः॥ ९०४॥

ऋतवेनमः। ९०५॥ सँवत्सरायनमः॥ ९०६॥ मासायनमः॥ ९०७॥
पक्षायनमः॥ ९०८॥ सङ्घासमापनायनमः॥ ९०९॥ कलायैनमः॥
९१०॥ काष्ठायैनमः॥ ९११॥ लवेभ्योनमः॥ ९१२॥ मात्राभ्योनमः॥
९१३॥ मुहूर्त्ताहःक्षपाभ्योनमः॥ ९१४॥ क्षणेभ्योनमः॥ ९१५॥
विश्वक्षेत्रायनमः॥ ९१६॥ प्रजाबीजायनमः॥ ९१७॥ लिङ्गायनमः॥ ९१८
॥ आद्यनिर्गमायनमः॥ ९१९॥ सतेनमः॥ ९२०॥ असतेनमः॥ ९२१॥
व्यक्तायनमः॥ ९२२॥ अव्यक्तायनमः॥ ९२३॥ पित्रेनमः॥ ९२४॥
मात्रेनमः॥ ९२५॥ पितामहायनमः॥ ९२६॥ स्वर्गद्वारायनमः॥ ९२७॥
प्रजाद्वारायनमः॥ ९२८॥ मोक्षद्वारायनमः॥ ९२९॥
त्रिविष्टपायनमः॥ ९३०॥ निर्वाणायनमः॥ ९३१॥ ह्लादनायनमः॥ ९३२
॥ ब्रह्मलोकायनमः॥ ९३३॥ परागतयेनमः॥ ९३४॥
देवासुरविनिर्मात्रेनमः॥ ९३५॥ देवासुरपरायणायनमः॥ ९३६॥
देवासुरगुरवेनमः॥ ९३७॥ देवायनमः॥ ९३८॥
देवासुरनमस्कृतायनमः॥ ९३९॥ देवासुरमहामात्रायनमः॥ ९४०॥
देवासुरगणाश्रयायनमः॥ ९४१॥ देवासुरगणाध्यक्षायनमः॥ ९४२
॥ देवासुरगणाग्रण्येनमः॥ ९४३॥ देवातिदेवायनमः॥ ९४४॥
देवर्ष्यायेनमः॥ ९४५॥ देवासुरवरप्रदायनमः॥ ९४६॥
देवासुरेश्वरायनमः॥ ९४७॥ विश्वायनमः॥ ९४८॥
देवासुरमहेश्वरायनमः॥ ९४९॥ सर्वदेवमयायनमः॥ ९५०॥
अचिन्त्यायनमः॥ ९५१॥ देवात्मनेनमः॥ ९५२॥ आत्मसम्भवायनमः॥

९५३॥

p. 474) उद्भिदेनमः॥ ९५४॥ त्रिविक्रमायनमः॥ ९५५॥ वैद्यायनमः॥ ९५६
॥ विरजायनमः॥ ९५७॥ नीरजायनमः॥ ९५८॥ अमरायनमः॥ ९५९॥
ईड्यायनमः॥ ९६०॥ हस्तीश्वरायनमः॥ ९६१॥ व्याघ्रायनमः॥ ९६२॥
देवसिंहायनमः॥ ९६३॥ नरर्षभायनमः॥ ९६४॥ विबुधायनमः॥
९६५॥ अग्रवरायनमः॥ ९६६॥ सूक्ष्मायनमः॥ ९६७॥ सर्वदेवायनमः॥
९६८॥ तपोमयायनमः॥ ९६९॥ सुयुक्तायनमः॥ ९७०॥ शोभनायनमः॥
९७१॥ वज्रिणेनमः॥ ९७२॥ प्रासानाम्प्रभवायनमः॥ ९७३॥
अव्ययायनमः॥ ९७४॥ गुहायनमः॥ ९७५॥ कान्तायनमः॥ ९७६॥
निजसर्गायनमः॥ ९७७॥ पवित्रायनमः॥ ९७८॥ सर्वपावनायनमः॥ ९७९
॥ शृङ्गिणेनमः॥ ९८०॥ शृङ्गप्रियायनमः॥ ९८१॥ बभ्रवेनमः॥ ९८२॥
राजराजायनमः॥ ९८३॥ निरामयायनमः॥ ९८४॥ अभिरामायनमः॥
९८५॥ सुरगणायनमः॥ ९८६॥ विरामायनमः॥ ९८७॥
सर्वसाधनायनमः॥ ९८८॥ ललाटाक्षायनमः॥ ९८९॥
विश्वदेवायनमः॥ ९९०॥ हरिणायनमः॥ ९९१॥ ब्रह्मवर्च्चसायनमः॥
९९२॥ स्थावरपतयेनमः॥ ९९३॥ नियमेन्द्रियवर्द्धनायनमः॥ ९९४॥
सिद्धार्त्थायनमः॥ ९९५॥ सिद्धभूतार्थायनमः॥ ९९६॥
अचिन्त्यायनमः॥ ९९७॥ सत्यव्रतायनमः॥ ९९८॥ शुचयेनमः॥ ९९९॥
व्रताधिपायनमः॥ १०००॥

परायनमः॥ १॥ ब्रह्मणेनमः॥ २॥ भक्तानाम्परमागतयेनमः॥ ३
॥ विमुक्तायनमः॥ ४॥ मुक्ततेजसेनमः॥ ५॥ श्रीमतेनमः॥ ६॥
श्रीवर्द्धनायनमः॥ ७॥ जगतेनमः॥ ८॥

इतिश्रीमन्महाभारते अनुशासनपर्वणि दानधर्मे सप्तदशाध्याये
शिवसहस्रनामस्तोत्रं सम्पूर्णम्॥ १७॥

p. 475) श्रीसाम्बसदाशिवार्पणमस्तु॥

अथाग्घ्र्यप्रदानम्

अद्य पूर्वोच्चरित एवङ्गुणविशेषेण विशिष्टायाम्पुण्यतिथौ
ममात्मनः पुराणोक्तफलप्राप्त्यर्थं
पूजासाङ्गतासिद्ध्यर्थमग्घ्र्यप्रदानङ्करिष्ये॥

शिवरात्र्यग्घ्र्याणि॥

नमः शिवाय शर्वाय सर्वपापहराय च।

शिवरात्रौ महापुण्यङ्गृहाणाग्घ्र्यन्नमोऽस्तु ते॥

शिवाय० इदम्॥ १॥

व्योमकेश नमस्तुभ्यँव्योमात्मन्व्योमरूपिणे॥

नक्षत्ररूपिणे तुभ्यन्तारकाग्घ्र्यन्नमोऽस्तु ते।

तारकायनमः इदम्०॥ २॥

आकाशादिक्छरीराय ग्रहनक्षत्रमालिने॥

सुरसिद्धनिवासाय दत्तमग्घ्र्यं सदाशिव॥ सदा० इदम्०॥ ३॥

अथ सोमवाराग्घ्र्याणि॥

सोमवारव्रतङ्कर्त्तुः कल्याणम्मम सर्वदा॥

प्रसीद पार्वतीनाथ सायुज्यन्देहि मे प्रभो॥

भवानीशङ्कराय नमः॥ इदम्०॥ १॥

नक्तेन सोमवारेण सोमनाथ जगत्पते॥

अनेककोटिसौभाग्यमनन्तं कुरु शङ्कर॥ शङ्कराय० इदम्०॥ २॥

आकाशादिक्षरीराय ग्रहनक्षत्रमालिने॥

सर्वसिद्धिनिवासाय दत्तमग्घ्र्यन्नमोऽस्तु ते॥ सदाशिवा० इदम्॥ ३॥

अनेनाग्घ्र्यप्रदानेन भगवाञ्छ्रीभवानीशङ्करमहारुद्रः

प्रीयताम्॥

इत्यग्घ्र्यप्रदानम्॥

अथ महिम्नस्तोत्रम्

श्रीगणेशायनमः॥

महिम्नः पारन्ते परमविदुषो यद्यसदृशी

स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः।

अथावाच्यः सर्वः स्वमतिपरिणामावधि गृणन्नमाप्येष स्तोत्रे हर

निरपवादः परिकरः॥ १॥

अतीतः पन्थानन्तव च महिमा वाङ्मनसयोरतद्व्यावृत्त्या

यञ्चकितमभिधत्ते श्रुतिरपि।

स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः

पदे त्ववर्वाचीने पतति न मनः कस्य न वचः॥ २॥

p. 476) मधुस्फीता वाचः परममृतन्निर्मितवतस्तव
ब्रह्मन्किँव्वागपि सुरगुरोर्विस्मयपदम्।
मम त्वेताँव्वाणीङ्गुणकथनपुण्येन भवतः
पुनामीत्यर्थेऽस्मिन्पुरमथन बुद्धिर्व्यवसिता॥ ३॥

तवैश्वर्यँय्यत्तज्जगदुदयरक्षाप्रलयकृत्-
त्रयीवस्तुव्यस्तन्तिसृषु गुणभिन्नासु तनुषु।
अभव्यानामस्मिन्वरद रमणीयामरमणीं
विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः॥ ४॥

किमीहः किङ्कायः स खलू किमुपायस्त्रिभुवनङ्किमाधारो धाता सृजति
किमुपादान इति च।
अतर्क्यैश्वर्ये त्वय्यनवसरदुःस्थो हतधियः
कुतर्कोऽयङ्कांश्चिन्मुखरयति मोहाय जगतः॥ ५॥

अजन्मानो लोकाः किमवयववन्तोऽपि
जगतामधिष्ठातारङ्किम्भवविधिरनादृत्य भवति।
अनीशो वा कुर्याद्भुवनजनने कः परिकरो

यतो मन्दास्त्वाम्प्रत्यमरवर संशेरत इमे॥ ६॥

त्रयी साङ्ख्यँय्योगः पशुपतिमतँव्वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च।
रुचीनाँव्वैचित्र्यादृजुकुटिलनानापथजुषान्नृणामेको गम्यस्त्वमसि
पयसामर्णव इव॥ ७॥

महोक्षः खट्वाङ्गम्परशुरजिनम्भस्म फणिनः
कपालञ्चेतीयत्तव वरद तन्त्रोपकरणम्।
सुरास्तान्तामृद्धिन्दधति तु भवद्भ्रूप्रणिहितान्नहि
स्वात्मारामव्विषयमृगतृष्णा भ्रमयति॥ ८॥

ध्रुवङ्कश्चित्सर्वं सकलमपरस्त्वध्रुवमिदम्परो ध्रौव्याध्रौव्ये
जगति गदति व्यस्तविषये।
समस्तेऽप्येतस्मिन्पुरमथन तैर्विस्मित इव
स्तुवञ्जिह्रेमि त्वान्न खलू ननु धृष्टा मुखरता॥ ९॥

तवैश्वर्यँय्यत्नाद्यदुपरि विरिञ्चो हरिरधः
परिच्छेत्तुं यातावनलमनलस्कन्धवपुषः।
ततो भक्तिश्रद्धाभरगुरुगृणद्भ्याङ्गिरिश

यत्स्वयन्तस्थे ताभ्यान्तव किमनुवृत्तिर्न्न फलति॥ १०॥

अयत्नादापाद्य त्रिभुवनमवैरव्यतिकरन्दशास्यो यद्बाहूनभृत
रणकण्डूपरवशान्।
p. 477) शिरः पद्मश्रेणीरचितचरणाम्भोरुहबलेः
स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्ज्जितमिदम्॥ ११॥

अमुष्य त्वत्सेवासमधिगतसारम्भुज-
अनम्बलात्कैलासेऽपि त्वदधिवसतौ विक्रमयतः।
अलभ्या पातालेऽप्यलसचलिताङ्गुष्ठशिरसि
प्रतिष्ठा त्वय्यासीद्ध्रुवमुपचितो मुह्यति खलः॥ १२॥

यदृद्धिं सुत्राम्णो वरद परमोच्चैरपि सती-
मधश्चक्रे बाणः परिजनविधेयस्त्रिभुवनः।
न तच्चित्रन्तस्मिन्वरिवसितरि त्वच्चरणयोर्न्न
कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः॥ १३॥

अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपा-
विधेयस्याऽसीद्यस्त्रिनयनविषं संहृतवतः।
स कल्माषः कण्ठे तव न कुरुते न श्रियमहो

विकारोऽपि श्लाघ्यो भुवनभयभङ्गव्यसनिनः॥ १४॥

असिद्धार्था नैव क्वचिदपि सदेवासुरनरे
निवर्त्तन्ते नित्यञ्जगति जयिनो यस्य विशिखाः।
स पश्यन्नीश त्वामितरसुरसाधारणमभूत्स्मरः स्मर्त्तव्यात्मा नहि
वशिषु पथ्यः परिभवः॥ १५॥

मही पादाघाताद्व्रजति सहसा संशयपदम्पदँ
व्विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणम्।
मुहुर्द्यौर्द्यौस्थ्यँय्यात्यनिभृतजटाताडिततटा
जगद्रक्षायै त्वन्नटसि ननु वामैव विभुता॥ १६॥

वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः
प्रवाहो वाराँय्यः पृषतलघुदृष्टः शिरसि ते।
जगद्द्वीपाकारञ्जलधिवलयन्तेन कृतमित्यनेनैवोन्नेयन्धृतमहिम
दिव्यन्तव वपुः॥ १७॥

रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो
रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति।
दिधक्षोस्ते कोऽयन्त्रिपुरतृणमाडम्बरविधिर्विधेयैः क्रीडन्त्यो न खलू

परतन्त्राः प्रभुधियः॥ १८॥

हरिस्ते साहस्रङ्कमलबलिमाधाय पदयोर्यदेकोने
तस्मिन्निजमुदहरन्नेत्रकमलम्।
गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा
त्रयाणां रक्षायै त्रिपुरहर जागर्त्ति जगताम्॥ १९॥

p. 478) क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमताङ्कर्म
प्रध्वस्तम्फलति पुरुषाराधनमृते।
अतस्त्वां सम्प्रेक्ष्ये क्रतुषु फलदानप्रतिभुवं
श्रुतौ श्रद्धाम्बद्धा दृढपरिकरः कर्मसु जनः॥ २०॥

क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृतामृषीणामार्त्विज्यं
सरणद सदस्याः सुरगणाः।
क्रतुभ्रेशस्त्वत्तः क्रतुफलविधानव्यसनिनो
ध्रुवङ्कर्त्तुः श्रद्धाविधुरमभिचाराय हि मखाः॥ २१॥

प्रजानाथन्नाथ प्रसभमभिकं स्वान्दुहितरङ्गतं रोहिद्भूतां
रिरमयिषुमृष्यस्य वपुषा।
धनुष्पाणेर्यातन्दिवमपि सपत्राकृतममुन्त्रसन्तन्तेऽद्यापि त्यजति न

मृगव्याधरभसः॥ २२॥

स्वलावण्याशंसा धृतधनुषमह्नाय तृणवत्पुरः प्लुष्टन्दृष्ट्वा
पुरमथन पुष्पायुधमपि।
यदिस्त्रैणन्देवी यमनिरतदेहार्द्धघटनादवैति त्वामधा वत वरद
मुग्धा युवतयः॥ २३॥

श्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचराश्चिताभस्मालेपः
स्रगपि नृकरोटी परिकरः।
अमङ्गल्यं शीलन्तव भवतु नामैवमखिलन्तथापि स्मर्तृणाँव्वरद
परमम्मङ्गलमसि॥ २४॥

मनः प्रत्यक्चित्तेसविधमवधायात्तमरुतः
प्रहृष्यद्रोमाणः प्रमदसलिलोत्सङ्गितदृशः।
यदालोक्याह्लादं ह्रद इव निमज्यामृतमये
दधत्यन्तस्तत्त्वङ्किमपि यमिनस्तत्किल भवान्॥ २५॥

त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवहस्त्वमापस्त्वँव्व्योम
त्वमु धरणिरात्मा त्वमिति च।
परिच्छिन्नामेवन्त्वयि परिणता बिभ्रति गिरन्न

विद्मस्तत्तत्त्वँव्वयमिह तु यत्त्वन्न भवसि॥ २६॥

त्रयीन्तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि
सुरानकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृति।
तुरीयन्ते धाम ध्वनिभिरवरुन्धानमणुभिः
समस्तं व्यस्तं वा शरणद गृणात्योमिति पदम्॥ २७॥

भवः शर्वो रुद्रः पशुपतिरथोग्रः सह महाँतथा भीमेशानाविति
यदभिधानाष्टकमिदम्।
p. 479) अमुष्मिन्प्रत्येकम्प्रविचरति देव श्रुतिरपि
प्रियायास्मै धाम्ने प्रणिहितनमस्योऽस्मि भवते॥ २८॥

नमो नेदिष्ठाय प्रियदव दविष्ठाय च नमो
नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः।
नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो नमः
सर्वस्मै ते तदिदमिति सर्वाय च नमः॥ २९॥

बहलरजसे विश्वोत्पत्तौ भवाय नमो नमः
प्रबलतमसे तत्संहारे हराय नमो नमः।
जनसुखकृते सत्त्वोद्रिक्तौ मृडाय नमो नमः

प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः॥ ३०॥

कृशपरिणति चेतः क्लेशवश्यन्क चेदङ् क च तव
गुणसीमोल्लङ्घिनी शश्वदृद्धिः॥
इति चकितममन्दीकृत्य माम्भक्तिराधाद्वरद
चरणयोस्ते वाक्यपुष्पोपहारम्॥ ३१॥

असितगिरिसमं स्यात्कज्जलं सिन्धुपात्रे
सुरतरुवरशाखा लेखनी पत्रमुर्वी।
लिखति यदि गृहीत्वा शारदा सर्वकालन्तदपि
तव गुणानामीश पारन्न याति॥ ३२॥

असुरसुरमुनीन्द्रैरर्चितस्येन्दुमौलेर्ग्रथितगुणमहिम्नो
निर्गुणस्येश्वरस्य।
सकलगणवरिष्ठः पुष्पदन्ताभिधानो
रुचिरमलघुवृत्तैः स्तोत्रमेतच्चकार॥ ३३॥

अहरहरनवद्यन्धूर्ज्जटेः स्तोत्रमेतत्पठति
परमभक्त्या शुद्धचित्तः पुमान्यः।
स भवति शिवलोके रुद्रतुल्यस्तथात्र

प्रचुरतरधनायुः पुत्रवान्कीर्तिमांश्च॥ ३४॥

महेशान्नापरो देवो महिम्नो नापरा स्तुतिः।
अघोरान्नापरो मन्त्रो नास्ति तत्त्वङ्गुरोः परम्॥ ३५॥

दीक्षा दानन्तपस्तीर्थं ज्ञानँय्यागादिकाः क्रियाः।
महिम्नः स्तवपाठस्य कलानार्हन्ति षोडशीम्॥ ३६॥

आसमाप्तिमिदं स्तोत्रं सर्वमीश्वरवर्णनम्।
अनौपम्यम्मनोहारि पुण्यङ्गन्धर्वभाषितम्॥ ३७॥

कुसुमदशननामा सर्वगन्धर्वराजः
शशिधरवरमौलेर्देवदेवस्य दासः
स खलू निजमहिम्नो भ्रष्ट एवास्य
रोषात्स्तवनमिदमकार्षीद्दिव्यदिव्यम्महिम्नः॥ ३८॥

p. 480) सुरवरमुनिपूज्यं स्वर्गमोक्षैकहेतुम्पठति
यदि मनुष्यः प्राञ्जलिर्न्नान्यचेताः।
व्रजति शिवसमीपङ्किन्नरैः स्तूयमानः
स्तवनमिदममोघम्पुष्पदन्तप्रणीतम्॥ ३९॥

श्रीपुष्पदन्तमुखपङ्कजनिर्गतेन
स्तोत्रेण किल्बिषहरेण हरप्रियेण।
कण्ठस्थितेन पठितेन समाहितेन सुप्रीणितो
भवति भूतपतिर्म्महेशः॥ ४०॥

इति श्रीपुष्पदन्तविरचितं शिवमहिमाख्यस्तोत्रं सम्पूर्णम्॥

अथ रावणकृतशिवस्तोत्रम्

जटाकटाहसम्भ्रमभ्रमन्निलिम्पनिर्झरी-
विलोलवीचिवल्लरीविराजमानमूर्द्धनि।
धगद्धगद्धगज्ज्वलल्ललाटपट्टपावके
किशोरचन्द्रशेखरे रतिः प्रतिक्षणम्मम॥ १॥

धराधरेन्द्रनन्दिनी-विलासबन्धुवन्धुरस्-
फुरद्दगन्तसन्ततिप्रमोदमानमानसे।
कृपाकटाक्षघोरणीनिरुद्धदुर्द्धरापदि
क्वचिद्दिगम्बरे मनो विनोदमस्तु वस्तुनि॥ २॥

जटाभुजङ्गपिङ्गलस्फुरत्फणामणिप्रभा-
कदम्बकुङ्कुमद्रवप्रलिप्तदिग्वधूमुखे।
मदान्धसिन्धुरस्फुरत्त्वगुत्तरीयमेदुरे
मनो विनोदमद्भुतम्बिभर्त्तु भूतभर्त्तरि॥ ३॥

ललाटचत्वरज्वलद्धनञ्जयस्फुलिङ्गभा-
निपीतपञ्चसायकन्नमन्निलिम्पनायकम्।
सुधामयूखरेखया विराजमानशेखरम्-
महाकपालिसम्पदे सरिज्जटालमस्तु नः॥ ४॥

सहस्रलोचनप्रभृत्यशेषलेखशेखर-
प्रसूनधूलिधोरणीविधूसराङ्घ्रिपीठभूः।
भुजङ्गराजमालया निबद्धजाटजूटकः
श्रियै चिराय जायताञ्चकोरबन्धुशेखरः॥ ५॥

करालभालपट्टिकाधगद्धगद्धगज्ज्वलद्-
धनञ्जयाहुतीकृतप्रचण्डपञ्चसायके।
धराधरेन्द्रनन्दिनीकुचाग्रचित्रपत्रक-
प्रकल्पनैकशिल्पिनि त्रिलोचने रतिर्म्मम॥ ६॥

नवीनमेघमण्डलीनिरुद्धदुर्द्धरस्फुरत्-

कुहूनिशीथिनीतमःप्रबन्धबद्धकन्धरः।

निलिम्पनिर्झरीधरस्तनोतु कृत्तिसुन्दरः

कलानिधानबन्धुरः श्रियञ्जगद्धुरन्धरः॥ ७॥

p. 481) प्रफुल्लनीलपङ्कजप्रपञ्चकालिमप्रभा-

वलम्बिकण्ठकन्दलीरुचिप्रबधकन्धरम्।

स्मरच्छिदम्पुरच्छिदम्भवच्छिदङ्गजच्छिदम्-

मखच्छिदान्धकच्छिदन्तमन्तकच्छिदम्भजे॥ ८॥

अखर्वसर्वमङ्गलाकलाकदम्बमञ्जरी-

रसप्रवाहमाधुरीविजृम्भणामधुव्रतम्।

स्मरान्तकम्पुरान्तकम्मखान्तकम्भवान्तकङ्-

गजान्तकान्धकान्तकन्तमन्तकान्तकम्भजे॥ ९॥

जयत्यदभ्रविभ्रमद्भ्रमद्भुजङ्गमश्वसद्-

विनिर्गमक्रमस्फुरत्करालभालहव्यवाट्।

धिमिन्धिमिन्धिमिन्ध्वनन्मृदङ्गतुङ्गमङ्गल-

ध्वनिक्रमप्रवर्त्तितप्रचण्डताण्डवः शिवः॥ १०॥

दृषद्विचित्रतल्पयोर्भुजङ्गमौक्तिकस्रजोर्-
गरिष्ठरत्नलोष्टयोः सुहृद्विपक्षपक्षयोः।
तृणारविन्दचक्षुषोः प्रजामहीमहेन्द्रयोः
समप्रवृत्तिकः कदा सदाशिवम्भजाम्यहम्॥ ११॥

कदा निलिम्पनिर्झरीनिकुञ्जकोटरे वसन्-
विमुक्तदुर्म्मतिस्सदा शिरःस्थमञ्जलिँव्वहन्।
विलोललोललोचनाललामभाललग्नकं
शिवेति मन्त्रमुच्चरन्सदा सुखी भवाम्यहम्॥ १२॥

निलिम्पनाथनागरी-कदम्बमौलिमल्लिका-
निगुम्फनिर्भ्भरक्षरन्मधूलिकामनोहरः।
तनोतु नो मनो मुदँव्विनोदनीमहर्न्निशम्-
परश्रियः परम्पदन्तदङ्गजत्विषाञ्चयः॥ १३॥

प्रचण्डवाडवानलप्रभाशुभप्रचारिणी
महाष्टसिद्धिकामिनीजनावहूतजल्पना।
विमुक्तवामलोचना विवाहकालिकध्वनिः
शिवेतिमन्त्रभूषणा जगज्जयाय जायताम्॥ १४॥

इति रावणकृतं शिवस्तोत्रं सम्पूर्णम्॥

अथ शिवकवचम्

अस्य श्रीशिवकवचस्तोत्रमन्त्रस्य ब्रह्माऋषिः, अनुष्टुप्छन्दः,
श्रीसदाशिवरुद्रो देवता, ह्रींशक्तिः, रंकीलकम्,
श्रींह्रींक्लींबीजम्, श्रीसदाशिवप्रीत्यर्थे शिवकवचस्तोत्रजपे
विनियोगः॥

अथ करन्यासः

ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ रांसर्वशक्तिधाम्ने ईशानात्मने
अङ्गुष्ठाभ्यान्नमः,

p. 482) ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ नँईंनित्यतृप्तिधाम्ने
तत्पुरुषात्मने तर्ज्जनीभ्यान्नमः, ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ
मँऊँअनादिशक्तिधाम्ने अघोरात्मने मध्यमाभ्यान्नमः, ॐ नमो
भगवते ज्वलज्ज्वालामालिने ॐ शिरैं स्वतन्त्रशक्तिधाम्ने

वामदेवात्मने अनामिकाभ्यान्नमः, ॐ नमो भगवते
ज्वलज्ज्वालामालिने ॐ वाँऔँ अतुल्यशक्तिधाम्ने सद्योजातात्मने
कनिष्ठाभ्यान्नमः, ॐ नमो भगवते ज्वलज्ज्वालामालिने ॐ यँअः
अनादिशक्तिधाम्ने सर्वात्मने करतलकरपृष्ठाभ्यान्नमः, एवं
हृदयादि॥

अथ ध्यानम्

वज्रदंष्ट्रन्त्रिनयनङ्कालकण्ठमरिन्दमम्।
सहस्रकरमत्युग्रँव्वन्दे शम्भुमुमापतिम्॥ १॥

अथापरं सर्वपुराणगुह्यन्निःशेषपापौघहरम्पवित्रम्।
जयप्रदं सर्वविपत्प्रमोचनँव्वक्ष्यामि शैवङ्कवचं हिताय ते॥ २॥

ऋषभ उवाच

नमस्कृत्वा महादेवँव्विश्वव्यापिनमीश्वरम्।
वक्ष्ये शिवमयँव्वर्म सर्वरक्षाकरन्नृणाम्॥ ३॥

शुचौ देशे समासीनो यथावत्कल्पितासनः।

जितेन्द्रियो जितप्राणश्चिन्तयेच्छिवमव्ययम्॥ ४॥

हृत्पुण्डरीकान्तरसन्निविष्टं स्वतेजसा व्याप्तनभोवकाशम्।
अतीन्द्रियं सूक्ष्ममनन्तमाद्यन्ध्यायेत्परानन्दमयम्महेशम्॥ ५॥

ध्यानावधूताखिलकर्मबन्धश्चिरञ्चिदानन्दनिमग्नचेताः।
षडक्षरन्याससमाहितात्मा शैवेन कुर्यात्कवचेन रक्षाम्॥ ६॥

माम्पातु देवोऽखिलदेवतात्मासंसारकूपे पतितञ्जभीरे।
तन्नाम दिव्यँव्वरमन्त्रमूलन्धुनोतु मे सर्वमघं हृदिस्थम्॥ ७॥

सर्वत्र मां रक्षतु विश्वमूर्त्तिर्ज्योतिर्म्मयानन्दघनश्चिदात्मा।
अणोरणीयानुरुशक्तिरेकः स ईश्वरः पातु भयादशेषात्॥ ८॥

यो भूस्वरूपेण बिभर्त्तिविश्वम्पायात् स भूमेर्ग्गरिशोऽष्टमूर्त्तिः।
योऽपांस्वरूपेण नृणाङ्करोति सञ्जीवनं सोऽवतु माञ्जलेभ्यः॥ ९॥

p. 483) कल्पावसाने भुवनानि दग्ध्वा सर्वाणि यो नृत्यति भूरिलीलः।
स कालरुद्रोऽवतु मान्दवाग्नेर्वात्यादिभीतेरखिलाच्च तापात्॥ १०॥

प्रदीप्तविद्युत्कनकावभासो विद्यावराभीतिकुठारपाणिः।
चतुर्मुखस्तत्पुरुषस्त्रिनेत्रः प्राच्यां स्थितं रक्षतु मामजस्त्रम्॥ ११॥

कुठारखेटाङ्कुशपाशशूलकपालढक्काक्षगुणान्दधानः।
चतुर्मुखो नीलरुचिस्त्रिनेत्रः पायादघोरो दिशि दक्षिणस्याम्॥ १२॥

कुन्देन्दुशङ्खस्फटिकावभासो वेदाक्षमालावरदाभयाङ्कः।
त्र्यक्षश्चतुर्वक्त्र उरुप्रभावः सद्योधिजातोऽवतु माम्प्रतीच्याम्॥ १३॥

वराक्षमालाभयटङ्कहस्तः सरोजकिञ्जल्कसमानवर्णः।
त्रिलोचनश्चारुचतुर्मुखो माम्पायादुदीच्यान्दिशि वामदेवः॥ १४॥

वेदाभयेष्टाङ्कुशपाशटङ्ककपालढक्काक्षकशूलपाणिः।
सितद्युतिः पञ्चमुखोऽवतान्मामीशान ऊर्द्ध्वम्परमप्रकाशः॥ १५
॥

मूर्द्धानमव्यान्मम चन्द्रमौलिर्भालम्ममाव्यादथ भालनेत्रः।
नेत्रे ममाव्याद्भगनेत्रहारी नासां सदा रक्षतु विश्वनाथः॥ १६॥

पायाच्छ्रुती मे श्रुतिगीतकीर्त्तिः कपोलमव्यात्सततङ्कपाली।

वक्रं सदा रक्षतु पञ्चवक्त्रो जिह्वां सदा रक्षतु वेदजिह्वः॥ १७॥

कण्ठङ्गिरीशोऽवतु नीलकण्ठः पाणिद्वयम्पातु पिनाकपाणिः।
दोर्म्मूलमव्यान्मम धर्मबाहुर्वक्षस्थलन्दक्षमखान्तकोऽव्यात्॥
१८॥

ममोदरम्पातु गिरीन्द्रधन्वा मध्यम्ममाव्यान्मदनान्तकारी।
हेरम्बतातो मम पातु नाभिम्पायात्कटिन्धूर्ज्जटिरीश्वरो मे॥ १९॥

ऊरुद्वयम्पातु कुबेरमित्रो जानुद्वयम्मे जगदीश्वरोऽव्यात्।
जङ्घायुगम्पुङ्गवकेतुरव्यात्पादौ ममाव्यात्सुरवन्द्यपादः॥ २०॥

महेश्वरः पातु दिनादियामे माम्मध्ययामेऽवतु वामदेवः।
त्रियम्बकः पातु तृतीययामे वृषध्वजः पातु दिनान्त्ययामे॥ २१॥

पायान्निशादौ शशिशेखरो माङ्गङ्गाधरो रक्षतु मान्निशीथे।
p. 484) गौरीपतिः पातु निशावसाने मृत्युञ्जयो रक्षतु सर्वकालम्॥ २२॥

अन्तःस्थितं रक्षतु शङ्करो मां स्थाणुः सदा पातु बहिःस्थितम्माम्
।

तदन्तरे पातु पतिः पशूनां सदाशिवो रक्षतु मां समन्तात्॥ २३॥

तिष्ठन्तमव्याद्भुवनैकनाथः पायाद्व्रजन्तम्प्रमथाधिनाथः।
वेदान्तवेद्योऽवतु मान्निषण्णम्मामव्ययः पातु शिवः शयानम्॥ २४
॥

मार्गेषु मां रक्षतु नीलकण्ठः शैलादिदुर्गेषु पुरत्रयारिः।
अरण्यवासादिमहाप्रवासे पायान्मृगव्याध उदारशक्तिः॥ २५॥

कल्पान्तकाटोपपटुप्रकोपस्फुटाट्टहासोच्चलिताण्डकोशः।
घोररिसेनार्णवदुर्न्निवारमहाभयाद्रक्षतु वीरभद्रः॥ २६॥

पत्त्यश्वमातङ्गरथावरूथसहस्रलक्षायुतकोटिभीषणम्।
अक्षौहिणीनां शतमाततायिनाश्चिच्छन्द्यान्मृडो घोरकुठारधारया॥
२७॥

निहन्तुदस्यून्प्रलयानलार्च्चिर्ज्ज्वलन्त्रिशूलन्त्रिपुरान्तकस्य।
शार्दूलसिंहर्क्षवृकादिहिंस्रान् सन्त्रासयत्वीश धनुः पिनाकः॥ २८॥

दुःस्वप्नदुःशकुनदुर्गतिदौर्मनस्यदुर्ब्भिक्षदुर्व्यसनदुःसहदुर्यश्

आंसि।

उत्पाततापविषभीतिमसद्ग्रहार्त्तिव्याधींश्च नाशयतु मे

जगतामधीशः॥ २९॥

ॐ नमो भगवते सदाशिवाय सकलतत्त्वात्मकाय सर्वमन्त्ररूपाय

सर्वयन्त्राधिष्ठिताय सर्वतन्त्ररूपाय सर्वतत्त्वविदूराय

ब्रह्मरुद्रावतारिणे नीलकण्ठाय पार्वतीमनोहरप्रियाय

सोमसूर्याग्निलोचनाय भस्मोद्धूलितविग्रहाय

महामणिमुकुटधारणाय माणिक्यभूषणाय

सृष्टिस्थितिप्रलयकालरौद्रावताराय दक्षाध्वरध्वंसकाय

महाकालभेदनाय मूलधारैकनिलयान तत्त्वातीताय गङ्गाधराय

सर्वदेवाधिदेवाय षडाश्रयाय वेदान्तसाराय॥

त्रिवर्गसाधनायानन्तकोटिब्रह्माण्डनायकायाऽनन्त-वासुकि-तक्षक-

कर्कोटकशङ्खकुलिकपद्म-

महापद्मेत्यष्टमहानागकुलभूषणाय प्रणवस्वरूपाय

चिदाकाशायाकाशदिक्स्वरूपाय

p. 485) ग्रहनक्षत्रमालिने सकलाय कलङ्करहिताय सकललोकैककर्त्रे

सकललोकैकसंहर्त्रे सकललोकैकगुरवे सकललोकैकसाक्षिणे

सकलनिगमगुह्याय सकलवेदान्तपारगाय सकललोकैकवरप्रदाय

सकललोकैकशङ्कराय शशाङ्कशेखराय शाश्वतनिजावासाय

निराभासाय निरामयाय निर्मलाय निर्लोभाय निर्मदाय निश्चिन्ताय

निरहङ्काराय निरङ्कुशाय निष्कलङ्काय निर्गुणाय निष्कामाय

निरुपप्लवाय निरवद्याय निरन्तराय निष्कारणाय निरातङ्काय

निष्प्रपञ्चायनिस्सङ्गाय निर्द्वन्द्वाय निराधाराय नीरागाय

निष्क्रोधाय निर्मलाय निष्पापाय निर्भयाय निर्विकल्पाय निर्भेदाय

निष्क्रियाय निस्तुलाय निःसंशयाय निरञ्जनाय निरुपमविभवाय

नित्यशुद्धबुद्धिपरिपूर्णसच्चिदानन्दाद्वयाय परमशान्तस्वरूपाय

तेजोरूपाय तेजोमयाय जय जय रुद्र महारौद्र महावतार

महाभैरव कालभैरव कल्पान्तभैरव कपालमालाधर

खट्वाङ्गखड्गचर्मपाशाङ्कुशडमरुशूलचापबाणगदाशक्तिभि

न्दिपालतोमरमुसलमुद्गरपाशपरिघभुशुण्डीशतघ्नीचक्राद्यायुध्

अभीषणकरसहस्त्रमुखदंष्ट्राकरालवदन

विकटाट्टहासविस्फारितब्रह्माण्डमण्डल नागेन्द्रकुण्डल

नागेन्द्रहार नागेन्द्रवलय नागेन्द्रचर्मधर मृत्युञ्जय त्र्यम्बक

त्रिपुरान्तक विश्वरूप विरूपाक्ष विश्वेश्वर वृषभवाहन

विश्वतोमुख सर्वतो रक्ष रक्ष मा ज्वल ज्वल

महामृत्युमपमृत्युभयन्नाशय नाशय, चोरभयमुत्सादयोत्सादय

विषसर्पभयं शमय शमय, चोरान्मारय मारय, मम

शत्रूनुच्चाटयोच्चाटय, त्रिशूलेन विदारय विदारय, कुठारेण भिन्धि
भिन्धि, खड्गेन छिन्धि छिन्धि, खट्वाङ्गेन विपोथय विपोथय, मुसलेन
निष्पेषय निष्पेषय, बाणैः सन्ताडय सन्ताडय, रक्षांसि भीषय
भीषय, अशेषभूतानि विद्रावय विद्रावय,
कूष्माण्डवेतालमारीगणब्रह्मराक्षसगणान् सन्त्रासय सन्त्रासय,
ममाभयङ्कुरु कुरु,

p. 486) वित्रस्तम्मामाश्वासयाश्वासय,
नरकमहाभयान्मामुद्धरोद्धर सञ्जीवय सञ्जीवय,
क्षुत्तृड्भ्याम्मामाप्याययाप्यायय,
दुःखातुरम्मामानन्दयानन्दय, शिवकवचेन
मामाच्छादयाच्छादय, मृत्युञ्जय त्र्यम्बक सदाशिव नमस्ते॥

ऋषभ उवाच

इत्येतत्कवचं शैवँव्वरदँव्याहृतम्मया।
सर्वबाधाप्रशमनं रहस्यं सर्वदेहिनाम्॥ ३०॥

यः सदा धारयेन्मर्त्त्यः शैवङ्कवचमुत्तमम्।
न तस्य जायते क्वापि भयं शम्भोरनुग्रहात्॥ ३१॥

क्षीणायुः प्राप्तमृत्युर्वा महारोगहतोऽपि वा।
सद्यः सुखमवाप्नोति दीर्घमायुश्च विन्दति॥ ३२॥

सर्वदारिद्र्यशमनं सौमङ्गल्यविवर्द्धनम्।
यो धत्ते कवचं शैवं स देवैरपि पूज्यते॥ ३३॥

महापातकसङ्घातैर्मुच्यते चोपपातकैः।
देहान्ते मुक्तिमाप्नोति शिववर्मानुभावतः॥ ३४॥

त्वमपि श्रद्धया वत्स शैवङ्कवचमुत्तमम्।
धारयस्व मया दत्तं सद्यः श्रेयो ह्यवाप्स्यसि॥ ३५॥

सूत उवाच

इत्युक्त्वा ऋषभो योगी तस्मै पार्त्थिवसूनवे।
ददौ शङ्खम्महारावङ्खड्गञ्चारिनिषूदनम्॥ ३६॥

पुनश्च भस्म सम्मन्त्र्य तदङ्गम्परितोऽस्पृशत्।
गजानां षड्गहस्त्रस्य द्विगुणस्य बलन्ददौ॥ ३७॥

भम्मप्रभावात्सम्प्राप्तबलैश्वर्यधृतिस्मृतिः।
स राजपुत्रः शुशुभे शरदर्क इव श्रिया॥ ३८॥

तमाह प्राञ्जलिम्भूयः स योगी नृपनन्दनम्।
एष खड्गो मया दत्तस्तपो मन्त्रानुभावितः॥ ३९॥

शितधारमिमँखड्गँय्यस्मै दर्शयसे स्फुटम्।
स सद्यो म्रियते शत्रुः साक्षान्मृत्युरपि स्वयम्॥ ४०॥

अस्य शङ्खस्य निर्ह्रादँय्ये शृण्वन्ति तवाहिताः।
ते मूर्च्छिताः पतिष्यन्ति न्यस्तशस्त्रा विचेतनाः॥ ४१॥

खड्गशङ्खाविमौ दिव्यौ परसैन्यविनाशिनौ।
आत्मसैन्यस्वपक्षाणां शौर्यतेजोविवर्द्धनौ॥ ४२॥

एतयोश्च प्रभावेण शैवेन कवचेन च।
द्विषद्बहस्त्रनागानाम्बलेन महतापि च॥ ४३॥

p. 487) भस्मधारणसामर्त्थ्याच्छत्रुसैन्यँव्विजेष्यसि।

प्राप्य सिंहासनम्पित्र्यङ्गोत्राऽसि पृथिवीमिमाम्॥ ४४॥

इति भद्रायुषं सम्यगनुशास्य समातृकम्।
ताभ्यां सम्पूजितः सोऽथ योगी स्वैरगतिर्ययौ॥ ४५॥

इति शिवकवचं सम्पूर्णम्॥

अथोपनिषत्

ॐ नमश्शिवाय ॐ नमोस्तु सर्व शम्भो त्रिनेत्र चारुगात्र
त्रैलोक्यनाथ उमापथे दक्षयज्ञविध्वंसकारक सकामाङ्गनाशन
घोरपापप्रणाशन महापुरुष महोग्रमूर्त्ते सर्वसत्त्वक्षयङ्कर
शुभङ्कर महेश्वर त्रिशूलधर स्मरारे गुहाधामन् दिग्वासः
महाशङ्खशेखरजटाधर कपालमालाविभूषितशरीर
वामचक्षुःक्षुभितदेवप्रजाध्यक्ष भगाक्ष्नोःक्षयङ्कर
भीमसेननाथ पशुपते कामाङ्गदहन चत्वरवासिन् शिव महादेवं
ईशान शङ्कर भीमभव वृषध्वज कैटभ प्रौढ महानाथेश्वर
भूतिरत अविमुक्तक रुद्ररुद्रेश्वर स्थाणो एकलिङ्ग कालिन्दीप्रिय
श्रीकण्ठ नीलकण्ठ अपराजित रिपुभयङ्कर सन्तोषपते वामदेव

अघोर तत्पुरुष महाघोर अघोरमूर्त्ते शान्त सरस्वतीकान्त
सहस्त्रमूर्त्ते महोद्भव विभो कालाग्ने रुद्र रौद्र हर महीधरप्रिय
सर्वतीर्त्थाधिवास हंस कामेश्वर केदार अधिपते परिपूर्ण
मुचुकुन्द मधुनिवास कृपाणपाणे भयङ्कर विद्याराज सोमराज
कामराज महीधरराजकन्याहृदब्जवसते समुद्रशायिन्
गयामुखगोकर्णब्रह्मयोने सहस्त्रवक्राक्षिचरणहाटकेश्वर नमस्ते
नमस्ते॥ इत्युपनिषत्॥

अथ शतनाम

शिवो महेश्वरः शम्भुः पिनाकी शशिशेखरः।
वामदेवो विरूपाक्षः कपर्दी नीललोहितः॥ १॥

शङ्करः शूलपाणिश्च खट्वाङ्गी विष्णुवल्लभः।
शिपिविष्टोम्बिकानाथः श्रीकण्ठो भक्तवत्सलः॥ २॥

p. 488) भवः सर्वस्त्रिलोकेशः शितिकण्ठः शिवाप्रियः।
उग्रः कपालि कामारिरन्धकासुरसूदनः॥ ३॥

गङ्गाधरो ललाटाक्षः कालकालः कृपानिधिः।
भीमः परशुहस्तश्च मृगपाणिर्जटाधरः॥ ४॥

कैलासवासी कवची कठोरस्त्रिपुरान्तकः।
वृषाङ्को वृषभारूढो भस्मोद्धलितविग्रहः॥ ५॥

सामप्रियः स्वरमयस्त्रयीमूर्तिरनीश्वरः।
सर्वज्ञः परमात्मा च सोमसूर्याग्निलोचनः॥ ६॥

हविर्यज्ञमयः सोमः पञ्चवक्त्रः सदाशिवः।
विश्वेश्वरो वीरभद्रो गणनाथः प्रजापतिः॥ ७॥

हिरण्यरेता दुर्द्धर्षो गिरीशो गिरिशोनघः।
भुजङ्गभूषणो भर्गो गिरिधन्वा गिरिप्रियः॥ ८॥

कृत्तिवासाः पुरारातिर्भगवान्प्रमथाधिपः।
मृत्युञ्जयः सूक्ष्मतनुर्जगद्व्यापी जगद्गुरुः॥ ९॥

व्योमकेशो महासेनजनकश्चारुविक्रमः।
रुद्रो भूतपतिः स्थाणुरहिर्बुध्न्यो दिगम्बरः॥ १०॥

अष्टमूर्त्तिरनेकात्मा सात्त्विकः शुद्धविग्रहः।
शाश्वतः खण्डपरशुरजः पाशविमोचकः॥ ११॥

मृडः पशुपतिर्देवो महादेवोऽव्ययः प्रभुः।
पूषदन्तभिदव्यग्रो दक्षाध्वरहरो हरः॥ १२॥

भगनेत्रभिदव्यक्तः सहस्राक्षः सहस्रपात्।
अपवर्गप्रदोऽनन्तस्तारकः परमेश्वरः॥ १३॥

इमानि दिव्यनामानि जप्यन्ते सर्वदा मया।
नाम कल्पलतेयम्मे सर्वाभीष्टप्रदायिनी॥ १४॥

नामान्येतानि सुभगे शिवदानि न संशयः।
वेदसर्वस्वभूतानि नामान्येतानि वस्तुतः॥ १५॥

एतानि यानि नामानि तानि सर्वार्त्थदान्यतः।
जप्यन्ते सादरन्नित्यम्मया नियमपूर्वकम्॥ १६॥

वेदेषु शिवनामानि श्रेष्ठान्यघहराणि च।

सन्त्यनन्तानि सुभगे वेदेषु विविधेष्वपि॥ १७॥

तेभ्यो नामानि सङ्गृह्य कुमाराय महेश्वरः।
अष्टोत्तरसहस्रन्तु नाम्नामुपदिशत्पुरा॥ १८॥

इति शिवाष्टोत्तरशतनामस्तोत्रं सम्पूर्णम्॥

p. 489) अथ सहस्रनाम

सूत उवाच

श्रूयतामृषयः श्रेष्ठाः कथयामि यथाश्रुतम्।
विष्णुना प्रार्थितो येन सन्तुष्टः परमेश्वरः॥ १॥

तदहङ्कथयाम्यद्य पुण्यं नाम सहस्रकम्।

श्रीविष्णुरुवाच

शिवो हरो मृडो रुद्रः पुष्करः पुष्पलोचनः॥ २॥

अर्थिगम्यः सदाचारः सर्वः शंभुर्महेश्वरः।
चन्द्रापीडश्चन्द्रमौलिर्विश्वादिश्चामरेश्वरः॥ ३॥

वेदान्तसारसन्दोहः कपाली नीललोहितः।
ध्यानाधारोपरिच्छेद्यो गौरीभर्त्ता गणेश्वरः॥ ४॥

अष्टमूर्त्तिर्विश्वमूर्त्तिस्त्रिवर्गः स्वर्गसाधनः।
ज्ञानगम्यो दृढप्रज्ञो देवदेवस्त्रिलोचनः॥ ५॥

वामदेवो महादेवः पटुः परिवृढो दृढः।
विश्वरूपी विरूपाक्षो वागीशः शुचिमत्तरः॥ ६॥

सर्वः प्रमाणसँवादी वृषाङ्को वृषवाहनः।
ईशः पिनाकी खट्वाङ्गी चित्रवेषश्चिरन्तनः॥ ७॥

तमोहरो महायोगी गोप्ता ब्रह्माण्डहृज्जटी।
कालकालः कृत्तिवासाः सुभगः प्रणतात्मकः॥ ८॥

त्रिपुण्ड्रधारी चाक्षुष्यो दुर्वासाः पुरशासनः।

दिव्यायुधः स्कन्दगुरुः परमेष्ठी परात्परः॥ ९॥

अनादिमध्यनिधनो गिरीशो गिरिबान्धवः।
कुबेरबन्धुः श्रीकण्ठो लोकवर्णोत्तमो मृदुः॥ १०॥

समाधिवेद्यः कोदण्डी नीलकण्ठः परश्वधी।
विशालाक्षो मृगव्याधः सुरेशः सूर्यतापनः॥ ११॥

धर्मधामा क्षमाक्षेत्रम्भगवान्भगनेत्रभित्।
उग्रः पशुपतिस्तार्क्ष्यः प्रियभक्तः प्रियँवदः॥ १२॥

दाता दयाकरो दक्षः कपर्दी कामशासनः।
श्मशाननिलयः सूक्ष्मः श्मशानस्थो महेश्वरः॥ १३॥

लोककर्त्ता मृगपतिर्महाकर्त्ता महौषधीः।
उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः॥ १४॥

नीतिः सुनीतिः शुद्धात्मा सोमः सोमरतः सुखी।
सोमपोऽमृतपः सौम्यो महाज्योतिर्महाद्युतिः॥ १५॥

तेजोमयोऽमृतमयोऽन्नमयश्च सुधापतिः।

p. 490) अजातशत्रुरालोकसम्भाव्यो हव्यवाहनः॥ १६॥

लोककरो वेदकरः सूत्रकारः सनातनः।

महर्षिः कपिलाचार्यो विश्वदीप्तिर्विलोचनः॥ १७॥

पिनाकपाणिर्भूदेववशगः स्वस्तिकृत्सुधीः।

धातृधामा धामकरः सर्वदः सर्वगोचरः॥ १८॥

ब्रह्मसृग्विश्वसृक्सर्वः कर्णिकारप्रियः कविः।

शाखो विशाखो गोशाखः शिवो भिषगनुत्तमः॥ १९॥

गङ्गाप्लवोदको भव्यः पुष्कलः स्थपतिः स्थिरः।

विजितात्मा विधेयात्मा भूतवाहनसारथिः॥ २०॥

सगणो गणवर्यश्च सुकीर्त्तिश्चिच्छन्नसंशयः।

कामदेवः कामपालो भस्मोद्धूलितविग्रहः॥ २१॥

भस्मप्रियो भस्मशायी कामी कान्तः कृतागमः।

समावर्त्तो निवृत्तात्मा धर्मपुञ्जः सदाशिवः॥ २२॥

अकल्मषश्चतुर्बाहुर्दुरावासो दुरासदः।
दुर्ल्लभो दुर्गमो दुर्गः सर्वायुधविशारदः॥ २३॥

अध्यात्मयोगनिलयः सुतन्तुस्तन्तुवर्द्धनः।
शुभाङ्गो लोकसारङ्गो जगदीशो जनार्दनः॥ २४॥

भस्मशुद्धिकरो मेरुरोजस्वी शुद्धविग्रहः।
असाध्यसाधुसाध्यश्च भृत्यमर्कटरूपधृक्॥ २५॥

हिरण्यरेताः पौराणो रिपुजीवहरोचलः।
महाह्रदो महागर्त्तः सिद्धवृन्दारकेडितः॥ २६॥

व्याघ्रचर्माम्बरो व्याली महाभूतो महानिधिः।
अमृतानुभवः श्रीमान्पाञ्चजन्यः प्रभञ्जनः॥ २७॥

पञ्चविंशतितत्त्वस्थः पारिजातः परात्परः।
सुलभः सुव्रतः शूरो वाङ्मयीकनिधिर्न्निधिः॥ २८॥

वर्णाश्रमगुरुर्वर्णी शत्रुजिच्छत्रुतापनः।

आश्रमः क्षपणः क्षामो ज्ञानवानचलेश्वरः॥ २९॥

प्रमाणभूतो दुर्ज्ञेयः सुपर्णो वायुवाहनः।
धनुर्द्धरो धनुर्वेदो गुणः शशिगुणाकरः॥ ३०॥

सत्यः सत्यपरो दीनो धर्माङ्गो धर्मसाधनः।
अनन्तदृष्टिरानन्दो दण्डो दमयिता दमः॥ ३१॥

अभिचार्यो महामायो विश्वकर्मा विशारदः।
वीतरागो विनीतात्मा तपस्वी भूतवाहनः॥ ३२॥

p. 491) उन्मत्तवेषः प्रच्छत्रो जितकामोर्चितप्रियः।
कल्पान्तप्रकृतिः कल्पः सर्वलोकप्रजापतिः॥ ३३॥

तरस्वी तारको धीमान्प्रधानः प्रभुरव्ययः।
लोकपालोन्तर्हितात्मा कल्पादिः कमलेक्षणः॥ ३४॥

वेदशास्त्रार्थतत्त्वज्ञो नियमो नियमाश्रयः।
चन्द्रः सूर्यः शनिः केतुर्विरागो विद्रुमच्छविः॥ ३५॥

भक्तिवश्यः परम्ब्रह्म मृगबाणार्पणो नयः।
अद्रिरद्यालयः कान्तः परमात्मा जगद्गुरुः॥ ३६॥

सर्वकामालयस्तुष्टो माङ्गल्यो मङ्गलावृतः।
महातपा दीर्घतपाः स्थविष्ठः स्थविरो द्रुमः॥ ३७॥

अहः सँवत्सरो व्याप्तिः प्रमाणम्परमन्तपः।
सँवत्सरकरो मन्त्रः प्रत्ययः सर्वदर्शनः॥ ३८॥

अजः सर्वेश्वरः सिद्धो महारेता महाबलः।
योगो योग्यो महातेजाः सिद्धसर्वादिविग्रहः॥ ३९॥

वसुर्वसुमनाः सत्यः सर्वपापहरो हरः।
सुकीर्त्तिः शोभितः श्रावी ह्यवाङ्मनसगोचरः॥ ४०॥

अमृतः शाश्वतः शान्तो द्रोणहस्तः प्रतापवान्।
कमण्डलूधरो धन्वी वेदाङ्गो वेदविन्मुनिः॥ ४१॥

भ्राजिष्णुर्भोजनम्भोक्ता लोकनाथो दुरावरः।
अतीन्द्रियो महामायः सर्वावासश्चतुष्पथः॥ ४२॥

कालयोगी महानादो महोत्साहो महाबलः।
महाबुद्धिर्महावीर्यो भूतचारी पुरन्दरः॥ ४३॥

निशाचरः प्रतचारी महाशक्तिर्महाद्युतिः।
अनिर्देश्यवपुः श्रीमान्सर्वाचार्यमनोगतिः॥ ४४॥

बहुश्रुतो महामायो नियतात्मा ध्रुवोऽध्रुवः।
तेजस्तेजोद्युतिधरो नरकः सर्वशासकः॥ ४५॥

नृत्यप्रियो नित्यनृत्यः प्रकाशात्माप्रकाशकः।
स्पष्टः क्रूरो बुधो मन्त्रः समानः सारसम्भवः॥ ४६॥

युगादिकृद्युगावर्तो गम्भीरो वृषवाहनः।
इष्टो विशिष्टः शिष्टेष्टः शरभः शरभोधनुः॥ ४७॥

तीर्थरूपस्तीर्थनामा तीर्थादृश्यः सुतीर्थदः।
p. 492) अपान्निधिरधिष्ठानँव्विजयो जयकालवित्॥ ४८॥

प्रतिष्ठितः प्रमाणज्ञो हिरण्यकवचो हरिः।

विमोचनः सुरगणो विद्येशो बिन्दुसंश्रयः॥ ४९॥

बालरूपो बलोन्मत्तो विकर्त्ता गहनो गुहः।
करणङ्कारणङ्कर्त्ता सर्वबन्धविमोचनः॥ ५०॥

व्यवसायो व्यवस्थानः स्थानदो जगदादिजः।
गुरुदो ललितो भेदो निवासात्मनि संस्थितः॥ ५१॥

वीरेश्वरो वीरभद्रो विश्वरूपो विधिर्विराट्।
वीरचन्द्रो मणिर्द्धर्त्ता तीव्रानन्दो नदीश्वरः॥ ५२॥

अग्न्याधारस्त्रिशूली च शिपिविष्टः शिवालयः।
वालखिल्यो महावीर्यस्तिग्मांशुर्ब्बधिरः खगः॥ ५३॥

अभिरामः सुशरणः सुब्रह्मण्यः सुधानिधिः।
मघवा कौशिको गोमान् विरामः सर्वसाधनः॥ ५४॥

ललाटजो विश्वदेहः सारसंसारचक्रभृत्।
अमोघो दण्डिमध्यस्थो हरिणोब्रह्मवर्च्चसः॥ ५५॥

परमार्थः परोमायी सँवरो व्याघ्रकोनलः।
रुचिर्वररुचिर्वन्द्यो वाचस्पतिरहर्पतिः॥ ५६॥

रविर्विरोचनः स्कन्दः शास्ता वैवस्वतोऽमरः।
युक्तिकृन्मत्तकीर्त्तिश्च सानुगश्च पुरञ्जयः॥ ५७॥

कैलासाधिपतिः कान्तः सवितारविलोचनः।
विश्वोत्तमो वीतभयो विश्वभर्त्तानिवारितः॥ ५८॥

नित्यो नियतकल्याणः पुण्यश्रवणकीर्त्तनः।
दूरश्रवा विश्वसहो ध्येयो दुःखप्रणाशनः॥ ५९॥

उत्तारणो दुष्कृतिहा विज्ञेयो दुःसहो भवः।
अनादिर्भूर्भुवोलक्ष्मीः किरीटी त्रिदशाधिपः॥ ६०॥

विश्वगोप्ता विश्वकर्त्ता सुवीरो रुचिराङ्गदः।
जननो जनजन्मादिः प्रीतिमान्नीतिमान्धवः॥ ६१॥

वसिष्ठः कश्यपो भानुर्भीमो भीमपराक्रमः।
प्रणवः सत्पथाचारो महाकाशो महाधनः॥ ६२॥

जन्माधिपो महादेवः सकलागमपारगः।

तत्त्वन्तत्त्वविदेकात्मा विभुर्विष्णुर्विभूषणः॥ ६३॥

ऋषिर्ब्राह्मण ऐश्वर्यो जन्ममृत्युजरातिगः।

p. 493) पञ्चयज्ञसमुत्पत्तिर्विश्वेशो विमलोदयः॥ ६४॥

अनाद्यन्त आत्मयोनिर्वत्सलो भक्तलोकधृक्।

गायत्रीवल्लभः प्रांशुर्विश्वासः प्रभाकरः॥ ६५॥

शिशुर्गिरिरतः सम्राड्वृषेणः सुरशत्रुहा।

अनेमिरिष्टनेमिश्च मुक्तिदो विगतज्वरः॥ ६६॥

स्वयञ्ज्योतिस्तपञ्ज्योतिरतिज्योतिरचञ्चलः।

पिङ्गलः कपिलः श्मश्रुर्भालनेत्रस्त्रयीतनुः॥ ६७॥

ज्ञानस्कन्दो महानीतिर्विश्वोत्पत्तिरुपप्लवः।

भोगी विवस्वतस्तत्त्वो योगपारो दिवस्पतिः॥ ६८॥

कल्याणगुणनामा च पापहा पुण्यदर्शनः।

उदारकीर्त्तिरुद्योगी महन्मान्यश्च सत्त्वपः॥ ६९॥

नक्षो मलिनकेशश्च स्वाधिष्ठानमदाश्रयः।
पवित्रः पापनाशश्च मणिपूरो नभोगतिः॥ ७०॥

हृत्पुण्डरीकमासीनः शक्रः शान्तो वृषाकपिः।
कृष्णो ग्रहपतिः कृष्णः समर्त्थोऽनर्त्थनाशनः॥ ७१॥

अधर्मशत्रुरज्ञेयः पुरुहूतः पुरुश्रुतः।
ब्रह्मगर्ब्भो बृहद्गर्ब्भो धर्मधेनुर्द्धनागमः॥ ७२॥

जगद्धितैषी सुगतः कुमारः कुशलागमः।
हिरण्यवर्णो ज्योतिष्मान्नानाभूतरतो ध्वनिः॥ ७३॥

आरोग्यो नयनाध्यक्षो विश्वामित्रो धनेश्वरः।
ब्रह्मज्योतिर्वसुर्द्धामा महाज्योतिरनुत्तमः॥ ७४॥

मातामहो मातरिश्वा नभस्वान्नागहारधृक्।
पुलस्त्यः पुलहोऽगस्त्यो जातूकर्ण्यः पराशरः॥ ७५॥

निरावरणनिर्वारो वैरञ्चयो विष्टरश्रवाः।

आत्मभूरनिरुद्धोऽत्रिर्ज्ञानमूर्त्तिर्महायशाः॥ ७६॥

लोकवीराग्रणीर्वीरश्चन्द्रः सत्यपराक्रमः।

व्यालकल्पो महाकल्पः कल्पवृक्षः कलाधरः॥ ७७॥

अलङ्करिष्णुरचलो रोचिष्णुर्विक्रमोऽम्बरः।

आशुः शब्दपतिर्वङ्गी प्लवनः शिखिसारथिः॥ ७८॥

असंसृतिपतिः शक्रः प्रमादः पादपासनः।

वसुश्रवाः कव्यवाहः प्रतप्तो विश्वभोजनः॥ ७९॥

जप्यो जरारिः शमनो लोहिताश्वस्तनूनपात्।

p. 494) नभयोनिः सुनिष्पन्नः सुरभिः शिशिरात्मकः॥ ८०॥

वसन्तो माधवो ग्रीष्मो नभस्थो बीजवाहनः।

अङ्गिरागुरुरात्रेयो विमलो विश्ववाहनः॥ ८१॥

पावनः पुरुजिच्छक्रस्त्रैविद्यो नरवारणः।

मनोबुद्धिरहङ्कारः क्षेत्रज्ञः क्षेत्रपालकः॥ ८२॥

जमदग्निर्ज्जलनिधिर्विगोलो विश्वगोलकः।
अघोरोऽनुत्तरो यज्ञः श्रेष्ठो निःश्रेयसालयः॥ ८३॥

शैलो गगनकुन्दाभो दानवारिररिन्दमः।
चामुण्डाजीवकश्चारुनिःशल्यो लोककल्पधृक्॥ ८४॥

चतुर्व्वेदश्चतुर्ब्भावश्चतुरश्चतुरप्रियः।
आम्नायोऽथ समाम्नायस्तीर्त्थवेदशिवालयः॥ ८५॥

बहुरूपो महारूपः सर्वरूपश्चराचरः।
नयनिर्मायको न्यायो न्यायगम्यो निरञ्जनः॥ ८६॥

सहस्रमूर्द्धा देवेन्द्रः सर्वशास्त्रप्रभञ्जनः।
मुण्डो विरूपो विक्रांतो दण्डी ताण्डगुणोत्तमः॥ ८७॥

पिङ्गलाक्षो हयग्रीवो नीलग्रीवो निरामयः।
सहस्रबाहुः सर्वेशः शरण्यः सर्वलोकधृक्॥ ८८॥

पद्मासनः परञ्ज्योतिः परम्पारम्परम्फलम्।

पद्मगर्भो महागर्भो विश्वगर्भो विचक्षणः॥ ८९॥

चराचरज्ञो वरदो वरेशस्तु महास्वनः।
देवासुरगुरुर्देवो देवासुरनमस्कृतः॥ ९०॥

देवासुरमहामित्रो देवासुरमहाश्रमः।
देवादिदेवो देवोग्निर्देवासुरवरप्रदः॥ ९१॥

देवासुरेश्वरो दिव्यो देवासुरमहेश्वरः।
देवदेवो महाचिन्त्यो देवतात्मात्मसम्भवः॥ ९२॥

सद्योनष्टासुरव्याघ्रो देवसिंहो दिवाकरः।
विबुधाग्रचरः श्रेष्ठः सर्वदेवोत्तमोत्तमः॥ ९३॥

शिवज्ञानप्रदः श्रीमाञ्छिखी श्रीपर्वतप्रियः।
वज्रहस्तः सिद्धखड्गी नरसिंहनिपातनः॥ ९४॥

ब्रह्मचारी लोकचारी धर्मचारी धनाधिपः।
नन्दी नन्दीश्वरो नन्दो लग्नवृत्तिधरः शुचिः॥ ९५॥

लिङ्गाध्यक्षः सुराध्यक्षो योगाध्यक्षो युगावहः।
स्वर्द्धामा स्वर्गतः स्वामी स्वरः स्वरतमस्वनः॥ ९६॥

p. 495) बोधाध्यक्षो बीजकर्त्ता धर्मकृद्धर्मसम्भवः।
दम्भो लोभोऽथ वै शम्भुस्सर्वभूतमहेश्वरः॥ ९७॥

श्मशाननिलयस्त्र्यक्षः सेतुरप्रतिमाकृतिः।
लोकोत्तरः स्फुटालोकस्त्र्यम्बको नागभूषणः॥ ९८॥

अन्धकारिर्मयद्वेषी विष्णोः स्कन्धरतात्मकः।
हितदश्च क्षयगुणो दक्षारिः पूषदन्तभित्॥ ९९॥

पूर्ज्जनिः खण्डपरशुः सकलो निष्कलो मुनिः।
अकालः सकलाधारः पाण्डुरोगो मृगो नगः॥ १००॥

पूर्णः पूरयिता पुण्यः सुकुमारः सुलोचनः।
साङ्गो गोयः प्रियाक्रूरः पुण्यकीर्त्तिरनामयः॥ १०१॥

मनोजवस्तीर्त्थकरो जटिलो जीवितेश्वरः।
जीवितान्तकरो नित्यो वसुरेता वसुप्रदः॥ १०२॥

सुजातिः सत्कृतिः सिद्धिः सजातिः कालकण्टकः।
कलाधरो महाकालभूतः सत्यपरायणः॥ १०३॥

लोकलावण्यकर्त्ता च लोकोत्तरसुखालयः।
तेजोमयो द्युतिधरो लोकमानाग्रणीरणुः॥ १०४॥

शुचिस्मितः प्रसन्नात्मा अजेयो दुरतिक्रमः।
ज्योतिर्म्मयो निरुजाङ्गो गङ्गाप्रेष्ठो जलेश्वरः॥ १०५॥

तुम्बवीणो महाकायो विशोकः शोकनाशनः।
त्रिलोकपा त्रिलोकेशः सर्वशुद्धिरधोक्षजः॥ १०६॥

अव्यक्तलक्षणो देवो व्यक्तोऽव्यक्तो विशाम्पतिः।
परः शिवो वसुर्न्नासा सारोमा नन्दनोमयः॥ १०७॥

ब्रह्मा विष्णुः प्रजापालो हंसो हंसगतिर्वयः।
वेधा विधाता स्रष्टा च संहर्त्ता च चतुर्मुखः॥ १०८॥

कैलासशिखरावासी सर्वावासी सदागतिः।

हिरण्यगर्भो द्रुहिणो भूतनाथोऽथ भूपतिः॥ १०९॥

सद्योगी योगविद्योगी वरदो ब्राह्मणप्रियः।
देवप्रियो देवनाथो देवको देवचिन्तकः॥ ११०॥

विषमाक्षो विरूपाक्षो वृषभो वृषवर्द्धनः।
निर्म्ममो निरहङ्कारो निर्मोहो निरुपद्रवः॥ १११॥

दर्पहा दर्पदोद्दप्तः सर्वार्त्थपरिवर्त्तकः।
सहस्रजित्सहस्रार्चिः स्निग्धप्रकृतिदक्षिणः॥ ११२॥

p. 496) भूतभव्यभवोनाथः प्रभवो भूतिनाशनः।
अर्त्थोऽनर्त्थो महाकोशः परकार्यैकपण्डितः॥ ११३॥

निष्कण्टकः कृतानन्दो निर्व्याजो व्याजमर्द्दनः।
सत्त्ववान सात्यकिः सत्यः कीर्त्तिस्नेहः कृतागतः॥ ११४॥

अकम्पितो गुणग्राही नैकात्मा नैककर्मकृत्।
सुप्रीतः सुमुखः सूक्ष्मः सुकरो दक्षिणानिलः॥ ११५॥

नन्दिस्कन्दधरो धुर्यः प्रकटप्रीतिवर्द्धनः।
अपराजितः सर्वसत्त्वो गोविन्दः सत्त्ववाहनः॥ ११६॥

अधृतः स्वधृतः सिद्धः पूतमूर्तिर्यशोधनः।
वाराहश्रृङ्गधृक्क्षूरो बलवानेकनाथकः॥ ११७॥

श्रुतिप्रकाशः श्रुतिमानेकबन्धुरनेककृत्।
श्रीवत्सलः शिवारम्भः शान्तभद्रः समोयशः॥ ११८॥

भूयशोभूषणो भूतिर्भूतकृद्भूतिभावनः।
अकम्पो भक्तिकायस्तु कालहा निष्कलेश्वरः॥ ११९॥

सत्यव्रतो महात्यागी नित्यशान्तिः परायणः।
परार्थवृत्तिर्वरदो विविक्षुस्तु विशारदः॥ १२०॥

शुभदः शुभकर्त्ता च शुभनामा शुभः स्वयम्।
अनर्त्थितो गुणग्राही अकर्त्ता कनकप्रभः॥ १२१॥

स्वभावभद्रो मध्यस्थः शत्रुघ्नो विघ्ननाशनः।
शिखण्डी कवची शूली जटी मुण्डी च कुण्डली॥ १२२॥

अमृत्युः सर्वदृक्सिंहस्तेजोराशिर्महामणिः।
असङ्ख्येयोऽप्रमेयात्मा वीर्यवान्वीर्यकोविदः॥ १२३॥

वैद्यश्चैव वियोगी च सप्तवीरो मुनीश्वरः।
अनुक्रमो दुराधर्षो मधुरः प्रियदर्शनः॥ १२४॥

सुरेशस्तारणः सर्वशब्दः प्रतपताञ्जतिः।
कालक्षयः कालकारी सुकृतिः कृतवासुकिः॥ १२५॥

महेष्वासो महीभर्त्ता निष्कलङ्को विशृङ्खलः।
द्युमणिस्तरणिर्द्धन्यः सिद्धिदः सिद्धिसाधनः॥ १२६॥

विवृतः सँवृतस्तुत्यो व्यूढोरस्को महाभुजः।
सर्वयोनिर्न्निरातङ्को नरनारायणप्रियः॥ १२७॥

निर्लेपो निःप्रसङ्गात्मा निर्व्यङ्गो व्यङ्गनाशनः।
p. 497) स्तव्यः स्तवप्रियः स्तोता व्याप्तमूर्त्तिर्न्निराकुलः॥ १२८॥

निरवद्यपदोपायो विद्याराशिरसत्कृतः।

प्रशान्तबुद्धिरक्षुण्णः सम्ग्रहा नित्यसुन्दरः॥ १२९॥

पापहा दर्मधास्त्रीशः साकल्पः शर्वरीपतिः।
परमार्त्थगुरुद्दृष्टिः सुरैराश्रितवत्सलः॥ १३०॥

सोमो रसज्ञो रसदः सर्वसत्त्वावलम्बनः।
एवन्नाम्नां सहस्त्रेण तुष्टाव वृषभध्वजम्॥ १३१॥

प्रार्थयामास शम्भुँव्वै पूजयामास शङ्करम्।
परीक्षार्त्थं हरेरीशः कमलेषु महेश्वरः॥ १३२॥

गोपयामास कमलन्तदेकम्भुवनेश्वरः।
हृदि विचारितन्तेन कुतो वै कमलङ्गतम्॥ १३३॥

यातु यातु सुखेनैव नेत्रङ्किङ्कमलन्न हि।
तदेव कमलङ्कृत्वा यजामि चन्द्रशेखरम्॥ १३४॥

इत्येवं हृदयं ज्ञात्वा विष्णोरमिततेजसः।
मा मेति व्याहरन्नेव प्रादुरासीज्जगद्गुरुः॥ १३५॥

यत्रैव च कृता पूजा कृष्णेन परमात्मना।
तस्मादवततताराशु मण्डलात्पार्थिवस्य सः॥ १३६॥

यथोक्तरूपिणं शम्भुन्तेजोराशिसमुत्थितम्।
नमस्कृत्य पुरः स्थित्वा स्तुतिङ्कृत्वा विशेषतः॥ १३७॥

प्रसन्नवदनो भूत्वा शम्भोश्च सम्मुखः स्थितः।
इत्थम्भूतं हरिर्दृष्ट्वा कोटिभास्करभूषितम्॥ १३८॥

प्रणनामीश्वरं शम्भुन्देवदेवञ्जनार्द्दनः।
तदा प्राह महादेवः प्रहसन्निव शङ्करः।
सम्प्रेक्ष्यमाणया विश्वङ्कृताञ्जलिपुटस्थितम्॥ १३९॥

शङ्कर उवाच

ज्ञातम्मयेदं सकलन्देवकार्यञ्जनार्दन।
सुदर्शनाख्यञ्चक्रञ्च ददामि तव शोभनम्॥ १४०॥

यद्रूपम्भवता दृष्टं सर्वलोकसुखावहम्।
हिताय सर्वदेवेशकृतम्भावय सुव्रत॥ १४१॥

रणाजावपि संस्मृत्य देवानान्दुःखनाशनम्।
इष्टञ्चक्रमिदं रूपमिदन्नाम सहस्रकम्॥ १४२॥

ये शृण्वन्ति सदा भक्त्या सिद्धि स्यादनपायिनी।
एवमुक्त्वा ददौ चक्रं सूर्यायुतसमप्रभम्॥ १४५॥

p. 498) विष्णुरपि च संस्नात्वा जग्राहोदङ्मुखस्तदा।
नमस्कृत्य तदा देवम्पुनर्वचनमब्रवीत्॥ १४४॥

शृणु देव मया ध्येयम्पठनीयञ्च किम्प्रभो।
लोकानान्दुःखनाशार्त्थँव्वद त्वँल्लोकशङ्कर॥ १४५॥

इति पृष्टस्तदा तेन सन्तुष्टस्तु शिवोऽब्रवीत्।
रूपन्ध्येयम्मदीयँव्वै सर्वानर्त्थविनाशनम्॥ १४६॥

अनेकदुःखनाशार्त्थम्पाठ्यन्नाम सहस्रकम्।
धार्यञ्चक्रं सदा मेऽद्य सर्वानर्त्थप्रशान्तये॥ १४७॥

अन्ये च ये पठिष्यन्ति पाठयिष्यन्ति नित्यशः।

तेषां दुःखन्न स्वप्नेऽपि जायते नात्र संशयः॥ १४८॥

राज्ञाञ्च सङ्कटे प्राप्ते शतवारम्पठेद्यदि।
साङ्गञ्च विधियुक्तञ्च कल्याणँल्लभते नरः॥ १४९॥

रोगनाशकरञ्चैतद्विद्यानायकमुत्तमम्।
यमुद्दिश्य फलश्रेष्ठम्पठिष्यन्ति नरास्त्विह॥ १५०॥

लभन्ते नात्र सन्देहः फलं सत्यमनुत्तमम्।
मम प्रातः समुत्थाय पूजाङ्कृत्वा मदीयकम्॥ १५१॥

पठते मत्समक्षँवै नित्यं सिद्धिर्न्न दूरतः।
ऐहिकां सिद्धिमासाद्य परलोकसमुद्भवाम्॥ १५२॥

प्राप्नोति पाठको नित्यम्मत्प्रसादात्सुरेश्वर।
सायुज्यां मुक्तिमायाति नात्र कार्या विचारणा॥ १५३॥

एवमुक्त्वा तदा विष्णुं शङ्करः प्रीतमानसः।
उपस्पृश्य कराभ्यां हि उवाच शङ्करः पुनः॥ १५४॥

वरदोऽस्मि सुरश्रेष्ठ वरान्वृणु यथेप्सितान्।
भक्त्या वशीकृतो नूनं स्तवेनानेन ते सदा॥ १५५॥

इत्युक्तो देवदेवेन देवदेवम्प्रणम्य तम्।
यथेदानीङ्कृपा देव क्रियते चाप्यतः परम्॥ १५६॥

कार्या चैव विशेषेण कृपाद्द त्वात्त्वया प्रभो।
त्वयि भक्तिर्महादेव प्रसीद् वरमुत्तमम्॥ १४७॥

नान्यदिच्छामि भक्तानामार्त्तिर्नैव भवेत्प्रभो।
तच्छ्रुत्वा वचनन्तस्य दयावान्सुतराम्भवः॥ १४८॥

पस्पर्श च तदा तस्मै श्रद्धां शीतांशुलक्षणः।
प्राह त्वैनम्महादेवः परमानन्दमच्युतम्॥ १५९॥

p. 499) मयि भक्तिश्च वन्द्यश्च पूज्यश्चैव सुरैरपि।
विश्वम्भरस्त्वदीयँव्वै नाम पापहरम्परम्॥ १६०॥

भविष्यति न सन्देहो मत्प्रसादात्सुरोत्तम।
इत्युक्त्वान्तर्दधे रुद्रो भगवान्नीललोहितः॥ १६१॥

जनार्द्दनोऽपि भगवान्वचनाच्छङ्करस्य च।
प्राप्य चक्रं शुभन्ध्यानं स्तोत्रमेतन्निरन्तरम्॥ १६२॥

पपाठाध्यापयामास भक्तैस्तदुपपादितम्।
अन्येऽपि ये पठिष्यन्ति ते विन्दन्तु तथा फलम्॥ १६३॥

इति पृष्टं समायातं शृण्वताम्पापहारकम्।
अतः परञ्च किं श्रेष्ठाः कथयामि वचः पुनः॥ १६४॥

इति शिवसहस्रनामस्तोत्रं सम्पूर्णम्॥

इति शाक्तप्रमोदे शिवतन्त्रं समाप्तम्॥

श्रीः

शिवहरराजधानीपतिश्रीराजादेवनन्दनसिंह-

बाहादुरनराधिपसंगृहीतविरचित-

शाक्तप्रमोदान्तर्गतं

पञ्चदशं

गणेशतन्त्रम्

उक्तराजगुरुवंश्यपण्डितश्रीरघुराजदुबेजीद्वारा

संशोधितम्

तदेतत्

श्रीकृष्णदासात्मज-खेमराजेन

स्वकीये श्रीवेंकटेश्वर यन्त्रालये

मुद्रयित्वा प्रकाशितम्

मुम्ब-ई

श्रीगणेशाय नमः

अथ शाक्तप्रमोदः

अथ गणेशतन्त्रम्

अथ गणेशध्यानम्

नवरत्नमयन्द्वीपं स्मरेदिक्षुरसाम्बुधौ।
तद्वीचिधौतपर्यन्तम्मन्दमारुतसेवितम्॥ १॥

मन्दारपारिजातादिकल्पवृक्षलताकुलम्।
उद्भूतरत्नच्छायाभिररुणीकृतभूतलम्॥ २॥

उद्यद्दिनकरेन्दुभ्यामुद्भासितदिगन्तरम्।
तस्य मध्ये पारिजातन्नवरत्नमयं स्मरेत्॥ ३॥

ऋतुभिः सेवितं षड्भिरनिशम्प्रीतिवर्द्धनैः।
तस्याधस्तान्महापीठे रचिते मातृकाम्बुजे॥ ४॥

षट्कोणान्तस्त्रिकोणाढ्यम्महागणपतिं स्मरेत्॥ ५॥

हस्तीन्द्राननमिन्दुचूडमरुणच्छायत्रिनेत्रं रसा-
श्लिष्टम्प्रियया सपद्मकरया स्वाङ्कस्थया सन्ततम्।
बीजापूरगदाधनुस्त्रिशिखियुक्कक्राब्जपाशोत्पल-
ङ्कज्ञाभैः स्वविषाणरत्नकलशौ हस्तैर्वहन्तम्भजे॥ ६॥

गण्डपालीगलद्दानपूरलालसमानसान्।
द्विरेफान्कर्णतालाभ्याँव्वारयन्तम्मुहुर्मुहुः॥ ७॥

कराग्रधृतमाणिक्यकुम्भवक्त्रविनिस्सृतैः।
रत्नवर्षैः प्रीणयन्तं साधकम्मदविह्वलम्॥
माणिक्यमुकुटोपेतं रत्नाभरणभूषितम्॥ ८॥

p. 504) अथ यन्त्रोद्धारः

षट्कोणञ्च त्रिकोणञ्च तद्बहिः अन्यत्सर्वम्मातृकायन्त्रवत्॥

अथ मन्त्रोद्धारः

श्रीशक्तिस्मरभूविघ्नबीजानि प्रभमँव्वदेत्।

ङेन्तङ्गणपतिम्पश्चाद्वरान्ते वरदम्परम्॥

p. 505) उक्त्वा सर्वजनम्मेन्ते वशमानय ठद्वयम्।

अष्टाविंशत्यक्षरोयन्ताराद्यो मनुरीरितः॥

अथ मन्त्रः

ॐ श्रीं ह्रीं क्लीं ग्लौं गंगणपतये वरवरद सर्वजनम्मे

वशमानय ठः ठः॥

अथ पूजाप्रयोगः

प्रातः कृत्यादि पीठन्यासान्तँव्विधाय पूर्वोक्तपीठशक्तीर्विन्यस्य॥
तद्यथा॥ केशरेषु मध्ये च॥ तीव्रायै० ज्वालिन्यै० नन्दायै० भोगदायै०
कामरूपिण्यै० उग्रायै० तेजोवत्यै० सत्यायै० विघ्ननाशिन्यै० तदुपरि
मध्ये सर्वशक्तिकमलासनाय नमः॥ सर्वत्र प्रणवादि नमोऽन्तेन
पूजयेत्॥ तत ऋष्यादिन्यासमाचरेत्॥ शिरसि गणकऋषयेनमः॥ मुखे
निचृद्गायत्रीच्छन्दसे नमः॥ हृदि गणपतयेदेवतायैनमः॥ ततः
कराङ्गन्यासौ॥ ॐ श्रींह्रींक्लींग्लौंगंगां
अङ्गुष्ठाभ्यान्नमः॥ ॐ श्रींह्रींक्लींग्लौंगंगीं
तर्ज्जनीभ्यांस्वाहा॥ ६॥ एवं गूंमध्यमाभ्याँव्वषट्॥ ६॥ गैं
अनामिकाभ्यां हूम्॥ गौं कनिष्ठाभ्यांव्वषट्॥ ६॥ गः
करतलकरपृष्ठाभ्याम्फट्॥ एवं हृदयादिषु॥ केचित्तु ॐ
गांहृदयायनमः श्रींगींशिरसेस्वाहेति तत्त्वषड्बीजस्थस्वबीजेन
दीर्घभाजा प्रकल्पयेत्॥ इति वचनाद्विशिष्टस्यैव ग्रहणात्॥

अथ षोडशोपचारक्रमेण पूजाविधिः

अथ ध्यानम्॥

एकदन्तं शूर्पकर्णञ्चजवक्त्रञ्चतुर्भुजम्।
पाशाङ्कुशधरन्देवम्मोदकान्विभ्रतङ्करैः॥

रक्तपुष्पमयीम्मालाङ्कण्ठे हस्ते परां शुभाम्।

भक्तानाँव्वरदं सिद्धिबुद्धिभ्यां सेवितं सदा॥

सिद्धिबुद्धिप्रदं नृणान्धर्मार्त्थकाममोक्षदम्।

ब्रह्मरुद्रहरीन्द्राद्यैस्संस्तुतम्परमर्षिभिः॥ इति ध्यानम्॥

p. 506) अथावाहनम्

आगच्छ जगदाधार सुरासुरवरार्च्चित।

अनाथनाथ सर्वज्ञ गीर्वाणपरिपूजित॥ इत्यावाहनम्॥

अथासनम्

स्वर्णसिंहासनन्दिव्यन्नानारत्नसमन्वितम्।

समर्पितम्मया देव तत्र त्वं समुपाविश॥ इत्यासनम्॥

अथ पाद्यम्

देवदेवेश सर्वेश सर्वतीर्त्थाहृतञ्जलम्।

पाद्यङ्गृहाण गणपते गन्धपुष्पाक्षतैर्युतम्॥ इति पाद्यम् ...

अथाग्घ्र्यम्

प्रवालमुक्ताफलपूगरत्नन्ताम्बूलजाम्बूनदमष्टगन्धम्।
पुष्पाक्षतायुक्तममोघशक्ते दत्तम्मयाग्घ्र्यं सफलीकुरुष्व॥
इत्यग्घ्र्यम्॥

अथाचमनीयम्

गङ्गादिसर्वतीर्त्थेभ्यः प्रार्थितन्तोयमुत्तमम्।
कर्पूरैलालवङ्गादिवासितं स्वीकुरु प्रभो॥ इत्याचमनीयम्॥

चम्पकाशोकबकुलमालतीमल्लिकादिभिः।
वासितं स्निग्धताहेतुन्तैलञ्चारु प्रगृह्यताम्॥ इति तैलम्॥

अथ दुग्धस्नानम्

कामधेनुसमुद्भूतं सर्वेषाञ्जीवनम्परम्।
पावनं यज्ञहेतुन्ते पयः स्नानार्त्थमर्पितम् ... इति दुग्धस्नानम्॥

अथ दधिस्नानम्

धेनुदुग्धसमुद्भूतं शुद्धं सर्वगतं प्रियम्।
मयानीतन्दधि वरं स्नानार्त्थम्प्रतिगृह्यताम्॥ इति दधिस्नानम्॥

अथ घृतस्नानम्

नवनीतसमुत्पन्नं सर्वसन्तोषकारणम्।
यथाङ्गन्देवताहारङ्घृतं स्नातुं समर्प्पितम्॥ इति घृतस्नानम्॥

अथ मधुस्नानम्

रक्तसारघसम्भूतं सर्वतेजोविवर्द्धनम्।
सर्वपुष्टिकरन्देव मधु स्नानार्त्थमर्पितम्॥ इति मधुस्नानम्॥

अथ शर्क्करास्नानम्

इक्षुसारसमुद्भूतां शर्क्करां सुमनोहराम्।
मलापहारिणीं स्नातुङ्गृहाण त्वम्मयार्पिताम्॥ इति शर्क्करास्नानम्॥

अथ गुडस्नानम्

सर्वमाधुर्यताहेतुस्स्वादुस्सर्वप्रियङ्करः।

पुष्टिकृत्स्नातुमानीत इक्षुसारभवो गुडः॥ इति गुडस्नानम्॥

अथ मधुपर्कः

p. 507) कांस्ये कांस्येन पिहितो दधिमध्वाज्यपूरितः।

मधुपर्को मयानीतः पूजार्त्थम्प्रतिगृह्यताम्॥ इति मधुपर्कः॥

अथ शुद्धोदकस्नानम्

सर्वतीर्त्थाहृतन्तोयम्मया प्रार्त्थनया विभो।

सुवासितङ्गृहाणेदं सम्यक् स्नातुं सुरेश्वर॥ इति शुद्धोदकस्नानम्॥

अथ वस्त्रम्

रक्तवस्त्रयुगन्देव लोकलज्जानिवारणम्।

अनग्घ्यमतिसूक्ष्मञ्च गृहाणेदम्मयार्पितम्॥ इति वस्त्रम्॥

अथोपवीतम्

राजतम्ब्रह्मसूत्रञ्च काञ्चनं रक्तसँयुतम्।

भक्त्योपपादितन्देव गृहाण परमेश्वर॥ इति यज्ञोपवीतम्॥

अथ भूषणम्

अनेकरत्नयुक्तानि भूषणानि बहूनि च।

तत्तदङ्गे काञ्चनानि योजयामि तवाज्ञया॥ इति भूषणानि॥

अथ चन्दनम्

अष्टगन्धसमायुक्तं रक्तचन्दनमुत्तमम्।

द्वादशाङ्गेषु ते देव लेपयामि कृपाङ्कुरु॥ इति चन्दनम्॥

अथाक्षताः

रक्तचन्दनसंमिश्रांस्तन्दुलांस्तिलकोपरि।

शोभायै सम्प्रदास्यामि गृहाण परमेश्वर॥ इत्यक्षताः॥

अथ पुष्पाणि

पाटलङ्कर्णिकारञ्च बन्धूकं रक्तपङ्कजम्।

मोगरम्मालतीपुष्पङ्गृहाण सुमनोहरम्॥ इति पुष्पाणि॥

अथ धूपः

दशाङ्गङ्गुग्गुलन्धूपं सर्वसौगन्ध्यकारकम्।

सर्वपापक्षयकरन्त्वङ्गृहाण मयार्पितम्॥ इति धूपः॥

अथ दीपः

सर्वज्ञ सर्वलोकेश तमोनाशनमुत्तमम्।

गृहाण मङ्गलन्दीपन्देवदेव नमोऽस्तु ते॥ इति दीपः॥

अथ नैवेद्यानि

नानापक्वान्नसँयुक्तम्पायसं शर्करान्वितम्।

नानाव्यञ्जनशोभाढ्यं शाल्योदनमनुत्तमम्॥

दधिदुग्धघृतैर्युक्तं लवङ्गैलासमन्वितम्।

मरीचिचूर्णसहितकथिकावटकान्वितम्॥

राजिकाधान्यसँयुक्तम्मेथीपिष्टं स-तक्रकम्।

हिङ्गु-जीरक-कूष्माण्ड-म्मरीचि-माष-पिष्टकैः॥

सम्पादितैः सुपक्वैश्च भर्ज्जितैर्वटकैर्युतम्।

मोदकापूप-लड्डूक-शष्कुली-मण्डकादिभिः॥

p. 508) पर्पटैरपि सँयुक्तन्नैवेद्यममृतान्वितम्।

हरिद्रा-हिङ्गुलवणसहितं सूपमुत्तमम्॥

स-सामुद्रङ्गृहाणेदम्भोजनङ्कुरु सादरम्॥ इति नैवेद्यानि॥

अथाचमनीयम्

सुतृप्तिकारकन्तोयं सुगन्धञ्च पिबेच्छया।

त्वयि तृप्ते जगत्तृप्तन्नित्यतृप्ते महात्मनि॥

उत्तरापोशनार्थन्ते दद्मि तोयं सुवासितम्।

मुखपाणिविशुद्ध्यर्थम्पुनस्तोयन्ददामि ते॥ इत्याचमनीयम्॥

अथ फलानि

दाडिमम्मधुरन्निम्बु-जम्ब्वाम्र-पनसादिकम्।

द्राक्षा-रम्भाफलम्पक्वङ्कर्कन्यूः खार्जुरम्फलम्॥

नारिकेलञ्च नारिङ्गमञ्जिरञ्जम्बिरन्तथा।

उर्वारुकञ्च देवेश फलान्येतानि गृह्यताम्॥ इति फलानि॥

अथ साचमनीयङ्करोद्वर्त्तनादिकम्॥

मुखपाणिविशुद्ध्यर्त्थम्पुनस्तोयन्ददामि ते।

गृहाण चन्दनञ्चारु कराङ्गोद्वर्त्तनं शुभम्॥

नानापरिमलद्रव्यैर्निर्म्मितञ्चूर्णमुत्तमम्।

सुगन्धिनामकम्पुण्यं गन्धि चारु प्रगृह्यताम्॥ इति करोद्वर्त्तनम्॥

अथ सिन्दूरम्

चारुशाद्द रसम्भूतँव्वंशसारसमुद्भवम्।

सीमन्तभूषणञ्चूर्णँल्लाक्षारञ्जितमस्तु ते॥ इति सिन्दूरम्॥

अथ ताम्बूलम्

सचन्द्रपूगचूर्णाढ्यङ्खाद्यखादिरसँयुतम्।

एलालवङ्गसंमिश्रन्ताम्बूलङ्केसरान्वितम्। इति ताम्बूलम्॥

अथ द्रव्यम्

न्यूनातिरिक्तापूजायाः सम्पूर्णफलहेतवे।
दक्षिणाङ्कांश्चनीन्देव स्थापयामि तवाग्रतः॥ इति दक्षिणा॥

अथ माला

सितपीतैस्तथा रक्तैर्ज्जलजैः कुसुमैः शुभैः।
ग्रथितां सुन्दराम्मालाङ्गृहाण परमेश्वर॥ इति माला॥

अथ दूर्वाः

हरिताश्श्वेतवर्णा वा पञ्चत्रिपत्रसँयुताः।
दूर्वाङ्कुरा मया दत्ता एकविंसतिसम्मिताः॥ इति दूर्वाः॥

अथ प्रदक्षिणा

एकविंशतिसङ्ख्याकाः कुर्यां देव प्रदक्षिणाः।
पदे पदे ते देवेश नश्यन्तु पातकानि मे॥ इति प्रदक्षिणा॥

अथारार्त्तिकम्

औदुम्बरे राजते वा कांस्ये काञ्चनसम्भवे।

p. 509) पात्रे प्रकल्पितान्दीपान्गृहाण चक्षुरर्पकान्॥

पञ्चारार्त्तिम्पञ्चदीपर्द्दीपिताम्परमेश्वरः।

चारु चन्द्रनिभं दीपङ्गृहाण वीचिवारणम्॥

यथास्यनेक्ष्यते भस्म तथा पापँव्विनाशय। इत्यारार्त्तिकम्॥

इति पूजाविधिः

अथ गणेशस्तवराजः

ॐ तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि।

तन्नो दन्तिः प्रचोदयात्॥

ॐकारमाद्यम्प्रवहन्ति सन्तो वाचः श्रुतीनामपि यङ्गृणन्ति।

गजाननन्देवगणानताङ्घ्रिम्भजेऽहमर्द्धेन्दुकृतावतंसम्॥

पादारविन्दार्च्चनतत्पराणां संसारदावानलभङ्गदक्षम्।

निरन्तरन्निर्ग्गतदानतोयैस्तन्नौमि विघ्नेश्वरमम्बुदाभम्॥

कृताङ्गरागन्नवकुङ्कुमेन मत्तालिजालम्मदपङ्कलग्नम्।
निवारयन्तन्निजकर्णतालैः को विस्मरेत्पुत्रमनङ्गशत्रोः।

शम्भोर्ज्जटाजूटनिवासिगङ्गाजलं समानीय कराम्बुजेन।
लीलाभिराराच्छिवमर्च्चयन्तङ्गजाननम्भक्तियुता भजन्ति।

कुमारभुक्तौ पुनरात्महेतोः पयोधरौ पर्वतराजपुत्र्याः।
प्रक्षालयन्तङ्करशीकरेण मौग्ध्येन तन्नागमुखम्भजामि॥

तया समुद्धृत्य गजस्य हस्तँय्ये शीकराः पुष्कररन्ध्रमुक्ताः।
व्योमाङ्गणे ते विचरन्ति ताराः कालात्मना मौक्तिकतुल्यभासः॥

क्रीडारते वारिनिधौ गजस्थे वेलामतिक्रामति वारिपूरे।
कल्पावसानम्परिचिन्त्य देवाः कैलासनाथं श्रुतिभिः स्तुवन्ति॥

नागानने नागकृतोत्तरीये क्रीडारते देवकुमारसङ्घैः।
त्वयि क्षणङ्कालगतिं व्विहाय तौ प्रापतुः कन्दुकतामिनेन्दू॥

मदोल्लसत्पञ्चमुखैरजस्रमध्यापयन्तं सकलागमार्त्थम्।
देवानृषीन्भक्तजनैकमित्त्रं हेरम्बमर्क्कारुणमाश्रयामि॥

पादाम्बुजाभ्यामति वामनाभ्याङ्कृतार्त्थयन्तङ्कृपया धरित्रीम्।
p. 510) अकारणङ्कारणमाप्तवाचान्तन्नागवक्त्रन्न जहाति चेतः॥

येनार्पितं सत्यवतीसुताय पुराणमालिख्य विषाणकोट्या।
तञ्चन्द्रमौलेस्तनयन्तपोभिराराध्यमानन्दघनम्भजामि॥

पदं श्रुतीनाम पदं स्तुतीनाँल्लीलावतारम्परमात्ममूर्त्तेः।
नागात्मकँव्वा पुरुषात्मकँव्वा त्वभेदमाद्यम्भज विघ्नराजम्॥

पाशाङ्कुशौ भग्नरदन्त्वभीष्टङ्करैर्द्दधानङ्कररन्ध्रमुक्तैः।
मुक्ताफलाभैः पृथुशीकरौघैः सिञ्चन्तमङ्गं शिवयोर्ब्भजामि॥

अनेकमेकङ्गजमेकदन्तञ्चैतन्यरूपञ्जगदादिबीजम्।
ब्रह्मेति यँव्वेदविदो वदन्ति तं शंभुसूनुं सततम्भजामि॥

स्वाङ्कस्थिताया निजवल्लभाया मुखाम्बुजालोकनलोलनेत्रम्।
स्मेराननाब्जम्मदवैभवेन रुद्धम्भजे विश्वविमोहनन्तम्॥

ये पूर्वमाराध्य गजाननन्त्वां सर्वाणि शास्त्राणि पठन्ति तेषाम्।
त्वत्तो न चान्यत्प्रतिपाद्यमेतैस्तदस्ति चेत्सर्वमसत्यकल्पम्॥

हिरण्यवर्णाञ्जगदीशितारङ्कविम्पुराणं रविमण्डलस्थम्।
गजाननँय्यम्प्रविशन्ति सन्तस्तत्कालयोगैस्तमहम्प्रपद्ये॥

वेदान्तगीतम्पुरुषम्भजेऽहमात्मानमानन्दघनं हृदिस्थम्।
गजाननँय्यन्महसा जनानाँव्विघ्नान्धकारो विलयम्प्रयाति॥

शम्भोस्समालोक्य जटाकलापे शशाङ्कखण्डन्निजपुष्करेण।
सुभग्नदन्तम्प्रविचिन्त्य मौग्ध्यादाक्रष्टुकामः श्रियमातनोतु॥

विघ्नार्गलानाँव्विनिपातनार्थँय्यन्नारिकेलैः कदलीफलाद्यैः।
प्रसारयन्तम्मदवारणास्यम्प्रभुं सदाभीष्टमहम्भजे यम्॥

यज्ञैरनेकैर्बहुभिस्तपोभिराराध्यमाद्यङ्गजराजवक्त्रम्।
स्तुत्याऽनया ये विधिवत्स्तुवन्ति ते सर्वलक्ष्मीनिलया भवन्ति॥

इति गणेशस्तवराजः समाप्तः॥

अथ कवचम्

ईश्वर उवाच

शृणु वक्ष्यामि कवचं सर्वसिद्धिकरम्प्रिये।

p. 511) पठित्वा पाठयित्वा च मुच्यते सर्वसङ्कटात्॥

अज्ञात्वा कवचन्देवि गणेशस्य मनुञ्जपेत्।

सिद्धिर्न्न जायते तस्य कल्पकोटिशतैरै॥

ॐ आमोदश्च शिरः पातु प्रमोदश्च शोखोपरि।

सम्मोदो भ्रूयुगे पातु भ्रूमध्ये च गणाधिपः॥

गणक्रीडश्चक्षुर्युगन्नासायाङ्गणनायकः।

गणक्रीडाचितः पातु वदने सर्वसिद्धये॥

जिह्वायां सुमुखः पातु ग्रीवायान्दुर्मुखः सदा।

विघ्नेशो हृदये पातु विघ्ननाशश्च वक्षसि।

गणानान्नायकः पातु बाहुयुग्मे सदा मम।
विघ्नकर्त्ता च उदरे विघ्नहर्त्ता च लिङ्गके॥
गजवक्त्रः कटीदेशे एकदन्तो नितम्बके।
लम्बोदरः सदा पातु गुह्यदेशे ममारुणः॥

व्यालयज्ञोपवीती माम्पातु पादयुगे सदा।
जापकः सर्वदा पातु जानुजङ्घे गणाधिपः॥

हारिद्रः सर्वदा पातु सर्वाङ्गे गणनायकः।
य इदम्प्रपठेन्नित्यङ्गणेशस्य महेश्वरि॥

कवचं सर्वसिद्धाख्यं सर्वविघ्नविनाशनम्।
सर्वसिद्धिकरं साक्षात् सर्वपापविमोचनम्॥

सर्वसम्पत्प्रदं साक्षात्सर्वशत्रुक्षयङ्करम्।
ग्रहपीडा ज्वरा रोगा ये चान्ये गुह्यकादयः॥

पठनाद्धारणादेव नाशमायान्ति तत्क्षणात्।
धनधान्यकरन्देवि कवचं सुरपूजितम्॥

समो नास्ति महेशानि त्रैलोक्ये कवचस्य च।

हारिद्रस्य महेशानि कवचस्य च भूतले॥

किमन्यैरसदालापैर्यत्रायुर्व्ययतामियात्।

इति विश्वसारतन्त्रे गणेशकवचं समाप्तम्॥

अथोपनिषत्

ॐ लंस्वाहा नाववतु स्वाहा नौ भुनक्तु स्वाहा वीर्यं करवावहै।

तेजस्विनावधीतमस्तु मा विद्विषावहै।

ॐ शान्तिः शान्तिः शान्तिः॥

ॐ लंनमस्ते गणपतये। त्वमेव प्रत्यक्षं तत्त्वमसि॥

त्वमेव केवलं कर्त्तासि। त्वमेव केवलन्धर्त्तासि॥

त्वमेव केवलं हर्त्तासि।

p. 512) त्वमेव सर्वं खल्विदम्ब्रह्मासि।

त्वं साक्षादात्मासि नित्यं॥

ऋतं वच्मि॥ सत्यं वच्मि॥ अव त्वं माम्॥ अव वक्तारम्॥ अव श्रोतारम्॥
अव दातारम्॥ अव धातारम्॥ अवानूचानमव शिष्यम्॥ अव पश्चात्तात्॥
अव पुरस्तात्॥
अवोत्तरात्तात्। अव दक्षिणात्तात्॥ अव चोर्ध्वात्तात्॥ अवाधरात्तात्॥
सर्वतो माम्पाहि पाहि समन्तात्॥ त्वं वाङ्मयस्त्वञ्चिन्मयः॥
त्वमानन्दमयस्त्वं ब्रह्ममयस्त्वं सच्चिदानन्दाद्वितीयोसि॥
त्वम्प्रत्यक्षम्ब्रह्मासि॥ त्वं ज्ञानमयो विज्ञानमयोऽसि॥
सर्वं जगदिदन्त्वत्तो जायते॥ सर्वं जगदिदं त्वत्तस्तिष्ठति॥ सर्वं
जगदिदन्त्वयि लयमेष्यति॥ त्वम्भूमिरापोऽनलोऽनिलो नभः॥ त्वं
चत्वारि वाक्पदानि॥ त्वङ्गुणत्रयातीतः॥
त्वन्देहत्रयातीतः॥ त्वङ्कालत्रयातीतः॥ त्वं मूलाधारस्थितोऽसि नित्यम्
॥
त्वं शक्तित्रयात्मकः॥ त्वां योगिनो ध्यायन्ति नित्यम्॥ त्वं ब्रह्मा
त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं
चन्द्रमास्त्वं ब्रह्म भूभुवःस्वरोम्॥

गणादीन् पूर्वमुच्चार्य वर्णादींस्तदनन्तरम्॥

अनुस्वारः परतरः॥ अर्द्धेन्दुलसितन्तारेण रुद्धम्॥

एतत्तव मनुस्वरूपम्॥ गकारः पूर्वरूपम्॥

अकारो मध्यमरूपम्॥ अनुस्वारश्चान्त्यरूपम्॥

बिन्दुरुत्तररूपम्॥ नादः सन्धानम्॥ संहिता सन्धिः॥

सैषा गणेशविद्या॥ गणऋषिर्निचृद्गायत्री च्छन्दः॥

गणपतिर्देवता॥ ॐ गंगणपतयेनमः॥

एकदन्ताय विद्महे वक्रतुण्डाय धीमहि॥ तन्नो दन्तिः प्रचोदयात्॥

एकदन्तञ्चतुर्हस्तम्पाशमङ्कुशधारिणम्॥

रदं च वरदं हस्तैर्बिभ्राणम्मूषकध्वजम्॥
रक्तलम्बोदरं शूर्पकर्णकं रक्तवाससम्॥

रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैस्सुपूजितम्।
भक्तानुकम्पिनन्देवञ्जगत्कारणमच्युतम्॥

आविर्भूतञ्च सृष्ट्यादौ प्रकृतेः पुरुषात्परम्।
p. 513) एवन्ध्यायति यो नित्यं स योगी योगिनाँव्वरः॥

ॐ नमो व्रातपतये नमो गणपतये नमः प्रथमपतये नमस्तेऽस्तु
लम्बोदरायैकदन्ताय विघ्ननाशिने शिवसुताय वरदमूर्त्तये नमः॥

एतदथर्वशीर्षं योऽधीते॥ स ब्रह्मभूयाय कल्पते॥ स सर्वविघ्नैर्न
बाध्यते॥ स सर्वतः सुखमेघते॥ स पञ्चमहापापात्प्रमुच्यते॥

सायमधीयानो दिवसकृतं पापन्नाशयति॥ प्रातरधीयानो रात्रिकृतं
पापं नाशयति॥ सायम्प्रातः प्रयुञ्जानो अपापो भवति॥
सर्वत्राधीयानोऽपविघ्नो भवति॥ धर्ममर्थं कामं मोक्षञ्च
विन्दति॥ इदमथर्वशीर्षमशिष्याय न देयम्॥ यो यदि मोहाद्दास्यति ॥ स
पापीयान् भवति॥ सहस्रावर्त्तनाद्यं यं काममधीते॥ तन्तमनेन
साधयेत्॥ अनेन गणपतिमभिषिञ्चति। स वाग्मी भवति॥
चतुर्थ्यामनश्नञ्जपति स विद्यावान् भवति॥ इत्यथर्वणवाक्यम्॥
ब्रह्माद्याचरणं विद्यान्न बिभेति कदाचनेति॥ यो दूर्वाङ्कुरैर्यजति॥

स वैश्रवणोपमो भवति॥ यो लाजैर्यजति॥ स यशोवान् भवति॥ स
मेधावान् भवति॥ यो मोदकसहस्रेण यजति॥ स वाञ्छितफलमवाप्नोति
॥ यः साज्यसमिद्भिर्यजति॥ स सर्वं लभते स सर्वं लभते॥ अष्टौ
ब्राह्मणान् सम्यग्ग्राहयित्वा सूर्यवर्चस्वी भवति॥ सूर्यग्रहे
महानद्यां प्रतिमासन्निधौ वा जप्त्वा सिद्धमन्त्रो भवति॥
महाविघ्नात्प्रमुच्यते॥ महादोषात्प्रमुच्यते॥
महाप्रत्यवायात्प्रमुच्यते॥ स सर्वविद्भवति स सर्वविद्भवति॥ य एवं
वेद॥ इत्युपनिषत्॥ सह नाववतु॥ सह नौ भुनक्तु॥ सह वीर्यं
करवावहै॥ तेजस्विनावधीतमस्तु मा विद्विषावहै॥ ॐ शान्तिः शान्तिः
शान्तिः॥ इति गणपत्युपनिषत्॥

अथ शतनाम

ॐ गणेश्वरो गणक्रीडो महागणपतिस्तथा॥
विश्वकर्त्ता विश्वमुखो दुर्ज्जयो धूर्ज्जयो जयः॥ १॥

p. 514) सुरूपः सर्वनेत्राधिवासो वीरासनाश्रयः।
योगाधिपस्तारकस्थः पुरुषो गजकर्णकः॥ २॥

चित्राङ्कः श्यामदशनो भालचन्द्रश्चतुर्भुजः।
शाम्भुतेजा यज्ञकायः सर्वात्मा सामबृंहितः॥ ३॥

कुलाचलांसो व्योमनाभिः कल्पद्रुमवनालयः।
निम्ननाभिः स्थूलकुक्षिः पीनवक्षा बृहद्भुजः॥ ४॥

पीनस्कन्धः कम्बुकण्ठो लम्बोष्ठो लम्बनासिकः।
सर्वावयवसम्पूर्णः सर्वलक्षणलक्षितः॥ ५॥

इक्षुचापधरः शूली कान्तिकन्दलिताश्रयः।
अक्षमालाधरो ज्ञानमुद्रावान् विजयावहः॥ ६॥

कामिनीकामनः काममालिनीकेलिलालितः।
अमोघसिद्धिराधार आधाराधेयवर्जितः॥ ७॥

इन्दीवरदलश्याम इन्दुमण्डलनिर्मलः।
कर्मसाक्षी कर्मकर्त्ता कर्माकर्मफलप्रदः॥ ८॥

कमण्डद्द धरः कल्पः कपर्द्दी कटिसूत्रभृत्।
कारुण्यदेहः कपिलो गुह्यागमनिरूपितः॥ ९॥

गुहाशयो गुहाब्धिस्थो घटकुम्भो घटोदरः।
पूर्णानन्दः परानन्दो धनदो धरणीधरः॥ १०॥

बृहत्तमो ब्रह्मपुरो ब्रह्मण्यो ब्रह्मवित्प्रियः।
भव्यो भूतालयो भोगदाता चैव महामनाः॥ ११॥

वरेण्यो वामदेवश्च वन्द्यो वज्रनिवारणः।
विश्वकर्त्ता विश्वचक्षुर्हवनं हव्यकव्यभुक्॥ १२॥

स्वतन्त्रस्सत्यसङ्कल्पस्तथा सौभाग्यवर्द्धनः।
कीर्त्तिदः शोकहारी च त्रिवर्गफलदायकः॥ १३॥

चतुर्बाहुश्चतुर्दन्तश्चतुर्थीतिथिसम्भवः।
सहस्रशीर्षा पुरुषः सहस्राक्षस्सहस्रपात्॥ १४॥

कामरूपः कामगतिर्द्विरदो द्वीपरक्षकः।
क्षेत्राधिपः क्षमाभर्त्ता लयस्थो लड्डुकप्रियः॥ १५॥

प्रतिवादिमुखस्तम्भो दुष्टचित्तप्रसादनः।

भगवान् भक्तिसुलभो याज्ञिको याजकप्रियः॥ १६॥

इत्येवन्देवदेवस्य गणराजस्य धीमतः।

शतमष्टोत्तरन्नाम्नां सारभूतम्प्रकीर्त्तितम्॥ १७॥

सहस्रनाम्नामाकृष्य मया प्रोक्तम्मनोहरम्।

p. 515) ब्राह्मे मुहूर्त्ते चोत्थाय स्मृत्वा देवङ्गणेश्वरम्॥

पठेत्स्तोत्रमिदम्भक्त्या गणराजः प्रसीदति॥ १८॥

इति श्रीगणेशस्याष्टोत्तरशतनामस्तोत्रं समाप्तम्॥

अथ सहस्रनाम

व्यास उवाच

कथन्नाम्नां सहस्रं स्वङ्गणेश उपदिष्टवान्।

शिवाय तन्ममाचक्ष्व लोकानुग्रहतत्पर॥ १॥

ब्रह्मोवाच

देवदेवम्पुरारातिः पुरत्रयजयोद्यमे।
अनर्च्चनाद्गणेशस्य जातो विघ्नाकुलः किल॥ २॥

मनसा स विनिर्द्धार्य ततस्तद्विघ्नकारणम्।
महागणपतिम्भक्त्या समभ्यर्च्च्य यथाविधि॥ ३॥

विघ्नप्रशमनोपायमपृच्छदपराजितः।
सन्तुष्टः पूजया शम्भोर्म्महागणपतिः स्वयम्॥ ४॥

सर्वविघ्नैकहरणं सर्वकामफलप्रदम्।
ततस्तस्मै स्वकन्नाम्नां सहस्रमिदमब्रवीत्॥ ५॥

अस्य श्रीमहागणपतिसहस्रनाममालामन्त्रस्य गणेश ऋषिः
महागणपतिर्द्देवता नानाविधानि छन्दांसि गमिति बीनन्तुण्डमिति
शक्तिः स्वाहेति कीलकम् सकलविघ्ननाशनद्वारा महागणपतिप्रीत्यर्थे
जपे विनियोगः॥

महागणपतिरुवाच

ॐ गणेश्वरो गणक्रीडो गणनाथो गणाधिपः।

एकदंष्ट्रो वक्रतुण्डो गजवक्त्रो महोदरः॥ ६॥

लम्बोदरो धूम्रवर्णो विकटो विघ्ननायकः।

सुमुखो दुर्मुखो बुद्धो विघ्नराजो गजाननः॥ ७॥

भीमः प्रमोद आमोदः सुरानन्दो मदोत्कटः।

हेरम्बः शम्बरः शम्भुर्लम्बकर्णो महाबलः॥ ८॥

नन्दनो लम्पटो भीरुर्मेघनादो गणञ्जयः।

विनायको विरूपाक्षो धीरः शूरो वरप्रदः॥ ९॥

महागणपतिर्बुद्धिप्रियः क्षिप्रप्रसादनः।

रुद्रप्रियो गणाध्यक्ष उमापुत्रोऽघनाशनः॥ १०॥

कुमारगुरुरीशानपुत्रो मूषकवाहनः।

सिद्धिप्रियः सिद्धिपतिः सिद्धः सिद्धिविनायकः॥ ११॥

अविघ्नस्तुम्बरुः सिंहवाहनो मोहिनीप्रियः।

p. 516) कटङ्कटो राजपुत्रः शालकः सम्मितोऽमितः॥ १२॥

कूष्माण्डसामसम्भूतिर्द्दुर्ज्जयो धूर्जयो जयः।
भूपतिर्ब्भुवनपतिर्ब्भूतानाम्पतिरव्ययः॥ १३॥

विश्वकर्त्ता विश्वमुखो विश्वरूपो निधिर्ग्घृणिः।
कविः कवीनामृषभो ब्रह्मण्यो ब्रह्मणस्पतिः॥ १४॥

ज्येष्ठराजो निधिपतिर्निधिप्रियपतिप्रियः।
हिरण्मयपुरान्तस्थस्सूर्यमण्डलमध्यगः॥ १५॥

कराहतिध्वस्तसिन्धुसलिलः पूषदन्तभित्।
उमाङ्ककेलिकुतुकी मुक्तिदः कुलपालनः॥ १६॥

किरीटी कुण्डली हारी वनमाली मनोमयः।
वैमुख्यहतदैत्यश्रीः पादाहतजितक्षितिः॥ १७॥

सद्योजातः स्वर्णमुञ्जमेखली दुर्न्निमित्तहृत्।
दुस्स्वप्नहृत्प्रसहनो गुणिनादप्रतिष्ठितः॥ १८॥

सुरूपः सर्वनेत्राधिवासो वीरासनाश्रयः।

पीताम्बरः खण्डरदः खण्डेन्दुकृतशेखरः॥ १९॥

चित्राङ्कः श्यामदशनो भालचन्द्रश्चतुर्भुजः।
योगाधिपस्तारकस्थः पुरुषो गजकर्णकः॥ २०॥

गणाधिराजो विजयः स्थिरो गजपतिर्ध्वजी।
देवदेवः स्मरप्राणो दीपको वायुकीलकः॥ २१॥

विपश्चिद्वरदो नादो नादभिन्नबलाहकः।
वराहरदनो मृत्युञ्जयो व्याघ्राजिनाम्बरः॥ २२॥

इच्छाशक्तिधरो देवत्राता दैत्यविमर्द्दनः।
शम्भुवक्त्रोद्भवः शम्भुकोपहा शम्भुहास्यभूः॥ २३॥

शम्भुतेजाः शिवाशोकहारी गौरीसुखावहः।
उमाङ्गमलजो गौरीतेजोभूः स्वर्द्धुनीभवः॥ २४॥

यज्ञकायो महानादो गिरिवर्ष्मा शुभाननः।
सर्वात्मा सर्वदेवात्मा ब्रह्ममूर्द्धा ककुप्श्रुतिः॥ २५॥

ब्रह्माण्डकुम्भश्चिद्व्योमभालः सत्यशिरोरुहः।
जगज्जन्मलयोन्मेषनिमिषोन्यर्कसोमदृक्॥ २६॥

गिरिन्द्रैकरदो धर्मो धर्मिष्ठः सामबृंहितः।
ग्रहक्ष्वेलदशनो वाणीजिह्वो वासवनासिकः॥ २७॥

भ्रूमध्ये संस्थितकरो ब्रह्मविद्या मदोत्कटः।
कुलाचलांसः सोमार्कघण्टो रुद्रशिरोधरः॥ २८॥

p. 517) नदीनदभुजः सर्पाङ्गुलीकस्तारकानखः।
व्योमनाभिः श्रीहृदयो मेरुपृष्ठोऽर्णवोदरः॥ २९॥

कुक्षिस्थयक्षगन्धर्वरक्षःकिन्नरमानुषः।
पृथ्वीकटिः सृष्टिलिङ्गः शैलोरुर्दस्रजानुकः॥ ३०॥

पातालजंघो मुनिपात्कालाङ्गुष्ठस्त्रयीतनुः।
ज्योतिर्मण्डललांगूलो हृदयालातनिश्चलः॥ ३१॥

हृत्पद्मकर्णिकाशाली वियत्केलिसरोवरः।
सद्भक्तध्याननिगडः पूजावारिनिवारितः॥ ३२॥

प्रतापी कश्यपसुतो गणपो विष्टपी बली।
यशस्वी धार्मिकः स्वोजाः प्रथमः प्रमथेश्वरः॥ ३३॥

चिन्तामणिर्द्वीपपतिः कल्पद्रुमवनालयः।
रत्नमण्डपमध्यस्थो रत्नसिंहासनाश्रयः॥ ३४॥

तीव्राशिरोधृतपदो ज्वालिनीमौलिलालितः।
नन्दानन्दितपीठश्रीभोगदाभूषितासनः॥ ३५॥

सकामदायिनीपीठः स्फुरदुग्ग्रासनाश्रयः।
तेजोवतीशिरोरत्नं सत्यानित्यावतंसितः॥ ३६॥

सविघ्ननाशिनीपीठः सर्वशक्त्यम्बुजाश्रयः।
लिपिपद्मासनाधारो वह्निधामत्रयाश्रयः॥ ३७॥

उन्नतप्रपदागूढगुल्फसँवृतपार्ष्णिकः।
पीनजङ्घः श्लिष्टजानुः स्थूलोरुः प्रोन्नमत्कटिः॥ ३८॥

निम्ननाभिः स्थूलकुक्षिः पीनवक्षा बृहद्भुजः।

पीनस्कन्धः कम्बुकण्ठो लम्बोष्ठो लम्बनासिकः॥ ३९॥

भग्नचामरदस्तुङ्गसव्यदन्तो महाहनुः।
ह्रस्वनेत्रत्रयः शूर्पकर्णो निबिडमस्तकः॥ ४०॥

स्तम्बकाकारकुम्भाग्रो रत्नमौलिर्न्निरंकुशः।
सर्पहारकटीसूत्रः सर्पयज्ञोपवीतवान्॥ ४१॥

सर्पकोटीरकटकः सर्पग्रैवेयकाङ्गदः।
सर्पकक्ष्योदराबन्धः सर्पराजोत्तरीयकः॥ ४२॥

रक्तो रक्ताम्बरधरो रक्तमाल्यविभूषणः।
रक्तेक्षणो रक्तकरो रक्ततालोष्ठपल्लवः॥ ४३॥

श्वेतः श्वेताम्बरधरः श्वेतमाल्यविभूषणः।
श्वेतातपत्ररुचिरः श्वेतचामरवीजितः॥ ४४॥

सर्वावयवसम्पूर्णः सर्वलक्षणलक्षितः।
सर्वाभरणशोभाढ्यः सर्वशोभासमन्वितः॥ ४५॥

p. 518) सर्वमङ्गलमाङ्गल्यस्सर्वकारणकारणम्।
सर्वदैककरः शार्ङ्गी बीजपूरी गदाधरः॥ ४६॥

इक्षुचापधरश्शूली चक्रपाणिस्सरोजभृत्।
पाशी धृतोत्पलश्शालीमञ्जरीभृत्स्वदन्तभृत्॥ ४७॥

कल्पवल्लिधरो विश्वभयदैककरो वशी।
अक्षमालाधरो ज्ञानमुद्रावान्मुद्गरायुधः॥ ४८॥

पूर्णपात्री कम्बुधरो विधृतालिसमूहकः।
मातुलिङ्गधरश्चूतकलिकाभृत्कुठारवान्॥ ४९॥

पुष्करस्थस्वर्णघटी-पूर्णरत्नाभिवर्षकः।
भारतीसुन्दरीनाथो विनायकरतिप्रियः॥ ५०॥

महालक्ष्मीप्रियतमस्सिद्धलक्ष्मीमनोरमः।
रमारमेशपूर्वाङ्गो दक्षिणोमामहेश्वरः॥ ५१॥

महीवराहवामाङ्गो रतिकन्दर्पपश्चिमः।
आमोदमोदजननः सप्रमोदप्रमोदनः॥ ५२॥

सामेधितासमृद्धिश्रीर्ऋद्धिसिद्धिप्रवर्त्तकः।
दत्तसौमुख्यसुमुखः कान्तिकन्दलिताश्रयः॥ ५३॥

मदनावत्यश्रिताङ्घ्रिः कृतदौर्मुख्यदुर्मुखः।
विघ्नसम्प्लुवोपघ्नस्सेवोन्निद्रमद्रवः॥ ५४॥

विघ्नकृन्निघ्नचरणो द्राविणीशक्तिसत्कृतः।
तीव्राप्रसन्ननयनो ज्वालिनीपालितैकदृक्॥ ५५॥

मोहिनीमोहनो भोगदायिनीकान्तिमण्डितः।
कामिनीकान्तवक्त्रश्री-रधिष्ठितवसुन्धरः॥ ५६॥

वसुन्धरामदोन्नद्धमहाशङ्खनिधिः प्रभुः।
नमद्वसुमती मौली महापद्मनिधिप्रभुः॥ ५७॥

सर्वसद्गुरुसंसेव्यः शोचिष्केशहृदाश्रयः।
ईशानमूर्द्धा देवेन्द्रशिखः पवननन्दनः॥ ५८॥

अग्रप्रत्यग्रनयनो दिव्यास्त्राणाम्प्रयोगवित्।

ऐरावतादिसर्वाशावारणावरणप्रियः॥ ५९॥

वज्राद्यस्त्रपरीवारो गणचण्डसमाश्रयः।
जयाजयपरीवारो विजयाविजयावहः॥ ६०॥

अजिताजितपादाब्जो नित्यानित्यावतंसितः।
विलासिनीकृतोल्लासः शौण्डिसौन्दर्यमण्डितः॥ ६१॥

अनन्तानन्तसुखदः सुमङ्गलसुमङ्गलः।
इच्छाशक्ति-ज्ञानशक्ति-क्रियाशक्ति-निषेवितः॥ ६२॥

p. 519) सुभगासंश्रितपदो लालितालालिताश्रयः।
कामिनीकामनः काममालिनीकेलिलालितः॥ ६३॥

सरस्वत्याश्रयो गौरीनन्दनः श्रीनिकेतनः।
गुरुगुप्तपदो वाचासिद्धो वागीश्वरीपतिः॥ ६४॥

नलिनीकामुको वामारामो ज्येष्ठामनोरमः।
रौद्रीमुद्रितपादाब्जो हूँईजस्तुङ्गशक्तिकः॥ ६५॥

विश्वादिजननत्राणः स्वाहाशक्तिः सकीलकः।
अमृताब्धिकृतावासो मदघूर्णितलोचनः॥ ६६॥

उच्छिष्टगण उच्छिष्टगणेशो गणनायकः।
सार्वकालिकसंसिद्धिर्नित्यशैवो दिगम्बरः॥ ६७॥

अनपायोनन्तर्दृष्टिरप्रमेयोऽजरामरः।
अनाविलो प्रतिरथो ह्यच्युतोऽमृतमक्षरम्॥ ६८॥

अप्रतर्क्योऽक्षयोऽजय्योऽनाधारोऽनामयोऽमलः।
अमोघसिद्धिरद्वैतमघोरोऽप्रमितानन॥ ६९॥

अनाकारो ऽधिभूम्यग्निबलघ्नोऽव्यक्तलक्षणः।
आधारपीठ आधार आधाराधेयवर्जितः॥ ७०॥

आखुकेतन आशापूरक आखुमहारथः।
इक्षुसागरमध्यस्थ इक्षुभक्षणलालसः॥ ७१॥

इक्षुचापातिरेकश्री-रिक्षुचापनिषेवितः॥ ७२॥

इन्द्रगोपसमानश्री-रिन्द्रनीलसमद्युतिः।
इन्दीवरदलश्याम इन्दुमण्डलनिर्म्मलः॥ ७३॥

इध्मप्रिय इडाभाग इडाधामेन्दिराप्रियः।
इक्ष्वाकुविघ्नविध्वंशी इतिकर्त्तव्यतेप्सितः॥ ७४॥

ईशानमौलिरीशान ईशानसुत ईतिहा।
ईषणात्रयकल्पान्त ईहामात्रविवर्ज्जितः॥ ७५॥

उपेन्द्र उडुभृन्मौलिरुण्डेरकबलिप्रियः।
उन्नतानन उत्तुङ्ग उदारत्रिदशाग्रणीः॥ ७६॥

ऊर्ज्जस्वानूष्मलमद ऊहापोहदुरासदः।
ऋग्ययुःसामसंभूतिर्ऋद्धिसिद्धिप्रवर्त्तकः॥ ७७॥

ऋजुचित्तैकसुलभ ऋणत्रयविमोचकः।
ॄ विघ्नः स्वभक्तानां ॄ शक्तिः सुरद्विषाम्॥ ७८॥

ॄ श्रीर्विमुखार्च्चानाँल्लूताविस्फोटनाशनः।
एकारपीठमध्यस्थ एकपादकृतासनः॥ ७९॥

एशिताखिलदैत्यश्रीरेजिताखिलसंश्रयः।

p. 520) ऐश्वर्यनिधिरैश्वर्यमैहिकामुष्मिकप्रदः॥ ८०॥

ऐरम्मदसमोन्मेष ऐरावतनिभाननः।

ओङ्कारवाच्य ओङ्कार ओजस्वानोषधीपतिः॥ ८१॥

औदार्यनिधिरौद्धत्यधुर्य औन्नत्यनिःस्वनः।

अङ्कुशस्सुरनागानामङ्कुशः सुरविद्विषाम्॥ ८२॥

असमस्तविसर्गाणाम्पदेषु परिकीर्त्तितः।

कमण्डद्द धरः कल्पः कपर्दी कलभाननः॥ ८३॥

कर्मसाक्षी कर्मकर्त्ता कर्माकर्मफलप्रदः।

कदम्बगोलकाकारः कुष्माण्डगणनायकः॥ ८४॥

कारुण्यदेवः कपिलः कथकः कटिसूत्रभृत्।

खर्वः खड्गप्रियः खड्गखातान्तस्थः खनिर्म्मलः॥ ८५॥

खल्वाटश्रृङ्गनिलयः खट्वाङ्गी खदुरासदः।

गुणाढ्यो गहनो गस्थो गद्यपद्यसुधार्णवः॥ ८६॥

गद्यगानप्रियो गर्ज्जो गीतगीर्वाणपूर्वजः।
गुह्याचाररतो गुह्यो गुह्यागमनिरूपितः॥ ८७॥

गुह्याशयो गुहाब्धिस्थो गुरुगम्यो गुरोर्ग्गुरुः।
घण्टाघर्घरिकामाली घटकुम्भो घटोदरः॥ ८८॥

च्चण्डश्चण्डेश्वरसुहृच्चण्डेशश्चण्डविक्रमः॥ ८९॥

चराचरपतिश्चिन्तामणिश्चर्वणलालसः।
छन्दश्छन्दोवपुश्छन्दो दुर्ल्लक्ष्यच्छन्दविग्रहः॥ ९०॥

जगद्योनिर्ज्जगत्साक्षी जगदीशो जगन्मयः।
जपो जपपरो जप्यो जिह्वासिंहासनप्रभुः॥ ९१॥

झलज्झल्लोल्लसद्दानझङ्कारिभ्रमराकुलः।
टङ्कारस्फारसंराव-ष्टङ्कारिमणिनूपुरः॥ ९२॥

ठद्वयीपल्लवान्तस्थः सर्वमन्त्रैकसिद्धिदः।

डिण्डिमुण्डो डाकिनीशो डामरो डिण्डिमप्रियः॥ ९३॥

ढक्कानिनादमुदितो ढौङ्को ढुण्ढिविनायकः॥ ९४॥

तत्त्वानाम्प्रमन्तत्त्वन्तत्त्वम्पदनिरूपितः।
तारकान्तरसंस्थानस्तारकस्तारकान्तकः॥ ९५॥

स्थाणुः स्थाणुप्रियः स्थाता स्थावरञ्जङ्गमञ्जगत्।
दक्षयज्ञप्रमथनो दाता दानवमोहनः॥ ९६॥

दयावान्दिव्यविभवो दण्डभृद्दण्डनायकः।
दन्तप्रभिन्नाभ्रमालो दैत्यवारणदारणः॥ ९७॥

दंष्ट्रालग्नद्विपघटो देवार्त्थनृगजाकृतिः।
p. 521) धनधान्यपतिर्द्धन्यो धनदो धरणीधरः॥ ९८॥

ध्यानैकप्रकटो ध्येयो ध्यानन्ध्यानपरायणः॥ ९९॥

नन्द्यो नन्दिप्रियो नादो नादमध्यप्रतिष्ठितः।
निष्कलो निर्म्मलो नित्यो नित्यानित्यो निरामयः॥ १००॥

परँव्योम परन्धाम परमात्मा परम्पदम्।

परात्परः पशुपतिः पशुपाशविमोचकः॥ १०१॥

पूर्णानन्दः परानन्दः पुराणपुरुषोत्तमः।

पद्मप्रसन्ननयनः प्रणताज्ञानमोचनः॥ १०२॥

प्रणामप्रत्ययातीतः प्रणतार्त्तिनिवारणः।

फलहस्तः फणिपतिः फेत्कारः फाणितप्रियः॥ १०३॥

बाणार्च्चिताङ्घ्रियुगलो बालकेलिकुतूहली।

ब्रह्मब्रह्मार्च्चितपदो ब्रह्मचारी बृहस्पतिः॥ १०४॥

बृहत्तमो ब्रह्मपरो ब्रह्मण्यो ब्रह्मवित्प्रियः।

बृहन्नादाग्र्यचित्कारो ब्रह्माण्डवलिमेखलः॥ १०५॥

भ्रूक्षेपदत्तलक्ष्मीको भग्गों भद्रो भयापहः।

भगवान् भक्तिसुलभो भूतिदो भूतिभूषणः॥ १०६॥

भव्यो भूतालयो भोगदाता भ्रूमध्यगोचरः।

मन्त्री मन्त्रपतिर्मन्त्री मदमत्तमनोरमः॥ १०७॥

मेखलावान्मन्दगतिर्मतिमत्कमलेक्षणः।
महाबलो महावीर्यो महाप्राणो महामनाः॥ १०८॥

यज्ञो यज्ञपतिर्यज्ञगोप्ता यज्ञफलप्रदः।
यशस्करो योगगम्यो याज्ञिको याजकप्रियः॥ १०९॥

रसो रसप्रियो रस्यो रञ्जको रावणार्चितः।
रक्षोरक्षाकरो रत्नगर्भो राज्यसुखप्रदः॥ ११०॥

लक्ष्यालक्षप्रदो लक्ष्यो लयस्थो लड्डुकप्रियः।
लानप्रियो लास्यपरो लाभकृल्लोकविश्रुतः॥ १११॥

वरेण्यो वह्निवदनो वन्द्यो वेदान्तगोचरः।
विकर्त्ता विश्वतश्चक्षुर्विधाता विश्वतोमुखः॥ ११२॥

वामदेवो विश्वनेता वज्री वज्रनिवारणः।
विश्वबन्धनविष्कम्भाधारो विश्वेश्वरः प्रभुः॥ ११३॥

शब्दब्रह्म शमप्राप्यः शाम्भुशक्तिगणेश्वरः।

शास्ता शिखाग्रनिलयः शरण्यः शिखरीश्वरः॥ ११४॥

p. 522) षड्तुकुसुमस्त्रग्व षडाधारः षडक्षरः।

संसारवैद्यः सर्वज्ञस्सर्वमेषजमेषजम्॥ ११५॥

सृष्टिस्थितिलयक्रीडः सुरकुञ्जरभेदनः।

सिन्दूरितमहाकुम्भस्सदसद्व्यक्तिदायकः॥ ११६॥

साक्षीसमुद्रमथनः स्वसँवेद्यः स्वदक्षिणः।

स्वतन्त्रः सत्यसङ्कल्पस्सामगानरतस्सुखी॥ ११७॥

हंसो हस्ति पिशाचीशो हवनं हव्यकव्यभुक्।

हव्यं हुतप्रियो हर्षो हृल्लेखामन्त्रमध्यगः॥ ११८॥

क्षेत्राधिपः क्षमाभर्त्ता क्षमापरपरायणः।

क्षिप्रक्षेमकरः क्षेमानन्दः क्षोणीसुरद्रुमः॥ ११९॥

धर्मप्रदोर्त्थदः कामदाता सौभाग्यवर्द्धनः।

विद्याप्रदो विभवदो भुक्तिमुक्तिप्रदायकः॥ १२०॥

आभिरूप्यकरो वीरः श्रीपदो विजयप्रदः।
सर्ववश्यकरो गर्ब्भदोषहा पुत्रपौत्रदः॥ १२१॥

मेधादः कीर्त्तिदः शोकहारी दौर्ब्भाग्यनाशनः।
श्रीशोकहारी दौर्ब्भाग्यनाशनस्सर्वशक्तिभृत्॥ १२२॥

प्रतिवादिमुखस्तम्भो हृष्टचित्तप्रसादनः।
पराभिचारशमनो दुःखभञ्जनकारकः॥ १२३॥

लवस्त्रुटिः कलाकाष्ठानिमेषस्तत्परः क्षणः।
घटीमुहूर्त्तः प्रहरो दिवानक्तमहर्निशम्॥ १२४॥

पक्षो मासोऽयनँव्वर्षं य्युगङ्कल्पो महालयः।
राशिस्तारा तिथिर्योगो वारः करणमंशकम्॥ १२५॥

लग्नं होरा कालचक्रम्मेरुस्सप्तर्षयो ध्रुवः।
राहुर्म्मन्दः कविर्ज्जीवो बुधो भौमश्शशी रविः॥ १२६॥

कालस्सृष्टिः स्थितिर्विश्वं स्थावरञ्जङ्गमञ्च यत्।

भूरापोग्निर्मरुद्व्योमाहङ्कृतिः प्रकृतिः पुमान्॥ १२७॥

ब्रह्मा विष्णुश्शिवो रुद्र ईशश्शक्तिस्सदाशिवः।
त्रिदशाः पितरः सिद्धा यक्षरक्षांसि किन्नराः॥ १२८॥

साध्या विद्याधरा भूता मनुष्याः पशवः खगाः।
समुद्रास्सरितश्शैला भूतभव्यम्भवोद्भवः॥ १२९॥

साङ्ख्यम्पातञ्जलँय्योगः पुराणानि श्रुतिः स्मृतिः।
वेदाङ्गानि सदाचारो मीमांसा न्यायविस्तरः॥ १३०॥

p. 523) आयुर्वेदो धनुर्वेदो गान्धर्वङ्काव्यनाटकम्।
वैखानसं भागवतं सात्त्वतम्पाञ्चरात्रकम्॥ १३१॥

शैवम्पाशुपतङ्कालमुखम्भैरवशासनम्।
शाक्तँव्वैनायकं सौरञ्जैनमार्हतसंहिता॥ १३२॥

सददव्यक्तमव्यक्तं सचेतनमचेतनम्।
बन्धो मोक्षः सुखम्भोगोऽयोगस्सत्यमणुर्महान्॥ १३३॥

स्वस्ति हुम्फट् स्वधा स्वाहा श्रौषट् वौषट् वषण्नमः।
ज्ञानविज्ञानमानन्दो बोधस्सँविच्छमो यमः॥ १३४॥

एक एकाक्षराधार एकाक्षरपरायणः।
एकाग्रधीरेकवीर एकानेकस्वरूपधृक्॥ १३५॥

द्विरूपो द्विभुजो द्व्यक्षो द्विरदो द्वीपरक्षकः।
द्वैमातुरो द्विवदनो द्वन्द्वातीतो द्वयातिगः॥ १३६॥

त्रिधामा त्रिकरस्त्रेता त्रिवर्गफलदायकः।
त्रिगुणात्मा त्रिलोकादिस्त्रिशक्तीशस्त्रिलोचनः॥ १३७॥

चतुर्बाहुश्चतुर्दन्तश्चतुरात्मा चतुर्मुखः।
चतुर्विधोपायमयश्चतुर्वर्णाश्रमाश्रयः॥ १३८॥

चतुर्विधवचोवृत्तिपरिवर्त्तप्रवर्त्तकः।
चतुर्थीपूजनप्रीतश्चतुर्थीतिथिसम्भवः॥ १३९॥

पञ्चाक्षरात्मा पञ्चात्मा पञ्चास्यः पञ्चकृत्यकृत्।
पञ्चाधारः पञ्चवर्णः पञ्चाक्षरपरायणः॥ १४०॥

पञ्चतालः पञ्चकरः पञ्चप्रणवभावितः।

पञ्चब्रह्ममयस्फूर्त्तिः पञ्चवारणवारितः॥ १४१॥

पञ्चभक्ष्यप्रियः पञ्चबाणः पञ्चशिवात्मकः।

षट्कोणपीठः षट्चक्रधामा षड्ग्रन्थिभेदकः॥ १४२॥

षडध्वध्वान्तविध्वंसी षडङ्गुलमहाह्रदः।

षण्मुखः षण्मुखभ्राता षड्भक्तिपरिवारितः॥ १४३॥

षड्वैरिवर्गविध्वंसी षड्ऊर्मिभयभञ्जनः।

षट्तर्कदूरः षट्कर्मनिरतः षड्रसाश्रयः॥ १४४॥

सप्तपातालचरणः सप्तद्वीपोरुमण्डलः।

सप्तस्वर्लोकमुकुटः सप्तसप्तिवरप्रदः॥ १४५॥

सप्ताङ्गराज्यसुखदः सप्तर्षिगणमण्डितः।

सप्तच्छन्दोनिधिस्सप्तहोता सप्तस्वराश्रयः॥ १४६॥

सप्ताब्धिकेलिकासारः सप्तमातृनिषेवितः।

p. 524) सप्तच्छन्दोमोदमदस्सप्तच्छन्दोमखप्रभुः ॥ १४७ ॥

अष्टमूर्त्तिर्ध्येयमूर्त्तिरष्टप्रकृतिकारणम्।
अष्टाङ्गयोगफलभूरष्टपत्राम्बुजासनः ॥ १४८ ॥

अष्टशक्तिसमृद्धश्रीरष्टैश्वर्यप्रदायकः।
अष्टपीठोपपीठश्री-रष्टमातृसमावृतः ॥ १४९ ॥

अष्टभैरवसेव्योऽष्टवसुवन्द्योऽष्टमूर्त्तिभृत्।
अष्टचक्रस्फुरन्मूर्त्तिरष्टद्रव्यहविः प्रियः ॥ १५० ॥

नवनागासनाध्यासी नवनिध्यनुशासिता।
नवद्वारपुराधारो नवद्वारनिकेतनः ॥ १५१ ॥

नवनारायणस्तुत्यो नवदुर्गानिषेवितः।
नवनाथमहानाथो नवनागविभूषणः ॥ १५२ ॥

नवरत्नविचित्राङ्गो नवशक्तिशिरोधृतः।
दशात्मको दशभुजो दशदिक्पतिवन्दितः ॥ १५३ ॥

दशाध्यायो दशप्राणो दशेन्द्रियनियामकः।
दशाक्षरमहामन्त्रो दशाशाव्याधिविग्रहः॥ १५४॥

एकादशादिभी रुद्रैःस्तुत एकादशाक्षरः।
द्वादशोद्दण्डदोर्दण्डो द्वादशान्तनिकेतनः॥ १५५॥

त्रयोदशभिदाभिन्नविश्वेदेवाधिदैवतम्।
चतुर्द्दशेन्द्रवरदश्चतुर्द्दशमनुप्रभुः॥ १५६॥

चतुर्द्दशादिविद्याढ्यश्चतुर्द्दशजगत्प्रभुः।
सामपञ्चदशः पञ्चदशीशीतांशुनिर्म्मलः॥ १५७॥

षोडशाधारनिलयः षोडशस्वरमातृकः।
षोडशान्तपदावासः षोडशेन्दुकलात्मकः॥ १५८॥

कलासप्तदशीसप्तदशः सप्तदशाक्षरः।
अष्टादशद्वीपपतिरष्टादशपुराणकृत्॥ १५९॥

अष्टादशौषधीसृष्टिरष्टादशविधिस्स्मृतः।
अष्टादशलिपिव्यष्टिसमष्टिज्ञानकोविदः॥ १६०॥

एकविंशःपुमानेकविंशत्यङ्गुलिपल्लवः।
चतुर्विंशतितत्त्वात्मा पञ्चविंशाख्यपूरुषः॥ १६१॥

सप्तविंशतितारेशः सप्तविंशतियोगकृत्।
द्वात्रिंशद्भैरवाधीशश्चतुस्त्रिंशन्महाह्रदः॥ १६२॥

षट्त्रिंशत्तत्त्वसम्भूतिरष्टत्रिंशत्कलातनुः।
नमदेकोनपञ्चाशन्मरुद्वर्गनिरर्गलः॥ १६३॥

पञ्चाशदक्षरश्रेणीः पञ्चाशद्रुद्रविग्रहः।
पञ्चाशद्विष्णुशक्तीशः पञ्चाशन्मातृकालयः॥ १६४॥

p. 525) द्विपञ्चाशद्वपुश्श्रेणीस्त्रिषष्ट्यक्षरसंश्रयः।
चतुष्षष्ट्यर्णनिर्णेता चतुःषष्टिकलानिधिः॥ १६५॥

चतुःषष्टिमहासिद्धि-योगिनीवृन्दवन्दितः।
अष्टषष्टिमहातीर्थ-क्षेत्रभैरवभावनः॥ १६६॥

चतुर्न्नवतिमन्त्रात्मा षण्णवत्यधिकः प्रभुः।

शतानन्दः शतधृतिश्शतपत्रायतेक्षणः॥ १६७॥

शतानीकः शतमखश्शतधारवरायुधः।
सहस्रपत्रनिलयस्सहस्रफणभूषणः॥ १६८॥

सहस्रशीर्षापुरुषः सहस्राक्षस्सहस्रपात्।
सहस्रनामसंस्तुत्त्यः सहस्राक्षबलापहः॥ १६९॥

दशसाहस्रफणिभृत्फणिराजकृतासनः।
अष्टाशीतिसहस्रौघ-महर्षिस्तोत्रयन्त्रितः॥ १७०॥

लक्षाधीशप्रियाधारो लक्षाधीशमनोमयः।
चतुर्ल्लक्षजपप्रीतश्चतुर्ल्लक्षप्रकाशितः॥ १७१॥

चतुराशीतिलक्षाणाञ्जीवानान्देहसंस्थितः।
कोटिसूर्यप्रतीकाशः कोटिचन्द्रांशुनिर्म्मलः॥ १७२॥

शिवाभवाध्युष्टकोटिविनायकधुरन्धरः।
सप्तकोटिमहामन्त्रमन्त्रितावयवद्युतिः॥ १७३॥

त्रयस्त्रिंशत्कोटिसुर-श्रेणीप्रणतपादुकः।
अनन्तदेवतासेव्यो ह्यनन्तमुनिसंस्तुतः॥ १७४॥

अनन्तनामानन्तश्रीरनन्तानन्तसौख्यदः।
इति वैनायकन्नाम्नां सहस्रमिदमीरितम्॥ १७५॥

इदम्ब्राह्मे मुहूर्त्ते वै यः पठेत्प्रत्यहन्नरः।
करस्थन्तस्य सकलमैहिकामुष्मिकं सुखम्॥ १७६॥

आयुरारोग्यमैश्वर्यन्धर्मः शौर्यम्बलँय्यशः।
मेधा प्रज्ञा धृतिः कान्तिस्सौभाग्यमतिरूपता॥ १७७॥

सत्यन्दया क्षमा शान्तिर्दाक्षिण्यन्धर्मशीलता।
जगत्सँयमनँविश्वसँवादो वादपाटवम्॥ १७८॥

सभापाण्डित्यमौदार्यङ्गाम्भीर्यम्ब्रह्मवर्च्चसम्।
औन्नत्यञ्च कुलं शीलम्प्रतापो वीर्यमार्यता॥ १७९॥

ज्ञानँव्विज्ञानमास्तिक्यन्धैर्य व्विश्वातिशायिता।
धनधान्याभिवृद्धिश्च सकृदस्य जपाद्भवेत्॥ १८०॥

वश्यञ्चतुर्विधन्नृणाञ्चपादस्य प्रजायते।

p. 526) राज्ञो राजकलत्रस्य राजपुत्रस्य मन्त्रिणः॥ १८१॥

जप्यते यस्य वश्यार्थे स दासस्तस्य जायते।

धर्मार्त्थकाममोक्षाणामनायासेन साधनम्॥ १८२॥

शाकिनी-डाकिनी-रक्षोयक्षो-रोगभयापहम्।

साम्राज्यसुखदञ्चैव समस्तरिपुमर्द्दनम्॥ १८३॥

समस्तकलहध्वंसि दग्धबीजप्ररोहणम्।

दुःस्वप्नशमनङ्कुद्धस्वामिचित्तप्रसादनम्॥ १८४॥

षड्कर्माष्टमहासिद्धि त्रिकालज्ञानसाधनम्।

परकृत्योपशमनम्परचक्रविमर्द्दनम्॥ १८५॥

सङ्ग्रामरङ्गे सर्वेषामिदमेकञ्जयावहम्।

सर्ववन्ध्यात्वदोषघ्नङ्गर्ब्भरक्षैककारणम्॥ १८६॥

पठ्यते प्रत्यहँय्यत्र स्तोत्रङ्गणपतेरिदम्।

देशे तत्र न दुर्भिक्षमीतयो दुरितानि च॥ १८७॥

न तद्देहञ्जहाति श्रीर्यत्रायञ्जप्यते स्तवः।
क्षय-कुष्ठ-प्रमेहाश्शों-भगन्दरविषूचिकाः॥ १८८॥

गुल्मम्प्लीहानमाध्मानमतिसारम्महोदरम्।
कासं श्वासमुदावर्त्तं शूलं शोकादिसम्भवम्॥ १८९॥

शिरोरोगँव्वमिं हिक्काङ्गण्डमालामरोचकम्।
वातपित्तकफद्वन्द्वत्रिदोषजनितज्वरम्॥ १९०॥

आगन्तुविषमं शीतमुष्णञ्चैकाहिकादिकम्।
इत्याद्युक्तमनुक्तँव्वा रोगन्दोषादिसम्भवम्॥ १९१॥

सर्वम्प्रशमयत्याशु स्तोत्रस्यास्य सकृज्जपात्।
सकृत्पाठेन संसिद्धिः स्त्री-शूद्र-पतितैरपि॥ १९२॥

सहस्रनाममन्त्रोऽयञ्जप्तव्यस्तु शुभाप्तये।
महागणपतेस्स्तोत्रं सकामः प्रजपन्निदम्॥ १९३॥

इच्छया सकलान्भोगानुपभुज्येह पार्त्थिवान्।
मनोरथफलैर्द्दिव्यैर्व्योमयानैर्मनोरमैः॥ १९४॥

चन्द्रेन्द्रभास्करोपेन्द्रब्रह्मरुद्रादिसद्मसु।
कामरूपः कामगतिः कामतो विचरन्निह॥ १९५॥

भुक्त्वा यथेप्सितान्भोगानभीष्टैस्सह बन्धुभिः।
गणेशानुचरो भूत्वा महागणपतेः प्रियः॥ १९६॥

नन्दीश्वरादिसानन्दी नन्दितः सकलैर्गणैः।
शिवाभ्याङ्कृपया पुत्रनिर्विशेषञ्च लालितः॥ १९७॥

p. 527) शिवभक्तः पूर्णकामो गणेश्वरवरात्पुनः।
जातिस्मरो धर्मपरः सार्वभौमोऽभिजायते॥ १९८॥

निष्कामस्तु जपन्नित्यम्भक्त्या विघ्नेशतत्परः।
योगसिद्धिम्परामप्राप्य ज्ञानवैराग्यसंस्थितः॥ १९९॥

निरन्तरोदितानन्दे परमानन्दसँविदि।
विश्वोत्तीर्णे परे पारे पुनरावृत्तिवर्जिते॥ २००॥

लीनो वैनायके धाम्नि रमते नित्यनिर्वृतः।
यो नामभिर्हुनेदेतैरर्च्चयेत्पूजयेन्नरः॥ २०१॥

राजानो वश्यताँय्यान्ति रिपवो यान्ति दासताम्।
मन्त्राः सिद्यन्ति सर्वेपि सुलभास्तस्य सिद्धयः॥ २०२॥

मूलमन्त्रादपि स्तोत्रमिदम्प्रियतरम्मम।
नभस्ये मासि शुक्लायाञ्चतुर्त्थ्याम्मम जन्मनि॥ २०३॥

दूर्वाभिर्न्नामभिः पूजान्तर्पणँव्विधिवच्चरेत्।
अष्टद्रव्यैर्विशेषेण जुहुयाद्भक्तिसँयुतः॥ २०४॥

तस्येप्सितानि सर्वाणि सिद्यन्त्यत्र न संशयः।
इदम्प्रजप्तम्पठितम्पाठितं श्रावितं श्रुतम्॥ २०५॥

व्याकृतञ्चर्च्चितन्ध्यातँव्विमृष्टमभिनन्दितम्।
इहामुत्र च सर्वेषाँव्विश्वैश्वर्यप्रदायकम्॥ २०६॥

स्वच्छन्दचारिणाप्येष येन सन्धार्यते स्तवः।

संरक्ष्यते शिवोद्भूतैर्गणैरघ्युष्टकोटिभिः॥ २०७॥

पुस्तके लिखितं स्तोत्रम्मन्त्रभूतम्मपूजयेत्।
तत्र सर्वोत्तमा लक्षीः सन्निधत्ते निरन्तरम्॥ २०८॥

दानैरशेषैरखिलैर्व्रतैश्च तीर्त्थैरशेषैस्सकलैर्म्मखैश्च।
न तत्फलँव्विन्दति यद्गणेशसहस्रनाम्नः स्मरणेन सद्यः॥ २०९॥

एतन्नाम्नां सहस्रम्पठति दिनमणौ प्रत्यहम्प्रोज्जिहाने
सायम्मध्यन्दिने वा त्रिषवणमथवा सन्ततँव्वा जनो यः॥
स स्यादैश्वर्यधुर्यः प्रभवति वचसाङ्कीर्तिमुच्चैस्तनोति प्रत्यूहं
हन्ति विश्वँव्वशयति सुचिरँव्वर्द्धते पुत्रपौत्रैः॥ २१०॥

अकिञ्चनोऽप्येकचित्तो नियतो नियताशनः।
जपेत्तु चतुरो मासान्गणेशार्च्चनतत्परः॥ २११॥

p. 528) दरिद्रतां समुन्मूल्य सप्तजन्मानुगामपि।
लभते महतीं ल्लक्ष्मीमित्याज्ञा पारमेश्वरी॥ २१२॥

आयुष्यँव्वीतरोगङ्कुलमतिविमलं सम्पदश्चार्त्तदानाः

कीर्त्तिर्न्नित्यावदाता मणितिरभिनवा कान्तिरव्याजभव्या॥
पुत्रास्सन्तः कलत्रञ्ऋणवदभिमतँय्यद्यदेतच्च सत्यन्नित्यँय्यः
स्तोत्रमेतत्पठति गणपतेस्तस्य हस्ते समस्तम्॥ २१३॥

ॐ गणञ्जयो गणपतिर्हेरम्बो धरणीधरः।
महागणपतिर्ल्लक्षप्रदः क्षिप्रप्रसादनः॥ २१४॥

अमोघसिद्धिरमितो मन्त्रश्चिन्तामणिर्न्निधिः।
सुमङ्गलो बीजमाशापूरको वरदः शिवः॥ २१५॥

काश्यपो नन्दनो वाचासिद्धो ढुण्ढिर्विनायकः।
मोदकैरेभिरत्रैकविंशत्या नामभिः पुमान्॥ २१६॥

यः स्तौति मद्गतमना ममाराधनतत्परः।
स्तुतो नाम्नां सहस्त्रेण तेनाहं नात्र संशयः॥ २१७॥

नमो नमस्सुरवरपूजिताङ्घ्रये नमो नमो निरुपममङ्गलात्मने।
नमो नमो विपुलकरैकसिद्धये नमो नमः करिकलमाननाय ते॥ २१८॥

किङ्किणीगणरणितस्तव चरणः प्रकटितगुरुमितिचारित्रगणः।

मदजललहरिकलितकपोलः शमयतु दुरितङ्गणपतिनृपनामा॥ २१९॥

इति श्रीगणेशसहस्रनामस्तोत्रं सम्पूर्णम्॥

इति गणेशतन्त्रम् समाप्तम्॥

श्रीः

शिवहरराजधानीपतिश्रीराजादेवनन्दनसिंह-
बाहादुरनराधिपसंगृहीतविरचित-

शाक्तप्रमोदान्तर्गतं

षोडशम्

सूर्यतन्त्रम्

उक्तराजगुरुवंश्यपण्डितश्रीरघुराजदुबेजीद्वारा

संशोधितम्

तदेतत्

श्रीकृष्णदासात्मज-खेमराजेन

स्वकीये श्रीवेंकटेश्वर यन्त्रालये

मुद्रयित्वा प्रकाशितम्

मुम्ब-ई

श्रीगणेशाय नमः

अथ सूर्यतन्त्रम्

अथ श्रीसूर्यध्यानम्

भास्वद्रत्नाढ्यमौलिः स्फुरदधररुचारञ्जितश्चारुकेशो
भास्वान्यो दिव्यतेजाः करकमलयुतः स्वर्णवर्णः प्रभाभिः।
विश्वाकाशावकाशो ग्रहगहणसहितो भाति यश्चोदयाद्रौ
सर्वानन्दप्रदाता हरिहरनमितः पातु माँव्विश्वचक्षुः॥ १॥

अथ यन्त्रोद्धारः

पूर्वमष्टदलम्पद्मम्प्रणवादिप्रतिष्ठितम्।
मायाबीजन्दलाष्टाग्रे यन्त्रमुद्धारयेदिति॥

आदित्यम्भास्करम्भानुं रविं सूर्यन्दिवाकरम्।
मार्त्तण्डन्तपनञ्चेति दलेष्वष्टसु योजयेत्॥

दीप्ता सूक्ष्मा जया भद्रा विभूतिर्विमला तथा।
p. 532) अमोघा विद्युता चेति मध्ये श्रीः सर्वतोमुखी॥

अथ मन्त्रोद्धारः

तारो घृणिर्ब्भृगुः पश्चाद्वामकर्णविभूषितः।

वह्न्यासनो मरुच्छेषः सनेत्रोदित्यपश्चिमः॥

अष्टाक्षरो मनुः प्रोक्तो भानोरभिमतः परः॥

अथ मन्त्रः

ॐ घृणि सूर्य आदित्यः।

अथ पूजाविधिः

प्रातःकृत्यादि प्राणायामान्तँव्विधाय पीठन्यासङ्कुर्यात्। तत्र

विशेषः॥ हृदयस्य पूर्वादिदिक्षु मध्ये च प्रभूतँव्विमलँसारं

p. 533) समाराध्यम्परसुखँव्विन्यस्याधारशक्त्यादि

अंसूर्यमण्डलाय दशकलात्मनेनमः इत्यन्तँव्विन्यसेत्॥ तथा च

निबन्धे॥ पीठे च क्लृप्ते प्रथमन्दिक्षु मध्ये च सँयजेत्॥ प्रभूतँ

व्विमलँसारं समाराध्यमनन्तरम्॥ परमादिसुखम्पीठं

स्वबिम्बान्तम्प्रकल्पयेत्॥ ततः केसरेषु मध्ये च॥ रांदीप्तायैनमः॥

एवं रींसूक्ष्मायै०, रूंजयायै०, रैंभद्रायै०, वैंविभूत्यै०,

वोंविमलायै०, वौं-अमोघायै०, रंविद्युतायै०, रः सर्वतोमुख्यै०॥

तथा च निबन्धे॥ दीप्ता सूक्ष्मा जया भद्रा विभूतिर्विमला पुनः॥

अमोघा विद्युता सर्वतोमुखी पीठशक्तयः॥

दीप्तदीपशिखाकाराबीजान्यासाँव्विदुः क्रमात्॥

अक्लीबह्स्वत्रितयस्वरान् बिन्द्वग्निसँयुतान्॥ ॐ तदुपरि

ब्रह्मविष्णुशिवात्मकाय सौराय योगपीठाय नमः॥ तथा च

शारदायाम्॥ वदेत्पदञ्चतुर्त्थ्यन्तम्ब्रह्मविष्णुशिवात्मकम्॥ सौराय

योगपीठाय नमः पदमनन्तरम्॥ पिठमन्त्रोऽयमाख्यातो दिनेशस्य

जगत्पतेः॥ ततः ऋष्यादिन्यासः॥ शिरसि देवभागऋषयेनमः॥ मुखे

गायत्रीछन्दसेनमः॥ ह्रदि आदित्याय देवतायैनमः॥ तथा च निबन्धे॥

देवभागो मुनिः प्रोक्तो गायत्रीछन्द ईरितम्॥ आदित्यो देवता प्रोक्ता

दृष्टादृष्टफलप्रदा॥ ततः कराङ्गन्यासौ॥ सत्याय तेजोज्वालामणे

हुंफट्स्वाहा अङ्गुष्ठाभ्यान्नमः॥ एवं ब्रह्मणे तेजोज्वालामणे०

१० तर्ज्जनीभ्यां स्वाहा। विष्णवे ते० १० मध्यमाभ्यां व्वषट्॥

रुद्राय ते० १० अनामिकाभ्याँहुम्॥ अग्नये ते० १० कनिष्ठाभ्याँव्वौषट्॥

सर्वाय ते० १० करतलकरपृष्ठाभ्यां फट्॥ एवं ह्रदयादिषु॥ तथा

च शारदायाम्॥ सत्याय ह्रदयम्प्रोक्तम्ब्रह्मणे शिर ईरितम्॥ विष्णवे

स्याच्छिखा वर्म रुद्राय परिकीर्त्तितम्॥ अग्नये नेत्रमाख्यातं

सर्वायास्त्रमुदाह्रतम्॥ तेजोज्वालामणे ह्रूं फट् द्विठान्ताः

परिकीर्त्तिताः॥

p. 534) ततो मूर्त्तिन्यासः। यथा॥ ॐशिरसि आदित्यायनमः॥ एवं मुखे
एँअवये०, हृदये उँहानवे०, गुह्ये इँहास्कराय०, चरणयोः अँऊर्य्याय०॥
तथा च निबन्धे॥ आदित्यँव्विन्यसेन्मूर्ध्नि रविम्मुखगतन्न्यसेत्॥
हृदयं भानुनामानम्भास्करञ्जुह्यदेशतः॥
सूर्यश्चरणयोर्न्न्यस्य वर्णैः सत्यादिपञ्चभिः॥ ततो न्यासः॥ शिरसि
ॐनमः, आस्ये ॐ घृनमः, कण्ठे ॐणिनमः, हृदि ॐसूनमः, कुक्षौ
ॐर्य्यनमः, नाभौ ॐआनमः, लिङ्गे ॐ दिनमः, पादयोः ॐत्यनमः॥
तथा च ॐ मूर्द्धाऽऽस्यकण्ठ-हृदय-कुक्षि-नाभि-ध्वजाङ्घ्रिषु॥
मन्त्रवर्णान्न्यसेदष्टौ प्रत्येकम्प्रणवादिकम्॥ ततो ध्यानम्

रक्ताब्जयुग्माभयदानहस्तङ्केयूरहाराङ्गदकुण्डलाढ्यम्॥
माणिक्यमौलिन्दिननाथमीडे बन्धूककान्तिं विलसत्त्रिनेत्रम्॥
एवन्ध्यात्वा मानसैः सम्पूज्य कुम्भस्थापनङ्कुर्यात्॥ ततो
गुरुपङ्क्तिपूजाङ्कृत्वा पीठपूजाङ्कुर्यात्॥ ॐखंखखोल्कायनमः
इतिमन्त्रेण मूर्त्तिं सङ्कल्प्य
पुनर्ध्यात्वाऽऽवाहनादिपञ्चपुष्पाञ्जलिदानपर्यन्तँ
व्विधायाऽऽवरणपूजामारभेत्॥ तथा च निबन्धे॥
तारादिखंखखोल्काय मनुना मूर्तिकल्पना॥ साक्षिणं
सर्वलोकानान्तस्यामावाह्य पूजयेत्॥ केसरेष्वग्न्यादिकोणे मध्ये दिक्षु

च सत्याय तेजोज्वालामणि हूँहट् स्वाहा हृदयायनमः एवं
ब्रह्मणे० १० शिरसेस्वाहा॥ विष्णवे० १० शिखायैवषट्॥ रुद्राय० १०
कवचायहुम्। अग्नये० १० नेत्रत्रयायवौषट्॥ सर्वाय० १० अस्त्रायफट्॥ दिक्
षत्रेषु पूर्वादि ॐ आदित्यायनमः एवं एँअवये० उँहानवे
ईंभास्कराय० विदिक्पत्रेषु अग्न्यादि ऊँषायै० एवं प्रं प्रज्ञायै०,
पम्प्रभायै०, सँअन्ध्यायै०॥ तथा च॥ अङ्गानि पूजयेदादौ दिक्पत्रे
सूर्यमूर्त्तयः॥ आदित्याद्याश्चतस्रोऽर्च्याः शक्तयः कोणपत्रगाः॥

p. 535) स्वस्वनामादिवर्णाः स्युस्तासाम्बीजान्यनुक्रमात्॥ उषा-प्रज्ञा-
प्रभा-सन्ध्याः शक्तयः परिकीर्त्तिताः॥ ततः पत्रेषु ब्राह्म्याद्याः
पुरतोऽरुणमर्च्चयेत्॥ तथा च शारदायाम्॥ पत्राग्रसंस्था
ब्राह्म्याद्याः पुरतोऽरुणमर्च्चयेदिति॥ तद्बाह्ये
पूर्वादिचन्द्रादीन्पूजयेत्॥ ॐ चन्द्रायनमः, ॐ मङ्गलायनमः, एवं
बुधाय०, बृहस्पतये०, शुक्राय०, शनैश्चराय०, राहवे०, केतवेनमः॥
तथा च शारदायाम्॥ चन्द्रादीन्वज्रादींश्च सम्पूज्य
धूपादिविसर्ज्जनान्तङ्कर्म समापयेत्॥ अस्य
पुरश्चरणमष्टलक्षजपः॥ तथा च॥ वसुलक्षञ्जपेन्मन्त्रमाज्येन च
दशांशतः॥ तिलैर्वा मधुरासिक्तैर्ज्जुहुयाद्विजितेन्द्रियः॥ इति पूजा॥

अथ स्तोत्रम्

वसिष्ठ उवाच

स्तुवंस्तत्र ततः साम्बः कृशोधर्मनिसन्ततः।
राजन्नाम सहस्रेण सहस्रांशुन्दिवाकरम्॥

विद्यमानन्तु तन्दृष्ट्वा सूर्यः कृष्णात्मजन्तदा।
स्वप्ने तु दर्शनन्दत्त्वा पुनर्व्वचनमब्रवीत्॥

श्रीसूर्य उवाच

साम्ब साम्ब महाबाहो शृणु जाम्बवतीसुत।
अलन्नाम सहस्रेण पठस्वेमं स्तवं शुभम्॥

यानि नामानि गुह्यानि पवित्राणि शुभानि च।
तानि ते कीर्त्तयिष्यामि श्रुत्वा वत्सावधारय॥

विकर्त्तनो विवस्वांश्च मार्त्तण्डो भास्करो रविः।
लोकप्रकाशकः श्रीमाँल्लोकचक्षुर्ग्रहेश्वरः॥

लोकसाक्षी त्रिलोकेशः कर्त्ता हर्त्ता तमिस्रहा।
तपनस्तापसश्चैव शुचिः सप्ताश्ववाहनः॥

गभस्तिहस्तो ब्रह्मा च सर्वदेवनमस्कृतः।
एकविंशतिरित्येष स्तव इष्टः सदा मम॥

श्रीरारोग्यकरश्चैव धनवृद्धियशस्करः।
स्तवराज इति ख्यातस्त्रिषु लोकेषु विश्रुतः॥

य एतेन महाबाहो द्वे सन्ध्ये स्तवनोदये।
स्तौति मां प्रणटो भूत्वा सर्वपापैः प्रमुच्यते॥

कायिकँव्वाचिकञ्चैव मानसँय्यच्च दुष्कृतम्।
p. 536) एष जाप्येन तत्सर्वम्प्रणश्यति न संशयः॥

एष जप्यश्च होमश्च सन्ध्योपासनमेव च।
बलिमन्त्रोऽग्घ्यमन्त्रश्च धूपमन्त्रस्तथैव च॥

अन्नप्रदाने स्नाने च प्रणिपाते प्रदक्षिणे।

पूजितोयम्महामन्त्रः सर्वपापहरः शुभः॥

एवमुक्त्वा तु भगवान् भास्करो जगदीश्वरः।
आमन्त्र्य कृष्णतनयन्तत्रैवान्तरधीयत॥

साम्बोऽपि स्तवराजेन स्तुत्वा सप्ताश्ववाहनम्।
पूतात्मा नीरुजः श्रीमांस्तस्माद्रोगाद्विमुक्तवान्॥

इति साम्बपुराणे सूर्यस्तवः सम्पूर्णः॥

अथ कवचम्

श्रीसूर्य उवाच

साम्ब साम्ब महाबाहो शृणु मे कवचं शुभम्।
त्रैलोक्यमङ्गलन्नाम कवचम्परमाद्भुतम्॥

यज्ज्ञात्वा मन्त्रवित्सम्यक्फलमाप्नोति निश्चितम्।
यद्धृत्वा च महादेवो गणानामधिपोऽभवत्॥

पठनाद्धारणाद्विष्णुः सर्वेषाम्पालकः सदा।
एवमिन्द्रादयः सर्वे सर्वैश्वर्यमवाप्नुयुः॥
कवचस्य ऋषिर्ब्रह्मा छन्दोऽनुष्टुबुदाहृतम्।
श्रीसूर्यो देवता चात्र सर्वदेवनमस्कृतः॥
आरोग्ययशोमोक्षेषु विनियोगः प्रकीर्त्तितः।
प्रणवो मे शिरः पातु घृणिर्मे पातु भालकम्॥

सूर्योऽव्यान्नयनद्वन्द्वमादित्यः कर्णयुग्मकम्।
अष्टाक्षरो महामन्त्रः सर्वाभीष्टफलप्रदः॥

ह्रींबीजम्मे मुखम्पातु हृदयम्भुवनेश्वरी।
चन्द्रबीजँव्विसर्गाढ्यम्पातु मे गुह्यदेशकम्॥

अक्षरोऽसौ महामन्त्रः सर्वतन्त्रेषु गोपितः।
शिवोवह्निसमायुक्तो वामाक्षिविन्दुभूषितः॥

एकाक्षरो महामन्त्रः श्रीसूर्यस्य प्रकीर्त्तितः।
गुह्याद्गुह्यतरो मन्त्रो वाञ्छाचिन्तामणिः स्मृतः॥

शीर्षादिपादपर्यन्तं सदा पातु मनूत्तमः।

इति ते कथितन्दिव्यन्त्रिषु लोकेषु दुर्ल्लभम्॥

श्रीप्रदङ्कान्तिदन्नित्यन्धनारोग्यविवर्द्धनम्।
कुष्ठाधिरोगशमनम्महाव्याधिविनाशनम्॥

त्रिसन्ध्यँय्यः पठेन्नित्यमरोगी बलवान्भवेत्।
बहुना किमिहोक्तेन यद्यन्मनसि वर्त्तते॥

p. 537) तत्तत्सर्वम्भवत्येव कवचस्य च धारणात्।
भूतप्रेत-पिशाचाश्च यक्ष-गन्धर्व-राक्षसाः॥

ब्रह्म-राक्षस-वेताला नैव द्रष्टुमपि क्षमाः।
दूरादेव पलायन्ते तस्य सङ्कीर्त्तनादपि॥

भूर्जपत्रे समालिख्य रोचनागुरुकुङ्कुमैः।
रविवारे च सङ्क्रान्त्यां सप्तम्याञ्च विशेषतः॥

धारयेत्साधकश्रेष्ठस्त्रैलोक्यविजयी भवेत्।
त्रिलोहमध्यगङ्कृत्वा धारयेद्दक्षिणे भुजे॥

शिखायामथवा कण्ठे सोऽपि सूर्यो न संशयः।
इति ते कथितं साम्ब त्रैलोक्यमङ्गलाभिधम्॥

कवचन्दुर्ल्लभँल्लोके तव स्नेहात्प्रकाशितम्।
अज्ञात्वा कवचन्दिव्यँय्यो जपेत्सूर्यमुत्तमम्॥

सिद्धिर्न्न जायते तस्य कल्पकोटिशतैरपि॥ १८॥

इति ब्रह्मयामले त्रैलोक्यमङ्गलं नाम श्रीसूर्यकवचं सम्पूर्णम्॥

अथ हृदयम्

ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम्।
रावणञ्चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम्॥ १॥

दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम्।
उपगम्याब्रवीद्राममगस्त्यो भगवांस्तदा॥ २॥

राम राम महाबाहो शृणु गुह्यं सनातनम्।

येन सर्वानरीन्वत्स समरे विजयिष्यसे॥ ३॥

आदित्यहृदयम्पुण्यं सर्वशत्रुविनाशनम्।
जयावहञ्जपन्नित्यमक्षयम्परमं शिवम्॥ ४॥

सर्वमङ्गलमाङ्गल्यं सर्वपापप्रणाशनम्।
चिन्ताशोकप्रशमनमायुर्वर्द्धनमुत्तमम्॥ ५॥

रश्मिमन्तं समुद्यन्तन्देवासुरनमस्कृतम्।
पूजयस्व विवस्वन्तम्भास्करम्भुवनेश्वरम्॥ ६॥

सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावनः।
एष देवासुरगणाँल्लोकान् पाति गभस्तिभिः॥ ७॥

एष ब्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः।
महेन्द्रो धनदः कालो यमः सोमो ह्यपाम्पतिः॥ ८॥

पितरो वसवः साध्या अश्विनौ मरुतो मनुः।
वायुर्वह्निः प्रजाः प्राण ऋतुकर्त्ता प्रभाकरः॥ ९॥

p. 538) आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान्।
सुवर्णसदृशो भानुर्हिरण्यरेता दिवाकरः॥ १०॥

हरिदश्वः सहस्रार्च्चिः सप्तसप्तिर्मरीचिमान्।
तिमिरोन्मथनः शम्भुस्त्वष्टा मार्त्तण्डकोंऽशुमान्॥ ११॥

हिरण्यगर्भः शिशिरस्तपनोऽहस्करो रविः।
अग्निगर्भोंऽदितेः पुत्रः शङ्खः शिशिरनाशनः॥ १२॥

व्योमनाथस्तमोमेदी ऋग्यजुस्सामपारगः।
धनवृष्टिरपाम्मित्रो विन्ध्यवीथी प्लवङ्गमः॥ १३॥

आतपी मण्डली मृत्युः पिङ्गलः सर्वतापनः।
कविर्विश्वो महातेजा रक्तः सर्वभवोद्भवः॥ १४॥

नक्षत्रग्रहताराणामधिपो विश्वभावनः।
तेजसामपि तेजस्वी द्वादशात्मन्नमोऽस्तु ते॥ १५॥

नमः पूर्वाय गिरये पश्चिमायाद्रये नमः।
ज्योतिर्गणानाम्पतये दिनाधिपतये नमः॥ १६॥

जयाय जय भद्राय हर्यश्वाय नमो नमः।
नमो नमः सहस्त्रांशो आदित्याय नमो नमः॥ १७॥

नम उग्राय वीराय सारङ्गाय नमो नमः।
नमः पद्मप्रबोधाय प्रचण्डाय नमोऽस्तु ते॥ १८॥

ब्रह्मेशानाच्युतेशाय सूरायाऽऽदित्यवर्च्चसे।
भास्वते सर्वभक्षाय रौद्राय वपुषे नमः॥ १९॥

नमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने।
कृतघ्नघ्नाय देवाय ज्योतिषाम्पतये नमः॥ २०॥

तप्तचामीकराभाय हरये विश्वकर्मणे।
नमस्तमोभिनिघ्नाय रुचये लोकसाक्षिणे॥ २१॥

नाशयत्येष वै भूतन्तमेव सृजति प्रभुः।
पायत्येष तपत्येष वर्षत्येष गभस्तिभिः॥ २२॥

एष सुप्तेषु जागर्त्ति भूतेषु परिनिष्ठितः।

एष चैवाग्निहोत्रञ्च फलञ्चैवाग्निहोत्रिणाम्॥ २३॥

देवाश्च क्रतवश्चैव क्रतूनाम्फलमेव च।
यानि कृत्यानि लोकेषु सर्वेषु परमप्रभुः॥ २४॥

एनमापत्सु कृच्छ्रेषु कान्तारेषु भयेषु च।
कीर्त्तयन्पुरुषः कश्चिन्नावसीदति राघव॥ २५॥

पूजयस्वैनमेकाग्रो देवदेवञ्जगत्पतिम्।
p. 539) एतत्त्रिगुणितञ्जप्त्वा युद्धेषु विजयिष्यसे॥ २६॥

अस्मिन्क्षणे महाबाहो रावणन्त्वञ्जयिष्यसि।
एवमुक्त्वा ततोऽगस्त्यो जगाम स यथागतम्॥ २७॥

एवं तच्छ्रुत्वा महातेजा नष्टशोकोऽभवत्तदा।
धारयामास सुप्रीतो राघवः प्रयतात्मवान्॥ २८॥

आदित्यँव्वीक्ष्य जप्त्वेदम्परं हर्षमवाप्तवान्।
त्रिराचम्य शुचिर्ब्भूत्वा धनुरादाय वीर्यवान्॥ २९॥

रावणम्प्रेक्ष्य हृष्टात्मा जयार्त्थं समुपागतम्।
सर्वयत्नेन महताबृतस्तस्य वधेऽभवत्॥ ३०॥

अथ रविरवदन्निरीक्ष्य राममुदितमनाः परमम्प्रहृष्यमाणः।
निशिचरपतिसङ्क्षयँविदित्वा सुरगणमध्यगतो वचस्त्वरेति॥ ३१॥

इति वाल्मीकीये श्रीमद्रामायणे आदित्यहृदयस्तोत्रं सम्पूर्णम्॥

अथ सूक्तम्

व्विभ्राड् बृहत्पिबतु सोम्यं मद्धायुर्द्दधद्यज्ञपतावविहुतम्।
वातजूतो यो ऽभिरक्षति त्मना प्रजाः पुपोष पुरुधा वि राजति॥ १॥

उदु त्यज्जातवेदसन्देवँव्व्वहन्ति केतवः।
दृशे विश्वाय सूर्यम्॥ २॥

येना पावक चक्षसा भुरण्यन्तञ्जनाँ२ ऽनु।
त्वँव्वरुण पश्यसि॥ ३॥

दैव्यावद्धर्यू ऽगतं रथेन सूर्यत्वचा।

मद्धा यज्ञं समञ्जाथे॥ ४॥

तम्प्रत्नथा पूर्वथा विश्श्वथेमथा ज्येष्ठतातिम्बर्हिषदँस्वर्विदम्

।

प्रतीचीनँव्वृजनन्दोहसे धुनिमाशुञ्जयन्तमनु यासु वर्द्धसे॥ ५॥

अयँव्वेनश्चोदयत्पृश्निगर्भा ज्योतिर्ज्जरायू रजसो विमाने।

इममपाँसङ्गमे सूर्यस्य शिशुन्न विप्रा मतिभी रिहन्ति॥ ६॥

चित्रन्देवानामुदगादनीकञ्चक्षुर्मित्रस्य वरुणस्याग्नेः।

आप्रा द्यावा पृथिवी ऽन्तरिक्षं सूर्य ऽत्मा जगतस्तस्थुषश्च॥ ७॥

आ न ऽ-इडाभिर्विदथे सुशस्ति व्विश्वानरः सविता देव ऽ-एतु।

p. 540) अपि यथा युवानो मत्सथा नो विश्वञ्जगदभिपित्त्वे मनीषा॥ ८॥

यदद्य कच्च वृत्रहन्नुदगा ऽभि सूर्य॥

सर्वन्तदिन्द्र ते व्वशे॥ ९॥ तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य॥

विश्वमाभासि रोचनम्॥ १०॥

तत्सूर्यस्य देवत्त्वन्तन्महित्वम्मध्या कर्त्तोर्विततं सञ्जभार॥

यदेदयुक्त हरितः सधस्थादाद्रात्री व्वासस्तनुते सिमस्मै॥ ११॥

तन्मित्रस्य व्वरुणस्याभिचक्षे सूर्यो रूपङ्कृणुते द्योरुपस्थे।
अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः सम्भरन्ति॥ १२॥

बण्महाँ२॥ ऽ असि सूर्य बडादित्य महाँ२॥ ऽ असि॥ महस्ते सतो महिमा पनस्यते ऽद्धा देव महाँ२॥ ऽ असि॥ १३॥ बड्ढूर्य श्रवसा महाँ२॥ ऽ असि सत्रा देव महा/२॥ ऽ असि॥ मह्ना देवानामसुर्यः पुरोहितो व्विभु ज्योतिरदाभ्यम्॥ १४॥

श्रायन्त इव सूर्यँविश्वेदिन्द्रस्य भक्षत॥

व्वसूनि जाते जनमान ऽ-ओजसा प्रति भागन्न दीघिम॥ १५॥

अद्या देवा ऽ-उदिता सूर्यस्य निरंहसः पिपृता निरवद्यात्॥

तन्नो मित्रो व्वरुणो मामहन्तामदितिः सिन्धुः पृथिवी ऽ-उत द्यौः॥ १६॥

आ कृष्णेन रजसा व्वर्त्तमानो निवेशयन्नमृतम्मर्त्त्यञ्च।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्॥ १७॥

इति सूक्तम्॥

अथ शतनाम

धौम्य उवाच

सूर्योऽर्यमा भगस्त्वष्टा पूषार्कः सविता रविः।
गभस्तिमानजः कालो मृत्युर्द्धाता प्रभाकरः॥ १॥

पृथिव्यापश्च तेजश्च खँव्वायुश्च परायणम्।
सोमो बृहस्पतिः शुक्रो बुधोङ्गारक एव च॥ २॥

इन्द्रो विवस्वान्दीप्तांशुः शुचिः शौरिः शनैश्चरः।
ब्रह्मा विष्णुश्च रुद्रश्च स्कन्दो वै वरुणो यमः॥ ३॥

वैद्युतो जाठरश्चाग्निरैन्धनस्तेजसाम्पतिः।
धर्मध्वजो वेदकर्त्ता वेदाङ्गो वेदवाहनः॥ ४॥

p. 541) कृतत्रेता द्वापरश्च कलिः सर्वमलाश्रयः।
कला काष्ठा मुहूर्त्तश्च क्षपा यामस्तथा क्षणः॥ ५॥

सँवत्सरकरोश्वत्थः कालचक्रो विभावसुः।
पुरुषः शाश्वतो योगी व्यक्ताव्यक्तः सनातनः॥ ६॥

कालाध्यक्षः प्रजाध्यक्षो विश्वकर्मा तमोनुदः।
वरुणः सागरोंशश्च जीमूतो जीवनोऽरिहा॥ ७॥

भूताश्रयो भूतपतिः सर्वलोकनमस्कृतः।
स्रष्टा सँवत्तको वह्निः सर्वस्यादिरलोद्द पः॥ ८॥

अनन्तः कपिलो भानुः कामदः सर्वतोमुखः।
जयो विशालो वरदः सर्वधातुनिषेवितः॥ ९॥

मनः सुपर्णो भूतादिः शीघ्रगः प्राणधारणः।

धन्वन्तरिर्द्धूम्रकेतुरादिदेवोऽदितेः सुतः॥ १०॥

द्वादशात्माऽरविन्दाक्षः पितामातापितामहः।
प्रजाद्वारं सर्गद्वारम्मोक्षद्वारन्त्रिविष्टपम्॥ ११॥

दाहकर्त्ता प्रशान्तात्मा विश्वात्मा विश्वतोमुखः।
चराचरात्मा सूक्ष्मात्मा मैत्रेयः करुणान्वितः॥ १२॥

एतद्वै कीर्त्तनीयस्य सूर्यस्यामिततेजसः।
नामाष्टशतकञ्चेदम्प्रोक्तमेतत्स्वयम्भुवा॥ १३॥

सुरगणपितृयक्षसेवितें ह्यसुरनिशाचरसिद्धवन्दितम्।
वरकनकहुताशनप्रभम्प्रणिपतितोस्मि हिताय भास्करम्॥ १४॥

सूर्योदये यः सुसमाहितः पठेत् स-पुत्रदारान् धनरत्नसञ्चयान्।
लभेत जातिस्मरतान्ततः सदा धृतिञ्च मेधाञ्च स विन्दते पुमान्॥ १५॥

इमं स्तवन्देववरस्य यो नरः प्रकीर्त्तयेच्छुद्धमनाः समाहितः।
विमुच्यते शोकदवाग्निसागराल्लभेत् कामान्मनसा यथेप्सितान्॥ १६॥

इति श्रीमहाभारते वनपर्वणि धौम्ययुधिष्ठिरसँवादे
श्रीसूर्यस्याष्टोत्तरशतनामस्तोत्रं समाप्तम्॥

अथ सहस्रनाम

सुमन्तुरुवाच

माघे मासि सिते पक्षे सप्तम्याङ्कुरुनन्दन।
p. 542) निराहारो रविम्भक्त्या पूजयेद्विधिना नृप॥ १॥

पूर्वोक्तेन जपेज्जप्यन्देवस्य पुरतः स्थितः।
शुद्धैकाग्रमना राजञ्जितक्रोधो जितेन्द्रियः॥ २॥

शतानीक उवाच

केन मन्त्रेण जप्तेन दर्शनम्भगवान्व्रजेत्।
स्तोत्रेण वापि सविता तन्मे कथय सुव्रत॥ ३॥

सुमन्तुरुवाच

स्तुतो नामसहस्रेण यदा भक्तिमता मया।
तदा मे दर्शनँय्यातः साक्षाद्देवो दिवाकरः॥ ४॥

शतानीक उवाच

नाम्नां सहस्रं सवितुः श्रोतुमिच्छामि ते द्विज।
येन ते दर्शनँय्यातः साक्षाद्देवो दिवाकरः॥ ५॥

सुमन्तुरुवाच

सर्वमङ्गलमाङ्गल्यं सर्वपापप्रणाशनम्।
न चेदस्ति भयङ्किञ्चिद्यजनेन च शाम्यति॥ ६॥

ज्वराद्विमुच्यते राजन् स्तोत्रेऽस्मिन्पठिते नरः।
अन्ये च रोगाश्शाम्यन्ति पठतः शृण्वतस्तथा॥ ७॥

सम्पद्यन्ते यथाकामास्सर्वभोगा यथेप्सिताः।
य एतदादितः श्रुत्वा सङ्ग्रामम्प्रविशेन्नरः॥ ८॥

स जित्वा समरे शत्रूनभ्येति गृहमक्षतः।
वन्ध्यानाम्पुत्रजननम्भीतानाम्भयनाशनम्॥ ९॥

भूतकारि दरिद्राणाङ्कुष्ठिनाम्परमौषधम्।
बालानाञ्चैव सर्वेषाङ्ग्रहरक्षोनिवारणम्॥ १०॥

पठेदेतद्धि यो राजन् स श्रेयः परमाप्नुयात्।
संसिद्धस्सर्वसङ्कल्पः सुखमत्यन्तमश्नुते॥ ११॥

धर्मार्त्थिभिर्द्धर्मलब्ध्यै सुखाय च सुखार्त्थिभिः।
राज्याय राज्यकामैश्च पठितव्यमिदन्नरैः॥ १२॥

विद्या वहन्तु विप्राणां क्षत्रियाणाञ्जयावहम्।
पश्वा वहन्तु वैश्यानां शूद्राणान्धर्मबर्द्धनम्॥ १३॥

पठतां शृण्वतामेतद्भवतीति न संशयः।
तच्छृणुष्व नृपश्रेष्ठ प्रयतात्मा ब्रवीमि ते॥ १४॥

नाम्नां सहस्रँव्विख्यातन्देवदेवस्य भास्वतः।

ॐ अस्य श्रीसूर्यसहस्रनाम्नाम्भगवान् पराशरऋषिरनुष्टुप्छन्द
श्रीसूर्यो देवता सकलाभीष्टसिद्ध्यर्थे जपे विनियोगः॥

ॐ विश्वविद्विश्वजित्कर्त्ता विश्वात्मा विश्वतोमुखः।
p. 543) विश्वेश्वरो विश्वयोनिर्न्नियतात्मा जितेन्द्रियः॥ १॥

कालाश्रयः कालकर्त्ता कालहा कालनाशनः।
महायोगी महाबुद्धिर्महात्मा सुमहाबलः॥ २॥

प्रभुर्विभुर्भूतनाथो भूतात्मा भुवनेश्वरः।
भूतभव्यो भावितात्मा भूतान्तः करणश्शिवः॥ ३॥

शरण्यः कमलानन्दो नन्दनो नन्दवर्द्धनः।
वरेण्यो वरदो योगी सुसँयुक्तः प्रकाशकः॥ ४॥

प्राक्प्राणः परमः प्राणः प्रीतात्मा प्रियतः प्रियः।
नयः सहस्रपात्साधुर्द्दिव्यकुण्डलमण्डितः॥ ५॥

अव्यङ्गधारी धीरात्मा प्रचेता वायुवाहनः।
समाहितमतिर्द्धाता विधाताकृतमङ्गलः॥ ६॥

कपर्द्दी कल्पकृद्रुद्रः सुमना धर्मवत्सलः।
समायुक्ता विमुक्तात्मा कृतात्मा कृतिनाँव्वरः॥ ७॥

अविचिन्त्यवपुः श्रेष्ठो महायोगी महेश्श्वरः।
कान्तः कामादिरादित्यो नियतात्मा निराकुलः॥ ८॥

कामः कारुणिकः कर्त्ता कमलाकरबोधनः।
सप्तसप्तिरचिन्त्यात्मा महाकारुणिकोत्तमः ॥ ९॥

सञ्जीवनो जीवनाथो जगज्जीवो जगत्पतिः।
अजयो विश्वनिलयस्सँविभागो वृषध्वजः॥ १०॥

वृषाकपिः कल्पकर्त्ता कल्पान्तकरणो रविः।
एकचक्ररथो मौनी सुरथो रथिनाँव्वरः॥ ११॥

अक्रोधनो रश्मिमाली तेजोराशिर्विभावसुः।
दिव्यकृद्दिनकृद्देवो देवदेवो दिवस्पतिः॥ १२॥

दीननाथो हविर्होता दिव्यबाहुर्द्दिवाकरः।

यज्ञो यज्ञपतिः पूषा स्वर्णरेताः परावहः॥ १३॥

परापरज्ञस्तरणिरंशुमाली मनोहरः।

प्राज्ञः प्रजापतिस्सूर्यः सविता विष्णुरंशुमान्॥ १४॥

सदागतिर्ग्गन्धबाहुर्विहितो विधिराशुगः।

पतङ्गः पतगः स्थाणुर्विहङ्गो विहगो वरः॥ १५॥

हर्यश्वो हरिताश्वश्च हरिदश्वो जगत्प्रियः।

त्र्यम्बकस्सर्वदमनो भावितात्मा भिषग्वरः॥ १६॥

आलोककृल्लोकनाथो लोकालोकनमस्कृतः।

p.544) कालः कल्पान्तको वह्निस्तपनस्सम्प्रतापनः॥ १७॥

विरोचनो विरूपाक्षस्सहस्राक्षः पुरन्दरः।

सहस्ररश्मिर्मिहिरो विविधाम्बरभूषणः॥ १८॥

खगः प्रतर्द्दनो धन्यो हयगो वाग्विशारदः।

श्रीमांश्च शिशिरो वाग्ग्मी श्रीपतिः श्रीनिकेतनः॥ १९॥

श्रीकण्ठः श्रीधरश्श्रीमाञ्छ्रीनिवासो वसुप्रदः।
कामचारी महामायो महेशो विदिताशयः॥ २०॥

तीर्थक्रियावान्सुनयो विभवो भक्तवत्सलः।
कीर्त्तिः कीर्त्तिकरो नित्यः कुण्डली कवची रथी॥ २१॥

हिरण्यरेताः सप्ताश्वः प्रयतात्मा परन्तपः।
बुद्धिमानमरश्रेष्ठो रोचिष्णुः पाकशासनः॥ २२॥

समुद्रो धनदो धाता मान्धाता कश्मलापहः।
तमोघ्नो ध्वान्तहा वह्निर्होतान्तः करणो गुहः॥ २३॥

पशुमान्प्रयतानन्दो भूतेशः श्रीमताँव्वरः।
नित्योदितो नित्यरथः सुरेशः सुरपूजितः॥ २४॥

अजितो विजयो जेता जङ्गमस्स्थावरात्मकः।
जीवानन्दो नित्यगामी विजेता विजयप्रदः॥ २५॥

पर्ज्जन्योग्निस्थितिः स्थेयः स्थविरोऽणुर्न्निरञ्जनः।
प्रद्योतनो रथारूढः सर्वलोकप्रकाशकः॥ २६॥

ध्रुवो मेधी महावीर्यो हंसस्संसारतारकः।
सृष्टिकर्त्ता क्रियाहेतुर्मार्त्तण्डो मरुतांपतिः॥ २७॥

मरुत्वान्दहनस्त्वष्टा भगो भाग्योऽर्यमापतिः।
वरुणांशो जगन्नाथः कृतकृत्यः सुलोचनः॥ २८॥

विवस्वान्भूनुमान्कार्यकारणन्तेजसान्निधिः।
असङ्गगामी तिग्मांशुर्द्धर्मादित्यीप्तिदीधितिः॥ २९॥

सहस्रदीधितिर्ब्रध्नः सहस्रांशुर्दिवाकरः।
गभस्तिमान्दीधितिमान्स्रग्विमानतुलद्युतिः॥ ३०॥

भास्करस्सुरकार्यज्ञः सर्वज्ञस्तीक्ष्णदीधितिः।
सुरज्येष्ठः सुरपतिर्ब्बहुज्ञो वचसाम्पतिः॥ ३१॥

तेजोनिधिर्बृहत्तेजा बृहत्कीर्त्तिर्बृहस्पतिः।
अहिमानूर्ज्जितो धीमानामुक्तः कीर्त्तिवर्द्धनः॥ ३२॥

महावैद्योगणपतिर्गणेशो गणनायकः।

p. 545) तीव्रप्रतापनस्तापी तापनो विश्वतापनः॥ ३३॥

कार्त्तस्वरो हृषीकेशः पद्मानन्दोभिनन्दितः।
पद्मनाभोऽमृताहारः स्थितिमान्केतुमान्नभः॥ ३४॥

अनाद्यन्तोऽच्युतो विश्वो विश्वामित्रो घृणी विराट्।
आमुक्तः कवची वाग्मी कञ्चुकी विश्वभावनः॥ ३५॥

अनिमित्तगतिश्रेष्ठः शरण्यः सर्वतोमुखः।
विगाही रेणुरसहस्समायुक्तस्समाहितः॥ ३६॥

धर्मकेतुर्द्धर्मरतिस्संहर्त्ता सँयमो यमः।
प्रणतार्त्तिहरो वादी सिद्धकार्यो जनेश्वरः॥ ३७॥

नभोविगाहनस्सत्यस्तामसः सुमनोहरः।
हारी हरिर्हरो वायुर्ऋतुः कालानलद्युतिः॥ ३८॥

मुखसेव्यो महातेजा जगतामन्तकारणम्।
महेन्द्रो विष्टुतस्तोत्रं स्तुतिहेतुः प्रभाकरः॥ ३९॥

सहस्रकर आयुष्मानरोषः सुखदस्सुखी।
व्याधिहा सुखदः सौख्यङ्कल्याणः कल्पिनाँवरः॥ ४०॥

आरोग्यकर्मणां सिद्धिर्वृद्धि ऋद्धिरहस्पतिः।
हिरण्यरेता आरोग्यँव्विद्वान्बन्धुर्बुधो महान्॥ ४१॥

प्रणवान्धृतिमान्धर्मो धर्मकर्त्ता रुचिप्रदः।
सर्वप्रियस्सर्वसहः सर्वशत्रुनिवारणः॥ ४२॥

प्रांशुर्विद्योतनो द्योतस्सहस्रकिरणः कृतिः।
केयूरभूषणोद्भासी भासितो भासनोनलः॥ ४३॥

शरण्यार्त्तिहरो होता खद्योतः खगसत्तमः।
सर्वद्योतो भवद्योतः सर्वद्युतिकरोमलः॥ ४४॥

कल्याणः कल्याणकरः कल्पः कल्पकरः कविः।
कल्याणकृत्कल्पवपुः सर्वकल्याणभाजनः॥ ४५॥

शान्तिप्रियः प्रसन्नात्मा प्रशान्तः प्रशमप्रियः।
उदारकर्मा सुनयः सुवर्च्चा वर्चसोज्ज्वलः॥ ४६॥

वर्च्चस्वी वर्च्चसामीशस्त्रैलोक्येशो वशानुंगः।

तेजस्वी सुयशोवर्णिर्वर्णाध्यक्षो बलिप्रियः॥ ४७॥

यशस्वी वेदनिलयस्तेजस्वी प्रकृतिस्थितः।

आकाशगः शीघ्रगतिराशुगः श्रुतिमान्खगः॥ ४८॥

गोपतिर्ग्रहदेवेशो गोमानेकः प्रभञ्जनः।

p. 546) जनिता प्रजनञ्जीवो दीपः सर्वप्रकाशकः॥ ४९॥

कर्मसाक्षी योगनित्यो नभस्वानसुरान्तकः।

रक्षोघ्नो विघ्नशमनः किरीटी सुमनःप्रियः॥ ५०॥

मरीचिमाली सुमतिः कृतातिथ्योविशेषकः।

शिष्टाचारः शुभाचारः स्वाचाराचारतत्परः॥ ५१॥

मन्दारो माठरो रेणुः क्षोभणः पक्षिणाङ्गुरुः।

स्वविशिष्टो विशिष्टात्मा विधेयो ज्ञानशोभनः॥ ५२॥

महाश्वेताप्रियो ज्ञेयः सामगो मोददायकः।

सर्ववेदप्रगीतात्मा सर्ववेदालयो लयः॥ ५३॥

वेदमूर्त्तिश्चतुर्व्वेदो वेदभृद्वेदपारगः।
क्रियावानतिरोचिष्णुर्वरीयांश्च वरप्रदः॥ ५४॥

व्रतचारी व्रतधरो लोकबन्धुरलङ्कृतः।
अलङ्काराक्षरो दिव्यविद्यावान् विदिताशयः॥ ५५॥

अकारो भूषणोभूष्यो भूष्णुर्ब्भवनपूजितः।
चक्रपाणिर्वज्रधरः सुरेशो लोकवत्सलः॥ ५६॥

राज्ञीपतिर्महाबाहुः प्रकृतिर्विकृतिर्गुणः।
अन्धकारापहः श्रेष्ठो युगावर्त्तो युगादिकृत्॥ ५७॥

अप्रमेयः सदायोगी विरहङ्कार ईश्वरः।
शुभप्रदः शुभश्शोभा शुभकर्मा शुभास्पदः॥ ५८॥

सत्यवान्धृतिमानर्च्च्यो ह्यकारो वृद्धिदोनलः।
बलभृद्बलदो बन्धुर्बलवान्बलिनाम्बरः॥ ५९॥

अनङ्गो नागराडिन्द्रः पद्मयोनिर्गणेश्वरः।
सँवत्सरक्रतुर्नेता कालचक्रप्रवर्त्तकः॥ ६०॥

पद्मेक्षणः पद्मयोनिः प्रभवोनसरद्युतिः।
सुमूर्त्तिः सुमतिस्सोमो गोविन्दो जगदादिजः॥ ६१॥

पीतवासाः कृष्णवासा दिग्वासातीन्द्रियो हरिः।
अतीन्द्रोऽनेकरूपात्मा स्कन्दः परपुरञ्जयः॥ ६२॥

शक्तिमाञ्छूलधृग्भास्वान्मोक्षहेतुरयोनिजः।
सर्वदर्शाजितो दर्शो दुःस्वप्नाशुभनाशनः॥ ६३॥

मङ्गल्यकर्त्ता तरणिर्वेगवान्कश्मलापहः।
स्पष्टाक्षरो महामन्त्रो विशाखो यजनप्रियः॥ ६४॥

विश्वकर्मा महाशक्तिर्ज्योतिरीशो विहङ्गमः।
विचक्षणो दक्ष इन्द्रः प्रत्यूहः प्रियदर्शनः॥ ६५॥

p. 547) अश्विनौ वेदनिलयो वेदविद्विदिताशयः।
प्रभाकरो जितरिपुः सुजनोरुणसारथिः॥ ६६॥

कुबेरसुरथः स्कन्दो महितोभिहितो गुरुः।
ग्रहराजो ग्रहप्रतिर्ग्रहनक्षत्रमण्डनः॥ ६७॥

भास्करः सततानन्दो नन्दनो नन्दिवर्द्धनः।
मङ्गलोऽथ मङ्गलवान्माङ्गल्यो मङ्गलावहः॥ ६८॥

मङ्गलाचारचरितः शीर्णः सर्वव्रतो व्रती।
चतुर्मुखः पद्ममाली पूतात्मा प्रणतार्त्तिहा॥ ६९॥

अकिञ्चनस्सत्यसन्धो निर्गुणो गुणवान्गुणी।
सम्पूर्णः पुण्डरीकाक्षो विधेयो योगतत्परः॥ ७०॥

सहस्रांशुः क्रतुपतिः सर्वस्वं सुमतिः सुवाक्।
सुवाहनो माल्यदामा धृताहारो हरिप्रियः॥ ७१॥

ब्रह्मप्रचेता प्रथितः प्रतीतात्मा स्थिरात्मकः।
शतबिन्दुः शतमखो गरीयाननलप्रभुः॥ ७२॥

धीरो महत्तरो धन्यः पुरुषः पुरुषोत्तमः।

विद्याधाराधिराजो हि विद्यावान्भूतिदः स्थितः॥ ७३॥

अनिर्द्देश्यवपुः श्रीमान्विश्वात्मा बहुमङ्गलः।
सुस्थितः सुरथः स्वर्णो मोक्षाधारनिकेतनः॥ ७४॥

निर्द्वन्द्वो द्वन्द्वहा सर्गः सर्वगः सम्प्रकाशकः।
दयाद्द स्सूक्ष्मधीः शान्तिः क्षेमाक्षेमस्थितिप्रियः॥ ७५॥

भूधरो भूपतिर्वक्ता पवित्रात्मा त्रिलोचनः।
महावराहः प्रियकृद्धाता भोक्ता भयप्रदः॥ ७६॥

चतुर्वेदधरो नित्यो विनिद्रो विविधाशनः।
चक्रवर्त्ती धृतिकरः सम्पूर्णोऽथ महेश्वरः॥ ७७॥

विचित्ररथ एकाकी सप्तसप्तिः परात्परः।
सर्वोदधिस्थितिकरः स्थितिः स्थेयः स्थितिप्रियः॥ ७८॥

निष्कलः पुष्कलनिभा वसुमान्वासवप्रियः।
वसुमान्वासवस्वामी वसुदाता वसुप्रदः॥ ७९॥

बलवाञ्ज्ञानवाँतत्त्वमोङ्कारस्त्रिषु संस्थितः।

सङ्कल्पयोनिर्द्दिनकृद्भगवान्कारणावहः॥ ८०॥

नीलकण्ठो धनाध्यक्षश्चतुर्वेदप्रियँवदः।

p. 548) वषत्कारो हुतं होता स्वाहाकारो हुताहुतिः॥ ८१॥

जनार्द्दनो जनानन्दो नरो नारायणोऽम्बुदः।

स्वर्णाङ्गक्षपणो वायुः सुरासुरनमस्कृतः॥ ८२॥

विग्रही विमलो बिन्दुर्विशोको विमलद्युतिः।

द्योतितो द्योतनो विद्वान्विवस्वान्वरदो बली॥ ८३॥

धर्मयोनिर्महामोहो विष्णुभ्राता सनातनः।

सावित्रीभावितो राजा विसृतो विघृणी विराट्॥ ८४॥

सप्तार्च्चिः सप्ततुरगः सप्तलोकनमकृतः।

सम्पन्नोऽथ जगन्नाथः सुमनाश्शोभनप्रियः॥ ८५॥

सर्वात्मा सर्वकृत्सृष्टिः सप्तिमान्सप्तमीप्रियः।

सुमेधा माधवो मेध्यो मेधावी मधुसूदनः॥ ८६॥

अङ्गिरा गतिकालज्ञो धूमकेतुस्सुकेतनः।
सुखी सुखप्रदः सौख्यङ्कामी कान्तिप्रियो मुनिः॥ ८७॥

सन्तापनः सन्तपन आतपी तपसाम्पतिः।
उग्रश्रवास्सहस्रोस्रः प्रियङ्कारी प्रियङ्करः॥ ८८॥

प्रीतो विमन्युरम्भोदो जीवनो जगताम्पतिः।
जगत्पिता प्रीतमनाः सर्वः सर्वोगुहाबलः॥ ८९॥

सर्वगो जगदानन्दो जगन्नेता सुरारिहा।
श्रेयः श्रेयस्करो ज्यायानुत्तमोत्तम उत्तमः॥ ९०॥

उत्तमोऽथ महामेरुर्द्धारणो धरणीधरः।
धाराधरो धर्मराजो धर्मो धर्मप्रवर्त्तकः॥ ९१॥

रथाध्यक्षो रथपतिस्त्वरमाणोमितानलः।
उत्तरोनुत्तरस्तापी तारापतिरपाम्पतिः॥ ९२॥

पुण्यसङ्कीर्त्तनः पुण्यो हेतुर्ल्लोकत्रयाश्रयः।

स्वर्भानुर्विहगारिष्टो विशिष्टोत्कृष्टकर्मकृत्॥ ९३॥

व्याधिप्रणाशनः क्षेमः शूरस्सर्वजिताँव्वरः।
एकनाथो रथाधीशः शनैश्चरपिता सितः॥ ७४॥

वैवस्वतगुरुर्मृत्युर्द्धर्मनित्यो महाव्रतः।
प्रलम्बहारः सञ्चारी प्रद्योतो द्योतितोनलः॥ ९५॥

सन्तानकृत्परो मन्त्रो मन्त्रमूर्त्तिर्महाबलः।
श्रेष्ठात्मा सुप्रियः शम्भुर्महतामीश्वरेश्वरः॥ ९६॥

संसारगतिविच्छेत्ता संसारार्णवतारकः।
सप्तजिह्वः सहस्रार्च्ची रत्नगर्भोपराजितः॥ ९७॥

p. 549) धर्मकेतुरमेयात्मा धर्माधर्मवरप्रदः।
लोकसाक्षी लोकगुरुर्लोकेशश्छन्दवाहनः॥ ९८॥

धर्मरूपः सूक्ष्मवायुर्द्धनुष्पाणिर्द्धनुर्द्धरः।
पिनाकधृङ्महोत्साहो नैकमायो महाशनः॥ ९९॥

वीरः शक्तिमतां श्रेष्ठः सर्वशस्त्रभृताँव्वरः।
ज्ञानगम्यो दुराराध्यो लोहिताङ्गोरिमर्द्दनः॥ १००॥

अनन्तो धर्मदो नित्यो धर्मकृच्चक्रिविक्रमः।
दैवतस्त्र्यक्षरो मद्यो नीलाङ्गो नीललोहितः॥ १०१॥

एकोनैकस्त्रयी व्यासः सविता समितिञ्जयः।
सार्ङ्गधन्वा नलो भीमः सर्वप्रहरणायुधः॥ १०२॥

परमेष्ठी परञ्ज्योतिर्न्नाकपाली दिवस्पतिः।
वदान्यो वासुकिर्वैद्य आत्रेयोतिपराक्रमः॥ १०३॥

द्वापरः परमोदारः परमब्रह्मचर्यवान्।
उद्दीप्तवेषो मुकुटी पद्महस्तो हिमांशुभृत्॥ १०४॥

स्मितः प्रसन्नवदनः पद्मोदरनिभाननः।
सायन्दिवादिव्यवपुरनिर्द्देश्यो महारथः॥ १०५॥

महारथो महानीशः शेषः सत्त्वरजस्तमः।
धृतातपत्रप्रतिमो विमर्ष्शी निर्णयः स्थितः॥ १०६॥

अहिंसकः शुद्धमतिरद्वितीयोऽरिमर्द्दनः।
सर्वदो धनदो मोक्षो विहारी बहुदायकः॥ १०७॥

ग्रहनाथो ग्रहपतिर्ग्रहेशस्तिमिरापहः।
मनोहरवपुः शुभ्रः शोभनः सुप्रभाननः॥ १०८॥

सुप्रभः सुप्रभाकारः सुनेत्रो निक्षुभापतिः।
राज्ञीप्रियः शब्दकरो ग्रहेशस्तिमिरापहः॥ १०९॥

सिंहिकेयरिपुर्द्देवो वरदो वरनायकः।
चौर्ब्भुजो महायोगी योगीश्वरपतिस्तथा॥ ११०॥

अनादिरूपोऽदितिजो रत्नकान्तिः प्रभामयः।
जगत्प्रदीपो विस्तीर्णो महाविस्तीर्णमण्डलः॥ १११॥

एकचक्ररथः स्वर्णरथः स्वर्णशरीरधृक्।
निरालम्बो गगनगो धर्मकर्मप्रभावकृत्॥ ११२॥

धर्मात्मा कर्मणां साक्षी प्रत्यक्षः परमेश्वरः।

मेरुसेवी सुमेधावी मेरुरक्षाकरो महान्॥ ११३॥

आधारभूतो रतिमांस्तथा च धनधान्यकृत्।
पापसन्तापसंहर्त्ता मनोवाञ्छितदायकः॥ ११४॥

p. 550) रोगहर्त्ता राज्यदायी रमणीयगुणोनृणी।
कालत्रयानन्तरूपो मुनिवृन्दनमस्कृतः॥ ११५॥

सन्ध्यारागकरः सिद्धः सन्ध्यावन्दनवन्दितः।
साम्राज्यदाननिरतः समाराधनतोषवान्॥ ११६॥

भक्तदुःखक्षयकरो भवसागरतारकः।
भयापहर्त्ता भगवानप्रमेयपराक्रमः॥
मनुस्वामी मनुपतिर्मान्यो मन्वन्तराधिपः॥ ११७॥

एतत्ते सर्वमाख्यातँय्यन्मान्त्वम्परिपृच्छसि।
नाम्नां सहस्रं सवितुः पाराशर्यो यदाह मे॥ ११८॥

धन्यँय्यशस्यमायुष्यन्दुष्टदुःस्वप्ननाशनम्।
बन्धमोक्षकरञ्चैव भानोर्न्नामानुकीर्त्तनम्॥ ११९॥

यस्त्विदं शृणुयान्नित्यम्पठित्वा प्रयतो नरः।
अक्षयं सुखमन्नाद्यम्भवेत्तस्योपसाधितम्॥ १२०॥

नृपाग्नितस्करभयँव्व्याधिभ्यो न भयम्भवेत्।
विजयी च भवेन्नित्यं श्रेयश्च परमाप्नुयात्॥ १२१॥

कीर्तिमान्सुभगो विद्वान्स सुखी प्रियदर्शनः।
भवेद्वर्षशतायुश्च सर्वव्याधिविवर्जितः॥ १२२॥

नाम्नां सहस्त्रमिदमंशुमतः पठेद्यः प्रातः
शुचिर्न्नियमवान्सुसमाधियुक्तः।
द्वारेण तम्परिहरन्ति सदैव रोगा भीतास्सुपर्णमिव सर्वमहोरगेन्द्राः
॥ १२३॥

इति श्रीभविष्यपुराणे सप्तमीकल्पे भगवतः श्रीसूर्यस्य नाम्नां
सहस्त्रं सम्पूर्णम्॥

इति सूर्यतन्त्रं समाप्तम्

श्रीः

शिवहरराजधानीपतिश्रीराजादेवनन्दनसिंह-

बहादुरनराधिपसंगृहीतविरचित-

शाक्तप्रमोदान्तर्गतं

सप्तदशं

विष्णुतन्त्रम्

उक्तराजगुरुवंश्यपण्डितश्रीरघुराजदुबेजीद्वारा

संशोधितम्

तदेतत्

श्रीकृष्णदासात्मज-खेमराजेन

स्वकीये श्रीवेंकटेश्वर यन्त्रालये

मुद्रयित्वा प्रकाशितम्

मुम्ब-ई

श्रीगणेशाय नमः

अथ विष्णुतन्त्रम्

अथ श्रीविष्णुध्यानम्

शान्ताकारम्भुजगशयनम्पद्मनाभं सुरेशँ
व्विश्वाधारङ्गगनसदृशम्मेघवर्णं शुभाङ्गम्॥
लक्ष्मीकान्तङ्कमलनयनँय्योगिभिर्ध्यानगम्यँ
व्वन्दे विष्णुम्भवभयहरं सर्वलोकैकनाथम्॥ १॥

अथ यन्त्रोद्धारः

अनुक्तकल्पे यन्त्रन्तु लिखेत्पद्मदलाष्टकम्।
षट्कोणं कर्णिकन्तत्र वेदद्वारोपशोभितम्॥

p. 554) अथ मन्त्रोद्धारः

स-चतुर्थीनमोऽन्तैश्च नामभिर्विन्यसेत्सुधीः।
तारन्नमः पदम्ब्रूयान्नरौ दीर्घसमन्वितौ॥
यवर्णो णायमन्त्रोयम्प्रोक्तो वस्वक्षरः परः॥

अथ मन्त्रः

ॐ नमो नारायणाय।

अथ पूजाप्रयोगः

प्रातः कृत्यादि मातृकान्यासान्तङ्कर्म विधाय
केशवकृत्यादिन्यासङ्कुर्यात्॥ अथ ऋष्यादिन्यासः॥ शिरसि

प्रजापतयेऋषयेनमः॥ मुखे गायत्रीछन्दसेनमः॥ हृदि
अर्द्धलक्ष्मीहरये देवतायै नमः॥ ततः कराङ्गन्यासौ॥ श्रीँ
अङ्गुष्ठाभ्यान्नम इत्यादि॥ तथा च गौतमीये॥ ऋषिः प्रजापतिश्छन्दो
गायत्री देवता पुनः॥ अर्द्धलक्ष्मीहरिः प्रोक्तः
श्रींबीजेनाङ्गकल्पनेति॥ ततो ध्यानम्॥

उद्यत्प्रद्योतनशतरुचिन्तप्तहेमावदातम्पाश्वर्धद्वन्द्वे जलधिसुतया
विश्वधात्र्या च जुष्टम्॥ नानारत्नोल्लसितविविधाकल्पमापीतवस्त्रँ
व्विष्णुँव्वन्दे दरकमलकौमोदकीचक्रपाणिम्॥ एवन्ध्यात्वा न्यसेत्।
वर्णान्मुक्त्वा सार्द्धचन्द्रानिति दर्शनात्॥ अंकेशवकृत्यैनमो ललाटे
॥ आंनारायणायकान्त्यैनमो मुखे॥ इं माधवायपुष्ट्यैनमो
दक्षनेत्रे॥ ईं गोविन्दायपुष्ट्यैनमो वामनेत्रे॥ नमः सर्वत्र॥ उं
विष्णवेधृत्यै० दक्षकर्णे॥ ऊं मधुसूदनायशान्त्यै० वामकर्णे।
ऋंत्रिविक्रमायक्रियायै० दक्षनासापुटे॥ ॠंवामनायदयायै०
वामनासापुटे। लृंश्रीधरायमेधायै० दक्षगण्डे।
लॄंहृषीकेशायदुर्गायै० वामगण्डे। एं पद्मनाभायश्रद्धायै०
ओष्ठे। ऐंदामोदरायलज्जायै० अधरे। ओंवासुदेवायलक्ष्म्यै०
ऊर्द्धदन्तपङ्क्तौ॥

p. 555) औं सङ्कर्षणायसरस्वत्यै० अधोदन्तपङ्क्तौ।

अंप्रद्युम्नायधृत्यै० मस्तके। अः-अनिरुद्धायरत्यै० मुखे॥

कंचक्रिणेजयायै०, खंगदिनेदुर्गायै०, गंशार्ङ्गिणेप्रभायै०,

घंखड्गिनेसत्यायै०, ङंशङ्खिनेचन्द्रायै०

दक्षकरमूलसन्ध्यग्रकेषु॥ चंहलिनेवाण्यै०,

छंमुसलिनेविलासिन्यै०, जंशूलिनेविजयायै०, झंपाशिनेविरजायै०,

ञं-अङ्कुशिनेबिम्बायै०, वामकरमूलसन्ध्यग्रकेषु॥

टंमुकुन्दाय विनदायै०, ठंनन्दजाय सुनन्दायै०,

डंनन्दिनेस्मृत्यै०, ढंनरायऋच्यै०, णंनरकजितेसमृच्यै०

दक्षपादमूलसन्ध्यग्रकेषु॥ तंहरयेशुच्यै०,

थंकृष्णायबृच्यै०, दंसत्यायभूम्यै०, धंसात्वतायमत्यै०,

नंसौराष्ट्रायक्षमायै० वामपादमूलसन्ध्यग्रकेषु॥

पंशूराय रमायै० दक्षपार्श्वे॥ फंजनार्द्दनाय उमायै०,

वामपार्श्वे। बंभूधराय क्लेदिन्यै० पृष्ठे। भंविश्वमूर्त्तये

क्लिन्नायै० नाभौ। मंवैकुण्ठायवसुदायै० उदरे। यं त्वगात्मने

पुरुषोत्तमायवसुधायै० हृदि। रं असृगात्मनेबलिनेपरायै०

दक्षांसे। लंमांसात्मनेवालानुजायपरायणायै० ककुदि।

वंमद-आत्मनेबलायसूक्ष्मायै० वामांसे। शं-

अस्थ्यात्मनेवृषघ्नायसंघायै० हृदादिदक्षकरे।

षंमज्जात्मनेवृषायप्रज्ञायै० हृदादिबामकरे॥

संशुक्लात्मनेहंसायप्रभायै० हृदादिदक्षपादे।

हंप्राणात्मनेवराहायनिशायै० हृदादिवामपादे।
लंजीवात्मनेविमलाय-अमोघायै० हृदाद्युदरे। क्षंक्रोधात्मने
नृसिंहायविद्युतायै० हृदादिमुखे॥ तथा च गौतमीये॥
केशवादिरयन्न्यासो न्यासमात्रेण देहिनाम्॥ अच्युतत्वन्ददात्येव
सत्यं सत्यन्न संशयः॥ मातृकार्णं समुच्चार्य केशवाय इति
स्मरेत्॥ कीर्त्त्यै च नमसायुक्तमित्यादि न्यासमाचरेत्॥ केशवाय ततः
कीर्त्त्यै कान्त्यै नारायणाय च॥ इत्याद्यगस्त्यसंहितावचनाच्चायं
क्रमः॥ न तु केशवकीर्त्तिभ्यान्नम इत्यादि॥ तथा
भुक्तिमुक्तिमिच्छताऽयन्न्यासः कर्त्तव्यः श्रीबीजादि॥

p. 556) यथा --॥

श्रीं अं केशवायकीर्त्यैनम इत्यादि॥ अथोपचारक्रमेण पूजा॥
अथावाहनम्॥ यस्य दर्शनमिच्छन्ति देवाः स्वाभीष्टसिद्धये॥
कृपया देवदेवेश मदग्रे सन्निधीभव॥ यस्य ते परमेशान
स्वागतं स्वागतम्प्रभो॥ कृतार्थोनुगृहीतोऽस्मि सफलञ्जीवनम्मम
॥ यदागतोऽसि देवेश चिदानन्दमयाव्यय॥ अज्ञानाद्वा प्रमादाद्वा
वैकल्पात्साधकस्य च। यदपूर्णम्भवेत्कृत्यन्तथाप्यभिमुखोभव॥
इत्यावाहनम्॥ अथ पाद्यम्॥
यद्भक्तिलेशसम्पर्क्कात्परमानन्दसम्भवः॥ तस्मै ते परमेशान

पाद्यं शुद्धाय कल्पये॥ इति पाद्यम्॥

अथाचमनम्॥

देवानामपि देवाय देवानान्दैवताय च।
आचामङ्कल्पयामीश स्वधया शुद्धिहेतवे॥ इत्याचमनम्॥

अथाग्घ्र्यम्॥

तापत्रयहरन्दिव्यम्परमानन्दलक्षणम्॥
तापत्रयविमोक्षाय तवाग्घ्र्यङ्कल्पयाम्यहम्॥ इत्यग्घ्र्यम्॥

अथ मधुपर्कम्॥

सर्वकाद्दष्यहीनाय परिपूर्णसुधात्मकम्।
मधुपर्कमिमन्देव कल्पयामि प्रसीद मे॥ इति मधुपर्कम्॥

अथ पुनराचमनीयम्॥

उच्छिष्टोप्यशुचिर्वापि यस्य स्मरणमात्रतः।

शुद्धिमाप्नोति तस्मै ते पुनराचमनन्त्विदम्॥ इति पुनराचमनीयम्॥

अथाभ्यङ्गम्॥

गन्धतैलङ्गृहीत्वा पठेत्। स्नेहङ्गृहाण स्नेहेन लोकनाथ महाशय
॥ सर्वलोकेषु शुद्धात्मन्ददामि स्नेहमुत्तमम्॥ इत्यभ्यङ्गम्॥

अथस्नानम्॥ ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।
स भूमिं सर्वतस्स्पृत्वात्यतिष्ठद्दशाङ्गुलम्॥ १॥

पुरुष एवेदं सर्व य्यद्भूतँय्यच्च भाव्यम्।
उतामृतत्त्वस्येशानो यदन्नेनातिरोहति॥ २॥

एतावानस्य महिमातो ज्यायाँह्च पूरुषः।
पादोस्य विश्वा भूतानि त्रिपादस्यामृतन्दिवि॥ ३॥

त्रिपादूर्द्ध ऽ-उदैत्पुरुषः पादोऽस्येहाभवत्पुनः।
ततो विष्वङ्व्यक्रामत्साशनानशनेऽ-अभि॥ ४॥

p. 557) ततो व्विराडजायत व्विराजो ऽ-अधि पूरुषः।

स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः॥ ५॥

तस्माद्यज्ञात्सर्वहुतः सम्भृतम्पृषदाज्यम्।
पशूँताँह्चक्रे वायव्यानारण्या ग्ग्राम्याश्च ये॥ ६॥

तस्माद्यज्ञात्सर्वहुत ऽ-ऋचः सामानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत॥ ७॥

तस्मादश्वा ऽ-अजायन्त ये के चोभयादतः।
गावो ह जज्ञिरे तस्मात्तस्माज्जाता ऽ-अजावयः॥ ८॥

तँय्यज्ञम्बर्हिषि प्रौक्षन्पुरुषञ्जातमग्रतः।
तेन देवा ऽ-अयजन्त साद्ध्या ऽ-ऋषयश्च ये॥ ९॥

यत्पुरुषँव्व्यदधुः कतिधा व्यकल्पयन्।
मुखङ्किमस्यासीत्किम्बाहू किमूरू पादा ऽ-उच्येते॥ १०॥

ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्याँशूद्रो ऽ-अजायत॥ ११॥

चन्द्रमा मनसो जातश्चक्षोः सूर्यो ऽ-अजायत।

श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत॥ १२॥

नाब्म्याऽ-आसीदन्तरिक्षं शीष्ण्णों द्यौः समवर्त्तत।

पद्भ्याम्भूमिर्द्दिशः श्रोत्रात्तथा लोकाँ२॥ ऽ-अकल्पयन्॥ १३॥

यत्पुरुषेण हविषा देवा यज्ञमतन्वत।

वसन्तोऽस्यासीदाज्यङ्ग्रीष्म ऽ-इध्मः शरद्धविः॥ १४॥

सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः।

देवा यद्यज्ञन्तन्वाना ऽ-अबध्नन्पुरुषम्पशुम्॥ १५॥

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।

ते ह नाकम्महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः॥ १६॥

अथ तान्त्रिकमन्त्राः

परमानन्दबोधाब्धिनिमग्ननिजमूर्त्तये।

साङ्गोपाङ्गमिदं स्नानङ्कल्पयाम्यहमीश ते॥ इति स्नानम्॥

अथ वासः॥

मायाँव्विना न ते जन्म निजगूहोरुतेजसे।
निरावरणविज्ञाय वासस्ते कल्पयाम्यहम्॥ इति वासः॥

यमाश्रित्य महामाया जगत्संमोहिनी तु सा।
तस्मै ते परमेशान कल्पयाम्युत्तरीयकम्॥

p. 558) अथ यज्ञसूत्रम्॥

यस्य शक्तित्रयेणेदं सम्प्रोक्तमखिलञ्जगत्॥ यज्ञसूत्राय तस्मै ते
यज्ञसूत्रम्प्रकल्पयेत्॥ इति यज्ञसूत्रम्॥ अथ भूषणम्॥
स्वभावसुन्दराङ्गाय सत्यासत्याश्रयाय ते॥ भूषणानि विचित्राणि
कल्पयामि सुरार्च्चित॥ इति भूषणम्॥

अथ जलम्

समस्तदेवदेवेश सर्वतृप्तिकरम्परम्॥
अखण्डानन्दसम्पूर्णङ्गृहाण जलमुत्तमम्॥ इति जलम्॥

अथ गन्धम्

परमानन्दसौरभ्यपरिपूर्णदिगन्तरम्।
गृहाण परमङ्गन्धं कृपया परमेश्वर॥ इति गन्धम्॥

अथ पुष्पम्

तुरीयगुणसम्पन्न-नानागुणमनोहरम्।
आनन्दसौरभम्पुष्पं गृह्यतामिदमुत्तमम्॥ इति पुष्पम्॥

अथ धूपः

वनस्पतिरसोत्पन्नो गन्धाढ्यो गन्ध उत्तमः।
आघ्रेयः सर्वदेवानान्धूपोऽयम्प्रतिगृह्यताम्॥ इति धूपः॥

अथ दीपः

सुप्रकाशो महादीपः सर्वतस्तिमिरापहः।
सबाह्याभ्यन्तरज्योतिर्दीपोयम्प्रतिगृह्यताम्॥ इति दीपः॥

अथ नैवेद्यम्

सत्पात्रसिद्धं स हविर्विविधानेकभक्षणम्।
निवेदयामि देवेश सानुगाय गृहाण तत्॥ इति नैवेद्यम्॥

अथाचमनार्त्थजलम्

समस्तदेवदेवेश सर्वज्ञप्तिकरम्परम्।
अखण्डानन्दसम्पूर्णं गृहाण जलमुत्तमम्॥ इति जलम्॥

अथ ताम्बूलम्

ताम्बूलञ्च वरन्दिव्यङ्कर्पूरादि सुवासितम्।
मयानिवेदितम्भक्त्या गृहाण परमेश्वर॥ इति ताम्बूलम्॥

इति पूजा

अथ स्तोत्रम्

आदाय वेदान्सकलान्समुद्रान्निहत्य चोन्मथ्य मधुं ह्युदग्रम्।
दत्ताः पुरा येन पितामहाय विष्णुन्तमाद्यम्भज मत्स्यरूपम्॥ १॥

दिव्यामृतार्त्थम्मथिते महाब्धौ देवासुरैर्वासुकिमन्दराभ्याम्।
भूमेर्महावेगविधूर्णितायान्तङ्कूर्ममाधारगतन्नमामि॥ २॥

समुद्रकाञ्चीसरिदुत्तरीया वसुन्धरामेरुकिरीटभारा।
दंष्ट्रागतो येन समुद्धृताऽभूत्तमादिकोलं शरणम्प्रपद्ये॥ ३॥

p. 559) भक्तार्त्तिभङ्गक्षमयाधिपाय स्तम्भान्तरालादुदितो
नृसिंहः।
रिपुं सुराणान्निशितैर्न्नखाग्रैर्विदारयन्तन्न च विस्मरामि॥ ४॥

चतुस्समुद्राभरणाधरित्रीन्यासाय नालञ्चरणस्य यस्य।
एकस्य नान्यस्य पदं सुराणान्त्रिविक्रमं सर्वगतन्नमामि॥ ५॥

त्रिस्सप्तकृत्वो नृपतीन्निहत्य यस्तर्पणं रक्तमयम्पितृभ्यः।
चकार दोर्द्दण्डबलेन सम्यक्तमादिशूरम्प्रणमामि रामम्॥ ६॥

कुले रघूणां समवाप्य जन्म विधाय सेतुञ्जलधेर्जलान्तः।

लङ्केश्वरँय्यः शमयाञ्चकार सीतापतिन्तम्प्रणमामि भक्त्या॥ ७॥

हलेन सर्वानसुरान्निकृष्य चकार चूर्णम्मुसलप्रहारैः।
यः कृष्णमासाद्य बलम्बलीयान्भक्त्या भजे तम्बलभद्रराम्॥ ८॥

पुरा सुराणामसुरान्विजेतुं सम्भावयच्छ्रीवरचिह्नवेषम्।
चकार यः शास्त्रममोघकल्पन्तम्मूलभूतम्प्रणतोऽस्मि बुद्धम्॥
९॥

कल्पावसाने निखिलैः सुरैस्स्वैस्सङ्घट्टयामास निमेषमात्रात्।
यस्तेजसा स्वेन ददाह भीमो विश्वात्मकन्तन्तुरगम्भजामः॥ १०॥

शङ्खं सुचक्रं सुगदां
सरोजन्दोर्भिर्द्दधानङ्गरुडाधिरूढम्।
श्रीवत्सचिह्नञ्जगदादिमूलन्तमालनीलं हृदि विष्णुमीडे॥ ११॥

क्षीराम्बुधौ शेषविशेषतल्पे शयानमन्तःस्मितशोभिवक्त्रम्।
उत्फुल्लनेत्राम्बुजमम्बुदाम्भसामाद्यं श्रुतीनामसकृत्स्मरामि॥
१२॥

प्रीणयेदनया स्तुत्या जगन्नाथञ्जगन्मयम्।
धर्मार्त्थकाममोक्षाणामाप्तये पुरुषोत्तमम्॥ १३॥

इति श्रीविष्णुस्तोत्रं समाप्तम्॥

अथ कवचम्

श्रीनारद उवाच

भगवन्सर्वधर्मज्ञ कवचँय्यत्प्रकाशितम्।
त्रैलोक्यमङ्गलन्नाम कृपया कथय प्रभो॥ १॥

सनत्कुमार उवाच

शृणु वक्ष्यामि विप्रेन्द्र कवचम्परमाद्भुतम्।
नारायणेन कथितं कृपया ब्रह्मणे पुरा॥ २॥

p. 560) ब्रह्मणा कथितम्मह्यम्परं स्नेहाद्ददामि ते।
अतिगुह्यतरन्तत्त्वम्ब्रह्ममन्त्रौघविग्रहम्॥ ३॥

यद्धृत्वा पठनाद्ब्रह्मा सृष्टिं व्वितनुते ध्रुवम्।
यद्धृत्वा पठनात्पाति महालक्ष्मीर्ज्जगत्त्रयम्॥ ४॥

पठनाद्धारणाच्छम्भुः संहर्त्ता सर्वमन्त्रवित्।
त्रैलोक्यजननी दुर्गा महिषादिमहासुरान्॥ ५॥

वरदृप्ताञ्जघानैव पठनाद्धारणाद्यतः।
एवमिन्द्रादस्सर्वे सर्वैश्वर्यमवाप्नुयुः॥ ६॥

इदङ्कवचमत्यन्तगुप्तङ्कुत्रापि नो वदेत्।
शिष्याय भक्तियुक्ताय साधकाय प्रकाशयेत्॥ ७॥

शठाय परशिष्याय दत्त्वा मृत्युमवाप्नुयात्।
त्रैलोक्यमङ्गलस्यास्य कवचस्य प्रजापतिः॥ ८॥

ऋषिश्छन्दश्च गायत्री देवो नारायणः स्वयम्।
धर्मार्त्थकाममोक्षेषु विनियोगः प्रकीर्त्तितः॥ ९॥

प्रणवो मे शिरः पातु नमो नारायणाय च।

भालम्मे नेत्रयुगलमष्टार्णो भक्तिमुक्तिदः॥ १०॥

क्लीम्पायाच्छ्रोत्रयुग्मञ्चैकाक्षरस्सर्वमोहनः।
क्लींकृष्णाय सदा घ्राणङ्गोविन्दायेति जिह्विकाम्॥
गोपीजनपदँव्वल्लभाय स्वाहाननम्मम॥ ११॥

अष्टादशाक्षरो मन्त्रः कंठम्पातु दशाक्षरः॥ १२॥

गोपीजनपदँव्वल्लभाय स्वाहा भुजद्वयम्।
क्लींग्लौंक्लींश्यामलाङ्गाय नमः स्कन्धौ दशाक्षरः॥ १३॥

क्लींकृष्णः क्लीं करौ पायात्क्लींकृष्णायाङ्गतोऽवतु।
हृदयम्भुवनेशानी क्लींकृष्णाय क्लीं स्तनौ मम॥ १४॥

गोपालायाग्निजायान्तङ्कुक्षियुग्मं सदावतु।
क्लींकृष्णाय सदा पातु पार्श्वयुग्ममनुत्तमः॥ १५॥

कृष्णगोविन्दकौ कट्यां स्मराद्यौ ङेयुतौ मनुः।
अष्टाक्षरः पातु नाभिं कृष्णेति द्व्यक्षक्षरोऽवतु॥ १६॥

पृष्ठं क्लींकृष्णकङ्कालं क्लींकृष्णाय द्विठान्तकः।
सक्थिनी सततम्पातु श्रींह्रींक्लीं कृष्ण ठद्वयम्॥ १७॥

ऊरूसप्ताक्षरः पायात्त्रयोदशाक्षरोऽवतु।
श्रींह्रींक्लींपदतो गोपीजनवल्लभ दन्ततः॥ १८॥

p. 561) भाय स्वाहेति पायुं वै क्लींह्रींश्रीं सदशार्णकः।
जानुनी च सदा पातु ह्रींश्रींक्लीं च दशाक्षरः॥ १९॥

त्रयोदशाक्षरः पातु जङ्घे चक्राद्युदायुधः।
अष्टादशाक्षरो ह्रींश्रींपूर्वको विंशदर्णकः॥ २०॥

सर्वाङ्गम्मे सदा पातु द्वारकानायको बली।
नमो भगवते पश्चाद्वासुदेवाय तत्परम्॥ २१॥

ताराद्यो द्वादशार्णोऽयम्प्राच्याम्मां सर्वदाऽवतु।
श्रींह्रींक्लीं च दशार्णस्तु क्लींह्रींश्रीं षोडशार्णकः॥ २२॥

गदाद्युदायुधो विष्णुम्माममग्नेर्दिशि रक्षतु।
ह्रींश्रीं दशाक्षरो मन्त्रो दक्षिणे मां सदाऽवतु॥ २३॥

तारो नमो भगवते रुक्मिणीवल्लभाय च।
स्वाहेति षोडशार्णोऽयन्नैर्ऋत्यान्दिशि रक्षतु॥ २४॥

क्लींहृषीकेशदेशाय नमो माँवारुणेऽवतु।
अष्टदशार्णः कामान्तो वायव्ये मां सदावतु॥ २५॥

श्रींमायाकामकृष्णाय ह्रींगोविन्दाय द्विठो मनुः।
द्वादशार्णात्मको विष्णुरुत्तरे मां सदावतु॥ २६॥

वाग्भावङ्कामं कृष्णाय ह्रींगोविन्दाय तत्परम्।
श्रींगोपीजनवल्लभान्ते भाय स्वाहा हृसौस्ततः॥ २७॥

द्वाविंशत्यक्षरो मन्त्रो मामैशान्ये सदावतु।
कालियस्य फणामध्ये दिव्यन्नृत्यङ्करोति तम्॥ २८॥

नमामि देवकीपुत्रन्नृत्यराजानमच्युतम्।
द्वात्रिंशदक्षरो मन्त्रोऽप्यधो मां सर्वदावतु॥ २९॥

कामदेवाय विद्महे पुष्पबाणाय धीमहि।

तन्नोऽनङ्गः प्रचोदयादेषा माम्पातु चोर्द्धतः॥ ३०॥

इति ते कथितँव्विप्र ब्रह्ममन्त्रौघविग्रहम्।
त्रैलोक्यमङ्गलन्नाम कवचम्ब्रह्मरूपकम्॥ ३१॥

ब्रह्मणा कथितम्पूर्वन्नारायणमुखाच्च्युतम्।
तव स्नेहान्ममाऽख्यातम्प्रवक्तव्यन्न कस्यचित्॥ ३२॥

गुरुम्प्रणम्य विधिवत्कवचम्प्रपठेत्ततः।
सकृद्विस्त्रिर्यथाज्ञानं सोऽपि सर्वतपोमयः॥ ३३॥

मन्त्रेषु सकलेष्वेव देशिको नात्र संशयः।
शतमष्टोत्तरञ्चास्य पुरश्चर्याविधिः स्मृतः॥ ३४॥

p. 562) हवनादीन्दशांशेन कृत्वा तत्साधयेद्ध्रुवम्।
यदि स्यात्सिद्धकवचो विष्णुरेव भवेत्स्वयम्॥ ३५॥

मन्त्रसिद्धिर्भवेत्तस्य पुरश्चर्याविधानतः।
स्पर्द्धामुद्भूय सततँलक्ष्मीर्वाणी वसेत्ततः॥ ३६॥

पुष्पाञ्जल्यष्टकन्दत्वा मूलेनैव पठेत्सकृत्।
दशवर्षसहस्राणाम्पूजायाः फलमाप्नुयात्॥ ३७॥

भूर्जे विलिख्य गुटिकां स्वर्णस्थान्धारयेद्यदि।
कण्ठे वा दक्षिणे बाहौ सोऽपि विष्णुर्न्न संशयः॥ ३८॥

अश्वमेधसहस्राणि वाजपेयशतानि च।
महादानादि यान्येव प्रादक्षिण्यम्भुवस्तथा॥ ३९॥

कलान्नार्हन्ति तान्येव सकृदुच्चारणात्ततः।
कवचस्य प्रसादेन जीवन्मुक्तो भवेन्नरः॥ ४०॥

त्रैलोक्यङ्क्षोभयत्येव त्रैलोक्यविजयी भवेत्।
इदङ्कवचमज्ञात्वा यजेद्यः पुरुषोत्तमम्॥
शतलक्षप्रजप्तोऽपि न मन्त्रस्तस्य सिद्ध्यति॥ ४१॥

इति कवचं समाप्तम्॥

अथ हृदयम्

आचम्य प्राणानायम्य देशकालौ स्मृत्वा ममाभीष्टसिद्ध्यर्थं
सङ्कल्पीकरणरीत्या सम्पूटीकरणरीत्या वा नारायणहृदयस्य
सकृदावर्त्तनङ्करिष्ये॥

अस्य श्रीनारायणहृदयस्तोत्रमन्त्रस्य, भार्ग्गवऋषिः, अनुष्टुप्छन्दः,
श्रीलक्ष्मीनारायणो देवता, ॐबीजम्, नमः शक्तिः, नारायणायेति
कीलकम्, श्रीलक्ष्मीनारायणप्रीत्यर्थे जपे विनियोगः॥

ॐ नारायणः परज्योतिरित्यङ्गुष्ठाभ्यान्नमः,
ॐ नारायणः परब्रह्मेति तर्ज्जनीभ्यां,
ॐ नारायणः परो देव इतिमध्यमाभ्यां,
ॐ नारायणः परो ध्यातेति अनामिकाभ्या०,
ॐ नारायणः परन्धामेति कनि०, ॐ नारायणः परो धर्म इति
करतलकर०, एवं हृदयादि॥ अथ दिग्बन्धः॥ ॐ ऐंद्र्यादि दश दिशम्
॥ ॐ नमः सुदर्शनाय सहस्राराय हूम्फट् बध्नामि नमश्चक्राय
स्वाहा इति प्रतिदिशं योज्यम्॥

p. 563) अथ ध्यानम्॥ उद्यदादित्यसङ्काशम्पीतवाससमच्युतम्।
शङ्खचक्रगदापाणिन्ध्यायेल्लक्ष्मीपतिं हरिम्।

ॐ नमो नारायणाय इति जपः॥ अथ मूलाष्टकम्॥

ॐ नारायणः परञ्ज्योतिरात्मा नारायणः परः॥

नारायणः परब्रह्म नारायण नमोस्तु ते॥ १॥

नारायणः परो देवो दाता नारायणः परः।
नारायणः परो ध्याता नारायण नमोऽस्तु ते॥ २॥

नारायणः परन्धाम ध्यानन्नारायणः परः।
नारायणः परो धर्म्मो नारायण नमोऽस्तु ते॥ ३॥

नारायणपरो वेदो विद्या नारायणः परा।
विश्वन्नारायणस्साक्षान्नारायण नमोऽस्तु ते॥ ४॥

नारायणाद्विधिर्ज्जातो जातो नारायणाच्छिवः।
जातो नारायणादिन्द्रो नारायण नमोऽस्तु ते॥ ५॥

रविर्न्नारायणन्तेजश्चान्द्रन्नारायणम्महः।

वह्निर्नारायणः साक्षान्नारायण नमोऽस्तु ते॥ ६॥

नारायण उपास्यः स्याद्गुरुर्नारायणः परः।
नारायणः परो बोधो नारायण नमोऽस्तु ते॥ ७॥

नारायणः फलम्मुख्यं सिद्धिर्नारायणः सुखम्।
सेव्यो नारायणश्शुद्धो नारायण नमोऽस्तु ते॥ ८॥

इति मूलाष्टकम्॥ अथ प्रार्थनादशकम्॥

नारायणस्त्वमेवासि दहराख्ये हृदि स्थितः।
प्रेरकः प्रेर्यमाणानान्त्वया प्रेरितमानसः॥ १॥

त्वदाज्ञां शिरसा धृत्वा जपामि जनपावनम्।
नानोपासनमार्गाणाम्भावहृद्भावबोधकः॥ २॥

भावार्थकृद्भावभूतो भावसौख्यप्रदो भव।
त्वन्मायामोहितँव्विश्वन्त्वयैव परिकल्पितम्॥ ३॥

त्वदधिष्ठानमात्रेण सैषा सर्वार्थकारिणी।

त्वमेव ताम्पुरस्कृत्य मम कामान्समर्प्पय॥ ४॥

न मे त्वदन्यस्त्राताास्ति त्वदन्यन्न हि दैवतम्।
त्वदन्यन्न हि जानामि पालकम्पुण्यरूपकम्॥ ५॥

यावत्सांसारिको भावो मनःस्थो भावनात्मकः।
p. 564) तावत्सिद्धिर्भवेत्साध्या सर्वथा सर्वदा विभो॥ ६॥

पापिनामहमेवाग्र्यो दयाद्द नान्त्वमग्रणीः।
दयनीयो मदन्योऽस्ति तव कोऽत्र जगत्त्रये॥ ७॥

त्वयाप्यहन्न सृष्टश्चेन्न स्यात्तव दयाद्द ता।
आमयो नैव सृष्टश्चेदौषधस्य वृथोदयः॥ ८॥

पापसङ्घपरिक्रान्तः पापात्मा पापरूपधृक्।
त्वदन्यः कोऽत्र पापेभ्यस्त्राता मे जगतीतले॥ ९॥

त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव।
त्वमेव विद्या च गुरुस्त्वमेव त्वमेव सर्वम्मम देवदेव॥ १०॥

प्रार्थनादशकञ्चैव मूलाष्टकमुदाहृतम्।
यः पठेच्छृणुयान्नित्यं तस्य लक्ष्मीः स्थिरा भवेत्॥ ११॥

नारायणस्य हृदयं सर्वाभीष्टफलप्रदम्।
लक्ष्मीहृदयकं स्तोत्रँय्यदि चेत्तद्विना कृतम्॥ १२॥

तत्सर्वन्निष्फलम्प्रोक्तँलक्ष्मीः क्रुध्यति सर्वदा।
एतत्सङ्कलितं स्तोत्रं सर्वकर्मफलप्रदम्॥ १३॥

लक्ष्मीहृदयकञ्चैव तथा नारायणात्मकम्।
जपेद्यः सङ्कलीकृत्य सर्वाभीष्टमवाप्नुयात्॥ १४॥

नारायणस्य हृदयमादौ जप्त्वा ततः परम्।
लक्ष्मीहृदयकं स्तोत्रञ्जपेन्नारायणम्पुनः॥ १५॥

पुनर्न्नारायणञ्जप्त्वा पुनर्ल्लक्ष्मीकृतञ्जपेत्।
पुनर्न्नारायणञ्जाप्यं सङ्कलीकरणम्भवेत्॥ १६॥

एवम्मध्ये द्विवारेण जपेत्सङ्कलितं हि तत्।
लक्ष्मीहृदयकं स्तोत्रं सर्वकामप्रकाशितम्॥ १७॥

तद्वज्जपादिकङ्कुर्यादेतत्सङ्कलितं शुभम्।
सर्वान्कामानवाप्नोति आधिव्याधिभयं हरेत्॥ १८॥

गोप्यमेतत्सदा कुर्यान्न सर्वत्र प्रकाशयेत्।
इति गुह्यतमं शास्त्रम्प्राप्तम्ब्रह्मादिकैः पुरा॥ १९॥

तस्मात्सर्वप्रयत्नेन गोपयेत् साधयेत्सुधीः।
यत्रैतत्पुस्तकन्तिष्ठेल्लक्ष्मीनारायणात्मकम्॥ २०॥

भूतपैशाचवेताला न स्थिरास्तत्र सर्वदा।
लक्ष्मीहृदयकम्प्रोक्तँव्विधिना साधयेत्सुधीः॥ २१॥

भृगुवारे च रात्रौ च पूजयेत्पुस्तकद्वयम्।
सर्वस्वं सर्वदा सत्यङ्गोपयेत्साधयेत्सुधीः॥ २२॥

p. 565) गोपनात्साधनाल्लोके धन्यो भवति तत्त्वतः॥ २३॥

इत्यथर्वणरहस्ये उत्तरभागे श्रीनारायणहृदयं सम्पूर्णम्॥

अथोपनिषत्

कश्यप उवाच

एकशृङ्ग वृषसिन्धो वृषाकपे सुरवृष अनादिसम्भव रुद्र कपिल
विष्वक्सेन सर्वभूतपते ध्रुवधर्म वैकुण्ठ वृषावर्त्त
अनादिमध्यनिधन धनञ्जय शुचिश्रवः पृश्निंतेजः निजजय
अमृतशय सनातन त्रिधामन् तुषित महातत्त्व लोकनाथ पद्मनाभ
विरञ्च बहुरूप अक्षय अक्षर हव्यभुक् खण्डपरशो शक्र
मुञ्जकेश हंस महादक्षिण हृषीकेश सूक्ष्म महानियमधर
विरजः लोकप्रतिष्ठ अरूप अग्रज धर्मज धर्मनाभ हव्यभुक्
गभस्तिनाथ शतक्रतुनाथ चन्द्ररथ सूर्यतेजः समुद्रवासः अज
सहस्रशिरः सहस्रपाद अयोमुख महापुरुष पुरुषोत्तम सहस्रबाहो
सहस्रमूर्त्ते सहस्रास्य सहस्रसम्भव विश्वन्त्वामाहुः॥

पुष्पहासचरम त्वमेव वौषट् वषट्कारस्त्वामाहुरम्यमखेषु
प्रशितारम्॥

शतधारं सहस्रधारं बभूव॥

भूवन्द्य भूनाथ भृगुपुत्र वेदवेद्य ब्रह्मशय ब्राह्मणप्रिय

त्वमेव द्यौरसि मातरिश्वासि धर्मोसि होता पोता हन्ता मन्ता नेता

होमहेतुस्त्वमेव॥

अग्र्यश्च धान्नां त्वमेव ऋग्भिः सुभाण्ड इज्योऽसि सुमेधोसि

समिधस्त्वमेव मतिर्गतिर्द्दाता त्वमसि मोक्षोऽसि योगोऽसि सृजसि धाता

परमयज्ञोऽसि सोमोसि दीक्षितोऽसि दक्षिणासि विश्वमसि॥

स्थविर हिरण्यगर्ब्भ नारायण त्रिनयन आदिवर्ण आदित्यतेजः

महापुरुष पुरुषोत्तम आदिदेव भूमिक्रम त्रिविक्रम प्रभाकर

शम्भो स्वयम्भू भूतादिमहाभूतोऽसि॥ विश्वभूत विश्वं

त्वमेव विश्वगोप्तासि पवित्रमसि विश्वभव ऊर्द्धकर्मन् अमृत

दिवस्पते वाचस्पते घृतार्च्चे अनन्तकर्म वंशप्राग्वंशधीः

त्वमश्वमेधः वरार्त्थिनाँव्वरदोऽसि त्वम्॥

p. 566) चतुर्ब्भिश्च चतुर्ब्भिश्च द्वाभ्याम्पञ्चभिरेव च। हूयते च

पुनर्द्वाभ्यान्तुभ्यं होत्रात्मने नमः॥ इत्युपनिषत्समाप्ता॥

अथाष्टोत्तरशतनाम

अष्टोत्तरशतन्नाम्नाँव्विष्णोरतुलतेजसः।
यस्य श्रवणमात्रेण नरो नारायणो भवेत्॥ १॥

विष्णुर्ज्जिष्णुर्वषट्कारो देवदेवो वृषाकपिः।
दामोदरो दीनबन्धुरादिदेवो दितेस्सुतः॥ २॥

पुण्डरीकः परानन्दः परमात्मा परात्परः।
परशुधारी विश्वात्मा कृष्णः कालीमलापहः॥ ३॥

कौस्तुभोद्भासितोरस्को नरो नारायणो हरिः।
हरो हरप्रियः स्वामी वैकुण्ठो विश्वतोमुखः॥ ४॥

हृषीकेशोऽप्रमेयात्मा वराहो धरणीधरः।
वामनो वेदवक्ता च वासुदेवस्सनातनः॥ ५॥

रामो विरामो विरजो रावणारी रमापतिः।
वैकुण्ठवासी वसुमान् धनदो धरणीधरः॥ ६॥

धर्मेशो धरणीनाथो ध्येयो धर्मभृताँवरः।

सहस्रशीर्षापुरुषः सहस्राक्षस्सहस्रपात्॥ ७॥

सर्वगः सर्ववित्सर्वः शरण्यः साधुवल्लभः।
कौसल्यानन्दनश्श्रीमान्क्षःकुलविनाशकः॥ ८॥

जगत्कर्त्ता जगद्धर्त्ता जगज्जेता जनार्त्तिहा।
जानकीवल्लभो देवो देवो जयरूपो जलेश्वरः॥ ९॥

क्षीराब्धिवासी क्षीराब्धितनयावल्लभस्तथा।
शेषशायी पन्नगारिवाहनो विष्टरश्रवाः॥ १०॥

माधवो मथुरानाथो मोहदो मोहनाशनः।
दैत्यारिः पुण्डरीकाक्षो ह्यच्युतो मधुसूदनः॥ ११॥

सोमसूर्याग्निनयनो नृसिंहो भक्तवत्सलः।
नित्यो निरामयश्शुद्धो नरदेवो जगत्प्रभुः॥ १२॥

हयग्रीवो जितरिपुरुपेन्द्रो रुक्मिणीपतिः।
सर्वदेवमयः श्रीशः सर्वाधारः सनातनः॥ १३॥

सौम्यः सौम्यप्रदः स्रष्टा विष्वक्सेनो जनार्द्दनः।
यशोदातनयो योगी योगशास्त्रपरायणः॥ १४॥

रुद्रात्मको रुद्रमूर्त्तीं राघवो मधुसूदनः।
इति ते कथितन्दिव्यन्नाम्नामष्टोत्तरं शतम्॥ १५॥

p. 567) सर्वपापहरम्पुण्यँव्विष्णोरमिततेजसः।
दुःखदारिद्र्यदौर्भाग्यनाशनं सुखवर्द्धनम्॥ १६॥

सर्वसम्पत्करं सौम्यम्महापातकनाशनम्।
प्रातरुत्थाय विप्रेन्द्र पठेदेकाग्रमानसः॥ १७॥
तस्य नश्यन्ति विपदां राशयः सिद्धिमाप्नुयात्॥ १७॥

इत्यष्टोत्तरशतनामस्तोत्रं सम्पूर्णम्॥

अथ सहस्रनाम

श्रीमहादेव उवाच

ब्रह्महत्यासहस्राणाम्पापं शाम्येत्कथञ्चन।
न पुनस्त्वय्यविज्ञाते कल्पकोटिशतैरपि॥ १॥

यस्मान्मया कृता स्पर्द्धा पवित्रं स्यात्कथं हरे।
नश्यन्ति सर्वपापानि तन्मां वद सुरेश्वर॥ २॥

तदाह देवो गोविन्दो मम प्रीत्या यथायथम्॥ ३॥

श्रीभगवानुवाच

सदा नाम सहस्रम्मे पावनम्मत्पदावहम्।
तत्परोऽनुदिनं शम्भो सर्वैश्वर्यँय्यदीच्छसि॥ ४॥

श्रीमहादेव उवाच

तमेव तपसा नित्यम्भजामि स्तौमि चिन्तये। तेनाद्वितीयमहिमो
जगत्पूज्योऽस्मि पार्वति॥ ५॥

श्रीपार्वत्युवाच

तन्मे कथय देवेश यथाह मयी शङ्कर।
शर्वेश्वरी निरुपमा तव स्यां सदृशी प्रभो॥ ६॥

श्रीमहादेव उवाच

साधु साधु त्वया पृष्टो विष्णोर्भगवतश्शिवे।
नाम्नां सहस्रँव्वक्ष्यामि मुख्यन्त्रैलोक्यमङ्गलम्॥ ७॥

नारायणाय पुरुषोत्तमाय च नमो महात्मने।
विशुद्धसद्माधिष्ठाय महाहंसाय धीमहि॥ ८॥

ॐ अस्य श्रीविष्णोः सहस्रनाममन्त्रस्य महादेव ऋषिः, परमात्मा
देवता, सूर्यकोटिप्रतीकाश इतिबीजम्, गङ्गातीर्थोत्तमा शक्तिः,
प्रपन्नाशानिपञ्जर इतिकीलकम्, वासुदेवम्परम्ब्रह्म
इत्यङ्गुष्ठाभ्यान्नमः॥

मूलप्रकृतिरिति तर्ज्जनीभ्यान्नमः॥

भूमहावराह इतिमध्यमाभ्यान्नमः॥

सूर्यवंशाध्वजो राम अनामिकाभ्यान्नमः ॥

ब्रह्मादिकमलादि गदासूर्यकेशवमिति कनिष्ठाभ्यान्नमः ॥

p. 568) शेष इतिकरतलकरपृष्ठाभ्यान्नमः ॥

दिव्यास्त्र इत्यस्त्रम् ॥

सर्वपापक्षयार्त्थं सर्वाभीष्टसिद्ध्यर्त्थं ॥
श्रीविष्णोर्न्नामसहस्त्रं जपे विनियोगः ॥

अथ ध्यानम्

विष्णुं
भास्वत्किरीटाङ्गदवलयगणाकल्पहारोदराङ्घ्रिश्रोणीभूषं
सुवक्षोमणिमकरमहाकुंडलम्मण्डितांसम्।
हस्तोद्यच्चक्रशङ्खाम्बुजगदममलम्पीतकौशेयवासोविद्युद्भासं
समुद्यद्दिनकरसदृशम्पद्महस्तन्नमामि ॥ ९॥

ॐ वासुदेवः परम्ब्रह्म परमात्मा परात्परम्।

परन्धाम परञ्ज्योतिः परन्तत्त्वम्परम्पदम्॥ १०॥

परं शिवम्परो ध्येयः परं ज्ञानम्परा गतिः।

परमार्त्थः परं श्रेयः परानन्दः परोदयः॥ ११॥

परो व्यक्तः परँव्व्योम परार्द्धः परमेश्वरः।

निरामयो निर्विकारो निर्विकल्पो निराश्रयः॥ १२॥

निरञ्जनो निरालम्बो निर्ल्लेपो निरवग्रहः।

निर्गुणो निष्कलोऽनन्तोऽचिन्त्योऽसावचलोऽच्युतः॥ १३॥

अतीन्द्रियोऽमितोऽरोध्योऽनीहोऽनीशोऽव्ययोऽक्षयः।

सर्वज्ञः सर्वगः सर्वः सर्वदः सर्वभावनः॥ १४॥

सर्वश्शंभुस्सर्वसाक्षीपूज्यस्सर्वस्य सर्वदृक्।

सर्वशक्तिः सर्वसारः सर्वात्मा सर्वतोमुखः॥ १५॥

सर्वावासः सर्वरूपः सर्वादिस्सर्वदुःखहा।

सर्वार्त्थः सर्वतोभद्रः सर्वकारणकारणम्॥ १६॥

सर्वातिशायकः सर्वाध्यक्षः सर्वेश्वरेश्वरः।

षड्विंशको महाविष्णुर्महागुह्यो महाहरिः॥ १७॥

नित्योदितो नित्ययुक्तो नित्यानन्दः सनातनः।

मायापतिर्योगपतिः कैवल्यपतिरात्मभूः॥ १८॥

जन्ममृत्युजरातीतः कलातीतो भवातिगः।

पूर्णस्सत्यश्शुद्धबुद्धस्वरूपो नित्यचिन्मयः॥ १९॥

योगिप्रियो योगमयो भवबन्धैकमोचकः।

पुराणः पुरुषः प्रत्यक्चैतन्यपुरुषोत्तमः॥ २०॥

वेदान्तवेद्यो दुर्ज्ञेयस्तापत्रयविवर्जितः।

ब्रह्मविद्याश्रयोऽलङ्घ्यः स्वप्रकाशः स्वयम्प्रभः॥ २१॥

सर्वोपेय उदासीनः प्रणवस्सर्वतस्समः।

p. 569) सर्वानवद्यो दुष्प्रापस्तुरीयस्तमसः परः॥ २२॥

कूटस्थः सर्वसंश्लिष्टो वाङ्मनोगोचरातिगः।

सङ्कर्षणः सर्वहरः कालः सर्वभयङ्करः॥ २३॥

अनुल्लङ्घ्यः सर्वगतिर्म्महारुद्रो दुरासदः।
मूलप्रकृतिरानन्दः प्रज्ञाता विश्वमोहनः॥ २४॥

महामायो विश्वबीजम्परशक्तिसुखैकभुक्।
सर्वकाम्योऽनंतशीलस्सर्वभूतवशङ्करः॥ २५॥

अनिरुद्धः सर्वजीवो हृसीकेशो मनःपतिः।
निरुपाधिः प्रियो हंसोऽक्षरः सर्वनियोजकः॥ २६॥

ब्रह्माप्राणेश्वरः सर्वभूतभृद्देहनायकः।
क्षेत्रज्ञः प्रकृतिस्वामी पुरुषो विश्वसूत्रधृक्॥ २७॥

अन्तर्यामी त्रिधामाऽन्तःसाक्षी त्रिगुण ईश्वरः।
योगमृग्यः पद्मनाभः शेषशायी श्रियः पतिः॥ २८॥

श्रीसत्योपास्यपादाब्जोऽनन्तः श्रीः श्रीनिकेतनः।
नित्यवक्षःस्थलश्रीः श्रीनिधिः श्रीधरो हरिः॥ २९॥

रम्यश्रीर्न्निश्चयश्रीदो विष्णुः क्षीराब्धिमन्दिरः।
कौस्तुभोद्भासितोरस्को माधवो जगदार्त्तिहा॥ ३०॥

श्रीवत्सवक्षा निःसीमः कल्याणगुणभाजनम्।
पीताम्बरो जगन्नाथो जगद्धाता जगत्पिता॥ ३१॥

जगद्बन्धुर्ज्जगत्स्रष्टा जगत्कर्त्ता जगन्निधिः।
जगदेकस्फुरद्वीर्यो नाहँवादी जगन्मयः॥ ३२॥

सर्वाश्चर्यमयस्सर्वसिद्धार्त्थः सर्ववीरजित्।
सर्वामोघोद्यमो ब्रह्मरुद्राद्युत्कृष्टचेतनः॥ ३३॥

शम्भोः पितामहो ब्रह्मपिता शक्राद्यधीश्वरः।
सर्वदेवप्रियः सर्वदेववृत्तिरनुत्तमः॥ ३४॥

सर्वदेवैकशरणं सर्वदेवैकदैवतम्।
यज्ञभुग्यज्ञफलदो यज्ञेशो यज्ञभावनः॥ ३५॥

यज्ञत्राता यज्ञपुमान्वनमाली द्विजप्रियः।
द्विजैकमानदो हिंस्रः कुलदेवोऽसुरान्तकः॥ ३६॥

सर्वदुष्टान्तकृत्सर्वसज्जनानन्दपालकः।
सर्वलोकैकजठरः सर्वलोकैकमण्डलः॥ ३७॥

सृष्टिस्थित्यन्तकृच्चक्री शार्ङ्गधन्वा गदाधरः।
शङ्खभृन्नन्दकीपद्मपाणिर्ग्गरुडवाहनः॥ ३८॥

p. 570) अनिर्द्देश्यवपुः सर्वः सर्वलोकैकपावनः।
अनन्तकीर्त्तिर्निःश्रीशः पौरुषः सर्वमङ्गलः॥ ३९॥

सूर्यकोटिप्रतीकाशो यमकोटिविनाशनः।
ब्रह्मकोटिजगत्स्रष्टा वायुकोटिमहाबलः॥ ४०॥

कोटीन्दुजगदानन्दी शम्भुकोटिमहेश्वरः।
कुबेरकोटिलक्ष्मीवाञ्छत्रुकोटिविनाशनः॥ ४१॥

कन्दर्पकोटिलावण्यो दुर्गकोटिविमर्द्दनः।
समुद्रकोटिगम्भीरस्तीर्थकोटिसमाह्वयः॥ ४२॥

हिमवत्कोटिनिष्कम्पः कोटिब्रह्माण्डविग्रहः।

कोट्यश्वमेधपापघ्नो यज्ञकोटिसमार्च्चनः॥ ४३॥

सुधाकोटिस्वास्थ्यहेतुः कामधुक्कोटिकामदः।
ब्रह्मविद्याकोटिरूपः शिपिविष्टः शुचिश्रवाः॥ ४४॥

विश्वम्भरस्तीर्थपादः पुण्यश्रवणकीर्त्तनः।
आदिदेवो जगज्जैत्रो मुकुन्दः कालनेमिहा॥ ४५॥

वैकुण्ठोऽनन्तमाहात्म्यो महायोगीश्वरेश्वरः।
नित्यतृप्तो नृसद्भावो निःशङ्को नरकान्तकः॥ ४६॥

दीनानाथैकशरणँव्विश्वैकव्यसनापहा।
जगत्क्षमाकृतो नित्यः कृपाद्दृ ः सज्जनाश्रयः॥ ४७॥

योगेश्वरः सदोदीर्णो वृद्धिक्षयविवर्जितः।
अधोक्षजो विश्वरेताः प्रजापतिसमाधिपः॥ ४८॥

शक्रब्रह्मार्च्चितपदः शंभुब्रह्मोर्द्धधामगः।
सूर्यसोमेक्षणो विश्वभोक्ता सर्वस्य पारगः॥ ४९॥

जगत्सेतुर्द्धर्मसेतुर्द्धीरोऽरिष्टधुरन्धरः।

निर्म्ममोऽखिललोकेशो निःसङ्गोऽद्भुतभोगवान्॥ ५०॥

रम्यमायो विश्वविश्वो विष्वक्सेनो नगोत्तमः।

सर्वः श्रियः पतिर्देव्याः सर्वभूषणभूषितः॥ ५१॥

सर्वलक्षणलक्षण्यः सर्वदैत्येन्द्रदर्पहा।

समस्तदेवसर्वज्ञः सर्वदैवतनायकः॥ ५२॥

समस्तदेवतादुर्गः प्रपन्नाशानिपञ्जरः।

समस्तदेवकवचं सर्वदेवशिरोमणिः॥ ५३॥

समस्तभवनिर्भिन्नो भगवान्बिष्टरश्रवाः।

विभुस्सर्वहितोऽप्यर्को हतारिः सुरतिप्रदः॥ ५४॥

सर्वदैवतजीवेशो ब्राह्मणादिनियोजकः।

ब्रह्माशम्भुपरार्द्धाढ्यो ब्रह्मज्येष्ठः शिशुः स्वराट्॥ ५५॥

p. 571) विराङ्भक्तपराधीनः स्तुत्यः सर्वार्त्थसाधकः।

सर्वार्त्थकर्त्ता कृत्यज्ञः स्वार्त्थकृत्यसदोज्झितः॥ ५६॥

सदानवस्सदाभद्रः सदाशान्तः सदाशिवः।
सदाप्रियः सदातुष्टः सदापुष्टः सदार्च्चितः॥ ५७॥

सदापूतः पावनाग्रो वेदगुह्यो वृषाकपिः।
सहस्रनामा त्रियुगश्चतुम्मूर्त्तिश्चतुर्भुजः॥ ५८॥

भूतभव्यभवन्नाथो महापुरुषपूर्वतः।
नारायणो मुञ्जकेशः सर्वयोगविनिस्सृतः॥ ५९॥

वेदसारो यज्ञसारः सामसारस्तपोनिधिः।
साध्यश्रेष्ठपुराणर्षिर्निष्ठाशान्तिपरायणः॥ ६०॥

शिवस्त्रिशूलविध्वंसी श्रीकण्ठैकवरप्रदः।
नरकृष्णो हरिर्द्धर्मनन्दनो धर्मजीवनः॥ ६१॥

आदिकर्त्ता सर्वसत्यः सर्वस्त्रीरत्नदर्पहा।
विकालो जितकन्दर्प उर्व्वशीदृङ्मुनीश्वरः॥ ६२॥

आद्यकविर्हयग्रीवः सर्ववागीश्वरेश्वरः।

सर्वदेवमयो ब्रह्मगुरुर्वाग्ग्मीश्वरीपतिः॥ ६३॥

अनन्तविद्याप्रभवो मूलाविद्याविनाशकः।
सर्वार्हणो जगज्जाड्यनाशको मधुसूदनः॥ ६४॥

अनन्तमन्त्रकोटीशः शब्दब्रह्मैकपावकः।
आदिविद्वान्वेदकर्त्ता वेदात्मा श्रुतिसागरः॥ ६५॥

ब्रह्मार्त्थवेदाभरणः सर्वविज्ञानजन्मभुः।
विद्याराजो ज्ञानराजो ज्ञानसिन्धुरखण्डधीः॥ ६६॥

मत्स्यदेवो महाशृङ्गो जगद्बीजविहित्रधृक्।
लीलाव्याप्तानिलाम्भोधिश्चतुर्वेदप्रवर्त्तकः॥ ६७॥

आदिकूर्मोऽखिलाधारस्तृणीकृतजगद्भवः।
अमरीकृतदेवौघः पीयूषोत्पत्तिकारणम्॥ ६८॥

आत्माधारो धराधारो यज्ञाङ्गो धरणीधरः।
हिरण्याक्षहरः पृथ्वीपतिः श्राद्धादिकल्पकः॥ ६९॥

समस्तपितृभीतिघ्नः समस्तपितृजीवनम्।

हव्यकव्यैकभुग्भव्यो गुणभव्यैकदायकः॥ ७०॥

लोमान्तलीनजलधिः क्षोभिताशेषसागरः।

महावराहो यज्ञघ्नध्वंसनो याज्ञिकाश्रयः॥ ७१॥

नरसिंहो दिव्यसिंहः सर्वारिष्टार्त्तिदुःखहा।

p. 572) एकवीरोऽद्भुतबलो यन्त्रमन्त्रैकभञ्जनम्॥ ७२॥

ब्रह्मादिदुःसहज्योतिर्युगान्ताग्न्यतिभीषणः।

कोटिवज्राधिकनखो गजदुष्प्रेक्षमूर्त्तिधृक्॥ ७३॥

मातृचक्रप्रमथनो महामातृगणेश्वरः।

अचिन्त्योऽमोघवीर्याढ्यः समस्तासुरघस्मरः॥ ७४॥

हिरण्यकशिपुच्छेदी कालः सङ्कर्षणः पतिः।

कृतान्तवाहनः सद्यःसमस्तभयनाशनः॥ ७५॥

सर्वविघ्नान्तकः सर्वसिद्धिदः सर्वपूरकः।

समस्तपातकध्वंसी सिद्धमन्त्राधिकाह्वयः॥ ७६॥

भैरवेशो हरार्त्तिघ्नः कालकल्पो दुरासदः।
दैत्यगर्ब्भस्रावितामा स्फुटब्रह्माण्डवर्जितः॥ ७७॥

स्मृतिमात्राखिलत्राता भूतरूपो महाहरिः।
ब्रह्मचर्मशिरः पट्टदिक्पालोऽर्द्धाङ्गभूषणः॥ ७८॥

द्वादशार्कशिरोधामा रुद्रशीर्षैकनूपुरः।
योगिनीग्रस्तगिरिजारतो भैरवतर्ज्जकः॥ ७९॥

वीरचक्रेश्वरोऽत्युग्रो यमारिः कालसँवरः।
क्रोधेश्वरो रुद्रचण्डीपरिवादी सुदुष्टभाक्॥ ८०॥

सर्वाक्षः सर्वमृत्युश्च मृत्युर्म्मृत्युनिवर्त्तकः।
असाध्यस्सर्वरोगघ्नः सर्वदुर्ग्रहसौम्यकृत्॥ ८१॥

गणेशकोटिदर्पघ्नो दुःसहोऽशेषगोत्रहा।
देवदानवदुर्द्धर्षो जगद्भक्ष्यप्रदः पिता॥ ८२॥

समस्तदुर्गतित्राता जगद्भक्षकभक्षकः।

उग्रेशोऽसुरमार्ज्जारः कालमूषकभक्षकः॥ ८३॥

अनन्तायुधदोर्द्दण्डो नृसिंहो वीरभद्रजित्।
योगिनीचक्रगुह्येशः शक्रारिः पशुमांसभुक्॥ ८४॥

रुद्रो नारायणो मेषरूपशङ्करवाहनः।
मेषरूपी शिवत्राता दुष्टशक्तिसहस्रभुक्॥ ८५॥

तुलसीवल्लभो वीरोऽचिन्त्यमायोऽखिलेष्टदः।
महाशिवः शिवो रुद्रो भैरवैककपालभृत्॥ ८६॥

भिल्लश्चक्रेश्वरश्चक्रो दिव्यमोहनरूपधृक्।
गौरीसौभाग्यदो मायानिधिर्म्मायाभयापहः॥ ८७॥

ब्रह्मतेजोमयो ब्रह्मश्रीमयश्च त्रयीमयः।
सुब्रह्मण्यो बलिध्वंसी वामनोऽदितिदुःखहा॥ ८८॥

उपेन्द्रो नृपतिर्विष्णुः कश्यपान्वयमण्डनः।
p. 573) बलिस्वराज्यदः सर्वदेवविप्रात्मदोच्युतः॥ ८९॥

उरुक्रमस्तीर्त्थपादस्त्रिदशश्च त्रिविक्रमः।

व्योमपादः स्वपादाम्भःपवित्रितजगत्त्रयः॥ ९०॥

ब्रह्मेशाद्याभिवन्द्याङ्घ्रिर्द्रुतकर्माऽद्रिधारणः।

अचिन्त्याद्भुतविस्तारो विश्ववृक्षो महाबलः॥ ९१॥

बहुमूर्द्धापराङ्गच्छिद् भृगुपत्नीशिरोहरः।

पापस्तेयः सदापुण्यो दैत्येशो नित्यखण्डकः॥ ९२॥

पूरिताखिलदेवेशो विश्वार्थैकावतारकृत्।

अमरो नित्यगुप्तात्मा भक्तचिन्तामणिः सदा॥ ९३॥

वरदः कार्त्तवीर्यादिराजराज्यप्रदोऽनघः।

विश्वश्लाघ्योऽमिताचारो दत्तात्रेयो मुनीश्वरः॥ ९४॥

परशक्तिसमायुक्तो योगानन्दमदोन्मदः।

समस्तेन्द्रारितेजोहृत्परमानन्दपादपः॥ ९५॥

अनसूयागर्भरत्नो भोगमोक्षसुखप्रदः।

जमदग्निकुलादित्यो रेणुकाद्भुतशक्तिहृत्॥ ९६॥

मातृहत्याघनिर्ल्लेपः स्कन्दजिद्विप्रराज्यदः।
सर्वक्षत्रान्तकृद्वीरदर्पहा कार्त्तवीर्यजित्॥ ९७॥

योगी योगावतारश्च योगीशो योगतत्परः।
परमानन्ददाता च शिवाचार्ययशःप्रदः॥ ९८॥

भीमः परशुरामश्च शिवाचार्यैकविश्वभूः।
शिवाखिलज्ञानकोशी भीष्माचार्योऽग्निदैवतः॥ ९९॥

द्रोणाचार्यगुरुर्विश्वजैत्रधन्वा कृतान्तकृत्।
अद्वितीयतमोमूर्त्तिर्ब्रह्मचर्यैकदक्षिणः॥ १००॥

मनुश्रेष्ठः सतांसेतुर्महीयान्वृषभो विराट्।
आदिराजः क्षितिपिता सर्वरत्नकदोहकृत्॥ १०१॥

पृथुजन्माद्येकदक्षो ह्रीः श्रीः कीर्त्तिः स्वयंधृतिः।
जगद्वृत्तिप्रदश्चक्रवर्त्तिश्रेष्ठो दुरस्त्रधृक्॥ १०२॥

सनकादिमुनिप्रापद्भगवद्भक्तिवर्द्धनः।

वर्णाश्रमादिधर्माणाङ्कर्त्ता वक्ताप्रवर्त्तकः॥ १०३॥

सूर्यवंशध्वजारामो राघवः सद्गुणार्णवः।
ककुत्स्थवीरताधर्मो राजधर्मधुरन्धरः॥ १०४॥

नित्यसुस्थाशयः सर्वभद्रग्राही शुभैकदृक्।
नवरत्नं रत्ननिधिः सर्वाध्यक्षो महानिधिः॥ १०५॥

p. 574) सर्वश्रेष्ठाश्रयः सर्वशस्त्रास्त्रग्रामवीर्यवान्।
जगद्वशी दाशरथिः सर्वरत्नाश्रयो नृपः॥ १०६॥

धर्मः समस्तधर्मस्थो धर्मद्रष्टाऽखिलार्त्तिहृत्।
अतीन्द्रोज्ञानविज्ञानपारदृश्वा क्षमाम्बुधिः॥ १०७॥

सर्वप्रकृष्टः शिष्टेष्टो हर्षशोकाद्यनाकुलः।
पित्राज्ञा त्यक्तसाम्राज्यः सपत्नोदयनिर्भयः॥ १०८॥

गुहादेशार्पितैश्वर्यः शिवस्पर्द्धाजटाधरः।
चित्रकूटाप्तरत्नाद्रिजगदीशो रणेचरः॥ १०९॥

यथेष्टामोघशस्त्रास्त्रो देवेन्द्रतनयाक्षिहा।
ब्रह्मेन्द्रादिनतैषीको मारीचघ्नो विराधहा॥ ११०॥

ब्रह्मशापहताशेषदण्डकारण्यपावनः।
चतुर्दशसहस्राख्यरक्षोघ्नैकशरैकभृत्॥ १११॥

खरारिस्त्रिशिरोहन्ता दूषणघ्नो जनार्दनः।
जटायुषोग्निगतिदः कबन्धस्वर्गदायकः॥ ११२॥

लीलाधनुः कोट्यपास्तदुन्दुभ्यस्थिमहाचयः।
सप्ततालव्यथाकृष्टध्वजपातालदानवः॥ ११३॥

सुग्रीवराज्यदो धीमान् मनसैवाभयप्रदः।
हनूमद्रुद्रमुख्येशः समस्तकपिदेहभृत्॥ ११४॥

अग्निदैवत्यबाणैकव्याकुलीकृतसागरः।
सम्लेच्छकोटिबाणैकशुष्कनिर्दग्धसागरः॥ ११५॥

सनागदैत्यधामैकव्याकुलीकृतसागरः।
समुद्राद्भुतपूर्वैकबद्धसेतुर्यशोनिधिः॥ ११६॥

असाध्यसाधको लङ्कासमूलोत्कर्षदक्षिणः।

वरदप्तजनस्थानपौलस्त्यकुलकृन्तनः॥ ११७॥

रावणघ्नः प्रहस्तच्छित्कुम्भकर्णाभिदुग्रहा।

रावणैकमुखच्छेत्ता निश्शङ्केन्द्रैकराज्यदः॥ ११८॥

स्वर्गास्वर्गत्वविच्छेदी देवेन्द्रादिन्द्रताहरः।

रक्षोदेवत्वहृद्धर्माधर्महर्म्यः पुरुष्टुतः॥ ११९॥

नातिमात्रदशास्यारिर्दत्तराज्यविभीषणः।

सुधासृष्टिमृताशेषस्वसैन्यजीवनैककृत्॥ १२०॥

देवब्राह्मणनामैकधाता सर्वामरार्चितः।

ब्रह्मसूर्येन्द्ररुद्रादिवन्द्योऽर्चितः सताम्प्रियः॥ १२१॥

अयोध्याखिलराज्यार्हस्सर्वभूतमनोहरः।

p. 575) स्वाम्यतुल्यकृपादत्तो हीनोत्कृष्टैकसत्प्रियः॥ १२२॥

स्वपक्षादिन्यायदर्शी हीनार्थोऽधिकसाधकः।

व्याधव्याजानुचितकृत्तावकोऽखिलतुष्टिकृत्॥ १२३॥

पार्वत्यधिकयुक्तात्मा प्रियात्यक्तसुरारिजित्।
साक्षात्कुशलवत्सद्मेन्द्राग्निनातोपराजितः॥ १२४॥

कोशलेन्द्रो वीरबाहुः सत्यार्थस्त्यक्तसोदरः।
यशोदानन्दनो नन्दी धरणीमण्डलोदयः॥ १२५॥

ब्रह्मादिकाम्यसान्निध्यसनाथीकृतदैवतः।
ब्रह्मलोकाप्तचाण्डालाद्यशेषप्राणिसार्थपः॥ १२६॥

स्वर्णीतगर्द्दभश्वादिचिरायोध्याबलैककृत्।
रामाद्वितीयः सौमित्रिलक्ष्मणप्रहृतेन्द्रजित्॥ १२७॥

विष्णुभक्ताशिवांहःक्षित्पादुकाराज्यनिर्वृतः।
भरतोऽसह्यगन्धर्वकोटिघ्नो लवणान्तकः॥ १२८॥

शत्रुघ्नो वैद्यराडायुर्वेदगर्भौषधीपतिः।
नित्यानित्याकरो धन्वन्तरिर्यज्ञो जगद्धरः॥ १२९॥

सूर्यविघ्नः सुराजीवो दक्षिणेशो द्विजप्रियः।
छिन्नमूर्द्धोपदेशार्कतनूजकृतमैत्रिकः॥ १३०॥

शेषाङ्गस्थापितनरः कपिलः कर्दमात्मजः।
योगात्मकध्यानभङ्गसगरात्मजभस्मकृत्॥ १३१॥

धर्मो विश्वेन्द्रसुरभीपतिः शुद्धात्मभावितः।
शम्भुत्रिपुरदाहैकस्थैर्यविश्वरथोद्धतः॥ १३२॥

विश्वात्माऽशेषरुद्रार्थशिरश्च्छेदाक्षताकृतिः।
वाजपेयादिनामाग्निर्वेदधर्मपरायणः॥ १३३॥

श्वेतद्वीपपतिः साङ्ख्यप्रणेता सर्वसिद्धिराट्।
विश्वप्रकाशितध्यानयोगो मोहोतमिस्रहा॥ १३४॥

भक्तशम्भुजितो दैत्यामृतवापीसमस्तपः।
महाप्रलयविश्वैकोऽद्वितीयोखिलदैत्यराट्॥ १३५॥

शेषदेवः सहस्राक्षः सहस्राऽङ्घ्रिशिरोभुजः।
फणीफणिफणाकारयोजिताभ्यम्बुदक्षितिः॥ १३६॥

कालाग्निरुद्रजनको मुसलास्त्रो हलायुधः।

नीलाम्बरो वारुणीशो मनोवाक्कायदोषहा॥ १३७॥

स्वसन्तोषतृप्तिमात्रः पातितैकदशाननः।

p. 576) बलिसँयमनो घोरो रौहिणेयः प्रलम्बहा॥ १३८॥

मुष्टिकघ्नो द्विविदहा कालिन्दीभेदनो बलः।

रेवतीरमणः पूर्वभक्तिरेवाच्युताग्रजः॥ १३९॥

देवकीवसुदेवोत्थोऽदितिकश्यपनन्दनः।

वार्ष्णेयः सात्वतांश्रेष्ठः शौरिर्यदुकुलोद्वहः॥ १४०॥

नराकृतिः पूर्णब्रह्म सव्यसाची परंतपः।

ब्रह्मादिकामनानित्यजगत्पर्वतशैशवः॥ १४१॥

पूतनाघ्नः शकटभिद्यमलार्ज्जुनभञ्जनः।

वत्सासुरारिः केशिघ्नो धेनुकारिर्ग्गवीश्वरः॥ १४२॥

दामोदरो गोपदेवो यशोदानन्दकारकः।

कालीयमर्द्दनः सर्वगोपगोपीजनप्रियः॥ १४३॥

लीलागोवर्द्धनधरो गोविन्दो गोकुलोत्सवः।
अरिष्टमथनः कामोन्मत्तगोपीविमुक्तिदः॥ १४४॥

सद्यः कुवलयापीडघाती चाणूरमर्द्दनः।
कंसारिरुग्रसेनादिराज्यस्थाप्यरिहाऽमरः॥ १४५॥

सुधर्माङ्कितभूलोको जरासन्धवलान्तकः।
त्यक्तभक्तजरासन्धभीमसेनयशःप्रदः॥ १४६॥

सान्दीपनिमृतापत्यदाता कालान्तकादिजित्।
रुक्मिणीरमणो रुक्मिशासनो नरकान्तकृत्॥ १४७॥

समस्तनरकत्राता सर्वभूपतिकोटिजित्।
समस्तसुन्दरीकान्तोऽसुरारिर्ग्गरुडध्वजः॥ १४८॥

एकाकीजितरुद्रार्कमरुदापोऽखिलेश्वरः।
देवेन्द्रदर्पहा कल्पद्रुमालंकृतभूतलः॥ १४९॥

बाणबाहुसहस्रच्छित्स्कन्धाद्रिगणकोटिजित्।
लीलाजितमहादेवो महादेवैकपूजितः॥ १५०॥

इन्द्रात्थार्ज्जुननिर्ब्भर्त्सुर्ज्जयदः पाण्डवैकधृक्।
काशीराजशिरश्छेत्ता रुद्रशक्त्येकमर्द्दनः॥ १५१॥

विश्वेश्वरप्रसादाढ्यः काशीराजसुतार्द्दनः।
शम्भुप्रतिज्ञापाता च स्वयम्भूगणपूजकः॥ १५२॥

काशीशगणकोटिघ्नो लोकशिक्षाद्विजार्च्चकः।
शिवतीव्रतपोवश्यः पुराशिववरप्रदः॥ १५३॥

गयासुरप्रतिज्ञाधृक् स्वांशशङ्करपूजकः।
शिवकन्याव्रतपतिः कृष्णरूपः शिवारिहा॥ १५४॥

महालक्ष्मीवपुर्गौरीत्राणो देवलवातहा।
p. 577) विनिद्रमुचुकुन्दैकब्रह्मास्त्रयुवनाश्वहृत्॥ १५५॥

अक्रूरोऽक्रूरमुख्यैकभक्तस्वच्छन्दमुक्तिदः।
सबालस्त्रीजलक्रीडामृतवापीकृतार्णवः॥ १५६॥

यमुनापतिरानीतपरिणीतद्विजात्मकः।
श्रीदामशङ्कुभक्तार्त्थभूम्यानीतेन्द्रभैरवः॥ १५७॥

दुर्व्वृत्तशिशुपालैकमुक्तिको द्वारकेश्वरः।
आचाण्डालादिकम्प्राप्यद्वारकानिधिकोटिकृत्॥ १५८॥

ब्रह्मास्त्रदग्धगर्ब्भस्थपरीक्षिज्जीवनैककृत्।
परिणीतद्विजसुतानेतार्ज्जुनमदापहः॥ १५९॥

गूढमुद्राकृतिग्रस्तभीष्माद्यखिलगौरवः।
पार्त्थार्त्थखण्डिताशेषदिव्यास्त्रः पार्त्थमोहभृत्॥ १६०॥

ब्रह्मशापच्छलध्वस्तयादवो विभवावहः।
अनङ्गो जितगौरीशो रतिकान्तः सदेप्सितः॥ १६१॥

पुष्पेषुर्विश्वविजयी स्मरः कामेश्वरीपतिः।
उषापतिर्विश्वहेतुर्विश्वतृप्तोऽधिपूरुषः॥ १६२॥

चतुरात्मा चतुर्वर्णश्चतुर्वेदविधायकः।

चतुर्विश्वैकविश्वात्मा सर्वोत्कृष्टासुकोटिषु॥ १६३॥

आश्रयात्मा पुराणर्षिर्व्यासः शास्त्रसहस्रकृत्।
महाभारतनिर्माता कवीन्द्रो बादरायणः॥ १६४॥

कृष्णद्वैपायनः सर्वपुरुषार्त्थकबोधकः।
वेदान्तकर्त्ता ब्रह्मैकव्यञ्जकः पुरुवंशकृत्॥ १६५॥

बुद्धो ध्यानजिताशेषदेवदेवो जगत्प्रियः।
निरायुधो जगज्जैत्रः श्रीधनो दुष्टमोहनः॥ १६६॥

दैत्यदेवबहिष्कर्त्ता वेदार्त्थश्रुतिगोपकः।
शुद्धोदनिर्न्नष्टदिष्टः सुखदः सदसत्पतिः॥ १६७॥

यथायोग्याखिलकृपः सर्वशून्योऽखिलेष्टदः।
चतुष्कोटिपृथक्तत्त्वं प्रज्ञापारमितेश्वरः॥ १६८॥

पाषण्डश्रुतिमार्गेण पाषण्डश्रुतिगोपकः।
कल्की विष्णुयशः पुत्रः कलिकालविलोपकः॥ १६९॥

समस्तम्लेच्छहस्तघ्नः सर्वशिष्टद्विजातिकृत्।
सत्यप्रवर्त्तको देवद्विजदीग्घर्क्षुधापहः॥ १७०॥

अश्वरावादिवेदेन पृथ्वीदुर्गतिनाशनः।
सद्यःक्ष्मानन्तलक्ष्मीकृन्नष्टनिःशेषधर्मकृत्॥ १७१॥

p. 578) अनन्तस्वर्गयागैकहेमपूर्णाखिलद्विजः।
असाध्यैकजगच्छास्ता विश्ववन्द्यो जयध्वजः॥ १७२॥

आत्मातत्त्वाधिपः कर्त्तृश्रेष्ठो विधिरुमापतिः।
भर्त्तुःश्रेष्ठः प्रजेशाग्र्यो मरीचिजनकाग्रणीः॥ १७३॥

कश्यपो देवाराडिन्द्रः प्रह्लादो दैत्यराङ्शशी।
नक्षत्रेशो रविस्तेजः श्रेष्ठः शुक्रः कवीश्वरः॥ १७४॥

महर्षिराङ्भृगुर्विष्णुरादित्येशो बलिः स्वराट्।
वायुर्वह्निः शुचिः श्रेष्ठः शङ्करो रुद्रराङ्गुरुः॥ १७५॥

विद्वत्तमश्चित्ररथो गन्धर्वाग्र्यो वसूत्तमः।
वर्णादिरग्र्यास्त्रीगौरीशक्त्यग्र्याश्रीश्च नारदः॥ १७६॥

देवर्षिराट् पाण्डवाग्र्योऽर्जुनो नारदवादराट्।
पवनः पवनेशानो वरुणो यादसाम्पतिः॥ १७७॥

गङ्गातीर्थोत्तमोद्धृतञ्छत्रकाग्र्यँव्वरौषधम्।
अन्नं सुदर्शनास्त्राग्र्यो वज्रप्रहरणोत्तमम्॥ १७८॥

उच्चैःश्रवा वाजिराज ऐरावत इमेश्वरः।
अरुन्धत्येकपत्नीशो ह्यश्वत्थोऽशेषवृक्षराट्॥ १७९॥

अध्यात्मविद्याविद्यात्मा प्रणवञ्छन्दसाँवरः।
मेरुर्गिरिपतिर्मार्गो सामाग्र्यः कालसत्तमः॥ १८०॥

दिनाद्यात्मा पूर्वसिद्धिः कपिलः सामवेदराट्।
तार्क्ष्यः खगेन्द्र ऋत्वग्र्यो वसन्तः कल्पपादपः॥ १८१॥

दातृश्रेष्ठः कामधेनुरार्त्तिघ्नाग्र्यः सुरोत्तमः
चिन्तामणिर्गुरुश्रेष्ठो माताहिततमः पिता॥ १८२॥

सिंहो मृगेन्द्रो नागेन्द्रो वासुकिर्भूधरो नृपः।

वर्णेशो ब्राह्मणश्चान्तःकरणाग्र्यन्नमो नमः॥ १८३॥

इत्येतद्वासुदेवस्य विष्णोर्न्नाम सहस्त्रकम्।
सर्वापराधशमनम्परम्भक्तिविवर्द्धनम्॥ १८४॥

अक्षयब्रह्मलोकादिसर्वर्त्थास्त्यैकसाधनम्।
विष्णुलोकैककसोपानं सर्वदुःखविनाशनम्॥ १८५॥

समस्तसुखदं सत्यम्परन्निर्वाणदायकम्।
कामक्रोधादिनिश्शेषमनोमलविशोधनम्॥ १८६॥

शान्तिदम्पावनन्नृणाम्महापातकिनामपि।
सर्वेषाम्प्राणिनामाशु सर्वाभीष्टफलप्रदम्॥ १८७॥

p. 579) सर्वविघ्नप्रशमनं सर्वारिष्टविनाशनम्।
घोरदुःखप्रशमनन्तीव्रदारिद्र्यनाशनम्॥ १८८॥

तापत्रयापहञ्जुह्यन्धनधान्ययशस्करम्।
सर्वैश्वर्यप्रदं सर्वसिद्धिदं सर्वकालदम्॥ १८९॥

तीर्थयज्ञतपोदानव्रतकोटिफलप्रदम्।
अप्रज्ञजाड्यशमनं सर्वविद्याप्रवर्त्तकम्॥ १९०॥

राज्यदं राज्यकामानां रोगिणां सर्वरोगनुत्।
वन्ध्यानां सुतदञ्चाशु सर्वश्रेष्ठफलप्रदम्॥ १९१॥

अस्त्रग्रामविषध्वंसि ग्रहपीडाविनाशनम्।
माङ्गल्यम्पुण्यमायुष्यं श्रवणात्पठनाज्जपात्॥ १९२॥

सकृदस्याखिला वेदाः साङ्गा मन्त्राश्च कोटिशः।
पुराणशास्त्रं स्मृतयः पठिताः पाठितास्तथा॥ १९३॥

जप्त्वाऽस्य श्लोकार्द्धम्पादँव्वा पठतः प्रिये।
नित्यं सिद्यति सर्वेषामचिरात्किमुतोऽखिलम्॥ १९४॥

प्राणेन सदृशं सद्यः प्रत्यहं सर्वकर्मसु।
इदम्भद्रे त्वया गोप्यम्पाठ्यं स्वार्थैकसिद्धये॥ १९५॥

नावैष्णवाय दातव्यँव्विकल्पोपहतात्मने।
भक्तिश्रद्धाविहीनाय विष्णुसामान्य दर्शिने॥ १९६॥

देयम्पुत्राय शिष्याय शुद्धाय हितकाम्यया।
मत्प्रसादादृते नेदं ग्रहीष्यन्त्यल्पमेधसः॥ १९७॥

कलौ सद्यः फलङ्कल्पग्राममेष्यति नारद।
लोकानाम्भाग्यहीनानाँय्येन दुःखँव्विनश्यति॥ १९८॥

क्षेत्रेषु वैष्णवेष्वेतदार्यावर्त्ते भविष्यति।
परं सत्यन्नास्ति विष्णोः परं सत्यन्नास्ति विष्णोः परम्पदम्॥ १९९॥

नास्ति विष्णोः परं ज्ञानन्नास्ति मोक्षो ह्यवैष्णवः।
नास्ति विष्णोः परो मन्त्रो नास्ति विष्णोः परन्तपः॥ २००॥

नास्ति विष्णोः परन्ध्यानन्नास्ति मन्त्रो ह्यवैष्णवः।
किन्तस्य बहुभिर्म्मन्त्रैः किञ्जपैर्ब्बहुविस्तरैः॥ २०१॥

वाजपेयसहस्रैः किं भक्तिर्यस्य जनार्द्दने।
सर्वतीर्त्थमयो विष्णुः सर्वशास्त्रमयः प्रभुः॥ २०२॥

सर्वक्रतुमयो विष्णुः सत्यं सत्यँव्वदाम्यहम्।

p. 580) आब्रह्मसारसर्वस्वं सर्वमेतन्मयोदितम्॥ २०३॥

श्रीपार्वत्युवाच

धन्यास्म्यनुगृहीतास्मि कृतार्थास्मि जगद्गुरो।
यन्मयेदं श्रुतं स्तोत्रं त्वद्रहस्यं सुदुर्ल्लभम्॥ २०४॥

अहो बत महत्कष्टं समस्तसुखदे हरौ।
विद्यमानेऽपि सर्वेशे मूढाः क्लिश्यन्ति संसृतौ॥ २०५॥

यमुद्दिश्य सदा नाथो महेशोपि दिगम्बरः।
जटिलो भस्मलिप्ताङ्गस्तपस्वी विक्षितो जनैः॥ २०६॥

अतोऽधिको न देवोऽस्ति लक्ष्मीकान्तान्मधुद्विषः।
यत्तत्त्वञ्चिन्त्यते नित्यन्त्वया योगीश्वरेण हि॥ २०७॥

अतः परङ्किमधिकम्पदं श्रीपुरुषोत्तमात्।
तमविज्ञाय तान्मूढा यजन्ते ज्ञानमानिनः॥ २०८॥

मुषितास्मि त्वया नाथ चिरँय्यदयमीश्वरः।

प्रकाशितो न मे यस्य दत्ताद्या दिव्यशक्तयः॥ २०९॥

अहो सर्वेश्वरो विष्णुः सर्वदेवोत्तमोत्तमः।
भवदादिगुरुर्म्मूढैः सामान्य इव लक्ष्यते॥ २१०॥

महीयसां हि माहात्म्यम्भजमानान् भजंति चेत्।
द्विषतोऽपि तथा पापानुपेक्ष्यन्ते क्षमालयाः॥ २११॥

मयापि बाल्ये स्वपितुः प्रजा हृष्टा बुभुक्षिताः।
दुःखादशक्ताः स्वम्पोष्टुं श्रिया नाध्यासिताः पुरा॥ २१२॥

त्वया सँवर्द्धिताभिश्च प्रजाभिर्विबुधादयः।
विशसद्भिः स्वशक्त्याद्याः ससुहृन्मित्रबान्धवाः॥ २१३॥

त्वया विना क्व देवत्वङ्क धैर्यं क्व परिग्रहः।
सर्वे भवन्ति जीवन्तो यातनाः शिरसि स्थिताः॥ २१४॥

तामृतेनैव धर्मार्त्थौ कामो मोक्षोऽपि दुर्ल्लभः।
क्षुधितानान्दुर्गतानाङ्कुतो योगसमाधयः॥ २१५॥

सा च संसारसारैका सर्वलोकैकपालिका।

वश्या सा कमला यस्य त्यक्त्वा त्वामपि शङ्कर॥ २१६॥

श्रिया धर्मेण शौर्येण रूपेणार्जवसम्पदा।

सर्वातिशयवीर्येण सम्पूर्णस्य महात्मनः॥ २१७॥

कस्तेन तुल्यतामेति देवदेवेन विष्णुना।

यस्यांशांशकभागेन विना सर्वं विलीयते॥ २१८॥

p. 581) जगदेतत्तथा प्राहुर्दोषायेतद्विमोहिताः।

नास्य जन्म जरा मृत्युर्न्नाप्राप्यँव्वार्त्थमेव वा॥ २१९॥

तथापि कुरुते धर्मान्पालनाय सतां कृते।

विज्ञापय महादेवम्प्रणम्यैकम्महेश्वरम्॥ २२०॥

अवधार्य तथा साऽहं कान्त कामद शाश्वत।

कामाद्यासक्तचित्तत्वात्किन्तु सर्वेश्वर प्रभो॥ २२१॥

त्वन्मयत्वात्प्रसादाद्वा शक्नोमि पठितुन्न चेत्।

विष्णोस्सहस्रनामैतत्प्रत्यहँव्वृषभध्वज।

नाम्नैकेन तु येन स्यात्तत्फलम्ब्रूहि मे प्रभो॥ २२२॥

श्रीमहादेव उवाच

रामरामेति रामेति रमे रामे मनोरमे।
सहस्रनाममितातुल्यं रामनाम वरानने॥ २२३॥

अतः सर्वाणि तीर्थानि जलञ्चैव प्रयागजम्।
विष्णोर्न्नाम सहस्रस्य कलान्नार्हन्ति षोडशीम्॥ २२४॥

इति नारदपञ्चरात्रोक्तं श्रीविष्णोर्न्नामसहस्रं समाप्तम्॥

इति विष्णुतन्त्रं समाप्तम्

इति श्रीशाक्तप्रमोदस्समाप्तः

ग्रन्थस्य विषयानुक्रमणिका

कालीध्यानं तदुक्तं परमिह लिखितं चित्रिताङ्गञ्च काल्या

यन्त्रोद्धारस्सयन्त्रो मनुरपि कथितः सोद्धृतिः पूजनञ्च।
सङ्क्षिप्तं चाप्यनल्पं स्तुतिरपि कथिता चापराधार्द्दनी च॥
नाम्नां साहस्त्रमुक्तं शतमुपनिषदावर्महृच्चोक्तमत्र॥ १॥

तारायाः पूजनं स्तोत्रमिह हि गदितँव्वर्म चोक्तँव्वरेण्यं
तत्पश्चाद्घृत्समुक्तं परमुपनिषदष्टोत्तरम्पूतनाम्नाम्॥

यन्नात्प्रोक्तन्तदीयं शतमिह शुभदन्तत्सहस्त्रञ्च
रम्यन्तारारूपन्तमोघ्नन्त्वरितफलकरषोडशीयन्तथैव॥ २॥

लक्ष्म्या लालित्ययुक्तं सकलमपि तथा सुक्तमत्रादिकञ्च धूमा
धर्मार्त्थयुक्तन्तदिह च भुवनाभक्तिदञ्छिन्नमस्ता॥

p. 582)
शत्रुच्छेदप्रदन्तद्बलयुतबगलाबुद्धिदम्भैरवीयम्मातङ्गी
माननीयँय्यजनमथ नुतिर्वर्म हृत्प्रोक्तमत्र॥ ३॥

नाम्नामष्टोत्तँयच्छतमिह लिखितन्तत्सहस्त्रम्परञ्च पूजा प्रोक्ता
कुमार्याः स्तुतिरपि कथिता वर्म तत्तर्पणञ्च।

होमो दानम्बलेश्च प्रचरितमिह वै शोभि शाक्तप्रमोदे प्राप्ते

दौर्लभ्यमेषामिह तु समुदितं सर्वमेकत्र लभ्यम्॥ ४॥

ध्यानन्तदुक्तञ्चित्रञ्च यन्त्रमन्त्रौ च कीर्त्तितौ॥
सोद्धारो दशविद्यानामस्मिञ्छाक्तप्रमोदके॥ ५॥

विष्णोर्ध्यानं सचित्रँय्यजनविधिरपि स्तोत्रमस्मिन्स-वर्म
हृत्प्रोक्तञ्चापि युक्तं सममुपनिषदाष्टोत्तरन्नाम तस्य।
मन्त्रोग्रन्देवगोप्यं शतमिह लिखितञ्चापि नाम्नां सहस्रं
सोद्धारौ यन्त्रमन्त्रावहृदयमखिलन्तादृशन्तच्च देव्याः॥ ६॥

एतत्सर्वङ्गणेशेश्वरहृदयविहीनं समुक्तं
सदस्मिन्मार्त्तण्डस्यापि तादृक्सकलमिह परं हृच्च सूक्तेन युक्तम्।
नास्त्यस्मिंस्तस्य चोग्रोपनिषदवगता बोद्ध्यमेतद्विचित्रं
सर्वन्तूपात्तमस्मिन्सकलबुधजनैर्यद्यथास्थानलब्धम्॥ ७॥

षड्वेदाङ्केन्दु (१९४६) युक्ते शरदि विधुदिने सत्तिथौ षण्मुखस्य अक्षे
पक्षे सुमासे जयसुखशुभदे माधवे मानवानाम्।
ग्रन्थः शाक्तप्रमोदोऽगमदयमखिलः सम्प्रदेशः समाप्तिं
श्रीदेवैर्न्नन्दनान्तैर्न्नृपकुलकमलाहस्करैः सुप्रणीतः॥ ८॥

इति ग्रन्थस्य विषयाः समाप्ताः